हैदराबादप्रांतस्थ-उस्मानाबादनिवासिगांधीकस्तूरचंद्रस्यात्मज

बालचंद्रस्य स्मरणार्थं।

श्रीपरमात्मने नमः।

सनातनजैनग्रंथमालायाः

सप्तमांकं।

श्रीमद्भट्टाकलंकदेवविरचितं

तत्त्वार्थराजवार्तिकं।

(३)

प्रकाशिका--

काशीस्थ-भारतीयजैनसिद्धांतप्रकाशिनी संस्था।

संपादक :-

श्रीयुत पंडित गजाधरलालजैन-न्यायशास्त्री।

तथा

श्रीयुत पंडित मक्खनलालजैनसिद्धांतशास्त्री।

श्रीपरमात्मने नमः ।

सनातनजैनग्रंथमाला ।

४

आचार्यवर्यश्रीमद्भट्टाकलंकदेवविरचितं

तत्त्वार्थराजवार्त्तिकं ।

श्रीयुत न्यायतीर्थपंडितगजाधरलालजैन साहित्यशास्त्रिणा

संपादितं

तच्च

उस्मानाबादनिवासिस्वर्गीयश्रेष्ठिवर्यकस्तूरचंद्रस्यात्मजबालचंद्रस्य स्मरणार्थं

श्रीभारतीयजैनसिद्धांतप्रकाशिनीसंस्थाया मंत्रिणा

श्रीपन्नालालजैनेन

काशीस्थचंद्रप्रभानाम्नि मुद्रणयंत्रालये मुद्रापितं ।

श्रीवीरनिर्वाणसंवत्सरः २४४१ । खिष्टाब्दः १९१५ ।

Printed by Gauri Shankar Lal Manager,
at the Chandraprabha Press Benares City
Published by Pannalal Jain Benares

प्रस्तावना ।

सहृदयप्राज्ञप्रवर ! अद्य समुपतिष्ठते नाम स्वयंकष्टायमानमपि शुद्धतमग्रंथसाहाय्याभावात्कष्टत-
रमयमिममु श्रीमद्राजवार्तिकं यथामति संपाद्य श्रीमतां पुरस्तात् । इदं च भगवदुमास्वामि (उमास्वाति)
प्रविनिर्गतस्यार्हतसिद्धांतक्षीरार्णवमथनसमुद्धृतघृतकल्पस्य **श्रीमोक्षशास्त्रस्य** झटिति स्फुटतमार्थप्रति-
पादिका महती टीका । न केवलं दिगंबरजैनसमाज एव मोक्षशास्त्रस्य (तत्त्वार्थसूत्रस्य) गरीयसी समाद-
रविश्रुतिश्च परं सहयोगिनोऽपि श्वेतपटप्रभृतयः समामनंति तद्बहुलतमया निष्ठया । सूत्राणां वृद्धिह्रासपरि-
वर्तनपक्षमवलंब्य संशेरते कतिपये, भगवदुक्तं मूलभूतं किमिति ? तदन्यत्

तत्त्वार्थराजवार्तिकं

दिगंबरसमाजे टीकैषा विशेषतया राजवार्तिकनाम्ना विश्रूयते । ग्रंथप्रणेत्रा तु भगवदकलंकदेवेन—

प्रणम्य सर्वविज्ञानमहास्पदमुरुश्रियं ।
निर्धौतकल्मषं वीरं वक्ष्ये तत्त्वार्थवार्तिकं ॥ १ ॥

पद्येनामुना तत्त्वार्थवार्तिकाभिधया व्यश्रावि, तत्र कारणमिदं निर्णीयते श्रीमद्भट्टाकलंकविरचित-
वार्तिकानां झटितिप्रतिपत्तिद्योतकैः प्रमितैश्चाक्षरैः दुष्प्रतिपाद्यतमस्य विषयस्य प्रतिपादनशैलीं सरलामनु-
भाव्य समादाय च नामैकदेशपक्षे भक्तिस्रोतोऽन्तःपातिततया केनापि विदुषा भवेत्प्रदत्तं वार्तिकानां
प्रभावस्फोरणाय राजवार्तिकमिति तदीयं नाम ।

मोक्षशास्त्रस्य प्रस्फुटतत्त्वार्थप्रतिपादकत्वात् तत्त्वार्थसूत्रनाम्नापि जागर्ति विश्रुतिः । तस्योपरिष्टादेव
वार्तिकस्यास्य विरचितत्वात्, वार्तिकमिदं मान्यस्य विज्ञायीति प्रस्फुटप्रतिपत्तये च, देवस्तु तत्त्वार्थवार्तिकनाम्ना
टीकामिमां व्याजहार । ननु ग्रंथनामनि मा कश्चित्संशयिष्टेत्यस्माभिस्तदीयं नाम तत्त्वार्थराजवार्तिकमिति
समुद्बोधि । अस्यैव वार्तिकस्य तत्त्वार्थवार्तिकालंकारः, राजवार्तिकालंकारश्चेति द्वे नामनी अपि स्तः

तत्त्वस्वरूपस्य परमनिःश्रेयसज्ञानोपयोगित्वाच्छास्त्रेऽस्मिन् प्रामुख्येन मोक्षस्वरूपमेव भगवान् व्यवे-
क्षीत् । तत्र यद्यपि केचित् सुप्रतिभाः षड्विंशतितत्त्वानि व्याजह्रुः, अन्ये च सप्ततत्त्वानि षट्तत्त्वानि
वा, अपरे षडधिकदशतत्त्वानि, एकं तत्त्वं च परे । किंत्वार्हतनये मूले जीवाजीवेतितत्त्वद्वये विवेच्यमाने,
आस्रवबंधयोः संसारोत्पत्तिप्रधानहेतुत्वेन संवरनिर्जरयोश्च परमनिःश्रेयसपरमकारणत्वेन जीवाजीवास्रवबंध
संवरनिर्जरामोक्षेतितत्त्वसप्तकं समुपवर्णितं, पराभिमततत्त्वानामत्रैवांतर्भावविभावनात् तथा च सूत्रितं—

जीवाजीवास्रवबंधसंवरनिर्जरामोक्षास्तत्त्वं ॥४॥

ननु तत्त्वस्वरूपस्य परमनिःश्रेयसज्ञानोपयोगित्वमसिद्धं सर्वैर्मोक्षाभ्युपगंतृभिस्तत्त्वानां साक्षात्परंपर-
या वा तत्कारणत्वेनोल्लिखितत्वात् तद्यथा—

**धर्मविशेषप्रसूतद्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां
तत्त्वज्ञानान्निःश्रेयसाधिगम इति** काणादाः **प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्क-
निर्णयवादजल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति**
गौतमीयाः **प्रकृतिपुरुषविवेको मोक्ष इति** कापिलाः । **'आनंदं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते'**
इत्यागमप्रामाण्यात् **आनंदरूपो मोक्ष** इति वेदांतिनः । एवमन्येऽप्यास्तिकमन्याः तत्त्वस्वरूपस्य परमनि-

श्रेयसज्ञानानुकूलत्वमभिमन्यंते । आर्हता अपि क्षायिकसम्यग्दर्शनादिस्वस्वभावाभिव्यक्तिमार्गेमुक्त्याभिमन्य माना मोक्षकारणत्वेन तत्त्वस्वरूप समुल्लिखंति ततश्च तत्त्वस्वरूपस्यावश्यं प्रतिपाद्यत्वेन शास्त्रेऽस्मिन् तत्त्व स्वरूपोपवर्णनं नापार्थकं ।

आर्हतनये ' सन्मात्रं तत्त्वमिति ' तत्त्वलक्षण न्यदर्शि, सच उत्पादव्ययध्रौव्यात्मकं उत्पादव्ययध्रौव्ययुक्तं सदित्यनुशासनात् । नचैतल्लक्षणमव्यापि लक्ष्यमात्रे सत्त्वात् । नाप्यतिव्याप्तं अलक्ष्यवृत्तित्वाभावात् नाप्यसंभवि, अबाधबोधतया लक्ष्ये सत्त्वात् अत्र कश्चित्—

नन्वस्तु घटकटादीनामुत्पादविनाशशालित्वं न त्वात्मनः नित्यत्वाद्विभुत्वाच्च कालादिवत्, यद्यात्मन उत्पादविनाशशालित्वं स्यान्नान्यत्र कालाकाशादौ दंडवारितं स्यान्न घटादिवदात्मनोऽपि तात्विकत्वप्रसंगत्वात् कालाकाशस्य च पक्षांतर्भावविभावनात् तथाहि—

यथा घटोत्पत्तौ प्राच्यस्य मृत्तिकायाः पर्यायरूपस्य पिंडस्य विनाशः, घटपर्यायस्य च समुत्पादः मृत्तिकायाः पर्यायद्वयेऽपि तदवस्थत्वात् ध्रुवता तथा पर्यायपर्यायिणोऽभेदात् पर्यायनाशे द्रव्यनाशस्यापि सभवात् आत्मनोऽपि पूर्वपर्यायेण विनाश उत्तरपर्यायेण प्रादुर्भावः, आत्मत्वेन ध्रुवता । एवं कालाकाशादिष्वपि, पूर्वोत्तरपर्याययोर्विनाशोत्पादाभ्यां—उत्पादव्ययध्रौव्यात्मकत्वस्यानिवार्यत्वात् । एवं सुवर्णपर्यायेषु कटकादिषु पयःपर्यायेषु दध्यादिषु चोत्पादव्ययध्रौव्यात्मकत्वं परिभावनीयं । एनमेव भावं पुरस्कृत्य समुपवर्णयांचक्रिरे भगवत्समंतभद्रस्वामिनः ।

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयं ।
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकं ॥
पयोव्रतो न दध्यात्ति न पयोत्ति दधिव्रतः ।
अगोरसव्रतं नोभे तस्मात्तत्त्वं त्रयात्मकं ॥

ततश्च द्रव्यार्थिकनयमवलंब्य द्रव्यस्य विनाशाभावात् पर्यायार्थिकनयमवलंब्य पर्यायाणां विनाशोत्पादात्कथंचिन्नित्यानित्यत्वमनुसंधेयमात्मनः, कूटस्थानित्यत्वे, अर्थक्रियाया अभावात् । अर्थक्रियायाश्चाभावे तत्त्वस्यापि व्याहन्यमानत्वात् ।

विभुत्वं च परपरिकल्पितमात्मनो नो युक्तियुक्तमवतिष्ठते प्रत्यक्षादिप्रमाणबाधात् शरीरावच्छिन्नात्मन एवाहंप्रत्ययविषयत्वेन तदितरत्रात्मनोऽननुभवात् । न च यद्यन्मध्यमपरिमाणवत्तत्तत्कृतकं यथा घटादीति व्याप्त्या घटादिवदात्मनोऽनित्यत्वापत्तिः ! तथाविधायां व्याप्तौ प्रमाणाभावात् घटादीनामपि सर्वथाऽनित्यत्वानभ्युपगमेनात्मवदेव कथंचिन्नित्यत्वानित्यत्वस्वीकाराद् दृष्टांतस्यानुकूलत्वात् । दूषणमिदं सर्वथा नित्यत्ववादिन एवाधिक्षिपति नास्मान् । एतेन संकोचविकाशशालित्वाद् आत्मनि वस्त्रादिवदनित्यत्वैकांतदूषणमचीक्लृपत् तदपि निरस्तं वस्त्रेऽपि कथंचिन्नित्यत्वानित्यत्वव्यवस्थानान्निदर्शनस्यानुकूलत्वात् ।

नन्वस्त्वात्मनो मध्यमपरिमाणवत्त्वं न नो क्षतिः पर नित्यत्वानित्यत्वादिविरुद्धधर्माधिकरणः स इति तु न युक्तमुत्पश्यामः न हि रजन्यहनी पुंस्त्वस्त्रीत्वे च युगदेकत्र समवस्थिते दृश्यंते ! न एकत्र वस्तुनि नित्यत्वानित्यत्वादिधर्माणामपेक्षया विद्यमानत्वे दोषाभावात् । न वयमभ्यनुजानीमहे यदपेक्षया नित्यत्वं तदपेक्षयैवानित्यत्वं, किं तु द्रव्यार्थिकनयापेक्षया नित्यत्व पर्यायार्थिकनयापेक्षया चानित्यत्वं । यथा एक एव पुमान् पुत्रापेक्षया पिता पित्रपेक्षया पुत्रः, भागिनेयापेक्षया मातुलः, मातुलापेक्षया भागिनेय इति । नचैकत्र पुत्रत्वभागिनेयत्वादिधर्माणामुपलंभादविरुद्धत्वमेवेति वाच्यं । अपेक्षासरणिशरणत्वेनैव तत्राविरुद्धत्वप्रतिभासया नित्यत्वादावपि तथानभ्युपगमे नरपतिनिदेशाभावात् । एवं च एकत्रैव घटे परत्वापरत्वजातिमत्त्वमपि तार्किकोपकल्पितमापनीपद्यते नान्यथा अपेक्षानभ्युपगमे तत्रापि प्रोक्तदूषणानुषंगात् । तथा

१ तिरोभावः । २ आविर्भावः ।

एकस्मिन्नेव वृक्षेऽपेक्षामवलंब्य विरुद्धानामपि कर्तृत्वादिधर्माणां समावेशो दृश्यते तद्यथा—वृक्षस्तिष्ठतीत्यत्र वृक्षस्य पारतंत्र्याभावात् कर्तृत्वं। वृक्षं पश्यतीत्यत्र दर्शनेनाप्तुमिष्यमाणतमत्वात्कर्मत्वं। वृक्षेण चन्द्रमसं विज्ञापयतीत्यत्र ज्ञापकस्य साधकतमत्वाद् वृक्षस्य करणत्वं। वृक्षायोदकमासिंचतीत्यासिच्यमानेनोदकेन वृक्षमभिप्रैतीति संप्रदानं। वृक्षात्पर्णं पततीति ध्रुवमपायेऽपादानमित्यपादानं। वृक्षे वयांसीत्याधारोऽधिकरणमिति। एवमात्मन्यपि, यदोपलब्धिविषयस्तदात्मा प्रमेयं यदा चोपलब्धिसाधनं तदा प्रमाणमिति प्रमेयत्वप्रमाणत्वेति विरुद्धधर्मसमावेशो नापेक्षामादाय विरुध्यते। एव चापेक्षाश्रयणे। प्रमेयता च तुलाप्रामाण्यवदिति, आक्षेपादिकं शास्त्रमपि संगच्छेत नान्यथा ततश्च वस्तुनो याथात्म्यपरिपालनाय नियतमपेक्षा समादेया—

यच्च निदर्शनं दर्शितं रजन्यहनी स्त्रीत्वपुंस्त्वे इति तदपि न नो विरुद्धं रजन्यह्नोरप्येकस्यैवाधिकरणस्य सत्त्वात् मेर्वव्यवहितसौरप्रकाशविलक्षणसंयोगो वासरः। तदभावश्च रजनी तयोश्चैक एवाधारः। स्त्रीत्वपुंस्त्वे अप्येकाधिकरणे विसृष्टपुंस्त्वपर्यायस्यात्मन एवाशुभोदयान्मृतस्य स्त्रीत्वपर्यायेण परिणतत्वात्।

तथा चाभ्युपगम्यमानायामपेक्षायां—

स्यान्नित्य आत्मा १ स्यादनित्यः २ स्यान्नित्यश्चानित्यश्च ३ स्यादवक्तव्यः ४ स्यादस्ति चावक्तव्यः ५ स्यान्नास्ति चावक्तव्यः ६ स्यादस्ति च नास्ति चावक्तव्यश्चेति, नित्यत्वानित्यत्वधर्ममवलंब्य सप्तभंग्यपि समवतिष्ठते एवमास्तित्वनास्तित्वादिषु प्रत्येकस्येयं सप्तभंगी योजनीया ततश्च सिद्ध्यतीदं, कथंचिन्नित्यो विभुश्चात्मा।

अत्राह ननु प्रतिपादितेयं सप्तभंगी न युक्तियुक्ता संशयादीनामधिकरणत्वेनाप्रामाण्यात् तद्यथा—

आत्मा केन स्वरूपेण नित्यः केन चानित्यः? इति संशयः १। यत्रानित्यत्वं तत्र नित्यत्वस्य विरोधो यत्र चानित्यत्वं तत्र नित्यत्वस्य विरोध इति विरोधः २ तथा नित्यत्वस्याधिकरणं द्रव्यमनित्यत्वस्य चाधारः पर्याया इति वैयधिकरण्यं। तथैकांतेन नित्यात्मकत्वेऽनित्यत्वाभावः, अनित्यात्मकत्वे च नित्यत्वाभाव इत्युभयदोषः। तथा येन स्वभावेनात्मनो नित्यत्वं तेनैवानित्यत्वप्रसंगः येन चानित्यत्वं तेन नित्यत्वमपीति संकरप्रसंगः ६ तथा येन स्वभावेनानित्यत्वं तेन नित्यत्वमपि प्राप्नोति येन च नित्यत्वं तेनानित्यत्वमपीति व्यतिकरः ७ तथा येन रूपेण कथंचिन्नित्यत्वं तेन कथंचिदनित्यत्वमपि येन च कथंचिदनित्यत्वं तेन कथंचिन्नित्यत्वमपीत्यनवस्था ८ इति न, अनवबोधात्— तथाहि—

संशयो हि—एकवस्तुविशेष्यकविरुद्धनानाधर्मप्रकारकं ज्ञानं स च सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च जायते यथा स्थाणुर्वा पुरुषो वेत्यत्रोर्द्ध्वतामात्रं सामान्यप्रत्यक्षं। विशेषाप्रत्यक्षं च स्थाणुगतानां वक्रकोटरपतत्रिनीडादीनां, शिरःपाण्यादीनां च पुरुषाधिकरणानां। उभयगतानां च वक्रकोटरशिरःपाण्यादीनां स्मरणमिति तत्र संशयः। न ह्यनेकांतवादे संशयावकाशः स्वरूपपररूपादीनां नित्यत्वानित्यत्वादिधर्माणां प्रत्यर्थमुपलंभाद्विशेषोपलब्धेरप्रतिहतत्वात्। नाप्यनेकांतवादे विरोधगतिः विरोधस्यानुपलंभसाध्यत्वात्। न हि यदा स्वरूपेण वस्तुनि नित्यत्वमुपलभ्यते तदैव पररूपेण तदनित्यत्वानुपलंभः। एकस्मिन्नेव काले स्वरूपादिभिः सत्त्वस्येव पररूपादिभिरसत्त्वस्यापि विद्यमानत्वात्। किंच वध्यघातक—सहानवस्थान-प्रतिबध्यप्रतिबंधकरूपेण त्रिविधो विरोधः तत्र नाद्यः स चैकत्रैकदा विद्यमानयोः संयोगे सति भवति यथा मयूरोरगयोः, अनलसलिलयोश्च। नचैकत्रैकदा नित्यत्वानित्यत्वादीनां समभ्युपगम्यते सत्ता प्रतिवादिना। अभ्युपगम्यमानायां त्वेकत्र वृत्तौ नित्यत्वानित्यत्वादीनां तुल्यबलत्वान्न तत्र विरोधावकाशः। नापि द्वितीयः एकत्र मातुलिंगे श्यामतापीतते इव एकाधिकरणे कालभेदेन वर्त्तमानानां तदभ्युपगमात्। न चैकत्र नित्यत्वानित्यत्वे कालभेदेन वर्तेते विवक्षयां युगपदेवाभ्युपगमात्। नापि तृतीयः–यथा शीतांशुमण्युपस्थितौ दाहाभावाद्दाहप्रतिबंधको मणिर्नैवमस्तित्वसत्त्वे नस्तित्वाभावान्नास्तित्वप्रतिबंधको भवितुमर्हत्यस्तित्वं ततो

१ विभिन्नाधिकरणवृत्तित्वं। २ सर्वेषां युगपत्प्राप्तिः संकरः। ३ परस्परविषयगमनं व्यतिकरः।
४ अप्रामाणिकपदार्थपरंपरापरिकल्पनाविश्रान्त्यभावः।

मात्र कतमस्यापि विरोधस्यावकाशः । नापि वैयधिकरण्यं अबाधबोधे नित्यत्वानित्यत्वयोरेकाधिकरणतया प्रतीयमानत्वात् । नाप्युभयदोषः भेदाभेदयोरन्योन्यनिरपेक्षयोरार्हतमतेऽनभ्युपगमात् । नापि संकरव्यतिकरौ मेचकरत्नादिवत् वस्तुनि नित्यत्वानित्यत्वयोः प्रतीयमानत्वात् । नाप्यनवस्था अनंतधर्मात्मकस्य वस्तुनः स्वयं प्रमाणप्रतिपन्नत्वेनाभ्युपगमेनाप्रामाणिकपदार्थपरंपरापरिकल्पनाविरहात् । ततश्चार्हतं जीवतत्त्वं निरवद्यमभ्युपगतव्यं । तच्च जीवतत्त्वं-आ अध्यायचतुष्टयादवगंतव्यं । तदनंतरं पंचमेध्यायेऽजीवतत्त्वनिरूपणं तच्च धर्माधर्माकाशपुद्गलकालभेदात्पंचविधं तत्र मत्स्यानां सलिलवत् नेत्रांधानां वंशयाष्टिवद्वा जीवपुद्गलानां गमनसहकारी धर्मः । पांथानां छायावत् जीवपुद्गलानां स्थितिसहायकोऽधर्मः । सर्वद्रव्याणामवकाशदानसहकारि गगनं । रूपरसादिधर्मवान् पुद्गलः । सर्वद्रव्याणां वर्तनादिहेतुः कालः इति । तत उत्तरं षष्ठसप्तमाध्याययोरास्रवस्वरूपनिरूपणं येन परिणामेन कर्मास्रवति स आस्रवः" सोऽपि द्रव्यास्रवभावास्रवभेदेन द्विविधः । अष्टमाध्याये बंधस्वरूपप्रतिपादनं सच "कर्मात्मनोरन्योन्यप्रदेशसंश्लेषात्मकः" सोपि प्रकृत्यादिभेदेन चतुर्विधः । नवमेऽधिकारे संवरनिर्जरयोर्वर्णनं तत्र—आस्रवनिरोधः संवरः एकदेशकर्मसंक्षयलक्षणा निर्जरा । दशमे मोक्षस्वरूपाख्यानं सच कृत्स्नकर्मविप्रमोक्षात्मक इति कृतेयं दिग्दृष्टीराजवार्तिकसमुपवर्णितविषयाणां । सर्वेषामनवद्यस्वरूपं तु तत्त्वानां ग्रंथस्य पौर्वापर्यसमालोचनत एव विभोत्स्यते लब्धवर्णपाठकपरिकरः ततः समाशास्महे न मोघीभविष्यति कृतेय नम्रशिरसा समभ्यर्थना विदुषां पुरस्ताद्विलोकयितु पौर्वापर्यांशमेतस्यानवद्यग्रंथस्य ।

ग्रंथसारस्यैतस्य संपादनसमये समभुनजमहं शुद्धग्रंथसाहाय्याभावात् गरीयांसं तापं । अत्र ग्रंथाभावात् मुद्रणयंत्रालयपुस्तिकाऽपि (प्रेसकापी) सिद्धांतपाठशालामोरेनाध्यापकपदविभूषितैः एतत्संपादकपदालंकृतैश्च सुहृद्वरैः सिद्धांतशास्त्रिभिः श्रीमक्खनलालमहोदयैः प्रेषिता तत्रापि प्रतिमूर्तिद्वयमासीद्राजवार्तिकस्य तच्च कथंचिच्छुद्धं ततश्च जातमत्र बहुत्र परिस्खलनं । परंतु महता कष्टेन पुस्तकांतरेभ्यः प्रकाशितमवसाने शुद्ध्यशुद्धिपत्रं ततस्तदवलोक्य भवेयुः पठनपाठनप्रवणा विद्वांस इति विनतशिरोभ्यर्थनं ।

केवलया मुद्रणयंत्रालयपुस्तिकया यदा दुःशकोऽहं संपादयितुं वार्तिकमदस्तदा कृतायां प्रार्थनायां प्रेषिता प्रतिमूर्तिरेका विजयनगर (विजनौर) वास्तव्यैर्विद्वद्वरश्रीबद्रीप्रसादजीमहोदयैः तत्साहाय्याद्बहुस्थलेषु संपादनसाहाय्यमभूत् ततोऽस्म्यहमनुगृहीतमत्र प्रोक्तमहानुभावानां ।

मोरेनासिद्धांतविद्यालयस्थछात्रैः प्रियभ्रातृपंडितपन्नालालसोनिमहोदयैः राजवार्तिकपठनसमये परिश्रम्य संकलय्य बहूनि स्खलितानि प्रेषितान्यस्मत्पार्श्वे ततो मन्यामहे वयं परमसौहार्दं तेषां ।

श्रीयुतजैनहितैषिसंपादयितृभिः पं. श्रीनाथूरामप्रेमिभिः स्वकीये जैनहितैषिपत्रे प्रकाशितं श्रीमद्भट्टाकलंकजीवनचरितमत्र केषुचित्स्थलेषु समवलम्ब्य विलिखितं ततोऽस्म्यहमुपकार्यस्तेषां ।

विदुषामनुचरः—

श्रीगजाधरलाल जैनः

परिचितिः

श्रीमद्भट्टाकलंकस्य ।

सुभावितमेतत्प्रत्यक्षतया यः किल युनक्ति नामात्मनीनजीवनस्य निरर्थकमपि तात्कालिकं कतममंशं यदा परार्थं, लभते सोऽपि नियतममानसन्मानामन्नतां भुवि निरवच्छिन्न, तदा यो जन्मत एव—आपातरमणीयमपि किंपाकफलकल्प वैषयिकसुखमुपेक्षमाणः, अनभिदधानश्च जननीरमणीप्रभृतितः समभ्यर्चितमस्यापि विग्रहस्य विलेपनादिसंस्करणं निदीनजनपरिकरानिरवग्रहोपग्रहमनाः, स कियान् समादरणीयः स्यादिति समभिधानं—अपारपारावारीणावसानीनभूरुहराजिकुसुमसौरभव्यावर्णनमिव दुर्घटं

सुचतुरचेतोनिकर! अद्य समुत्सुजामहे नाम तथाविधमहात्मनीनमेव किमपि चाक्षुषप्रत्यक्षागोचरत्वेऽपि श्रुत्यैव तत्साक्षाद्दर्शनमिव परमतापकरं समुल्लेखयितु! समुल्लेखयिष्यमाणोयं महात्मा न केवलं पीयूषायमाणात्मवाणीपरिकरणैव समयुगीनान्जनान् तुतोष परं गायनयंत्रचूडिकास्विव स्वानघवचनानि तालपत्रादिषु संक्रम्य आ अवसर्पिणीकालं भववर्तिनः प्राणिनः समाह्लादयांचकारेति परमतोषस्थान।

यद्यपि समजनिषत नैके सूरयो दिगंबरजैनसमाजे तथापि तर्कादिविविधविषयासाधारणवैदुष्यपरिपूर्णमतिमत्वात्स्वामिसमंतभद्रस्वामिनोनन्यसाधारणा प्रख्यातिर्जगति विराजते। सतुष्टुवुश्च गुणगरिमाणमिमं प्रभुमनेके सूरयो भिन्नभिन्नागमप्रणेतारः। तद्यथा—

> नमः समंतभद्राय महते कविवेधसे यद्वचोवज्रपातेन निर्भिन्नाः कुमताद्रयः ।
>
> कवीनां गमकानां च वादिनां वाग्मिनामपि यशः सामंतभद्रीयं मूर्ध्नि चूडामणीयते ॥

अमोघवर्षगुरुः, महापुराणकर्ता भगवज्जिनसेनाचार्यः

> सरस्वतीस्वैरविहारभूमयः समंतभद्रप्रमुखा मुनीश्वराः ।
>
> जयंति वाग्वज्रनिपातपाटितप्रतीपराद्धांतमहीध्रकोटयः ॥

महाकविश्रीवादीभसिंहः

> लक्ष्मीभृत्परमं निरुक्तिनिरतं निर्वाणसौख्यप्रदं कुज्ञानातपवारणाय विधृतं छत्रं यथा भासुरं ।
>
> सज्ज्ञानैर्नययुक्तिमौक्तिकरसैः संशोभमानं परं वंदे तद्धतकालदोषममलं सामंतभद्रं मतं ॥

श्रीवसुनंदिसैद्धांतिकचक्रवर्ती

> समंतभद्रादिकवींद्रभास्वतां स्फुरंति यत्रामलसूक्तिरश्मयः ।
>
> व्रजंति खद्योतवदेव हास्यतां न तत्र किं ज्ञानलवोद्धता जनाः ॥

श्रीशुभचंद्राचार्यः

> गुणान्विता निर्मलवृत्तमौक्तिका नरोत्तमैः कंठविभूषणीकृताः ।
>
> न हारयष्टिः परमेव दुर्लभाः समंतभद्रादिभवा च भारती ॥

महाकविश्रीवीरनंदी

परंतु श्रीसमंतभद्रभगवतोऽनंतरं विधातुः किलैतेद्ग्रंथरत्नस्य श्रीमद्भट्टाकलंकस्यैव समवार्तिष्ट भुवि [illegible]यसी विश्रुतिः। प्रस्मर्यते च सर्वतः प्राक् तस्यैव देवस्य नाम। न केवलं कृतिरेव तदीया तन्महत्त्व[illegible]नी समजनि किंतु स्वसामयिकविद्वत्सु तस्य प्रबलदिग्विजयित्वात् तादात्विकार्हतधर्मततिस्तज्जीवना[illegible]ती प्रभाववती सती व्यद्योतिष्ट। तदा—आर्हतपथानुवर्तिषु नूतनजीवनसमारंभः प्रादुर्भूत। [illegible]वायं जीवनप्रभावो यत्—माणिक्यनंदि-प्रभाचंद्र—विद्यानंद—वादिसिंह—कुमारसेनप्रभृतयोऽने[illegible]सूरयः कर्णाटकदेशे समुदपादिषत। चिररक्षुश्च सुगतादिप्रखरपरवादिभ्यः पावनं जैनधर्मं। भट्टाकलंक[illegible]स्य ग्रंथनिर्माणवैदुष्यतोऽपि वाग्मित्वे वक्तृत्वे वादित्वे च प्रबला प्रख्यातिरजायत। तदीया वक्तृत्वशक्तिः [illegible]मोहनशक्तिश्च तदानीमुपमीयतेस्म। महाकविश्रीवादिराजप्रशंसायां—

सदसि यदकलंकः कीर्तने धर्मकीर्तिः
वचसि सुरपुरोधा न्यायवादेऽक्षपादः ।
इति समयगुरूणामेकतः संगतानां
प्रतिनिधिरिव देवो राजते वादिराजः ॥

अमुना पद्येन श्रीद्वङ्कदेवेन समुपमितो वादिराजः कविः । विद्वत्सु विश्रुतत्वादेवः—भट्टाकलंकाभिख्यामश्रौषीत् । तदात्वे भट्ट इत्युपाधिरेवासीत् । कवीत्युपाधिरपि तमभूषयत् । कवीत्युपाधिस्तदा महनीयः समादरणीयश्चोपाधिरासीत्—तदेतत्प्राप्तौ प्रसिद्धोत्तमलेखकानामेव भाग्यं जागर्तिस्म । लघुसमंतभद्रविद्यानंदाभ्यां च महात्मायं सकलतार्किकचूडामणिविशेषणेनास्मारि । अकलंकचंद्रोऽपि तन्नामासीत् ।

केचिद्वदंति-भट्टाकलंकः-जिनदासाभिधजैनब्राह्मणस्य जिनमतीब्राह्मण्याः समुत्पन्नः पुत्र आसीत् । केचिच्च पद्मावत्या लब्धजन्मा पुरुषोत्तममंत्रिणः पुत्र आसीदिति ब्रुवते । परंतु कथाप्रसारकैः देवस्य मातापितृनामानि कल्पनागोचरीभूतानि विधीयंते । तस्य राजपुत्रत्वात् । स्वविरचितेऽस्मिन् राजवर्तिकग्रंथे प्रथमाध्यायस्य ।

जीयाच्चिरमकलंकब्रह्मा लघुहव्वनृपतिवरतनयः ।
अनवरतनिखिलविद्वज्जननुतविद्यः प्रशस्तजनहृद्यः ॥१॥

अनेनामुना पद्येन देवः स्वयमात्मानं लघुहव्वनृपतिजन्मानं समभ्यधत्त । नैहत्यसंशयस्यापि कस्यचिदवकाशः ।

देवस्य जन्मभूमिः कासीदित्यनिर्णीतविषय एव सर्वथा । आराधनाकथाकोषकर्त्रा जन्मभूमिस्तदीया मान्यखेटनगरो न्यदर्शि । परं न तद्युक्तियुक्तं मान्यखेटनगरीयनरपतीनां शृंखलाबद्धनामावल्यां कचिदपि लघुहव्वनृपतेरनुल्लेखात् । संभाव्यमेतन्मान्यखेटं परतो भवेत्कश्चिन्मांडलिकराजा लघुहव्वः । देवः खलु समाजगामैकदा नरपतिसाहसतुंगस्य (शुभतुंगस्य वा) राजधान्यां मान्यखेटे, इति समुपलभ्यते समुल्लेखः । अनुमानमिदं तमेव समुल्लेखं समाश्रित्य आराधनाकथाकोषकृता भवेत् प्रदर्शितं मान्यखेट इति जन्मस्थानं देवस्य । कथाकोषकारः राजपुत्रमपीमं नो व्यज्ञासीत् ततः संभवोयं मन्त्रिपुत्रमेव देवं विज्ञाय तदीयं मान्यखेट इति जन्मस्थानं तेन विलिखितं भवेत् । राजावलीकथे ग्रंथे देवस्य जन्मस्थानं कांची (कांजीवरं) अवाबोधि । भवेत्तदेव समंजसमिति संभावना ।

'राजावलीकथे' इति नामधेयः कन्नडभाषायां कश्चिद्ग्रंथः । ग्रंथेऽस्मिन्नैतिहासिककथानामेव समुल्लेखः । क्रौष्टैकोनविंशतितम (१९) शताब्दस्य प्रारंभे व्यरचि चायं ग्रंथो देवचंद्रकविना कस्य चिन्मैसूरराजवंशीय देवीरभनामकरमण्यर्थं । एनमेव ग्रंथं समवलंब्य राइसमहोदयेन—अकलंकदेवः सुधापुरे देशीयगणस्याचार्यपदे संप्रतितस्थौ । सुधापुरस्थानं च उत्तरकनारायां विद्यते—अद्यत्वेऽपि तत्र सोंद इति संज्ञया विश्रुतो नगर एव प्राचीनं सुधापुरमिति, स्वरचिते इन्स्क्रिपशन्स एट श्रवणबेलगोलाभिधे पुस्तके व्यलेखि । तेनैव राइसमहोदयेन विलसनमहोदयविरचित—मेकेंजीकलेक्शनपुस्तकीयप्रस्तावनां समाधार्येदमपि व्यदीपि-पोनतगनगरस्य बौद्धमहाविद्यालये देवः शिक्षामादत्तवान् स्थानमिदं च त्रिचनूरनिकटस्थं श्रूयते ।

यानि यान्याख्यानान्युपलभ्यंते देवविषयाणि तैरिदमेव विस्तार्यते भट्टाकलंकदेवः जन्मत एव ब्रह्मचर्यं समाराधितवान् । प्राप्तविद्यश्च दिगंबराचार्योपाधिना चकमे । विद्याप्राप्तिकाले च स गरीयस्यो यातना बुभोज । कस्मिंश्चिद्बौद्धमहाविद्यालये ताथागतागममध्यगीष्ट । समभूच्च नंदिसंघाचार्यः । उपरिष्टाद्देवचंद्रेण देशी-

---

१ Vide IDs No 39 Nagat taiuy by Mr. Rice.

२ डा. भांडारकरस्य १८८३-८४ तमसंवत्सरलिखितग्रंथसूचीषु १२२ तमे पृष्ठे कविशब्दस्य परिभाषा दर्शनीया । न्यायकुमुदचंद्रोदयप्रणेता भट्टारकप्रभाचंद्रोऽपि कस्यचिदपि काव्यग्रंथस्याप्रणेतृत्वेऽपि कवीत्युपाधिना विभूषित आसीत् ।

३ भट्टारकोऽपि कश्चिदकलंकनाम्ना भुवि समुपलब्धवान् विश्रुतिं ।

यगणाचार्यत्वेन समभिदधे देवः, भवेदनुमानतः स देवसंघातःपात्येव गणः। परं न तत्र किमपि परिचायकं बलवद्गमकं यतो नाविर्भावयामास देवः क्वापि संघमात्मनीनं । गुरुमपि स्वीयं नोल्लिखयांचकार क्वापि, विदूर आस्तां तदीयगुरुपरंपरोल्लेखः। कविवरमंगराजेन १३५५ तमशकाब्दे विलिखितः कश्चिच्छिलालेखः, तमवलंब्य विज्ञायते नंदिसंघप्रभृतयश्चत्वारः संघा देवस्य पश्चादेव प्रादुरभाविषत । अकलंकदेवासमकालवर्तिनः—भगवत्याराधना - पद्मपुराण—समंतभद्रकृतजिनशतकप्रभृतयो ये ग्रंथा संप्रति समुपलभ्यंते तेषु, तथा देवसमकालीनविभुविद्यानंद—प्रभाचंद – माणिक्यनंदिप्रभृतिविरचितग्रंथेष्वपि न क्वापि संघचतुष्टयमिदमुपवर्णित ततो देवकालीनो न कतमोऽपि तेषु संघः समजनिष्ट । अकलंकदेवश्च न तदात्वे कस्य चित्संघस्याचार्यः समभूत्किंतु समस्तदिगंबरजैनसंघस्याचार्य इति मंगराजकविवचनं सर्वथा सुप्रतीत मेवाभाति । परमेवंविधमपि कविवरमंगराजकथनं बलवत्प्रमाणानि पुरस्कृत्य सर्वथा परीक्षणीयमेव यतः श्रुतावतारकथायां—भट्टदेवाद्बहुलकालपूर्वं विक्रमप्रथमशताब्दिसमभ्यर्णे, आचार्यः श्रीमदर्हद्बलिः संघचतुष्टयमिदं संस्थापयांचकारेति तद्विरोधी समुल्लेखोऽप्यास्ते । अन्यत्रापि वर्वर्ति समुल्लेखोयमिति ।

भट्टदेवः प्रखरतार्किकचूडामणिर्दार्शनिकचूडामणिश्चासीत् । स हि अनन्यजेयात्मनीनवैदुष्यपाटवेन प्रबलबौद्धवादिनः पराभूय जैनधर्मं प्रत्यतिष्टपदिति तदीयप्रबलकार्यं समचीकरत्तदीयां भुवि गरीयसीं विश्रुतिं । अभूत्कदाचिद्देवस्य विवादो नरपतिहिमशीतलपरिषदि । हिमशीतलश्च पल्लववंशीयनरपतिरासीत् राजधानी च तदीया कांच्यां सच बौद्धोऽजायतेत्यत्र न कश्चित्संशयात्रकाशः । देवेन समं वादो दिवससप्तकमभूदिति केषां चिन्मतं । आराधनाकथाकारश्च षण्मासपर्यंतमभूदित्याह परं नात्र संशीतिः सर्वजनचेतस्सु सदा जैनधर्मस्य गरीयान् प्रभावः प्रापसत् । हिमशीतलनृपानिदेशेन च प्रायः सर्वे बौद्धा सीलोनदेशीयकौंडी नगरं निरूसुः । बौद्धाः कौंडीनगरं निवासिता इति समुल्लेखो विल्सनमहोदयैरपि कृतः । वर्तते च बौद्धैः सह वादस्य जिनधर्मविजयस्य च समुल्लेखः श्रवणवेळगोलाप्रशस्ताविरथं ।

> तारा येन विनिर्जिता घटकुटीगूढावतारा समं
> बौद्धैर्योधृतपीडपीडितकुदृग्देवार्थसेवांजलिः ।
> प्रायश्चित्तमिवांघ्रिवारिजरजःस्नानं च यस्याचर
> द्दोषाणां सुगतः स कस्य विषयो देवाकलंकः कृती ॥

भूणिः—यस्येदमात्मनोऽनन्यसामान्यनिरवद्यविभवोपवर्णनमादर्श्यते—

> राजन् साहसतुंग ! संति बहवः श्वेतातपत्रा नृपाः
> किंतु त्वत्सदृशो रणे विजयिनस्त्यागोन्नता दुर्लभाः ।
> तद्वत्संति बुधा न संति कवयो वागीश्वरा वाग्मिनो
> नानाशास्त्रविचारचातुरधियः काले कलौ मद्विधाः ॥
> राजन् सर्वारिदर्पप्रविदलनपटुस्त्वं यथात्र प्रसिद्ध-
> स्तद्वत्ख्यातोहमस्यां भुवि निखिलमदोत्पाटने पंडितानां ।

---

१ ततः परं शास्त्रविदां मुनीनामग्रेसरोभूदकलंकदेवः ।
मिथ्यांधकारस्थगिताखिलार्थाः प्रकाशिता यस्य वचोमयूखैः ॥ १८ ॥
तस्मिन् गते स्वर्गभुवं महर्षौ दिवःपतिं नर्तुमिव प्रकृष्टं ।
तदन्वयोद्भूतमुनीश्वराणां बभूवुरित्थं भुवि संघभेदाः ॥ १९ ॥
स योगिसंघश्चतुरः प्रभेदानासाद्य भूयानविरुद्धवृत्तान् ।
बभावयं श्रीभगवाञ्जिनेंद्रश्चतुर्मुखानीव मिथः समानि ॥ २० ॥
देवनंदिसिंहसेनसंघभेदवर्तिनां देशभेदतः प्रबोधभाजिदेवयोगिनां ।
वृत्ततः समस्ततो विरुद्धधर्मसेविनां मध्यतः प्रसिद्ध एव नांदसंघ इत्यभूत् ॥ २१ ॥

नो चेद्योऽहमेते तव सदसि सदा संति संतो महांतो
वक्तुं यस्यास्ति शक्तिः स वदतु विदिताशेषशास्त्रो यदि स्यात् ॥
नाहंकारवशीकृतेन मनसा न द्वेषिणा केवलं
नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्यबुद्ध्या मया ।
राज्ञः श्रीहिमशीतलस्य सदसि प्रायो विदग्धात्मनो
बौद्धौघान् सकलान्विजित्य सुगतः पादेन विस्फोटितः ॥

समयविचारः ।

यद्यपि न क्वापि देवेन स्ववचनेन स्वसमयो विज्ञापितस्तथापि दृढतरैरनेकैः प्रमाणैः स कृतनिर्णयः—

१ । उपरिष्टात्प्रतिपादितमल्लिषेणप्रशस्तिपद्यैः स्फुटमिदं निर्णीयते यत्समुपतस्थौ कदाचिद्देवोऽकलंकः साहसतुंगनरपतिसदसि । साहसतुंगश्च राष्ट्रकूट (राठोर) वंशीय राजासीत् स च शुभतुंग–कृष्णराज नामभ्यामपि भुवं व्यश्रौसीत् । यदा समभूद्विनिर्माणं जिनसेनहरिवंशपुराणस्य ८४० तमे वैक्रमशताब्दे (७०५ शकशताब्दे) तदा नरपतिकृष्णराजात्मजः—इंद्रायुधो द्वितीयगोविंदो राज्यमचीकरत् ततोऽमुनापि प्रमाणेन नियतं विज्ञायते कृष्णराजस्यैतस्मात्प्राक् राज्यकाल आसीत् । अनेन कृष्णराजनरपतिना ८१० तमविक्रमसंवत्सरात् ८३८ तमसंवत्सरपर्यंतं राज्यं समपादीति डा. भांडारकरमहोदयैरपि स्वनिर्मितदक्षिणेतिहासे प्रकटीकृतं ततोपि निःशल्यं निर्धार्यते देवः श्रीमदकलंकः ८१० तमसंवत्सरात् ८३२ तमसंवत्सरपर्यंते कस्मिंश्चित्काले भुव्यजीवीत् ।

२ । हरिवंशपुराणो व्यरचि ८४० तमे वैक्रमसंवत्सरे श्रीमज्जिनसेनैः । तस्मिंश्च जिनसेनैः कुमारसेनः समुल्लिखितः । कुमारसेनसाहाय्यमासाद्य मामकीनोय —अष्टसहस्र्यभिधो ग्रंथः प्राप वृद्धिमिति विद्यानंदि विभुरपि कुमारसेन समुल्लिखितवान् । विद्यानंदविभुना च अष्टशतीभाष्यमधिकृत्य—अष्टसहस्री विरचिता तथाच प्रमाणेनामुनापि नियत निश्चीयते भट्टाकलंकदेवः ८४०तमसंवत्सरात्प्रागेव समुदपद्यत हरिवंशपुराणरचनाकाले न भवेत्तदस्तित्वमित्यत्रापि न चित्रं ।

३ । अष्टसहस्र्यां नैकत्र प्रसिद्धमीमांसककुमारिलभट्टविदुषो भट्टनाम्ना कृतः समुल्लेखः । भट्टसमयश्च ७५७ तमवैक्रमसंवत्सरात् ८१७ वैक्रमसंवत्सरपर्यंतं कृतनिर्णयः । अतश्च विभुवरविद्यानंदी भट्टसमयुगीनः किंचित्तत्समयानतरोद्भवश्च भवेदित्यनवद्यं निर्णयः । भट्टाकलंकश्च विद्यानंदितः प्राक्कालीनस्ततश्च भट्टदेवास्तित्वसमयेन वैक्रमशताब्देश्चतुर्थपादो नवमशताब्देश्च प्रारंभश्चेति भवितव्यं ।

४ । डा. सतीशचंद्रविद्याभूषणप्रभृतिभिर्विद्वद्भिश्च विद्वान् भट्टाकलंकदेवः ७५० तमे खीष्टाब्दे, अर्थात ८०७ तमविक्रमसंवत्सरमभ्यर्णं बभूवेति निर्णीत ।

५ । अत्र के. बी. पाठकमहोदयानामतिर्मासिद्धांतः ६७५-तमे शकाब्दे महाराष्ट्रकर्णाटकदेशयोः शासकः दंतिदुर्गाभिधः कांश्चदवनिपालः समजायत । तस्य च साहसतुंग इति विरुद आसीत् । तत्समयुगीनश्च बभूव भट्टाकलंकदेवः । राज्ञः श्रीदंतिदुर्गस्य पश्चात् शुभतुंगाभिधयस्तत्पितृव्यो राज्यमचीकरत् । अस्यापि च साहसतुंग इति विरुद आसीत् तत्समकालीनोऽपि देव आसीत् । ततश्च कथाकोषकृता 'देवः शुभतुंगसमयुगीनः समभूदिति प्रकटीकृतं यत् , तत्सर्वथा निरवद्यमेव पूर्वोक्तनरपतिद्वयस्यापि समये देवास्तित्वस्य निश्शंसयं सिद्धत्वादिति ।

देवसमकालीना विद्वांसोऽतेवासिनश्च

श्रीमद्देवसमये भूयसां ननु जैनविदुषां भुवि गरीयान् संदोह आसीत् । यावंतः किल तदात्वे समजीजनन् विद्वांसो–विशेषतया तार्किकविद्वांसो न तावंतः समयांतरे । प्राचीनग्रंथानां शिलालेखानां च दर्शनात् तादात्विकानेकविदुषां नामानि समवतरंति दर्शनपथं ।

कः प्रावर्तिष्ट श्रीमद्देवानां गुरुरित्यानिर्णीतविषय एव सर्वथा परं विज्ञापितमस्माभिः पुरा श्रीमत्पुष्पसेन-सूरिर्बभूव देवानां सतीर्थः सहपाठी वा श्रीमल्लिषेणप्रशस्तिप्रामाण्यात्-तद्यथा—

श्रीपुष्पसेनमुनिरेव पदं महिम्नो
देवः स यस्य समभूत्स भवान्सधर्मा ।
श्रीविभ्रमस्य भवनं ननु पद्ममेव
पुष्पेषु मित्रमिह यस्य सहस्रधामा ॥ १ ॥

अमुना पद्येन विबोध्यते श्रीपुष्पसेनसूरिर्गरीयान्विद्वान्, कश्चिज्जगत्यवातरदिति ।

माणिक्यनंदि-विद्यानंद-प्रभाचंद्राश्चेति त्रयोऽपि सूरयो भगवद्देवसमकालीना एव बभूवुः । स्वकर-विरचितन्यायकुमुदचंद्रोदयस्य प्रथमाध्याये श्रीमत्प्रभाचंद्रप्रभुस्तु 'श्रीमदकलंकगुरुचरणसमभ्यर्णे समस्त-विषयं बोधं प्राप, इति निम्नलिखितेन पद्येन प्रकटयामास तद्यथा—

बोधः कोऽप्यसमः समस्तविषयं प्राप्याकलंकं पदं
जातस्तेन समस्तवस्तुविषयं व्याख्यायते तत्पदं ।
किं न श्रीगणभृज्जिनेंद्रपदतः प्राप्तप्रभावः स्वयं
व्याख्यात्यप्रतिमं वचो जिनपतेः सर्वात्मभाषामयं ॥१॥

प्रभुप्रभाचंद्रेण भगवान् माणिक्यनंद्यपि स्वविरचिते प्रमेयकमलमार्तंडे समस्मारि तद्यथा-

गुरुः श्रीनंदिमाणिक्यो नंदिताशेषसज्जनः ।
नंदताद्दुरितैकांतरजो जैनमतार्णवः ॥ १ ॥

माणिक्यनंदिनं नमस्कुर्वता प्रखरविदुपानंतवीर्येणापि प्रमेयरत्नमालावृत्तिप्रारंभे दर्शितमिदं—

अकलंकवचोऽम्भोधेरुद्दध्रे येन धीमता ।
न्यायविद्यामृतं तस्मै नमो माणिक्यनंदिने ॥

अमुना प्रमाणेन निर्धार्यते भगवान् माणिक्यनंदी देवसमकालीन एव समभूत् । 'अकलंकचरण-सन्निधे निखिलविषयं बोधं प्राप्नुवमहमिति, प्रतिपादकेन भट्टारकप्रभाचंद्रेण भगवान् माणिक्यनंदी गुरुत्वेन संस्मृतस्ततो माणिक्यनंदी देवात्प्राक् समुदपादीति नार्हामः प्रतिपादयितुं ।

प्रभाचंद्रेण प्रमेयकमलमार्तंडे देवेन समं भगवान् विद्यानंदोऽपि समस्मारि ततो भगवान् विद्या-नंद्यपि देवसमकालमेव भुवं कामयांचकार तद्यथा-

सिद्धं सर्वजनप्रबोधजननं सद्योऽकलंकाश्रयं
विद्यानंदसमंतभद्रगुणतो नित्यं मनोनंदनं ।
निर्दोषं परमागमार्थविषयं प्रोक्तं प्रमालक्षणं
युक्त्या चेतसि चिंतयंतु सुधियः श्रीवर्धमानं जिनं ॥ १ ॥

विद्यानंदिविभुना च देवनिर्मिताष्टशत्युपर्येव गूढगभीरतात्पर्यप्रतिपादकः-अष्टसहस्त्र्यभिधो ग्रंथो निर्ममे-तत्र प्रमाणं—

श्रीमदकलंकशशधरविवृतां समंतभद्रोक्तिमत्र संक्षेपात् ।
परमागमार्थविषयामष्टसहस्त्रीं प्रकाशयति ॥

अतश्च-अकलंकदेवप्रभृतीनां सूरीणाममुना प्रकारेण क्रमः संघट्यते-अकलंकदेवः, माणिक्य-नंदी, विद्यानंदः, प्रभाचंद्र इति । आचार्यचतुष्टयेऽप्यस्मिन् भगवान् भट्टाकलंकदेव एव पूज्यपदाश्रितः । भगवान् माणिक्यनंदी नोल्लिखितवान् कतमेऽपि स्वकरलालितग्रंथे विद्यानंदिनं । नापि प्रभाचंद्रविभुः क्वापि विद्यानंदं गुरुत्वेन समभ्यधात्ततः प्रमाणेनामुना प्राक्कालीनत्वमेव विद्यानंदतो भगवतो माणिक्यनंदिनः ।

१ अत्र देवपदं भट्टाकलंकदेवं सूचयति-एतत्पद्यप्राच्यपद्येन स्पष्टीभवत्ययमर्थः ।

कुमारसेनवादीभसिंहौ सूरी अपि देवकालीनावेवाजायतां । विभुर्विद्यानंदी–अष्टसहस्र्यंते 'कुमारसेनभट्टारकसाहाय्यतः सववृधे मामकीनोऽयं ग्रंथ' इति कुमारसेनं संस्मृतवान् । हरिवंशपुराणनिर्माता विद्वद्वरजिनसेनोपि कुमारसेनप्रशंसायामिदं समश्लोकयत्

आकूपारं यशोलोके प्रभाचंद्रोदयोज्वलं ।
गुरोः कुमारसेनस्य विचरत्यजितात्मकं ॥ ३८ ॥

मल्लिषेणप्रशस्तिकारश्च बहुलप्रभाववत्त्वेन कुमारसेनमुनिं समभ्यष्टौत्—तथा हि—

उदेत्य सम्यग्दिशि दक्षिणस्यां कुमारसेनो मुनिरस्तमाप ।
तत्रैव चित्रं जगदेकभानोस्तिष्ठत्यसौ तस्य तथा प्रकाशः ॥

कविवरवादीभसिंहस्य 'श्रीमता वादीभसिंहनोपलालितामाप्तमीमांसां' अमुना वाक्येन—अष्टसहस्र्युत्थानिकायां कृतः समुल्लेखो विराजते । अमुमेव महात्मानं वादीभसिंहं, जिनसेनस्वामी वादिसिंहनाम्ना समुदलेखयत् तद्यथा—

कवित्वस्य परा सीमा वाग्मित्वस्य परं पदं ।
गमकत्वस्य पर्यंतो वादिसिंहोऽर्च्यते न कैः ॥

वीरसेनस्वामी महापुराणकर्तुर्भगवज्जिनसेनाचार्यस्य गुरुरासीत् यद्यपि तदीया बलवती विश्रुतिः सिद्धांतवेत्तृत्व एव तथापि स पावनात्मा प्रबलन्यायापारकूपारो नैयायिकः समभूत—अष्टसहस्र्यंते भगवान् विद्यानदस्तार्किकरूपेणैवामुं संस्तुतवात् । उत्तरपुराणनिर्मात्राप्ययं प्रास्तुतामुनापद्येन—

तत्र वित्रासिताशेषप्रवादिमदवारणः ।
वीरसेनाग्रणीर्वीरसेनभट्टारको बभौ ॥

तदात्वे परवादिमल्लदेवनाम्ना कश्चिदपरोऽपि तार्किकविद्वान् भुवि विश्रुतः सोऽपि कृष्णराज (साहसतुंग) समक्षं कदाचित्समुपातिष्ठदिति समुपलभ्यते समुल्लेखो मल्लिषेणप्रशस्तौ । तद्यथा—

घटवादघटाकोटिकोविदं कोविदां प्रवाक् ।
परवादिमल्लदेवो देव एव न संशयः ॥

येनेयमात्मनामधेयनिरुक्तिरुक्ता नामप्रष्टवंतं कृष्णराज प्रति—

गृहीतपक्षादितरः परः स्यात्तद्वादिनस्ते परवादिनः स्युः ।
तेषां हि मल्लः परवादिमल्लस्तन्नाम सन्नाम वदंति सतः ॥

कश्चित्—श्रीपालनाम्नापि तदानीं विश्रुतविद्वान् बभूव तं च जिनसेनस्वामी भट्टाकलकविद्यानंदाभ्यां समं समुल्लिखितवान् । जयधवलसिद्धांतस्य वीरसेनीया महती टीका विदुषा श्रीपालेनैव समपादि । तस्मिन्नेव समये कुमारनंदिभट्टारकोऽपि कश्चित्समुपालभे भुवि जन्म नदीयग्रंथस्य कंचिच्छ्लोकं विभुर्विद्यानंदी समुद्दध्रे क्वचित्प्रमाणपरीक्षायां स्वकरकलितायां । अनया प्रमाणपरिपाट्या जिनधर्मनिकेतनस्तंभायमानैर्भूयोभिर्विद्वद्भिर्निष्कलकतया प्राभाविपत जैनमार्गः, न कश्चिदपि तदानीं पावनार्हतमताभिघाताय समुद्यद्ग्रीवः पुमान् प्रादुरासीद्भुवि ।

ग्रंथनिर्माणं ।

अष्टशती—प्रणीतेष्वपि भूयस्सु गूढगभीरानवद्यतात्पर्यप्रतिपादकेषु ग्रंथेषु श्रीमदकलंकदेवानां सर्वतो विश्रुतोयं ग्रंथः । स्वामिसमंतभद्रविरचितगंधहस्तिमहाभाष्यमंगलाचरणस्य देवागमस्तोत्रस्य भाष्यभूतश्चायं ।

राजवार्तिकं—टीकैषा श्रीमद्भगवदुमास्वामिविरचिततत्त्वार्थसूत्रस्योपरिष्टात् । श्लोकसंख्या चैतस्य १६००० सहस्रपरिमिता ।

न्यायविनिश्चयः—प्रामाणिकप्रबलतर्कग्रंथोऽयं देवस्य। विराजते चायं ग्रंथः—**आरासिद्धांतभवने** **श्रीमद्**वादिराजनिर्मितवृत्तिविभूषितः। मूलग्रंथो न्यायविनिश्चयः पद्यात्मकः।

लघीयस्त्रयी—भट्टारकप्रभाचंद्रविरचितो न्यायकुमुदचंद्रोदयः, अस्यैव **ग्रंथस्य** विस्तृतं भाष्यमिदं।

बृहत्त्रयी—(बृहद्त्रयी) लघीयस्त्रयी बृहत्त्रयी द्वावपीमौ **ग्रंथौ** निरवे, इत्युपनामविभूषितानां **पंडितकल्पाभरमाप्पामहोदयानां** सन्निधौ **कोल्हापुरे** वर्तेते।

न्यायचूलिका—अयमपि **ग्रंथो** देवस्येति प्राप्यते समुल्लेखः।

अकलंकस्तोत्रं—(अकलंकाष्टकं) देवस्यैव निर्मितमिद स्तोत्रं परं तन्निर्मितत्वे संशीतिर्भूयसां।

अकलंकप्रायश्चित्तं—अकलंकप्रतिष्ठापाठश्च देवेनैव निर्मिताविति वर्तते भुवि विश्रुतिः परं भ्रांति**रेवेयं महती** तद्ग्रंथयोर्निस्सारत्वात् युक्तिवहिर्भूतत्वाच्च। एवंविधयुक्तिशून्यग्रंथयोः प्रणेता देवः सम**जनीति** कलंकीकरणं देववैदुष्यस्य। **स्वरूपसंबोधनाभिधस्तदीयः** कश्चिद्ग्रंथ इति प्रादुरभावि डा. **सतीशचंद्र**विद्याभूषणमहोदयैः, परं नावसीयते ग्रंथः प्राप्योऽप्राप्यो वायं।

कथाग्रंथेषु यद्यपि देवस्य जीवनवृत्तमपि समुपलभ्यते परं विवादास्पदत्वात्तस्य नोल्लेखयितुमभीष्यते—

श्रीमदुमास्वामी

मूलग्रंथः किलैतस्य तत्त्वार्थराजवार्तिकस्य तत्त्वार्थसूत्रापरनामधेयो मोक्षशास्त्राभिधः। मोक्षशास्त्र**प्रणेता** भगवान् **उमास्वामी-उमास्वातिर्वा**। कदायं पावनात्मा विभूषयामासात्मनीनजीवनेन भारतभूमि**मिति निर्णयाय** न पारयामो वयमस्खलिततया। महात्मायं दिक्पटसमाजे भगवदुमास्वामीत्यभिधया **भिहितः**। **संबंधिनस्तु** श्वेतपटा **इममेव** भगवंतं—उमास्वातीत्यभिदधति। भगवल्लपनाविभूतेषु दिक्पटा**भिमतेषु सूत्रेष्वपि** परिवृद्धिः परावृत्तिरल्पीयस्ता च दृश्यते, ततश्च भगवानयं दिगंबराचार्यः श्वेतांबरसूरिर्वा **बभूवेति महीयसी** संशीतिरपि तदीयकालादिनिर्णयप्रतिबंधिका। एवंविधप्रखरप्रतिभस्य भगवतो जीवने**तिहासोवश्यमुल्लेखार्ह** इति तदीयजीवनेतिवृत्तमाविर्भावयितुं समुद्युंजाना अपि वयं न शेकिमः सामग्र्यभावा**दिति परिदूयते नश्चेतोऽनवलोकितपाराकूपारांतरालगतपोतकोटिसमुपविष्टपतत्रिण इव**। परं नात्र संशयः **भगवज्जीवना**विर्भावाय समारम्भ्यमाणे प्रयत्ने यदि तत्त्वार्थवार्तिकतात्पर्यनिदर्शकः श्लोकवार्तिकालंकारः **प्रकाशपदवीमुपानेष्यत्** नियतं पाठकसंदोहस्तत्र तदद्रक्ष्यदिति ततः क्षमां प्रार्थयमाना वयमत्रैव विरमामः—

अत्र विदुषामग्रेसराः के. बी. पाठकमहोदयाः

भगवदुमास्वामिविरचितं मोक्षशास्त्रमुभयोरपि दिक्पटश्वेतपटयोः समादरणीयं। समनुमीयते विनिर्माणं **किलैतन्मोक्ष**शास्त्रस्य दिक्पटश्वेतपटप्रभेदात्प्रागेव अर्थात् खिष्टीयसंवत्सरात्प्रागेव समभूदिति प्रतिपादयंति।

विनीतो
गजाधरलालः।

राजवार्तिकीयसूत्राणामकाराद्यनुक्रमः ।

सूत्राणि — पृष्ठसंख्या

इति सूत्रसूची समाप्ता ।

श्री तत्त्वार्थराजवार्तिकस्य विषयानुक्रमणिका ।

प्रथमोऽध्यायः ।

इति पंचमोऽध्यायः ।

षष्ठोऽध्यायः ।

इति सप्तमोऽध्यायः ।

अथाष्टमोध्यायः

इति नवमोऽध्यायः ।

अथ दशमोऽध्यायः ।

इति दशमोऽध्यायः ।

समाप्तोयं विषयानुक्रमः श्रीराजवार्तिकस्य ।

प्रकरणसूचिका ।

इति प्रकरणसूचिका समाप्ता ।

नमः सिद्धेभ्यः ।

सनातनजैनग्रंथमाला ।

४.

श्रीमद्भट्टाकलंकदेवविरचितं

तत्त्वार्थराजवार्तिकं ।

प्रणम्य सर्वविज्ञानमहास्पदमुरुश्रियं ।
निर्धौतकल्मषं वीरं वक्ष्ये तत्त्वार्थवार्तिकं ॥१॥

श्रेयोमार्गप्रतिपित्सात्मद्रव्यप्रसिद्धेः ॥ १ ॥ उपयोगस्वभावस्यात्मनः श्रेयसा योक्ष्यमाणस्य प्रसिद्धौ सत्यां तन्मार्गप्रतिपित्सोत्पद्यते ।

कथं चिकित्साविशेषप्रवृत्तिवत् ॥ २ ॥ यथा व्याधिनिवृत्तिजफलश्रेयसा योक्ष्यमाणस्य चिकित्सा-प्रसिद्धौ चिकित्सामार्गविशेषप्रतिपित्सोत्पद्यते तथात्मद्रव्यप्रसिद्धौ श्रेयोमार्गप्रतिपित्सेति । तस्मात्सार्धा-ङ्गमार्गव्याख्या न्याय्यभवति किं च ।

सर्वार्थप्रधानत्वात् ॥ ३ ॥ संसारिणः पुरुषस्य सर्वेष्वर्थेषु मोक्षः प्रधानं, प्रधाने च कृतो यत्न-वान् भवति तस्मात्तन्मार्गोपदेशः कार्यः, तदर्थत्वात् ।

मोक्षोपदेशः पुरुषार्थप्रधानत्वादितिचेन्न जिज्ञासमानार्थिप्रश्नापेक्षिप्रतिवचनसद्भावात् ॥४॥ आह मोक्षोपदेश एव कार्यो न मार्गोपदेशः कस्मात्पुरुषार्थप्रधानत्वात् सर्वश्रेयोभ्यः पुंसां मोक्ष एव परं श्रेयः आत्यंतिकानुपमश्रेयस्त्वादिति तन्न जिज्ञासमानार्थिप्रश्नापेक्षिप्रतिवचनसद्भावात्, योसौ मोक्षेणार्थी जिज्ञासमानः स मार्गमेव पृष्टवान् न मोक्षमतस्तन्मार्गोपदेश एव न्याय्यः ।

मोक्षमेव कस्मान्नाप्राक्षीदिति चेन्न कार्यविशेषसंप्रतिपत्तेः ॥ ५ ॥ स्यादेतदयं पृष्टा मोक्षमेव कस्मान्न पृष्टवान् कैमर्थक्यान्मार्गं पृष्टवानिति तन्न कार्यविशेषसंप्रतिपत्तेः । मोक्षकार्ये प्रति सर्वेषां सद्वादिनां संप्रतिपत्तिर्न कारणं प्रति ।

कारणं तु प्रति विप्रतिपत्तिः पाटलिपुत्रमार्गविप्रतिपत्तिवत् ॥ ६ ॥ यथा केचित्पुरुषा नानादिग्भागापेक्षिषु मार्गेषु विप्रतिपद्यंते न पाटलिपुत्रे प्राप्तव्ये । तथा मोक्षकार्ये प्रतिपद्य तदर्थमादृताः सर्वे सद्वादिनस्तत्कारणेषु विप्रतिपद्यंते । तद्यथा केचित्तावदाहुः ज्ञानादेव मोक्ष इति । अपर आहुः ज्ञानवैराग्याभ्यामिति । पदार्थावबोधो ज्ञानं । विषयसुखानभिष्वंगलक्षणं वैराग्यमिति । अपर आहुः क्रियात एव मोक्ष इति "नित्यकर्महेतुकं निर्वाणमिति–वचनात्" किं च ।

पराभिप्रायनिवृत्त्यशक्यत्वात् ॥ ७ ॥ न च परस्य पृष्टुः प्रश्नाभिप्रायोऽस्मदादिभिः शक्यो निवर्तयितुं । माप्राक्षीर्मार्गं मोक्षं पृच्छेति चेन्न भिन्नरुचित्वाल्लोकस्य ।

कल्पनाभेदात्तद्विप्रतिपत्तिरिति चेन्न कर्मविप्रमोक्षसामान्यात् ॥ ८ ॥ आह न मोक्षं प्रति संप्रतिपत्तिरस्ति किंतु विप्रतिपत्तिरेव कस्मात्? कल्पनाभेदात् अन्येऽन्यथालक्षणं मोक्षं परिकल्पयंति रूपवेदनासंज्ञासंस्कारविज्ञानपंचकस्कंधनिरोधादभावो मोक्ष इति। गुणपुरुषांतरोपलब्धौ प्रतिस्वप्रलुप्तविवेकज्ञानवदनभिव्यक्तचैतन्यस्वरूपावस्था मोक्ष इत्यपरे। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारनवात्मगुणात्यंतोच्छेदो मोक्ष इत्यन्ये। तस्मात्कल्पनाभेदान्मोक्षं प्रति विप्रतिपत्तिरिति तन्न कर्मविप्रमोक्षसामान्यात्सर्वेषां हि प्रवादिनां यां तामवस्थां प्राप्य कृत्स्नकर्मविप्रमोक्ष एव मोक्षोभिप्रेत इति आस्माकीनसमयाविरोधान्मोक्षकार्यं प्रति संप्रतिपत्तिः।

कार्यविशेषोपलंभात्कारणान्वेषणप्रवृत्तिरिति चेन्न अनुमानतस्तत्सिद्धेर्घटीयंत्रभ्रांतिनिवृत्तिवत् ॥ ९ ॥ आह कार्यविशेषमुपलभ्य लौकिकाः कारणान्वेषणं प्रति आद्रियंते यथा ज्वरादिरोगदर्शनात्तत्कारणान्वेषणे भिषक् प्रवर्तते चिकित्साप्रसिद्धयर्थं। तथा मोक्षदर्शनात्तत्कारणान्वेषणं न्याय्यं, न चासौ दृश्यते तस्मान्मोक्षकारणान्वेषणाभाव इति तन्न अनुमानतस्तत्सिद्धेः। प्रत्यक्षतोनुपलभ्यमानस्यापि मोक्षकार्यस्यानुमानत उपलब्धौ मोक्षकारणान्वेषणं युक्तं घटीयंत्रभ्रांतिनिवृत्तिवत्। यथा बलीवर्दपरिभ्रमणापादितारगर्तभ्रांतिं घटीयंत्रभ्रांतिजनिकां बलीवर्दपरिभ्रमणाभावे चारगर्तभ्रांत्यभावाद्घटीयंत्रभ्रांतिनिवृत्तिं च प्रत्यक्षत उपलभ्य सामान्यतोदृष्टादनुमानाद्बलीबर्दतुल्यकर्मोदयापादितां चतुर्गत्यरगर्तभ्रांतिं शारीरमानसविविधवेदनाघटीयंत्रभ्रांतिजनिकां प्रत्यक्षत उपलभ्य ज्ञानदर्शनचारित्रान्निर्दग्धस्य कर्मण उदयाभावे चतुर्गत्यरगर्तभ्रांत्यभावात्संसारघटीयंत्रभ्रांतिनिवृत्त्या भवितव्यमित्यनुमीयते। यासौ संसारघटीयंत्रभ्रांतिनिवृत्तिः स एव मोक्ष इति तस्मादनुमानतो मोक्षकार्यसिद्धेरध्यवस्यामो मोक्षकारणान्वेषणं न्याय्यमिति किं च।

सर्वशिष्टसंप्रतिपत्तेः ॥ १० ॥ सर्वे शिष्टाः प्रत्यक्षतोनुपलभ्यमानस्यापि मोक्षकार्यस्यानुमानादस्तित्वमभ्युपेत्य प्रतिनियतमोक्षकारणेषु प्रयतंते किंच।

आगमात्तत्प्रतिपत्तेः ॥ ११ ॥ प्रत्यक्षतोनुपलभ्यमानोपि मोक्षः आगमादस्तीति निश्चीयते कथं?

सूर्याचंद्रमसोर्ग्रहणवत् ॥ १२ ॥ यथा सूर्याचंद्रमसोर्ग्रहणममुष्यां वेलायाममुना वर्णेनामुनादिग्भागेन सर्वग्रासि नवेत्येवमादि सांवत्सरैरप्रत्यक्षमप्यागमाज्ज्ञायते तथा मोक्षोपीति किं च।

स्वसमयविरोधः? ॥ १३ ॥ अप्रत्यक्षत्वान्मोक्षो नास्तीति यस्य मतं तस्य स्वसमयविरोधो भवति। सर्वे हि समयवादिनो मोक्षादीनर्थानप्रत्यक्षानभिवांछति।

बंधकारणानिर्देशादयुक्तमिति चेन्न मिथ्यादर्शनादिवचनात् ॥ १४ ॥ स्यादेतदन्यत्र बंधकारणनिर्देशः कृतः विपर्ययाद्बंध इत्यादि। इह तु न कृतस्ततो मोक्षकारणनिर्देशस्यायुक्तिरिति तन्न मिथ्यादर्शनादिवचनात्। वक्ष्यते एत"न्मिथ्यादर्शनाविरतिप्रमादकषाययोगा बंधहेतव" इति।

बंधपूर्वकत्वान्मोक्षस्य, प्राक् तत्कारणनिर्देश इति चेन्न आश्वासनार्थत्वात् ॥ १५ ॥ स्यादारेका प्राङ्मोक्षकारणनिर्देशाद्बंधकारणनिर्देशो न्याय्यः। यतो बंधपूर्वको मोक्ष इति तन्न आश्वासनार्थत्वात्कथं।

बंधनबद्धवत् ॥ १६ ॥ यथा काराबंधनबद्धः प्राणी बंधकारणश्रवणाद्बिभेति। मोक्षकारणश्रवणादाश्वसिति तथा अनादि संसारकारावरुद्ध आत्मा प्रथममेव बंधकारणश्रवणान्माभैषीन्मोक्षकारणश्रवणाच्च कथमाश्वासं यायादिति प्रथमं बंधकारणमनुक्तं, मोक्षकारणोपदेशः कृतः किंच।

मिथ्यावादिप्रणीतमोक्षकारणनिराकरणार्थं वा ॥ १७ ॥ मिथ्यावादिप्रणीतैकद्विमोक्षकारणनिराकरणार्थोयमार्हतो मोक्षकारणनिर्देश आदौ कृतः, त्रयमेतत् संगतं मोक्षमार्गो नैकशो द्विशो वेति। अतो विपर्ययमात्रप्रभवां संसारप्रक्रियां परिकल्प्य ज्ञानविशेषात्तद्विनिवृत्तिरिति +

एवमाद्यनेकमिथ्यावादिप्रणीतमतनिवृत्तये त्रैविध्यावजृंभितमोक्षकारणप्रदर्शनार्थमाह—

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः (इति) ॥१॥

अपरे आरातीयपुरुषशक्त्यपेक्षत्वात्सिद्धांतप्रक्रियाऽऽविष्करणार्थं मोक्षकारणनिर्देशसंबंधेन शास्त्रानुपूर्वीं रचयितुमन्विच्छन्निदमवोचदिति आचक्षते । नात्र शिष्याचार्यसंबंधोविवक्षितः । किंतु संसारसागरनिमग्नानेकप्राणिगणाभ्युज्जिहीर्षां प्रत्यागूर्णोऽन्तरेण मोक्षमार्गोपदेशं, हितोपदेशो दुःप्राप इति निश्चित्य मोक्षमार्गं व्याचिख्यासुरिदमाह ।

प्रणिधानविशेषाहितद्वैविध्यजनितव्यापारं तत्त्वार्थश्रद्धानं सम्यग्दर्शनं ॥ १ ॥ प्रणिधानमुपयोगः परिणाम इत्यनर्थांतरं । येनार्थोऽर्थांतराद्विशिष्यते योवाऽर्थांतरगततात्पर्यायाद्विशिष्यते स विशेषः । विशिष्टिर्वा विशेषः । प्रणिधानमेव विशेषः प्रणिधानविशेषः प्रणिधानस्य वा विशेषः प्रणिधानविशेषः । आहितमात्मसात्कृतं परिगृहीतमित्यनर्थांतरं । विधयुक्तगतप्रकाराः समानार्थाः । निसर्गाधिगमभेदाद् द्वौ विधावस्येति द्विविधं द्विविधस्य भावः कर्म वा द्वैविध्यं । प्रणिधानविशेषेणाहितं प्रणिधानविशेषाहितं द्वैविध्यमस्य प्रणिधानविशेषाहितद्वैविध्यं । जनितः प्रादुर्भावितः व्यापृतिर्व्यापारः अर्थप्रापणसमर्थः क्रियाप्रयोगः जनितोव्यापारोस्य जनितव्यापारं कश्चास्य व्यापारः इहांतर्दर्शनमोहोपशमक्षयक्षयोपशमपर्यायपरिणामाद्बाह्यपरिणामकारणापादितादात्मनो जीवादिपदार्थ विचारविपर्योधिगमो निसर्गश्च व्यापारः । प्रणिधानविशेषाहितद्वैविध्यमेव जनितव्यापारं प्रणिधानविशेषाहितद्वैविध्यजनितव्यापारं तत्त्वार्थश्रद्धानं सम्यग्दर्शनं । अस्यार्थ उत्तरत्र वक्ष्यते ।

नयप्रमाणविकल्पपूर्वको जीवाद्यर्थयाथात्म्यावगमः सम्यग्ज्ञानं ॥ २ ॥ नयौ च प्रमाणे च नयप्रमाणानि तेषां विकल्पाः नयप्रमाणविकल्पाः । द्वौ नयौ द्रव्यार्थिकः पर्यायार्थिकश्च । द्वे प्रमाणे प्रत्यक्षं परोक्षं च । तेषां विकल्पा नैगमादयो मत्यादयश्च वक्ष्यंते । पूर्वशब्दस्तत्कारणवाची । नयप्रमाणविकल्पपूर्वको नयप्रमाणविकल्पहेतुक इत्यर्थः । येन येन प्रकारेण जीवादयः पदार्था अवस्थिताः तेन तेनावगमः जीवाद्यर्थयाथात्म्यावगमः सम्यग्ज्ञानं । मोहसंशयविपर्ययनिवृत्त्यर्थं सम्यग्विशेषणं ।

संसारकारणविनिवृत्तिं प्रत्यागूर्णस्य ज्ञानवतो बाह्याभ्यंतरक्रियाविशेषोपरमः सम्यक्चारित्रं ॥ ३ ॥ संसारः पंचविधः द्रव्यक्षेत्रकालभवभावपरिवर्तनभेदात् । तस्य कारण कर्माष्टविधं तस्य विशेषेणात्यंतिकी निवृत्तिः संसारकारणविनिवृत्तिः । तां प्रत्यागूर्णस्योद्यतस्य ज्ञानवत इति प्रशंसायां मतुः । यथा रूपवानिति प्रशंसायुक्तस्य सत्ता कथ्यते । नहि कस्यचिद्रूपं नास्ति प्रशस्तं तु नास्ति । तथा ज्ञानमस्यास्तीति ज्ञानवानिति प्रशंसायुक्तस्य सत्ता कथ्यते । न कस्यचिज्ज्ञानं नास्ति सर्व एवात्मा ज्ञानवांश्चैतन्यान्मिथ्यादर्शनोदये विपरीतार्थग्राहित्वान्मिथ्यादृष्टिरज्ञस्तदभावे याथात्म्येनार्थविभावनात्सम्यग्दृष्टिः प्रशस्तज्ञानः, तस्य ज्ञानवतः । क्रिया क्रियांतराद्विशिष्यते येन स विशेषः । विशिष्टिर्वा विशेषः । स द्विविधो बाह्य आभ्यंतरश्चेति । बाह्यो वाचिकः कायिकश्च बाह्येंद्रियप्रत्यक्षत्वात् । आभ्यंतरोमानसः छद्मस्थाप्रत्यक्षत्वात् । तस्योपरमः सम्यक्चारित्रमुच्यते । स पुनः परमोत्कृष्टो भवति वीतरागेषु यथाख्यातचारित्रसंज्ञकः । आरातीयेषु संयतासंयतादिषु सूक्ष्मसांपरायिकांतेषु प्रकर्षाप्रकर्षयोगी भवति ।

ज्ञानदर्शनयोः करणसाधनत्वं कर्मसाधनश्चारित्रशब्दः ॥ ४ ॥ ज्ञानं दर्शनमिति करणसाधनावेतौ शब्दौ । "करणाधिकरणयो" रिति युटो विधानात् । कर्मसाधनश्चारित्रशब्दः "भूवादिग्रहभ्यो णित्र श्चरेर्वृत्त इति कर्मणि विधानात् । ज्ञानदर्शनशक्तिविशेषशुद्धिसन्निधाने जीवादीनर्थानात्मा जानाति पश्यति वा येन तज्ज्ञानं दर्शनं च । चारित्रमोहोपशमक्षयक्षयोपशमसद्भावे चर्यते तदिति चारित्रं ।

कर्तृकरणयोरन्यत्वादन्यत्वमात्मज्ञानादीनां परश्वादिवदिति चेन्न तत् परिणामादग्निवत् ॥५॥ स्यादारेका ज्ञानदर्शनयोरात्मद्रव्यादन्यत्वं, कस्मात् ? दृष्टत्वाद्देवदत्तपरशुवदिति तन्न किं कारणं? तत्परिणामादग्निवत् । यथा बाह्यद्रव्यादिपंचतयहेतुसन्निधाने सति आभ्यंतरपरिणामवशात्तैजस्कायिक

नामकर्मोदयाविर्भावितौष्ण्यपर्याय आत्मा तत्परिणामादग्निव्यपदेशभाग्भवति । स एवंभूतनयवक्तव्यतयोष्ण-पर्यायादनन्यः । तथैवंभूतनयवक्तव्यतावशाज्ज्ञानदर्शनपर्यायपरिणत आत्मैव ज्ञानं च दर्शनं तत्स्वाभाव्यात् ।

अतत्स्वाभाव्येऽनवधारणप्रसंगोऽग्निवत् ॥ ६ ॥ यथाग्निरुष्णपर्यायेणान्यद्रव्यासाधारणेनावधार्य तेऽयमग्निरिति । स चेत्तत्स्वभावो न भवेत्प्रतिविशिष्टासाधारणपर्यायाभावादग्नेरनवधारणप्रसंगः । तथात्मनोपि ज्ञानादन्यत्वेऽनवधारणं यतोयमन्यद्रव्यासाधारणज्ञानपर्यायस्तत्स्वभावात्ततोऽनन्यो द्रव्यार्थादेशात् । स चेन्न ज्ञानस्वभावः सत्येवमज्ञः स्यात्ततश्चास्यानवधारणप्रसंगः ।

अर्थांतरात्संप्रत्यय इति चेन्नोभयासत्त्वात् ॥ ७ ॥ स्यादेतदन्यत्वे सत्यपि नानवधारणं कुतः ? यस्मादर्थांतरात्संप्रत्ययः ।

नीलीद्रव्यसंबंधाच्छाटीपटकंबलादिषु नीलसंप्रत्ययवत् ॥ ८ ॥ यथार्थांतरभूतेन नीलीद्रव्येण संबंधत्वाच्छाटीपटकंबलादिषु नीलसंप्रत्ययः । तथार्थांतरभूतोष्णगुणसमवायादुष्णोग्निः । आत्मा वार्थांतरभूत ज्ञानगुणसमवायाज्ज्ञ इति । तन्न किं कारणं ? उभयासत्त्वात् ।

दंडदंडिवत् ॥ ९ ॥ यथा दंडसंबंधात्प्राग्दंडी जात्यादिभिर्लक्षणैः स्वतः सिद्धत्वात् । स दंडोपि प्राग्दंडिसंबंधाद्वृत्तद्राघिमादिना लक्षणेन स्वतः सिद्धत्वात् । सतो दंडयोगाद्दंडीत्येतन्न्याय्यं । तथा नीलद्रव्ययोगाच्छाट्यादि नीलमित्येतन्न्याय्यं । तथोष्णगुणयोगान्न प्रागग्नेरन्यद्विशेषलक्षणं सद्भावस्य प्रख्यापकमस्तीति असन्नग्निः । उष्णस्यापि प्रागग्नियोगादसत्त्वं निराश्रयगुणाभावात् । न चासतोः संबंधो दृष्ट इष्टो वा । आत्मनोपि ज्ञानगुणयोगात्प्रागसत्त्वं विशेषलक्षणाभावात् । ज्ञानस्याप्यात्मद्रव्यसंबंधात्प्रागसत्त्व निराश्रयगुणाभावात् । नचा-सतोः संबंधो दृष्ट इष्टोवा । तस्मादुभयासत्त्वान्नार्थांतरात्संप्रत्ययः किं च ।

उभयथाप्यसद्भावात् ॥ १० ॥ कथं—

सर्वासद्भावादिवत् ॥ ११ ॥ इदमस्तित्वं प्रष्टव्य उष्णगुणयोगात्प्रागग्ना उष्ण इति ज्ञानं स्याद्वा न वेति । यदि प्रागुष्णगुणयोगादग्नावुष्ण इति ज्ञानं किमर्थस्यादुष्णगुणयोगः प्रार्थ्यते । अथ नास्त्यतोप्युष्ण ज्ञानाभावादनुष्णस्वभावस्याग्नेरुष्णगुणयोगादुष्ण इति व्यपदेशाभावात् किंच ।

अनवस्थाप्रतिज्ञाहानिदोषप्रसंगात् ॥ १२ ॥ कथं—

सर्वसत्प्रतिपक्षवादिवत् ॥ १३ ॥ यथा यद्युष्णगुणयोगादग्निरुष्ण अथोष्णगुणः केन योगादुष्णः स्वभावादिति चेदग्नौ कोऽपरितोपः । उष्णत्वादुष्णगुणस्योष्णत्वं, कुतः स्वत एवेति चेदग्नौ कोऽपरितोपः । अथाग्नेरुष्णत्वं स्वत एव मासिधदिति उष्णत्वस्याप्यन्यदुष्णत्वमस्ति तस्याप्यन्यदित्यनवस्था माभूदिति स्वत एवोष्णत्वस्योष्णत्व । ननु प्रतिज्ञाहानिरर्थांतरात्संप्रत्यय इति । तथा यदि ज्ञानगुणयोगादात्मा ज्ञ, अथ ज्ञानगुणः केन योगात्, स्वभावादिति चेदात्मनि कोऽपरितोपः । ज्ञानत्वाज्ज्ञानगुणस्य ज्ञानव्यपदेश इतिचेज्ज्ञानत्वस्य ज्ञानत्वं कुतः स्वत एवेति चेदात्मनि कोऽपरितोषः । अथात्मनो ज्ञत्व स्वत एव मासिधदिति ज्ञानत्वस्याप्यन्यज्ज्ञानत्व-मस्ति तस्याप्यन्यदित्यनवस्था । अथानवस्था माभूदिति स्वत एव ज्ञानत्वस्य ज्ञानत्वमिष्टं ननु प्रतिज्ञाहानि रर्थांतरात्संप्रत्यय इति । किं च ।

तत्परिणामाभावात् ॥ १४ ॥ यथा दंडसंबंधेपि दंडिनो न दंडपरिणामः दंडीव्यपदेशमात्रप्रतिलंभात्, तथोष्णगुणस्योष्णत्वसामान्यविशेपसंबंधेनोष्णत्वं । गुणसामान्यविशेषपदार्थभेदादत उष्णत्ववानुष्णगुण इत्यासक्तं न तूष्ण इति । तथोष्णगुणसंबंधेप्यग्नेर्नोष्णत्वं द्रव्यगुणपदार्थभेदादत उष्णवानग्निरित्यासक्तं नतु स्वयमुष्ण इति ।

समवायादितिचेन्न प्रतिनियमाभावात् ॥१५॥ स्यान्मतं समवायो नामायुतसिद्धलक्षणः संबंधः इहेदं बुद्ध्यभिधानप्रवृत्तिहेतुस्तेनैकत्वमिवानीतानां व्यपदेशो भवति उष्णत्वसमवायादुष्णो गुण उष्णगुणस

१ कल्प्यते इत्यपि पाठांतरं ।

समवायाच्चाग्निरुष्ण इति । तन्न कुतः ? प्रतिनियमाभावादुष्णत्वोष्णगुणयोरग्न्युष्णयोश्चान्यत्वे कोयं प्रतिविशिष्टो नियमो यदुष्णगुणस्याग्नावेव समवायो नाप्सु । शीतगुणस्य चाप्स्वेव समवायो नाग्नौ । उष्णत्वस्य चोष्ण गुणेनैव समवायो न शीतादिगुणांतरेणेति । तस्माद्येनविशेषेणायं प्रतिनियम इष्यते न तं पश्याम अत एव द्रव्यपरिणाम एवौष्ण्यमिति सिद्ध । नान्यस्तत्प्रतिनियमहेतुरस्ति स्वभावोहेतुरिति चेत्तत एव तत्परिणामसिद्धिः किं च ।

समवायाभावो वृत्त्यंतराभावात् ॥ १६ ॥ नास्ति तत्परिकल्पितः समवायः कुतः वृत्त्यंतराभावाद्यथा गुणानां पदार्थानां द्रव्येण समवायसंबंधाद्वृत्तिरिष्टा तथा समवायः पदार्थांतरं भूत्वा केन संबंधेन द्रव्यादिषु वर्त्स्यति समवायांतराभावादेक एव हि समवायस्तत्त्वंभवेन व्याख्यातमिति वचनात् । न च संयोगेन वृत्तिर्युतसिद्ध्यभावात्, युतसिद्धानामप्राप्तिपूर्विका प्राप्तिः संयोग । न चान्यसंबंधः संयोगसमवाय विलक्षणोस्ति येन समवायस्य द्रव्यादिषु वृत्तिः स्यादतः समवायिभिरनभिसंबंधान्नास्ति खरविषाणवत्समवायः ।

प्राप्तित्वात्प्राप्त्यंतराभाव इति चेन्न व्यभिचारात् ॥ १७ ॥ स्यान्मतं द्रव्यादीनि प्राप्तिमंति अतस्तेषां यया कयाचित्प्राप्त्या भवितव्यं । समवायस्तु प्राप्तिर्न प्राप्तिमानतः प्राप्त्यंतराभावेपि स्वत एव प्राप्नोतीति । तन्न न, कस्मात् व्यभिचाराद्यथा संयोगः प्राप्तिरपि सन् प्राप्त्यंतरेण समवायेन वर्तते तथा समवायस्यापि स्यादिति ।

प्रदीपवदिति चेन्न तत्परिणामादनन्यत्वसिद्धेः ॥ १८ ॥ स्यादेतद्यथा प्रदीपः प्रदीपांतर मनपेक्षमाण आत्मानं प्रकाशयति घटादींश्च । तथा समवायसंबधांतरापेक्षामंतरेणात्मनश्च द्रव्यादिषु वृत्ति हेतुर्द्रव्यादीनां च परस्पर इति । तन्न कुतस्तत्परिणामादनन्यत्वसिद्धेः यथा प्रदीपः स्वयं प्रकाशपरिणामात्प्रकाशात्मनोनन्यः प्रकाशांतरं नापेक्षते अन्यथा प्रकाशात्मनोन्यत्वे प्रदीपस्याप्रदीपत्वप्रसंगो यतो न प्रकाशात्मानं प्रोह्यान्यः प्रदीपोस्ति । तथा न द्रव्यादन्ये गुणकर्मसामान्यविशेषसमवायास्संति द्रव्यस्यैवोभयपरिणामकारणापेक्षस्य गुण कर्म सामान्य विशेषः समवाय इत्येवमादिपर्यायांतरेण परिणामः । यथा प्रदीपः स्वलक्षणप्रसिद्धो घटादिभ्योन्यो नैवं समवायः स्वलक्षणप्रसिद्धः द्रव्यादन्योस्ति द्रव्यस्यैव गुणादिपर्यायपरिणामात्तस्मान्न प्रदीपवत्समवायसिद्धिः । अन्यथा च द्रव्यादन्यत्वे गुणादीनां द्रव्यस्याद्रव्यत्वप्रसंगो यतो न गुणादिपर्यायान् प्रोह्यान्यद्द्रव्यमस्ति । यदि वा गुणादीन् प्रोह्य द्रव्यं केनचिदन्येन स्वविशेषेण प्रसिद्धं यद्गुणादिभिः संबध्यते स विशेष उच्यतां यतो न गुणादिपरित्यागेनान्यो द्रव्यस्य विशेषः स्वतः प्रसिद्धोस्ति । अतो द्रव्यपरिणामा एव गुणादय इति प्रसिद्धं किंच ।

विशेषपरिज्ञानाभावात् ॥ १९ ॥ यस्य युतायुतसिद्धार्थग्राहकं विज्ञानमेकमस्ति तस्यायुतसिद्धानां समवायः युतसिद्धानां संयोग इति स्याद्विशेषविज्ञानं । भवतस्तु क्षणिकैकार्थविषयत्वाज्ज्ञानानां तद्विशेषविज्ञानाभावस्तदभावात्तद्विवेकाभावः ।

संस्कारादिति चेन्न तस्यापि तादात्म्यात् ॥ २० ॥ स्यादेतत् ज्ञानजोज्ञानहेतुश्च संस्कारोस्ति तस्यादः सामर्थ्यमिति तन्न कुतस्तस्यापि तादात्म्यात् । एकार्थग्राहिज्ञानस्य संस्कारस्य चैकार्थग्राहिज्ञानहेतुत्वादनेकार्थग्राहिज्ञानाभावाच्चानेकार्थग्राहिज्ञानसंस्काराभावस्तस्मात्पूर्वोक्तोदोषस्तदवस्थ एव । अथवायमर्थः कर्तृकरणयोरन्यत्वादन्यत्वमात्मज्ञानादीनां परश्वादिवदिति चेन्न तत्परिणामादग्निवदिति यथाग्निरग्निस्वभावादन्यो दहन् दाहक्रियायाः कर्ता । किं करणो दहति तत्परिणामादग्न्यात्मैव करणं तथात्मा ज्ञस्वभावत्वाज्ज्ञानादन्यस्तत्परिणामादर्थान् जानन् ज्ञानक्रियायाः कर्ता किंकरणो जानाति तत्परिणामात्तदेव ज्ञानं करणत्वेन विवक्ष्यते । अन्यथा वाऽतत्स्वाभाव्येऽनवधारणप्रसंगोग्निवदित्येवमादिवाक्यार्थविवरणं दहनस्वभावापेक्षयायोज्यं किंच ।

अनेकांतात्पर्यायपर्यायिणोरर्थांतरभावस्य घटादिवत् ॥ २१ ॥ यथा घटकपालशकलशर्करादीनां नयद्रव्यार्पणाभेदात्स्यादेकत्वं स्यादन्यत्वं कथं ? इह पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात्पर्यायार्थानर्पणात्मृद्रूपद्रव्याजीवानुपयोगादिद्रव्यार्थार्पणात्स्यादेकत्वं यतो घटकपालादयो मृद्रूपद्रव्यार्थं न जहति । तेषामेव द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्याद्द्रव्यार्थानर्पणात्कारणविशेषापादितभेदपर्यायार्थार्पणात्स्यादन्यत्व यतोन्यो घटपर्यायोन्यश्च कपालादिपर्यायस्तथा मृदो घटादिपर्यायाणां च स्यादेकत्वं स्यादन्यत्वं कथं तत्परिणामात्स्यादेकत्वं यतो मृद्रूपमेव । उभयपरिणामकारणवशाद् घटकपालादिपर्यायपरिणतं तद्व्यपदेशभाग्भवति नान्या मृत् नान्ये घटादयो मृद्रव्यव्यतिरिक्तघटादिपर्यायाभावात् । पर्यायिपर्यायभेदाच्च स्यादन्यत्वं यतः पर्यायि मृद्रव्यं पर्याया घटादयः । तथात्मनोपि ज्ञानादिपर्यायाणां च स्यादेकत्वं स्यान्नानात्वं कथं ? पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात्पर्यायार्थानर्पणादनादिपारिणामिकचैतन्यजीवद्रव्यार्थार्पणात्स्यादेकत्वं यतो ज्ञानादयोऽनादिपारिणामिकचैतन्यजीवद्रव्यादिद्रव्यार्थं न जहति । तेषामेव द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्याद्द्रव्यार्थानर्पणात्कारणविशेषापादितभेदपर्यायार्थार्पणात्स्यादन्यत्वं यतोन्यो ज्ञानपर्यायोन्ये च दर्शनादिपर्यायाः तथात्मनो ज्ञानादिपर्यायाणां च स्यादेकत्वं स्यादन्यत्वं कथं ? तत्परिणामादेशात्स्यादेकत्वं यत आत्मैवोभयपरिणामकारणवशाज्ज्ञानादिपर्यायपरिणतो ज्ञानादिव्यपदेशभाग्भवति नान्य आत्मा नान्ये ज्ञानादयः आत्मद्रव्यव्यतिरिक्तज्ञानादिपर्यायाभावात् । पर्यायिपर्यायभेदाच्च स्यादन्यत्वं, यतः पर्यायी आत्मा पर्याया ज्ञानादयस्तस्मादेकत्वान्यत्वं प्रत्यनेकांतोपपत्तेः तत्परिणामत्वेपि करणभावोयुक्तः ।

इतरथा हि एकार्थपर्यायादन्यत्वप्राप्तिर्वृक्षवत् ॥ २२ ॥ यस्यैकांतिकं कर्तृकरणयोरन्यत्वं तस्यैकार्थपर्यायादन्यत्वं प्राप्तं कथं ? वृक्षवद्यथा प्रासादं करोति परश्वादिभिरित्यत्र कर्तृकरणयोरन्यत्वं । तथा भज्यते वृक्षः शाखाभारेणेत्येकस्य वृक्षस्य शाखाभारार्थपर्यायादन्यत्वं प्राप्तं । नचादोस्ति यतो न शाखाभारादृतेन्योवृक्षो न च शाखाभारादन्योवृक्षो न भवतीति भज्यतेवृक्षः शाखाभारेणेति एकार्थपर्यायात्मकः करणनिर्देशो न भवतीति । तथा नात्मद्रव्यादृतेऽन्यज्ज्ञानं न चात्मद्रव्यादृते नान्यज्ज्ञानमिति जानात्यनेनार्थानात्मेत्येकार्थपर्यायात्मकं करणं न भवति । किं च

करणस्योभयथोपपत्तेर्द्रव्यस्य मूर्तिमदमूर्तिभेदवत् ॥ २३ ॥ यथा द्रव्यस्य मूर्तिमदमूर्तिभेदादेकांतपरिग्रहो नास्ति । पुद्गलद्रव्यं मूर्तिमत्, धर्माधर्माकाशकाला अमूर्तय आत्मा चामूर्तः । द्रव्यार्थादेशान्न पर्यायार्थादेशात्तस्यानादिकार्माणशरीरसंबंधात् । तथा करणं द्वेधा विभक्ताविभक्तकर्तृकभेदात्, कर्तुरन्यद्विभक्तकर्तृकं यथा परशुना छिनत्ति देवदत्त इति । कर्तुरनन्यदविभक्तकर्तृकं यथाग्निरिंधनं दहत्यौष्ण्येनेति । तथात्मा ज्ञानेनार्थान् जानातीत्यविभक्तकर्तृकं करणं । किं च

दृष्टांताच्च कुशूलस्वातंत्र्यवत् ॥ २४ ॥ यथा भिनत्ति कुशूलं देवदत्त इत्यत्र कुशूलो यदा भिदिक्रियायाः सुकरतया स्वातंत्र्येण विवक्षितः "स्वयमेवात्मानं भिनत्तीति" तदा किंकरणोसावात्मानं भिनत्तीति विवक्षायां कुशूलात्मैव करणत्वेनोपादीयते । तथात्मैव ज्ञाता करणंच भवति किंच ।

एकार्थपर्यायविशेषोपपत्तेरिंद्रियादिव्यपदेशवत् ॥ २५ ॥ इहैकस्यार्थस्यानेकपर्यायविशेषोपपत्तिर्दृष्टा न चास्य तेभ्योः पर्यायेभ्योन्यत्वं कथ ? इंद्रादिव्यपदेशवत् । यथैकस्य देवराजार्थस्येंद्रशक्रपुरंदराद्यनेकव्यंजनपर्यायविशेषोपपत्तिः । नच देवराजस्येंद्रशक्रपुरंदरादिपर्यायेभ्योन्यत्वं न चानन्यत्वाद्येनायमिंद्रस्तेनैव शक्रः पुरंदरोवा येन वा शक्रस्तेनैवेंद्रः पुरंदरोवा येन वा पुरंदरस्तेनैवेंद्रः शक्रोवा कथमिह यत इंद्रादीनां प्रतिनियतव्यंजनपर्यायोपपत्तिः । इदनादिंद्रः शकनाच्छक्रः पूर्दारणात्पुरंदर इति नचेंदनशकनपूर्दारणव्यंजनपर्यायभेदान्न देवराज इंद्रः शक्रः पुरंदरो वा न भवति । भवत्येव । तथैकस्य आत्मनो ज्ञानादिपर्यायविशेषोपपत्तिस्तस्मादेकार्थपर्यायविशेषोपपत्तेर्नान्यत्वमात्मद्रव्यादेकांतेन ज्ञानादीनां ।

कर्तृसाधनत्वाद्वा दोषाभावः ॥२६॥ अथवा नेमौ ज्ञानदर्शनशब्दौ करणसाधनौ किं तर्हि कर्तृसाधनौ तथा चारित्रशब्दोपि न कर्मसाधनः किं तर्हि कर्तृसाधनः कथमेवं भूतनयवशात् । ज्ञानदर्शनचा-

रित्राणि आत्मैवेष्टः अतस्तत्परिणामाज्ज्ञानादिपरिणत आत्मैव जानातीति ज्ञानं पश्यतीति दर्शनं चरतीति चारित्रमतो य उक्तः कर्तृकरणयोरन्यत्वादन्यत्वमात्मज्ञानादीनामिति दोषः स न भवति ।

लक्षणभाव इतिचेन्न बाहुलकात् ॥ २७ ॥ स्यादेतन्न लक्षणमस्ति कर्तरियुटोविधायकमिति तन्न कुतो बाहुलकात् "युड्ल्याबहुलमिति" कर्तरि युट् णित्रश्च यत्र विहितास्ततोन्यत्रापि दृश्यंते ल्याभावकर्मणोर्विहिताः करणादिष्वपि भवंति । स्नात्यनेन स्नानीयश्चूर्णो ददात्यस्मै इति दानीयोतिथिः समावर्तते तस्मादिति समावर्तनीयो गुरुः । करणाधिकरणयोर्युडुक्तः कर्मादिष्वपि दृश्यते निरदंति तदिति निरदनं प्रस्कंदति तस्मादिति प्रस्कंदनं ।

अथवा भावसाधना ज्ञानादिशब्दास्तत्त्वकथनाच्छात्रस्य करणव्यपदेशवत् ॥२८॥ यथौदासीन्येनावस्थितमच्छिदत्तृणादिदात्रं करणमिति व्यपदिश्यते । तथौदासीन्येनावस्थितानि ज्ञानदर्शनचारित्राणि प्रतिनियतज्ञानदर्शनचरणक्रियाव्यापारं प्रतिनिवृत्तौत्सुक्यानि कथ्यंते कोसौ मोक्षमार्ग. ज्ञानदर्शनचारित्राणि। ज्ञातिर्ज्ञानं दृष्टिर्दर्शनं चरणं चारित्रमिति क्रियाव्यापृतानां तु ज्ञानादीनां कर्त्रादिकारकव्यवहारः ।

व्यक्तिभेदादयुक्तमिति चेन्नैकार्थे शब्दान्यत्वाद्व्यक्तिभेदगतेः ॥ २९ ॥ स्यादेतज्ज्ञानमात्मेत्ययुक्तं कस्माद्व्यक्तिभेदात्, अभिधेयवल्लिंगसंख्ये भवतोऽभिधानस्येति ज्ञान आत्मेति प्राप्नोतीति तन्न किंकारणं? एकार्थशब्दान्यत्वाद्व्यक्तिभेदगतेरेकस्मिन्नप्यर्थे शब्दभेदाद्व्यक्तिभेदा दृश्यंते । यथा गेहं कुटी मठः पुष्यः तारका नक्षत्रमित्येवं ज्ञानमात्मेत्यपि स्यात् ।

ज्ञानग्रहणमादौ न्याय्यं तत्पूर्वकत्वद्दर्शनस्य ॥ ३० ॥ आहेह ज्ञानग्रहणमादौ न्याय्यं कुतस्तत्पूर्वकत्वाद्दर्शनस्य यतः पदार्थतत्त्वोपलब्धिपूर्वकं श्रद्धानं ।

अल्पाच्तरत्वाच्च दर्शनात् ॥३१॥ ज्ञानमल्पाच्तरमतश्च पूर्वकं वाच्यं ।

नोभयोर्युगपत्प्रवृत्तेः प्रतापप्रकाशवत् ॥ ३२ ॥ नैष दोषः कुत उभयोर्युगपत्प्रवृत्तेः कथं प्रकाशप्रतापवद्यथा सवितुर्घनपटलावरणविगमे प्रतापप्रकाशप्रवृत्तिर्युगपद्भवति । तथा ज्ञानदर्शनयोर्युगपदात्मलाभः तद्यथा यदा दर्शनमोहस्योपशमात्क्षयोपशमात्क्षयाद्वात्मा सम्यग्दर्शनपर्यायेणाविर्भवति तदैव तस्य मत्यज्ञानश्रुताऽज्ञाननिवृत्तिपूर्वकं मतिज्ञानं श्रुतज्ञानं चाविर्भवति ।

दर्शनस्यैवाभ्यर्हितत्वात् ॥३३॥ यदप्युक्तमल्पाच्तरत्वाज्ज्ञानस्य पूर्वनिपात इति तदसत् कस्मात्? दर्शनस्यैव अभ्यर्हितत्वाज्ज्ञानाद्दर्शनमेवाभ्यर्हितं दर्शनसन्निधाने सत्यज्ञानस्यापि ज्ञानभावात् । ज्ञात्वाप्यश्रद्धतस्तदभावात् ।

मध्ये ज्ञानवचनं ज्ञानपूर्वकत्वाच्चारित्रस्य ॥३४॥ यतो जीवादिपदार्थतत्त्वज्ञानसान्निधाने सति चारित्रमोहोपशमात्क्षयोपशमात्क्षयाद्वा कर्मादानहेतुक्रियाविशेषोपरमश्चारित्रपरिणामो भवति । ततश्चारित्रस्य ज्ञानपूर्वकत्वात् ज्ञानं पूर्वं प्रयुक्तम् ।

इतरेतरयोगे द्वंद्वो मार्गं प्रति परस्परापेक्षाणां प्राधान्यात् ॥ ३५ ॥ अयमितरेतरयोगे द्वंद्वो दर्शनं च ज्ञानं च चारित्रं च दर्शनज्ञानचारित्राणीति कुतो मार्गं प्रति परस्परापेक्षाणां प्राधान्यात् ।

यथा प्लक्षन्यग्रोधपलाशा इति ॥ ३६ ॥ अस्त्यादिसमानकालक्रियाणां प्लक्षादीनां परस्परापेक्षाणामितरेतरयोगे द्वंद्वः सर्वपदार्थप्रधानत्वात् बहुवचनांतः तथा दर्शनज्ञानचारित्राणामस्त्यादिसमानकालक्रियाणां परस्परापेक्षाणामितरेतरयोगे द्वंद्वः सर्वपदार्थप्रधानत्वाद्बहुवचनांतः । यतस्त्रयाणामपि दर्शनादीनां संहतानां परस्परापेक्षाणां मोक्षमार्गत्वं प्रति प्राधान्यं नैकस्य न द्वयोः।

प्रत्येकं सम्यग्विशेषणपरिसमाप्तिर्भुजिवत् ॥ ३७ ॥ यथा देवदत्तजिनदत्तगुरुदत्ता भोज्यंतामिति भुजिः प्रत्येकं परिसमाप्यते। तथा प्रशंसावचनस्य सम्यक्शब्दस्य प्रत्येकमभिसंबंधो दर्शनादिभिः, सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रमिति।

पूर्वपदसामानाधिकरण्यात्तद्व्यक्तिवचनप्रसंग इति चेन्न मोक्षोपायस्यात्मप्रधानत्वात् ॥३८॥ स्यादेतद्दर्शनादिभिः सामानाधिकरण्यात्तद्व्यक्तिवचने मोक्षमार्गस्य प्राप्नुत इति, तन्न किंकारणं मोक्षोपायस्यात्मप्रधानत्वात् यो मोक्षमार्गो मोक्षापायस्तस्यात्मा स्वभावः येनात्मीयेन स्वभावेन स मोक्षमार्ग उच्यते। स दर्शनज्ञानचारित्राणां सर्वेषामविशिष्ट एकः पुल्लिंगश्च तस्य प्राधान्यात्सत्यपि सामानाधिकरण्ये न तद्व्यक्तिवचनप्राप्तिः। यथा साधवः प्रमाणमिति।

आत्यंतिकः सर्वकर्मनिक्षेपो मोक्षः ॥ ३९ ॥ मोक्ष असने इत्येतस्य घञ् भावसाधनो मोक्षणं मोक्षः असनं क्षेपणमित्यर्थः स आत्यंतिकः सर्वकर्मनिक्षेपो मोक्ष इत्युच्यते।

मृजेःशुद्धिकर्मणो मार्ग इवार्थाभ्यंतरीकरणात् ॥ ४० ॥ मृष्टः शुद्धोसाविति मार्गः मार्ग इव मार्गः कउपमार्थो यथा स्थाणुकंटकोपलशर्करादिदोषरहितेन मार्गेण मार्गगाः सुखमभिप्रेतस्थानं गच्छंति। तथा मिथ्यादर्शनाऽसंयमादिदोषरहितेन त्र्यंशेन श्रेयोमार्गेण सुखं मोक्षं गच्छंति।

अन्वेषणक्रियस्य वा करणत्वोपपत्तेः ॥ ४१ ॥ अथवा मार्ग अन्वेषणे इत्यस्य मार्गः सिध्यति कुतः सम्यग्दर्शनादीनां करणत्वोपपत्तेः, मोक्षो येन मार्ग्यते स मोक्षमार्ग इति।

युक्त्यनभिधानादमार्ग इति चेन्न मिथ्यादर्शनाज्ञानासंयमानां प्रत्यनीकत्वादौषधवत् ॥४२॥ स्यादेतन्नात्र युक्तिरुक्ता सम्यग्दर्शनादित्रयमित्थं मोक्षमार्ग इति अतोस्य मार्गत्वं नोपपद्यते इति। तन्न किं कारणं मिथ्यादर्शनाज्ञानासंयमानां प्रत्यनीकत्वात्कथमौषधवत्। यथा वातादिविकारोद्भूतरोगाणां निदानप्रत्यनीकं स्निग्धरूक्षाद्यौषधमुच्छेदकारणं। तथा मिथ्यादर्शनाज्ञानासंयमादीनां निदानप्रत्यनीकं सम्यग्दर्शनाद्यौषधमुच्छेदकारणं।

इति तत्त्वार्थवार्तिके व्याख्यानालंकारे प्रथमेऽध्याये प्रथममाह्निकं ॥ १ ॥

विपर्ययाद्बंधस्यात्मलाभे सति ज्ञानादेव तद्विनिवृत्तेस्त्रित्वानुपपत्तिः ॥ १ ॥ अत्र कश्चिदाह—विपर्ययाद्बंधस्यात्मलाभो भवति तदभावात्तत्त्वज्ञाने सति बंधनिवृत्तिर्भवति। कारणाभावाद्धि कार्याभाव इति। बंधनिवृत्तिरेव च मोक्षः अतोमोक्षमार्गस्य त्रित्वं नोपपद्यते।

प्रतिज्ञामात्रमिति चेन्न सर्वेषामविसंवादात् ॥२॥ स्यादेतत्प्रतिज्ञामात्रमेतद्विपर्ययाद्बंधो भवतीति तन्न किंकारणं सर्वेषामविसंवादान्नात्र प्रतिवादिनो विसंवदंते तद्यथा।

धर्मेण गमनमूर्ध्वमित्यादिवचनमेकेषां ॥ ३ ॥ धर्मेण गमनमूर्ध्वं भवति अष्टसु ब्राह्मसौम्यप्राजापत्यैंद्रगांधर्वयक्षराक्षसपिशाचेषु गमनं। अधस्ताद्भवति अधर्मेण खलु षट्सु स्थानेषु मानुषपशुमृगमत्स्यसरीसृपस्थावरेषु गमनं। ज्ञानेन चापवर्गो यदास्य रजस्तमसोर्गुणभावात्सत्त्वस्य प्राधान्यात्प्रकृतिपुरुषांतरपरिज्ञानमाविर्भवति तेनापवर्गः। विपर्ययादिष्यते बंधो योस्यावक्तव्यमहदहंकारतन्मात्रसंज्ञास्वष्टासु प्रकृतिष्वनात्मीयास्वाहंकारिकेषु वैकारिकेषु चेंद्रियेष्वात्मत्वाभिमानः स विपर्ययस्तस्माद्बंध इत्येकेषां वचनं।

तथाऽनात्मीयेष्वात्माभिमानविपर्ययात्तस्य शब्दाद्युपलब्धिरादिः गुणपुरुषांतरोपलब्धिरंतः ॥ ४ ॥ यावदस्याविभक्तप्रत्ययः श्रोत्रादींद्रियवृत्तिषु श्रवणादिष्वहं श्रोतेत्येवमादिः पांचभौतिके च शिरः पाण्यादिसमूहे शरीरेऽहं पुरुष इति प्रत्ययो भवति। तावदप्रतिबुद्धत्वात्संसारो गुणपुरुषांतरोप-

लब्धिरतः । यदा पुरुषवर्जं सर्वं प्रकृतिकृतं त्रिगुणमचेतनं भोग्यमिति जानाति । भोक्तारमकर्तारं चेतनं च पुरुषमन्यं प्रधानाद्वैति अचेतनांश्च गुणांस्तदा तस्य गुणपुरुषांतरोपलब्धिरतः संसारस्येति ज्ञानान्मोक्षो विपर्ययाद्बंध इत्येकेषां ।

इच्छाद्वेषाभ्यामपरेषां ॥ ५ ॥ इच्छाद्वेषपूर्विका धर्माधर्मप्रवृत्तिस्ताभ्यां सुखदुःखं, तत इच्छाद्वेषौ । नच विमोहस्य तौ मिथ्यादर्शनाभावात् । मोहश्चाज्ञानं । विमोहस्य यतः षट्पदार्थतत्त्वज्ञस्य वैराग्यवतः सुखदुःखेच्छाद्वेषाभाव इच्छाद्वेषाभावाद्धर्माधर्माभावस्तदभावे संयोगाभावोऽप्रादुर्भावश्च स मोक्षस्तयोर्धर्माधर्मयोरभावे भवत्यपवर्गः । कथं प्रदीपोपरमे प्रकाशाभाववत् । यद्धि यद्भावं प्रतीत्यात्मानं प्रतिलभते तत्तस्योपरमात्तिरोभावं याति । तद्यथा प्रदीपोपरमात्प्रकाशाभावः । बंधश्चादृष्टाद्भवति, कथमधर्मसंज्ञाददृष्टादज्ञानं भवत्यज्ञानाच्च मोहो मोहवत इच्छाद्वेषौ जायेते इच्छाद्वेषाभ्यां धर्माधर्मौ स एव बंधः अतः संसारस्य प्रसूतिः । तस्माद्भवत्यदृष्टाभावे संयोगाभावः कतरस्य संयोगस्याभावः जीवनसंज्ञकस्य, धर्माधर्मापेक्षः सदेहस्यात्मनो मनसा संयोगो जीवनं, तस्य धर्माधर्मयोरभावादभावोऽप्रादुर्भावश्च प्रत्यग्रशरीरस्यात्यंताभावः स मोक्षः । कथमभावो धर्माधर्मयोरनागतानुत्पत्तिसंचितनिरोधाभ्यां, अनागतानुत्पत्तिः संचितनिरोधश्च द्विविधाऽभावः । तत्रानागतानुत्पत्तिस्तावद्धर्माधर्मयोः । शरीरेंद्रियमनोव्यतिरिक्तात्मदर्शनादकुशलस्याधर्मस्यानुत्पात्तित् । तत्साधनानां परिवर्जनात् धर्मस्यापि, तत्साधनानामनभिसंबंधात् । नाभिसंहितं कर्म बध्नातीति संचितनिरोधोपि । तदुद्वेगपरिखेदफलादधर्मनाशस्तस्मात्संसारादुद्वेगः । शरीरतत्त्वावलोकनाच्छीतोष्णशोकादिनिमित्तं शरीरपरिखेदं प्रदायाधर्मोतिरिच्यते भोगदोष दर्शनात् । षण्णां च पदार्थानां तत्त्वविनिर्णयात्प्रीतिमारभ्य धर्मस्य विनाशोतो मोक्ष इत्यपरेषां दर्शनं ।

दुःखादिनिवृत्तिरित्यन्येषां ॥ ६ ॥ दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतराभावान्निश्रेयसाधिगम इत्यन्येषां दर्शनं । पाठं प्रत्युत्तरं मिथ्याज्ञानं । सर्वेषामुत्तरस्य तत्त्वज्ञानान्निवृत्तौ यस्तदनंतरोर्थस्तस्य निवृत्तिः । कश्चासौ ? दोषः, स हि मिथ्याज्ञानादनंतरस्तत्कार्यत्वात् सचोत्तरः प्रवृत्तेः, प्रवृत्तिश्चानंतरा तत्कार्यत्वात्, ततो दोषाभावे प्रवृत्यभावः प्रवृत्तिरप्युत्तरा जन्मनः, प्रवृत्तेरभावाज्जन्माभावस्तत्कार्यत्वात्, जन्मोत्तरं दुःखात्, अतो जन्माभावाद्दुःखनिवृत्तिस्तन्निवृत्तौ य आत्यंतिकः सुखदुःखानुपभोगोनिश्रेयसमिति ।

अविद्याप्रत्ययाः संस्कारा इत्यादिवचनं केषांचित् ॥ ७ ॥ विद्याविपर्ययात्मिका सर्वभावेष्व नित्यानात्मकाशुचिदुःखेषु नित्यसात्मकशुचिसुखाभिमानरूपा तत्प्रत्ययाः संस्कारा इत्यादिवचनं केषांचित् । के पुनस्ते संस्कारा रागादयस्ते च त्रिधा पुण्यापुण्यानेज्यसंस्काराः, तत्र पुण्योपगानां संस्काराणां पुण्योपगमे च विज्ञानं भवति, यत इदमुच्यते अविद्याप्रत्ययाः संस्काराः वस्तुप्रतिविज्ञप्तिर्विज्ञानमिति । अपुण्योपगानां संस्काराणामपुण्योपगमे च विज्ञानं भवति यत इदमुच्यते संस्कारप्रत्ययं विज्ञानं । विज्ञानसंभूताश्चत्वारः स्कंधानाम चत्वारि महाभूतानि रूपं नाम च रूपनाम च नामरूपमिति । आनेज्योपगानां संस्काराणामानेज्योपगमे च विज्ञानं भवति यत इदमुच्यते विज्ञानप्रत्ययं नामरूपं नामरूपसन्निहितानींद्रियाणि षडायतनमिति नामरूपवृद्ध्या षड्भिरायतनद्वारैः कृत्यं क्रिया च प्रजायते इति नामरूपप्रत्ययं षडायतनमुच्यते । त्रयाणां धर्माणां संनिपातः स्पर्शः । केषां त्रयाणां ? विषयेंद्रियविज्ञानानां, संगतिः स्पर्शः । षड्भ्य आयतनेभ्यः षट् स्पर्शकायाः प्रवर्तंत इति षडायतनप्रत्ययः स्पर्शः । स्पर्शानुभवनं वेदना यज्जातीयः स्पर्शो भवति तज्जातीया वेदना प्रवर्तत इतीदमुच्यते स्पर्शप्रत्यया वेदनेति । वेदनाध्यवसाना तृष्णा यतस्तान् वेदनाविशेषानास्वादयत्यभिनंदयात्यध्यवस्यति तृष्यतीति सा वेदनाप्रत्यया तृष्णोच्यते । तृष्णावैपुल्यमुपादानं, सा मे प्रिया सानुरागेति भवेन्नित्यमपरित्यागो भूयोभूयश्च प्रार्थना तदुच्यते तृष्णाप्रत्ययमुपादानमिति । उपादाननिमित्तं पुनर्भवजनकं कर्म भव, एवं प्रार्थयमानः पुनर्भवजनकं कर्म समुत्थापयति कायेन मनसा वाचा । तद्धेतुकः स्कंध प्रादुर्भावो जातिर्जातिस्कंधपरिपाकः, जराजात्यभिनिवृत्तानां स्कंधानामपचयः परिपाकः, परिपाकाद्विनाशो भवति तन्मरणं तदेवं जातिप्रत्ययजरामरणमुच्यते । एवमयं द्वादशांगः प्रतीत्य समुत्पादोऽन्योन्यहेतुकस्तत्र सर्वभावेष्वविपरीतदर्शनं विद्या । यत्सर्वभावेष्वनित्यानात्मकाशुचिदुःखदर्शनं सा विद्या ततो मोक्षः कथं ?

अविद्याया विद्यातो निवृत्तिरविद्यानिवृत्तेः संस्कारनिरोधः संस्कारनिरोधाद्विज्ञाननिरोधः। एवमुत्तरेष्वपीति तदेवमविद्यातो बंधो भवति विद्यातश्च मोक्ष इति।

मिथ्यादर्शनादिरितिमतं भवतां ॥ ८ ॥ "मिथ्यादर्शनाविरतिप्रमादकषाययोगा बंधहेतव" इति भवतामार्हतानामपि मतं। पदार्थविपरीताभिनिवेशश्रद्धानं मिथ्यादर्शनं विपरीताभिनिवेशश्च मोहात्, मोहश्चाज्ञानमित्यज्ञानाद्बंधः। अतो मिथ्यादर्शनमादिर्बंधस्य सामायिकमात्रप्रतिपत्तेश्च "अनंताः सामायिकमात्रसिद्धा" इति वचनात् सामायिकं च ज्ञानमतःआर्हतानामपि ज्ञानान्मोक्ष इत्यविसंवादात् त्रितयमोक्षमार्गकल्पना न युक्ता किंच।

दृष्टांतसामर्थ्याद्वणिक् स्वप्रियैकपुत्रवत् ॥ ९ ॥ यथा वणिक् स्वप्रियैकपुत्रसदृशविग्रहं गजेनावमृद्यमानं बालमुपलभ्यातिदुःखाभिभवमूर्च्छया गतप्राण इवाभवद्विनिवृत्तकायादिक्रियस्य चास्य कुशलसुहृद्विरुपायपूर्वकं प्रत्याहितप्राणवृत्तेः स्वपुत्र एव दर्शनविषयमुपनीतेऽयं मम पुत्र इत्याविर्भूततत्त्वज्ञानस्य स्वपुत्रसादृश्योद्भूतमिथ्याज्ञानजनितं दुःखं तदभूतपूर्वमिवाभवदेवमज्ञानाद्बंधः केवलाच्च ज्ञानान्मोक्ष इति।

नवानांतरीयकत्वाद्रसायनवत् ॥ १० ॥ न वा एष दोषः किं कारणं नांतरीयकत्वान्नहि त्रितयमंतरेण मोक्ष प्राप्तिरस्ति कथं रसायनवत्। यथा न रसायनज्ञानादेव रसायनफलेनाभिसंबंधः रसायन श्रद्धान क्रियाभावात्, यदि वा रसायनज्ञानामात्रादेव रसायनफलसंबंधः कस्यचिद्दृष्टः सोभिधीयतां न चासावस्ति। न च रसायनक्रियामात्रादेव, ज्ञानश्रद्धानाभावात्। न च रसायनश्रद्धानमात्रादेव, रसायनज्ञानपूर्वक्रियासेवनाभावात्। अतो रसायनज्ञानश्रद्धाक्रियासेवनोपेतस्य तत्फलेनाभिसंबंध इति निःप्रतिद्वंद्वमेतत्। तथा न मोक्षमार्गज्ञानादेव मोक्षेणाभिसंबंधो दर्शनचारित्राभावात् न च श्रद्धानादेव मोक्षमार्गो ज्ञानपूर्वक्रियानुष्ठानाभावात्। न च क्रियामात्रादेव, ज्ञानश्रद्धानाभावात्, यतः क्रियाज्ञानश्रद्धानरहिता निःफलेति। यदि च ज्ञानमात्रादेव कचिदर्थसिद्धिर्दृष्टा साभिधीयतां। न चासावस्त्यतो मोक्षमार्गत्रितयकल्पना ज्यायसीति। अनंताः सामायिकसिद्धा इत्येतदपि त्रितयमेव साधयति। कथं? ज्ञस्वभावस्यात्मनस्तत्त्वं श्रद्दधानस्य सामायिकचारित्रोपपत्तेः। समय एकत्वमभेद इत्यनर्थांतरं। समयएव सामायिकं चारित्रं सर्वसावद्यनिवृत्तिरिति अभेदेन संग्रहादिति।

उक्तं च— हतं ज्ञानं क्रियाहीनं हता चाज्ञानिनां क्रिया।
धावन् किलांधको दग्धः पश्यन्नपि च पंगुलः॥ १ ॥
संयोगमेवेह वदंति तज्ज्ञा न ह्येकचक्रेण रथः प्रयाति।
अंधश्च पंगुश्च वने प्रविष्टौ तौ संप्रयुक्तौ नगरं प्रविष्टौ ॥ २ ॥ इति ॥

ज्ञानादेव मोक्ष इति चेदनवस्थानादुपदेशाभावः ॥ ११ ॥ यस्य ज्ञानादेव मोक्षस्तस्यानवस्थानादुपदेशाभावः यथा प्रदीपस्य तमो निवृत्तिहेतुत्वात्प्रदीपे सति न मुहूर्तमपि तमोऽवतिष्ठते। नह्येतदस्ति प्रदीपश्च नाम ज्वलति तमश्चावतिष्ठत इति। तथात्मस्वरूपावबोधाविर्भावानंतरमेवाप्तस्य मोक्षः स्यात्, नह्येतद्युक्तिमत्, ज्ञानं च नाम मोक्षस्य कारणमस्ति नच मोक्ष इति। ततो ज्ञानतरमेवाप्तस्य शरीरेंद्रियनिवृत्तेः प्रवचनोपदेशाभावः ॥

संस्काराक्षयादवस्थानादुपदेश इति चेन्न प्रतिज्ञातविरोधात् ॥ १२ ॥ स्यादेतद्यावदस्य संस्काराः न क्षीयंते तावदवस्थानमित्युपदेश उपपन्न इति, तन्न किं कारणं प्रतिज्ञातविरोधात्। यद्युत्पन्नज्ञानोपि संस्कारक्षयापेक्षत्वादवतिष्ठते न मुच्यते न तर्हि ज्ञानादेव मोक्षः कुतः संस्कारक्षयादिति, यत्प्रतिज्ञातं ज्ञानेन चापवर्ग इति तद्विरोधः किं च।

उभयादोषोपपत्तेः ॥ १३ ॥ इदमिह संप्रधार्यं संस्कारक्षयस्य ज्ञानं वा हेतुः स्यादन्योवेति। यदि ज्ञानं ननु ज्ञानादेव संस्कारनिरोध इति प्रवचनोपदेशाभावः, अथान्यः स कोन्यो भवितुमर्हति अन्यतश्चारित्रादिति पुनरपि प्रतिज्ञातविरोध इति किं च।

प्रव्रज्याद्यनुष्ठानाभावप्रसंगश्च ॥ १४ ॥ यदि ज्ञानादेव मोक्षः, ननु ज्ञान एव यत्नः कार्य्यः शिरस्तुंडमुंडनकाषायांबरधारणादिलक्षणप्रव्रज्यायमनियमभावनाद्यभावप्रसंगः स्यात्।

ज्ञानवैराग्यकल्पनायामपि ॥ १५ ॥ किमवस्थानाभावादुपदेशाभाव इत्यादिपदार्थपरिज्ञाने सति विषयानभिष्वंगलक्षणे च वैराग्य आसस्य तत्क्षण एव मोक्षोपपत्तेः किं च ।

नित्यानित्यैकांतावधारणे तत्कारणासंभवः ॥ १६ ॥ नित्या एवार्था अनित्या एव वेत्येकांतावधारणे तत्कारणासंभवः, तत्कारणस्य ज्ञानवैराग्यस्यासंभवः । तद्यथा नित्यैकांतेपि विक्रियाभावाद् ज्ञान वैराग्याभावः; विक्रिया द्विविधा ज्ञानादिविपरिणामलक्षणा देशांतरसंक्रमरूपा च। येषां नित्य एवात्मा सर्वगतश्चेति दर्शनं तेषामुभय्यपि सा नास्ति ततश्चतुष्टयत्रयद्वयसन्निकर्षजविज्ञानाभावाद्वैराग्यपरिणामाभावाच्च पूर्वापरकालतुल्यवृत्तेरात्मन आकाशस्येव मोक्षाभावः । समवायादितिचेन्न तस्य प्रत्याख्यातत्वात् । क्षणिकैकांतेप्यवस्थानाभावाज्ज्ञानवैराग्यभावनाभावः येषां मतं "क्षणिकाः सर्वसंस्कारा" इति तेषामप्युत्पत्यनतरं विनाशे सति ज्ञानादीनामवस्थानं नास्ति । नच तेभ्योऽन्यदवस्थास्नु वस्तु विद्यते अतस्तदभावाज्ज्ञानवैराग्यभावनाभावः । तत एवोत्पत्यनंतरं निरन्वयविनाशाभ्युपगमात्परस्परं संश्लेषाभावे निमित्तनैमित्तिक व्यवहारापह्नवाद विद्याप्रत्ययाः संस्कारा इत्येवमादि विरुध्यते संतानादिकल्पनायां वान्यत्वानन्यत्वयोरनेकदोषानुषंगः ।

विपर्ययाभावः प्रागनुपलब्धेरुपलब्धौ वा बंधाभावः ॥ १७ ॥ इह लोके प्रागनुभूतस्थाणुपुरुषविशेषस्य प्रकाशाभावादभिभवात्करणक्रमाद्वा विशेषानुपलब्धौ विपर्य्ययो दृष्टः नचावनितलभवन संभूतस्य प्रागप्रतीततदंतरस्य विपर्ययप्रत्ययो भवति । नच तथानादौ संसारेऽनभिव्यक्तशक्तेः पुरुषस्य गुणपुरुषांतरोपलब्धिरस्ति अतः प्रागनुपलब्धेर्नास्ति विपर्ययः, तथा सर्वभावेष्वनित्यानात्मकाशुचिदुःखेषु नित्यसात्मकशुचि सुखरूपेण विपर्ययो नास्ति । प्रागननुभूत विशेषत्वात् । यदि वा क्वचिदप्रसिद्धसामान्यविशेषस्य कस्यचिद्विपर्य्ययो दृष्टः सोभिधीयतां। नचोच्यतेऽतो विपर्ययाभावाद्बंधाभावस्तत्र यदुक्तं विपर्ययाद्बंध इति तद्व्याहन्यते। अथ प्राक्तद्विशेषोपलब्धिरभ्युपगम्यते ननु तदैव तद्धेतुकेन मोक्षेण भवितव्यमिति बंधाभावः स्यात्किं च ।

प्रत्यर्थवशवर्तित्वाच्च ॥ १८ ॥ विपर्ययाभाव इत्यनुवर्तते येषां दर्शनं प्रत्यर्थवशवर्ति विज्ञानमिति तेषां पुरुषविषयं विज्ञानं न स्थाणुमवगृह्णाति। स्थाणुविषयं च यद्विज्ञानं न तत्पुरुषमवबुध्यते । अतः परस्पर विषयसंक्रमाभावान्न संशयो न विपर्ययस्तथा सर्वेषु पदार्थेष्वनेकार्थग्रहणैकविज्ञानाभावादसति विपर्यये बंधाभावस्तत एव पदार्थविशेषानुपलब्धेर्मोक्षाभावः । नह्येकार्थग्राहि विज्ञानं तदंतरमवछिनत्ति ।

ज्ञानदर्शनयोर्युगपत्प्रवृत्तेरेकत्वमिति चेन्न तत्त्वावायश्रद्धानभेदात्तापप्रकाशवत् ॥ १९ ॥ स्यादेतद् ज्ञानदर्शनयोरेकत्त्वं, कुतः । युगपत्प्रवृत्तेरिति तन्न किंकारणं तत्त्वावायश्रद्धानभेदात् कथं ताप प्रकाशवत् । यथा तापप्रकाशयोर्युगपदात्मलाभेपि दाहद्योतनसामर्थ्यभेदान्नैकत्वं । तथा ज्ञानदर्शनयोस्त त्त्वावायश्रद्धानभेदान्नैकत्वं। तत्त्वस्य ह्यवगमो ज्ञानं, श्रद्धानं दर्शनमिति ।

दृष्टविरोधाच्च ॥ २० ॥ यस्य मतं युगपदात्मलाभ एकत्वहेतुरिति तस्य दृष्टविरोध आपद्यते । दृष्टं हि गोविषाणादीनां युगपदुत्पद्यमानानामपि नानात्वं ।

उभयनयसद्भावेन्यतरस्याश्रितत्वाद्वा रूपादिपरिणामवत् ॥ २१ ॥ उभयनयसद्भावेन्यतरस्याश्रितत्वाद्वा न दोषः कथं रूपादिपरिणामवत् । यथा परमाण्वादिपुद्गलद्रव्याणां बाह्याभ्यंतरपरिणाम कारणापादिते युगपद्रूपादिपरिणामे न रूपादीनामेकत्त्वं तथा ज्ञानदर्शनयोरपि । अथवा उभयनयसद्भावेन्यतस्याश्रितत्वात्, तथा रूपादिपरिणामानां द्रव्यार्थिकपर्यायार्थिकयोरन्यतरगुणप्रधानभावार्पणात्स्यादेकत्वं स्यान्नानात्वं । कथमिह पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात्पर्यायार्थानर्पणादनादिपरिणामिकपुद्गलद्रव्यार्थादेशात्स्यादेकत्वं, यथा रूपपर्यायः पुद्गलद्रव्यं। तथा रसादयोपि द्रव्यार्थादेशात्पुद्गलद्रव्यं। तेषामेव द्रव्यार्थिकगुणभावे पर्यायार्थिकप्रधानाद्द्रव्यार्थानर्पणात्प्रतिनियतरूपादिपर्यायार्थेनार्पितानां स्यादन्यत्वं, यतोन्यो रूपपर्यायः अन्ये च रसादयः । तथा ज्ञानदर्शनयोरनेन विधिनाऽनादिपारिणामिकचैतन्यजीव द्रव्यार्थादेशात्स्यादेकत्वं यतो द्रव्यार्थादेशाद्यथा ज्ञानपर्याय आत्मद्रव्यं तथा दर्शनमपि । तयोरेव प्रतिनियतज्ञानदर्शनपर्यायार्थार्पणात्स्यादन्यत्वं यस्मादन्यो ज्ञानपर्यायोन्यश्च दर्शनपर्यायः ।

ज्ञानचारित्रयोरकालभेदादेकत्वमगम्यावबोधवदिति चेन्नाशूत्पत्तौ सूक्ष्मकालाप्रतिपत्तेरुत्पलपत्रशतव्यधनवत् ॥ २२ ॥ स्यादेतज्ज्ञानचारित्रयोरेकत्वं, कस्मादकालभेदात्। कथमगम्यावबोधवत्। यथा केनचिन्मोहोदयापादिताऽन्यांगनाभिसरणोत्सुकमतिना पुंसा मेघोदयोद्भूतबहलांधकारायां रात्रौ वीथ्यन्तराले मातृपुंश्चली स्वामिलषितेति स्पृष्टा, तदैव विद्युता च विद्योतितं तेन मातेयमिति तस्य ज्ञानं यदोत्पन्नं तदैवाऽगम्यावबोधादगम्यागमननिवृत्तिः नागम्यावबोधागम्यागमननिवृत्योः कालभेदोस्ति। तथा यदैव ज्ञानावरणक्षयोपशमाज्जीवेषु ज्ञानं जीवा इत्याविर्भवति, तदैव ते न हिंस्या इति जीवे हिंसाप्रत्ययस्य निवृत्तिः, निवृत्तिश्च चारित्रं, नच जीवज्ञानहिंसानिवृत्त्योः कालभेदोस्तीति। तन्न किं कारणमाशूत्पत्तौ सूक्ष्मकालाप्रतिपत्तेः, तत्राप्यस्त्येव कालभेदः सौक्ष्म्यात्तु न प्रतीयते, कथमुत्पलपत्रशतव्यधनवत्। यथोत्पलपत्रशतव्यधनक्रम असंख्येयसमयिकः सर्वज्ञप्रत्यक्षोतिसूक्ष्मोस्ति नतु विभाव्यते छद्मस्थैर्यतो यावदेकमुत्पलपत्रमसिश्छित्त्वा द्वितीयं छिनत्ति तावदसंख्येयाः समया अतीता इति कालसूक्ष्मोपदेशस्तथाऽन्योगम्यावबोधकालः, अन्यश्च निवृत्तिकालः।

अर्थभेदाच्च ॥ २३ ॥ किं? नैकत्वमिति वर्तते ज्ञानस्य तत्त्वावबोधोर्थः चारित्रस्य कर्मादानहेतुक्रियाविशेषोपरमोऽर्थ इत्यतो नानात्वं।

कालभेदाभावो नार्थभेदहेतुर्गतिजात्यादिवत् ॥ २४ ॥ न कालभेदाभावोर्थभेदहेतुर्न्याय्यः कथं गतिजात्यादिवत् यथा यदैव देवदत्तजन्म तदैव मनुष्यगतिपचेंद्रियजातिशरीरवर्णगंधादीनां जन्म। नान्यो देवदत्तजन्मकालः, अन्यश्च मनुष्य गत्यादिपर्यायजन्मकालः। नचैककालत्वान्मनुष्यगत्यादीनामेकत्वं। यस्य पुनः कालभेदाभाव एकत्वहेतुरिष्टस्तस्य मनुष्यगत्यादिपर्यायाणामेकत्वप्रसंगो नचेष्यतेऽतो न कालभेदाभावाज्ज्ञानचारित्रयोरेकत्वं।

उक्तं च ॥ २५ ॥ किमुक्तं उभयनयसद्भावात्स्यादेकत्वं स्यान्नानात्वमिति।

तल्लक्षणभेदात्तेषामेकमार्गत्वानुपपत्तिरितिचेन्न परस्परसंसर्गे सत्येकत्वं प्रदीपवत् ॥ २६ ॥ स्यादेतत्तेषां सम्यग्दर्शनादीनामेकमार्गत्वं नोपपद्यते, कुतो लक्षणभेदात्, नहि भिन्नलक्षणानामेकत्वं युज्यते तत स्त्रयोमी मोक्षमार्गाः प्रसक्ता इति। तन्न किंकारणं परस्परसंसर्गे सत्येकत्व, कथ? प्रदीपवत्, यथा परस्परविलक्षणवर्तिस्नेहानलार्थानां बाह्याभ्यंतरपरिणामकारणापादितसंयोगपर्यायाणां समुदये भवत्येकः प्रदीपो न त्रयः। तथा परस्परविलक्षणसम्यग्दर्शनादित्रयसमुदये भवत्येको मोक्षमार्गो न त्रयः।

सर्वेषामविसंवादात् ॥ २७ ॥ विलक्षणानामेकत्वावासौ प्रतिवादिनो विसंवदंते केचित्तावदाहुः प्रसादलाघवशोषतापावरणसादनादिभिन्नलक्षणानां सत्त्वरजस्तमसां साम्ये प्रधानमेकं, न तेषांत्रित्वात्प्रधानस्य त्रैविध्यमिति। अपर आहुः काकवडतादीनां चतुर्णां भूतानां भौतिकानां च वर्णादीनां बिलक्षणानां समुदय एको रूपपरमाणुः न तेषां भेदात्परमाणोरनेकत्वं। तथा रागादीनां धर्माणां प्रमाणप्रमेयाविगमरूपाणां च विलक्षणानां समुदय एकं विज्ञानं न तेषां भेदाद्विज्ञानभेद इति। इतर आहुश्चित्राणां तंतूनां समुदयश्चित्रपट एको न तेषां भेदात्पटस्य भेद इति तद्वदिहापि सम्यग्दर्शनादीनां भिन्नलक्षणानां समुदय एको मोक्षमार्ग इति को विरोधः।

एषां पूर्वस्य लाभे भजनीयमुत्तरं ॥ २८ ॥ एषां सम्यग्दर्शनादीनां पूर्वस्य लाभे भजनीयमुत्तरं वेदितव्यं।

उत्तरलाभे तु नियतः पूर्वलाभः ॥ २९ ॥ उत्तरस्य तु लाभे नियतः पूर्वलाभो द्रष्टव्यः सम्यग्दर्शनज्ञानचारित्राणां पाठं प्रति पूर्वत्वमुत्तरत्वं च। पूर्वस्य सम्यग्दर्शनस्य लाभे ज्ञानमुत्तरं भजनीयं उत्तरज्ञानलाभे तु नियतः पूर्वसम्यग्दर्शनलाभः। तथा पूर्वज्ञानलाभे उत्तरचारित्रं भजनीयं, उत्तर चारित्रलाभे तु नियतः सम्यग्दर्शनज्ञानलाभः।

तदनुपपत्तिरज्ञानपूर्वकश्रद्धानप्रसंगात् ॥ ३० ॥ पूर्वस्य लाभे भजनीयमुत्तरमित्येतस्याऽनुपपत्तिः कुतोऽज्ञानपूर्वकश्रद्धानप्रसंगात् । यदि पूर्वसम्यग्दर्शनलाभे उत्तरज्ञानलाभो भजनीयः, ननु ज्ञानाभावादज्ञानपूर्वकश्रद्धानप्रसंगः । किं च–

अनुपलब्धस्वतत्त्वेर्थे श्रद्धानानुपपत्तिरविज्ञातफलरसोपयोगवत् ॥ ३१ ॥ यथा नाविज्ञाते फले तद्रसोपयोगोऽमुष्य फलस्य रसं संपादयतेति श्रद्धानमस्ति तथा नाविज्ञातेषु जीवादिषु श्रद्धानमस्तीति श्रद्धानाभावः स्यात् । किं च—

आत्मस्वरूपाभावप्रसंगात् ॥ ३२ ॥ यदि सम्यग्दर्शनलाभे ज्ञानं भजनीयत्वादमद्विरोधान्मिथ्याज्ञाननिवृत्तौ सम्यग्ज्ञानस्य चाभावाज्ज्ञानोपयोगाभाव आत्मनः प्रसक्तः । ततश्च लक्षणाभावाल्लक्ष्यस्यात्मनोऽप्यभावः स्यात्तदभावाच्च मोक्षमार्गपरीक्षा व्यर्थेति ।

न वा यावति ज्ञानमित्येतत्परिसमाप्यते तावतोऽसंभवाश्रयापेक्षं वचनं ॥ ३३ ॥ न वा एष दोषः, किं कारणं यावति, ज्ञानमित्येतत्परिसमाप्यते तावतोऽसंभवाश्रयापेक्षमिदं वचनं भजनीयमुत्तरमिति । क्वचन ज्ञानमित्येतत्परिसमाप्यते श्रुतकेवलयोर्यतः श्रुतकेवलज्ञानग्राही शब्दनयः श्रुतकेवले एवेच्छति नान्यज्ज्ञान मपरिपूर्णत्वादिति तदपेक्षं संपूर्णद्वादशांगचतुर्दशपूर्वलक्षणं श्रुतं केवलं च भजनीयमुक्तं । तथा पूर्वे सम्यग्दर्शनलाभे देशचारित्रं, संयतासंयतस्य सर्वचारित्रं, प्रमत्तादारभ्य सूक्ष्मसांपरायांतानां यच्च यावच्च नियमादस्ति संपूर्णयथाख्यातचारित्रं तु भजनीयं ॥

पूर्वसम्यग्दर्शनज्ञानलाभे भजनीयमुत्तरमितिचेन्न निर्देशस्याऽगमकत्वात् ॥ ३४ ॥ स्यादेतन्माज्ञानपूर्वकश्रद्धानप्रसंगोस्ति कुतः पूर्वसम्यग्दर्शनज्ञानलाभे चारित्रमुत्तरं भजनीयमित्यभिसंबधादिति । तन्न, किं कारणं निर्देशस्यागमकत्वाद्युक्तोयमर्थो नतु तस्य निर्देशो गमकः पूर्वस्य लाभ इति पूर्वयोरिति हि वक्तव्यं स्यात् । अथ सामान्यनिर्देशादुभयगतिः कल्प्यते नैवं शक्यं व्यवस्थाविशेषस्य विवक्षितत्वात्, इतरथा हि उत्तरेपि तथा प्रक्लृप्तौ तद्दोषानतिवृत्तिः स्यात्तस्मात्पूर्वोक्त एवार्थो नयापेक्ष वचनमिति । अथवा क्षायिकसम्यग्दर्शनलाभे क्षायिकं सम्यग्ज्ञानं भजनीयं, अथवा युगपदात्मलाभे साहचर्यादुभयोरपि पूर्वत्वं । यथा साहचर्यात्पर्वतनारदयोः । पर्वतग्रहणेन नारदस्य ग्रहणं नारदग्रहणेन पर्वतस्य ग्रहणं । तथा सम्यग्दर्शनस्य सम्यग्ज्ञानस्यान्यतरस्यात्मलाभे चारित्रमुत्तरं भजनीयं ॥

इति तत्त्वार्थवार्तिकव्याख्यानालंकारे प्रथमेध्याये द्वितीयमाह्निकं ॥ २ ॥

अमीषां मोक्षकारणसामान्ये सत्यविशिष्टानां विशेषप्रतिपत्यर्थमिदमाह—

तत्त्वार्थश्रद्धानं सम्यग्दर्शनं ॥ २ ॥

सम्यगितिकोयं शब्दः—**सम्यगिति प्रशंसार्थो निपातः क्यंतो वा** ॥ १ ॥ सम्यगित्ययं निपातः प्रशंसार्थो वेदितव्यः सर्वेषां प्रशस्तरूपगतिजातिकुलायुर्विज्ञानदीनामभ्युदयिकानां मोक्षस्य च प्रधानकारणत्वात् प्रशस्तं दर्शनं सम्यग्दर्शनं । ननु च "सम्यगिष्टार्थतत्त्वयोरिति" वचनात् प्रशंसार्थाभाव इति तन्नाऽनेकार्थत्वान्निपातानां । अथवा सम्यगिति तत्त्वार्थो निपातस्तत्त्वं दर्शनं सम्यग्दर्शनमविपरीतार्थविषयं तत्त्वमित्युच्यते । अथवा क्यंतोयं शब्दः समंचतीति सम्यक्, यथार्थो व्यवस्थितस्तथैवावगच्छतीत्यर्थः । अथ किमिदं दर्शनमिति ।

करणादिसाधनो दर्शनशब्दः उक्तः ॥ १ ॥ दृशेः करणादिसाधने युटि दर्शनशब्दो व्याख्यातः।

दृशेरालोकार्थत्वादभिप्रेतार्थासंप्रत्यय इति चेन्नानेकार्थत्वात् ॥२॥ स्यादेतद्दृशिरयमालोकार्थे वर्तते आलोकश्चेंद्रियानिंद्रयार्थप्राप्तिः, नचासाविहाभिप्रेतः, श्रद्धानमिष्टं, न तस्यार्थस्य संप्रत्ययोस्तीति ।

तत्र किंकारणं अनेकार्थत्वात्, इह श्रद्धानमिष्टमभिसंबध्यते। कथं पुनर्ज्ञायते आलोक इह नेष्टः श्रद्धान मिष्टमित्यत उत्तरं पठति ।

मोक्षकारणप्रकरणाच्छ्रद्धानगतिः ॥ ४ ॥ मोक्षकारणं प्रकृतं तत्त्वार्थविषयं श्रद्धानं मोक्षस्य कारणं नालोक इत्यतः प्रकरणाच्छ्रद्धानगतिर्भवति ॥ अथ तत्त्वमित्यनेन किं प्रत्यायते ।

प्रकृत्यपेक्षत्वात्प्रत्ययस्य भावसामान्यसंप्रत्ययस्तत्त्ववचनात् ॥ ५ ॥ तदित्येषा प्रकृतिः सामान्याभिधायिनी सर्वनामत्वात् प्रत्ययश्च भावे उत्पद्यते । कस्य भावे तदित्यनेन योर्थ उच्यते। कश्चासौ, सर्वोर्थः, अतस्तदपेक्षत्वाद्भावस्य भावसामान्यमुच्यते। तत्त्वशब्देन योर्थो यथावस्थितस्तथा तस्य भवनमित्यर्थः?।

तत्त्वेनार्यत इति तत्त्वार्थः ॥ ६ ॥ अर्यते गम्यते ज्ञायते इत्यर्थस्तत्त्वेनार्थस्तत्त्वार्थः । येन भावेनार्थो व्यवस्थितस्तेन भावेनार्थस्य ग्रहणं यत्सन्निधानाद्भवति तत्सम्यग्दर्शनं।

श्रद्धानशब्दस्य करणादिसाधनत्वं पूर्ववत् ॥ ७ ॥ यथा दर्शनशब्दस्य करणादिसाधनत्वं व्याख्यातं तथा श्रद्धानशब्दस्यापि वेदितव्यं ।

सत्वात्मपरिणामः ॥ ८ ॥ स तु श्रद्धानशब्दवाच्योर्थः करणादिव्यपदेशभागात्मपरिणामो वेदितव्यः।

वक्ष्यमाणनिर्देशादिसूत्रविवरणात्पुद्गलद्रव्यसंप्रत्यय इति चेन्नात्मपरिणामेपि तदुपपत्तेः ॥ ९ ॥ स्यादेतद्वक्ष्यमाणनिर्देशादिसूत्रविवरणात्पुद्गलद्रव्यस्य संप्रत्ययः प्राप्नोति । तन्न किं कारणमात्मपरिणामेपि तदुपपत्तेः । किं तत्त्वार्थश्रद्धानमात्मपरिणामः कस्य आत्मन इत्येवमादि ।

कर्माभिधायित्वेप्यदोष इति चेन्न मोक्षकारणत्वेन स्वपरिणामस्य विवक्षितत्वात् ॥१०॥ स्यादेतत्सम्यक्त्वकर्मपुद्गलाभिधायित्वेप्यदोष इति तन्न किं कारणं? मोक्षकारणत्वेन स्वपरिणामस्य विवक्षितत्वात्। औपशमिकादिसम्यग्दर्शनमात्मपरिणामत्वान्मोक्षकारणत्वेन विवक्ष्यते। नच सम्यक्त्वकर्मपर्यायः, पौद्गलिकत्वेऽस्य परपर्यायत्वात्।

स्वपरनिमित्तत्वादुत्पादस्येति चेन्नोपकरणमात्रत्वात् ॥ ११ ॥ स्यादेतत्स्वपरनिमित्त उत्पादो दृष्टो यथा घटस्योत्पादो मृन्निमित्तो दण्डादिनिमित्तश्च । तथा सम्यग्दर्शनोत्पाद आत्मनिमित्तः सम्यक्त्वपुद्गलनिमित्तश्च तस्मात्तस्यापि मोक्षकारणत्वमुपपद्यत इति। तन्न किं कारणमुपकरणमात्रत्वात्। उपकरणमात्रं हि बाह्यसाधनं किं च-

आत्मपरिणामादेव तद्रसघातात् ॥ १२ ॥ यदिदं दर्शनमोहाख्यं कर्म तदात्मगुणघाति कुतश्चिदात्मपरिणामादेवाऽपक्षीणशक्तिकं सम्यक्त्वाख्यां लभते । अतो न तदात्मपरिणामस्य प्रधानं कारणमात्मैव स्वशक्त्या दर्शनपर्यायेणोत्पद्यत इति तस्यैव मोक्षकारणत्वं युक्तं किं च--

अहेयत्वात्स्वधर्मस्य ॥ १३ ॥ न हीयते न परित्यज्यत इत्यहेयोऽयमाभ्यतर आत्मनः सम्यक्त्वपरिणामः । यतः सत्याभ्यंतरे आत्मनः सम्यक्त्वपरिणामे नियमेनात्मा सम्यग्दर्शनपर्यायेणाविर्भवति। बाह्यस्तु हेयः कर्मपुद्गलः । तमंतरेणापि क्षायिकसम्यक्त्वपरिणामात् । किं च-

प्रधानत्वात् ॥ १४ ॥ आभ्यंतर आत्मीयः सम्यग्दर्शनपरिणामः प्रधानं । सति तस्मिन्बाह्यस्योपग्राहकत्वात् । अतो बाह्य आभ्यंतरस्योपग्राहकः परेर्थे न वर्तेत इत्यप्रधानं । किं च—

प्रत्यासत्तेः ॥ १५ ॥ प्रत्यासन्नं हि कारणमात्मपरिणामो मोक्षस्य, तादात्म्येनाविर्भावात्, नतु सम्यक्त्वं कर्म । विप्रकृष्टांतरत्वात्तादात्म्येनैवाऽपरिणामाच्च । तस्मादहेयत्वात्प्रधानत्वात्प्रत्यासत्तेश्च मोक्षस्य कारणमात्मपरिणामो युक्तो न कर्मेति ॥

अल्पबहुत्वकल्पनाविरोध इति चेन्नोपशमाद्यपेक्षस्य सम्यग्दर्शनत्रयस्यैव तदुपपत्तेः॥ १६॥

स्यादेतत्सम्यग्दर्शनस्यात्मपरिणामत्वेऽल्पबहुत्वकल्पनाविरोध इति । तन्न किं कारणं ? उपशमाद्यपेक्षस्य सम्यग्दर्शनत्रयस्यैव तदुपपत्तेः । सर्वेषु स्तोका उपशमसम्यग्दृष्टयः संसारिणः । क्षयिकसम्यग्दृष्टयोऽसंख्येयगुणाः। क्षायोपशमिकसम्यग्दृष्टयोऽसंख्येयगुणाः। सिद्धाः क्षायिकसम्यग्दृष्टयोऽनंतगुणा इति। तस्मात्सम्यग्दर्शनमात्मपरिणामं श्रेयोभिमुखमध्यवस्यामः ।

तत्त्वाग्रहणमर्थश्रद्धानमित्यस्तु लघुत्वात् ॥१७॥ कश्चिदाह तत्त्वग्रहणमनर्थकं । अर्थश्रद्धानमित्येवास्तु, कुतो लघुत्वादिति ।

न सर्वार्थप्रसंगात् ॥ १८ ॥ नैतद्युक्तं कुतः सर्वार्थप्रसंगात्तत्त्वग्रहणादृते मिथ्यावादिप्रणीतेषु सर्वार्थेषु श्रद्धानं सम्यग्दर्शनं प्राप्नोति ।

संदेहाच्चार्थशब्दस्याऽनेकार्थत्वात् ॥१९॥ अर्थ शब्दोयमनेकार्थः क्वचिद् द्रव्यगुणकर्मसु वर्ततेऽर्थ इति "द्रव्यगुणकर्मस्विति" वचनात् । क्वचित्प्रयोजने वर्तते "किमर्थमिहागमनं भवतः किं प्रयोजनमिति" क्वचिद्धने वर्तते "अर्थवानयं देवदत्तो धनवानिति"। क्वचिदभिधेये वर्तते "शब्दार्थसंबंध" इति। एवमर्थशब्दस्यानेकार्थाभिधायित्वे संदेहः कस्यार्थस्य श्रद्धानं सम्यग्दर्शनमिति ।

सर्वानुग्रहाददोष इतिचेन्नाऽसदर्थविषयत्वात् ॥ २० ॥ स्यादेतन्नायं दोषः सर्वार्थप्रसंग इति, अस्तु सर्वार्थविषयं श्रद्धानं सम्यग्दर्शनं तथा सति सर्वानुग्रहः कृतो भवति । कश्चेदानीं भवतो मत्सरः सर्वो लोकोऽभ्युदये न युज्यतामिति, तन्न किंकारणं ? असदर्थविषयत्वात्, न खलु कश्चिन्नो मत्सरः । असदर्थविषयं हि तच्छ्रद्धानं संसारकारणमिति । अतः सर्वानुग्रहार्थमेव तत्त्वेन विशिष्यते ।

अर्थग्रहणादेव तत्सिद्धिरिति चेन्न विपरीतग्रहणदर्शनात् ॥ २१ ॥ स्यादेतदर्यत इत्यर्थो निश्चीयत इत्यर्थः । नच मिथ्यावादिप्रणीता अर्थाः, अतत्त्वात् । तस्मादर्थग्रहणादेव तत्त्वसंप्रत्ययान्नार्थस्तत्त्वग्रहणेनेति, तन्न किं कारणं विपरीतग्रहणदर्शनात् । यथा पित्तोदयाकुलितकरणः पुमान् मधुररसं कटुकं मन्यते । तथाऽत्मा मिथ्याकर्मोदयदोषादास्तित्वनास्तित्वनित्यत्वाऽनित्यत्वाऽन्यत्वाऽनन्यत्वाद्येकांतरूपेण मिथ्याऽध्यवस्यति। अतस्तन्निरासकारणार्थं तत्त्वग्रहणमिति। अर्थग्रहणं किमर्थं ? ननु तत्त्वान्येवार्थ इत्यर्थानां तत्त्वसामानाधिकरण्यात्तत्त्ववचनेनैव संप्रत्ययः सिद्धः । उच्यते—

अर्थग्रहणमव्यभिचारार्थं ॥ २२ ॥ अर्थग्रहणं क्रियते अव्यभिचारार्थं ।

तत्त्वमिति श्रद्धानमिति चेदेकांतनिश्चितेपि प्रसंगः ॥२३॥ यदि तत्त्वमिति श्रद्धानं तत्त्व श्रद्धानमित्युच्यत एकांतनिश्चितेपि प्राप्नोति । एकांतवादिनो पि हिं नास्त्यात्मेत्येवमादितत्वमिति श्रद्दधति ।

तत्त्वस्य श्रद्धानमिति चेद्भावमात्रप्रसंगः ॥२४॥ यदि तत्त्वस्य श्रद्धानं तत्त्वश्रद्धानमित्युच्यते भावमात्रप्रसंगः स्यात्। तत्त्वं भावसामान्यमिति केचित् कथयंति, द्रव्यत्वगुणत्वकर्मत्वादिसामान्यं द्रव्यादिभ्यो ऽर्थांतरं तस्य श्रद्धानं सम्यग्दर्शनं प्राप्नोति । न हि द्रव्यादिभ्योऽन्यत्सामान्यं युक्तिमदिति परीक्षितमेतत् । अथवा तत्त्वमेकत्वमित्यर्थः पुरुष एवेदं सर्वमित्यादि । तस्य श्रद्धानं सम्यग्दर्शनं प्राप्नोति, नचादो युक्तं क्रियाकारकभेदलोपप्रसंगादिति ।

तत्त्वेन श्रद्धानमिति चेत्कस्य कस्मिन्वेति प्रश्नानिवृत्तिः ॥२५॥ यदि तत्त्वेन श्रद्धानमित्युच्यते कस्य कस्मिन्वेति प्रश्नो न विनिवर्तते । तस्मात्सूक्तमर्थग्रहणमव्यभिचारार्थमिति ।

इच्छाश्रद्धानमित्यपरे वर्णयंति ॥ २६ ॥

तदयुक्तं मिथ्यादृष्टेरपि प्रसंगात् ॥ २७ ॥ यतो मिथ्यादृष्टयो बाहुश्रुत्यप्रचिख्यापयिषयाऽऽर्हतमतविजिगीषयावार्हतमतमधीयंते । नचेच्छामंतरेणाध्ययनमस्त्यतस्तेषामपि सम्यग्दर्शनं प्राप्नोतीत्ययुक्तमुक्तमिच्छाश्रद्धानमिति ।

केवलिनि सम्यक्त्वाभावप्रसंगाच्च ॥२८॥ यदि चेच्छासम्यक्त्वं, इच्छा च लोभपर्यायः। नच क्षीणमोहकेवलिनि लोभोऽस्ति तदभावादिच्छाभाव इति सम्यक्त्वाभावः स्यात्। तस्माद्यद्भावाद्यथाभूतमर्थं गृह्णात्यात्मा तत्सम्यग्दर्शनमिति प्रत्येतव्यं।

तद् द्विविधं सरागवीतरागविकल्पात् ॥२९॥ एतत्सम्यग्दर्शनं द्विविधं कुतः सरागवीतरागविकल्पात्।

प्रशमसंवेगानुकंपास्तिक्याभिव्यक्तलक्षणं प्रथमं ॥ ३० ॥ रागादीनामनुद्रेकः प्रशमः संसाराद्भीरुता संवेगः। सर्वप्राणिषु मैत्री अनुकंपा। जीवादयोऽर्था यथास्वभावैः संतीति मतिरास्तिक्यं। एतैरभिव्यक्तलक्षणं प्रथमं सरागसम्यक्त्वमित्युच्यते।

आत्मविशुद्धिमात्रमितरत् ॥ ३१ ॥ सप्तानां कर्मप्रकृतीनां आत्यंतिकेऽपगमे सत्यात्मविशुद्धिमात्रमितरद्वीतरागसम्यक्त्वमित्युच्यते। पूर्वं साधनं भवति उत्तरं साधनं साध्यं च॥ अथैतत्सम्यग्दर्शनं जीवादिपदार्थविषयं कथमुत्पद्यत इत्यत आह।

तन्निसर्गादधिगमाद्वा ॥ ३ ॥

निसर्ग इति कोयं शब्दः? निपूर्वात्सृजेर्भावसाधनो घञ्। निसर्जनं निसर्गः स्वभाव इत्यर्थः। अथाधिगम इति कः? अधिपूर्वाद्गमेर्भावसाधनोऽच्। अधिगमनमधिगमस्तयोर्हेतुत्वेन निर्देशो निसर्गादधिगमादिति कस्य? क्रियायाः, का च क्रिया? उत्पद्यत इत्यध्याह्रियते, सोपस्कारत्वात्सूत्राणां। तदेतत्सम्यग्दर्शनं निसर्गादधिगमाद्वा उत्पद्यत इति। कश्चिदाह—

सम्यग्दर्शनद्वैविध्यकल्पनानुपपत्तिरनुपलब्धतत्त्वस्य श्रद्धानाभावात् रसायनवत् ॥१॥ द्विविधं सम्यग्दर्शनमितिकल्पना नोपपद्यते। कुतः अनुपलब्धतत्त्वस्य श्रद्धानाभावात्, कथं रसायनवत्। यथाऽत्यंतपरोक्षरसायनतत्त्वफलस्य न रसायने श्रद्धानं दृष्टं। तथाऽनधिगतजीवादितत्त्वस्य न तत्र श्रद्धानमिति नैसर्गिकसम्यग्दर्शनाभावः।

शूद्रवेदभक्तिवदिति चेन्न वैषम्यात् ॥ २ ॥ स्यादेतद्यथा शूद्रस्याऽनधिगतवेदार्थस्य वेदार्थे आत्यंतिकभक्तिस्तथानुपलब्धजीवादितत्त्वस्य श्रद्धानमिति। तन्न किं कारणं वैषम्यात्, युज्यते शूद्रस्य भारतादिश्रवणात्तज्ज्ञवचनानुवृत्यादिभिश्च वेदार्थभक्तिः। नासौ नैसर्गिकी। इह तु नैसर्गिकी रुचिरिष्टेति वैषम्यं। अथवा सम्यक्त्वाधिकाराज्जीवादिपदार्थतत्त्वोपलब्धिपूर्वकेण सम्यग्दर्शनेन मोक्षकारणेनेह भवितव्यं नच शूद्रस्य तादृशं श्रद्धानमिति वैषम्यं।

मणिग्रहणवदितिचेन्न प्रत्यक्षेणोपलब्धिसद्भावात् ॥ ३ ॥ स्यादेतद्यथाऽनधिगतमणिविशेषस्यापि पुंसो मणिग्रहणं भवति तस्य च फलं दृष्टं तथाऽनधिगतजीवादितत्त्वस्यापि तत्त्वग्रहणं भवति तस्य च फलं भवतीति तन्नैसर्गिकं दर्शनमिति। तन्न किं कारणं प्रत्यक्षोपलब्धिसद्भावात्। नात्यंतपरोक्षं मणिं गृह्णाति किन्तु प्रत्यक्षत उपलभ्य गृह्णाति विपर्ययविशेषं तु न प्रतिपद्यते। अतोऽस्याऽनुपलब्धमणिविशेषस्यापि प्रत्यक्षदर्शनाद्ग्रहणं न्याय्यं। अत्यंतपरोक्षे तु जीवादितत्त्वे कथमस्य निसर्गजसम्यग्दर्शनसिद्धिः। सामान्याधिगमे तु अधिगमसम्यग्दर्शनमेवेति।

तापप्रकाशवद्युगपदुत्पत्तेरभ्युपगमाच्च ॥ ४ ॥ किं निसर्गजसम्यग्दर्शनाभाव इत्यनुवर्तते यदास्य सम्यग्दर्शनमुत्पद्यते तदैव प्राक्तनं मत्यज्ञानं श्रुताज्ञानं च सम्यक्त्वेन परणमतीत्यधिगमजमेव। तद्भवति। यस्य ज्ञानात्प्राग्दर्शनं स्यात्तस्य नैसर्गिकं स्यात्तच्चाऽनिष्टमिति। उच्यते।

उभयत्र तुल्येऽतरंगहेतौ बाह्योपदेशापेक्षानपेक्षभेदाद्भेदः ॥ ५ ॥ उभयत्र दर्शनेऽतरंगो हेतुस्तुल्यः। दर्शनमोहस्योपशमः क्षयः क्षयोपशमो वा। तस्मिन् सति यद्बाह्योपदेशादृते प्रादुर्भवति तन्नैसर्गिकं। यत्परोपदेशपूर्वकं जीवाद्यधिगमनिमित्तं तदुत्तरमित्यनयोरयं भेदः।

अपरोपदेशपूर्वके निसर्गाभिप्रायो लोकवत् ॥ ६ ॥ यथा लोके हरिशार्दूलवृकभुजगादयो निसर्गतः क्रौर्यशौर्याशौर्याहारादिसंप्रतिपत्तौ वर्तंत इत्युच्यंते । नचासावाकस्मिकी कर्मनिमित्तत्वात् अनाकस्मिक्यपि सती नैसर्गिकी भवति परोपदेशाभावात् । तथेहाप्यपरोपदेशपूर्वके निसर्गाभिप्रायः । अपर आह-

भव्यस्य कालेन निःश्रेयसोपपत्तेरधिगमसम्यक्त्वाभावः ॥ ७ ॥ यद्यवधृतमोक्षकालात्प्रागधिगमसम्यक्त्वबलान्मोक्षः स्यात्, स्यादधिगमसम्यग्दर्शनस्य साफल्यं । नचादोस्ति । अतः कालेन योस्य मोक्षोसौ स निसर्गजसम्यक्त्वादेव सिद्ध इति ॥

न विवक्षितापरिज्ञानात् ॥ ८ ॥ नैतद्युक्तं कुतः ? विवक्षिताऽपरिज्ञानात् । सम्यग्दर्शनादित्रयान्मोक्ष उक्तः, तत्र यत्प्रथमं तत्कुत उत्पद्यत, इत्युक्ते निसर्गादधिगमाद्वेत्ययमर्थोऽत्र विवक्षितः । यदि सम्यग्दर्शनादित्र केवलान्निसर्गजादधिगमजाद्वा ज्ञानचारित्ररहितान्मोक्ष इष्टः स्यात्, तत इदं युक्तं स्यात् " भव्यस्य कालेन निःश्रेयसोपपत्तेरिति " । नचायमर्थोऽत्र विवक्षितः । अथवा यथा कुरुक्षेत्रे काचित्कनकं बाह्यपौरुषेयप्रयत्नाभावाज्जायते । तथा बाह्यपुरुषोपदेशपूर्वकजीवाद्यधिगममंतरेण यज्जायते तन्निसर्गजं । यथा कनकाश्म विध्युपायज्ञपुरुषप्रयोगापेक्षं कनकभावमापद्यते । तथा यत्सम्यग्दर्शनं विध्युपायज्ञमनुष्यसंपर्काज्जीवादिपदार्थतत्त्वाधिगमापेक्षमुत्पद्यते तदधिगमजसम्यग्दर्शनमित्ययमर्थो विवक्षितः । नचान्यतरस्याभाव इति ।

कालानियमाच्च निर्जरायाः ॥ ९ ॥ यतो न भव्यानां कृत्स्नकर्मनिर्जरापूर्वकमोक्षकालस्य नियमोस्ति । केचिद्भव्याः संख्येयेन कालेन सेत्स्यंति, केचिदसंख्येयेन, केचिदनंतेन । अपरेऽनंतानंतेनापि न सेत्स्यंति इति । ततश्च न युक्तं " भव्यस्य कालेन निःश्रेयसोपपत्तेरिति " ।

चोदनानुपपत्तेश्च ॥ १० ॥ सर्वस्येयं चोदना नोपपद्यते । ज्ञानक्रियायाद्वयात् ? त्रितयाच्च मोक्षमाचक्षाणस्य सर्वस्य नेदं युक्तं " भव्यस्य कालेन मोक्ष " इति । यदि हि सर्वस्य कालो हेतुरिष्टः स्यात्, बाह्याभ्यंतरकारणनियमस्य दृष्टस्येष्टस्य वा विरोधः स्यात् ।

तदित्यनंतरनिर्देशार्थं ॥ ११ ॥ तदित्येतदनंतरस्य सम्यग्दर्शनस्य निर्देशार्थं क्रियते । ननु तत्प्रकृतमंतरेणापि तद्वचनं सिद्धं—

इतरथा हि मार्गसंबंधप्रसंगः ॥ १२ ॥ अक्रियमाणे हि तद्वचने मोक्षमार्गोपि प्रकृतः तेनाभिसंबंधः प्रसज्येत । ततो निसर्गमात्रेणापि मोक्षमार्गलाभ उक्तः स्यात् । बाहुश्रुत्यप्रचिख्यापयिषया च मोक्षमार्गाधिगममात्रादेव मिथ्यादृष्टीनामपि मोक्षः स्यात् । ननु च " अनंतरस्य वा विधिर्वा भवति प्रतिषेधोवा," इत्यनंतरत्वात्सम्यग्दर्शनेनैव संबंधो न्याय्यः । " प्रत्यासत्तेः प्रधानं बलीयः " इति मार्ग एव संबध्येत । तस्मात्तद्वचनं क्रियते विस्पष्टार्थं ।

इति तत्त्वार्थवार्तिके व्याख्यानालंकारे प्रथमेध्याये तृतीयमाह्निकं ॥ ३ ॥

तत्त्वार्थश्रद्धानं सम्यग्दर्शनमित्युक्तं । अथ किं तत्त्वमित्यत इदमाह ॥

जीवाजीवास्रवबंधसंवरनिर्जरामोक्षास्तत्त्वं ॥ ४ ॥

किमर्थमेषामुपादानं ? ननु द्रव्यमित्येव वक्तव्यं तद्भेदा हि सर्वे पदार्था भवंतीति । अत उत्तरं पठति—

एकाद्यनंतविकल्पोपपत्तौ विनेयाशयवशान्मध्यमाभिधानं ॥ १ ॥ एको द्वौ त्रयः संख्येया असंख्येया अनंता इति पदार्था भिद्यंते । तत्रैकः, पदार्थो भवति "एकं द्रव्यमनंतपर्यायमिति वचनात्" । द्वौ पदार्थौ, जीवाजीवभेदात् । त्रयः पदार्था अर्थाभिधानप्रत्ययभेदात् । एवमुत्तरे च वचनविकल्पापेक्षयाऽसंख्येया अनंताश्च भवंति । तत्र विनेयाशयवशात्पदार्थनिरूपणाभेद इति मध्यमेन क्रमेणाभिधानं कृतं । अति संक्षेपे सुमेधसामेव प्रतिपत्तिः स्यादतिप्रपंचे चातिचिरेण संप्रतिपत्तिर्न स्यादिति । कश्चिदाह—

---

१ पदार्थसंदेह [illegible]

जीवाजीवयोरन्यतरत्रैवांतर्भावादास्रवादीनामनुपदेशः ॥ २ ॥ आस्रवो हि, जीवो वा स्या दजीवो वा ? । यदि जीवः, जीवेंतर्भवति । अथवाऽजीवः, अजीवे । एवं संवरादयोपि । तस्मादेषामनुपदेशः । अनर्थक उपदेशोऽनुपदेशः ।

न वा परस्परोपश्लेषे संसारप्रवृत्तितदुपरमप्रधानकारणप्रतिपादनार्थत्वात् ॥ ३ ॥ न वाऽनर्थक उपदेशः, कुतः ? जीवाजीवयोः परस्परोपश्लेषे सति संसारप्रवृत्तितदुपरमप्रधानकारणप्रतिपादनार्थत्वात् । इह मोक्षमार्गः प्रकृतः, तस्य फलमवश्यं मोक्षो निर्देष्टव्यः स कस्येति ? जीव उपात्तः । स च संसारपूर्वकः । स च सत्यजीवे जीवस्य भवति, इत्यजीव उपात्तः । तयोश्च परस्परोपश्लेषः संसारः । तत्प्रधानहेतू, आस्रवो बंधश्चेत्युपात्तौ । तदुपरमस्य मोक्षस्य प्रधानहेतू संवरनिर्जरे इत्युपादानं तयोः । एवमेषां निर्ज्ञाने सति प्राप्यस्य मोक्षस्य निर्ज्ञानं भवतीति । दृष्यते सामान्येंतर्भूतस्यापि विशेषस्य पृथगुपादानं प्रयोजनार्थं, क्षत्रिया आयाताः सूरवर्मापीति ।

उभयथापि चोदनानुपपत्तिः ॥ ४ ॥ यो जीवाजीवयोरंतर्भावादास्रवादीनामनुपदेशं चोदयति, तस्योभयथापि चोदना नोपपद्यते । कथं ? आस्रवादीनि जीवाजीवाभ्यां पृथगुपलभ्य वा चोदयेदनुपलभ्य वा ? यदि पृथगुपलभ्य, अत एव ततोर्थांतरत्वं सिद्धं । अथानुपलभ्य, अनुपलंभादेव चोदनाभावः । किं च जीवाजीवाभ्यां, पृथक् सिद्धान्वा चोदयेदासिद्धान्वा ? यदि सिद्धांश्चोदयेदत एवाऽर्थांतरभावः । अथाऽसिद्धांश्चोदयति, कथमत्रांतर्भावश्चोद्यते ? न हि खरविषाणादीनामंतर्भावश्चोदनार्हः ।

अनेकांताच्च ॥ ५ ॥ चोदनानुपपत्तिरिति वर्तते । कथं ? द्रव्यार्थिकपर्यायार्थिकयोर्गुणप्रधानभावेनाऽर्पणानर्पणाभेदाज्जीवाजीवयोरास्रवादीनां स्यादंतर्भावः स्यादनंतर्भावः । पर्यायार्थिकगुणभावे, द्रव्यार्थिकप्राधान्यात्, आस्रवादिप्रतिनियतपर्यायार्थानर्पणादनादिपारिणामिकचैतन्याचैतन्यादिद्रव्यार्थार्पणादास्रवादीनां स्याज्जीवेऽजीवे चांतर्भावः । तथा द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्यादास्रवादिप्रतिनियतपर्यायार्थार्पणादनादिपारिणामिकचैतन्याचैतन्यादिद्रव्यार्थाऽनर्पणादास्रवादीनां जीवाजीवयोः स्यादनंतर्भावः । तदपेक्षया स्यादुपदेशोऽर्थवान् ।

तेषां निर्वचनलक्षणक्रमहेत्वभिधानं ॥ ६ ॥ तेषां जीवादीनां पृथगुपदेशे प्रयोजनमुक्तं । इदानीं निर्वचनलक्षणक्रमहेत्वभिधानं कर्तव्यं । तदुच्यते—

त्रिकालविषयजीवनानुभवनाज्जीवः ॥ ७ ॥ दशसु प्राणेषु यथोपात्तप्राणपर्यायेण त्रिषु कालेषु जीवनानुभवनाज्जीवत्यजीवीज्जीविष्यतीति वा जीवः । तथा सति, सिद्धानामपि जीवत्वं सिद्धं जीवितपूर्वत्वात् । संप्रति न जीवंति सिद्धाः भूतपूर्वगत्या जीवत्वमेषां, इत्यौपचारिकत्वं स्यात्, मुख्यं चेष्यते । नैष दोषः । भावप्राणज्ञानदर्शनानुभवनात्सांप्रतिकमपि जीवत्वमस्ति । अथवा रूढिशब्दोयं । रूढौ च क्रिया व्युत्पत्त्यर्थैवेति कादाचित्कं जीवनमपेक्ष्य सर्वदा वर्तते, गोशब्दवत् ॥

तद्विपर्ययोऽजीवः ॥ ८ ॥ यस्य जीवनमुक्तलक्षणं नास्त्यसौ तद्विपर्ययादजीव इत्युच्यते ॥

आस्रवत्यनेनाऽऽस्रवणमात्रं वाऽऽस्रवः ॥ ९ ॥ येन कर्मास्रवति यद्वास्रवणमात्रमास्रवः ॥

बध्यतेऽनेन बंधनमात्रं वा बंधः ॥ १० ॥ बध्यते येनऽस्वतंत्रीक्रियते येन अस्वतंत्रीकरणमात्रं वा बंधः ॥

संव्रियतेऽनेन संवरणमात्रं वा संवरः ॥ ११ ॥ येन संव्रियते येन संरुध्यते संरोधनमात्रं वा संवरः ॥

निर्जीर्यते यया निर्जरणमात्रं वा निर्जरा ॥ १२ ॥ निर्जीर्यते निरस्यते यया निरसनमात्रं वा निर्जरा ॥

---

१ व्युत्पत्तिः ।

मोक्ष्यते येन मोक्षणमात्रं वा मोक्षः ॥ १३ ॥ मोक्ष्यतेऽस्यते येनाऽसनमात्रं वा मोक्षः । एतेषामितरेतरयोगे द्वंद्वः । उक्तं निर्वचनमिदानीं लक्षणमुच्यते—

चेतनास्वभावत्वात्तद्विकल्पलक्षणो जीवः ॥ १४ ॥ जीवस्वभावश्चेतना, यत इतरेभ्यो द्रव्येभ्यो भिद्यते । तद्विकल्पा ज्ञानादयः, यत्सन्निधानादात्मा ज्ञाता द्रष्टा कर्ता भोक्ता च भवति तल्लक्षणो जीवः ।

तद्विपरीतत्वादजीवस्तदभावलक्षणः ॥ १५ ॥ तद्विपरीतत्वादचेतनस्वभावत्वाज्ज्ञानादीनामभावो यस्य लक्षणं सोऽजीवः । कथमभावो निरुपाख्यो वस्तुनो लक्षणं भवति । अभावोपि वस्तुधर्मो हेत्वंगत्वादेर्भावत्वत् । अतोऽसौ लक्षणं युज्यते । स हि यदि वस्तुनो लक्षणं न स्यात्सर्वसंकरः स्यात्, यद्येवं वनस्पत्यादीनामजीवत्वं प्राप्नोति तदभावात्, ज्ञानादीनां हि प्रवृत्तित उपलब्धिर्न च तेषां तत्पूर्विका प्रवृत्तिरस्ति हिताहितप्राप्तिपरिवर्जनाभावात् । उक्तं च—

बुद्धिपूर्वां क्रियां दृष्ट्वा स्वदेहेऽन्यत्र तद्ग्रहात् ।
मन्यते बुद्धिसद्भावं सा न येषु न तेषु धीरिति ॥

नैष दोषः तेषामपि ज्ञानादयः सन्ति, सर्वज्ञप्रत्यक्षाः, इतरेषामागमगम्याः । आहारलाभालाभयोः पुष्टिम्लान्यादिदर्शनेन युक्तिगम्याश्च । अंडगर्भस्थमूर्छितादिषु सत्यपि जीवत्वे, तत्पूर्वकप्रवृत्त्यभावाद्धेतुव्यभिचारः ।

पुण्यपापागमद्वारलक्षण आस्रवः ॥ १६ ॥ पुण्यपापलक्षणस्य कर्मण आगमनद्वारमास्रव इत्युच्यते । आस्रव इवास्रवः क उपमार्थः ? यथा महोदधेः सलिलमापगामुखैरहरहरापूर्यते । तथा मिथ्यादर्शनादिद्वारानुप्रविष्टैः कर्मभिरनिशमात्मा समापूर्यत इति मिथ्यादर्शनादिद्वारमास्रवः ।

आत्मकर्मणोरन्योन्यप्रदेशानुप्रवेशलक्षणो बंधः ॥ १७ ॥ मिथ्यादर्शनादिप्रत्ययोपनीतानां कर्मप्रदेशानामात्मप्रदेशानां च परस्परानुप्रवेशलक्षणो बंधः । बंध इव बंधः क उपमार्थः ?, यथा निगडादिद्रव्यबंधनबद्धो देवदत्तोऽस्वतंत्रत्वादभिप्रेतदेशगमनाद्यभावादतिदुःखी भवति । तथात्मा कर्मबंधनबद्धः, पारतंत्र्याच्छरीरमानसदुःखार्दितो भवति ॥

आस्रवनिरोधलक्षणः संवरः ॥ १८ ॥ पूर्वोक्तनामास्रवद्वाराणां शुभपरिणामवशान्निरोधः संवरः । संवर इव संवरः, क उपमार्थः ?, यथा सुगुप्तसुसंवृतद्वारकपाटं पुरं सुरक्षितं दुरासदमरातिभिर्भवति । तथा सुगुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रात्मनः सुसंवृतेंद्रियकषाययोगस्याभिनवकर्मागमद्वारसंवरणात्संवरः ।

एकदेशकर्मसंक्षयलक्षणा निर्जरा ॥ १९ ॥ उपात्तस्य कर्मणस्तपोविशेषसन्निधाने सत्येकदेशसंक्षयलक्षणा निर्जरा । निर्जरेव निर्जरा क उपमार्थः ?, यथा मंत्रौषधबलान्निर्जीर्णवीर्यविपाकं विषं न दोषप्रदं । तथा सविपाकाऽविपाकनिर्जराप्रत्ययतपोविशेषेण निर्जीर्णरसं कर्म न संसारफलप्रदं ॥

कृत्स्नकर्मवियोगलक्षणो मोक्षः ॥ २० ॥ सम्यग्दर्शनादिहेतुप्रयोगप्रकर्षे सति कृत्स्नस्य कर्मणश्चतुर्विधबंधवियोगो मोक्षः । मोक्ष इव मोक्षः क उपमार्थः ?, यथा निगडादिद्रव्यमोक्षात्सति स्वातंत्र्येऽभिप्रेतप्रदेशगमनादेः पुमान् सुखी भवति । तथा कृत्स्नकर्मवियोगे सति स्वाधीनात्यंतिकज्ञानदर्शनानुपमसुखमात्माऽनुभवति । लक्षणमुक्तमिदानीं क्रमहेतुरुच्यते—

तादर्थ्यात्परिस्पंदस्यादौ जीवग्रहणं ॥ २१ ॥ योयं मोक्षमार्गतत्त्वाविष्करणपरिस्पंदः स आत्मार्थः, तस्य मोक्षपर्यायपरिणामात् यो वा जीवाद्युपदेशपरिस्पंदः स आत्मार्थः, तस्योपयोगस्वाभाव्ये सति ग्राहकत्वात्, अत आदौ जीवग्रहणं ।

तदनुग्रहार्थत्वात्तदनंतरमजीवाभिधानं ॥ २२ ॥ यतः शरीरवाङ्मनःप्राणापानादिनोपकारेणाऽजीव आत्मानमनुगृह्णाति । अतस्तदनंतरमजीवाभिधानं ।

तदुभयाधीनत्वात्तत्समीपे, आस्रवग्रहणं ॥ २३ ॥ यत आत्मकर्मणोः परस्पराश्लेषे सत्यास्रव

प्रसिद्धिर्भवति । अतस्तत्समीपे आस्रवग्रहणं ।

तत्पूर्वकत्वाद्बंधस्य ततः परं बंधवचनं ॥ २४ ॥ यत आस्रवपूर्वको बंधस्ततः परं वचनं तस्य क्रियते ।

संवृतस्य बंधाभावात्तत्प्रत्यनीकप्रतिपत्त्यर्थं संवरवचनं ॥ २५ ॥ यतः संवृतस्यात्मनो बंधो नास्ति ततस्तत्प्रत्यनीकप्रतिपत्त्यर्थं तदनंतरं संवरवचनं ।

संवरे सति निर्जरोपपत्तेस्तदनंतरे निर्जरावचनं ॥ २६ ॥ यतः संवरपूर्विका निर्जरा ततस्तदंतिके निर्जरावचनं ।

अंते प्राप्तत्वान्मोक्षस्यांते वचनं ॥ २७ ॥ निर्जीर्णेषु कर्मस्वंते मोक्षः प्राप्यत इत्यंते वचनं ॥

पुण्यपापपदार्थोपसंख्यानमिति चेन्नाऽऽस्रवे बंधे वांऽतर्भावात् ॥ २८ ॥ स्यादेतत्पुण्यपापपदार्थयोरुपसंख्यानं कर्तव्यं, अन्यैरप्युक्तत्वादिति । तन्न किं कारणं ? आस्रवे बंधे वांतर्भावात्, यत आस्रवो बंधश्च पुण्यपापात्मकः ।

तत्त्वशब्दस्य भाववाचित्वाज्जीवादिभिः सामानाधिकरण्याऽनुपपत्तिः ॥ २९ ॥ तत्त्वशब्दो भाववाचीति व्याख्यातमेतत् । अतस्तस्य जीवादिभिर्द्रव्यवचनैः सामानाधिकरण्यं नोपपद्यते ।

न वाऽव्यतिरेकात्तद्भावासिद्धेः ॥३०॥ न वा एप दोषः, किं कारणं ? अव्यतिरेकात्तद्भावासिद्धेः । न हि द्रव्याद्व्यतिरिक्तो भावोस्ति अतस्तद्भावेनाऽध्यारोप्यते । यथा ज्ञानमेवात्मेति ।

यदि तद्भावोऽध्यारोप्यते तल्लिंगसंख्यानुवृत्तिः प्राप्नोति—

तल्लिंगसंख्यानुवृत्तौ चोक्तं ॥ ३१ ॥ किमुक्तं नोपात्तत्र्यक्तिवचनत्वादिति ॥

इति तत्त्वार्थवार्तिके व्याख्यानालंकारे प्रथमेऽध्याये चतुर्थमाह्निकं ॥ ४ ॥

एवं संज्ञास्वालक्षण्यादिभिरुद्दिष्टानां जीवादीनां संव्यवहारविशेषव्यभिचारनिवृत्त्यर्थमाह—

नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥ ५ ॥

नीयते गम्यतेऽनेनार्थः, नमति वाऽर्थमभिमुखीकरोतीति नाम । स्थाप्यते प्रतिनिधीयतेसाविति स्थापना । द्रोष्यते गम्यते गुणैर्द्रोष्यति गमिष्यति गुणानिति वा द्रव्यं । भवनं भवतीति वा भावः । नामादीनामितरेतरयोगलक्षणो द्वंद्वः । नामस्थापनाद्रव्यभावैर्नामस्थापनाद्रव्यभावत आद्यादित्वात्, दृष्यतेऽन्यतोपीति वा तसिः । न्यसनं न्यसत इति वा न्यासो निक्षेप इत्यर्थस्तेषां न्यासस्तन्न्यासः । एतेषां नामादीनां किं लक्षणमित्यत्रोच्यते—

निमित्तांतरानपेक्षं संज्ञाकर्म नाम ॥ १ ॥ निमित्तादन्यन्निमित्तांतरं तदनपेक्ष्य क्रियमाणा संज्ञा नामेत्युच्यते । यथा परमैश्वर्यलक्षणेंदनक्रियानिमित्तांतरानपेक्षं कस्यचिदिंद्र इति नाम । तथा जीवनक्रियानपेक्षं श्रद्धानक्रियानपेक्षं वा कस्यचिज्जीवः सम्यग्दर्शनमिति वा नाम ।

सोऽयमित्यभिसंबंधत्वेनाऽन्यस्य व्यवस्थापनामात्रं स्थापना ॥ २ ॥ यथा परमैश्वर्यलक्षणो यः शचीपतिरिंद्रः, सोयमित्यन्यवस्तुप्रतिनिधीयमानं स्थापना भवति । एवं जीव इति वा सम्यग्दर्शनमित्यक्षनिक्षेपादिषु सोऽयमिति व्यवस्थापनामात्रं स्थापना ।

अनागतपरिणामविशेषं प्रति गृहीताभिमुख्यं द्रव्यं ॥ ३ ॥ यद्भाविपरिणामप्राप्तिं प्रति योग्यतामादधानं तद्द्रव्यमित्युच्यते ।

अतद्भावं वा ॥ ४ ॥ अथवाऽतद्भावं वा द्रव्यमित्युच्यते । यथेंद्रार्थमानीतं काष्ठमिंद्रप्रतिमापर्यायप्राप्तिं प्रत्यभिमुखमिंद्र इत्युच्यते । तथा जीवसम्यग्दर्शनपर्यायप्राप्तिं प्रति गृहीताभिमुख्यं द्रव्यजीवो द्रव्यसम्यग्दर्शनमिति चोच्यते । युक्तं तावत् सम्यग्दर्शनप्राप्तिं प्रति गृहीताभिमुख्यमिति । अतत्परिणामस्य जीवस्यासंभवात्, इदंत्वयुक्तं जीवनपर्यायप्राप्तिं प्रति गृहीताभिमुख्यमिति, कुतः सदा तत्परिणामो यदि न स्यात्प्रागजीवः प्राप्नोति ? नैष दोषः मनुष्यजीवादिविशेषापेक्षया स व्यपदेशो वेदितव्यः ।

तद्द्विविधमागमनोआगमभेदात् ॥ ५ ॥ तदेतद्द्रव्यं द्विविधं, कुतः ? आगमनोआगमभेदात् । आगमद्रव्यजीवः नोआगमद्रव्यजीवः । आगमद्रव्यसम्यग्दर्शनं नोआगमद्रव्यसम्यग्दर्शनमिति च ।

अनुपयुक्तः प्राभृतज्ञाय्यात्मागमः ॥ ६ ॥ अनुपयुक्तः प्राभृतज्ञाय्यागमद्रव्यमित्युच्यते ।

इतरत् त्रिविधं ज्ञायकशरीरभावितद्व्यतिरिक्तभेदात् ॥ ७ ॥ इतरन्नोआगमद्रव्यं त्रैविध्यमास्कंदति, कुतः ? ज्ञायकशरीरभावितद्व्यतिरिक्तभेदात् । ज्ञातुर्यच्छरीरं त्रिकालगोचरं तज्ज्ञायकशरीरं । जीवनसम्यग्दर्शनपरिणामप्राप्तिं प्रत्यभिमुखं द्रव्यं भावीत्युच्यते । तद्व्यतिरिक्तं कर्मनोकर्मविकल्पं ।

वर्तमानतत्पर्यायोपलक्षितं द्रव्यं भावः ॥ ८ ॥ वर्तमानेन तेन तेन जीवनसम्यग्दर्शनपर्यायेणोपलक्षितं द्रव्यं भावजीवो भावसम्यग्दर्शनमिति चोच्यते । यथेंद्रनामकर्मोदयापादितेंदनक्रियापर्यायपरिणत आत्मा भावेंद्रः ।

स द्विविधः पूर्ववत् ॥ ९ ॥ स एष भावो द्विविधो वेदितव्यः पूर्ववदागमनोआगमभेदात् ॥

तत्प्राभृतविषयोपयोगाविष्ट आत्मागमः ॥ १० ॥ जीवादिप्राभृतविषयेणोपयोगेनाविष्ट आत्मागमतो भावजीवो भावसम्यग्दर्शनमिति चोच्यते ।

जीवनादिपर्यायाविष्टोऽन्यः ॥ ११ ॥ जीवनादिपर्यायेणाऽऽविष्ट आत्माऽन्यो नोआगमतो भाव इत्युच्यते ।

नामस्थापनयोरेकत्वं संज्ञाकर्माऽविशेषादिति चेन्नादरानुग्रहाकांक्षित्वात्स्थापनायां ॥ १२ ॥ स्यान्मतं, नामस्थापनयोरेकत्वं. कुतः संज्ञाकर्माविशेषात् । यतो नाम्नि स्थापनायां च संज्ञाकरणं समानं, नह्यकृते नाम्नि स्थाप्यत इति ? । तन्न न कुत ? आदरानुग्रहाकांक्षित्वात् स्थापनायां । यथाऽर्हदिंद्रस्कंदेश्वरादिप्रतिमास्वादरानुग्रहाकांक्षित्वं जनस्य, न तथा परिभाषिते वर्तते ततोऽन्यत्वमनयोः ।

द्रव्यभावयोरेकत्वमव्यतिरेकादिति चेन्न कथंचित्संज्ञास्वालक्षण्यादिभेदात्तद्भेदसिद्धेः १३

स्यादारेका द्रव्यभावयोस्तर्ह्येकत्वं प्रसज्यते कुतस्तदव्यतिरेकात्, नहि द्रव्यव्यतिरेकेण भाव उपलभ्यते भावव्यतिरेकेण वा द्रव्यं, अतोऽनयोरेकत्वमिति । तच्च न कुतः ? संज्ञास्वालक्षण्यादिभेदात्तद्भेदसिद्धेः । इह ययोः संज्ञास्वालक्षण्यादिकृतो भेदस्तयोर्नानात्वमुपलभ्यते तथा द्रव्यभावयोरपीति । कश्चिदाह-

द्रव्यस्यादौवचनं न्याय्यंतत्पूर्वकत्वान्नामादीनां ॥ १४ ॥ द्रव्यस्यादौ वचनं न्याय्यं कुतस्तत्पूर्वकत्वान्नामादीनां । सतो हि संज्ञिनो नामादिभिर्भवितव्यमिति, नैष दोषः ।

संव्यवहारहेतुत्वात्संज्ञायाः पूर्ववचनं ॥ १५ ॥ संव्यवहारहेतुत्वात्संज्ञायाः पूर्ववचनं क्रियते । सर्वो हि लोकसंव्यवहारः संज्ञापूर्वकस्तदात्मकत्वात्, तदनात्मकत्वे वस्तुव्यवहारविच्छेदः । तदात्मकत्वाच्च स्तुतिनिंदयोरागद्वेषप्रवृत्तिः सिद्धा ।

ततः स्थापनावचनमाहितनामकस्य स्थापनोपपत्तेः । ॥ १६ ॥ ततः परं स्थापना विधीयते कुत ?, आहितनामकस्य स्थापनोपपत्तेः । प्राहितनामकस्य सोयमिति किंचित्प्रतिनिर्धीयते ।

द्रव्यभावयोः पूर्वापरन्यासः पूर्वोत्तरकालवृत्तित्वात् ॥ १७ ॥ द्रव्यभावयोः पूर्वापरन्यासः

---

१ नाम्नि । २ क. पुस्तके सिद्धेरित्यपिपाठः ।

क्रियते, किं कारणं ? पूर्वोत्तरकालवृत्तित्वात् । पूर्वकालविषयं हि द्रव्यं । उत्तरकालभावी भाव इति ।

तत्त्वप्रत्यासत्तिप्रकर्षाऽप्रकर्षभेदाद्वा तत्क्रमः ॥ १८ ॥ अथवा तत्त्वप्रत्यासत्तेः प्रकर्षाप्रकर्षभेदात्तेषां नामादीनामुद्दिष्टः क्रमो वेदितव्यः । तत्त्वं भावः प्रधानं तदर्थानीतराणि, तत्र प्रत्यासत्तेस्तत्समीपं द्रव्यं प्रयुक्तं तद्भावापत्तेः । ततः पूर्वं स्थापनोपादानमतद्भावेपि तद्भावं प्रति प्रधानहेतुत्वात्ततः पूर्वं नामोपादानं भावं प्रति विप्रकृष्टत्वात् ।

नामादिचतुष्टयाभावो विरोधात् ॥ १९ ॥ अत्राह नामादिचतुष्टयस्याभावः, कुतो ? विरोधात् । एकस्य शब्दार्थस्य नामादिचतुष्टयं विरुध्यते । यथा नामैकं नामैव, न स्थापना । अथ नाम स्थापना इष्यते न नामेदं नाम । स्थापना, तर्हि नचेयं स्थापना नामेदं । अतो नामार्थ एको, विरोधान्न स्थापना । तथैकस्य जीवादेरर्थस्य सम्यग्दर्शनादेर्वा विरोधान्नामाद्यभाव इति ।

न वा सर्वेषां संव्यवहारं प्रत्यविरोधात् ॥ २० ॥ न वैष दोषः, किं कारणं ? सर्वेषां संव्यवहारं प्रत्यविरोधात् । लोके हि सर्वैर्नामादिभिर्दृष्टः संव्यवहारः । इंद्रो देवदत्त इति नाम । प्रतिमादिषु चेंद्र इति स्थापना । इंद्रार्थे च काष्ठे द्रव्ये इंद्रसंव्यवहारः "इंद्रं आनीत" इति वचनात् । अनागतपरिणामे वार्थे द्रव्यसंव्यवहारो लोके दृष्टः, द्रव्यमयं माणवकः, आचार्यः श्रेष्ठी वैयाकरणो राजा वा भविष्यतीति व्यवहारदर्शनात् । शचीपतौ च भावे इंद्र इति न च विरोधः । किं च—

अभिहितानवबोधात् ॥ २१ ॥ यथा नामैकं नामैवेष्यते न स्थापनेत्याचक्षाणेन त्वयाऽभिहितानवबोधः प्रकटीक्रियते । यतो नैवमाचक्ष्महे नामैव स्थापनेति, किंत्वेकस्यार्थस्य नामस्थापनाद्रव्यभावैर्न्यासः इत्याचक्ष्महे ।

अनेकांताच्च ॥ २२ ॥ नैतदेकांतेन प्रतिजानीमहे नामैव स्थापना भवतीति । न वा स्थापना वा नाम भवति नेति च । कथं—

मनुष्यब्राह्मणवत् ॥ २३ ॥ यथा ब्राह्मणः स्यान्मनुष्यो ब्राह्मणस्य मनुष्यजात्यात्मकत्वात् । मनुष्यस्तु ब्राह्मणः स्यान्नवा, मनुष्यस्य ब्राह्मणजात्यादिपर्यायात्मकत्वदर्शनाच्च । तथा स्थापना स्यान्नामाऽकृतनाम्नः स्थापनानुपपत्तेः । नाम तु स्थापना स्यान्नवा, उभयथा दर्शनात् । तथा द्रव्यं स्याद्भावः भावद्रव्यार्थादेशात् । न भाव पर्यायार्थादेशाद्द्रव्यं । भावस्तु द्रव्यं स्यान्नवा, उभयथा दर्शनात् । किं च—

अतस्तत्सिद्धेः ॥ २४ ॥ यत एव नामादिचतुष्टयस्य विरोधं भवानाचष्टे अत एव नाभावः । कथमिह योयं सहानवस्थानलक्षणो विरोधो बध्यघातकवच्च सतामर्थानां भवति नाऽसतां । काकोलूकवच्छायातपवत् । न काकदंतखरविषाणयोर्विरोधाऽसत्वात् । किं च—

नामाद्यात्मकत्वानात्मकत्वे विरोधस्याऽविरोधकत्वात् ॥ २५ ॥ यो नामादिचतुष्टयस्य विरोधः स नामाद्यात्मको वा स्यान्न वा, उभयथा च विरोधाभावः । यदि नामाद्यात्मको नासौ विरोधको नामाद्यात्मवत् । अथ तदात्मकोपि विरोधो नामादीनां विरोधकः, नामाद्यात्मापि विरोधकः स्यात् । ततो नामादीनामभावाद्विरोध एव न स्यात् । अथ न नामाद्यात्मकः, एवमपि नामादीनां नासौ विरोधकोऽर्थांतरत्वात् । अर्थांतरभावेपि विरोधकत्वमिष्यते ? सर्वेषां पदार्थानां परस्परतो नित्यं विरोधः स्यात । न चासावस्तीति । अतो विरोधाभावः ।

ताद्गुण्याद्भावस्य प्रामाण्यमिति चेन्नेतरव्यवहारनिवृत्तेः ॥ २६ ॥ स्यादेतत्ताद्गुण्याद्भाव एव प्रमाणं न नामादिः । स जीवनादिर्गुणो यस्य स तद्गुणः, तस्य भावस्ताद्गुण्यं । अतो भाव एव प्रमाणं न नामादिस्ताद्गुण्याभावादिति । तन्न किं कारणं ? इतरव्यवहारनिवृत्तेः । एवं हि सति नामाद्याश्रयो व्यवहारो निवर्तेत । स चास्ति । इत्यतो न भावस्यैव प्रमाण्यं ।

उपचारादितिचेन्न तद्गुणाभावात् ॥ २७ ॥ स्यादेतत्, यद्यपि भावस्यैव प्रामाण्यं तथापि

नामादिव्यवहारो न निवर्तते कुत? उपचारात्, माणवके सिंहशब्दव्यवहारवदिति। तन्न किं कारणं? तद्गुणाभावात्। युज्यते माणवके सिंहशब्दव्यवहारः क्रौर्यशौर्यादिगुणैकदेशयोगात्। इह तु नामादिषु जीवनादिगुणैकदेशो न कश्चिदप्यस्तीत्युपचाराभावाद् व्यवहारनिवृत्तिः स्यादेव।

मुख्यसंप्रत्ययप्रसंगाच्च ॥ २८ ॥ यद्युपचारान्नामादिव्यवहारः स्यात्, "गौणमुख्ययोर्मुख्ये संप्रत्यय" इति मुख्यस्यैव संप्रत्ययः स्यान्न नामादीनां। यतस्त्वर्थप्रकरणादिविशेषलिंगाभावे सर्वत्र संप्रत्यय अविशिष्टः कृतसंगतेर्भवत्यतो न नामादिषूपचाराद्व्यवहारः।

कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवतीति लोके ॥ २९ ॥ तद्यथा गोपालकमानय कटेजकमानयेति, यस्यैषा संज्ञा भवति स आनीयते। न यो गाः पालयति यो वा कटे जातः। एवमिहापि यस्यैषा जीवादिरिति संज्ञा कृता तस्यैव संप्रत्ययः स्यान्नेतरेषामिति। तन्न किं कारणं? उभयगतिदर्शनात्। लोके ह्यर्थात्प्रकरणाद्वा कृत्रिमे संप्रत्ययः स्यात् अर्थोवाऽस्यैवं संज्ञके न भवति, प्रकृतं वा तत्र भवति इदमेवं संज्ञके न कर्तव्यमिति। अतश्चार्थात्प्रकरणाद्वा लोके संप्रत्ययो भवति। अंगहि भवान् ग्राम्यं पांशुलं खुर पादकमप्रकरणज्ञमागतं ब्रवीतु—गोपालकमानय कटेजकमानयेति उभयगतिस्तस्य भविष्यति। किंच—

अनेकांतात् ॥ ३० ॥ नायमेकांतः कृत्रिममेवेदं, न कृत्रिममेवेति किं तर्हि? अनेकांतो नाम सामान्यापेक्षया स्यादकृत्रिमं विशेषापेक्षया कृत्रिमं। एवं स्थापनादयश्चेति। ततः किं "कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय" इत्यस्याभावः। किं च—

नयद्वयविषयत्वाद् ॥ ३१ ॥ द्वौ नयौ द्रव्यार्थिकः पर्यायार्थिकश्च। तयोर्विषयो नामादिन्यासस्तत्र नामस्थापनाद्रव्याणि, प्राच्यस्य, सामान्यात्मकत्वात्। पाश्चात्यस्य भावः, परिणतिप्रधानत्वात्। ततः किं "गौण मुख्ययोर्मुख्ये संप्रत्ययः" "कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय" इति च न भवति, प्रतिविषयं नयभेदात्।

द्रव्यार्थिकपर्यायार्थिकांतर्भावान्नामादीनां तयोश्च नयशब्दाभिधेयत्वात्पौनरुक्त्यप्रसंगः ३२ यतो नामस्थापनाद्रव्याणि द्रव्यार्थिकस्य भावः पर्यायार्थिकस्येत्युक्तं। ततो नामादीनां नयांतर्भावान्नयविकल्पानां च वक्ष्यमाणत्वात्पौनरुक्त्यं प्राप्नोति।

न वा विनेयमतिभेदाधीनत्वाद् द्व्यादिनयविकल्पनिरूपणस्य ॥ ३३ ॥ न वा एष दोषः, किं कारणं? विनेयमतिभेदाधीनत्वाद् द्व्यादिनयविकल्पनिरूपणस्य। ये सुमेधसो विनेयास्तेषां द्वाभ्यामेव द्रव्यार्थिकपर्यायार्थिकाभ्यां सर्वनयवक्तव्यार्थप्रतिपत्तिस्तदंतर्भावात्। येत्वतो मंदमेधसस्तेषां त्र्यादिनय विकल्पनिरूपणमतो विशेषोपपत्तेर्नामादीनामपुनरुक्तं।

तच्छब्दाऽग्रहणं प्रकृतत्वात् ॥ ३४ ॥ सम्यग्दर्शनादित्रयस्य प्रकृतत्वादेव नामादिन्यासाभिसंबंधः। ततस्तच्छब्दस्य ग्रहणमनर्थकं?

प्रत्यासन्नत्वाज्जीवादिषु प्रसंग इति चेन्न सम्यग्दर्शनविषयत्वात् ॥ ३५ ॥ स्यादेतत्तच्छब्दादिना प्रत्यासन्ना जीवादयस्तेषामेव न्यासाभिसंबंधो भवेन्न सम्यग्दर्शनादीनां, कुतः? "अनंतरस्य विधिर्वाभवति प्रतिषेधोवेति"। तन्न किं कारणं? सम्यग्दर्शनविषयत्वात् सम्यग्दर्शनादित्रयस्य प्राधान्येनोपदेशस्तदर्थत्वाच्छास्त्रारंभस्य। सम्यग्दर्शनादिविषयत्वेन तु जीवादीनां गुणभूतत्वेनोपदेशः। अतस्तच्छब्दादृतेपि सम्यग्दर्शनादित्रयस्य प्राधान्यान्नामादिन्यासेनाभिसंबंधो युक्तः।

निश्शेषातिदिष्टत्वाच्च ॥ ३६ ॥ जीवादयः सम्यग्दर्शनविषयत्वेन विशेषेणातिदिष्टाः, प्रकृतं सम्यग्दर्शनादित्रयं न बाधिष्यंते "विशेषातिदिष्टाः प्रकृतं न बाधंते" इति।

सर्वभावाधिगमार्थं तु ॥ ३७ ॥ सर्वेषां भावानां जीवाजीवादीनामप्रधानानां प्रधानानां च सम्यग्दर्शनादीनामधिगमार्थं तर्हि तच्छब्दग्रहणं। इतरथा हि प्रधानाभिसंबंध एव स्यात्। एवमजीवादिषु

ज्ञानचारित्रयोश्च नामादिन्यासविकल्पो योजयितव्यः।

अधिकृतानामेव सम्यग्दर्शनादिजीवादीनां पदार्थानां अभिधानाभिधेयसंव्यवहाराऽव्यभिचाराय नामादिभिर्निक्षिप्तानां तत्त्वाधिगमहेतुर्वक्तव्य इत्यत आह–

प्रमाणनयैरधिगमः ॥ ६ ॥

प्रमाणे च नयाश्च प्रमाणनयास्तैरधिगमो भवति सम्यग्दर्शनादीनां जीवादीनां। प्रमाणनया वक्ष्यमाणलक्षणाः। ननु च नयशब्दस्याल्पाक्षरत्वात्पूर्वनिपातेन भवितव्यं?

अभ्यर्हितत्वात्प्रमाणशब्दस्य पूर्वनिपातः ॥ १ ॥ "अभ्यर्हितं पूर्वं निपततीति" प्रमाणशब्दस्य पूर्वनिपातो वेदितव्यः। कथमभ्यर्हितत्वं?

प्रमाणप्रकाशितेष्वर्थेषु नयप्रवृत्तेर्व्यवहारहेतुत्वादभ्यर्हः ॥ २ ॥ यतः प्रमाणप्रकाशितेष्वर्थेषु नयप्रवृत्तिर्व्यवहारहेतुर्भवति नान्येष्वतोऽस्याभ्यर्हितत्वं।

समुदायाऽवयवविषयत्वाद्वा ॥ ३ ॥ अथवा समुदायविषयं प्रमाणमवयवविषया नया इति प्रमाणस्याभ्यर्हितत्वं॥ तथाचोक्तं–"सकलादेशः प्रमाणाधीनो विकलादेशो नयाधीन" इति।

अधिगमहेतुर्द्विविधः स्वाधिगमहेतुः पराधिगमहेतुश्च, स्वाधिगमहेतुर्ज्ञानात्मकः प्रमाणनयविकल्पः, पराधिगमहेतुर्वचनात्मकस्तेन श्रुताख्येन प्रमाणेन स्याद्वादनयसंस्कृतेन प्रति पर्यायं सप्तभंगीमंतो जीवादयः पदार्था अधिगमयितव्याः ॥ ४ ॥ अत्राह कथं सप्तभंगी तत्रोच्यते।

प्रश्नवशादेकस्मिन्वस्तुन्यविरोधेन विधिप्रतिषेधविकल्पना सप्तभंगी ॥ ५ ॥ एकस्मिन्वस्तुन्यविरोधेन प्रश्नवशाद् दृष्टेनेष्टेन च प्रमाणेनाऽविरुद्धा विधिप्रतिषेधकल्पना सप्तभंगी विज्ञेया। तद्यथा-स्याद् घटः (१) स्यादघटः (२) स्याद्घटश्चाऽघटश्च (३) स्यादवक्तव्यः (४) स्याद्घटश्चाऽवक्तव्यश्च (५) स्यादघटश्चावक्तव्यश्च (६) स्याद्घटश्चाऽघटश्चाऽवक्तव्यश्च (७) इत्यर्पितानर्पितनयसिद्धे निरूपयितव्या। तत्र स्वात्मना स्याद्घटः। परात्मना स्यादघटः। को वा घटस्य स्वात्मा? कोवा परात्मा?। घटबुद्ध्यभिधानप्रवृत्तिलिंगः स्वात्मा। यत्र तयोरप्रवृत्तिः, स परात्मा पटादिः। स्वपरात्मोपादानापोहनव्यवस्थापाद्यं हि वस्तुनो वस्तुत्वं। यदि स्वस्मिन् पटद्यात्मव्यावृत्तिविपरणतिर्न स्यात्सर्वात्मना घट इति व्यपदिश्येत। अथ परात्मना व्यावृत्तावपि स्वात्मोपादानविपरणतिर्न स्यात् खरविषाणवदवस्त्वेव स्यात्। अथवा नामस्थापनाद्रव्यभावेषु यो विवक्षितः स स्वात्मा। इतरः परात्मा। तत्र विवक्षितात्मना घटः, नेतरात्मना। यदीतरात्मनापि घटः स्यात्, विवक्षितात्मना वाऽघटः। नामादिव्यवहारोच्छेदः स्यात। अथवा तत्र विवक्षितघटशब्दवाच्यसादृश्यसामान्यसंबंधिषु कस्मिंश्चिद् घटविशेषे परिगृहीते प्रतिनियतो यः संस्थानादिः, स स्वात्मा। इतरः परात्मा। तत्र प्रतिनियतेन रूपेण घटः, नेतरेण। यदीतरात्मकः स्यात्, एकघटमात्रप्रसंगः। सामान्याश्रयो व्यवहारो विनश्येत्। अथवा तस्मिन्नेव घटविशेषे कालांतरावस्थायिनि पूर्वोत्तरकुशूलांतकपालाद्यवस्थाकलापः परात्मा। तदंतरालवर्ती स्वात्मा। स तेनैव घटः, तत्कर्मगुणव्यपदेशदर्शनात्। नेतरात्मना। यदि हि कुशूलांतकपालाद्यात्मनापि घटः स्यात्। घटावस्थायामपि तदुपलब्धिर्भवेत्। तदुत्पत्तिविनाशार्थं पुरुषप्रयत्नफलाभावश्चानुषज्येत। अथांतरालवर्तिपर्यायात्मनाप्यघटः स्याद्, घटकृत्यं फलं नोपलभ्येत। अथवा प्रतिक्षणं द्रव्यपरिणामोपचयापचयभेदादर्थांतरोपपत्तेः ऋजुसूत्रनयापेक्षया प्रत्युत्पन्नघटस्वभावः स्वात्मा। घटपर्याय एवातीतोऽनागतश्च परात्मा। तेन प्रत्युत्पन्नस्वभावेन सता स घटः, नेतरेणासता, तथोपलब्ध्यनुपलब्धिसद्भावात्। इतरथा हि प्रत्युत्पन्नवदतीतानागतात्मनापि घटत्वे, एकसमयमात्रमेव सर्वं स्यात्। अतीतानागतवद्वा प्रत्युत्पन्नाभावे घटाश्रयव्यवहाराभाव आपद्यते, विनष्टानुत्पन्नघटव्यवहाराभाववत्। अथवा

तस्मिन् प्रत्युत्पन्नविषये रूपादिसमुदये परस्परोपकारवर्तिनि पृथुबुध्नाद्याकारः स्वात्मा । इतरः परात्मा । तेन पृथुबुध्नाद्याकारेण स घटोस्ति । नेतरेण । घटव्यवहारस्य तद्भावे भावात्तदभावेऽभावात् । यदि हि पृथुबुध्नाद्यात्मनापि घटो न स्यात्स एव न स्यात् । अथेतरात्मनापि घटः स्यात्तदाकारशून्येपि घटव्यवहारः प्राप्नुयात् । अथवा रूपादिसंनिवेशः संस्थानं । तत्र चक्षुषा घटो गृह्यते, इत्यस्मिन् व्यवहारे रूपमुखेन घटो गृह्यत इति, रूपं स्वात्मा । रसादिः परात्मा । स घटो रूपेणास्ति । नेतरेण रसादिना, प्रतिनियतकरणग्राह्यत्वात् । अथ हि चक्षुषा घटो गृह्यत इत्यत्र, रसादिरपि घट इति गृह्येत ! सर्वेषां रूपत्वप्रसंगः ? ततश्च करणांतरकल्पनाऽनर्थिका । यदि वा रसादिवद्रूपमपि घट इति न गृह्येत, चक्षुर्विषयताऽस्य न स्यात् , अथवा शब्दभेदे ध्रुवोर्थभेद इति घटकुटादिशब्दानामप्यर्थभेदः । घटनाद् घटः कौटिल्यात्कुट इति तत्क्रियापरिणतिक्षण एव तस्य शब्दस्य वृत्तिर्युक्ता । तत्र घटनक्रियाविषयककर्तृभावः स्वात्मा । इतरः परात्मा । तत्राद्येन घटः । नेतरेण, तथार्थसमभिरोहणात् । यदि च घटनक्रियापरणतिमुखेनाप्यघटः स्यात् । तद्व्यवहारनिवृत्तिः स्यात् । यदि चेतरव्यपेक्षयापि घटः स्यात्, पटादिष्वपि तत्क्रियाविरहितेषु तच्छब्दवृत्तिः स्यात् , एकशब्दवाच्यत्वं वा वस्तुनः । अथवा घटशब्दप्रयोगानंतरमुत्पद्यमान उपयोगाकारः स्वात्मा, अहेयत्वादंतरंगत्वाच्च । बाह्यो घटाकारः परात्मा, तदभावेपि घटव्यवहारदर्शनात् । स घट उपयोगाकारेणास्ति । नान्येन । यदि उपयोगाकारात्मनाप्यघटः स्यात् वक्तृश्रोतृहेतुफलभूतोपयोगघटाकाराभावात्तदधीनो व्यवहारो विनाशमाप्नुयात् । इतरोऽसन्निहितोपि यदि घटः स्यात्पटादीनामपि स्याद् घटत्वप्रसंगः । अथवा चैतन्यशक्तेर्द्वावाकारौ ज्ञानाकारो ज्ञेयाकारश्च, अनुपयुक्तप्रतिबिंबाकारादर्शतलवत् ज्ञानाकारः । प्रतिबिंबाकारपरिणतादर्शतलवज्ज्ञेयाकारः । तत्र ज्ञेयाकारः स्वात्मा, तन्मूलत्वाद् घटव्यवहारस्य । ज्ञानाकारः परात्मा सर्वसाधारणत्वात् । स घटो ज्ञेयाकारेणास्ति । नान्यथा । यदि ज्ञेयाकारेणाप्यघटः स्यात्तदाश्रयेपि कर्तव्यतानिरासः स्यात् । अथ हि ज्ञानाकारेणापि घटः स्यात्पटादिज्ञानकालेपि तत्सन्निधानाद् घटव्यवहारवृत्तिः प्रसज्येत । उक्तैः प्रकारैरर्पितघटत्वमघटत्वं च परस्परतो न भिन्नं । यदि भिद्येत सामानाधिकरण्येन तद्बुद्ध्यभिधानवृत्तिर्न स्याद् घटपटवत् । ततश्चेतरेतराविनाभावे उभयोरप्यभावात्तदाश्रयव्यवहारापह्नवः कृतः स्यात् । अतस्तदुभयात्मकोसौ क्रमेण तच्छब्दवाच्यतामास्कंदन् स्याद् घटश्चाघटश्चेत्युच्यते । यदि तदुभयात्मकं वस्तु घट इत्येवोच्येत, इतरात्मासंग्रहादतत्त्वमेव स्यात् ! अथाघट एवेत्युच्यते घटात्मानुपादानादनृतमेव स्यान्न वस्तु तावदेवेति । नचान्यः शब्दस्तदुभयात्मावस्थतत्त्वाभिधायी विद्यतेऽतोसौ घटो वचनगोचरातीतत्वात्स्यादवक्तव्य इत्युच्यते । घटात्मार्पणामुखेनोक्तावक्तव्यस्वरूपनिरूपणेन चादिश्यमानः स एवार्थ इति स्याद् घटश्चावक्तव्यश्च । निरूपिताऽघटभंगसंगेन प्रदर्शितावक्तव्यवर्त्मना चापदेश्यः स एवार्थ इति स्यादघटश्चावक्तव्यश्च । तदुभयाभिधानक्रमाक्रमार्पणावशादाविर्भूततद्व्यपदेशः स एवार्थः स्याद् घटश्चाघटश्चावक्तव्यश्च भवति । एवमियं सप्तभंगी जीवादिषु सम्यग्दर्शनादिषु च द्रव्यार्थिकपर्यायार्थिकनयार्पणाभेदाद्योजयितव्या । तत्र द्रव्यार्थिकैकांतोऽनिश्चिततत्त्वः, अतत्तदेवेत्यवधारणादुन्मत्तवत् । पर्यायार्थिकैकांतोपि तथैवाऽतद्वस्तु तदेवेत्यवधारणादुन्मत्तवत् , स्याद्वादो निश्चितार्थोऽपेक्षितयाथातथ्यवस्तुवादित्वादनुन्मत्तवचनवत् । अवक्तव्यैकांतोप्यसद्वादः स्ववचनविरोधात् सदा मौनव्रत्तिकवत् । अमृषार्थः स्यादवक्तव्यवादो वक्तव्यावक्तव्यवादित्वात्सत्येतरवचनविशेषज्ञवादवत् ।

अनेकांते तदभावादव्याप्तिरिति चेन्न तत्रापि तदुपपत्तेः ॥ ६ ॥ स्यादेतदनेकांते सा विधिप्रतिषेधविकल्पना नास्ति । यदि स्याद्यदाऽनेकांतो न भवति, तदैकांतदोषानुसंगो भवेत् । अनवस्थाप्रसंगश्च । ततस्तत्रानेकांतत्वमेव, इति सा सप्तभंगी व्याप्तिमती न भवतीति । तन्न किं कारणं ? तत्रापि तदुपपत्तेः स्यादेकांतः स्यादनेकांतः स्यादुभयः स्यादवक्तव्यः स्यादेकांतश्चावक्तव्यश्च स्यादनेकांतश्चावक्तव्यश्च स्यादेकांतश्चानेकांतश्चावक्तव्यश्चेति । तत्कथमिति चेदुच्यते—

प्रमाणनयार्पणाभेदादेकांतो द्विविधः सम्यगेकांतो मिथ्यैकांत इति । अनेकांतो द्विविधः सम्यगनेकांतो मिथ्यानेकांत इति । तत्र सम्यगेकांतो हेतुविशेषसामर्थ्यापेक्षः प्रमाणप्ररूपितार्थैकदेशादेशः ।

एकात्मावधारणेन अन्याशेषनिराकरणप्रवणप्रणिधिमिथ्यैकांतः । एकत्र सप्रतिपक्षानेकधर्मस्वरूपनिरूपणो युक्त्यागमाभ्यामविरुद्धः सम्यगनेकांतः । तदतत्स्वभाववस्तुशून्यं परिकल्पितानेकात्मकं केवलं वाग्विज्ञानं मिथ्यानेकांतः । तत्र सम्यगेकांतो नय इत्युच्यते । सम्यगनेकांतः प्रमाणं । नयार्पणादेकांतो भवत्येकनिश्चयप्रवणत्वात् । प्रमाणार्पणादनेकांतो भवत्यनेकनिश्चयाधिकरणत्वात् । यद्यनेकांतोऽनेकांत एव स्यान्नैकांतो भवेत्, एकांताभावात्तत्समूहात्मकस्य तस्याप्यभावः स्यात्, शाखाद्यभावे वृक्षाद्यभाववत्। तदविनाभाविविशेषनिराकरणादात्मलोपे सर्वलोपः स्यात् । एवमुत्तरे च भंगा योजयितव्या ।

छलमात्रमनेकांत इति चेन्न छललक्षणाभावात् ॥ ७ ॥ स्यान्मतं तदेवास्ति तदेव नास्ति, तदेव नित्यं, तदेवानित्यमिति चानेकांतप्ररूपणं छलमात्रमिति । तन्न कुतः? छललक्षणाभावात् । छलस्य हि लक्षणमुक्तं "वचनविघातोऽर्थविकल्पोपपत्त्या छलमिति" यथा नव कंबलोयमित्यविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थांतरकल्पनं, नवास्य कंबला न चत्वार इति नवो वास्य कंबलो न पुराण इति नवकंबलः । न तथानेकांतवादः । यत उभयगुणप्रधानभावापादितार्पितानर्पितव्यवहारसिद्धिविशेषवल्लाभप्रापितयुक्तिपुष्कलार्थोऽनेकांतवादः ।

संशयहेतुरितिचेन्न विशेषलक्षणोपलब्धेः ॥ ८ ॥ स्यान्मतं संशयहेतुरनेकांत वादः, कथं? एकत्राधारे विरोधिनोनेकस्यासंभवात् । आगमश्चैवं प्रवृत्तः-"एकं द्रव्यमनंतपर्यायमिति" । किमागमप्रामाण्यादस्ति वा नास्ति वा नित्यं वाऽनित्यं चेति ? । तन्न न कस्माद्विशेषलक्षणोपलब्धेः । इह सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृतेश्च संशयः । तद्यथा स्थाणुपुरुषोचिते देशे नातिप्रकाशांधकारकलुषायां वेलायामूर्ध्वत्वमात्रं सारूप्यं पश्यतो वक्रकोटरविशेषवयोनिलयनादीन् स्थाणुगतान् विशेषान् । वस्त्रसंसयनशिरःकंडूयनशिखाबंधनादीन् पुरुषगतांश्चाऽनुपलभमानस्य तेषां च स्मरतः संशय उत्पद्यते । नच तद्वदनेकांतवादे विशेषानुपलब्धिर्यतः स्वपराद्यादेशवशीकृता विशेषा उक्ता व्यक्ताः प्रत्यर्थमुपलभ्यंते । ततो विशेषोपलब्धेर्न संशयहेतुरिति यदगदिष्म तत्सम्यग्निरचैष्म । एवमपि संशयः, कथमिदं तावदस्ति प्रष्टव्यः ? एषामस्तित्वादीनां धर्माणां साधकाः प्रतिनियता हेतवः संति न वा ? यदि न संति विप्रतिपन्नप्रतिपादनासंभवः अथ संत्येकत्र विरुद्धसाधनहेतुसन्निधाने सति भवितव्यं संशयेनेत्युच्यते-

विरोधाभावात्संशयाभावः ॥ ९ ॥ यदि विरोधोऽभविष्यत्संशयोऽजनिष्यत् । नच विरोधो नयोपनीतानां धर्माणामस्ति कुतः---

अर्पणाभेदादविरोधः पितृपुत्रादिसंबंधवत् ॥ १० ॥ उक्तादर्पणाभेदादेकत्राऽविरोधेनावरोधो धर्माणां, पितृपुत्रादिसंबंधवत् । तद्यथा---एकस्य देवदत्तस्य जातिकुलरूपसंज्ञाव्यपदेशविशिष्टस्य पितापुत्रो भ्राता भागिनेय इत्येवं प्रकाराः संबंधा जन्यजनकत्वादिशक्त्यर्पणाभेदान्न विरुध्यंते । नह्येकापेक्षया पितेति, शेषापेक्षयापि पिता भवति । शेषापेक्षया वा पुत्रादिव्यपदेशार्ह इत्युक्तापेक्षयापि पुत्रादिव्यपदेशभाक् न च पिता, पुत्रादिकृतं संबंधबहुत्वं देवदत्तस्यैकत्वे न विरुध्यते । तद्वदस्तित्वादयो न यांति विरोधमेकत्र ।

सपक्षासपक्षापेक्षोपलक्षितसत्त्वासत्त्वादिभेदोपचितैकधर्मवद्वा ॥ ११ ॥ अथवा सपक्षासपक्षापेक्षयोपलक्षितानां सत्त्वासत्त्वादीनां भेदानामाधारेण पक्षधर्मेणैकेन तुल्यं सर्वद्रव्यं निरपेक्षयोर्ह्येकत्रवादिप्रतिवादिप्रयोगापेक्षया संशय उक्त,: इतरथा हि पक्षधर्मेपि संशयः कल्प्येत ।

एकस्य हेतोःसाधकदूषकताविसंवादवद्वा ॥ १२ ॥ अथैवमुपपत्त्या विरोधे प्रतिपादितेपि मिथ्यादर्शनाभिनिवेशात्तत्त्वं न प्रतिपद्यते यस्तं प्रति सार्वलौकिकहेतुवादमाश्रित्योच्यते---इह स्वपक्षमर्यादानतिक्रमेण न्यायधर्ममनुपालयता वादिनाऽभिप्रेतप्रतिज्ञार्थसिद्धिमाशंसता हेत्वनुपदेशे सर्वाभिलषितार्थसिद्धिः प्रतिज्ञामात्रादेव माप्रापदिति । अतिप्रसंगदोषनिवृत्तये यो हेतुरुपदिश्यते स साधको दूषकश्च । स्वपक्षं साधयति परपक्षं दूषयति न तौ साधनदूषणार्थौ हेतोरन्यौ भवतः । नचानन्यत्वमस्तीतिकृत्वा येन

१ वयसां पक्षिणां निलयनं निलयः, नीड इत्यर्थः ।

साधकस्तेन दूषको येन वा दूषकस्तेन साधकः। न तयोः संकरो विरोधो वा। एवं सर्वार्थेषु विरोधदोषमनुहंति विसर्पत्यनेकांतप्रक्रियेति।

सर्वप्रवाद्यविप्रतिपत्तेश्च ॥ १३ ॥ नात्र प्रतिवादिनो विसंवदंते, एकमनेकात्मकमिति। केचित्तावदाहुः—सत्त्वरजस्तमसां साम्यावस्था प्रधानमिति तेषां प्रसादलाघवशोषतापावरणसादनादिभिन्नस्वभावानां प्रधानात्मनां मिथश्च न विरोधः। अथ मन्येथाः न प्रधानं नामैकं गुणेभ्योऽर्थांतरभूतमस्ति, किंतु त एव गुणाः साम्यमापन्नाः प्रधानाख्यां लभंत इति। यद्येवं भूमा प्रधानस्य स्यात्, स्यादेतत्तेषां समुदायः प्रधानमेकमिति। अत एवाविरोधः सिद्धः गुणानामवयवानां समुदायस्य च। अपरे मन्यंते—अनुवृत्तिविनिवृत्तिबुद्ध्यभिधानलक्षणः सामान्यविशेष इति। तेषां च सामान्यमेव विशेषः सामान्यविशेष इति। एकस्यात्मन उभयात्मकं न विरुध्यते।

अपर आहुः—वर्णादिपरमाणुसमुदयोरूपपरमाणुरिति। तेषां कार्कश्यवत्त्वादिभिन्नलक्षणानां रूपात्मनां मिथश्च न विरोधः। अथ मतं न परमाणुनामैकोस्ति बाह्यः, किन्तु विज्ञानमेव तदाकारपरिणतं परमाणुव्यपदेशार्हमित्युच्यते। अत्रापि ग्राहकविषयाभाससंवित्तिशक्तित्रयाकाराधिकरणस्यैकस्याभ्युपगमान्न विरोधः। किंच सर्वेषामेव तेषां पूर्वोत्तरकालभाव्यवस्थाविशेषार्पणाभेदादेकस्य कार्यकारणशक्तिसमन्वयो न विरोधस्यास्पदमित्यविरोधः सिद्धः॥ एवं प्रमाणनयैरधिगतानां जीवादीनां पुनरप्यधिगमोपायांतरप्रदर्शनार्थमाह—

निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः ॥ ७ ॥

के पुनरिमे निर्देशादयः? निर्देशोऽर्थात्मावधारणं। स्वामित्वमाधिपत्यं। साधनं कारणं। अधिकरणं प्रतिष्ठा। स्थितिः कालकृताव्यवस्था। विधानं प्रकारः। अधिगम इत्यनुवर्तत एतैरेतेभ्योवाऽधिगमः पूर्ववत्तसिः। केषामधिगमः? जीवादीनां, सम्यग्दर्शनादीनां च। स तर्हि तथा निर्देशः कर्तव्यः? न कर्तव्योऽर्थवशाद्विभक्तिपरिणामो भवति। तद्यथा—उच्चानि देवदत्तस्य गृहाण्यामंत्रयस्वैनं देवदत्तमिति गम्यते। अथ किमर्थमादौ निर्देश उच्यते—

अवधृतार्थस्य धर्मविकल्पप्रतिपत्तेरादौ निर्देशवचनं ॥ १ ॥ स्वरूपेणावधृतस्यार्थस्य धर्मविकल्पप्रतिपत्तिर्भवति। अतोस्य निर्देशस्यादौ वचनं क्रियते।

इतरेषां प्रश्नवशात्क्रमः ॥ २ ॥ इतरेषां स्वामित्वादीनां प्रश्नवशात्क्रमो वेदितव्यः। यद्येवं स एव तावदुच्यते को जीव इति?

औपशमिकादिभावपर्यायो जीवः पर्यायादेशात् ॥ ३ ॥ वक्ष्यमाण औपशमिकादिभावपर्यायो जीव इत्युच्यते पर्यायादेशात्।

द्रव्यार्थादेशान्नामादिः ॥ ४ ॥ जीव इत्युच्यते।

तदुभयसंग्रहः प्रमाणं ॥ ५ ॥ तस्योभयस्य संग्रहः प्रमाणनिर्देश इत्युच्यते। कस्य, जीवः स्वामी?

तत्परिणामस्य भेदादग्नेरौष्ण्यवत् ॥ ६ ॥ स परिणामो यस्य सोऽयं तत्परिणामस्तस्यासौ व्यपदिश्यते, कुतः? कथंचिद्भेदात्परिणामपरिणामिनोर्भेदकल्पनासद्भावात् अग्नेरौष्ण्यवत्। तद्यथा—औष्ण्यात्मकस्याग्नेर्दहनपचनस्वेदनादिक्रियासामर्थ्यमौष्ण्यं भेदेनोच्यते।

व्यवहारनयवशात्सर्वेषां ॥ ७ ॥ जीवादीनां सर्वेषां पदार्थानां व्यवहारनयवशाज्जीवः स्वामी। किंसाधनो जीवः?

पारिणामिकभावसाधनो निश्चयतः ॥ ८ ॥ योसौ जीवत्वपारिणामिकस्तत्साधनो जीवो निश्चयनयेन, तेन ह्यसावात्मानं सर्वकालं लभत इति।

---

१ बहुत्वं।

औपशमिकादिभावसाधनश्च व्यवहारात् ॥ ९ ॥ व्यवहारनयवशादौपशमिकादिभावसाधनश्चेति व्यपदिश्यते । च शब्देन शुक्रशोणिताहारादिसाधनश्च । किमधिकरणो जीवः ?

स्वप्रदेशाधिकरणो निश्चयतः ॥ १० ॥ योसौ स्वप्रदेशोऽसंख्यातस्वरूपः कर्मकृतशरीरपरिमाणानुविधायित्वेप्यपरिप्राप्तहीनाधिकभावस्तदधिकरणो जीवः स्वात्मप्रतिष्ठाकाशवत् ।

व्यवहारतः शरीराद्यधिष्ठानः ॥ ११ ॥ कर्मोपात्तं शरीरमेतत्राधिकरणमात्मा व्यवहारनयवशादधितिष्ठतीत्युच्यते । किं स्थितिकोजीवः ?

स्थितिस्तस्य द्रव्यपर्यायापेक्षानाद्यवसाना समयादिका च ॥१२॥ तस्य जीवस्य स्थितिर्द्रव्यपर्यायापेक्षा द्विधा कल्प्यते । द्रव्यापेक्षाऽनाद्यवसाना, जीवद्रव्यं हि चैतन्यजीवद्रव्योपयोगाऽसंख्येयप्रदेशादिसामान्यादेशान्न प्रच्यवते सर्वकालमिति । पर्यायस्त्वन्यश्चान्यश्च भवति तदपेक्षा समयादिका कल्प्यते । किमस्य विधानं ?

नारकादिसंख्येयासंख्येयानंतप्रकारो जीवः ॥ १३ ॥ नारकादयः संख्येयाः असंख्येया अनंतप्रकारा भिद्यंते जीवस्य ।

तथेतरेषामागमाविरोधान्निर्देशादिवचनं ॥ १४ ॥ तेनैव प्रकारेणागमाविरोधेनेतरेषामजीवादीनां निर्देशादयो वक्तव्याः । तद्यथा—अजीवस्तावद्दशप्राणपर्यायरहितः, नामादिश्चाजीवात्मैव, अजीवस्य स्वामी जीवो वा भोक्तृत्वात् । पुद्गलानामणुत्वादिसाधनं भेदादि, तन्निमित्तं वा कालादि । धर्माधर्मकालाकाशानां गतिस्थितिवर्तनावगाहहेतुता पारिणामिकी, अगुरुलघुगुणानुगृहीता, स्वात्मभूतसत्तासंबंधाज्जीवपुद्गला वा तदपेक्षत्वादूगत्यादिहेतुताभिव्यक्तेः। स्वात्मैवाधिकरणं सर्वद्रव्याणां, स्वात्मन्यवस्थितत्वात्, आकाशं साधारणमसाधारणं च घटादिर्जलादीनां । स्थितिर्द्रव्यापेक्षानाद्यवसाना, पर्यायापेक्षा समयादिका । विधानं धर्मादित्रिकं प्रतिनियतानादिपारिणामिकद्रव्यार्थादेशादेकैकं पर्यायार्थिकनयादेशादनेकं । संख्येयासंख्येयानंतानां द्रव्याणां गतिस्थित्यवगाहनाद्युपकारपर्यायादेशात्स्यादेकं स्यादनेकं स्यात्संख्येयं स्यादसंख्येयं स्यादनंतं । कालः संख्येयोऽसंख्येयोनंतश्च भवति परप्रत्ययात् । पुद्गलद्रव्यं रूपस्पर्शादि पारिणामिकद्रव्यार्थादेशात्स्यादेकं प्रतिनियतैकानेकसंख्येयासंख्येयानंतप्रदेशपर्यायादेशात्स्यादनेकं स्यात्संख्येयं स्यादसंख्येयं स्यादनंतं । आश्रवनिर्देशः कायवाङ्मनःक्रियापरिणामो नामादिर्वा । जीवोस्य स्वामी, कर्म वा तन्निमित्तत्वात् । स्वात्मैव साधनं, शुद्धस्य तदभावात् । कर्म वा सति तस्मिन्प्रवृत्तेः । अधिकरणमात्मैव[1] तत्र तत्फलदर्शनात् । कर्मणि कर्मकृते च कायादावुपचारतः । स्थितिर्वाङ्मनसाश्रवयोर्जघन्येनैकसमयः, उत्कर्षेणांतर्मुहूर्तः । कायाश्रवस्य जघन्येनांतर्मुहूर्तः, उत्कर्षेणानंतकालः । असंख्येयाः पुद्गलपरिवर्ताः । विधानं वाङ्मनसाश्रवयोश्चतुर्विकल्पसंख्यं, सत्यमृषोभयानुभयभेदात् । कायाश्रवः सप्तविधः औदारिकवैक्रियिकाहारकमिश्रकार्माणभेदात् । औदारिकौदारिकमिश्रकौ मनुष्यतिरश्चां । वैक्रियिकवैक्रियिकमिश्रकौ देवनारकाणां । आहारकाहारकमिश्रकौ संयतानामृद्धिप्राप्तानां । कार्मणकायाश्रवो विग्रहापन्नानां केवलिनां चासमुद्घातगतानां । अथवा श्रवस्य प्रकारः शुभाशुभः । तत्र कायिको हिंसानृतस्तेयाब्रह्मादिषु प्रवृत्तिनिवृत्तिसंज्ञः । वाचिकः परुषाक्रोशपिशुनपरोपघातादिषु वचस्सु प्रवृत्तिनिवृत्तिसंज्ञः । मानसो मिथ्याश्रुतेर्ष्यासूयादिषु मनसः प्रवृत्तिनिवृत्तिसंज्ञः । बंधनिर्देशः जीवकर्मप्रदेशान्योन्यसंश्लेषो बंधः, नामादिर्वा । स जीवस्य तत्र तत्फलदर्शनात्, कर्मणश्च तस्य द्विष्ठत्वात् । मिथ्यादर्शनाविरतिप्रमादकषाययोगा बंधस्य साधनं, तत्परिणतो वाऽऽत्मा । स्वामिसंबंधार्हमेव वस्त्वधिकरणं भवति, विवक्षातः कारकप्रवृत्तेः । स्थितिर्जघन्योत्कृष्टा च । तत्र जघन्या वेदनीयस्य द्वादशमुहूर्ता । नामगोत्रयोरष्टौ । शेषाणामंतर्मुहूर्ता: । उत्कृष्टा ज्ञानदर्शनावरणवेदनीयांतरायाणां त्रिंशत्सागरोपमकोटीकोट्यः । मोहनीयस्य सप्ततिः । नामगोत्रयोर्विंशतिः । त्रयस्त्रिंशत्सागरोपमाण्यायुषः । अथवा बंधसंतान-

---

१ "अधिकरणमात्मन्येवासौ" इत्यपि ग. पुस्तके पाठः । २ तद्विशेषरआदित्यपि पाठः ।

पर्यायादेशात्स्यादनादिरनिधनश्चाभव्यानां । भव्यानां च केषांचिद्येऽनंतेनापि कालेन न सेत्स्यंति । ज्ञानावरणादिकर्मोत्पादविनाशात्स्यात्सादि सनिधनः । विधानं, बंधः सामान्यादेशात्स्यादेकः द्विविधः शुभाशुभभेदात् । त्रिधा द्रव्यभावोभयविकल्पात् । चतुर्द्धा प्रकृतिस्थित्यनुभागप्रदेशभेदात् । पंचधा मिथ्यादर्शनादिहेतुभेदात् । षोढा नामस्थापनाद्रव्यक्षेत्रकालभावैः । सप्तधा तैरेव भावाधिकैः । अष्टधा ज्ञानावरणादिमूलप्रकृतिभेदात् । एवं संख्येया असंख्येया अनंतविकल्पाश्च भवंति हेतुफलभेदात् । संवरनिर्देश आश्रवनिरोधः, नामादिर्वा जीवोस्य स्वामी, कर्म वा निरुध्यमानविषयत्वात् । निरोधस्य साधनं, गुप्तिसमितिधर्मादयः । स्वामिसंबंधार्हमेवाधिकरणमित्युक्तं । स्थितिर्जघन्येनांतर्मुहूर्ता । उत्कृष्टा पूर्वकोटीदेशोना । विधानमेकादिरष्टोत्तरशतविधस्तत उत्तरश्च संख्येयादिविकल्पो निरोध्यनिरोधकभेदाद्वेदितव्यः । तत्राष्टोत्तरशतविध उच्यते तिस्रो गुप्तयः । पंच समितयः । धर्मो दशविधः अनुप्रेक्षा द्वादशः । परीषहा द्वाविंशतिः । तपो द्वादशविधं । प्रायश्चितं नवविधं । विनयश्चतुर्विधः । वैयावृत्यं दशविधं । स्वाध्यायः पंचविधः । व्युत्सर्गो द्विविधः । धर्मध्यानं दशविधं । शुक्लध्यानं चतुर्विधमिति । निर्जरा निर्देशो यथाविपाकात्तपसो वा, उपभुक्तवीर्यं कर्म निर्जरा, नामादिर्वा, सा आत्मनः कर्मणो वा द्रव्यभावभेदात् । साधनं, तपो यथाकर्मविपाकश्च । अधिकरणमात्मा निर्जरात्मैव वा । विधानं, सामान्यादेका निर्जरा । द्विविधा यथाकालप्रक्रमिकभेदात् । अष्टधा मूलकर्मप्रकृतिभेदात् । एवं संख्येसंख्येयानंतविकल्पा भवंति कर्मरसनिर्हरणभेदात् । मोक्षनिर्देशः कृत्स्नकर्मसंक्षयो मोक्षः, नामादिर्वा तस्य स्वामी परमात्मा मोक्षात्मैव वा । साधनं सम्यग्दर्शनज्ञानचारित्राणि । स्वामिसबंधार्हमेवाधिकरणं तद्विषयत्वात् । स्थितिस्तस्य सादिरनिधना । विधानं, सामान्यादेकोमोक्षः । द्रव्यभावमोक्तव्यभेदादनेकः । सम्यग्दर्शननिर्देशः तत्त्वार्थश्रद्धानं सम्यग्दर्शनं । नामादिर्वा । तत्पुनरात्मनः स्वस्यैव वा । दर्शनमोहोपशमादिसाधनं, बाह्यं चोपदेशादि, स्वात्मा वा । स्वामिसंबंधभागेवाधिकरणं । स्थितिर्जघन्येनांतर्मुहूर्ता उत्कर्षेण षट्षष्टिसागरोपमाणि सातिरेकाणि । अथवा सादि सनिधनमौपशमिकक्षायोपशमिकं, साद्यनिधनं क्षायिकं । विधानं सामान्यादेकं द्विधा निसर्गजाधिगजभेदात् । त्रिधौपशमिकक्षायिकक्षायोपशमिकविकल्पात् । एवं संख्येयानंतविकल्पं च भवत्यध्यवसानभेदात् । ज्ञाननिर्देशः, जीवादितत्त्वप्रकाशनं ज्ञानं । नामादिर्वा । तदात्मनः स्वाकारस्य वा । ज्ञानावरणादिकर्मक्षयोपशमादि साधनं । स्वाविर्भावशक्तिर्वा । अधिकरणमात्मा स्वाकारो वा तत्र प्रतिष्ठानात् । स्थितिः, सादिसनिधनं क्षायोपशमिकं ज्ञानं चतुर्विकल्पं । साद्यनिधनं क्षायिकं । विधानं सामान्यादेकं ज्ञानं । प्रत्यक्षपरोक्षभेदाद् द्विधा । द्रव्यगुणपर्यायविषयभेदात् त्रिधा । नामादिविकल्पाच्चतुर्धा । मत्यादिभेदात्पंचधा । इत्येवं संख्येयासंख्येयानंतविकल्पं च भवति ज्ञेयाकारपरिणतिभेदात् । चारित्रनिर्देशः, कर्मादानकारणनिवृत्तिश्चारित्रं । नामादिर्वा । तत्पुनरात्मनः स्वरूपस्य वा । चारित्रमोहोपशमादि साधनं, स्वशक्तिर्वा । स्वामिसंबंधभागेवाधिकरणं । स्थितिर्जघन्येनांतर्मुहूर्ता उत्कर्षेण पूर्वकोटीदेशोना । अथवा सादि सपर्यवसानं औपशमिकक्षायोपशमिकं साद्यपर्यवसानं क्षायिकं । शुद्धिव्यक्त्यपेक्षया साद्यनिधनं । विधानं सामान्यादेकं । द्विधा बाह्याभ्यंतरनिवृत्तिभेदात् । त्रिधौपशमिकक्षायिकक्षायोपशमिकविकल्पात् । चतुर्धा चतुर्यमभेदात् । पंचधा सामायिकादिविकल्पात् । इत्येवं संख्येयासंख्येयानंतविकल्पं च भवति परिणामभेदात् । किमेतैरेव जीवादीनामधिगमो भवति उतान्योप्यधिगमोपायोस्ति इति, परिपृष्टः, अस्तीत्याह–

सत्संख्याक्षेत्रस्पर्शनकालांतरभावाल्पबहुत्वैश्च ॥ ८ ॥

अधिगम इत्यनुवर्तते ।

प्रशंसादिषु सच्छब्दवृत्तेरिच्छातः सद्भावग्रहणं ॥ १ ॥ सच्छब्दः प्रशंसादिषु वर्तते तद्यथा–प्रशंसायां तावत् "सत्पुरुषः सदश्वश्चेति" । क्वचिदस्तित्वे "सद्घटः सत्पट" इति । क्वचित्प्रतिज्ञायमाने "प्रव्रजितः सन् कथमनृतं ब्रूयात्, प्रव्रजित इति प्रतिज्ञायमान इत्यर्थः" । क्वचिदादरे "सत्कृत्यातिथीन् भोजयतीति" आदृत्येत्यर्थः । तत्रेहेच्छातः सद्भावो गृह्यते ।

अव्यभिचारात्सर्वमूलत्वाच्च तस्यादौ वचनं ॥ २ ॥ सत्त्वं ह्यव्यभिचारि सर्वपदार्थविषयत्वात्,

नहि कश्चित्पदार्थः सत्तां व्यभिचरति, यदि व्यभिचरेद्वाग्विज्ञानगोचरातीतः स्यात् । गुणास्तु रूपादयो ज्ञानादयश्च केषु चित्संति केषुचिन्न संति । क्रिया च परिस्पंदात्मिका जीवपुद्गलेष्वस्ति नेतरेष्विति न व्याप्ति मती । सर्वेषां च विचारार्हाणामस्तित्वं मूलं । तेन हि निश्चितस्य वस्तुन उत्तरा चिंता युज्यते अतस्तस्यादौ वचनं क्रियते ।

सतः परिणामोपलब्धेः संख्योपदेशः ॥ ३ ॥ सतो हि वस्तुनः संख्यातासंख्याताऽनंतपरिणामोपलब्धेः संख्यातायन्यतमपरिणामावधारणार्थं संख्या भेदलक्षणोपदिश्यते ।

निर्ज्ञातसंख्यस्य निवासविप्रतिपत्तेः क्षेत्राभिधानं ॥ ४ ॥ निश्चयेन ज्ञातसंख्यस्यार्थस्योर्ध्वाधस्तिर्यग्निवासविप्रतिपत्तेरूर्ध्वाद्यन्यतमनिवासनिश्चयार्थं क्षेत्राभिधानं ।

अवस्थाविशेषस्य वैचित्र्यात्त्रिकालविषयोपश्लेषनिश्चयार्थं स्पर्शनं ॥ ५ ॥ अवस्थाविशेषो विचित्रस्त्र्यस्त्रचतुरस्रादिस्तस्य त्रिकालविषयमुपश्लेषणं स्पर्शनं । कस्य चित्तत्क्षेत्रमेव स्पर्शनं कस्यचिद्रज्ज्वमेव कस्यचिद्रज्जवः षडष्टौ वेति । एकसर्वजीवसन्निधौ तन्निश्चयार्थं तदुच्यते,-

स्थितिमतोऽवधिपरिच्छेदार्थं कालोपादानं ॥ ६ ॥ स्थितिमतोर्थस्यावधिपरिच्छेत्तव्य इति कालेपादनं क्रियते ।

अंतरशब्दस्यानेकार्थवृत्तेश्छिद्रमध्यविरहेष्वन्यतमग्रहणं ॥ ७ ॥ बहुष्वर्थेषु दृष्टः प्रयोगः क्वचिच्छिद्रे वर्तने 'सांतरं काष्ठं सछिद्रमिति' । क्वचिदन्यत्वे 'द्रव्याणि द्रव्यांतरमारभंत' इति क्वचिन्मध्ये हिमवत्सागरांतर इति । क्वचित्सामीप्ये "स्फटिकस्य शुक्लरक्तार्यंतरस्थस्य तद्वर्णतेति शुक्लरक्तसमीपस्थस्येति गम्यते । क्वचिद्विशेषे" ।

"वाजिवारणलोहानां काष्ठपाषाणवाससां । नारीपुरुषतोयानामंतरं महदंतरं" इति ।

महान् विशेष इत्यर्थः । क्वचिद्बहिर्योगे 'ग्रामस्यांतरे कूपा' इति क्वचिदुपसंव्याने 'अंतरे शाटका' इति । क्वचिद्विरहेऽनभिप्रेतश्रोतृजनांतरे मन्त्रं मन्त्रयते । तद्विरहे मन्त्रयत इत्यर्थः । तत्रेह छिद्रमध्यविरहेष्वन्यतमो वेदितव्यः ।

अनुपहतवीर्यस्य न्यग्भावे पुनरुद्भूतिदर्शनात्तद्वचनं ॥ ८ ॥ अनुपहतवीर्यस्य द्रव्यस्य निमित्तवशात्कस्य चित्पर्यायस्य न्यग्भावे सति पुनर्निमित्तांतरात्तस्यैवाविर्भावदर्शनात्तदंतरमित्युच्यते ॥

परिणामप्रकारनिर्णयार्थं भाववचनं ॥ ९ ॥ औपशमिकादिः परिणामप्रकारो निर्णेतव्य इति भाववचनं क्रियते ।

संख्याताद्यन्यतमानिश्चयेऽप्यन्योन्यविशेषप्रतिपत्त्यर्थमल्पबहुत्ववचनं ॥ १० ॥ संख्यातादिष्वन्यतमेन परिणामेन निश्चितानामन्योन्यविशेषप्रतिपत्त्यर्थमल्पबहुत्ववचनं क्रियते । इमे एभ्योऽल्पा इमे बहव इति । आह—

निर्देशवचनात्सत्त्वप्रसिद्धेरसद्ग्रहणं ॥ ११ ॥ निर्देशवचनादेव सत्त्वं सिद्धं न ह्यसतो निर्देश इति तस्मादसद्ग्रहणं । अनर्थकं सद्ग्रहणमसद्ग्रहणं ।

न वा क्वास्ति क्व नास्तीति चतुर्दशमार्गणास्थानविशेषणार्थत्वात् ॥ १२ ॥ नवैष दोषः, किं कारणं नानेन सम्यग्दर्शनादेः सामान्येन सत्त्वमुच्यते किन्तु गतीन्द्रियकायादिषु चतुर्दशसु मार्गणास्थानेषु क्वास्ति सम्यग्दर्शनादि, क्व नास्तीत्येवं विशेषणार्थं सद्वचनं ।

सर्वभावाधिगमहेतुत्वाच्च ॥ १३ ॥ अधिकृतानां सम्यग्दर्शनादीनां जीवादीनां च निर्देशवचने नास्तित्वमधिगतं स्यात्, येत्वनधिकृता जीवपर्यायाः क्रोधादयो ये वाऽजीवपर्याया वर्णादयो घटादयश्च तेषामस्तित्वाधिगमार्थं पुनर्वचनं ।

अनधिकृतत्वादिति चेन्न सामर्थ्यात् ॥ १४ ॥ स्यादेतदनधिकृतास्ते ततो न पुनर्युक्तमेषां ग्रहण मिति । तन्न किं कारणं सामर्थ्यात् तेषामपि ग्रहणं भवति ।

विधानग्रहणात् संख्यासिद्धिरिति चेन्न भेदगणनार्थत्वात् ॥ १५ ॥ स्यादेतत् विधानग्रहणादेव संख्यासिद्धिरिति । तन्न किं कारणं भेदगणनार्थत्वात् । प्रकारगणनं हि तत् । भेदगणनार्थमिदमुच्यते । उपशमसम्यग्दृष्टय इयंतः । क्षायिकसम्यग्दृष्टय एतावंत इति ।

क्षेत्राधिकरणयोरभेद इति चेन्नोक्तत्वात् ॥ १६ ॥ स्यादेतद्यदेवाधिकरणं तदेव क्षेत्रं, अतस्तयोरभेदात्पृथग्ग्रहणमनर्थकमिति । तन्न किं कारणं उक्तार्थत्वादुक्तमेतत् सर्वभावाधिगमार्थत्वादिति ।

क्षेत्रे सति स्पर्शनोपलब्धेरंबुघटवत्पृथग्ग्रहणं ॥ १७ ॥ यथेह सति घटे क्षेत्रेऽबुनोवस्थानात्तन्नियमाद्घटस्पर्शनं, नह्येतदस्ति घटेंबु अवतिष्ठते, नच घटं स्पृशतीति । तथाकाशक्षेत्रे जीवावस्थानां नियमादाकाशे स्पर्शनमिति क्षेत्राभिधानेनैव स्पर्शनस्यार्थगृहीतत्वात्पृथग्गृहणमनर्थकं ।

न वा विषयवाचित्वात् ॥१८॥ नवैष दोषः किं कारणं ? विषयवाचित्वात् । विषयवाची क्षेत्रशब्दः । यथा राजा जनपदक्षेत्रेऽत्रतिष्ठते, नच कृत्स्नं जनपदं स्पृशति । स्पर्शनं तु कृत्स्नविषयमिति ।

त्रैकाल्यगोचरत्वाच्च ॥ १९ ॥ यथा साम्प्रतिकेनांबुना सांप्रतिकं घटक्षेत्रे स्पृष्टं, नातीतानागतं । नैवमात्मनः सांप्रतिकक्षेत्रस्पर्शने स्पर्शनाभिप्रायः । स्पर्शनस्य त्रिकालगोचरत्वात् ।

स्थितिकालयोरर्थांतरत्वाभाव इतिचेन्न मुख्यकालास्तित्वसंप्रत्ययार्थं ॥ २० ॥ स्यादेतत् स्थितिरेव कालः काल एव स्थितिरित्यतो नास्त्यनयोरर्थांतरभाव इति । तन्न किं कारणं ? मुख्यकालास्तित्वसंप्रत्ययार्थं पुनः कालग्रहणं । द्विविधो हि कालो मुख्यो व्यावहारिकश्चेति । तत्र मुख्यो निश्चयकालः । पर्यायिपर्यायावधिपरिच्छेदो व्यावहारिकस्तयोरुत्तरत्र निर्णयो वक्ष्यते । उक्तंच-किमुक्तं ? सर्वभावाधिगमहेतुत्वादिति ।

नामादिषु भावग्रहणात्पुनर्भावाग्रहणमिति चेन्नौपशमिकाद्यपेक्षत्वात् ॥ २१ ॥ स्यादेतन्नामादिषु भावग्रहणं कृतं तेनैव सिद्धत्वात्पुनर्भावग्रहणमनर्थकमिति तन्न किं कारणं ? औपशमिकाद्यपेक्षत्वात् । पूर्वं भावग्रहणं द्रव्यं न भवतीत्येवं परं । इदं त्वौपशमिकादिवक्ष्यमाणभावापेक्षं । किं सम्यग्दर्शनमौपशमिकं, क्षायिकमित्यादि ।

विनेयाशयवशो वा तत्त्वाधिगमहेतुविकल्पः ॥ २२ ॥ अथवा सर्वेषामेव परिहारः विनेयाशयवशो हि तत्त्वाधिगमहेतुविकल्पो वेदितव्यः । केचित्संक्षेपेण प्रतिपाद्याः केचिद्विस्तरेण, इतरथा हि प्रमाणग्रहणादेव सिद्धेरितरेषामधिगमोपायानां ग्रहणमनर्थकं स्यादिति ।

इतितत्त्वार्थवार्तिके प्रथमेऽध्याये पंचममाह्निकं समाप्तं ॥ ५ ॥

एवं सम्यग्दर्शनस्यादावुद्दिष्टस्य लक्षणोत्पत्तिस्वामिविषयन्यासाधिगमोपायाः निर्दिष्टास्तत्संबंधेन च जीवादीनां संज्ञापरिणामादि निर्दिष्टं तदनंतरमिदानीं सम्यग्ज्ञानं विचारार्हमित्याह—

मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानं ॥ ९ ॥

मत्यादय इति क एते शब्दाः ?

मतिशब्दो भावकर्तृकरणसाधनः ॥ १ ॥ अयं मतिशब्दो भावकर्तृकरणेष्वन्यतमसाधनो वेदितव्यः । मनेर्भावसाधने क्तिः । तदावरणकर्मक्षयोपशमे सतींद्रियानिंद्रियापेक्षमर्थस्य मननं मतिः । औदासीन्येन तत्त्वकथनाद्बहुलापेक्षया कर्तृसाधनः, करणसाधनो वा, मनुतेर्थान्मन्यतेनेनेति वा मतिः भेदाभेदविवक्षोपपत्तेः ।

श्रुतशब्दः कर्मसाधनश्च ॥ २ ॥ किं च पूर्वोक्तविषयसाधनश्चेति वर्तते । श्रुतावरणक्षयोपशमांतरंगबहिरंगहेतुसन्निधाने सति श्रूयतेस्मेति श्रुतं । कर्तरि श्रुतपरिणत आत्मैव शृणोतीति श्रुतं । भेदविवक्षायां श्रूयतेनेनेति श्रुते श्रवणमात्रं वा ।

अवपूर्वस्य दधातेः कर्मादिसाधनः किः ॥ ३ ॥ कर्मादिषु साधनेष्वन्यतमे किरयं वेदितव्यः । अवधिज्ञानावरणक्षयोपशमाद्युभयहेतुसन्निधाने सत्यवधीयतेऽवाग्दधात्यवाग्धानमात्रं वावधिः । अवधिशब्दोऽधः पर्यायवचनः, यथाऽधः क्षेपणमवक्षेपणं, इत्यधोगतभूयोद्रव्यविषयोह्यवधिः । अथ वावधिर्मर्यादा, अवधिना प्रतिबद्धं ज्ञानमवधिज्ञानं । तथाहि-वक्ष्यते रूपिष्ववधेरिति । सर्वेषां प्रसंग इतिचेन्न । रूढिवशाद्व्यवस्थोपपत्तेर्गोशब्दप्रवृत्तिवत ।

मनः प्रतीत्य प्रतिसंधाय वा ज्ञानं मनःपर्ययः ॥ ४ ॥ तदावरणकर्मक्षयोपशमादिद्वितयनिमित्तवशात्परकीयमनोगतार्थज्ञानं मनः पर्ययः । भावादिसाधनत्वं पूर्ववद्वेदितव्यं । कथं मनःप्रतीत्य प्रतिसंधाय वा ज्ञानमित्यत्रोच्यते--परकीयमनसि गतोर्थो मन इत्युच्यते तात्स्थ्यात्ताच्छब्द्यमिति । स च कः मनोगतोर्थो भावघटादिस्तमर्थं समंतादेत्यावलंब्य वा प्रसादादात्मनो ज्ञानं मनः पर्ययः ।

मतिज्ञानप्रसंग इति चेन्नापेक्षामात्रत्वात् ॥ ५ ॥ स्यादेतन्मनःपर्ययज्ञानं मतिज्ञानं प्राप्तं कुतो मनोनिमित्तत्वादेवं ह्यार्षी प्रक्रिया मनसा मनः संपरिचिंत्येति । तन्न किं कारणमपेक्षामात्रत्वात् स्वपरमनोपेक्षामात्रं तत्र क्रियते यथाऽभ्रे चंद्रमसं पश्येति । न तत्कार्यं मतिज्ञानवत । आत्मशुद्धिनिमित्तत्वादेतस्येति ।

बाह्याभ्यंतरक्रियाविशेषात् यदर्थं केवंते तत्केवलं ॥ ६ ॥ तपः क्रियाविशेषात् वाङ्मानसकार्याश्रयान् बाह्यानभ्यंतरांश्च यदर्थमर्थिनः केवंते सेवंते तत्केवलं ।

अव्युत्पन्नोवाऽसहायार्थः केवलशब्दः ॥ ७ ॥ यथा केवलमन्नं भुंक्ते देवदत्त इति । असहायं व्यंजनरहितं भुंक्ते इति गम्यते । तथा क्षायोपशमिकज्ञानासंपृक्तं असहायं केवलमित्यव्युत्पन्नोयं शब्दो दृष्टव्यः ।

करणादिसाधनो ज्ञानशब्दो व्याख्यातः ॥ ८ ॥ अयं ज्ञानशब्दः करणादिसाधन इति व्याख्यातः पुरस्तात् ।

इतरेषां तदभावः ॥ ९ ॥ इतरेषामेकांतवादिनां तस्य ज्ञानस्य करणादिसाधनत्वं नोपपद्यते । तत्कथमिति चेदुच्यते—

आत्माभावे ज्ञानस्य करणादित्वानुपपत्तिः कर्तुरभावात् ॥ १० ॥ येषामात्मा न विद्यते तेषां ज्ञानस्य करणादित्वं नोपपद्यते, कुतः ? कर्तुरभावात् । सति हि देवदत्ते छेत्तरि परशोः करणत्वं दृष्टं । तथा चात्मन्यसति नास्य करणत्वं । तत एव भावसाधनत्वमपि नोपपद्यते, ज्ञातिर्ज्ञानमिति । न ह्यसति भाववति भाव इति । स्यादेतज्जानातीति ज्ञानमिति कर्तृसाधनत्वं, इति तन्न निरीहकत्वात् । न हि निरीहको भावः कर्तृत्वमास्कंदति निरीहकाश्च सर्वे भावाः । किंच--पूर्वोत्तरापेक्षस्य लोके कर्तृत्वं दृष्टं । नच तस्य ज्ञानस्य पूर्वोत्तरापेक्षास्ति क्षणिकत्वादतो निरपेक्षस्य कर्तृत्वाभावः । किंच--करणव्यापारापेक्षस्य लोके कर्तृत्वं दृष्टं । नच ज्ञानस्यान्यत्करणमस्ति । अतोस्य कर्तृत्वमपि नोपपद्यते । स्वशक्तिरेव करणमितिचेन्न । शक्तिशक्तिमद्भेदाभ्युपगमे आत्मास्तित्वसिद्धेः, अभेदे च स दोषस्तदवस्थ एवेति । संतानापेक्षया कर्तृकरणभेदोपचार इति चेन्न । परमार्थविपरीतत्वे मृषावादोपपत्तेः, भेदाभेदविकल्पनपौनरुक्तदोषप्रसंगाच्च । मनश्चेंद्रियं चास्य करणमितिचेन्न । तस्य तच्छक्त्यभावात् । मनस्तावन्न करणं विनष्टत्वात् षण्णामनंतरातीतं विज्ञानं यद्धि तन्मन इति वचनात्रेंद्रियमप्यतीतं तत एव । नाप्युपजायमानस्य करणत्वं । नहि सव्यविषाणं युगपदुपजायमानमितरस्य विषाणस्य करणं भवति । किंच--प्रकृत्यर्थादन्यस्याभावात् ज्ञा इत्यस्याः प्रकृतेरवबोधनमर्थो न तस्मादन्यः कश्चिदर्थोस्ति यः कर्तृत्वमनुभवेदतोस्य कर्तृत्वाभावः । किं च--एकक्षणविषयं ज्ञान-

र्तृत्वं, तदनेकक्षणगोचरोच्चारणलब्धजन्मना कर्तृशब्देन कथमुच्यते । कथं वाऽयमेकक्षणे सन्वाचकः स्यात् । संतानावस्थानाद्वाच्यवाचकभावसंबंध इति चेन्न । तस्य प्रतिविहितत्वात् । अथ मतमेतत्–खात्पतिता नो रत्नवृष्टिः, अवाच्यमेव हि तत्त्वमिष्यते । अव्यापारेषु हि सर्वधर्मेषु वाग्व्यवहारो नास्त्येवेति, तदपि नोपपद्यते । स्ववचनविरोधात्, तत्त्वप्रतिपत्त्युपायापन्हवप्रसंगाच्च । किं च–जानातीति ज्ञानमिति कर्तृसाधनत्वं नोपपद्यते । कुतः ? विशेषानुपलब्धेः । येन हि कर्तृसाधनत्वमवगतं । करणादिसाधनत्वं, च तेनेदं युज्यते वक्तुं कर्तृसाधनमिदं न करणादिसाधनमिति । नच क्षणिकवादिनः प्रत्यर्थवशवर्तिज्ञानविकल्पनायामनवधारितोभयस्वभावस्य तद्विशेषोपलब्धिरस्ति । न हि शुक्लेतरविशेषानभिज्ञस्य शुक्लमिदं न नीलादीति विशेषणमुपपद्यते ।

अस्तित्वेप्यविक्रियस्य तदभावोनभिसंबंधात् ॥ ११ ॥ आत्मनः अस्तित्वेपि ज्ञानस्य करणाद्यभावः, कुतः ?, अनभिसंबंधात् । यस्य मतमात्मनो ज्ञानाख्यो गुणस्तस्माच्चार्थांतरभूतः, 'आत्मेंद्रियमनोर्थसन्निकर्षात् यन्निष्पद्यते तदन्यदिति वचनादिति' तस्य ज्ञानं कारणं न भवितुमर्हति । कुतः ?—

पृथगात्मलाभाभावात् ॥ १२ ॥ दृष्टो हि लोके, छेत्तुर्देवदत्तादर्थांतरभूतस्य परशोस्तैक्ष्ण्यगौरवकाठिन्यादिविशेषलक्षणोपेतस्य सतः करणभावः । नच तथा ज्ञानस्य स्वरूपं पृथगुपलभामहे । किं च—

अपेक्षाभावात् ॥ १३ ॥ दृष्टो हि परशोर्देवदत्ताधिष्ठितोद्यमननिपतनापेक्षस्य करणभावः । न च तथा ज्ञानेन किंचित्कर्तृसाध्यं क्रियांतरं समपेक्ष्यमस्ति । किं च—

तत्परिणामाभावात् ॥ १४ ॥ छेदनक्रियापरिणतेन हि देवदत्तेन तत्क्रियायाः साचिव्ये, नियुज्यमानः परशुः करणमित्येतद्युक्तं । न च तथाऽऽत्मा ज्ञानक्रियापरिणतः ।

अर्थांतरत्वे तस्याज्ञत्वात् ॥ १५ ॥ इह यज्ज्ञानादन्यद्वर्तते तदज्ञं, दृष्टं । यथा घटादिद्रव्यं । तथा च ज्ञानादन्य आत्मा, इत्यज्ञत्वप्रसंगः । ज्ञानयोगाज्ज्ञत्वं, दृष्टत्वात् दण्डिवदिति चेन्न । तत्स्वभावाभावे संबंधनियमानुपपत्तिरिंद्रियमनोवत् । ज्ञस्वभावाभावे सत्यात्मन्येव योगो, न मनसेंद्रियेण वेति नियमाभावः । युतसिद्धयोश्च दण्डदण्डिनोः संबधः, दण्डस्य च प्रसिद्धस्य सतो विशेषणमात्रत्वेनोपादानात्, आत्मनश्च तदुत्पत्तौ हिताहितविचारणाविक्रियोपपत्तेरसाम्यं । उभयोश्चाज्ञयोः संबंधेप्यज्ञत्वप्रसगो दृष्टत्वात्, जात्यधयोः संबंधे दर्शनशक्त्यभाववत् । किं च—इंद्रियमनःप्रसंगाद्यदि ज्ञायतेनेन ज्ञानमिति करणमभ्युपगम्यते, तेनेंद्रियाणां मनसश्च ज्ञानत्वप्रसंगः, विशेषाभावात्तैरपि ज्ञायत इति । किं च–उभयोर्निष्क्रियत्वात्, सर्वगतस्य तावदात्मनः क्रिया नास्ति । नापि ज्ञानस्य क्रियावत्त्वं । द्रव्यस्यैव लक्षणमिति वचनात् । ततः क्रियाविरहितस्य कथं कर्तृत्वं करणत्वं वा स्यात् । यस्यापि मतमन्यत्, गुणव्यतिरेकाच्छुद्धः पुरुषो नित्यश्च निर्विकारत्वादिति । तस्य ज्ञानं करणं न भवितुमर्हति । कुतः ? अनभिसंबंधात् । या बुद्धिरिंद्रियमनोहंकारमहद्भ्युपनीता, लोचनसंकल्पाभिमानाध्यवसायरूपा, सा प्रकृतिः । पुरुषः पुनरविक्रियः, शुद्धश्च । तस्य सा करणं कथं स्यात् ? । क्रियापरिणतस्य हि देवदत्तस्य लोके करणसंप्रयोगो दृष्टः । इत्येवमादि योज्यं । नापि कर्तृसाधनत्वं युज्यते । लोके हि करणत्वेन प्रसिद्धस्यासेः, तत्प्रशंसापरायामभिधानप्रवृत्तौ समीक्षितायां, तैक्ष्ण्यगौरवकाठिन्याहितविशेषोयमेव, छिनत्तीति कर्तृधर्माध्यारोपः क्रियते । न च तथा ज्ञानं करणत्वेन प्रसिद्धमस्ति, पूर्वदोषोपपत्तेः, अतोस्य कर्तृत्वमयुक्तं । नच भावसाधनत्वमुपपत्तिमत्, अविक्रियस्य तत्परिणामाभावात् । विक्रियास्वभावस्य हि वस्तुनस्तंडुलादेः विक्लेदादिदर्शनात्; पचनं पाक इत्येवमादि भावनिर्देशो युक्तः, नाकाशस्येति । किं च–फलाभावात् । ज्ञानं हि प्रमाणमिष्टं, प्रमाणेन च फलवता भवितव्यं, नचावबोधनमंतरेण फलमन्यदुपलभ्यते । तस्मादन्येन ज्ञानेन भवितव्यं, यस्मिन् सति सा ज्ञातिरवबोधः फलमात्मनो भवति, तच्च नास्त्यतो न भावसाधनत्वं । अधिगमश्चात्र न भावांतरमिति, फले प्रामाण्योपचार, इति चाऽयुक्तं मुख्याभावात् । आकारभेदात् फलप्रमाणपरिकल्पना वा युक्ता । आकाराकारवतोर्भेदाभेदयोरनेकदोषोपपत्तेः । निर्विकल्पकत्वाच्च तत्त्वस्याकारकल्पनाभावः । बाह्यवस्त्वाकारापोहेऽतरंगाकारानुपपत्तिश्चेति । जैनेंद्राणां तु परमर्षिसर्वज्ञप्रणीतनयभंगगहनप्रपंचविपश्चितां स्याद्वादप्रकाशोन्मीलितज्ञानचक्षुषामेकस्मिन्नप्यर्थेऽनेकपर्यायसंभवादुपपद्यते इति विमृष्टार्थमेव तत् ।

मत्यादीनां ज्ञानशब्देन प्रत्येकमभिसंबंधो भुजिवत् ॥ १६ ॥ यथा देवदत्तजिनदत्तगुरुदत्ता भोज्यंतामिति, देवदत्तादीनां, भुजिना प्रत्येकमभिसंबंधो भवति। एवमिहापि प्रत्येकमभिसंबंधः, मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्ययज्ञानं केवलज्ञानमिति । सत्यपि तत्सामानाधिकरण्ये उपात्तलिंगसंख्यत्वात्तल्लिंगसंख्योपादानं नास्तीत्युक्तं पुरस्तात् ।

[1]अंतत्वादल्पाच्तरत्वादल्पविषयत्वाच्च मतिग्रहणमादौ ॥ १७ ॥ मतिरित्येतत् पदं अंतमल्पाक्षरं च, अवध्यादिभ्यो विषयश्चास्याल्पः, चक्षुरादीनां प्रतिनियतविषयत्वात्। तस्मादस्यादौ ग्रहणं क्रियते।

तदनंतरं श्रुतं ॥ १८ ॥ तत्पूर्वं हि श्रुतमिति वक्ष्यते । ततस्तदनंतरं श्रुतं क्रियते । इतश्च—

विषयनिबंधनतुल्यत्वाच्च ॥ १९ ॥ 'मतिश्रुतयोर्निबंधो द्रव्येष्वसर्वपर्यायेष्विति' वक्ष्यते । अतस्तुल्यत्वाच्च तदनंतरं श्रुतं ।

तत्सहायत्वाच्च ॥ २० ॥ यथा नारदपर्वतयोः सहायत्वाद्यत्र नारदस्तत्र पर्वतः, यत्र पर्वतस्तत्र नारदः परस्परापरित्यागात्। तथा मतिश्रुतयोः परस्परापरित्यागः। यत्र मतिस्तत्र श्रुतं यत्र श्रुतं तत्र मतिरिति ।

प्रत्यक्षत्रयस्यादाववधिवचनं विशुद्ध्यभावात् ॥ २१ ॥ सत्यपि मतिश्रुताभ्यां प्रत्यक्षत्वाद्विशुद्धत्वेऽवधेरौपदिष्टे प्रत्यक्षज्ञानमपेक्ष्यावधिर्न विशुद्धस्ततोऽस्य प्रागुपन्यासः ।

ततो विशुद्धतरत्वान्मनःपर्ययग्रहणं ॥ २२ ॥ ततोऽवधेर्मनःपर्ययज्ञानं विशुद्धतरं। किं कृतोस्य विशुद्धिप्रकर्षः ? संयमगुणसन्निधानकृतः । अतोऽस्य तदनंतरं ग्रहणं ।

अंते केवलग्रहणं ततः परं ज्ञानप्रकर्षाभावात् ॥ २३ ॥ सर्वेषां ज्ञानानां परिच्छेदने केवलसामर्थ्यात्, अस्य चान्येन ज्ञानेनाऽपरिच्छेद्यत्वान्नातोऽन्यत्प्रकृष्टं ज्ञानमस्तीति, ततः परं ज्ञानप्रकर्षाभावः ।

तेनैव सह निर्वाणाच्च ॥ २४ ॥ यतश्च केवलेनैव सह निर्वाण न क्षायोपशमज्ञानैः सह, अतोंते केवलग्रहणं । कश्चिदाह—

मतिश्रुतयोरेकत्वं साहचर्यादेकत्रावस्थानाच्चाऽविशेषात् ॥ २५ ॥ मतिश्रुतयोरेकत्वं प्राप्नोति कुतः साहचर्यादेकत्रावस्थानाच्चाऽविशेषात् ।

नातस्तत्सिद्धेः ॥ २६ ॥ नाविशेषः। कुतः, अतस्तत्सिद्धेः। यत एव मतिश्रुतयोः साहचर्यमेकत्रावस्थानं चोच्यते । अत एव विशेषः सिद्धः । प्रतिनियतविशेषसिद्धयोर्हि साहचर्यमेकत्रावस्थानं च युज्यते । नान्यथेति ।

तत्पूर्वकत्वाच्च ॥ २७ ॥ 'मतिपूर्वं श्रुतमिति' वक्ष्यते । ततश्चानयोर्विशेषः । यत्पूर्वं यच्च पश्चात्तयोः कथमविशेषः ? ।

तत एवाविशेषः, कारणसदृशत्वाद्युगपद्वृत्तेश्चेतिचेन्नात एव नानात्वात् ॥ २८ ॥ स्यादेतद्यतो मतिपूर्वकत्वमत एवाविशेषः । कुतः, कारणसदृशत्वात् कार्यस्य। कथं, तंतुपटवत् । यथा शुक्लादितंतुकार्यं पटद्रव्यं, शुक्लादिगुणमेव । तथा मति कार्यत्वाच्छ्रुतस्यापि मत्यात्मकत्वं । युगपद्वृत्तेश्च । यथाप्रावौष्ण्यप्रकाशनयोर्युगपद्वृत्तेरन्यात्मकत्वं । तथा सम्यग्दर्शनाविर्भावादनंतरं युगपन्मतिश्रुतयोर्ज्ञानव्यपदेश इति । तन्न किं कारणं? अत एव नानात्वात् । यत एव कारणसदृशत्वं युगपद्वृत्तिश्च चोद्यते। अत एव नानात्वं सिद्धं । द्वयोः, हि सादृश्यं युगपद्वृत्तिश्चेति ।

विषयाविशेषादिति चेन्न ग्रहणभेदात् ॥ २९ ॥ स्यादेतद्विषयाविशेषात्, मतिश्रुतयोर्निबंधो द्रव्येष्वसर्वपर्यायेष्विति । तन्न किं कारणं ग्रहणभेदात् । अन्यथा हि मत्या गृह्यते अन्यथा श्रुतेन। यो हि मन्यते विषयाभेदादविशेष इति । तस्यैकघटविषयदर्शनस्पर्शनाविशेषः स्यात् ।

---

१ अंतत्वादित्यर्थः, तत्वादित्यपिपाठः ।

उभयोरिन्द्रियानिन्द्रियनिमित्तत्वादिति चेन्न असिद्धत्वात् ॥ ३० ॥ स्यादेतदुभयोरिन्द्रियानिन्द्रियनिमित्तत्वादेकत्वं । मतिज्ञानं तावदिंद्रियानिंद्रियनिमित्तमिति प्रतीतं । श्रुतमपि वक्तृश्रोतृजिह्वाश्रवणनिमित्तत्वाच्च तदुभयनिमित्तमिति । तन्न किं कारणमसिद्धत्वात् । जिह्वा हि शब्दोच्चारक्रियाया निमित्तं, न ज्ञानस्य । श्रवणमपि स्वविषयमतिज्ञाननिमित्तं, न श्रुतस्येत्युभयनिमित्तत्वमसिद्धं । सिद्धो हेतुः साध्यमर्थं साधयेन्नासिद्धः । किं निमित्तं तर्हि श्रुतं ?

अनिंद्रियनिमित्तोऽर्थावगमः श्रुतं ॥ ३१ ॥ इंद्रियानिंद्रियबलाधानात्पूर्वमुपलब्धेऽर्थे नोइंद्रियप्राधान्याद्यदुत्पद्यते ज्ञानं तत्, श्रुतं ।

ईहादिप्रसंग इति चेन्नावग्रहीतमात्रविषयत्वात् ॥ ३२ ॥ स्यादेतदीहादीनामपि श्रुतव्यपदेशः प्राप्तः, तेप्यनिंद्रियनिमित्ता इति । तन्न किं कारणं अवग्रहीतमात्रविषयत्वात्, इंद्रियेणावग्रहीतोऽर्थस्तन्मात्रविषया ईहादयः । श्रुतं पुनर्न तद्विषयं । तर्हि ? श्रुतमपूर्वविषयं, एकं घटमिंद्रियानिंद्रियाभ्यां निश्चित्याऽयं घट इति तज्जातीयमन्यमनेकदेशकालरूपादिविलक्षणमपूर्वमधिगच्छति यत्तच्छ्रुतं । नानाप्रकारार्थप्ररूपणपरं यत्तद्वा श्रुतं । अथवा इंद्रियानिंद्रियाभ्यामेकं जीवमजीवं चोपलभ्य तत्र सत्संख्याक्षेत्रस्पर्शनकालांतरभावाल्पबहुत्वादिभिः प्रकारैरर्थप्ररूपणे कर्तव्ये यत्समर्थं तच्छ्रुतं ।

श्रुत्वावधारणाच्छ्रुतमिति चेन्न मतिज्ञानप्रसंगात् ॥ ३३ ॥ श्रुत्वा यदवधारयति तच्छ्रुतमितिकेचिन्मन्यंते । तन्न युक्तं । कुतः ? मतिज्ञानप्रसंगात् । तदपि शब्दं श्रुत्वा गोशब्दोयमिति प्रतिपद्यतेऽसाधारणेन नाम लक्षणेन भवितव्यं । श्रुतं पुनस्तस्मिन्निंद्रियानिंद्रियगृहीतागृहीतपर्यायसमूहात्मनि शब्दे तदभिधेये च श्रोत्रेंद्रियव्यापारमंतरेण जीवादौ नयादिभिरधिगमोपायैर्यथात्वेनाऽवबोधः ।

प्रमाणनयैरधिगम इत्युक्तं । प्रमाणं केषांचिज्ज्ञानमभिमतं केषांचित्सन्निकर्ष इत्यतोऽधिकृतानामेव मत्यादीनां प्रमाणत्वख्यापनार्थमाह—

तत्प्रमाणे ॥ १० ॥

प्रमाणशब्दस्य कोर्थः ? भावकर्तृकरणत्वोपपत्तेः प्रमाणशब्दस्येच्छातोर्थाध्यवसायः ॥ १ ॥ अयं प्रमाणशब्दः, भावे कर्तरि करणे च वर्तते । तत्र भावे, तावत्प्रमेयार्थं प्रति निवृत्तव्यापारस्य तत्त्वकथनात् प्रमाणमिति । कर्तरि प्रमेयार्थं प्रति प्रमातृत्वशक्तिपरिणतस्याश्रितत्वात् तत् प्रमिणोति प्रमेयमिति प्रमाणं । करणे प्रमातृप्रमेययोः प्रमाणप्रमेययोश्च स्यादन्यत्वात् प्रमिणोत्यनेनेति प्रमाणं ।

अनवस्थेति चेन्न दृष्टत्वात्प्रदीपवत् ॥ २ ॥ स्यान्मतमिदमिह संप्रधार्यं । प्रमाणसिद्धिः परतो वा स्यात्स्वत एव वेति ? । यदि यथा प्रमेयसिद्धिः प्रमाणाधीना एवं प्रमाणसिद्धिरपि प्रमाणांतराधीनेति; तस्याप्यन्यत् तस्याप्यन्यदित्यनवस्था । अथ स्वत एव सिद्धिः । एवमपि यथा प्रमाणस्य स्वत एव सिद्धिस्तथा प्रमेयस्यापि प्रमेयात्मन एव सिद्धिरिति, प्रमाणव्यवस्थाकल्पना न घटते । इच्छामात्रविशेषहेतुवचनं चेति । तन्न किं कारणं दृष्टत्वात्प्रदीपवत् । दृष्टो हि प्रदीपो, घटादीनां प्रकाशकः स्वस्य च । तथा प्रमाणमपि इति । अथवायमपरोर्थः यदि भावकर्तृकरणानामन्यतमसाधनः प्रमाणशब्दः, अनवस्था प्राप्नोति नह्येकस्मिन्नर्थात्मनि विरुद्धशक्त्यवस्थानमिति । तन्न किं कारणं ? दृष्टत्वात्, प्रदीपवत् । यथैकस्य प्रदीपस्य, प्रदीपनं, प्रदीपयति, प्रदीप्यतेनेनेति वा, भावादिशक्त्यविरोधः । तथा प्रमाणस्यापि, इति ।

इतरथा हि प्रमाणव्यपदेशाभावः ॥ ३ ॥ यदि प्रमाणं स्वस्याप्रकाशकं स्यात्, परसंवेद्यत्वात्, अस्य प्रमाणव्यपदेशो न स्यात् ।

विषयज्ञानतद्विज्ञानयोरविशेषः ॥ ४ ॥ विषयाकारपरिच्छेदात्मनि ज्ञाने, यदि स्वाकारपरिच्छेदो न स्यात्, तद्विषये विज्ञाने विषयाकाररूपतैवेति तयोरविशेषः स्यात् ।

स्मृत्यभावप्रसंगश्च ॥ ५ ॥ न ह्यनुपलब्धपूर्वेऽर्थे स एवायमिति स्मृतिर्भवति । यदि च विज्ञानं स्वात्मानं न विजानीयादुत्तरकालमनधिगतस्वात्मविज्ञानः कथं ब्रूयात्? ज्ञोऽहमिति । ततः स्मृतेरभावः स्यात् ।

फलाभाव इति चेन्नाऽर्थावबोधे प्रीतिदर्शनात् ॥ ६ ॥ स्यादेतद्भावसाधने प्रमाणे प्रमैव प्रमाणमिति; न फलमन्यदुपलभ्यत इति फलाभाव इति। तन्न किं कारणं ?, अर्थावबोधे प्रीतिदर्शनात्। ज्ञस्वभावस्यात्मनः कर्ममलीमसस्य करणालंबनादर्थनिश्चये प्रीतिरुपजायते सा फलमित्युच्यते ।

उपेक्षाऽज्ञाननाशो वा ॥ ७ ॥ रागद्वेषयोरप्रणिधानमुपेक्षा अज्ञाननाशो वा फलमित्युच्यते ।

ज्ञातृप्रमाणयोरन्यत्वमिति चेन्नाऽज्ञत्वप्रसंगात् ॥ ८ ॥ स्यान्मतं प्रमिणोत्यात्मानं परं वा प्रमाणमिति कर्तृसाधनत्वमयुक्तं, यस्मादन्यत्प्रमाणं ज्ञानं. स च गुणः । अन्यश्च प्रमाताऽऽत्मा, स च गुणी । गुणिगुणयोश्चाऽन्यत्वं द्रव्यरूपवत् । तथाचात्मेंद्रियमनोऽर्थसन्निकर्षाद्यन्निष्पद्यते, तदन्यदिति वचनात् , अन्यत्प्रमाणमन्यः प्रमाता । ततः करणसाधनत्वमेव युक्तमिति । तन्न किं कारणमज्ञत्वप्रसंगात् । यदि ज्ञास्वभाव- आत्मा तस्याऽज्ञत्वं प्राप्नोति । घटवत् ।

ज्ञानयोगादिति चेन्नाऽतत्स्वभावत्वे ज्ञातृत्वाभावोऽन्धप्रदीपसंयोगवत् ॥ ९ ॥ स्यादेतज्ज्ञानयोगाज्ज्ञातृत्वं भवतीति । तन्न किं कारणमतत्स्वभावत्वे ज्ञातृत्वाभावः । कथं ? अंधप्रदीपसंयोगवत् । यथा जात्यंधस्य प्रदीपसंयोगेपि न दृष्टृत्वं । तथा ज्ञानयोगेपि अज्ञस्वभावस्यात्मनो न ज्ञातृत्वं ।

प्रमाणप्रमेययोरन्यत्वमिति चेन्नानवस्थानात् ॥ १० ॥ स्यान्मतं अन्यत् प्रमाणमन्यत्प्रमेयं । कुतः ? लक्षणभेदात् , दीपघटवत् इति । तन्न किं कारणमनवस्थानात् । यदि यथा बाह्यात्प्रमेयाकारात्प्रमाणमन्यत्तथाभ्यंतरप्रमेयाकारादन्यत्स्यात् ।

अनवस्थाऽस्य स्यात्प्रकाशवदिति चेन्न प्रतिज्ञाहानेः ॥ ११ ॥ तत्रैनत्स्यात् नानवस्थादोषः । कथं ? प्रकाशवत् । यथा प्रकाशस्य घटादीनामात्मनश्च प्रकाशस्य नानवस्थादोषः एवमिहापीति । तन्न किं कारणं प्रतिज्ञाहानेः । प्रकाशो हि स्वात्मनो स्वपरप्रकाशने समर्थः प्रदर्श्यमानः प्रमाणप्रमेययोरन्यत्वप्रतिज्ञां हापयति ।

अनन्यत्वमेवेति चेन्नोभयाभावप्रसंगात् ॥ १२ ॥ यद्यन्यत्वे दोषोऽनन्यत्वं। तर्हि ज्ञातृप्रमाणयोः प्रमाणप्रमेययोश्चेति । तन्न किं कारणं उभयाभावप्रसंगात् । यदि ज्ञातुरन्यत्प्रमाणं, प्रमाणाच्च प्रमेयं, अन्यतराभावे तदविनाभाविनोऽवशिष्टस्याप्यभाव इत्युभयाभावप्रसंगः । कथं तर्हि सिद्धिः ?—

अनेकांतात्सिद्धिः ॥ १३ ॥ स्यादन्यत्वं स्यादनन्यत्वमित्यादि । संज्ञालक्षणादिभेदात्स्यादन्यत्वं । व्यतिरेकेणानुपलब्धेः स्यादनन्यत्वमित्यादि । ततः सिद्धमेतत्प्रमेयं, नियमात्प्रमेयं । प्रमाणं तु स्यात्प्रमाणं स्यात्प्रमेयमिति ।

वक्ष्यमाणभेदापेक्षया द्वित्वनिर्देशः ॥ १४ ॥ आद्ये परोक्षं प्रत्यक्षमन्यदिति, वक्ष्यते । तदपेक्षया प्रमाणे इति. द्वित्वनिर्देशः क्रियते ।

तद्वचनं सन्निकर्षादिनिवृत्त्यर्थं ॥ १५ ॥ तन्मत्यादि ज्ञानं वर्णितं, प्रमाणव्यपदेशं लभते न सन्निकर्षादीनि । अथ सन्निकर्षादेः प्रमाणत्वे को दोषः ?—

सन्निकर्षे प्रमाणे सकलपदार्थपरिच्छेदाभावस्तदभावात् ॥ १६ ॥ यस्य मतं सन्निकर्षः प्रमाणं, अर्थाधिगमः फलमिति, तस्य सकलपदार्थपरिच्छेदो नास्ति। कुतः, ? तदभावात्तस्य सन्निकर्षस्याभावात्। कथं ? इति चेदुच्यते—येन केनचित्सर्वज्ञेन भवितव्यं । तस्यार्थपरिच्छेदहेतुर्यदि सन्निकर्षः ?, स चतुष्टयत्रयद्वयविषयः स्यात् । तत्र चतुष्टयविषयस्त्रयविषयश्च न संभवति । मनस इंद्रियाणां चाऽयुगपत्प्रवृत्तित्वात्[१], प्रतिनियतविषयत्वाच्च । अनंतो हि ज्ञेयस्त्रिकालविषयः, सूक्ष्मांतरितविप्रकृष्टरूपः, स कथमिह तैः सन्निकृष्यते ?

---

१ मनस इंद्रियाणां वा युगपदप्रवृत्तित्वात्, इत्यपि ग. पुस्तके पाठः ।

असन्निकृष्टे, न तत्फलमवबोधः प्रवर्तते। अतः सर्वज्ञाभावः स्यात्। तत एव द्वयसंनिकर्षोपि न भवति।

सर्वगतत्वादात्मनः सकलेनार्थेन संनिकर्ष इति चेन्न तस्य परीक्षायामनुपपत्तेः ॥ १७॥ यदि हि सर्वगत आत्मा स्यात्, तस्य क्रियाभावात्पुण्यपापयोः कर्तृत्वाभावे तत्पूर्वकसंसारस्तदुपरतिरूपश्च मोक्षो न योक्ष्यते इति। करणग्रामस्य संसार इति चेन्न तस्याचेतनत्वात्, तस्यैव मोक्षप्रसक्तेश्च।

सर्वेंद्रियसंनिकर्षाभावश्च चक्षुर्मनसोः प्राप्यकारित्वाभावात् ॥ १८ ॥ सर्वेंद्रियविषयः संनिकर्षो न संभवति। प्राप्यकारित्वाभावश्चोपरिष्टाद्वक्ष्यते।

सर्वथा ग्रहणप्रसंगश्च सर्वात्मना संनिकृष्टत्वात् ॥१९॥ यानींद्रियाणि प्राप्यकारीणि, तैरपि सर्वथार्थस्य ग्रहणं प्राप्नोति कुतः सर्वात्मना सनिकृष्टत्वात्।

तत्फलस्य साधारणत्वप्रसंगः स्त्रीपुरुषसंयोगवत् ॥ २० ॥ तस्य संनिकर्षस्य प्रमाणस्य, यत्फलमर्थावबोधनं, तेन च साधारणेन भवितव्यं। कथं? स्त्रीपुरुषसंयोगवत्। यथा स्त्रीपुरुषसंयोगजं सुखमुभयोरपि साधारणं। तथेंद्रियाणां मनसोर्थस्य भावबोधनं प्राप्नोति।

शय्यावदिति चेन्नाचेतनत्वात् ॥ २१ ॥ स्यान्मतं यथा शय्यादीनां, पुरुषस्य च, संयोगे साधारणेपि, तत्फलं सुखं न शय्यादीनां भवति। किं तर्हि पुरुषस्यैवेति। तथेहापीति। तन्न किं कारणं अचेतनत्वात्, अचेतनानां शय्यादीनां सत्यपि संयोगे, सुखं न भवति।

इहापि तत एवेति चेन्नाविशेषात् ॥ २२ ॥ स्यादेतन्मनःप्रभृतीनां, सत्यपि संनिकर्षे, न तत्फलमवबोधनं भवति कुतः। अचेतनत्वादेवेति। तन्न किं कारणमविशेषात्, अज्ञस्वभावत्वं तावत्सर्वेषामात्मादीनामविशिष्टं, तत्र किं कृतोयं विशेषः। संनिकर्षफलमवबोधनमर्थांतरभूतमपि, सदात्मनैव संबध्यते। न मनःप्रभृतिभिरिति। ज्ञस्वभावत्वे चात्मनः प्रतिज्ञाहानिः।

समवायादिति चेन्नाविशेषात् ॥ २३ ॥ स्यादेतत्समवायो नामायुतसिद्धिलक्षणः, संबंधोस्ति। तत्कृतोय विशेष इति तन्न। किं कारण? अविशेषात्। समवायो हि सर्वगतः, ज्ञभावशून्यत्वे समानेपि, आत्मनैव ज्ञानं योजयति, न मनः प्रभृतिभिरिति वचनं, न विपश्चिन्मनः प्रीतिकरं। एवमिंद्रियेपि योज्यं।

अनुमानौपम्ययोरनुमानागमयोरनुमानप्रत्यक्षयोरौपम्यप्रत्यक्षयोरौपम्यागमयोरागमप्रत्यक्षयोः प्रत्यक्षपरोक्षयोश्च विपर्ययप्रसंगे मत्यादीनामविशेषेण प्रमाणद्वयासक्तेरवधारणार्थमाह—

आद्ये परोक्षं ॥ ११ ॥

आदिशब्दस्यानेकार्थवृत्तित्वे विवक्षातः प्राथम्यार्थसंग्रहः ॥ १ ॥ अयमादिशब्दोनेकार्थवृत्तिः, क्वचित्प्राथम्ये वर्तते। अकारादयो वर्णा, ऋषभादयस्तीर्थकरा, इति। क्वचित्प्रकारे 'भुजंगादयः परिहर्तव्या, इति। क्वचिद्व्यवस्थायां, सर्वादि' सर्वनामेति'। क्वचित्सामीप्ये 'नद्यादीनि क्षेत्राणीति। क्वचिदवयवे, 'टिदादिरिति'। तत्रेहादिशब्दस्य विवक्षातः प्राथम्यार्थो वेदितव्यः। आदौ भवमाद्यं, किं पुनस्तत्? मतिः श्रुतं च।

श्रुताग्रहणमप्रथमत्वात् ॥२॥ श्रुतस्य ग्रहणं न प्राप्नोति। कुतः? अप्रथमत्वात्, नहि सूत्रे श्रुतं प्रथमं

उत्तरापेक्षयादित्वमिति चेन्नातिप्रसंगात् ॥ ३ ॥ स्यान्मतं अवध्याद्युत्तरमपेक्ष्य, श्रुतस्यादित्वमिति। तन्न किं कारणं? अतिप्रसंगात्। उत्तरमपेक्ष्य, यद्यादित्वं कल्प्यते, केवलं व्युदस्य, सर्वस्यादित्वं प्राप्नोति?

द्वित्वनिर्देशादितिचेन्न तदवस्थत्वात् ॥ ४ ॥ स्यादेतद् द्वित्वनिर्देशेन, सर्वग्रहणं न भवति। अतो नातिप्रसंग इति। तन्न किं कारणं? तदवस्थत्वात्, एवमप्यतिप्रसंग एव भवति। कयोर्द्वयो ग्रहणमिति?

न वा प्रत्यासत्तेः श्रुतग्रहणं ॥ ५ ॥ न वैषदोषः किं कारणं? प्रत्यासतेः श्रुतग्रहणं भवति। द्वित्वनिर्देशाद्गृह्यमाणं यदाद्यस्य प्रत्यासन्नं, तदेव गृह्यते। तस्य हि सामीप्यादौपचारिकं प्राथम्यमस्तीति तथासामीप्यश्रुतेरर्थाच्च।

उपात्तानुपात्तपरप्राधान्यादवगमः परोक्षं ॥ ६ ॥ उपात्तानींद्रियाणि, मनश्च। अनुपात्तं प्रकाशो पदेशादि, तत्प्राधान्यादवगमः परोक्षं। यथा गतिशक्त्योपेतस्यापि स्वयमेव गंतुमसमर्थस्य यष्ट्याद्यवलंबन-प्राधान्यं गमनं। तथा मतिश्रुतावरणक्षयोपशमे सति ज्ञस्वभावस्यात्मनः स्वयमेवार्थानुपलब्धुमसमर्थस्य पूर्वोक्तप्रत्ययप्रधानं ज्ञानं, परायत्तत्वात्तदुभयं परोक्षमित्युच्यते।

अत एव प्रमाणत्वाभाव इत्यनुपालंभः ॥ ७ ॥ अत्राऽन्ये उपालभंते। परोक्षं प्रमाणं न भवति, प्रमीयतेऽनेनेति हि प्रमाणं, नच परोक्षेण किंचित्प्रमीयते परोक्षत्वादेवेति सोऽनुपालंभः। कुतः ? अत एव यस्मात्, परायत्तं परोक्षं इत्युच्यते नानवबोध इति ॥

अभिहितलक्षणात्परोक्षादितरस्य सर्वस्य प्रत्यक्षत्वप्रतिपादनार्थमाह—

प्रत्यक्षमन्यत् ॥ १२ ॥

अन्यत्त्रिविधं प्रत्यक्षमित्युच्यते। किमिदं प्रत्यक्षं नाम ?

इंद्रियानिंद्रियानपेक्षमतीतव्यभिचारं साकारग्रहणं प्रत्यक्षं ॥ १ ॥ इंद्रियाणि चक्षुरादीनि पंच, अनिंद्रियं मनः, तेष्वपेक्षा यस्य न विद्यते। 'अतस्मिंस्तदिति ज्ञानं व्यभिचारः' सोऽतीतोस्य। आकारो विकल्पः यत्सहाकारेण वर्तते तत्प्रत्यक्षमित्युच्यते। इंद्रियानिंद्रियानपेक्षमिति विशेषणं मतिश्रुतनिवृत्त्यर्थं। अतीतव्यभिचारमित्येनद्विभंगज्ञाननिवृत्त्यर्थं। तद्धि मिथ्यादर्शनोदयाद् व्यभिचरतीति। साकारग्रहणमित्येत दवधिकेवलदर्शनव्युदासार्थं। अनाकारं हि तदिति। किं गतमेतदियतासूत्रेण ? आहोस्विदेवं वक्तव्यमिति गतं प्रतिपन्नं कथमिति चेदुच्यते—

अक्षं प्रतिनियतमिति परापेक्षानिवृत्तिः ॥ २ ॥ अक्ष्णोति व्याप्नोति जानातीति, अक्ष आत्मा, प्राप्तक्षयोपशमः। प्रक्षीणावरणे वा तमेव प्रतिनियतं प्रत्यक्षमिति, विग्रहात्परापेक्षानिवृत्तिः कृता भवति।

अधिकारादनाकारव्यभिचारव्युदासः ॥ ३ ॥ अधिकृतमेतज्ज्ञानं, सम्यक्, इति च, ततोऽ-नाकारस्य दर्शनस्य, व्यभिचारिणो ज्ञानस्य, च व्युदासः कृतो भवति।

करणात्यये ग्रहणाभाव इतिचेन्न दृष्टत्वादीशवत् ॥ ४ ॥ स्यादेतत्करणात्ययेऽर्थस्य ग्रहणं न प्राप्नोति। नह्यकरणस्य कस्यापि ज्ञानं दृष्टमिति। तन्न किं कारणं ? दृष्टत्वात्। कथं ?, ईशवत्। यथा रथस्य कर्ता अनीशः, उपकरणापेक्षो रथं करोति। स तदभावे न शक्यः। यः पुनरीशः, तपोविशेषात्परिप्राप्तर्द्धि-विशेषः। स बाह्योपकरणगुणानपेक्षः स्वशक्त्यैव रथं निर्वर्तयन् प्रतीतः। तथा कर्ममलीमस आत्मा, क्षायो-पशमिकेंद्रियानिंद्रियप्रकाशाद्युपकरणापेक्षोऽर्थान् संवेत्ति। स एव पुनः क्षयोपशमविशेषे क्षये च सति करणानपेक्षः स्वशक्त्यैवार्थान्वेत्ति। इति को विरोधः ?

ज्ञानदर्शनस्वभावत्वाच्च भास्करादिवत् ॥ ५ ॥ यथा भास्करादयः, प्रकाशस्वभावत्वात्प्रका-शांतरानपेक्षाः, प्रकाश्यानर्थान्प्रकाशयंति। तथा ज्ञानदर्शनस्वभाव आत्मा, तदावरणक्षयक्षयोपशमविशेषे सति, स्वशक्त्यैवार्थानाविष्करोतीति सिद्धं।

इंद्रियनिमित्तं ज्ञानं प्रत्यक्षं तद्विपरीतं परोक्षमित्यविसंवादिलक्षणमिति चेन्नाप्तस्य प्रत्य-क्षाभावप्रसंगात् ॥ ६ ॥ स्यान्मतमिंद्रियव्यापारजनितं ज्ञानं प्रत्यक्षं, व्यतीतेंद्रियविषयव्यापारं परोक्षमि-त्येतदविसंवादिलक्षणं। तथाचोक्तं।

प्रत्यक्षं कल्पनापोढं नामजात्यादियोजना। असाधारणहेतुत्वादक्षैस्तद्व्यपदिश्यते ॥

इंद्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यं, अव्यभिचारि व्यवसायात्मकमात्मेंद्रियमनोर्थसंनिकर्षाद्यन्निष्पद्यते तदन्यच्छ्रोत्रादिवृत्ति प्रत्यक्षं। सत्संप्रयोगे पुरुषस्येंद्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति वा। तत्प्रत्यक्षमिति च सर्वैरभ्युपगम्यते। अतएव तल्लक्षणमविसंवादि निश्चेतव्यमिति। तन्न किं कारणमाप्तस्य प्रत्यक्षाभावप्रसंगात्।

यदींद्रियनिमित्तमेव ज्ञानं प्रत्यक्षमिष्यते, एवं सत्यासस्य प्रत्यक्षज्ञानं न स्यात् । न हि तस्येंद्रियपूर्वोर्थाधिगमः। अथ तस्यापि करणपूर्वकमेव ज्ञानं कल्प्यते ? तस्यासर्वज्ञत्वं पुरस्तादुक्तं ।

आगमादिति चेन्न तस्य प्रत्यक्षज्ञानपूर्वकत्वात् ॥ ७॥ स्यादेतदागमादतींद्रियार्थाधिगमे व्याहतशक्तेः सर्वार्थावबोध इति। तन्न किं कारणं? तस्य प्रत्यक्षज्ञानपूर्वकत्वात्। आप्तेन हि क्षीणदोषेण, प्रत्यक्षज्ञानेन प्रणीत आगमो भवति न सर्वः । यदि सर्वः स्यात् ? अविशेषः स्यात्। स च नास्तीत्यागमस्य प्रमाणाभावः।

अपौरुषेयादिति चेन्न तदसिद्धेः ॥ ८ ॥ स्यादेतदपौरुषेय आगमोस्ति, अनादिनिधनोऽत्यंतपरोक्षेष्वप्यर्थेष्वप्रतिहतगतिस्ततः सर्वार्थाधिगमः इति। तन्न किं कारणं? तदसिद्धेः। न च कश्चिदागमोऽपौरुषेयः सिद्धोस्ति, हिंसादिविधायिनः प्रामाण्यासिद्धेः ।

अतींद्रियं योगिप्रत्यक्षमिति चेन्नार्थाभावात् ॥ ९ ॥ स्यान्मतं योगिनोऽतींद्रियं प्रत्यक्षं ज्ञानमस्ति आगमविकल्पातीतं। तेनासौ सर्वार्थान् प्रत्यक्ष वेत्ति। उक्तं च—योगिनां गुरुनिर्देशाद्यतिभिन्नार्थमात्रदृक् इति । तन्न किं कारणं? अर्थाभावात्। अक्षमक्षं प्रति वर्तते इति प्रत्यक्षं। नचायमर्थो योगिनि विद्यते-अक्षाभावात्। अथवा न संति सर्वे भावाः, स्वपरोभयहेत्वहेतुभ्य उत्पत्त्याद्यभावात्। सामान्यविशेषाश्चैकानेकयोर्वृत्त्यसंभवादिदोषोपपत्तेः । अतोर्थाभावान्निरालंबनं योगिनो ज्ञानं कथं स्यात् ? । परिकल्पितात्मना न संति भावा निर्विकल्पात्मना संतीति चायुक्तं। तदधिगमोपायाभावात्। न हि निर्विकल्पोर्थोस्ति। तद्विषयं ज्ञानं चेति प्रतिपादयितुं शक्यं । लक्षणाभावात् ।

तदभावाच्च ॥ १० ॥ तस्य योगिनोभावाच्च। न हि कश्चित्तत्परिकल्पितो योगी विद्यते विशेषलक्षणविरहात्, सर्वविरहाच्च । निर्वाणप्राप्तौ तत्रैतत्स्यात्, निर्वाणं द्विविधं, सोपधिविशेषं, निरुपाधिविशेषं चेति। तत्र सोपधिविशेषे निर्वाणे बोद्धास्तीति। तत्रापि यथा बाह्यस्याभावः कल्प्यतेः, तथाभ्यंतरस्यापीति बोद्धुरभाव-एव । योगजधर्मानुग्रहादात्मा करणविरहितोप्यवैतीति चेन्न। तस्य निःक्रियस्य नित्यस्य सततस्तक्रियातदनुग्रहविकाराभावात् ।

तल्लक्षणानुपपत्तिश्च स्ववचनव्याघातात् ॥ ११॥ तस्य प्रत्यक्षस्योक्तलक्षणमपि नोपपद्यते, कुतः? स्ववचनव्याघातात् । अन्यापोहकप्रतिविहितान्येवाशेषप्रमाणलक्षणानि। ततस्तत्र नो नातितरां प्रतिविधानादरः। किं तु तत्प्रमाणलक्षणगुणसभावनातिरस्कारार्थं किंचिद्व्याप्रियामहे। यदुक्तं कल्पनापोढं प्रत्यक्षमिति । कल्पना हि जातिद्रव्यगुणक्रियापरिभाषाकृतो वाग्बुद्धिविकल्पस्ततोऽपोढ । किं तत् ? सर्वथाकल्पनापोढं, उताहो कथंचिदिति ? यदि सर्वथास्ति प्रमाणं ज्ञानं कल्पनापोढमित्येवमादि कल्पनाभ्योप्यपोढमित्यस्यादिवचनव्याघातः । अथास्यादिकल्पनाभ्योऽनपोढमिष्यते सर्वथाकल्पनापोढमिति वचनव्याघातः । अथ कथंचित्कल्पनापोढं, एकांतवादत्यागात् पुनरपि स्ववचनव्याघात एव । अथ मतं नास्माकमेकांतः कल्पनापोढमेवेति । किमर्थं तर्हि विशेषणं!, परमतापेक्षं विशेषणं। परमते हि नामजात्यादिभेदोपचारकल्पना प्रोक्ता। ततोपोढं न स्वविकल्पादिति । उक्तंच

सवितर्कविचारा हि पंच विज्ञानधातवः । निरूपणानुस्मरणविकल्पेनाविकल्पका इति

अत्रोच्यते—आलंबने वितर्कस्तत्रैवानुमर्शनं विचारस्तस्य नामादिभिः प्रकल्पना निरूपणं। पूर्वानुभूतानुसारेण विकल्पनमनुस्मरणमित्येते धर्माः क्षणमात्रावस्थानेष्वक्षविषयविज्ञानेषु निरन्वयेषु नोपपद्यंते । युगपदुत्पत्तेरनवस्थानाच्च, अतो ग्राह्यग्रहणभावाभावश्च स्यात् । सव्येतरगोविषाणवत्। क्रमवृत्तित्वे च तेषां स्वार्थाभावप्रसंगश्चेति। संतनाद्यपेक्षया तदुपपत्तिरिति चेन्न। तत्परीक्षाक्षमत्वात्। अतः सर्वस्मिन्नसति विकल्पे, अयं विकल्पोस्त्ययं नास्तीति विज्ञानस्य विवेको नोपपद्यते। सर्वविकल्पविरहाच्च नास्तित्वमेवास्य स्यात्। अनुस्मरणाद्यभ्युपगमे चैकस्यानेकक्षणवर्तिनो वस्तुनोस्तित्वं सिद्धं। अनुस्मरणादि हि स्वयमनुभूतस्यार्थस्य दृष्टं नाननुभूतस्य नान्यानुभूतस्येति । तथा मानसमपि प्रत्यक्षं नोपपद्यते । अपि च षण्णामनंतरातीतं विज्ञानं यद्वि

तन्मनः इत्यतीतमसत्कथं विज्ञानस्य कारणं स्यात्। अथ पूर्वोत्तरनाशोत्पत्त्योर्युगपद्वृत्तेः कार्यकारणभावः कल्प्यते। भिन्नसंतानयोरपि विनश्यदुत्पद्यमानयोः कार्यकारणभावः स्यात्। एकसंताने शक्त्यनुगमाभ्युपगमे प्रतिज्ञाहानिश्च स्यात्।

अपूर्वाधिगमलक्षणानुपपत्तिश्च सर्वस्य ज्ञानस्य प्रमाणत्वोपपत्तेः ॥ १२ ॥ अपूर्वाधिगमलक्षणं प्रमाणमित्येतच्च नोपपद्यते। कुतः? सर्वस्य ज्ञानस्य प्रमाणत्वोपपत्तेः। प्रमीयतेऽनेनेति प्रमाणं। सर्वेण च ज्ञानेन प्रमीयते। यथांधकारेऽवस्थितानामुत्पत्त्यनंतरं प्रकाशकः प्रदीप, उत्तरकालमपि न तं व्यपदेशं जहाति, तदवस्थानकारणत्वात्। एवं ज्ञानमुत्पत्त्यनंतरं घटादीनामवभासकं भूत्वा प्रमाणत्वमनुभूयोत्तरकालमपि न तं व्यपदेशं त्यजति, तदर्थत्वात्। अथ मतं क्षणे क्षणेऽन्य एव प्रदीपोऽपूर्वमेव प्रकाशकत्वमवलंवत इति। एवं सति ज्ञानमपि तादृगेवेति, क्षणे क्षणेऽन्यत्वोपपत्तेरपूर्वाधिगमलक्षणमविशिष्टमिति। तत्र यदुक्तं स्मृतीच्छाद्वेषादिवत् पूर्वाधिगतविषयत्वात् पुनः पुनरभिधानं ज्ञानं प्रमाणमिति तद्व्याहन्यते।

स्वसंवित्तिफलानुपपत्तिश्चाऽर्थांतरत्वाभावात् ॥ १३ ॥ प्रमाणं लोके फलवदुपलब्धं। अत्र च प्रमाणस्य केनचित्फलेन भवितव्यमिति। कश्चिदाह—स्वाभासं हि ज्ञानमुत्पद्यते, स्वाभास विषयाभासं च। तस्योभयाभासस्य यत्संवेदनं तत्फलमिति। तन्नोपपद्यते, कुतः? अर्थांतरत्वाभावात्। लोके प्रमाणात् फलमर्थांतरभूतमुपगम्यते। तद्यथा-छेत्तृछेत्तव्यछेदनसन्निधाने द्वैधीभावः फलं। नच तथा स्वसंवेदनमर्थांतरभूतमस्ति। तस्मादस्य फलत्वं नोपपद्यते सत्यमेवमेतत्। अत एव तस्मिन्नधिगमरूपे फले सव्यापारप्रतीततामुपधाय प्रमाणोपचार इति।

प्रमाणोपचारानुपपत्तिर्मुख्याभावात् ॥१४॥ सति मुख्ये लोके उपचारो दृश्यते। यथा सति सिंहे विशिष्टतिर्यग्जातिपंचेंद्रियजातिनखदंष्ट्रासटाटोपभासुरकपिलनयनतारकाद्यवयवविशिष्टेऽन्यत्रक्रौर्यशौर्यादिगुणसाधर्म्यात्सिंहोपचारः क्रियते। नच तथेह मुख्यं प्रमाणमस्ति तदभावात्फले प्रमाणोपचारो न युज्यते।

आकारभेदाद्भेद इति चेन्नैकांतवादत्यागात् ॥ १५ ॥ स्यादेतद्ग्राहकविषयाभाससंवित्तिशक्तित्रयाकारभेदात्प्रमाणप्रमेयफलकल्पनाभेद इति। तन्न किं कारणमेकांतवादत्यागात्। एकमनेकाकारमित्येतज्जिनेंद्रदर्शनं, तत्कथमेकांतवादे युज्यते?। यदि ह्येवमभ्युपगम्येत, द्रव्ये कोऽपरितोषः?, रूपाद्यनेकात्मकमेकं परमाणुद्रव्यं, ज्ञानाद्यनेकात्मकमात्मद्रव्यमिति। अथ द्रव्यसिद्धिर्माभूदिति आकारा एव, न ज्ञानमिति कल्प्यते। एवं सति कस्य ते आकारा? इति तेषामप्यभावः स्यात्। किंच तेषामाकाराणां यौगपद्येन वा उत्पत्तिःस्यात्? क्रमेण वा? यदि यौगपद्येम, हेतुहेतुमद्भावो विरुध्यते। अथ क्रमेण, क्षणिकस्य विज्ञानस्याकाराणां, कथं क्रमः?, यदि स्यात्?, अधिगमश्चात्र न भावांतरमिति व्याहन्यते। अपि च बाह्यस्य विज्ञेयस्याभावे, अतरंगाकारत्रयकल्पनायां, प्रमाणप्रमाणाभासौ नोपपद्येते। अंतरंगाकारभेदादसद्वस्तु यत्सदिति कल्पयति, तत्प्रमाणाभासं। असदेवेति यत्प्रतिपाद्यते तत्प्रमाणं इत्यस्ति विशेष। इति चेत्प्रमेयद्वयव्यवस्थापितप्रमाणद्वयकल्पनाव्याघातः। स्वलक्षणविषयं हि प्रत्यक्षं। सामान्यलक्षणविषयमनुमानं। स्वलक्षणमसाधारणोधर्मः विकल्पातीतत्वादिदं तदित्यव्यपदेश्यः। तद्विपरीतं सामान्यलक्षणमिति, सर्वस्यासत्त्वे किं कृतोयं विशेषः? असत्वं हि न स्वतो भिद्यते संबंधिभेदात्स्याद्भेदः घटस्यासत्वं पटस्यासत्वमिति, तेषां घटादीनां संबंधिनामभावे तद्विशेषाभाव इति। स्यान्मतं खात्पतिता नो रत्नवृष्टिरिष्टमेवाप्रतर्कितमुपस्थितं अत एव सर्वं विज्ञानाभिधानमयथार्थं परिकल्पितार्थत्वान्निर्विकल्पार्थगोचरमात्मीयमेव विज्ञानप्रमाणमिति। उक्तंच—

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते। अनागमविकल्पा हि स्वयं विद्या प्रवर्तत इति ॥

एतच्चानुपपन्नं तदधिगमोपायाभावात्। उक्तंच—

प्रत्यक्षबुद्धिः क्रमते न यत्र तल्लिंगगम्यं न तदर्थलिंगं।
वाचो न वा तद्विषयेण योगः का तद्गतिः कष्टमश्रृण्वतस्ते ॥

इत्याहितोभयप्रकारस्य प्रमाणस्य आदिप्रकारविशेषप्रतिपत्त्यर्थमाह—

मतिः स्मृतिः संज्ञा चिंताभिनिबोध इत्यनर्थांतरं ॥ १३ ॥

इति शब्दस्यानेकार्थसंभवे विवक्षावशादाद्यर्थसंप्रत्ययः ॥ १ ॥ इति शब्दोनेकार्थः संभवति। क्वचिद्धेतौ वर्तते, 'हतीति पलायते' 'वर्षतीति धावति' क्वचिदेवमित्यस्यार्थे वर्तते, इति स्म उपाध्यायः। कथयत्येवं स्म इति गम्यते। क्वचित्प्रकारे वर्तते, यथा 'गौरश्वः शुक्लो नीलः, चरति प्लवते जिनदत्तो देवदत्त इति' एवं प्रकारा इत्यर्थः। क्वचिद्व्यवस्थायां वर्तते, यथा 'ज्वलितिकसंताण्णः, इति। क्वचिदर्थविपर्यासे वर्तते। यथा 'गौरित्ययमाह, गौरिति जानीत इति,। क्वचित्समाप्तौ वर्तते इति 'प्रथममाह्निकमिति'। द्वितीयमाह्निकमिति। क्वचिच्छब्दप्रादुर्भावे वर्तते इति, श्रीदत्तमिति सिद्धसेनमिति। तत्रेह विवक्षावशादादिशब्दार्थो वेदितव्यः। मतिः स्मृतिः संज्ञा चिंताभिनिबोधादयः इत्यर्थः। के पुनस्ते प्रतिभाबुद्ध्युपलब्ध्यादयः। प्रकारे वा एवं प्रकाराः, इति। कथमेषां शब्दानामनर्थांतरत्वं।

मतिज्ञानावरणक्षयोपशमनिमित्तार्थोपलब्धिविषयत्वादनर्थांतरत्वं रूढिवशात् ॥ २ ॥ एतेषां मत्यादीनां शब्दानां मतिज्ञानावरणक्षयोपशमनिमित्तायामर्थोपलब्धौ वृत्तेरनर्थांतरत्वं वेदितव्यं। कथं पुनर्मननं मन्यत इति वा मति इत्येवमाद्यर्थविषयाणामेषामनर्थांतरत्वं?, इत्यत आह, रूढिवशादिति। यथा गच्छतीति गौरित्यर्गीकृतमपि गमनं न शब्दवृत्तिनियमकारणं रूढिवशात्क्वचिदेव वर्तते। तथा मत्यादयः शब्दा व्युत्पत्तिकर्मणि सत्यप्यर्थाश्रयेण भेदे क्वचिदेव वर्तत इत्यनर्थांतरत्वमवसीयते।

शब्दभेदादर्थभेदो गवाश्वादिवदिति चेन्नातः संशयात् ॥ ३ ॥ स्यादेतन्मत्यादीनां शब्दानां परस्परतोर्थांतरत्वमस्ति। कुतः? शब्दभेदात्, गवाश्वादिवदिति। तन्न किं कारणं अतः संशयात्। यत एव मत्यादीनां शब्दभेदादन्यत्वमाह भवान्, अत एव संशयः। कथ?—

इंद्रादिवत् ॥ ४ ॥ यथेंद्रशक्रपुरंदरादिशब्दभेदेपि नार्थभेदः। तथा मत्यादिशब्दभेदेप्यर्थाभेद इति। न हि यत एव संशयस्तत एव निश्चयः। किं च--

शब्दाभेदेप्यर्थैकत्वप्रसंगात् ॥ ५ ॥ यस्य शब्दभेदोर्थभेदे हेतुरिति मतं, तस्य वागादिनवार्थेषु गोशब्दाभेददर्शनाद्वागाद्यर्थानामेकत्वमस्तु। अथ नैतदिष्टं, न तर्हि शब्दभेदोऽन्यत्वस्य हेतुः। किं च--

आदेशवचनात् ॥ ६ ॥ यथेंद्रादीनामेकद्रव्यपर्यायादेशात्स्यादेकत्वं, प्रतिनियतपर्यायार्थादेशाच्च स्यादन्यत्वं, इंदनादिंद्रः, शकनाच्छक्रः, पूर्दारणात्पुरंदर, इति। तथा मत्यादीनामेकद्रव्यपर्यायादेशात्स्यादेकत्वं। प्रतिनियतार्थपर्यायादेशाच्च स्यान्नानात्वं। मननं मतिः। स्मरण स्मृतिः। संज्ञान संज्ञा। चिंतनं चिंता। आभिमुख्येन नियत बोधनमभिनिबोध इति।

पर्यायशब्दो लक्षणं नेति चेन्न ततोऽनन्यत्वात् ॥ ७ ॥ स्यान्मत मत्यादय अभिनिबोधपर्यायशब्दा नाभिनिबोधस्य लक्षणं मनुष्यादिवत्। यथा मनुष्यमर्त्यमनुजमानवादयः पर्यायशब्दाः मनुष्यस्य लक्षणं न भवंति। तन्न किं कारणं ततोऽनन्यत्वात्। इह पर्यायिणोऽनन्यपर्यायशब्दः, स लक्षणं। कथं?

औष्ण्याग्निवत् ॥ ८ ॥ यथा पर्यायशब्दः, औष्ण्यमग्नेः पर्यायिणोऽनन्यत्वादग्नेर्लक्षणं भवति। तथा पर्यायशब्दा मत्यादय आभिनिबोधिकज्ञानपर्यायिणोनन्यत्वेनाभिनिबोधस्य लक्षणं। अथवा ततोऽनन्यत्वात्। यथा मनुष्यमर्त्यमनुजमानवादय असाधारणत्वादन्यघटादिद्रव्यासंबंधिनो मनुष्यादनन्यत्वात्तस्य लक्षणं। अन्यथा हि मनुष्यादिपर्यायालक्षणत्वान्मनुष्याभावो भवेत्, यतो न मनुष्यादिलक्षणव्यतिरेकेणास्यान्यल्लक्षणमस्तीति। नचाभाव इष्ट, अतः पर्यायशब्दो लक्षणं। तथा मतिस्मृत्यादयोऽसाधारणत्वादन्यज्ञानासंभविनोऽभिनिबोधादनन्यत्वात्तल्लक्षणं। इतश्च पर्यायशब्दो लक्षणं। कस्मात्?—

गत्वा प्रत्यागतलक्षणग्रहणात् ॥ ९ ॥ कथं?—

अग्न्युष्णवत् ॥ १० ॥ यथाग्निरिति गत्वा ज्ञात्वा, बुद्धिरुष्णपर्यायशब्दं गच्छति, कोयमग्निः? य उष्ण

इति। उष्ण इति च गत्वा बुद्धिः प्रत्यागच्छति। कोयमुष्णः, ? योग्निरिति । तथा मतिरिति गत्वा बुद्धिः स्मृतिं गच्छति । का मतिः, ? या स्मृतिरिति । ततः स्मृतिरिति, गत्वा बुद्धिः प्रत्यागच्छति का स्मृतिः, ? या मतिरिति । एवमुत्तरेष्वपि । तस्माद्गत्वा प्रत्यागतलक्षणग्रहणात्पश्यामः पर्यायशब्दो लक्षणमिति । किं च—

पर्यायद्वैविध्यादग्निवत् ।। ११ ।। यथाग्नेरात्मभूत उष्णपर्यायो लक्षणं, न धूमः, तस्य बाह्येंधननिमित्तत्वे कादाचित्कत्वात् , तथा आभ्यंतरो मत्यादिपर्याय, आत्मभूतत्वाल्लक्षण, नानात्मभूतो बाह्यो मत्यादिशब्दः पुद्गलः तत्प्रत्यायनसमर्थः, तस्य बाह्यकरणप्रयोगनिमित्तत्वादिति ।

करणस्य वाभिधेयार्थत्वादथवा ।। १२ ।। इति करणोयमभिधेयार्थः प्रयुज्यते । मतिः स्मृतिः संज्ञा चिंताभिनिबोध इति योर्थोभिधीयते, तन्मतिज्ञानमिति । ततो लक्षणत्वमुपपद्यते ।

श्रुतादीनामेतैरनभिधानात् ।। १३ ।। न ह्येतैर्मत्यादिभिः श्रुतादीन्यभिधीयंते ।

वक्ष्यमाणलक्षणसद्भावाच्च ।। १४ ।। श्रुतादीनां हि लक्षणं वक्ष्यते । ततः, तेषां मत्यप्रसंगः । यदेवं लक्षणं मतिज्ञानमवध्रियते अथास्यात्मलाभे किं निमित्तं ?, इत्यत आह—

तदिंद्रियानिंद्रियनिमित्तं ।। १४ ।।

अथवात्मप्रसादाविशेषात्सर्वज्ञानानामेकत्वप्रसंगे, निमित्तभेदान्नानात्वं प्रतिपिपादयिष्यन् ब्रवीति। सत्यपि अमुष्मिन्नविशेषे प्रथक्त्वमेषामवेमः । कुतः ? यस्मात्तदिंद्रियानिंद्रियनिमित्तमिति । किमिदमिंद्रियं नाम ?—

इंद्रस्यात्मनोऽर्थोपलब्धिलिंगमिंद्रियं ।। १ ।। इंद्र आत्मा, तस्य कर्ममलीमसस्य स्वयमर्थान्ग्रहीतुमसमर्थस्याऽर्थोपलंभने यल्लिंगं, तदिंद्रियमित्युच्यते । अथ किमिदमनिंद्रियं ?

अनिंद्रियं मनोऽनुदरावत् ।। २ ।। मनोंऽतःकरणमनिंद्रियमित्युच्यते । कथमिंद्रियप्रतिषेधेन मन उच्यते ?। यथायमब्राह्मण इत्युक्ते ब्राह्मणत्वरहित्वे कस्मिंश्चित्संप्रत्ययो भवति । तथा इंद्रलिंगविरहितेऽन्यस्मिन्ननिंद्रियमिति संप्रत्ययः स्यात् । न तु इंद्रलिंग एव मनसि । नैष दोषः ईषत्प्रतिषेधात् । कथं ? अनुदरावत् यथानुदरा कन्या इति नास्या उदर न विद्यते, किंतु गर्भभारोद्वहनसमर्थोदराभावादनुदरा । तथानिंद्रियमिति नास्येंद्रियत्वाभावः । किंतु चक्षुरादिवत्प्रतिनियतदेशविषयावस्थानाभावादनिंद्रियं मन इत्युच्यते ।

अंतरंगं तत्करणमिंद्रियानपेक्षत्वात् ।। ३ ।। नास्येंद्रियेष्वपेक्षास्तीतींद्रियानपेक्षं । न ह्यस्य गुणदोषविचारस्वविषयप्रवृत्तौ इंद्रियापेक्षास्ति ततोऽनरंगं तत्करणमिति, वेदितव्यं । तदुभयमवष्टभ्य यदुत्पद्यते तन्मतिज्ञानमिति ।

तदित्यग्रहणमनंतरत्वादिति चेन्नोत्तरार्थत्वात् ।। ४ ।। स्यादेतन्मतिज्ञानस्यानंतरत्वादनेनाभिसंबंधो भवतीति तदित्येतद्ग्रहणमनर्थकमिति। तन्न किं कारणमुत्तरार्थत्वात् । उत्तरार्थं ह्येतत्। इतरथा हि अवग्रहेहावायधारणा मतिज्ञानभेदा इति विज्ञातुमशक्याः, तद्ग्रहणे पुनः क्रियमाणे तन्मतिज्ञानमवग्रहादय इति संबंधः सुगमो भवति ।

यदेतस्मिन्निमित्तद्वयसंनिधाने सत्यात्मलाभं प्रत्यागूर्णमनिर्वर्णितभेदमिति, तद्भेदप्रतिपत्त्यर्थमाह—

अवग्रहेहावायधारणाः ।। १५ ।।

विषयविषयिसन्निपातसमनंतरमाद्यग्रहणमवग्रहः ।। १ ।। विषयविषयिसन्निपाते दर्शनं भवति । तदनंतरमर्थस्य ग्रहणमवग्रहः ।

अवगृहीतेर्थे तद्विशेषाकांक्षणमीहा ।। २ ।। यथा पुरुष इत्यवगृहीते, तस्य भाषावयोरूपादिविशेषैराकांक्षणमीहा ।

विशेषनिर्ज्ञानाद्याथात्म्यावगमनमवायः ।। ३ ।। भाषादिविशेषनिर्ज्ञानात्तस्य याथात्म्येनावगमनमवायः । दाक्षिणात्योऽयं, युवा, गौरः, इति वा ।

निर्ज्ञातार्थाऽविस्मृतिर्धारणा ॥ ४ ॥ भाषावयोरूपादिविशेषैर्याथात्म्येन निर्णीतस्य पुरुषस्योत्तरकालं स एवायमित्यविस्मरणं यतो भवति । सा, धारणा । त एते मतिज्ञानभेदाः । **अत्राहेदमानुपूर्व्यं किं कृतमेषां ?**, उच्यते ।

अवग्रहादीनामानुपूर्व्यमुत्पत्तिक्रियापेक्षं ॥ ५ ॥ अवग्रहपूर्वकत्वात् इतरेषामादाववग्रहः क्रियते । तथोत्तरेष्वपि योज्यं । अत्राह—

अवग्रहेहयोरप्रामाण्यं तत्सद्भावेपि संशयदर्शनाच्चक्षुर्वत् ॥ ६ ॥ यथा चक्षुषि न निर्णयः, सत्येव तस्मिन् किमयं स्थाणुराहोस्वित्पुरुष इति संशयदर्शनात्। तथावग्रहेपि सति न निर्णय, ईहादर्शनात्, ईहायां च न निर्णयः, यतो निर्णयार्थमीहा नत्वीहैव निर्णयः । यश्च निर्णयो न भवति, स संशयजातीय इत्यप्रामाण्यमनयोरिति ।

अवग्रहवचनादिति चेन्न संशयानतिवृत्तेरालोचनवत् ॥ ७ ॥ स्यादेतन्नावग्रहः संशयः। कुतोऽवग्रहवचनात्। यत उक्तः पुरुषोयमिति अवग्रहस्तस्य भाषावयोरूपादिविशेषाकांक्षणमीहेति। संशयस्त्वप्रतिपत्तिरेवेति। तन्न किं कारणं ? संशयानतिवृत्तेः। कथं ? आलोचनवत्। यथोर्ध्वार्थालोचने किमयमूर्ध्वोर्थः स्थाणुरुत पुरुष इति संशयानतिवृत्तिः । तथोर्ध्वोयमर्थ इत्यवग्रहे ईहाद्यपेक्षात्वात्संशयानतिवृत्ति । उच्यते–

लक्षणभेदादन्यत्वमग्निजलवत् ॥ ८ ॥ यथाग्निजलयोर्दहनप्रकाशनादिद्रव्यतास्नेहनादिप्रतिनियतलक्षणभेदादन्यत्वं । तथावग्रहसंशययोर्लक्षणभेदादन्यत्वं । कोसौ लक्षणभेद ? उच्यते—

अनेकार्थानिश्चितापर्युदासात्मकः संशयस्तद्विपरीतोऽवग्रहः ॥ ९ ॥ स्थाणुपुरुषाद्यनेकार्थालंबनसन्निधानादनेकार्थात्मकः संशयः । एकपुरुषाद्यन्यतमात्मकोऽवग्रहः । स्थाणुपुरुषानेकधर्मानिश्चितात्मकः संशयः। यतो न स्थाणुधर्मान् पुरुषधर्मांश्च निश्चिनोति । अवग्रहस्तु पुरुषाद्यन्यतमैकधर्मनिश्चयात्मकः । स्थाणुपुरुषानेकधर्माऽपर्युदासात्मकः संशयः । यतो न प्रतिनियतान् स्थाणुपुरुषधर्मान् पर्युदस्यति संशयः । अवग्रहः पुनः पर्युदासात्मकः । तद्यन्यान् भावादीन् पर्यायान् पर्युदस्य, पुरुष इत्येकपर्यायालंबनः ।

संशयतुल्यत्वमपर्युदासादिति चेन्न निर्णयविरोधात् संशयस्य ॥ १० ॥ स्यादेतत्संशयतुल्योऽवग्रहः, कुतः ? अपर्युदासात्। यथा संशयः स्थाणुपुरुषविशेषापर्युदासात्मकः। तथावग्रहोपि पुरुष इति भाषावयोरूपाद्यपर्युदासात्मक.। अतश्चैतदेवं यदुत्तरकाल तद्विशेषार्थमीहामारभत इति । तन्न किं कारणं ! निर्णयनिरोधात्, संशयस्य। संशयो हि निर्णयविरोधी, नत्ववग्रहः ।

निर्णयदर्शनादीहायां तत्प्रसंग इति चेन्नार्थादानात् ॥ ११ ॥ स्यादेतद्यदि निर्णयाविरोध्यवग्रह इति न संशयः । ननु ईहाया निर्णयविरोधित्वात्संशयत्वप्रसंग इति । तन्न किं कारणं ? अर्थादानात्, अवगृह्यार्थं तद्विशेषलब्ध्यर्थमर्थादानमीहा । संशयः पुनर्नार्थविशेषालंबन. ।

संशयपूर्वकत्वाच्च ॥ १२ ॥ संशयो हि पूर्वमुपजायते ईहायाः, कथं ! इह पुरुषमवगृह्य, किमयं दाक्षिणात्य उत औदीच्य ? इत्येवमाद्यप्रतिपत्तौ संशयः, एवं संशयः । तस्योत्तरकालं विशेषोपलिप्सां प्रति यत्नमीहेति; संशयादर्थांतरत्वं ।

अत एव संशयावचनमर्थगृहीतेः ॥१३॥ अत एव सूत्रे संशयो नोक्तः। कुतः, अर्थगृहीतेः। सति संशये ईहायाः प्रवृत्तिर्नास्तीति । आह—किमयमपाय उतावाय इत्युभयथा न दोषोऽन्यतरवचनेऽन्यतरस्यार्थगृहीतत्वात् । यदा न दक्षिणात्योयमित्यपायं त्यागं करोति तदौदीच्य इत्यवायोधिगमोर्थगृहीतः । यदावौदीच्य इत्यवायं करोति तदा न दाक्षिणात्योयमित्यपायोर्थगृहीतः । कश्चिदाह—यदुक्तं भवता विषयविषयिसन्निपाते दर्शनं भवति, तदनंतरमवग्रह इति। तदयुक्तमवैलक्षण्यात्। नह्यवग्रहाद्विलक्षणं दर्शनमस्तीति। अत्रोच्यते-न, वैलक्षण्यात्। कथं इह चक्षुषा चक्षुर्दर्शनावरणीयवीर्यांतरायक्षयोपशमांगोपांगनामावष्टंभादविभावितविशेषसामर्थ्येन किंचिदेतद्वस्त्वित्यालोकनमनाकारं दर्शनमित्युच्यते बालवत्। यथा जातमात्रस्य

बालस्य, प्राथमिक उन्मेषोऽसावविभावितरूपद्रव्यविशेषालोचनाद्दर्शनं विवक्षितं। तथा सर्वेषां। ततो द्वित्र्यादि समयभाविषून्मेषेषु चक्षुरवग्रहमतिज्ञानावरणवीर्यांतरायक्षयोपशमांगोपांगनामावष्टंभाद्रूपमिदमिति विभावित विशेषोऽवग्रहः। यत्प्रथमसमयोन्मेषितस्य बालस्य दर्शनं तद्यद्यवग्रहजातीयत्वाज्ज्ञानमिष्टं, तन्मिथ्याज्ञानं वा स्यात् सम्यग्ज्ञानं वा? मिथ्याज्ञानत्वेपि, संशयविपर्ययानध्यवसायात्मकं? स्यात्। तत्र न तावत्संशयः, विपर्ययात्मकं वा चेष्टितस्य सम्यग्ज्ञानपूर्वकत्वात्। प्राथमिकत्वाच्च नास्तीति। नवानध्यवसायरूपं, जात्यंध-बधिररूपशब्दवत् वस्तुमात्रप्रतिपत्तेः। न सम्यग्ज्ञानमर्थाकारावलंबनाभावात्। किं च—

कारणनानात्वात्कार्यनानात्वसिद्धेः ॥ १४ ॥ यथा मृत्तंतुकारणभेदात् घटपटकार्यभेदस्तथा दर्शनज्ञानावरणक्षयोपशमकारणभेदात्, तत्कार्यदर्शनज्ञानभेद इति। अस्ति प्राक् अवग्रहाद्दर्शनं। ततः शुक्लकृष्णा-दिरूपविज्ञानसामर्थ्योपेतस्यात्मनः किं शुक्लमुत कृष्णं? इत्यादिविशेषाप्रतिपत्तेः संशयः। ततः शुक्लविशेषा-कांक्षणं प्रतीहनमीहा। ततः शुक्लमेवेदं न कृष्णमित्यवायनमवायः। अवेतस्यार्थस्याविस्मरणं धारणा। एवं श्रोत्रादिषु मनस्यपि योज्यं, तदावरणकर्मक्षयोपशमविकल्पात्प्रत्येकमवग्रहादिज्ञानावरणभेद इष्यते। कथं? ज्ञानावरणमूलप्रकृतेः पंचोत्तरप्रकृतयस्तासामप्युत्तरोत्तराः प्रकृतिविशेषाः संति। 'ज्ञानावरणस्योत्तरप्रकृतयः असंख्येयलोका इति वचनात्। आह—ईहादीनाममतिज्ञानप्रसंगः। कुतः? परस्परकार्यत्वात्। अवग्रहः कारणं, ईहा कार्यं। ईहा कारणं, अवायः कार्यं। अवायः कारणं धारणा कार्यं। नचेहादीनामिंद्रियानिंद्रियनिमित्तत्वम-स्तीति। नैष दोषः ईहादीनामनिंद्रियनिमित्तत्वान्मतिज्ञानव्यपदेशः। यद्येव श्रुतस्यापि प्राप्नोति इंद्रियगृहीतविषय-त्वात्। ईहादीनामिंद्रियानिमित्तत्वमप्युपचर्यते। न तु श्रुतस्यायं विधिरस्ति तस्यानिंद्रियविषयत्वादिति श्रुतस्या-प्रसंगः। यद्येव चक्षुरिंद्रियेहादिव्यपदेशाभाव इति चेन्नेंद्रियशक्तिपरिणतस्य जीवस्य भावेंद्रियत्वे तद्व्यापारका-र्यत्वात्। इंद्रियभावपरिणतो हि जीवो भावेंद्रियमिष्यते तस्य विषयाकारपरिणामा ईहादय इति चक्षुरिंद्रियेहादि-व्यपदेश इति। इमेऽवग्रहादयो मतिज्ञानप्रभेदा उक्तास्ते ज्ञानावरणक्षयोपशमनिमित्ताः केषां भवंति?। इत्युच्यते-

बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवाणां सेतराणां ॥ १६ ॥

संख्यावैपुल्यवाचिनो बहुशब्दस्य ग्रहणमविशेषात् ॥ १ ॥ बहुशब्दो हि वैपुल्यवाची संख्यावा-ची च। तस्योभयस्यापि ग्रहणं कस्मात् विशेषात्। संख्यायामेको द्वौ बहव इति। वैपुल्ये बहुरोदनो बहुःसूप इति।

बह्ववग्रहाद्यभावः प्रत्यर्थवशवर्तित्वादिति चेन्न सर्वदैकप्रत्ययप्रसंगात् ॥ २ ॥ स्यादेतत्प्र-त्यर्थवशवर्ति विज्ञानं नानेकमर्थं गृहीतुमलमतो बह्ववग्रहादीनामभाव इति। तन्न किं कारणं? सर्वदैकप्रत्यय प्रसंगात्। यथाऽरण्याटव्यां कश्चिदेकमेव पुरुषमवलोकयन्नानेक इत्यवैति। मिथ्याज्ञानमन्यथा स्यात् एकत्रानेक बुद्धिर्यदि भवेत्। तथा नगरवनस्कंधावारावगाहिनोपि तस्यैकप्रत्ययः स्यात्सार्वकालिकः। अतश्चानेकार्थग्राहि विज्ञानस्यात्यंतासंभवान्नगरवनस्कंधावारप्रत्ययनिवृत्तिः। नैताः संज्ञा ह्येकार्थनिवेशिन्यस्तस्माल्लोकसंव्यव-हारनिवृत्तिः। किं च नानात्वप्रत्ययाभावाद्यस्यैकार्थमेव नियमाज्ज्ञानं, तस्य पूर्वज्ञाननिवृत्तावुत्तरज्ञानोत्पत्तिः स्यादनिवृत्तौ वोभयथा च दोषः। यदि पूर्वमुत्तरज्ञानोत्पत्तिकालेस्ति। यदुक्तं 'एकार्थमेकमनस्त्वात्, इत्यदो विरु-ध्यते। यथैकं मनोऽनेकप्रत्ययारंभकं तथैकप्रत्ययेनेकार्थो भविष्यति, अनेकस्य प्रत्ययस्यैककालसंभवात् नत्वनेकार्थोपलब्धिरुपपत्स्यते, तत्र यदभिमतमेव, एकस्य ज्ञानमेकं चार्थमुपलभते इत्यमुष्य व्याघातः। अथ पुन र्निवृत्तः पूर्वस्मिन्नुत्तरज्ञानोत्पत्तिः प्रतिज्ञायते, ननु सर्वथैकार्थमेकमेव ज्ञानमित्यत इदमस्मादन्यदित्येष व्यवहारो न स्यात्, अस्ति च स, तस्मान्न किंचिदेतत्। किं च—

आपेक्षिकसंव्यवहारनिवृत्तेः ॥ ३ ॥ यस्यैकज्ञानमनेकार्थविषयं न विद्यते, तस्य मध्यमप्रदे-शिन्योर्युगपदनुपलंभात्तद्विषयदीर्घह्रस्वव्यवहारो विनिवर्तेत। आपेक्षिकोह्यसौ न वापेक्षास्ति। किं च—

संशयाभावप्रसंगात् ॥ ४ ॥ एकार्थविषयवर्तिनि विज्ञाने स्थाणौ पुरुषे वा प्राक्प्रत्ययजन्म स्यात् नोभयोः, प्रतिज्ञातविरोधात्। यदि स्थाणौ पुरुषाभावात्स्थाणुवंध्यापुत्रवत् संशयाभावः स्यात्। अथ पुरुषे तथा स्थाणुद्रव्यानपेक्षत्वात्संशयो न स्यात, तत्पूर्ववत्। नत्वभाव इष्टः, अतोनैकार्थग्राहिविज्ञानकल्पना श्रेयसीति।

किं च—ईप्सितनिष्पत्तिः, अनियमात्, विज्ञानस्यैकार्थावलंबित्वे चित्रकर्मणि निष्णातस्य चैत्रस्य पूर्णकलशमालिखतः तत्क्रियाकलशतत्प्रकारग्रहणविज्ञानभेदादितरेतरविषयसंक्रमाभावात् अनेकविज्ञानोत्पादनिरोधक्रमे सत्यनियमेन निष्पत्तिः स्यात्। दृष्टा तु सा नियमेन सा चैकार्थग्राहिणि विज्ञाने विरुध्यते। तस्मान्नानार्थोपि प्रत्ययोऽभ्युपेयः ।

द्वित्र्यादिप्रत्ययाभावाच्च ॥ ५ ॥ एकार्थविषयवर्तिनि विज्ञाने द्वाविमौ इमे त्रय इत्यादि प्रत्ययस्याभावः । यतो नैकं विज्ञानं द्वित्र्याद्यर्थानां ग्राहकमस्ति ।

संतानसंस्कारकल्पनायां च विकल्पानुपपत्तिः ॥ ६ ॥ संताने संस्कारे च कल्प्यमाने विकल्पयोरनुपपत्तिः । स संतानः संस्कारश्च ज्ञानजातीयो वा स्यादज्ञानजातीयो वा ? यद्यज्ञानजातीयो न ततः किंचित्प्रयोजनमस्ति । ज्ञानजातीयत्वेपि एकार्थग्राहित्वं स्यादनेकार्थग्राहित्वं वा ? यद्येकार्थग्राहित्वं दोषविधिस्तदवस्थः । अथानेकार्थग्राहित्वं ?, प्रतिज्ञा निःप्रसज्यते ।

विधग्रहणं प्रकारार्थं ॥ ७ ॥ विधयुक्तगतप्रकाराः समानार्था इति प्रकारार्थो विधशब्दः । बहुविधं बहुप्रकारमित्यर्थः ।

क्षिप्रग्रहणमचिरप्रतिपत्त्यर्थं ॥ ८ ॥ अचिरप्रतिपत्तिः कथं स्यात् इति ? क्षिप्रग्रहणं क्रियते ।

अनिःसृतग्रहणमसकलपुद्गलोद्गमार्थं ॥ ९ ॥ अनिःसृतग्रहणं क्रियते, असकलपुद्गलोद्गमार्थं ।

अनुक्तमभिप्रायेण प्रतिपत्तेः ॥ १० ॥ अभिप्रायेण प्रतिपत्तिरस्ति, इत्यनुक्तग्रहणं क्रियते ।

ध्रुवं यथार्थग्रहणात् ॥ ११ ॥ ध्रुवग्रहणं क्रियते, यथार्थग्रहणमस्तीति ।

सेतरग्रहणाद्विपर्ययावरोधः ॥ १२ ॥ अल्पमल्पविधं चिरं निःसृतमुक्तमध्रुवमित्येतेषामवरोधो भवति, सेतरग्रहणात् ।

अवग्रहादिसंबंधात्कर्मनिर्देशः ॥ १३ ॥ बह्वादीनामिति कर्मनिर्देशोऽवग्रहाद्यपेक्षो वेदितव्यः ।

बह्वादीनामादौ वचनं विशुद्धिप्रकर्षयोगात् ॥ १४ ॥ ज्ञानावरणक्षयोपशमविशुद्धिप्रकर्षयोगे सति बह्वादीनामवग्रहादयो भवंति, इति तेषां ग्रहणमादौ क्रियते ।

ते च प्रत्येकमिंद्रियानिंद्रियेषु द्वादशविकल्पा नेयाः ॥ १५ ॥ तद्यथा प्रकृष्टश्रोत्रेंद्रियावरणवीर्यांतरायक्षयोपशमांगोपांगनामोपष्टंभात्संभिन्नश्रोतान्यो वा युगपत्ततविततघनसुषिरादिशब्दश्रवणाद्बहुशब्दमवगृह्णाति । अल्पश्रोत्रेंद्रियावरणक्षयोपशमपरिणाम आत्मा, ततशब्दादीनामन्यतममल्पं शब्दमवगृह्णाति । प्रकृष्टश्रोत्रेंद्रियावरणक्षयोपशमादिसन्निधाने सति, ततादिशब्दविकल्पस्य प्रत्येकमेकद्वित्रिचतुःसंख्येयासंख्येयानंतगुणस्यावग्राहकत्वात् बहुविधमवगृह्णाति । अल्पविशुद्धिश्रोत्रेंद्रियादिपरिणामकारण आत्मा ततादिशब्दानामेकविधावग्रहणादेकविधमवगृह्णाति । प्रकृष्टश्रोत्रेंद्रियावरणक्षयोपशमादिपरिणामित्वात् क्षिप्रं शब्दमवगृह्णाति । अल्पश्रोत्रेंद्रियावरणक्षयोपशमादिपारिणामिकत्वाच्चिरेण शब्दमगृह्णाति । सुविशुद्धिश्रोत्रादिपरिणामात्साकल्येनानुच्चारितस्य ग्रहणादनिःसृतमवगृह्णाति । निःसृतं प्रतीतं । प्रकृष्टविशुद्धिश्रोत्रेंद्रियादिपरिणामकारणादेकवर्णनिर्गमेपि अभिप्रायेणैवानुच्चारितं शब्दमवगृह्णाति। इमं भवान् शब्दं वक्ष्यतीति। अथवा स्वरसंचारणात्प्राक् तंत्रीद्रव्यातोद्यामर्शनेनैव वादितमनुक्तमेव शब्दमभिप्रायेणावगृह्याऽऽचष्ट भवानिमं शब्दं वादयिष्यति इति। उक्तं प्रतीतं। संक्लेशपरिणामनिरुत्सुकस्य यथानुरूपश्रोत्रेंद्रियावरणक्षयोपशमादिपरिणामकारणावस्थितत्वात् यथा प्राथमिकं शब्दग्रहणं, तथावस्थितमेव शब्दमवगृह्णाति। नोनं नाभ्यधिकं। पौनः पुन्येन संक्लेशविशुद्धिपरिणामकारणापेक्षस्यात्मनो यथानुरूपपरिणामोपात्तश्रोत्रेंद्रियसान्निध्येपि तदावरणस्येषदीषदाविर्भावात्पौनःपुनिकं प्रकृष्टावकृष्टश्रोत्रेंद्रियावरणादिक्षयोपशमपरिणामत्वाच्चाऽध्रुवमवगृह्णाति । शब्दं कचिद्बहुं कचिदल्पं कचिद्बहुविधं कचिदेकविधं कचित् क्षिप्रं कचिच्चिरं कचिदनिःसृतं कचिन्निसृतं कचिदुक्तं कचिदनुक्तं।

आह—बहुबहुविधयोः कः प्रतिविशेषो यावतोभयत्रापि ततादिशब्दग्रहणमविशिष्टमस्ति ? उच्यते, न, विशेषदर्शनात्। यथा कश्चित्, बहूनि शास्त्राणि मौनेन सामान्यार्थेनाविशेषितेन व्याचष्टे न तु बहुभिर्विशेषितार्थैः। कश्चिच्च तेषामेव बहूनां शास्त्राणां बहुभिरर्थैः परस्परातिशययुक्तैर्बहुकल्पैर्व्याख्यानं करोति। तथा ततादिशब्दग्रहणाविशेषेपि यत्प्रत्येकं ततादिशब्दानामेकद्वित्रिचतुःसंख्येयाऽसंख्येयाऽनंतगुणपरिणतानां ग्रहणं तद्बहुविधग्रहणं। यत्ततादीनां सामान्यग्रहणं तद्बहुग्रहणं।

आह—उक्तनिःसृतयोः कः प्रतिविशेषः ?। यतः सकलशब्दनिःसरणान्निःसृतमुक्तमप्येवंविधमेव। उच्यते अन्योपदेशपूर्वकं शब्दग्रहणं, उक्तं। गोशब्दोयमिति। स्वत एव ग्रहणं निःसृतं। चक्षुषा तु विशुद्धचक्षुरिंद्रियावरणक्षयोपशमपरिणामकारणत्वाच्छुक्लकृष्णरक्तनीलपीतरूपपर्यायं बहुमवगृह्णाति। अल्पं पूर्ववत्। प्रकृष्टविशुद्धिचक्षुरिंद्रियादिक्षयोपशमपरिणामकारणत्वाच्छुक्लादिपंचतयरूपगुणस्य प्रत्येकमेकद्वित्रिचतुःसंख्येयासंख्येयानंतगुणपरिणामिनोऽवग्राहकत्वसामर्थ्याद्बहुविधरूपमवगृह्णाति, एकविधं पूर्ववत्। क्षिप्रचिरयोरप्युक्त एव क्रमः। पंचवर्णवस्त्रकंबलचित्रपटादीनां सकृदेकदेशविषयपंचवर्णग्रहणात्कृत्स्नपंचवर्णेष्वदृष्टेष्वनिःसृतेष्वपि तद्वर्णाविष्करणसामर्थ्यादनिःसृतमवगृह्णाति। अथवा देशांतरस्थ पंचवर्णपरिणतैकवस्त्रादिकथनात्साकल्येनाऽकथितस्याप्येकदेशकथनेनैव तत्कृत्स्नपंचवर्णग्रहणादनिःसृतं। निःसृतं प्रतीतं। सुविशुद्धिचक्षुरिंद्रियादिक्षयोपशम आत्मा शुक्लकृष्णादिवर्णमिश्रीकरणदर्शनात्परेणाकथितमपि वर्णमभिप्रायेणैव प्रतिपद्यते। भवानिमं वर्णमेतद्वर्णद्वयमिश्रणात्करिष्यतीत्येवं ग्रहणादनुक्तं रूपमवगृह्णाति। अथवा देशांतरस्थपंचवर्णैकद्रव्यकथने तात्वादिकरणसंश्लेषात्प्राक् सकृदप्यकथितमेव द्रव्यमाचष्टे भवानेवं विभ्रमस्माकं पंचवर्णं व्यतिकरिष्यतीत्यनुक्तं रूपमवगृह्णाति। परकीयाभिप्रायानपेक्षमात्मीयचक्षुरिंद्रियपरिणामसामर्थ्यादेवोक्त रूपमवगृह्णाति। संक्लेशपरिणामनिरुत्सुकस्य यथानुरूपं चक्षुरिंद्रियावरणक्षयोपशमपरिणामकारणावस्थितत्वाद्यथा प्राथमिकं रूपग्रहणं तथावस्थितमेव रूपमवगृह्णाति। नोनं नाभ्यधिकं। पौनः पुन्येन संक्लेशविशुद्धिपरिणामापेक्षस्याऽऽत्मनो यथानुरूपपरिणामोपात्तचक्षुरिंद्रियसान्निध्येपि तदावरणस्येषदीषदाविर्भावात् पौनःपुनिकं प्रकृष्टावकृष्टचक्षुरिंद्रियावरणक्षयोपशमपरिणामकारणत्वाच्चाध्रुवमवगृह्णाति रूपं। कचिद्बहु कचिदल्पं कचिद्बहुविधं, कचिदेकविधं, कचित् क्षिप्रं, कचिच्चिरेण, कचिदनिःसृतं, कचिन्निःसृतं, कचिदनुक्तं। कचिदुक्तं, एवं घ्राणाद्यवग्रहेष्वपि योज्य। तथेहावायधारणा अपि बह्वादिभिः सेतरैरवसेया। कश्चिदाह—श्रोत्रघ्राणस्पर्शनरसनचतुष्टयस्य प्राप्यकारित्वादनिःसृतानुक्तशब्दाद्यवग्रहेहावायधारणा न युक्ता। इत्युच्यते—अप्राप्तत्वात्। कथं ? पिपीलिकादिवत्। यथा पिपीलिकादीनां घ्राणरसनदेशाप्राप्तेपि गुडादिद्रव्ये गंधरसज्ञानं, तच्च यैश्च यावद्भिश्चास्मदाद्यप्रत्यक्षसूक्ष्मगुडावयवैः पिपीलिकादिघ्राणरसनेंद्रिययोः परस्परानपेक्षावृत्तिस्ततो न दोषः।

अस्मदादीनां तदभाव इति चेन्न श्रुतापेक्षत्वात् ॥ १६ ॥ यथा भूगृहसंबंधितोत्थितस्य पुंसश्चक्षुरादिभिरवभासितेष्वपि घटादिषु घटोयं रूपमिदमित्यादि यद्विशेषपरिज्ञानं तच्छ्रुतापेक्षं परोपदेशापेक्षत्वात्। तथास्मदादीनामप्यनिःसृतानुक्तमपि ज्ञानविकल्पशब्दाद्यवग्रहादिज्ञानं तच्छ्रुतापेक्षं। किं च—

लब्ध्यक्षरत्वात् ॥ १७ ॥ श्रुतज्ञानप्रभेदप्ररूपणायां लब्ध्यक्षरश्रुतकथनं षोढा प्रविभक्तं। तद्यथा-चक्षुःश्रोत्रघ्राणरसनस्पर्शनमनोलब्ध्यक्षरमित्यार्ष उपदेशः। अतश्चक्षुःश्रोत्रघ्राणरसनस्पर्शनेंद्रियमनोलब्ध्यक्षर सान्निध्यादेतत्सिध्यति, अनिःसृतानुक्तानामपि शब्दानां अवग्रहादिज्ञानं। यद्यवग्रहादयो बह्वादीनां कर्मणामाक्षेप्तारो बह्वादीनि पुनर्विशेषणानि कस्य ?, इत्यत आह—

अर्थस्य ॥ १७ ॥

चक्षुरादिविषयोर्थस्तस्य बह्वादिविशेषणविशिष्टस्याऽवग्रहादयो भवंति।

इयर्ति पर्यायानर्यते वा तैरित्यर्थो द्रव्यं ॥ १ ॥ प्रत्यात्मसंबंधिनः पर्यायानुभयनिमित्तवशादुत्पत्तिप्रत्यागूर्णानियर्ति गच्छत्यर्यते गम्यते वा तैरित्यर्थः कः। पुनरसौ ? द्रव्यं। किमर्थमिदमुच्यते—

अर्थवचनं गुणग्रहणनिवृत्त्यर्थं ॥ २ ॥ केचिद्रूपादयो गुणा एवेंद्रियैः संनिकृष्यंते। ततस्तद्ग्रहणमिति मन्यंते। तन्मतनिवृत्त्यर्थमर्थस्येत्युच्यते। न हि ते रूपादयो गुणा अमूर्ता इंद्रियसंनिकर्षमापद्यते इति। तत्प्रचयविशेषे सति संनिकर्षसंभवः? इति चेन्न, गुणादीनां प्रचयानुपपत्तेः। सत्यपि वा प्रचयेऽर्थांतरप्रादुर्भावाभावात् सूक्ष्मावस्थानतिक्रमादग्रहणमेवैषां स्यात्। न तर्हीदानीमिदं भवति रूपं मया दृष्टं गंधो वा घ्रात? इति। भवति च। अर्थग्रहणात् तदव्यतिरेकात्तेषामपि ग्रहणोपपत्तेः।

तेषु सत्सु मतिज्ञानात्मलाभात्सप्तमीप्रसंगः ॥ ३ ॥ यतो विषयेषु सत्सु मतिज्ञानमाविर्भवति अतोऽर्थे इति वाच्यं। न, अनेकांतात्। नायमेकांतोऽस्ति सत्यर्थे मतिज्ञानं भवतीति। यत. सत्यप्यर्थेऽवनितलभवनसंभूतस्य कुमारस्योत्तीर्णमात्रस्य घटरूपादिमतिज्ञानाभावः। अथवा नायमेकांतोऽस्त्यधिकरणस्य सत्वात्सप्तमीप्रसंग इति। कस्मात्तस्याविवक्षितत्वात्। विवक्षावशाद्धि कारकाणि भवंति।

क्रियाकारकसंबंधस्य विवक्षितत्वात् ॥ ४ ॥ अवग्रहादयः क्रियाविशेषा उक्तास्तेषामवश्यं केन चित् कर्मणा भवितव्यमिति बह्वादिविकल्पस्यार्थस्येत्युच्यते।

बह्वादिसामानाधिकरण्याद्बहुत्वप्रसंगः ॥ ५ ॥ यतो बह्वादिरेवार्थः नातोऽन्यस्ततो बह्वादिसामानाधिकरण्यादर्थानामिति बहुत्वं प्राप्नोति?

न वानभिसंबंधात् ॥ ६ ॥ न वैष दोषः। किं कारणं?, अनभिसंबंधात्। नह्यस्य बहुत्वादिभिरभिसंबंधः क्रियते। केन तर्हि?

अवग्रहणादिभिः ॥ ७ ॥ कस्येत्युक्तेऽर्थस्येतीह संबध्यते। तद्विशेषणं बह्वादिग्रहणं।

सर्वस्य वाऽर्यमाणत्वात् ॥ ८ ॥ अथवा सर्वस्यार्यमाणस्यार्थत्वमतो जातिप्रधानत्वान्निर्देशस्यार्थस्येत्येकत्वनिर्देशो युक्तः।

प्रत्येकमभिसंबंधाद्वा ॥ ९ ॥ अथवा प्रत्येकमभिसंबंधः क्रियते। बहोरर्थस्य बहुविधस्यार्थस्येति। किममी अवग्रहादयः सर्वस्येंद्रियानिंद्रियार्थस्य भवन्तुत कश्चिद्विषयविशेषोऽस्ति?, इत्यत आह—

व्यंजनस्यावग्रहः ॥ १८ ॥

व्यंजनमव्यक्तं शब्दादिजातं। तस्यावग्रहो भवति किमर्थमिदं? नियमार्थं। अवग्रह एव नेहादय इति। सं तर्ह्येवकारः कर्तव्यः?

न वा सामर्थ्यादवधारणप्रतीतेरब्भक्षवत् ॥१॥ न वा कर्तव्यः। किं कारणं?, सामर्थ्यादवधारणप्रतीतेः। कथं? अब्भक्षवत्। यथा न कश्चिदपो न भक्षयतीति सामर्थ्यादवधारणं प्रतीयते, अप एव भक्षयतीति। तथा सर्वेषामवग्रहादीनां प्रसिद्धौ अवग्रहवचनमवधारणार्थं विज्ञायते।

तयोरभेदो ग्रहणाविशेषादिति चेन्न व्यक्ताव्यक्तभेदादभिनवशरावनत् ॥ २ ॥ स्यादेतत्तयोरर्थावग्रहव्यंजनावग्रहयोर्नास्तिभेदः, ग्रहणाविशेषात्। न हि शब्दादिग्रहणं प्रति विशेषोऽस्तीति। तन्न किं कारणं? व्यक्ताव्यक्तभेदात्। व्यक्तग्रहणमर्थावग्रहः। अव्यक्तग्रहणं व्यंजनावग्रह। कथं? अभिनवशरावत्। यथा सूक्ष्मजलकणद्वित्रिसिक्तः शरावोभिनवो नार्द्री भवति। स एव पुनः पुनः सिच्यमानः शनैस्तिम्यति। तथात्मनः शब्दादीनां व्यक्तग्रहणात्प्राक् व्यंजनावग्रहः। व्यक्तग्रहणमर्थावग्रहः।

सर्वेंद्रियाणामविशेषेण व्यंजनावग्रहप्रसंगे यत्रासंभवस्तदर्थं प्रतिषेधमाह—

न चक्षुरनिंद्रियाभ्यां ॥ १९ ॥

चक्षुषा अनिंद्रियेण च व्यंजनावग्रहो न भवति। कुतः?

व्यंजनावग्रहाभावश्चक्षुर्मनसोरप्राप्यकारित्वात् ॥ १ ॥ यतोऽप्राप्तमर्थमविदिक्कं युक्तं संनिकर्षविषयेऽवस्थितं बाह्यप्रकाशाभिव्यक्तमुपलभते। चक्षुर्मनश्चाऽप्राप्तं, ततो नानयोर्व्यंजनावग्रहोऽस्ति।

---

१ सत्सप्तमीत्यर्थः।

इच्छामात्रमिति चेन्न सामर्थ्यात् ॥ २ ॥ स्यादेतदिच्छामात्रमिदमाप्तार्थावग्राहि चक्षुरिति, तन्न किं कारणं ? सामर्थ्यात् । कथं सामर्थ्यं ?

आगमतो युक्तितश्च ॥ ३ ॥ आगमस्तावत्—गाथा

पुट्ठं सुणेदि सद्दं अपुट्ठं पुणवि पस्सदे रूवं । गंधं रसं च पासं पुट्ठं पुट्ठं विजाणादि ॥ इति

युक्तितोपि अप्राप्यकारि चक्षुः स्पृष्टानवग्रहात् । यदि प्राप्यकारि स्यात्, त्वगिंद्रियवत्स्पृष्टमंजनं गृह्णीयात् । न च गृह्णात्यतो मनोवदप्राप्यकारीत्यवसेयं । अत्र केचिदाहुः, प्राप्यकारि चक्षुरावृतानवग्रहात् त्वगिंद्रियवदिति । अत्रोच्यते—काचाभ्रस्फटिकावृतार्थावग्रहे सत्यव्यापकत्वादसिद्धो हेतुः । वनस्पतिचैतन्ये स्वापवत् । तथा संशयहेतुः, अप्राप्यकारिण्ययस्कांतोपले साध्यविपक्षेपि दर्शनादिति । भौतिकत्वात्प्राप्यकारि चक्षुरग्निवदिति चेन्न । अयस्कांतेनैव प्रत्युक्तत्वात् । बाह्येंद्रियत्वात्प्राप्यकारि चक्षुरिति चेन्न । द्रव्येंद्रियोपकरणस्य भावेंद्रियस्य प्राधान्यात् । अप्राप्यकारित्वे व्यवहितातिविप्रकृष्टग्रहणप्रसंगः. इति चेन्न अयस्कांतेनैव प्रत्युक्तत्वात् । अयस्कांतोपलमप्राप्य लोहमाकर्ष्यदपि न व्यवहितमाकर्षति नातिविप्रकृष्टमिति। संशयावस्थमेतदित्यप्राप्यकारित्वे संशयविपर्ययभाव इति चेत्, तत्प्राप्यकारित्वेपि, तदविशेषात् । कश्चिदाह—रश्मिवच्चक्षुः, तैजसत्वात्तस्मात्प्राप्यकारीत्यग्निवदित्येतच्चायुक्तमनभ्युपगमात् । न हि वयमभ्युपगच्छामस्तैजसं चक्षुरिति । तेजोलक्षणमौष्ण्यमिति कृत्वा चक्षुरिंद्रियस्थानमुष्णं स्यात् । न च तद्देश स्पर्शनेंद्रियमुष्णस्पर्शोपलंभि दृष्टमिति । इतश्चातैजसं चक्षुर्भासुरत्वानुपलब्धेः । अदृष्टवशादनुष्णाभासुरत्वमिति चेन्नादृष्टस्य गुणत्वात्, अक्रियस्य भावस्य भावनिग्रहासामर्थ्यात् । नक्तंचररश्मिदर्शनाद्रश्मिवच्चक्षुरिति चेन्नातैजसोपि पुद्गलद्रव्यस्य भासुरत्वपरिणामोपपत्तेरिति । किं च—गतिमद्वैधर्म्यादिह यद्गतिमद्भवति न तत्संनिकृष्टविप्रकृष्टावभिन्नकालं प्राप्नोति । न च तथा चक्षुः । चक्षुर्हि शाखाचंद्रमसामभिन्नकालमुपलभते, यावता कालेन शाखां प्राप्नोति तावता चद्रमसमिति स्पष्टं गतिमद्वैधर्म्यं तस्मान्न गतिमच्चक्षुरिति । यदि च प्राप्यकारि चक्षुः स्यात्तमिस्रायां रात्रौ दूरेऽग्नौ प्रज्वलति समीपगतद्रव्योपलंभनं भवति कुतोनांतरालगतद्रव्यालोचनं । प्रकाशाभावादिति चेन्न तैजसत्वादग्न्यादिवत् सहायांतरापेक्षत्वप्रसंगात् । किं च यदि प्राप्यकारि चक्षुः स्यात्सांतराधिकग्रहणं न प्राप्नोति । नहींद्रियाणां निरंतरे विषये गंधादौ सांतरग्रहणं दृष्टं । नाप्यधिकग्रहणं । अथ मतं बहिरधिष्ठानाद्वृत्तिरिंद्रियस्य अतः उपपन्नं तद्विषयस्य सांतराधिकग्रहणमिति तदयुक्तं—यस्मान्न बहिरधिष्ठानादिंद्रियं तत्र चिकित्सादिदर्शनादन्यथाधिष्ठानपिधानेपि ग्रहणप्रसंगो मनसश्चाबहिर्भावात् । मनसाधिष्ठितं हि इंद्रियं स्वविषये व्याप्रियते न च मनोवहिरधिष्ठानमस्ति तदभावादग्रहणप्रसंगः अनुवृत्तौ च संभवाभावाद्विप्रकीर्णः चक्षूरश्मिसमूहः, कथमणुमनोधिष्ठस्येति । कश्चिदाह—श्रोत्रमप्राप्यकारि विप्रकृष्टविषयग्रहणादिति । एतच्चायुक्तं असिद्धत्वात् । साध्यं तावदेतद्विप्रकृष्टं शब्दं गृह्णाति श्रोत्रं ? उतघ्राणेंद्रियवदवगाढं स्वविषयभावपरिणतं पुद्गलद्रव्यं गृह्णातीति ? विप्रकृष्टशब्दग्रहणे च स्वकर्णांतर्विलगतमशकशब्दो नोपलभ्यते नहींद्रियं किंचिदेकं दूरस्पष्टविषयग्राहि दृष्टमिति । आकाशगुणत्वाच्छब्दस्य स्पर्शवद्गुणत्वाभाव इति चेन्नाऽमूर्तगुणस्यात्मगुणवदिंद्रियविषयत्वादर्शनादिति । प्राप्तावग्रहे श्रोत्रस्य दिग्देशभेदविशिष्टविषयग्रहणाभाव इति चेन्न शब्दपरिणतविसर्पत्पुद्गलवेगशक्तिविशेषस्य तथाभावापत्तेः । सूक्ष्मत्वाप्रतिघातात्समंततः प्रवेशाच्च । सिद्धमेतच्चक्षुर्मनसी वर्जयित्वा शेषाणामिंद्रियाणां व्यंजनावग्रहः । सर्वेषामिंद्रियाणामर्थावग्रह इति ।

मनसोऽनिंद्रियव्यपदेशाभावः स्वविषयग्रहणे करणांतरानपेक्षत्वाच्चक्षुर्वत् ॥ ४ ॥ यथा चक्षूरूपग्रहणे करणांतरं नापेक्षत इति इंद्रियव्यपदेशं लभते तथा मनोपि गुणदोषविचारादिस्वव्यापारे करणांतरं नापेक्षत इतींद्रियं प्राप्नोति नानिंद्रियमिति ।

न वाप्रत्यक्षत्वात् ॥५॥ नैवष दोषः किं कारणं ? अप्रत्यक्षत्वात् । यथा चक्षुरादिपरस्परस्यैंद्रियकत्वात्प्रत्यक्षं न तथा मन ऐंद्रियकं । कुतः ? सूक्ष्मद्रव्यपरिणामात्तस्मादनिंद्रियमित्युच्यते । अत्राह—कथमवगम्यते प्रत्यक्षं तदस्तीति ?

अनुमानात्तस्याधिगमः ॥ ६ ॥ अप्रत्यक्षाणामप्यर्थानां लोकेऽनुमानादधिगतिर्दृष्टा, यथा, आदित्यस्य गतिः । वनस्पतीनां च वृद्धिह्रासौ । तथा मनसोप्यस्तित्वमनुमानादवगम्यते । कोसावनुमानः ?

युगपज्ज्ञानक्रियानुत्पत्तिर्मनसो हेतुः ॥ ७ ॥ सत्सु चक्षुरादिकरणेषु शक्तिमत्सु च बाह्येषु रूपादिषु, सति चानेकस्मिन् प्रयोजने, यतो ज्ञानानां क्रियाणां च युगपदनुत्पत्तिः, तदस्ति मन इत्यनुमीयते ।

अनुस्मरणदर्शनाच्च ॥ ८ ॥ यतः सकृद्दृष्टं श्रुतं वानुस्मर्यते । अतस्तद्दर्शनात्तदस्तित्वमवसेयं । अत्राह—एकस्यात्मनः कुतः करणभेदः ?

इस्वभावस्यापि करणभेदोऽनेककलाकुशलदेवदत्तवत् ॥ ९ ॥ यथा अनेकज्ञानक्रियाशक्तियुक्तस्यापि देवदत्तस्य करणभेदो दृश्यते । चित्रकर्मणि वर्तमानस्य वर्तिकालेखनीकूर्चिकाद्युपकरणापेक्षा । काष्ठकर्मणि वर्तमानस्य वासीघटमुखवृक्षादानादिकरणापेक्षा । तथात्मनोपि क्षयोपशमभेदात् ज्ञानक्रियापरिणामशक्तियुक्तस्य चक्षुराद्यनेककरणापेक्षा न विरुध्यते ।

स नामकर्मसामर्थ्यात् ॥ १० ॥ स एष करणभेदः नामकर्मसामर्थ्याद्वेदितव्यः । कथं इह यदेतच्छरीरनामकर्मोदयाद्यापादितं यवनालिकासंस्थानं श्रोत्रेंद्रियं, एतदेव शब्दोपलब्धिसहिष्णु नेतराणि । तथा यदेतद् घ्राणेंद्रियं अतिमुक्तकचंद्रकसंस्थानं, एतदेव गंधावगमसमर्थं नेतराणि । तथा यदेतज्जिह्वेंद्रियं क्षुरप्राकृति, एतदेव रसावगमे नान्यानि । तथा यदेतत्स्पर्शनेंद्रियमनेकाकृति तदेव स्पर्शोपलंभने नेतराणि । तथा यदेतच्चक्षुरिंद्रियं मसूरिकाकारं कृष्णताराधिष्ठानं, तदेव रूपाविष्करणेऽलं नेतराणि । इत्येवमाभिनिबोधिकं द्रव्यक्षेत्रकालभावैरवसेयं । द्रव्यतो मतिज्ञानी सर्वद्रव्याण्यसर्वपर्यायाण्युपदेशेन जानाति । क्षेत्रत उपदेशेन सर्वक्षेत्राणि जानाति । अथवा क्षेत्रं विषयः । चक्षुषः क्षेत्रं सप्तचत्वारिंशद्योजनसहस्राणि त्रिषष्ट्यधिके च द्वे योजनशते योजनस्य चैकविंशतिषष्टिभागाः । श्रोत्रस्य क्षेत्रं द्वादशयोजनानि । घ्राणरसनस्पर्शनानां नवयोजनानि । कालत उपदेशेन सर्वकालं जानाति । भावत उपदेशेन जीवादीनामौदयिकादीन् भावान् जानाति । तत्सामान्यादेकं, इंद्रियानिंद्रियभेदाद् द्विधा, अवग्रहादिभेदाच्चतुर्धा, तैरिंद्रियगुणितैश्चतुर्विंशतिविधं, तैरेव व्यंजनावग्रहाधिकैरष्टाविंशतिविधं । तैरेव मूलभंगाधिकैर्द्रव्यादिसहितैर्वा द्वात्रिंशद्विध । त एते प्रयोविकल्पा बह्वादिभिः षड्भिरितरानपेक्षैर्गुणिताश्चतुश्चत्वारिंशच्छतं, अष्टषष्ठ्युत्तरं शतं, द्वानवत्यधिकं शतमिति च भवंति । त एव बह्वादिभिर्द्वादशगुणिता द्वे शते अष्टाशीत्युत्तरे, त्रीणिशतानि षट्त्रिंशानि, चतुरशीत्यधिकानि त्रीणिशतानि च भवंति । आह—व्यंजनावग्रह बह्वाद्यभावः कस्मात् ? अव्यक्तत्वात् । उच्यते, अवग्रहवत् तत्सिद्धिः । यथाऽव्यक्तग्रहणमवग्रहस्तथा बह्वादिविकल्पोऽव्यक्तरूपेणैव वेदितव्यः । अथानिःसृते कथं ? तत्रापि ये च यावंतश्च पुद्गलाः सूक्ष्मानिःसृताः संति, सूक्ष्मास्तु साधारणैर्न गृह्यंते ? तेषामिंद्रियस्थानावगाहनं अनिःसृतं व्यंजनावग्रहः । परोक्षद्वैविध्ये सत्युपक्लृप्तलक्षणविकल्पमतिज्ञानविधर्मि, यद् द्वितीयमुपदिष्टं तत्किंनिमित्तं कतिविधं च ? इत्युच्यते—

श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदं ॥ २० ॥

श्रुतशब्दो जहत्स्वार्थवृत्ती रूढिवशात् कुशलशब्दवत् ॥ १ ॥ यथा कुशलशब्दः कुशलवनक्रियां प्रतीत्य व्युत्पादितः तद्धित्वा सर्वत्र पर्यवदाते वर्तते । तथा श्रुतशब्दोपि श्रवणमुपादाय व्युत्पादितो रूढिवशात् कस्मिंश्चिज्ज्ञानविशेषे वर्तते ।

कार्यमतिपालनात् पूरणाद्वा पूर्वं कारणं ॥ २ ॥ कार्यं पालयति पूरयतीति वा पूर्वं कारणं लिंगं निमित्तमित्यनर्थांतरं । मतिज्ञानं व्याख्यातं तत्पूर्वमस्येति । पूर्वं, मतिकारणकमित्यर्थः ।

मतिपूर्वकत्वे श्रुतस्य तदात्मकत्वप्रसंगो घटवत्, अतदात्मकत्वे वा तत्पूर्वकत्वाभावः ॥३॥ कश्चिदाह मतिपूर्वं श्रुतं तदपि मत्यात्मकं प्राप्नोति । कारणगुणानुविधानं हि कार्यं दृष्टं । यथा मृन्निमित्तो घटो मृदात्मकः । अथाऽतदात्मकत्वमिष्यते तत्पूर्वकत्वं तर्हि तस्य हीयते इति ।

---

१ कुशं लुनातीत्यर्थः ।

न वा निमित्तमात्रत्वाद्दंडादिवत् ॥ ४ ॥ न वैष दोषः। किं कारणं ? निमित्तमात्रत्वाद्दंडादिवत्। यथा मृदः स्वयमंतर्घटभवनपरिणामाभिमुख्ये, दंडचक्रपौरुषेयप्रयत्नादिनिमित्तमात्रं भवति । यतः सत्स्वपि दंडादिनिमित्तेषु शर्करादिप्रचितो मृत्पिंडः स्वयमंतर्घटभवनपरिणामनिरुत्सुकत्वान्न घटीभवति । अतो मृत्पिंड एव बाह्यदंडादिनिमित्तापेक्ष आभ्यंतरपरिणामसान्निध्याद् घटो भवति, न दंडादयः, इति दंडादीनां निमित्तमात्रत्वं। तथा पर्यायिपर्याययोः स्यादन्यत्वादात्मनः, स्वयमंतःश्रुतभवनपरिणामाभिमुख्ये मतिज्ञानं निमित्तमात्रं भवति। यतः सत्यपि सम्यग्दृष्टेः श्रोत्रेंद्रियबलाधाने बाह्याचार्यपदार्थोपदेशसंनिधाने च श्रुतज्ञानावरणोदयवशीकृतस्य स्वयमंतःश्रुतभवननिरुत्सुकत्वादात्मनो न श्रुतं भवति । ततो बाह्यमतिज्ञानादिनिमित्तापेक्ष आत्मा, एव, अभ्यंतरश्रुतज्ञानावरणक्षयोपशमापादितश्रुतभवनपरिणामाभिमुख्याच्छ्रुती भवति। न मतिज्ञानस्य श्रुतभवनमस्ति, तस्य निमित्तमात्रत्वात्।

अनेकांताच्च ॥ ५ ॥ नायमेकांतोस्ति, कारणसदृशमेव कार्यमिति। कुतस्तत्रापि सप्तभंगीसंभवात्, कथं ? घटवत्। यथा घटः कारणेन मृत्पिंडेन स्यात्सदृशः, स्यान्न सदृश इत्यादि। इति मृद्द्रव्याजीवानुपयोगाद्यादेशात्स्यात्सदृशः। पिंडघटसंस्थानादिपर्यायादेशान्न सदृशः। पूर्ववदुत्तरे भंगा नेतव्याः । यस्यैकांतेन कारणानुरूपं कार्यं, तस्य घटपिंडशिविकादिपर्याया न उपलभ्यंते। किं च—घटेन जलधारणादिव्यापारो न क्रियेत मृत्पिंडे तददर्शनात्। अपि च मृत्पिंडस्य घटत्वेन परिणामवद्, घटस्यापि घटत्वेन परिणामः स्यात्, एकांतसदृशत्वात्, नचैवं भवति। अतो नैकांतेन कारणसदृशत्वं। तथा श्रुतं सामान्यादेशात्स्यात्कारणसदृशं यतो मतिरपि, ज्ञानं, श्रुतमपि। अव्यवहिताभिमुखग्रहणनानाप्रकारार्थप्ररूपणसामर्थ्यादिपर्यायादेशात्स्यान्न कारणसदृशं। पूर्ववदुत्तरे भंगा नेतव्याः।

श्रोत्रमतिपूर्वस्यैव श्रुतत्वप्रसंगस्तदर्थत्वादिति चेन्नोक्तत्वात् ॥ ६ ॥ स्यादेतच्छ्रोत्रमतिपूर्वस्यैव श्रुतत्वं प्राप्नोति। कुतः ? तदर्थत्वात्। श्रुत्वावधारणाद्धि श्रुतमित्युच्यते। तेन चक्षुरादिमतिपूर्वकस्यैव श्रुतत्वं न प्राप्नोति। तन्न किं कारणं ? उक्तत्वात्। उक्तमेव श्रुतशब्दोयं रूढिशब्द इति। रूढिशब्दाश्च स्वोत्पत्तिक्रियानपेक्षाः प्रवर्तंत, इति सर्वमतिपूर्वस्य श्रुतत्वसिद्धिर्भवति।

आदिमतोऽतवत्त्वाच्छ्रुतस्याऽनादिनिधनत्वानुपपत्तिरिति चेन्न द्रव्यादिसामान्यापेक्षया तत्सिद्धेः ॥ ७ ॥ स्यादेतच्छ्रुतस्याऽऽदिमत्वमभ्युपगतं, मतिपूर्वमिति वचनात्। आदिमतश्च लोकेऽतवत्त्वं दृष्टं। तत आद्यंतसंभवादनादिनिधनं श्रुतमिति व्याहन्यते। ततश्च पुरुषकृतित्वादप्रामाण्यं स्यादिति। नैष दोषः। द्रव्यादिसामान्यापेक्षया तत्सिद्धिः। द्रव्यक्षेत्रकालभावानां विशेषस्याविवक्षायां श्रुतमनादिनिधनमित्युच्यते। न हि केनचित्पुरुषेण क्वचित् कदाचित्कथंचिदुत्प्रेक्षितमिति। तेषामेव विशेषापेक्षया आदिरंतश्च संभवतीति मतिपूर्वमित्युच्यते। यथांकुरो बीजपूर्वकः। स च संतानापेक्षयानादिनिधन इति। न वा पुरुषकृतित्वमप्रामाण्यकारणं चौर्याद्युपदेशस्यास्मर्यमाणकर्तृकस्य प्रामाण्यप्रसंगात्। अनित्यस्य च प्रत्यक्षादेः प्रामाण्ये को विरोधः।

सम्यक्त्वोत्पत्तौ युगपन्मतिश्रुतोत्पत्तेर्मतिपूर्वकत्वाभाव इति चेन्न सम्यक्त्वस्य तदपेक्षत्वात् ॥ ८ ॥ स्यान्मतं मत्यज्ञानश्रुताज्ञानयोः प्रथमसम्यक्त्वोत्पत्तौ युगपज्ज्ञानपरिणामान्मतिपूर्वकत्वं श्रुतस्य नोपपद्यत इति। तन्न किं कारणं सम्यक्त्वस्य तदपेक्षत्वात्। तयोर्हि सम्यक्त्वं, सम्यग्दर्शनोत्पत्तौ युगपद्भवति। आत्मलाभस्तु क्रमवान्, इति मतिपूर्वकत्वं युक्त, पितापुत्रवत्।

मतिपूर्वकत्वाविशेषाच्छ्रुताविशेष इति चेन्न कारणभेदात्तद्भेदसिद्धेः ॥ ९ ॥ स्यादेतत्सर्वेषां प्राणिनां श्रुतमविशिष्टं प्राप्नोति। कुतः ? कारणाविशेषात्। मतिपूर्वत्वं हि कारणमिष्टं, तच्च सर्वेषामविशिष्टमिति। तन्न किं कारणं कारणभेदात्तद्भेदसिद्धेः। प्रतिपुरुषं हि मतिश्रुतावरणक्षयोपशमो बहुधा भिन्नस्तद्भेदाद्बाह्यनिमित्तभेदाच्च श्रुतस्य प्रकर्षाप्रकर्षयोगो भवति, मतिपूर्वकत्वाविशेषेपि।

---

१ उपलभ्येरन्, इत्यपिपाठः। २ कथंचित्कारणसदृशं।

श्रुताच्छ्रुतप्रतिपत्तेर्लक्षणाव्याप्तिरिति चेन्न तस्योपचारतो मतित्वसिद्धेः ॥ १० ॥ स्यान्मतं, यदा शब्दपरिणतपुद्गलस्कंधादाहितवर्णपदवाक्यादिभावाच्चक्षुरादिविषयाच्चाऽऽद्यश्रुतविषयभावमापन्नादविनाभाविनः कृतसंगतिर्जनो घटाज्जलधारणादिकार्यं संबंध्यंतरं प्रतिपद्यते । धूमादेर्वाग्न्यादिद्रव्यं । तदा श्रुताच्छ्रुतप्रतिपत्तिरिति कृत्वा मतिपूर्वलक्षणमव्यापीति । तन्न किं कारणं ? तस्योपचारतो मतित्वसिद्धेः । मतिपूर्वं हि श्रुतं क्वचिन्मतिरित्युपचर्यते । अथवा व्यवहिते पूर्वशब्दो वर्तते । तद्यथा पूर्वं मथुरायाः पाटलीपुत्रमिति । ततः साक्षान्मतिपूर्वं परंपरया वा मतिपूर्वमपि मतिपूर्वग्रहणेन गृह्यते ।

भेदशब्दस्य प्रत्येकं परिसमाप्तिर्भुजिवत् ॥ ११ ॥ यथा देवदत्तजिनदत्तगुरुदत्ता भोज्यंतामिति भुजिः प्रत्येकं परिसमाप्यते । तथेहापि भेदशब्दः प्रत्येकमभिसंबध्यते । द्विभेदमनेकभेदं द्वादशभेदं चेति ।

तत्रांगप्रविष्टमंगबाह्यं चेति द्विविधमंगप्रविष्टमाचारादिद्वादशभेदं बुद्ध्यतिशयर्द्धियुक्तगणधरानुस्मृतग्रंथरचनं ॥१२॥ भगवदर्हत्सर्वज्ञहिमवन्निर्गतवागंगाऽर्थविमलसलिलप्रक्षालितांतःकरणैर्बुद्ध्यतिशयर्द्धियुक्तैर्गणधरैरनुस्मृतग्रंथरचनं, आचारादिद्वादशविधमंगप्रविष्टमित्युच्यते । तद्यथा—आचारः, सूत्रकृतं, स्थानं, समवायो, व्याख्याप्रज्ञप्तिः, ज्ञातृधर्मकथा, उपासकाध्ययनं, अंतकृद्दश, अनुत्तरौपपादिकदश, प्रश्नव्याकरणं, विपाकसूत्रं, दृष्टिवाद, इति । आचारे, चर्याविधानं शुद्ध्यष्टकपंचसमितिगुप्तिविकल्पं कथ्यते । सूत्रकृते, ज्ञानविनयप्रज्ञापना कल्प्याकल्प्यच्छेदोपस्थापना व्यवहारधर्मक्रियाः प्ररूप्यंते । स्थाने, अनेकाश्रयाणामर्थानां निर्णयः क्रियते । समवाये, सर्वपदार्थानां समवायश्चिंत्यते । स चतुर्विधः द्रव्यक्षेत्रकालभावविकल्पैः । तत्र धर्माधर्मास्तिकायलोकाकाशैकजीवानां तुल्या संख्येयप्रदेशत्वादेकेन प्रमाणेन द्रव्याणां समवायनाद् द्रव्यसमवायः । जंबूद्वीपसर्वार्थसिद्ध्यप्रतिष्ठाननरकनंदीश्वरैकवापीनां तुल्ययोजनशतसहस्रविष्कंभप्रमाणेन क्षेत्रसमवायनात् क्षेत्रसमवायः । उत्सर्पिण्यवसर्पिण्योस्तुल्यदशसागरोपमकोटाकोटीप्रमाणात् कालसमवायनात्कालसमवायः । क्षायकसम्यक्त्वकेवलज्ञानकेवलदर्शनयथाख्यातचारित्राणां योभावः तदनुभवस्य तुल्यानंतप्रमाणत्वाद्भावसमवायनाद् भावसमवायः । व्याख्याप्रज्ञप्तौ, षष्टिव्याकरणसहस्राणि, किमस्तिजीवः, ? नास्ति ? इत्येवमादीनि निरूप्यंते । ज्ञातृधर्मकथायां, आख्यानोपाख्यानां बहुप्रकाराणां कथनं । उपासकाध्ययने, श्रावकधर्मलक्षणं । संसारस्यांतः कृतो यैस्तेंतकृतः नमिमंतगसोमिलरामपुत्रसुदर्शनयमवाल्मीकवलीकनिष्कंबलपालांबष्टपुत्रा इत्येते दश वर्धमानतीर्थंकरतीर्थे । एवमृषभादीनां त्रयोविंशतेस्तीर्थेष्वन्येऽन्ये च दश दशानगारा दारुणानुपसर्गान्निर्जित्य कृत्स्नकर्मक्षयादंतकृतः दश, अस्यां वर्ण्यंते इति अंतकृद्दश अथवा,अंतकृतां दश, अंतकृद्दश तस्यामर्हदाचार्यविधिः सिध्यतां च । उपपादो जन्म प्रयोजनं येषां त इमे औपपादिकाः, विजयवैजयंतजयंतापराजितसर्वार्थसिद्धाख्यानि पंचानुत्तराणि । अनुत्तरेष्वौपपादिका अनुत्तरोपपादिकाः । ऋषिदास-धन्य-सुनक्षत्र-कार्तिक-नंद-नंदन-शातिभद्र-अभय-वारिषेण-चिलातपुत्रा इत्येते दश वर्धमानतीर्थकरतीर्थे । एवमृषभादीनां त्रयोविंशतेस्तीर्थेष्वन्येऽन्ये च दश दशानगारा दश दश दारुणानुपसर्गान्निर्जित्य विजयाद्यनुत्तरेषूत्पन्ना इत्येवमनुत्तरौपपादिकाः दशास्यां वर्ण्यंत इत्यनुत्तरौपपादिकदश । अथवानुत्तरौपपादिकानां दश अनुत्तरौपपादिकदश तस्यामायुर्वैक्रियिकानुबंधविशेषः । आक्षेपविक्षेपैर्हेतुनयाश्रितानां प्रश्नानां व्याकरणं, प्रश्नव्याकरणं तस्मिंल्लौकिकवैदिकानामर्थानां निर्णयाः । विपाकसूत्रे सुकृतदुष्कृतानां विपाकश्चिंत्यते । द्वादशमगं दृष्टिवाद इति कौत्कलकांडे विद्धि । कौशिक-हरिश्मश्रु मांछयिक रोमसहारीत मुंडाश्वलायलादीनां क्रियावाददृष्टीनामशीतिशतं । मरीच-कुमार-कपिलोलूक-गार्ग्य-व्याघ्रभूति-वाद्वलि-माठर-मौद्गल्यायनादीनामक्रियावाददृष्टीनां चतुरशीतिः । शकल्य-वाल्कल-कुथुमिसात्यमुद्रि-नारायणकंठ-माध्यंदिन-मौद-पैप्पलाद-वादरायणांबष्टी-कृदौरिकायन-वसु-जैमिन्यादीनामज्ञानकुदृष्टीनां सप्तषष्टि । वशिष्ट-पाराशर-जतुकर्ण-वाल्मीकि-रोमर्षि-सत्यदत्त-व्यासैलापुत्रोपमन्यवैंद्रदत्तायस्थूणादीनां वैनयिकदृष्टीनां द्वात्रिंशत्-देषां दृष्टिशतानां त्रयाणां त्रिषष्ट्युत्तराणां प्ररूपणं निग्रहश्च दृष्टिवादे क्रियते । स पंचविधः परिकर्म, सूत्रं-प्रथमानुयोगः-पूर्वगतं-चूलिकाचेति । तत्र पूर्वगतं चतुर्दशप्रकारं- उत्पादपूर्वं अग्रायणं वीर्यप्रवादं अस्तिनास्तिप्रवादं ज्ञानप्रवादं सत्यप्रवादं आत्मप्रवादं कर्मप्रवादं च प्रत्याख्याननामधेयं विद्यानुवादं कल्याणनाम-

भेयं प्रणवायं क्रियाविशालं लोकबिंदुसारमिति । कालपुद्गलजीवादीनां यदा यत्र यथा च पर्यायेणो त्पादो वर्ण्यते, तदुत्पादपूर्वं । क्रियावादादीनां प्रक्रिया अग्रायणी चांगादीनां स्वसमवायविषयश्च यत्र ख्यापित- स्तदग्रायणं । छद्मस्थकेवलिनां वीर्यं, सुरेंद्रदैत्याधिपानां ऋद्धयो, नरेंद्रचक्रधरबलदेवानां च वीर्यलाभो द्रव्याणां सम्यक्त्वलक्षणं च यत्राभिहितं च तद्वीर्यप्रवादं । पंचानामस्तिकायानामर्थो नयानां चानेकपर्यायैरिदमस्तीदं नास्तीति च कार्त्स्न्येन यत्रावभासितं तदस्तिनास्तिप्रवादं । अथवा षण्णामपि द्रव्याणां भावाभावपर्यायविधिना स्वपरपर्यायाभ्यामुभयनयवशीकृताभ्यामर्पितानर्पितसिद्धाभ्यां यत्र निरूपणं तदस्तिनास्तिप्रवादं । पंचाना- मपि ज्ञानानां प्रादुर्भावविषयायतनानां ज्ञानिनां अज्ञानिनामिंद्रियाणां च प्रधान्येन यत्र विभागो विभावित स्तज्ज्ञानप्रवादं । वाग्गुप्तिसंस्कारकारणप्रयोगो द्वादशधा भाषा वक्तारश्चानेकप्रकारमृषाभिधानं दशप्रकारश्च सत्यसद्भावो यत्र प्ररूपितः तत्सत्यप्रवादं । गुप्तिर्वक्ष्यमाणा । वाक्संस्कारकारणानि शिरः कंठादीनि अष्टौ स्थानानि । वाक्प्रयोगः शुभेतरलक्षणो वक्ष्यते । अभ्याख्यानकलहपैशुन्यासंबद्धप्रलापरत्यरत्युपधिनिकृत्य प्रणतिमोषसम्यग्दर्शनमिथ्यादर्शनात्मिका भाषा द्वादशधा । हिंसादेः कर्मणः कर्तुर्विरतस्य विरताविरतस्य वाऽयमस्य कर्तेत्यभिधानमभ्याख्यानं । कलहः प्रतीतः । पृष्टतो दोषाविष्करणं पैशुन्यं । धर्मार्थकाममोक्षा संबद्धा वाग्, असंबद्धप्रलापः । शब्दादिविषयदेशादिषु रत्युत्पादिका रतिवाक् । तेष्वेवारत्युत्पादिका, अरतिवाक् । यां वाचं श्रुत्वा परिग्रहार्जनरक्षणादिष्वासज्यते सोपधिवाक् । वणिग्व्यवहारे यामवधार्य निकृतिप्रवण आत्मा भवति सा निकृतिवाक् । यां श्रुत्वा तपोविज्ञानाधिकेष्वपि न प्रणमति सा प्रणतिवाक् । यां श्रुत्वा स्तेये वर्तते सा मोषवाक् । सम्यङ्मार्गस्योपदेष्ट्री सा सम्यग्दर्शनवाक् । तद्विपरीता मिथ्यादर्शनवाक् । वक्तारश्चा- ऽऽविष्कृतवक्तृत्वपर्याया द्वींद्रियादयः । द्रव्यक्षेत्रकालभावाश्रयमनेकप्रकारमनृतं । दशविधः सत्यसद्भावः— नाम-रूप-स्थापना-प्रतीत्य-संवृति-संयोजना जनपद-देश-भाव-समय-सत्यभेदेन । तत्र सचेतनेतरद्रव्यस्या- सत्यप्यर्थे यद्व्यवहारार्थं संज्ञाकरणं तन्नामसत्यं, इंद्र इत्यादि । यदर्थासन्निधानेपि रूपमात्रेणोच्यते तद्रूपसत्यं । यथा चित्रपुरुषादिषु असत्यपि चैतन्योपयागादावर्थे पुरुष इत्यादि । असत्यप्यर्थे यत्कार्यार्थं स्थापितं द्यूताक्ष निक्षेपादिषु तत्स्थापनासत्यं । आदिमदनादिमदौपशमिकादीन् भावान् प्रतीत्य यद्वचनं तत्प्रतीत्यसत्यं । यल्लोके संवृत्यानीतं वचस्तत्संवृतिसत्यं, यथा पृथिव्याद्यनेककारणत्वेपि सति, पंके जातं पंकजमित्यादि । धूप चूर्णवासानुलेपनप्रघर्षादिषु पद्म-मकर-हंस-सर्वतोभद्र-क्रौंचव्यूहादिषु वा सचेतनेतरद्रव्याणां यथा भाग- विधिसंनिवेशाविर्भावकं यद्वचस्तत्संयोजनासत्यं । द्वात्रिंशत्सहस्रजनपदेष्वार्यानार्यभेदेषु धर्मार्थकाममोक्षाणां प्रापकं यद्वचस्तज्जनपदसत्यं । ग्रामनगरराजगणपाखंडजातिकुलादिधर्माणामुपदेष्टृ यद्वचस्तद्देशसत्यं । छद्मस्थज्ञानस्य द्रव्ययाथात्म्यादर्शनेपि संयतस्य संयतासंयतस्य वा स्वगुणपरिपालनार्थं प्रासुकमिदमप्रासुक- मित्यादि यद्वचस्तद्भावसत्यं । प्रतिनियतषट्तयद्रव्यपर्यायाणामागमगम्यानां याथात्म्याविष्करणं तद्वच स्तत्समयसत्यं । यत्रात्मनोऽस्तित्वनास्तित्वनित्यत्वानित्यत्वकर्तृत्वभोक्तृत्वादयो धर्माः षड्जीवनिकायभेदाश्च युक्तितो निर्दिष्टाः, तदात्मप्रवादं । बंधोदयोपशमनिर्जरापर्याया अनुभवप्रदेशाधिकरणानि स्थितिश्च जघन्य मध्यमोत्कृष्टा यत्र निर्दिश्यते तत्कर्मप्रवादं । व्रत-नियम-प्रतिक्रमण-प्रतिलेखन-तपः-कल्पोपसर्गाचार-प्रतिमा विराधनाराधनविशुद्ध्युपक्रमाः श्रामण्यकारणं च परिमितापरिमितद्रव्यभावप्रत्याख्यानं च यत्राख्यातं, तत्प्र- त्याख्याननामधेयं । समस्ता विद्या, अष्टौ महानिमित्तानि तद्विषयो रज्जुराशिविधिः क्षेत्रं श्रेणी लोकप्रतिष्ठा संस्थानं समुद्घातश्च यत्र कथ्यते तद्विद्यानुवादं । तत्रांगुष्टप्रसेनादीनामल्पविद्यानां सप्तशतानि रोहिण्यादीनां महाविद्यानां पंचशतानि । अंतरिक्ष-भौमांग-स्वर-स्वप्न-लक्षण-व्यंजन-छिन्नानि-अष्टौ-महानिमित्तानि तेषां विषयो लोकः क्षेत्रमाकाशं पटसूत्रवच्चर्मावयववद्वानुपूर्व्येणोर्ध्वाधस्तिर्यग्व्यवस्थिता असंख्याता आकाशप्रदेशभूमयः श्रेणय उक्ताः । अलोकाकाशस्यानंतस्य बहुमध्ये सुप्रतिष्ठकसंस्थानो लोकः । ऊर्ध्वमधस्तिर्यक्मृदंगवेत्रा- सनझल्लर्याकृतिः । तनुवातवलयपरिक्षिप्तमूर्ध्वाधस्तिर्यक्षु प्रतरवृत्तश्चतुर्दशरज्ज्वायामो मेरुप्रतिष्ठवज्रवैडूर्यपट- लांतररुचकसंस्थिता अष्टावाकाशप्रदेशा लोकमध्यं । लोकमध्याद्यावदैशानांतस्तावदे कारज्जुरर्धं च । माहेंद्रांते तिस्रः । ब्रह्मलोकांतेऽर्धचतुर्थाः । कापिष्टांते चतस्रः । महाशुक्रांतेऽर्धपंचमाः । सहस्रांते पंच । प्राणतांतेऽर्धषष्ठाः ।

अच्युतांते षट् । आलोकात्सप्त । तथा लोकमध्यादधो यावच्छर्करापृथिव्यंतस्तावदेका रज्जुः । ततोधः पृथिवीनां पंचानां प्रत्येकमंतेऽन्ते रज्जुरेकैका वृद्धा ततोऽधस्तमस्तमःप्रभाया आलोकांतादेका रज्जुः । एवं सप्ताधो रज्जवः । घनोदधिघनानिलतनुवातवलयानि त्रीणि यैरयंपरिक्षिप्तः सर्वः समंताल्लोकः । त्रयाणामधोलोकदिग्विदिक्पार्श्वभाविनां प्रत्येकं विस्तारो विंशतियोजनसहस्राणि । ततः उपरि क्रमतो हानिवशात्तिर्यग्लोकभावि दिग्विदिक्पार्श्वेष्वष्टासु प्रत्येकं त्रीण्यपि वलयानि, पंचचतुस्त्रियोजनविस्तीर्णानि । पुनरुपरि वृद्धिवशाद्ब्रह्मलोके दिग्विदिक्पार्श्वेष्वष्टासु प्रत्येकं त्रीण्यपि वलयानि सप्तपंचचतुर्योजनविस्तीर्णानि । पुनर्हानिवशाल्लोकाग्रेऽष्टास्वपि दिग्विदिक्पार्श्वेषु प्रत्येकं त्रीण्यपि वलयानि पंचचतुस्त्रियोजनविस्तीर्णानि दंडवलयानि पुनरुपरि अधश्च त्रीण्यपि । उपरि लोकाग्रे घनोदधेर्द्विगव्यूती, घनानिलस्य क्रोशः, तनुवातस्य देशोनःक्रोशो विस्तारः । अधः कलकलपृथिवीपर्यंते घनोदधेः सप्त, घनानिलस्य पंच, तनुवातस्य चत्वारि योजनानि विस्तारः । अधः लोकमूले दिग्विदिक्षु विष्कंभः सप्तरज्जवः । तिर्यग्लोके रज्जुरेका । ब्रह्मलोके पंच । पुनर्लोकाग्रे रज्जुरेका लोकमध्यादधोरज्जुमवगाह्य शर्करांते अष्टास्वपि दिग्विदिक्षु विष्कंभः रज्जुरेका । रज्ज्वाश्च षट्सप्तभागास्ततो रज्जुमवगाह्य वालुकांते द्वे रज्जू, रज्ज्वाश्च पंचसप्तभागाः । ततो रज्जुमवगाह्य पंकांते तिस्रो रज्जवः, रज्ज्वाश्चत्वारः सप्तभागाः । ततो रज्जुमवगाह्य धूमांते चतस्रो रज्जवः, रज्ज्वाश्च त्रयः सप्तभागाः । ततो रज्जुमवगाह्य तमःप्रभांते पंचरज्जवः, रज्ज्वाश्च द्वौ सप्तभागौ । ततो रज्जुमवगाह्य तमस्तमःप्रभांते षड्रज्जवः, रज्ज्वाः सप्तभागश्चैकः । ततो रज्जुमवगाह्य कलंकलांते विष्कंभः सप्तरज्जवः । लब्धतलादुपरि रज्जुमुत्क्रम्य विष्कंभो द्वे रज्जू, रज्ज्वाश्चैकः सप्तभागः । ततो रज्जुमुत्क्रम्य तिस्रो रज्जवः, रज्ज्वाश्च द्वौ सप्तभागौ । ततो रज्जुमुत्क्रम्य चतस्रो रज्जवः, रज्ज्वाश्च त्रयः सप्तभागाः । ततोर्धरज्जुमुत्क्रम्य रज्जवः पंच । ततोर्धरज्जुमुत्क्रम्य चतस्रो रज्जवः, रज्ज्वाश्च त्रयःसप्तभागाः । ततो रज्जुमुत्क्रम्य तिस्रो रज्जवः, रज्ज्वाश्च द्वौ सप्तभागौ । ततो रज्जुमुत्क्रम्य द्वे रज्जू, रज्ज्वाश्चैकः सप्तभागः । ततो रज्जुमुत्क्रम्य लोकांते रज्जुरेका विष्कंभः । एष रज्जुविधिः ।

हंतेर्गमिक्रियात्वात्संभूयात्मप्रदेशानां च बहिरुद्गमनं समुद्घातः । स सप्तविधः । वेदनाकषायमारणांतिकतेजोविक्रियाऽऽहारककेवलिविषयभेदात् । तत्र वातिकादिरोगविषादिद्रव्यसंबंधः संतापापादितवेदनाकृतो वेदनासमुद्घातः । द्वितीयप्रत्ययप्रकर्षोत्पादितक्रोधादिकृतः कषायसमुद्घातः । औपक्रमिकानुपक्रमायुः क्षयाविर्भूतमरणांतप्रयोजनो मारणांतिकसमुद्घातः । जीवानुग्रहोपघातप्रवणतेजःशरीरनिर्वर्तनार्थस्तेजससमुद्घातः । एकत्वपृथक्त्वनानाविधविक्रियशरीरवाक्प्रचारप्रहरणादिविक्रियाप्रयोजनो वैक्रियिकसमुद्घातः । अथोक्तविधिनाऽल्पसावद्यसूक्ष्मार्थग्रहणप्रयोजनाऽऽहारकशरीरनिर्वर्त्यर्थ आहारकसमुद्घातः । वेदनीयस्य बहुत्वादल्पत्वाच्चायुषो नाभोगपूर्वकमायुःसमकरणार्थं द्रव्यस्वभावत्वात् सुराद्रव्यस्य फेनवेगवुद्वुदाविर्भावोपशमनवद्देहस्थात्मप्रदेशानां बहिःसमुद्घातनं केवलिसमुद्घातः । आहारकमारणांतिकसमुद्घातावेकदिक्कौ । यत आहारकशरीरमात्मा निर्वर्तयन् श्रेणिगतित्वादेकदिक्कानात्मदेशानसंख्यातान्निर्गमय्य—आहारकशरीरमरत्निमात्रं निर्वर्तयति । अन्यक्षेत्रसमुद्घातकारणाभावात्, यत्रानेन नरकादावुत्पत्तव्यं तत्रैव मारणांतिकसमुद्घातेनाऽऽत्मप्रदेशा एकदिक्काः समुद्गम्यंते नान्यक्षेत्रे, अतस्तावेकदिक्कौ । शेषाः पंच समुद्घाताः षड्दिक्काः । यतो वेदनादिसमुद्घातवशाद्बहिर्निःसृतानामात्मप्रदेशानां पूर्वापरदक्षिणोत्तरोर्ध्वाधोदिक्षु गमनमिष्टं श्रेणिगतित्वादात्मप्रदेशानां । वेदना-कषाय-मारणांतिक-तेजो-वैक्रियिकाऽऽहारकसमुद्घाताः षट् संख्येयसमयिकाः । केवलिसमुद्घातः अष्टसमयिकः । दंड कपाट प्रतर लोकपूरणानि चतुर्षु समयेषु, पुनः प्रतर कपाट दंड स्वशरीरानुप्रवेशाश्चतुर्षु इति । रविशशिग्रहनक्षत्रतारागणानां चारोपपादगतिविपर्ययफलानि शकुनव्याहृतं, अर्हद्बलदेव-वासुदेव-चक्रधरादीनां गर्भावतरणादिमहाकल्याणानि च यत्रोक्तानि तत्कल्याणनामधेयं । कायचिकित्साद्यष्टांगं आयुर्वेदः भूतिकर्मजांगुलिप्रक्रमः प्राणापानविभागोपि यत्र विस्तारेण वर्णितस्तत्प्राणावायं । लेखादिकाः कला, द्वासप्ततिर्गुणाश्च, चतुःषष्टि स्त्रैण्याः, शिल्पानि काव्यगुणदोषक्रियाछंदोविचितिक्रिया क्रियाफलोपभोक्तारश्च यत्र व्याख्यातास्तत्क्रियाविशालं । यत्राष्टौ व्यवहाराश्चत्वारि बीजानि परिकर्मराशिक्रियाविभागश्च सर्वश्रुतसंपदुपदिष्टा तत्खलु लोकबिंदुसारं ।

आरातीयाचार्यकृतांगार्थप्रत्यासन्नरूपमंगबाह्यं ॥१३॥ यद्गणधरशिष्यैः प्रशिष्यैरारातीयैरधिगतश्रुतार्थतत्त्वैः कालदोषादल्पमेधायुर्बलानां प्राणिनामनुग्रहार्थमुपनिबद्धं संक्षिप्तांगार्थवचनविन्यासं तदंगबाह्यं।

तदनेकविधं कालिकोत्कालिकादिविकल्पात् ॥१४॥ तदंगबाह्यमनेकविधं कालिकमुत्कालिकमित्येवमादिविकल्पात्। स्वाध्यायकाले नियतकालं कालिकं। अनियतकालमुत्कालिकं। तद्भेदा उत्तराध्ययनादयोऽनेकविधाः। अत्राह—अनुमानादीनां पृथगनुपदेशः किमर्थः ?

अनुमानादीनां पृथगनुपदेशः श्रुतावरोधात् ॥ १५ ॥ यस्मादेतान्यनुमानादीनि श्रुतेंतर्भवंति तस्मात्तेषां पृथगुपदेशो न क्रियते। तद्यथा—प्रत्यक्षपूर्वकं त्रिविधमनुमानं, पूर्ववत्, शेषवत्, सामान्यतोदृष्टं चेति। तत्र येनाग्नेर्निःसरन् पूर्वं धूम दृष्टः, स प्रसिद्धाग्निधूमसंबंधाहितसंस्कारः पश्चाद्धूमदर्शनादस्त्यत्राग्निरिति पूर्ववदग्निं गृह्णातीति पूर्ववदनुमानं। तथा येन पूर्वं विषाणविषाणिनोः संबंध उपलब्धः, तस्य विषाणरूपदर्शनाद्विषाणिन्यनुमानं शेषवत्। तथा देवदत्तस्य देशांतरप्राप्तिं गतिपूर्विकां दृष्ट्वा संबंध्यतरे सवितरि देशांतरप्राप्तिदर्शनाद्गतेरत्यंतपरोक्षाया अनुमानं सामान्यतो दृष्टं। तदेतत्त्रितयमपि स्वप्रतिपत्तिकालेऽनक्षरश्रुतं, परप्रतिपत्तिकालेऽक्षरश्रुतं। यथा गौस्तथागवयः केवलं सास्नारहित इत्युपपन्नमपि स्वपरप्रतिपत्तिविषयत्वादक्षरानक्षरश्रुतेंऽतर्भवति। तथा शब्दमपि प्रमाणं श्रुतमेव। ऐतिह्यस्यं चेतीह स भगवान् ऋषभः इति परंपरीणपुरुषागमाद्गृह्यते इति श्रुतेंतर्भावः। प्रकृतिपुरुषो दिवा न भुक्ते, अथ च जीवतीत्यर्थादापन्नं रात्रौ भुंक्ते इत्यर्थापत्तिः। चत्वारः प्रस्था आढकमिति सति ज्ञाने आढकं दृष्ट्वा संभवत्यर्धाढकं कुडुवो वेति प्रतिपत्तिसंभवः। तृणगुल्मादीनां स्नेहपर्णफलाद्यभावं दृष्ट्वानुमीयते नूनमत्र न वृष्टः पर्जन्य इत्यभावः। एतेषामप्यर्थापत्त्यादीनामनुक्तानामनुमानसमानमिति पूर्ववच्छ्रुतांतर्भावः।

व्याख्यातं परोक्षं प्रत्यक्षमिदानीं वक्तव्यं। तद्द्वेधा देशप्रत्यक्षं सर्वप्रत्यक्षं च। देशप्रत्यक्षं, अवधिमनःपर्ययज्ञाने। सर्वप्रत्यक्षं केवलं। यद्येवमिदमेव तावदवधिज्ञानं त्रिप्रकारप्रत्यक्षस्याऽऽद्यं व्याक्रियतां। इत्यत्रोच्यते–व्याख्यातमस्य लक्षणं। आत्मप्रसादविशेषे सत्यन्वर्थसंज्ञाकरणादवधीयते तदित्यवधिज्ञानमिति। यद्येवं तस्येदानीं भेदो वक्तव्यः। उच्यते–द्विविधोऽवधिः, भवगुणप्रत्ययभेदात्। देशसर्वावधिभेदाद्वा। यद्येवं त्रैविध्यं नोपपद्यते ?, देशावधिःपरमावधिः सर्वावधिश्चेति ? नैष दोषः सर्वशब्दस्य निरवशेषवाचित्वात्सर्वावधिमपेक्ष्य परमावधेर्देशावधित्वमेवेति वक्ष्यामः। तत्र योसौ भवप्रत्ययस्तत्प्रतिपादनार्थमाह—

भवप्रत्ययोऽवधिर्देवनारकाणां ॥ २१ ॥

भव इत्युच्यते को नाम भवः ?

आयुर्नामकर्मोदयविशेषापादितपर्यायो भवः ॥ १ ॥ आत्मनो यः पर्यायः, आयुषो नाम्नश्चोदयविशेषाच्छेपकारणापेक्षादाविर्भवति साधारणलक्षणो भव इत्युच्यते।

प्रत्ययशब्दस्यानेकार्थसंभवे विवक्षातो निमित्तार्थगतिः ॥ २ ॥ अयं प्रत्ययशब्दोनेकार्थः। क्वचिज्ज्ञाने वर्तते 'यथार्थाभिधानप्रत्यया' इति। क्वचिच्छपथे वर्तते यथा परद्रव्यहरणादिषु सत्युपालंभे प्रत्ययोऽनेन कृतः इति। क्वचिद्धेतौ वर्तते, यथाऽविद्याप्रत्ययाः संस्कारा इति। तत्रेह विवक्षातो निमित्तार्थो वेदितव्यः। भवप्रत्ययो भवनिमित्त इति।

क्षयोपशमाभाव इति चेन्न तस्मिन् सति सद्भावात्खे पतत्त्रिगतिवत् ॥ ३ ॥ स्यादेतद्यदि तत्र भवनिमित्तोवधिः कर्मणः क्षयोपशमोऽनर्थकः इति। तन्न किं कारणं। तस्मिन् सति तद्भावात्। खे पतत्त्रिगतिवत्। यथाकाशे सति पक्षिणो गतिर्भवति तथावधिज्ञानावरणक्षयोपशमेंऽतरंगे हेतौ सत्यवधेर्भावः, भवस्तु बाह्यो हेतुः।

इतरथा ह्यविशेषप्रसंगः ॥४॥ यदि भव एव हेतुः स्यात्सर्वेषां देवनारकाणां तुल्य इत्यवधेरविशेष-

---

१ भान्यविशेषाः। २ मेघः। ३ भवप्रत्ययो गुणप्रत्ययश्चेत्यर्थः। ४ शपथः। ५ कारणानि। ६ आकाश

प्रसंगः स्यात्? इष्यते च प्रकर्षाप्रकर्षभावेन वृत्तिः। कथं पुनर्भवो हेतुः, ? इतिचेद्व्रतानियमाद्यभावात्। यथा तिरश्चां मनुष्याणां चाऽहिंसादिव्रतनियमहेतुकोवधिर्न तथा देवानां नारकाणां चाऽहिंसादिव्रतनियमाभिसंधिरस्ति। कुतो भवं प्रतीत्य कर्मोदयस्य तथाभावात्। तस्मात्तत्र भव एव बाह्यसाधनमित्युच्यते।

अविशेषात्सर्वप्रसंग इतिचेन्न सम्यगधिकारात् ॥ ५ ॥ स्यादेतत्, देवनारकाणामित्यविशेषवचनान्मिथ्यादृष्टीनामप्यवधिप्रसंग इति। तन्न किं कारणं सम्यगधिकारात्। सम्यग्दर्शनसम्यग्ज्ञानमिति वर्तते, तत्संबंधात्सम्यग्दृष्टीनामवधिः, मिथ्यादृष्टीनां विभंगो वेदितव्यः। अथवा वक्ष्यमाणाभिसंबंधान्न सर्वप्रसंगः। वक्ष्यते हि एतन्मतिश्रुतावधयो विपर्ययश्चेति। अथवा व्याख्यानाद्विशेषप्रतिपत्तिः।

आगमे प्रसिद्धेर्नारकशब्दस्य पूर्वनिपात इति चेन्नोभयलक्षणप्राप्तत्वाद्देवशब्दस्य ॥ ६ ॥ स्यादेतन्नारकशब्दस्य पूर्वनिपातेन भवितव्यं। कुतः? आगमे प्रसिद्धेः। आगमे हि जीवस्थानादिसदादिष्वनुयोगद्वारेणाऽऽदेशवचने नारकाणामेवादौ सदादिप्ररूपणा कृता, ततो नारकशब्दस्य पूर्वनिपातेन भवितव्यमिति। तन्न किं कारणं उभयलक्षणप्राप्तत्वाद्देवशब्दस्य। देवशब्दो हि अल्पाजभ्यर्हितश्चेति वृत्तौ पूर्वप्रयोगार्हः। आगमे वाक्यविषयो निर्देश इति नास्ति नियमः। आहोक्तं भवतेष्यते प्रकर्षाप्रकर्षभावेन वृत्तिरिति तत्कथं इति चेदुच्यते—देवेषु तावद्भवनवासिनां दशप्रकाराणामपि जघन्योवधिः पंचविंशति योजनानि। उत्कृष्टोऽ सुराणामसंख्याता योजनकोटिकोटयोधः। ऊर्ध्वमृजुविमानस्योपरि पर्यंतः। नागादिकुमाराणां नवविधानामप्युत्कृष्टोवधिः, अधोऽसंख्यातानि योजनसहस्राणि। ऊर्ध्वं मंदिरचूलिकाया उपरिपर्यंतस्तिर्यगसंख्यातानि योजनसहस्राणि। व्यंतराणामष्टविधानां जघन्योवधिः पंचविंशतियोजनानि। उत्कृष्टोप्यसंख्यातानि योजनसहस्राणि, अधः। ऊर्ध्वं स्वविमानस्योपरिपर्यंतस्तिर्यगसंख्याता योजनकोटीकोटयः। ज्योतिषां जघन्योवधिरधः संख्येयानि योजनानि। उत्कृष्टश्चाऽसंख्येयानि योजनसहस्राणि। ऊर्ध्वमात्मीयविमानस्योपरिपर्यंतस्तिर्यगसंख्याता योजनकोटीकोटयः। वैमानिकेषु सौधर्मैशानीयानां जघन्योवधिर्ज्योतिषामुत्कृष्टः। रत्नप्रभाया अधश्चरम उत्कृष्टः। सानत्कुमारमाहेंद्राणां जघन्योवधिः रत्नप्रभाया अधश्चरमः उत्कृष्टः। शर्कराप्रभाया अधश्चरमः। ब्रह्मब्रह्मोत्तरलांतवकापिष्ठानां जघन्योवधिः। शर्कराप्रभाया अधश्चरम उत्कृष्टः, वालुकाप्रभाया अधश्चरमः। शुक्रमहाशुक्रसतारसहस्राणां जघन्योवधिः, वालुका प्रभाया अधश्चरमः, उत्कृष्टः। पंकप्रभाया अधश्चरमः।

आनतप्राणताऽऽरणाऽच्युतानां जघन्योवधिः पंकप्रभाया अधश्चरम उत्कृष्टः। धूमप्रभाया अधश्चरमः। नवानां ग्रैवेयिकानां जघन्योवधिर्धूमप्रभाया अधश्चरम उत्कृष्टः। तमःप्रभाया अधश्चरमः। नवानामनुदिशानां पंचानुत्तरविमानवासिनां च लोकनालिपर्यंतोऽवधिः। सौधर्मादीनामनुत्तरांतानामूर्ध्वं स्वविमानस्योपरिपर्यंतः, तिर्यगसंख्याता योजनकोटीकोट्यः। अथैषां कालद्रव्यभावेषु कोवधिः? इत्यत्रोच्यते—योस्य यावत्क्षेत्रावधिस्तस्य तावदाकाशप्रदेशपरिच्छिन्ने कालद्रव्ये भवतः। तावत्सु असंख्येष्वतीतेष्वनागतेषु च ज्ञानं वर्तते तावदसंख्यातभेदेषु अनंतप्रदेशेषु पुद्गलस्कंधेषु जीवेषु च सकर्मकेषु भावतः स्वविषयपुद्गलस्कंधानां रूपादिविकल्पेषु जीवपरिणामेषु चौदयिकौपशमिकक्षयोपशमिकेषु वर्तते। कुतः? पौद्गलिकत्वादेषां। नारकेषु योजनमर्धगव्यूतहीनमागव्यूतात्। तद्यथा रत्नप्रभायां योजनमवधिः, अधः। द्वितीयायामधः, अर्धचतुर्थानि गव्यूतानि। तृतीयायामधः त्रीणि गव्यूतानि। चतुर्थ्यामधोऽर्धतृतीयानि गव्यूतानि। पंचम्यां द्वे गव्यूते। षष्ठ्यामधोऽर्धाधिकं गव्यूतं सप्तम्यामधो गव्यूतं। सर्वासु पृथिवीषु नारकाणामवधिरुपरि आत्मीयनरकावासोंतस्तिर्यगसंख्याता योजनकोटीकोट्यः। कालद्रव्यभावपरिमाणं पूर्ववद्वेदितव्यं। यदि भवप्रत्ययोवधिर्देवनारकाणामथ क्षयोपशमहेतुकः केषां? इत्यत। आह—

क्षयोपशमनिमित्तःषड्विकल्पः शेषाणां ॥ २२ ॥

अवधिज्ञानावरणस्य देशघातिस्पर्धकानामुदये सति सर्वघातिस्पर्धकानामुदयाभावः क्षयः। तेषा-

---

१ असिंत।

भेदाऽनुदयप्राप्तानां सदवस्थोपशमः । तौ निमित्तमस्येति क्षयोपशमनिमित्तः स शेषाणां वेदितव्यः । के पुनः शेषाः ? मनुष्या स्तिर्यंचश्च ।

शेषग्रहणादविशेषप्रसंग इतिचेन्न तत्सामर्थ्यविरहात् ॥ १ ॥ स्यादेतद्देवनारकेभ्योऽन्ये-शेषाः, ततस्तेषामविशेषात्सर्वेषां तिरश्चां मनुष्याणां वाऽवधि प्रसंगः । इति । तन्न किं कारणं तत्सामर्थ्य विरहात् । न ह्यसंज्ञिनामपर्याप्तकानां तत्सामर्थ्यमस्ति । न संज्ञिनां पर्याप्तकानां च सर्वेषां । केषां तर्हि ?

यथोक्तनिमित्तसंनिधाने सति शांतक्षीणकर्मणां तस्योपलब्धेः ॥ २ ॥ यथोक्तसम्यग्दर्शनादिनिमित्तसंनिधाने सति शांतक्षीणकर्मणां तस्योपलब्धिर्भवति । ननु सर्वस्य क्षयोपशमनिमित्तः, तत्र किमुच्यते क्षयोपशमनिमित्तः शेषाणामिति ?

सर्वस्य क्षयोपशमनिमित्तत्वे तद्वचनं नियमार्थं अब्भक्षवत् ॥ ३ ॥ यथा न कश्चिदपो न भक्षयति इत्यब्ग्रहणं नियमार्थं क्रियते । अप एव भक्षयतीति । तथा सर्वक्षयोपशमनिमित्तत्वे क्षयोपशमग्रहणं नियमार्थं । क्षयोपशमनिमित्त एव न भवनिमित्त इति । स एषोवधिः षड्विकल्पः । कुतः ?

अनुगाम्यननुगामिवर्धमानहीयमानाऽवस्थिताऽनवस्थितभेदात्षड्विधः ॥ ४ ॥ कश्चिदवधिः, भास्करप्रकाशवद्गच्छंतमनुगच्छति । कश्चिन्नानुगच्छति तत्रैवातिपतति । उन्मुखप्रश्नादेशिकपुरुषवचनवत् । अपरोऽवधिः,अरणिनिर्मथनोत्पन्नशुष्कपत्रोपचीयमानेंधननिचयसमिद्धपावकवत्, सम्यग्दर्शनादिगुणविशुद्धिपरिणामसंनिधानाद्यत्परिमाण उत्पन्नस्ततो वर्धते आऽसंख्येयलोकेभ्यः । अपरोऽवधिः परिच्छिन्नोपादानसंतत्यग्निशिखावत्सम्यग्दर्शनादिगुणहानिसंक्लेशपरिणामविवृद्धियोगाद्यत्प्रमाण उत्पन्नस्ततो हीयते, आ अंगुलस्याऽसंख्येयभागात् । इतरोवधिः सम्यग्दर्शनादिगुणावस्थानाद्यत्परिमाण उत्पन्नस्तत्परिमाण एवावतिष्ठते न हीयते नापि वर्धते लिंगवत् । आभवक्षयादाकेवलज्ञानोत्पत्तेर्वा । अन्योवधिः सम्यग्दर्शनादिगुणवृद्धिहानियोगाद्यत्परिमाण उत्पन्नस्ततो वर्धते यावदनेन वर्धितव्यं । हीयते च यावदनेन हातव्यं वायुवेगप्रेरितजलोर्मिवत् । एवं षड्विकल्पोवधिः भवति ।

पुनरपरेऽवधेस्त्रयोभेदा देशावधिः परमावधिः सर्वावधिश्चेति ॥ ५ ॥ तत्र देशावधिस्त्रेधा जघन्य उत्कृष्टः अजघन्योत्कृष्टश्चेति[1] । तथा परमावधिरपि त्रिधा । सर्वावधिरविकल्पत्वादेक एव । उत्सेधांगुलासंख्येयभागक्षेत्रो देशावधिर्जघन्यः । उत्कृष्टः कृत्स्नलोकः । तयोरंतराले संख्येयविकल्पः, अजघन्योत्कृष्टः । परमावधिर्जघन्यः एकप्रदेशाधिकलोकक्षेत्रः । उत्कृष्टोऽसंख्येयलोकक्षेत्रः । अजघन्योत्कृष्टो मध्यमक्षेत्रः । उत्कृष्टपरमावधिक्षेत्राद्बहिरसंख्यातक्षेत्रः सर्वावधिः । वर्धमानोः हीयमान अवस्थितः अनवस्थितः अनुगामी अननुगामी अप्रतिपाती प्रतिपातीत्येतेऽष्टौ भेदा देशावधेर्भवंति । हीयमानप्रतिपातिभेदवर्जा इतरे षड्भेदा भवंति परमावधेः । अवस्थितोऽनुगाम्यननुगाम्यप्रतिपातीत्येते चत्वारो भेदाः सर्वावधेः । तत्र षडाद्या उक्तलक्षणाः । प्रतिपातीति विनाशी विद्युत्प्रकाशवत् । तद्विपरीतोऽप्रतिपाती । तत्र देशावधेः सर्वजघन्यस्य क्षेत्रमुत्सेधांगुलस्याऽसंख्येयभागः । आवलिकाया असंख्येयभागः कालः । अंगुलस्याऽसंख्येयभागक्षेत्रप्रदेशप्रमाणं द्रव्यं, तत्प्रमाणपरिच्छिन्नेष्वसंख्येयेषु स्कंधेष्वनंतप्रदेशेषु ज्ञानं वर्तते । स्वविषयस्कंधगतानंतवर्णादिविकल्पो भावः । तस्य वृद्धिरुच्यते-प्रदेशोत्तरक्षेत्रवृद्धिर्नास्त्येकजीवस्य, नानाजीवानां तु प्रदेशोत्तरक्षेत्रे वृद्धिर्भवति आसर्वलोकात् । एकजीवस्य त्वंगुलासंख्येयभागादूर्ध्वं विशुद्धिवशान्मंडूकप्लुत्याऽगुंलासंख्येयभागक्षेत्रवृद्धिर्भवति आसर्वलोकात् । नानाजीवा अपि प्रदेशोत्तरवृद्ध्या तावद्वर्धयंते यावदंगुलस्यासंख्येयभागः । कालवृद्धिरेकजीवस्य नानाजीवानां वा मौलादावलिकाऽसंख्येयभागात् कश्चिदेकसमयोत्तरा कश्चिद्द्विसमयोत्तरा कश्चित्संख्येयसमयोत्तरा कश्चिदसंख्येयसमयोत्तरा यावदावलिकाया असंख्येयभागः । सेयं क्षेत्रकालवृद्धिः कया ? वृद्ध्या चतुर्विधया संख्येयभागवृद्ध्यासंख्येयभागवृद्ध्या संख्येयगुणवृद्ध्यासंख्येयगुणवृद्ध्या वा । एवं द्रव्यमपि वर्धमानचतुर्विधया वृद्ध्या वर्धते । भाववृद्धिः षोढा-अनंतभागवृद्धिः, असंख्येयभागवृद्धिःसंख्येयभागवृद्धिः

---

१ जघन्य उत्कृष्टः अजघन्योत्कृष्टश्च ।

संख्येयगुणवृद्धिरसंख्येयगुणवृद्धिरनंतगुणवृद्धिरिति। अनया क्षेत्रकालद्रव्यभाववृद्ध्योक्तया आसर्वलोकात् वृद्धिरवसेया। हानिरपि तथैव। योंगुलसंख्येयभागक्षेत्रोवधिस्तस्यावलिकायाः संख्येयभागः कालः। अंगुलसंख्येयभागक्षेत्राकाशप्रदेशप्रमाणं द्रव्यं। भावः पूर्वादनंतो वा स्यादसंख्येयो वा स्यात्संख्येयो वा स्यात्। योंगुलमात्रक्षेत्रोवधिस्तस्येषदूना आवलिका कालः। द्रव्यभावौ पूर्ववत्। योऽगुलपृथक्त्वक्षेत्रोवधिस्तस्याऽऽवलिकालः। द्रव्यभावौ पूर्ववत्। यो हस्तप्रमाणक्षेत्रोवधिस्तस्याऽऽवलिकापृथक्त्वं कालः। द्रव्यभावौ पूर्ववत्। यो गव्यूतिमात्रक्षेत्रोवधिस्तस्य साधिकोच्छ्वासः कालः। द्रव्यभावौ पूर्ववत्। यो योजनमात्रक्षेत्रोवधिस्तस्य भिन्नमुहूर्तः कालः द्रव्यभावौ पूर्ववत्। यः पंचविंशतियोजनप्रमाणक्षेत्रोवधिस्तस्येषदूनो दिवसः कालः, द्रव्यभावौ पूर्ववत्। यो भरतक्षेत्रमात्रोवधिः, तस्य अर्धमासः कालः। द्रव्याभावौ पूर्ववत्। यो जंबूद्वीपमात्रक्षेत्रोवधिः, तस्य साधिकोमासः कालः। द्रव्यभावौ पूर्ववत्। यो मनुष्यलोकमात्रक्षेत्रोवधिः, तस्य संवत्सरः कालः। द्रव्यभावौ पूर्ववत्। यो रुचकांतप्रमाणक्षेत्रोवधिः, तस्य संवत्सरपृथक्त्वं कालः। द्रव्यभावौ पूर्ववत्। यः संख्येयद्वीपसमुद्रक्षेत्रोवधिः, तस्य संख्येयाः संवत्सराः कालः। द्रव्यभावौ पूर्ववत्। योऽसंख्येयद्वीपसमुद्रक्षेत्रोवधिः तस्याऽसंख्येयाः संवत्सराः कालः। द्रव्यभावौ पूर्ववत्। एवं जघन्योत्कृष्टस्तिर्यङ्नराणां देशावधिरुक्तः। अथ तिरश्चामुत्कृष्टदेशावधिरुच्यते—क्षेत्रमसंख्येया द्वीपसमुद्राः। कालोप्यसंख्येयाः संवत्सराः। तेजश्शरीरप्रमाणं द्रव्यं कियच्च? तदसंख्येयद्वीपसमुद्राकाशप्रदेशपरिच्छिन्नाभिरसंख्येयाभिस्तेजःशरीरद्रव्यवर्गणाभिर्निर्वर्तितं तावदसंख्येयस्कंधाननंतप्रदेशान् जानातीत्यर्थः। भावः पूर्ववत् तिरश्चां। मनुष्याणां च जघन्यो देशावधिर्भवति। तिरश्चां तु देशावधिरेव न परमावधिर्नापि सर्वावधिः। अथ मनुष्याणामुत्कृष्टो देशावधिरुच्यते—क्षेत्रमसंख्येया द्वीपसमुद्राः। कालोप्यसंख्येयाः संवत्सराः। द्रव्यं कार्माणद्रव्यं कियच्च? तदसंख्येयद्वीपसमुद्राकाशप्रदेशपरिच्छिन्ना असंख्येया ज्ञानावरणादिकार्माणद्रव्यवर्गणाः। भावः पूर्ववत्। एष देशावधिरुत्कृष्टो मनुष्याणां संयतानां भवति। परमावधिरुच्यते—जघन्यस्य परमावधेः क्षेत्रं, देशाधिको लोकः। कालः प्रदेशाधिकलोकाकाशप्रदेशावधृतप्रमाणा अविभागिनः समयास्तेचाऽसंख्याताः संवत्सराः। द्रव्यं प्रदेशाधिकलोकाकाशप्रदेशावधृतप्रमाणं। भावः पूर्ववत्। अतः परं क्षेत्रवृद्धिर्नानाजीवैकजीवानामविशेषेण विशुद्धिवशादसंख्येया लोकाः। एवं तावदसंख्येया लोका वृद्धिर्यावदुत्कृष्टपरमावधिक्षेत्रं। कियंतश्च ते असंख्येयाः, ? आवलिकाया असंख्येयभागप्रमाणाः। कालद्रव्यभावाः पूर्ववत्। उत्कृष्टपरमावधेः क्षेत्रं सलोकालोकप्रमाणा असंख्येया लोकाः। कियंतस्ते ? अग्निजीवतुल्याः। कालद्रव्यभावाः पूर्ववत्। एषः त्रिविधोपि परमावधिरुत्कृष्टचारित्रयुक्तस्यैव भवति नान्यस्य। वर्धमानो भवति न हीयमानः। अप्रतिपाती न प्रतिपाती। यस्य यावति स लोके लोकप्रमाणासंख्येयलोकक्षेत्रे जातस्तस्य तावत्यवस्थानादवस्थितो भवत्यनवस्थितश्च वृद्धिं प्रति न हानिं। ऐहलौकिकदेशांतरगमनादनुगामि पारलौकिकदेशांतरानुगमनाभावादननुगामि। सर्वावधिरुच्यते—असंख्येयानामसंख्येयभेदत्वादुत्कृष्टपरमावधिक्षेत्रमसंख्येयलोकगुणितमस्य क्षेत्रं। कालद्रव्यभावाः पूर्ववत्। स एष न वर्धमानो न हीयमानो नानवस्थितो न प्रतिपाति प्राक्संयतभवक्षयादवस्थितोऽप्रतिपाति भवांतरं प्रत्यननुगामि, देशांतरं प्रत्यनुगामि। सर्वशब्दस्य साकल्यवाचित्वाद्द्रव्यक्षेत्रकालभावैः सर्वावधेरंतःपातिपरमावधिरतः परमावधिरपि देशावधिरेवेति द्विविध एवावधिः सर्वावधिर्देशावधिश्च। उक्तायां वृद्धौ यदा कालवृद्धिस्तदा चतुर्णामपि वृद्धिर्नियता। क्षेत्रवृद्धौ कालवृद्धिर्भाज्या स्यात्कालवृद्धिः स्यान्नेति, द्रव्यभावयोस्तु वृद्धिर्नियता। द्रव्यवृद्धौ भाववृद्धिर्नियता क्षेत्रकालवृद्धिः पुनर्भाज्या स्याद्वा न वेति। भाववृद्धावपि द्रव्यवृद्धिर्नियता क्षेत्रकालवृद्धिर्भाज्या स्याद्वा न वेति स एषोऽवधिज्ञानोपयोगो द्विधा भवति एकक्षेत्रोऽनेकक्षेत्रश्च। श्रीवृषभस्वस्तिकनंद्यावर्ताद्यन्यतमोपयोगोपकरण एकक्षेत्रः। तदनेकोपकरणोपयोगोऽनेकक्षेत्रः। यद्येवं परायत्तत्वात्परोक्षत्वप्रसंगः? न, इंद्रियेषु परत्वरूढेः। इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनो मनसस्तु परा बुद्धिर्बुद्धेः परतरो हि स, इत्येवं बहुधा व्याख्यातमवधिज्ञानं।

मनःपर्ययस्येदानीमवसरप्राप्तस्य भेदपुरस्सरं लक्षणं व्याचिख्यासुरिदमाह—

ऋजुविपुलमती मनःपर्ययः ॥ २३ ॥

ऋज्वी निर्वर्तिता प्रगुणा च ॥ १ ॥ कस्मात् निर्वर्तिता ? वाक्कायमनस्कृतार्थस्य परकीयमनोगतस्य विज्ञानात्। ऋज्वी मतिर्यस्य सोऽयमृजुमतिः।

अनिर्वर्तिता कुटिला च विपुला ॥ २ ॥ कस्मात् अनिर्वर्तिता ? वाक्कायमनस्कृतार्थस्य परकीयमनोगतस्य विज्ञानात्, विपुला मतिरस्य स विपुलमतिः। ऋजुमतिश्च विपुलमतिश्च ऋजुविपुलमती। एकस्य मतिशब्दस्य गतार्थत्वादप्रयोगः। अथवा ऋजुश्च विपुला च ऋजुविपुले ऋजुविपुले मती ययोस्तौ ऋजुविपुलमती इति। स एष मनःपर्ययो द्विधा ऋजुमतिर्विपुलमतिरिति। अत्रोक्तो भेदः। लक्षणमस्येदानीं वक्तव्यमित्यत्रोच्यते—

मनःसंबंधेन लब्धवृत्तिर्मनःपर्ययः ॥ ३ ॥ वीर्यांतरायमनःपर्ययज्ञानावरणक्षयोपशमांगोपांगनामलाभोपष्टंभादात्मीयपरकीयमनःसंबंधेन लब्धवृत्तिरुपयोगो मनःपर्ययः।

मतिज्ञानप्रसंग इति चेन्नाऽन्यदीयमनोऽपेक्षामात्रत्वादभ्रे चंद्रव्यपदेशवत् ॥ ४ ॥ स्यान्मतं यथा मनश्चक्षुरादिसंबंधाच्चक्षुरादिज्ञानमाविर्भवति तन्मतिज्ञानं। तथा मनःपर्ययोपि मनःसंबंधाल्लब्धवृत्तिरिति मतिज्ञानं प्राप्नोतीति। तन्न किं कारणं ? अन्यदीयमनोऽपेक्षामात्रात्वात्। कथं ? अभ्रे चंद्रव्यपदेशवत्। यथाऽभ्रे चंद्रमसं पश्येति अभ्रमपेक्षाकारणमात्रं भवति न च चक्षुरादिवन्निर्वर्तकं चंद्रज्ञानस्य। तथाऽन्यदीयमनोप्यपेक्षाकारणमात्रं भवति परकीयमनसि व्यवस्थितमर्थं जानाति मनःपर्यय इति। ततो नास्य तदायत्तः प्रभव इति न मतिज्ञानप्रसगः।

स्वमनोदेशे वा तदावरणकर्मक्षयोपशमव्यपदेशाच्चक्षुष्यवधिज्ञाननिर्देशवत् ॥ ५ ॥ अथवा चक्षुर्देशस्थानामात्मप्रदेशानामवध्यावरणक्षयोपशमाद्यथा चक्षुष्यवधिज्ञानव्यपदेश इष्टः। नचाऽवधिर्मतिर्भवति तथा मनःपर्ययज्ञानावरणक्षयोपशमात् स्वमनोदेशस्थानामात्मप्रदेशानां मनःपर्ययव्यपदेशः, नचास्य मतित्वं।

मनःप्रतिबंधज्ञानादनुमानप्रसंग इति चेन्न प्रत्यक्षलक्षणाऽविरोधात् ॥ ६ ॥ स्यान्मतं यथा धूमप्रतिबंधाद्धूमसंपृक्तेऽग्नावनुमानं तथान्यदीयमनःप्रतिबंधात्तन्मनःसपृक्तानर्थान् जानन्मनःपर्ययोऽनुमानमिति। तन्न किं कारणं प्रत्यक्षलक्षणाऽविरोधात्। यत्प्रत्यक्षलक्षणमुक्तं (इंद्रियानिंद्रियनिरपेक्षमतीतव्यभिचारं साकारग्रहणं प्रत्यक्षमिति) तेनाऽविरोधो न मनःपर्ययोऽनुमानं। अनुमानं हि तेन विरुध्यते।

उपदेशपूर्वकत्वाच्चक्षुरादिकरणनिमित्तत्वाद्वानुमानस्य ॥ ७ ॥ उपदेशाद्धि अयमग्निरयं धूम इत्युपलभ्य पश्चाद्धूमदर्शनादग्नावनुमानं करोति। चक्षुरादिकरणसंबंधाच्च। ततोस्योक्तं प्रत्यक्षलक्षणं विरुध्यते। न च तथा मनःपर्यय उपदेशचक्षुरादिकरणसंबधं चाऽपेक्षते।

स द्वेधा सूत्रोक्तविकल्पात् ॥ ८ ॥ स मनःपर्ययो द्वेधा। कुतः ? सूत्रोक्तविकल्पात्। ऋजुमतिर्विपुलमतिरिति।

आद्यस्त्रेधार्जुमनोवाक्कायविषयभेदात् ॥ ९ ॥ आद्य ऋजुमतिमनःपर्ययस्त्रेधा। कुतः ? ऋजुमनोवाक्कायविषयभेदात्। ऋजुमनस्कृतार्थज्ञः ऋजुवाक्कृतार्थज्ञः ऋजुकायकृतार्थज्ञश्चेति। तद्यथा मनसार्थं व्यक्तं संचिंत्य वाचं वा धर्मादियुक्तामसंकीर्णामुच्चार्य कायप्रयोगं चोभयलोकफलनिष्पादनार्थमंगोपांगप्रत्यंगनिपातनाकुंचनप्रसारणादिलक्षणं कृत्वा पुनरनंतरे समये कालांतरे वा तमेवार्थं चिंतितमुक्तं कृतं वा, विस्मृतत्वान्न शक्नोति चिंतयितु। तमेवंविधमर्थं ऋजुमतिमनःपर्ययः पृष्टोऽपृष्टो वा जानात्ययमसावर्थ अनेन विधिना त्वया चिंतित उक्तः कृतो वेति। कथमयमर्थोलिभ्यते ? आगमाविरोधात्। आगमे ह्युक्तं मनसा मनः परिच्छिद्य परेषां संज्ञादीन् जानाति इति मनसाऽऽत्मनेत्यर्थः। परमनः समंताद्विदित्वा परमनसा चिंतितस्य सचेतनेतरस्याऽर्थस्य मनस्यवस्थान्मनोव्यपदेशः। मंचस्थानां पुरुषाणां मंचव्यपदेशवत्। तमात्मना आत्माऽवबुध्याऽऽत्मनः परेषां च चिंता जीवितमरणसुखदुःखलाभालाभादीन् विजानाति। व्यक्तमनसां जीवानामर्थं जानाति नाऽव्यक्तमनसां। व्यक्तः स्फुटीकृतोऽर्थश्चिंतया सुनिर्वर्तितो यैस्ते जीवा व्यक्तमनसस्तैरर्थं चिंतितं ऋजुमतिर्जानाति नेतरैः। कालतो जघन्येन जीवानामात्मनश्च द्वित्रीणि, उत्कर्षेण सप्ताष्टानि भव-

ग्रहणानि गत्यागत्यादिभिः प्ररूपयति । क्षेत्रतो जघन्येन गव्यूतिपृथक्त्वस्याभ्यंतरं न बहिः । उत्कर्षेण योजनपृथक्त्वस्याभ्यंतरं न बहिः ।

द्वितीयः षोढा ऋजुवक्रमनोवाक्कायविषयभेदात् ॥ १० ॥ द्वितीयो विपुलमतिः षोढा भिद्यते। कुतः ? ऋजुवक्रमनोवाक्कायविषयभेदात् । ऋजुविकल्पाः पूर्वोक्ताः वक्रविकल्पाश्च तद्विपरीता योज्याः । तथाऽऽत्मनः परेषां च चिंताजीवितमरणसुखदुःखलाभालाभादीन् अव्यक्तमनोभिर्व्यक्तमनोभिश्च चिंतितान् अचिंतितान् जानाति विपुलमतिः । कालतो जघन्येन सप्ताष्टानि भवग्रहणानि । उत्कर्षेणाऽसंख्येयानि गत्यागतिभिः प्ररूपयति । क्षेत्रतो जघन्येन योजनपृथक्त्वं । उत्कर्षेण मानुषोत्तरशैलाभ्यंतरं न बहिः । एवं द्विभेदो मनःपर्ययो वर्णितः । तस्य किं परस्परतो विशेषोस्त्युत नास्ति ? । अत आह—

विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः ॥ २४ ॥

तदावरणकर्मक्षयोपशमे सति आत्मनः प्रसादो विशुद्धिः । प्रतिपतनं प्रतिपातः । उपशांतकषायस्य चारित्रमोहोद्रेकात्प्रच्युतसंयमशिखरस्य प्रतिपातो भवति । क्षीणकषायस्य प्रतिपातकारणाभावादप्रतिपातः । विशुद्धिश्चाऽप्रतिपातश्च विशुद्ध्यप्रतिपातौ ताभ्यां विशुद्ध्यप्रतिपाताभ्यां तयोर्विशेषस्तद्विशेषः । पूर्वसूत्र एव तयोर्विशेषो निर्ज्ञातः किमर्थं पुनरिदमुच्यते ?

विशेषांतरप्रतिपत्त्यर्थं पुनर्वचनं ॥ १ ॥ यः पूर्वसूत्रे विशेष उक्तः तावतास्य न परितोष स्ततो विशेषांतरप्रतिपत्त्यर्थं पुनरिदमुच्यते ।

च शब्दप्रसंग इति चेन्न प्राथमकल्पिकभेदाभावात् ॥ २ ॥ यथा मनःपर्ययस्य ऋजुविपुलमती भेदौ तथा विशुद्ध्यप्रतिपातावपि तस्यैव भेदौ यदि स्यातां युक्तश्चशब्दः स्यात् । यतस्तु विशुद्ध्यप्रतिपातौ ऋजुविपुलमत्योर्विशेषौ न भेदौ, अतश्चशब्दाऽप्रसंगः । तत्र विशुद्ध्या तावदृजुमतेर्विपुलमतिर्द्रव्यक्षेत्रकालभावैर्विशुद्धतरः । कथं ? इह यः कार्माणद्रव्यानंतभागोऽन्त्यः सर्वावधिना ज्ञातस्तस्य पुनरनंतभागीकृतस्य मनःपर्ययज्ञेयोऽनंतभागोऽनंतस्याऽनंतभेदत्वात् । ऋजुमतिकार्मणद्रव्याऽनंतभागादूरविप्रकृष्टोल्पीयाननंतभागः । विपुलमतेर्द्रव्यक्षेत्रकालविशुद्धिरुक्ता । भावतो विशुद्धिः सूक्ष्मतरद्रव्यविषयत्वादेव वेदितव्या । प्रकृष्टक्षयोपशमविशुद्धिभावयोगादप्रतिपातेनापि विपुलमतिर्विशिष्टः । स्वामिनां प्रवर्धमानचारित्रोदयत्वात् । ऋजुमतिः पुनः प्रतिपाती स्वामिनां कषायोद्रेकाद्धीयमानचारित्रोदयत्वात् । यद्यस्यमनःपर्ययस्य प्रत्यात्मानमयं विशेषः अथानयोरवधिमनःपर्यययोः कुतो विशेषः ? इत्यत आह—

विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्यययोः ॥ २५ ॥

विशुद्धिः प्रसादः । क्षेत्रं यत्रस्थान् भावान् प्रतिपद्यते । स्वामी प्रयोक्ता । विषयो ज्ञेयः ।

अवधिज्ञानान्मनःपर्ययस्य विशुद्ध्यभावोऽल्पद्रव्यविषयत्वादिति चेन्न भूयःपर्यायज्ञानात् ॥ १ ॥ स्यान्मतमवधिज्ञानान्मनःपर्ययो विशुद्धतरः । कुतः ? अल्पद्रव्यविषयत्वात् । यतः सर्वावधिरूपिद्रव्यानंतभागो मनःपर्ययद्रव्यमिति । तन्न किं कारणं भूयःपर्यायज्ञानात् । यथा कश्चिद्बहूनि शास्त्राणि व्याचष्टे एकदेशेन न साकल्येन तद्गतमर्थं शक्नोति वक्तुं, अपरस्त्वेकं शास्त्रं साकल्येन व्याचष्टे यावंतस्तस्यार्थास्तान् सर्वान् शक्नोति वक्तुं, अयं पूर्वस्माद्विशुद्धतरविज्ञानो भवति । तथाऽवधिज्ञानविषयानंतभागज्ञोपि मनःपर्ययो विशुद्धतरः । यतस्तमनंतभागं रूपादिभिर्बहुभिः पर्यायैः प्ररूपयति । क्षेत्रमुक्तं । विषयो वक्ष्यते । स्वामित्वं प्रत्युच्यते—

विशिष्टसंयमगुणैकार्थसमवायी मनःपर्ययः ॥ २ ॥ विशिष्टः संयमगुणो यत्र विद्यते तत्रैव वर्तते मनःपर्ययः । तथाचोक्तं मनुष्येषु मनःपर्यय आविर्भवति; न देवनारकतैर्यग्योनेषु । मनुष्येषु चोत्पद्यमानः गर्भजेषूत्पद्यते न संमूर्च्छनजेषु । गर्भजेषूत्पद्यमानः कर्मभूमिजेषूत्पद्यते नाकर्मभूमिजेषु । कर्मभूमिजेषूत्पद्यमानः पर्याप्तकेषूत्पद्यते नापर्याप्तकेषु । पर्याप्तकेषूपजायमानः सम्यग्दृष्टिषूपजायते न मिथ्या-

दृष्टिसासादनसम्यग्दृष्टिसम्यङ्मिथ्यादृष्टिषु । सम्यग्दृष्टिषूपजायमानः संयतेषूपजायते नाऽसंयतसम्यग्दृष्टिसंयतासंयतेषु । संयतेषूपजायमानः प्रमत्तादिषु क्षीणकषायांतेषूपजायते नोत्तरेषु । तत्र चोपजायमानः प्रवर्धमानचारित्रेषूपजायते न हीयमानचारित्रेषु । संप्रवर्धमानचारित्रेषूपजायमानः सप्तविधान्यतमर्द्धिप्राप्तेषु जायते नेतरेषु । ऋद्धिप्राप्तेषु च केषुचिन्न सर्वेष्विति विशिष्टसंयमग्रहणं वाक्ये कृतं । अवधिः पुनः चातुर्गतिकेष्विति । स्वामिभेदादप्यनयोर्विशेषः । इदानीं केवलज्ञानलक्षणाभिधानं प्राप्तकालं तदुल्लंघ्य ज्ञानानां विषयनिबंधः परीक्ष्यते । कुतः ? तस्य, मोहक्षयाज्ज्ञानदर्शनावरणांतरायक्षयाच्च केवलमित्यत्र वक्ष्यमाणत्वात् । यद्येवमाद्ययोरेव तावन्मतिश्रुतयोर्विषयनिबंध उच्यतामित्यत आह—

मतिश्रुतयोर्निबंधोद्रव्येष्वसर्वपर्यायेषु ॥ २६ ॥

निबंधनं निबंधः । कस्य ? मतिश्रुतविषयस्य । तर्त्तार्ह विषयग्रहणं कर्तव्यं न कर्तव्यं ॥

प्रत्यासत्तेः प्रकृतविषयग्रहणाभिसंबंधः ॥ १ ॥ प्रकृतं विषयग्रहणमस्ति । क प्रकृतं ? विशुद्धिक्षेत्रस्वामिविषयेभ्य इति । तत्र प्रत्यासत्तेर्विषयग्रहणमिहाभिसंबध्यते । ननु च स विभक्त्यंतरनिर्दिष्टो न शक्यते इह संबद्धुं ? । अर्थवशाद्विभक्तिपरिणामः । यथोच्चानि देवदत्तस्य गृहाणि आमंत्रयस्वैनं देवदत्तमिति गम्यते । देवदत्तस्य गावोऽश्वाहिरण्यमाढ्यो वैधवेयो देवदत्त इति गम्यते। एवमिहापि निबंधः । कस्य ? विषयस्येत्यभिसंबध्यते । अथ द्रव्येष्विति बहुत्वनिर्देशः किमर्थः ?—

द्रव्येष्विति बहुत्वनिर्देशः सर्वद्रव्यपर्यायसंग्रहार्थः ॥ २ ॥ जीवधर्माऽधर्माकाशकालपुद्गलाभिधानानि षडत्र द्रव्याणि तेषां सर्वेषां संग्रहार्थः द्रव्येष्विति बहुत्वनिर्देशः क्रियते ॥

तद्विशेषणार्थमसर्वपर्यायग्रहणं ॥ ३ ॥ तेषां द्रव्याणामविशेषेण मतिश्रुतयोर्विषयभावप्रसंगे तद्विशेषणार्थमसर्वपर्यायग्रहणं क्रियते । तानि द्रव्याणि मतिश्रुतयोर्विषयभावमापद्यमानानि कतिपयैरेव पर्यायैर्विषयभावमास्कंदंति न सर्वपर्यायैरनंतैरपीति । तत्कथं ? इह मतिश्चक्षुरादिकरणनिमित्ता रूपाद्यालंबना । सा यस्मिन् द्रव्ये रूपादयो वर्तंते न तत्र सर्वान् पर्यायानवगृह्णाति चक्षुरादिविषयानेवाऽऽलंबते श्रुतमपि शब्दलिंगं शब्दाश्च सर्वे संख्येया एव, द्रव्यपर्यायाः पुनरसंख्येयानंतभेदा न ते सर्वे विशेषाकारेण तैर्विषयीक्रियंते । उक्तंच—

पण्णवणिज्जा भावा अणंतभागो दु अणभिलप्पाणं । पण्णवणिज्जाणं पुण अणंतभागो सुदणिबद्धो ॥

अतींद्रियेषु मतेरभावात्सर्वद्रव्यासंप्रत्यय इति चेन्न नोइंद्रियविषयत्वात् ॥ ४ ॥ स्यान्मतं धर्मास्तिकायादिषु मतेरभावोतींद्रियत्वात् । ततो मतिः सर्वद्रव्यविषयनिबंधेति लक्षणमयुक्तमिति । तन्न किं कारणं ? नोइंद्रियविषयत्वात् । नोइंद्रियावरणक्षयोपशमलब्ध्यपेक्षं नोइंद्रियं, तेषु व्याप्रियते । अथ हि तत्र न वर्तेताऽवधिना सह निर्दिश्येत रूपिष्वेव वृत्तेः । अथ मतिश्रुतयोरनंतरनिर्देशार्हस्यावधेः को विषयनिबंधः ? इत्यत आह—

रूपिष्ववधेः ॥ २७ ॥

रूपशब्दस्याऽनेकार्थत्वे सामर्थ्याच्छुक्लादिग्रहणं ॥ १ ॥ अयं रूपशब्दोऽनेकार्थः । कचिच्चक्षुर्ग्राह्ये वर्तते यथा—रूपरसगंधस्पर्शा इति । कचित्स्वभावे वर्तते यथा अनंतरूपमनंतस्वभावमिति । तत्रेह सामर्थ्याच्चक्षुर्विषये शुक्लादौ वर्तमानो गृह्यते । यदि स्वभाववाचिना ग्रहणं स्यादनर्थकं स्यात्, न हि कस्यचित्स्वभावो नास्तीति ॥

भूमाद्यनेकार्थसंभवे नित्ययोगोऽभिधानवशात् ॥ २ ॥ यद्यपि मत्वर्थी यस्य भूमादयोऽर्थाः बहवः संभवंति । इहाभिधानवशान्नित्ययोगो वेदितव्यः । नित्यं हि पुद्गला युक्ता रूपेणेति, यथा क्षीरिणो वृक्षा इति । यद्येवमवधिज्ञानस्य पुद्गला रूपमुखेनैव विषयभावं प्रतिपद्येरन् न रसादिमुखेन ? नैष दोषः—

१ मतिः । २ द्रव्ये ।

तद्रूपलक्षणार्थत्वात्तदविनाभाविरसादिग्रहणं ॥३॥ तद्रूपं द्रव्यस्योपलक्षणत्वेनोपादीयते अतस्तद विनाभाविनो रसादयोपि गृह्यंते । यद्येवं तद्गतेषु सर्वेष्वनंतपर्यायेषु अवधेर्विषयनिबंधः प्राप्नोतीत्यत आह—

असर्वपर्यायग्रहणानुवृत्तेर्न सर्वगतिः ॥ ४ ॥ असर्वपर्यायेष्विस्येतद्ग्रहणमनुवर्तते । यथा-देवदत्ताय गौर्दीयतां, जिनदत्ताय कंबल इति दीयतामित्यभिसंबध्यते । एवमिहाप्यसर्वपर्यायेष्वित्यभि-संबंधान्न सर्वगतिर्भवति । ततो रूपिषु पुद्गलेषु प्रागुक्तद्रव्यादिपरिमाणेषु, जीवपर्यायेषु औदयिकौपश-मिकक्षायोपशमिकेषूत्पद्यतेऽवधिज्ञानं । रूपिद्रव्यसंबंधान्न क्षायिकपारिणामकेषु । नापि धर्मास्तिकाया-दिषु तत्संबंधाभावात् । अथ मनःपर्ययस्य को विषयनिबंधः ?, इत्यत आह—

तदनंतभागे मनःपर्ययस्य ॥ २८ ॥

यद्रूपिद्रव्यं सर्वावधिज्ञानस्य विषयत्वेन समर्थितं तस्यानंतभागीकृतस्यैकस्मिन्भागे मनःपर्ययः प्रव-र्तते । अथांते यन्निर्दिष्टं केवलज्ञानं तस्य को विषयनिबंधः ? इत्यत आह—

सर्वद्रव्यपर्यायेषु केवलस्य ॥ २९ ॥

अत्राह—किं द्रव्यं ?

स्वपर्यायान् द्रवति द्रूयते वा तैरिति द्रव्यं ॥ १ ॥ आत्मनः पर्यायान् द्रवति गच्छतीति द्रव्यं । बहुलापेक्षया कर्तरि साधुत्वं । द्रूयते वा तैरिति द्रव्यं ॥

कथंचिद्भेदसिद्धौ तत्कर्तृकर्मव्यपदेशसिद्धिः ॥ २ ॥ द्रव्यस्य पर्यायाणां च कथंचिद्भेदे सत्युक्तः कर्तृकर्मव्यपदेशः सिद्ध्यति ॥

इतरथा हि तदप्रसिद्धेरत्यंताव्यतिरेकात् ॥ ३ ॥ यद्येकांतेनैकत्वमवधार्येत तस्य कर्तृकर्म-व्यपदेशासिद्धिः स्यात् । कुतः ? अत्यंताव्यतिरेकात् । न हि तदेव निर्विशेषमेकं शक्त्यंतरापेक्षया विना कर्तृ-कर्म च भवितुमर्हति । अथ कः पर्यायस्तस्य ?

मिथोभवनं प्रतिविरोध्यविरोधिनां धर्माणामुपात्तानुपात्तहेतुकानां शब्दांतरात्मलाभ-निमित्तत्वादर्पितव्यवहारविषयोऽवस्थाविशेषः पर्यायः ॥ ४ ॥ मिथोभवनं प्रति केचिद्ध-र्माविरोधिनः । केचिदविरोधिनः । तत्र जीवस्य तावदनादिपारिणामिकचैतन्यजीवद्रव्यभव्याभव्योर्ध्व-गतिस्वभावास्तित्वादिभिरौदयिकादयो भावा यथासंभवं युगपद्भावादविरोधिनः । विरोधिनश्च नारकतैर्यग्योन देवमनुष्यस्त्रीपुंनपुंसकएकद्वित्रिचतुःपंचेंद्रियबाल्यकौमारकोपप्रसादादयः, सहानवस्थानात् । तथा पौ-द्गलिका अनादिपारिणामिकाः रूपरसगंधस्पर्शशब्दसामान्यास्तित्वादयः शुक्लादिपंचकतिक्तादिपंचक गंध-द्वयस्पर्शाष्टकशब्दषट्कपर्यायैः प्रत्येकमेकद्वित्रिचतुःपंचादिसंख्येयानंतगुणपरिणामिभिर्यथासंभवं युगप-द्भावादविरोधिनः । विरोधिनश्च शुक्लकृष्णनीलतिक्तकटुकसुरभेतरगंधादयः प्रायोगिका वैश्रसिकाश्च परमाणुषु स्कंधेषु च सहानवस्थानात् । एवं धर्मास्तिकायादिष्वप्यमूर्तत्वाऽचेतनत्वाऽसंख्येयप्रदेशत्व गतिकारणस्वभावाऽस्तित्वादयोऽनंतभेदागुरुलघुगुणहानिवृद्धिविकारैः स्वप्रत्ययैः परप्रत्ययैश्च गतिकारण-त्वविशेषादिभिरविरोधिनः परस्परविरोधिनश्च ज्ञेया. । तेषु केचिदुपात्तहेतुका द्रव्यक्षेत्रकालभावनिमित्ता औदयिकादयः । अनुपात्तहेतुकाश्च त्रिषु कालेष्वविकारिणः पारिणामिकाश्चैतन्यादयः । तेषां विरोध्यविरो-धिनां धर्माणामुपात्तानुपात्तहेतुकानां शब्दांतरात्मलाभस्य निमित्तत्वाच्चेतनो नारको बालक इत्यर्पितव्यवहार विषय इति व्यवहार-ऋजुसूत्रशब्दत्रिविधनयात्मकः, द्रव्यार्थिकानर्पणात्पर्यायार्थिकेनार्पितः, तस्य द्रव्यस्या-ऽवस्थाविशेषः पर्याय इत्युच्यते ।

तयोरितरेतरयोगलक्षणो द्वंद्वः ॥ ५ ॥ तयोरितरेतरयोगलक्षणो द्वंद्वो वेदितव्यः । द्रव्याणि च पर्यायाश्च द्रव्यपर्याया इति ।

द्वंद्वेऽन्यत्वं प्लक्षन्यग्रोधवदिति चेन्न तस्य कथंचिद्भेदेपि दर्शनाद्गोत्वगोपिंडवत् ॥ ६ ॥ स्यान्मतं यदि द्वंद्वः ?, प्लक्षन्यग्रोधवदन्यत्वं द्रव्यपर्यायाणां प्राप्नोतीति । तन्न किं कारणं तस्य कथंचिद्भेदेपि दर्शनात् । गोत्वगोपिंडवत् । यथा गोत्वं च गोपिंडश्च गोत्वगोपिंडावित्यनन्यत्वेपि द्वंद्वो भवति तथा द्रव्यपर्यायेष्विति । ननु सामान्यविशेषयोरन्यत्वात्साध्यसममेतदिति । नैष दोषः उक्तमेतदनन्यत्वं सामान्यविशेषयोः ।

द्रव्यग्रहणं पर्यायविशेषणं चेन्नानर्थक्यात् ॥ ७ ॥ स्यादेतद् द्रव्याणां पर्याया द्रव्यपर्याया इति द्रव्यग्रहणं पर्यायविशेषणमिति । तन्न किं कारणं आनर्थक्यात् । एवं सति द्रव्यग्रहणमनर्थकं स्यात् । नह्यद्रव्यस्य पर्यायाः संतीति ।

द्रव्याज्ञानप्रसंगाच्च ॥ ८ ॥ केवलेन पर्याया एव ज्ञायंते न द्रव्याणीति द्रव्याज्ञानं प्राप्नोत्युत्तरपदार्थप्रधानत्वात् । अथ मतमेतत् सर्वेषु पर्यायेषु ज्ञातेषु न किंचिदज्ञातमस्ति ततो व्यतिरिक्तस्य द्रव्यस्याभावात् । यद्येवं द्रव्यग्रहणमनर्थकमित्युक्तं पुरस्तात । तस्मात्साधूक्तं द्वंद्वोयमिति । ननु च द्वंद्वेपि द्रव्यग्रहणमनर्थकं पर्यायव्यतिरेकेणाऽनुपलब्धेरिति । नैष दोषः संज्ञास्वालक्षण्यादिभेदाद्भेदोपपत्तेः । अथ सर्वग्रहणं किमर्थं ननु बहुवचननिर्देशादेव बहुत्वसंप्रत्ययसिद्धेः ।

सर्वग्रहणं निरवशेषप्रतिपत्त्यर्थं ॥ ९ ॥ ये लोकालोकभेदभिन्नास्त्रिकालविषया द्रव्यपर्याया अनंतास्तेषु निरवशेषेषु केवलज्ञानविषयनिबंध इति प्रतिपत्त्यर्थं सर्वग्रहणं । यावांल्लोकालोकस्वभावोऽनंतः तावंतोऽनंतानंता यद्यपि स्युस्तानपि ज्ञातुमस्य सामर्थ्यमस्तीत्यपरिमितमाहात्म्यं केवलज्ञानं वेदितव्यं । आह– विषयनिबंधोवधृतो मत्यादीनां, इदं तु न निर्ज्ञातमेकस्मिन्नात्मनि स्वनिमित्तसंनिधानोपजनितवृत्तीनि ज्ञानानि यौगपद्येन कति भवंति ? इत्यत आह—

एकादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥ ३० ॥

एक इति कोयं शब्दः ?

अनेकार्थसंभवे विवक्षातः प्राथम्यवचन एकशब्दः ॥ १ ॥ अयमेकशब्दोऽनेकस्मिन्नर्थे दृष्टप्रयोगः । क्वचित्संख्यायां वर्तते, एको द्वौ बहव इति । क्वचिदन्यत्वे, एके आचार्या अन्ये आचार्या इति । क्वचिदसहाये, एकाकिनस्ते विचरंति वीरा इति । क्वचित्प्राथम्ये, एकमागमनं प्रथममागमनमिति । क्वचित्प्राधान्ये एकहतां सेनां करोमि प्रधानहतां सेनां करोमीत्यर्थः । तत्रेह विवक्षातः प्राथम्यवचन एकशब्दो वेदितव्यः ।

आदिशब्दश्चावयववचनः ॥ २ ॥ आदिशब्दश्चायमनेकार्थसंभवे, विवक्षात इहावयववचनो वेदितव्यः । क्वचिद्व्यवस्थायां वर्तते ब्राह्मणादयश्चत्वारो वर्णाः ब्राह्मणव्यवस्थाः ब्राह्मणक्षत्रियविट्शूद्रा इत्यर्थः । क्वचित्प्रकारे भुजंगादयः परिहर्तव्याः, भुजंगप्रकाराः विषवंत इत्यर्थः । क्वचित्सामीप्ये नद्यादीनि क्षेत्राणि नदीसमीपानीत्यर्थः । क्वचिदवयवे ऋगादिमधीते ऋगवयवमधीते इत्यर्थः । तेनैतदुक्तं भवति एकस्यादिरेकादिः प्रथमावयव इति । कस्य ? प्रथमस्य परोक्षस्य । कः पुनरवयवः ? मतिज्ञानं ।

सामीप्यवचनो वा ॥ ३ ॥ अथवाऽयमादिशब्दः सामीप्यवचनो दृष्टव्यः । तेन प्रथमस्य मतिज्ञानस्य श्रुतं समीपमित्युक्तं भवति ।

मतेर्बहिर्भावप्रसंग इति चेन्नाऽनयोः सदाऽव्यभिचारात् ॥४॥ स्यादेतदेवं सति मतेर्बहिर्भावः प्राप्नोतीति । तन्न किं कारणमनयोः सदाऽव्यभिचारात् । एते हि मतिश्रुते सर्वकालमव्यभिचारिणी, नारदपर्वतवत् । तस्मादनयोरन्यतरग्रहणे इतरस्य ग्रहणं सन्निहितं भवति ।

ततोन्यपदार्थे वृत्तावेकस्यादिशब्दस्य निवृत्तिरुष्ट्रमुखवत् ॥ ५ ॥ यथोष्ट्रस्य मुखमुष्ट्रमुखं, उष्ट्र

मुखवन्मुखमस्येति वृत्तावेकस्य मुखशब्दस्य निवृत्तिः, एवमिहापि एकादिरादिर्येषां तानीमान्येकादीति इत्येक-स्यादिशब्दस्य निवृत्तिः ।

अवयवेन विग्रहः समुदायो वृत्त्यर्थः ॥६॥ अवयवेन विग्रहः क्रियते, वृत्त्यर्थः समुदायो भवति। तेनैकादीन्यभ्यंतरीकृत्य भाज्यान्यर्पयितव्यानीत्यर्थः । किं सर्वाणि । नेत्याह आचतुर्भ्यः । कुत एतत् ?–

केवलस्याऽसहायत्वादितरेषां च क्षयोपशमनिमित्तत्वाद्यौगपद्यभावः ॥७॥ यतः केवल ज्ञानं तदसहायं, इतराणि च ज्ञानानि क्षयोपशमनिमित्तानि, अतो विरोधाद्युगपदसंभवस्तस्मादुच्यते आ चतुर्भ्य इति।

नाभावोऽभिभूतत्वादहनि नक्षत्रवदिति चेन्न क्षायिकत्वात् ॥८॥ स्यादेतन्नाभावः क्षायोप-शमिकानां ज्ञानानां केवलिनि, किंतु केवलज्ञानेन महताऽभिभूतानि स्वप्रयोजनेन व्याप्रियंते । भास्करप्रभाभि-भिभूतनक्षत्रवदिति । तन्न किं कारणं क्षायिकत्वात् संक्षीणसकलज्ञानावरणे भगवत्यर्हति कथं क्षायोपशमि-कानां ज्ञानानां सम्भवः । न हि परिप्राप्तसर्वशुद्धौ पदे प्रदेशाऽशुद्धिरस्ति ।

इंद्रियत्वादिति चेन्नाऽऽर्षार्थानवबोधात् ॥ ९ ॥ स्यादेतदेवमागमः प्रवृत्तः । पंचेंद्रिया असंज्ञि-पंचेंद्रियादारभ्य आ अयोगिकेवलिन इति । अत इंद्रियत्वात्तत्कार्येणापि ज्ञानेन भवितव्यमिति । तन्न किं कारणं आर्षार्थानवबोधात् । आर्षे हि सयोग्ययोगिकेवलिनोः पंचेंद्रियत्वं द्रव्येंद्रियं प्रत्युक्तं न भावेंद्रियं प्रति । यदि हि भावेंद्रियमभविष्यत् , अपि तु तर्हि असंक्षीणसकलावरणत्वात्सर्वज्ञत्वमेवास्य न्यवर्तिष्यत । तस्मा-देतदुक्तं भवति एकस्मिन्नात्मनि द्वे मतिश्रुते, क्वचित्त्रीणि मतिश्रुतावधिज्ञानानि, मतिश्रुतमनःपर्ययज्ञानानि वा क्वचिच्चत्वारि मतिश्रुतावधिमनःपर्ययज्ञानानि, न पंचैकस्मिन् युगपत्संभवंति ।

संख्यावचनो वैकशब्दः ॥ १० ॥ अथवा संख्यावचनोऽयमेकशब्दः । एकमादिर्येषां तानीमान्ये-कादीनि, कथं मतिज्ञानमेकस्मिन्नात्मनि एकं यदक्षरश्रुतं द्व्यनेकद्वादशभेदमुपदेशपूर्वकं तद्भजनीयं स्याद्वा न-वेति । इतरत्पूर्ववत् । पर आह–असंख्यासहायप्रधान्यवचने एकशब्दे सति एकादीनि केवलादीनीत्यर्थः । एकस्मिन्नात्मन्येकं केवलज्ञानं क्षायिकत्वात् । द्वे मतिश्रुते इत्यादिपूर्ववत् । अथोक्तानि मत्यादीनि ज्ञानव्यपदेश मेव लभंत उतान्यथापीत्यत आह–

मतिश्रुतावधयो विपर्ययश्च ॥३१॥

विपर्ययोऽन्यथा । कुतः ? सम्यगधिकारात् । चशब्दः समुच्चयार्थः विपर्ययश्च सम्यक् चेति । कुतः पुनरेषां विपर्ययः ?

मिथ्यादर्शनपरिग्रहान्मत्यादिविपर्ययः ॥ १ ॥ योऽसौ दर्शनमोहनीयोदये सति मिथ्यादर्शन परिणामः तेन सहैकार्थसमवायान्मत्यादीनां विपर्ययो भवति । ननु च मणिकनकादीनां वर्चोगृहगताना-मपि स्वभावविनाशो न भवति तद्वन्मत्यादीनामपि स्यात् ? नैष दोषः—

सरजसकटुकालांबूगतदुग्धवत्स्वगुणविनाशः ॥ २ ॥ यथा सरजसकटुकालांबूभाजने निहितं दुग्धं स्वगुणं परित्यजति । तथा मत्यादीन्यपि मिथ्यादृष्टिभाजनगतानि दुष्यंतीति । आधारस्य दोषाद्धि आधे-यस्य दोषो जायते । ननु च नायमेकांत उक्तमेतन्मणिकनकादयो वर्चोगृहगता अपि स्वभावं न त्यजंतीति तत्र कथमेतदवसीयते अलांबूदुग्धवद्दुष्यंति मत्यादीनि न पुनर्मण्यादिवन्न दुष्यंतीति ?

पारिणामिकशक्तिविशेषात् ॥ ३ ॥ पारिणामिकस्य हि वस्तुनः शक्तिविशेषादन्यथाभावो भवति । यथालांबूद्रव्यं दुग्धं विपरिणामयितुं शक्नोति तथा मिथ्यादर्शनमपि मत्यादीनामन्यथात्वं कर्तुमलं । तदुदयेऽन्यथानिरूपणदर्शनात् । वर्चोगृहं तु मण्यादीनां विकारं नोत्पादयितुमलं विपरिणामकद्रव्य संनिधाने तेषामपि भवत्येवान्यथात्वं । यदा तु सम्यग्दर्शनं प्रादुर्भूतं तदा मिथ्यापरिणामदर्शनाभावात्तेषां मत्यादीनां सम्यक्त्वं अतः सम्यग्दर्शनमिथ्यादर्शनोदयविशेषात्तेषां त्रयाणां द्विधा क्लृप्तिर्भवति । मतिज्ञानं

---

१ समासे । २ समासार्थः । ३ प्रतिपादितं ।

मत्यज्ञानं श्रुतज्ञानं श्रुताज्ञानं अवधिज्ञानं विभंगज्ञानमिति । अत्राह—रूपादि विषयोपलब्धिव्यभिचाराभावा द्विपर्ययाभावः यथैव मतिज्ञानेन सम्यग्दृष्टयो रूपादीनुपलभंते तथा मिथ्यादृष्टयोपि मत्यज्ञानेन । यथैव घटा दिषु रूपादीन् श्रुतेन निश्चन्वंत्युपदिशंति च परेभ्यस्तथा श्रुताज्ञानेनापि । तथैवावधिना रूपिणोर्थानवयंति तथा विभंगेनापीति । तस्मान्नास्ति विपर्यय इत्यत आह—

सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत् ॥ ३२ ॥

सच्छब्दस्यानेकार्थसंभवे विवक्षातः प्रशंसार्थग्रहणं ॥ १ ॥ अयं सच्छब्दोनेकार्थ इति व्याख्यातः । तस्येह विवक्षातः प्रशंसार्थस्य ग्रहणं वेदितव्यं प्रशस्तं तत्त्वज्ञानमित्यर्थः । असदज्ञानं । तयोः सद-सतोरविशेषेण यदृच्छयोपलब्धेर्विपर्ययो भवति । कथमुन्मत्तवत्, यथा उन्मत्तो दोषोदयादुपहतेंद्रियमति विपरीतग्राही भवति सोश्वं गौरित्यध्यवस्यति । गां वाऽश्वः, इति । लोष्टं सुवर्णं, सुवर्णं लोष्टमिति । लोष्टं लोष्ट-मिति सुवर्णं सुवर्णमिति तस्यैवमविशेषेणाध्यवस्यतोऽज्ञानमेव भवति । तद्वत् मिथ्यादर्शनोपहतेंद्रियमतेर्मति श्रुतावधयोप्यज्ञानमेव भवंतीति ॥

भवत्यर्थग्रहणं वा ॥२॥ अथवा सच्छब्दोयं भवत्यर्थे वेदितव्यः । सद्विद्यमानमित्यर्थः असदविद्यमानं, तयोरविशेषेण यदृच्छोपलब्धेः विपर्ययो भवति कदाचिद्रूपादि सदप्यसदिति प्रतिपद्यते असदपि सदिति । कदाचित्तु सत्सदेवाऽसदप्यसदेवेति । कुतः ?—

प्रवादिपरिकल्पनाभेदाद्विपर्ययग्रहः ॥ ३ ॥ प्रवादिनां कल्पनाभेदाद्विपर्ययग्रहो भवति तद्यथा केचित्तावदाहुः—द्रव्यमेव न रूपादय इति । अपर आहुः रूपादय एव न द्रव्यमिति । अपरेषां दर्शनं अन्यद्द्रव्यमन्ये च रूपादय इति । कथमेषां विपर्ययग्रहः ? उच्यते । यदि द्रव्यमेव न रूपादयः ?, लक्षणा भावाल्लक्ष्यानवधारणप्रसंगः । किंचेंद्रियेण संनिकृष्यमाणं द्रव्यं रूपाद्यभावे सर्वात्मना संनिकृष्येत ततः सर्वात्मना ग्रहणप्रसंगः । करणभेदाभावप्रसंगश्च । नचासौ दृष्ट इष्टो वा । अथ रूपादय एव न द्रव्यं, एव मपि निराधारत्वादभावप्रसंगः । किं च परस्परविलक्षणानां रूपादीनां समुदयेपि सति एकानर्थांतरभावात् समुदयस्य सर्वाभावः परस्परतोर्थांतरभूतत्वात् । अथ ह्यन्यद्द्रव्यं अन्ये रूपादयः, एवमपि तेषां लक्ष्यलक्षण भावाभावः परस्परतोर्थांतरत्वात् । दंडिदंडवत् लक्ष्यलक्षणभाव इति चेन्न वैषम्यात् । पृथक्सतोर्लक्ष्य लक्षणभावो युक्तो नासतोरिति । किं च रूपादिषु गुणेष्वमूर्तेषु द्रव्यादर्थांतरभूतेषु नेंद्रियसंनिकर्षो युक्त स्ततश्च ज्ञानाभावः । न चार्थांतरभूतं द्रव्यं कारणं भवितुमर्हति । किं च—

मूलकारणविप्रतिपत्तेः ॥ ४ ॥ एषां घटरूपादीनां मूलकारणे प्रवादिनां विप्रतिपत्तिः । तद्यथा केचिदाहुः अव्यक्तान्महदहंकारतन्मात्रेंद्रियमहाभूतमृत्पिंडादिनिर्वृत्तिक्रमेण घटादेर्विश्वरूपस्य जगत उत्पादः । इति तदयुक्तं न हि प्रधानस्यामूर्तत्वनिरवयवत्वनिःक्रियत्वाऽतींद्रियत्वानंत्यनित्यत्वापरप्रयोज्य-त्वादिविशेषोपेतस्य तद्विलक्षणो घटादिः कार्यो भवितुमर्हति अदृष्टत्वात् । न वा परप्रयोज्यस्य प्रधानस्य स्वयमभिप्रायरहितस्याभिप्रायपूर्वकप्रसवक्रमो युक्तः । पुरुषस्तावन्निष्क्रियत्वान्न महदादिसर्गार्थं प्रधानं प्रयुंक्ते । स्वयं च निष्क्रियत्वात्प्रधानं नात्मानं महदादिसर्गार्थं प्रयोक्तुमर्हति । न हि स्वयं गतिविकलः पंगुरात्मानमेवा वष्टभ्योत्थाय गच्छन्दृष्टः । किंचाप्रयोजनस्य प्रधानस्य महदादि सर्गो न युक्तिमान् । पुरुषभोगः प्रयोजनमिति चेन्न स्वार्थाभावात् । नित्यस्य विभोरात्मनः भोगपरिणामाभावाच्च । किंचाऽचेतनत्वात् । इह लोके चेतनश्चैत्र ओदनार्थी क्रियाफलसाधनज्ञः तदर्थेष्वग्निसंधुक्षणादिषु प्रवर्तमानो दृष्टः । न च तथा प्रधानं चेतनमतोऽस्य-महदादिक्रियाप्रसवक्रमाभावः । नच पुरुषस्तस्य क्रमस्य प्रयोजको निष्क्रियत्वात् । अपर आहुः परमाणु-भ्यः प्रतिनियतपार्थिवादिजातिविशिष्टेभ्योऽदृष्टादिसंनिधाने सति संहतेभ्योऽर्थांतरभूतघटादिकार्यात्म-लाभ इति तदप्ययुक्तं—नित्यत्वादणूनां कार्यारंभशक्त्यभावात् । सति चारंभे नित्यत्वहानिः । नचार्थांतर-भूतस्य कार्यस्यारंभो युक्तः व्यतिरेकानुपलब्धेरुपलब्धौ चाणुमहत्वाभावः । न च जातिप्रतिनियमोस्ति भिन्न-

१ अवगच्छति ।

जातीयानामप्यारंभदर्शनात् । भिन्नजातीयेषु समुदायमात्रमिति चेत्तुल्यजातीयेष्वपि तत्प्रसंगः । न चात्मनो घटाद्यारंभे कर्तृत्वमुपपन्नं निष्क्रियत्वान्नित्यत्वाच्च । नाप्यात्मगुणस्याऽदृष्टादेर्निष्क्रियत्वादेव । न च निष्क्रियोऽर्थांतरे क्रियाहेतुर्दृष्टः । अन्ये मन्यंते वर्णादिपरमाणुसमुदयात्मका रूपपरमाणवोऽतींद्रिया समुदिताः संतः इंद्रियग्राह्यत्वमनुभूय घटादिकार्यात्मलाभहेतुत्वं प्रतिपद्यंत इति, तदयुक्तं प्रत्येकरूपपरमाणूनामतींद्रियत्वात्ततोऽन्यस्य कार्यस्याप्यतींद्रियत्वप्रसंगात् ततश्च दृश्यविषयप्रमाणप्रमाणाभासविकल्पाभावः । कार्याभावाच्च तल्लिंगकारणस्याप्यभावः । किं च-क्षणिकत्वान्निष्क्रियत्वाच्च कार्यारंभाभावः । विविक्तशक्तीनां परस्पराभिसंबंधाभावश्च । न चान्योऽर्थश्चेतनस्तेषां संबंधस्य कर्तास्ति तदभावात्संबंधाभावः । एवमन्येष्वपि प्रवादिषु सत्यसदिति असत्यपि सदिति विपर्ययो मिथ्यादर्शनोदयवशाद्वेदितव्यः । पित्तोदयाकुलितरसनेंद्रियविपर्ययवत् । ततो यदुक्तं रूपादिविषयोपलब्धिव्यभिचाराभावान्न मिथ्यादर्शनत्रयमज्ञानमिति तदसम्यक् । व्याख्यातं ज्ञानं लक्षणादिभिः । इदानीं चारित्रं निर्देष्टव्यं तदुल्लंघ्य नया उच्यंते कस्मात्? मोक्षविधाने तस्य वक्ष्यमाणत्वात् । कुतः पुनस्तन्मोक्षविधौ वक्ष्यते ? इति चेन्मोक्षं प्रति प्रधानकारणत्वात् । किं कृतं प्राधान्यं ? कृत्स्नकर्मेधननिर्दहनकृतं । यत आत्मा व्युपरतक्रियाध्यानाविर्भूतात्मबलः कृत्स्नकर्मेधननिर्दहन समर्थो भवति । ननु क्षायिकसम्यक्त्वकेवलज्ञानोपेतोपि यदि स्यात् क्षायिककेवलज्ञानोत्पत्त्यनंतरमेव कृत्स्नकर्मक्षयः स्यात् । व्युपरतक्रियाध्यानोत्पत्त्यनंतरमेव भवति तच्चोत्तमं चारित्रं, 'कर्मादानहेतुक्रियाव्युपरतिश्चारित्रमिति वचनात्' । यदीह तदुच्यते मोक्षविधानेपि तद्वक्तव्यमिति गौरवं स्यादेवमपि जीवादयो निर्देष्टव्या उच्यंते । प्रमाणं व्याख्यातं प्रमाणैकदेशा नयाः । 'प्रमाणनयैरधिगमः' इति वचनात् । तदनंतरवचनार्हा नयाः । यद्येवं के ते नयाः ? इत्यत आह-

नैगमसंग्रहव्यवहारर्जुसूत्रशब्दसमभिरूढैवंभूता नयाः ॥ ३३ ॥

शब्दापेक्षयैकादिसंख्येयविकल्पा नयाः । तत्रातिसंक्षेपादप्रतिपत्तिः, अतिविस्तरे चाल्पप्रज्ञानामननुग्रह इति मध्यतया प्रतिपत्त्या सप्तनया अत्रोच्यंते । तेषां सामान्यविशेषलक्षणं वक्तव्यं । तत्र सामान्यलक्षणमुच्यते—

प्रमाणप्रकाशितोऽर्थविशेषप्ररूपको नयः ॥ १ ॥ प्रकर्षेण मानं प्रमाणं सकलादेश इत्यर्थः, तेन प्रकाशितानां न प्रमाणाभासपरिगृहीतानामित्यर्थः, तेषामर्थानामस्तित्वनास्तित्वनित्यत्वाद्यंतात्मनां जीवादीनां ये विशेषाः पर्यायास्तेषां प्रकर्षेण रूपकः प्ररूपकः निरुद्धदोषानुसंगद्वारेणेत्यर्थः, एवं लक्षणो नयस्तस्य द्वौ मूलभेदौ द्रव्यास्तिकः पर्यायास्तिक इति । द्रव्यमस्तीति मतिरस्य द्रव्यभवनमेव नातोन्ये भावविकाराः नाप्यभावस्तद्व्यतिरेकेणानुपलब्धेरिति द्रव्यास्तिकः । पर्याय एवास्ति, इति मतिरस्य जन्मादिभावविकारमात्रमेव भवनं न ततोऽन्यद्द्रव्यमस्ति तद्व्यतिरेकेणानुपलब्धेरिति पर्यायास्तिकः । अथवा द्रव्य मेवार्थोस्य न गुणकर्मणी तदवस्थारूपादिति द्रव्यार्थिकः । पर्याय एवार्थोस्य रूपाद्युत्क्षेपणादिलक्षणो न ततोन्यद्द्रव्यमिति पर्यायार्थिकः । अथवाऽर्यते गम्यते निष्पाद्यत इत्यर्थः । कार्यं द्रवति गच्छतीति द्रव्यं कारणं । द्रव्यमेवार्थोस्य कारणमेव कार्यं नार्थांतरं, न च कार्यकारणयोः कश्चिद्रूपभेदः तदुभयमेकाकारमेव पर्वांगुलिद्रव्यवदिति द्रव्यार्थिकः । परि समंतादायःपर्यायः । पर्याय एवार्थः कार्यमस्य न द्रव्यमतीतानागतयोर्विनष्टानुत्पन्नत्वेन व्यवहाराभावात् स एवैकः कार्यकारणव्यपदेशभागिति पर्यायार्थिकः । अथवाऽर्थनमर्थः प्रयोजनं द्रव्यमेवार्थोस्य प्रत्ययाभिधानानुप्रवृत्तिलिंगदर्शनस्य निह्नोतुमशक्यत्वादिति द्रव्यार्थिकः । पर्यायोर्थः प्रयोजनमस्य वाग्विज्ञानव्यावृत्तिनिबंधनव्यवहारप्रसिद्धेरिति पर्यायार्थिकः । तद्भेदा नैगमादयः । एषां विशेषलक्षणमुच्यते—

अर्थसंकल्पमात्रग्राही नैगमः ॥ २ ॥ निगच्छंत्यस्मिन्निति निगमनमात्रं वा निगमः, निगमे कुशलो भवो वा नैगमस्तस्य लोके व्यापारः । अर्थसंकल्पमात्रग्रहणं प्रस्थेंद्रगृहगम्यादिषु । तद्यथा-कंचित्पुरुषं परशुं गृहीत्वा गच्छंतमभिसमीक्ष्याह किमर्थं गच्छति भवानिति स तस्मै व्याचष्टे प्रस्थार्थमिति । एव-

मिंद्रगृहादावपि तथा कतरोत्र गमीत्युक्ते आचष्टे अहं गमीति संप्रत्यगच्छत्यपि गमीति व्यवहारः। एवं प्रकारेण्योपि नैगमनयस्य विषयः।

भाविसंज्ञाव्यवहार इति चेन्न भूतद्रव्यासंनिधानात् ॥ ३ ॥ स्यादेतन्नायं नैगमनयविषयो भाविसंज्ञाव्यवहार इति तन्न। किं कारणं ? भूतद्रव्यासंनिधानात्। भूतं हि कुमारतंडुलादिद्रव्यमाश्रित्य राजौदनादिका भाविनी संज्ञा प्रवर्तते। न च तथा नैगमनयविषयं किंचित्तद्भूतं द्रव्यमस्ति यदाश्रया भाविनी संज्ञा विज्ञायेत।

उपकारानुपलंभात्संव्यवहारानुपपत्तिरिति चेन्नाप्रतिज्ञानात् ॥ ४ ॥ स्यादेतन्नैगमनयवक्तव्ये उपकारो नोपलभ्यते भाविसंज्ञाविषये तु राजादावुपलभ्यते ततो नायं युक्त इति तन्न। किं कारणं-अप्रतिज्ञानात् नैतदस्माभिः प्रतिज्ञातमुपकारे सति भवितव्यमिति। किं तर्हि अस्य नयस्य विषयः प्रदर्श्यते अपि चोपकारं प्रत्यभिमुखत्वादुपकारवानेव।

स्वजात्यविरोधेनैकत्वोपनयात्समस्तग्रहणं संग्रहः ॥ ५ ॥ बुद्ध्यभिधानानुप्रवृत्तिलिंगं सादृश्यं स्वरूपानुगमो वा जातिः सा चेतनाचेतनाद्यात्मिका शब्दप्रवृत्तिनिमित्तत्वेन प्रतिनियमात्स्वार्थव्यपदेशभाक्। स्वा जातिः स्वजातिः। अप्रच्यवनमविरोधः, स्वजातेरविरोधः स्वजात्यविरोधस्तेन स्वजात्यविरोधेनैकत्वोपनयात्। केषां ? भेदानां समस्तग्रहणं संग्रहो यथा सद्द्रव्यं घट इत्यादि। सदित्युक्ते सत्तासंबंधार्हाणां द्रव्यपर्यायतद्भेदप्रभेदानां द्रव्यत्वाविरोधात्तैनैकत्वेन संग्रहः। घट इति चोक्ते नामादिभेदान्मृत्सुवर्णादिकारणविशेषाद्वर्णसंस्थानादिविकाराच्च भिन्नानां घटशब्दवाच्यानां तदव्यतिरेकादेकत्वेन संग्रहः। एवमितरेष्वपीति। तत्राभिधानप्रत्ययौ सामान्यं निराकृतविशेषाभावात्। आह सत्ताद्यर्थांतरभूतमस्ति तदभिसंबंधात्सदादिव्यपदेश इति तन्न। उभयथानुपपत्तेः इदमिह संप्रधार्यं सत्तासंबंधात्प्राग् द्रव्यादिषु सदित्यभिधानं प्रत्ययश्च स्याद्वा नेवेति ? यदि स्यात् ? सत्तासंबंधवैयर्थ्यं। प्रकाशितप्रकाशनवैयर्थ्यवत् सत्ताद्वयप्रसंगश्च। एकाभ्यंतरी अपरा वाह्येयतश्च समयविरोधः। सल्लिंगाविशेषाद्विशेषलिंगाभावाच्चैको भाव इति। अथ नास्ति खरविषाणादिष्वतिप्रसंगः। समवायकृतोयं विशेष इति चेन्न तस्य प्रतिषिद्धत्वात्। किं च सत्तायाः सदितिव्यपदेशस्य सत्तांतरहेतुकत्वाहेतुकत्वयोरनवस्था प्रतिज्ञाहानिदोषप्रसंगः। अथ पदार्थशक्तिप्रतिनियमाद्द्रव्यादिषु सदिति व्यपदेशो निमित्तांतरहेतुकः, सत्तायां स्वत एवेति चेत् संसर्गवादत्यागः इच्छामात्रकल्पनाप्रसंगश्च। किं च सत्तादेः पदार्थांतरस्य द्रव्यादिषु वृत्तिः सोऽस्येति वा स्यात्सोयमिति वा ? यदि सोस्येतिवृत्तिर्मत्वर्थो येन भवितव्यं सत्तावद्द्रव्यमिति यथा गोमान् यवमानित्यतो मत्वर्थस्य भावार्थस्य च निवृत्तिर्वक्तव्या। अथ सोयमित्यभिसंबंधेन वृत्तिः सत्ताद्रव्यमिति प्राप्नोति। यथा यष्टिः पुरुष इति न सद्द्रव्यमिति तत्र भावार्थस्य निवृत्तिर्वक्तव्या। किंच दृष्टांताभावान्नह्येकं किंचिदनेकसंबंधि दृष्टं यदभिसमीक्ष्य सत्तैकाऽनेकसंबंधिनी गम्येत। नीलीद्रव्यवदिति चेन्न तस्यानेकत्वात्। नीलित्ववदिति चेन्न तस्यासिद्धत्वात्।

अतो विधिपूर्वकमवहरणं व्यवहारः ॥ ६ ॥ एतस्मादतः, कुतः। संग्रहात् संग्रहनयाक्षिप्तानामर्थानां विधिपूर्वकमवहरणं व्यवहारः। को विधिः संग्रहगृहीतोर्थस्तदानुपूर्व्येणैव व्यवहारः प्रवर्तते इत्ययं विधिस्तद्यथा – सर्वसंग्रहेण सत्संगृहीतं तच्चानपेक्षितविशेषं नालं संव्यवहारायेति व्यवहारनय आश्रीयते। यत्सत्तद् द्रव्यं गुणो वेति। द्रव्येणापि च संग्रहाक्षिप्तेन जीवाजीवविशेषानपेक्षेण न शक्यः संव्यवहार इति जीवद्रव्यमजीवद्रव्यमिति वा व्यवहार आश्रीयते। जीवाजीवावपि च संग्रहाक्षिप्तौ नालं संव्यवहारायेति प्रत्येकं देवनारकादिर्घटादिश्च व्यवहारेणाश्रीयते। कषायो भैषज्यमित्युक्ते च सामान्यस्य विशेषात्मकत्वान्न्यग्रोधादिविशेषसामर्थ्यं नहि शक्यः प्रभुणापि चक्रभृता सर्वःकषायसमाहारः कर्तुं। नामस्थापनाद्रव्याणि च संग्रहोपात्तानि नालं व्यवहारायेति भाव एव गृह्यते। एवमयं नयस्तावद्वर्तेते यावत्पुनर्नास्ति विभागः।

सूत्रपातवदृजुसूत्रः ॥ ७ ॥ यथा ऋजुःसूत्रपातस्तथा ऋजु प्रगुणं सूत्रयति तंत्रयति ऋजुसूत्रः।

सर्वांस्त्रिकालविषयानतिशय्य वर्तमानविषयकालमादत्ते । अतीतानागतयोर्विनष्टानुत्पन्नत्वेन व्यवहाराभावात् समवायमात्रमस्य निर्दिधिक्षितं । कषायो भैषज्यमित्यत्र च संजातरसः कषायो भैषज्यं न प्राथमिककषायोऽल्पोऽनभिव्यक्तरसत्वादस्य विषयः। पच्यमानः पक्वः पक्वस्तु स्यात्पच्यमानः स्यादुपरतपाक इति। असदेतद्विरोधात् । पच्यमान इति वर्तमानः पक्व इत्यतीतस्तयोरेकस्मिन्नवरोधो विरोधीति। नैष दोषः पचनस्यादाव विभागसमये कश्चिदंशो निर्वृत्तो वा न वा। यदि न निर्वृत्तस्तद्द्वितीयादिष्वप्यनिर्वृत्तेः पाकाभावः स्यात् । ततोऽभिनिर्वृत्तेस्तदपेक्षया पच्यमानः पक्वः इतरथा हि समयस्य त्रैविध्यप्रसंगः स एवौदन पच्यमानः पक्वः स्यात्पच्यमान इत्युच्यते पक्तुरभिप्रायस्यानिर्वृत्तेः । पक्तुर्हि सुविशदसुस्विन्नौदने पक्वाभिप्रायः स्यादुपरतपाक इति चोच्यते । कस्यचित्पक्तुस्तावतैव कृतार्थत्वादेवं क्रियमाणकृतभुज्यमानभुक्तबध्यमानबद्धसिध्यत्सिद्धादयो योज्याः । तथा प्रतिष्ठं तेऽस्मिन्निति प्रस्थः यदैव मिमीतेऽतीतानागतधान्यमानासंभवात्कुंभकाराभावः । शिविकादिपर्यायकरणे तदभिधानाभावात्कुंभपर्यायसमये च स्वावयवेभ्य एव निर्वृत्तेः । स्थितिप्रश्ने च कुतोऽद्यागच्छसीति न कुतश्चिदित्ययं मन्यते तत्कालक्रियापरिणामाभावात् । यमेवाकाशमवगाढं समर्थ आत्मपरिणामं वा तत्रैवास्य वसतिः । न कृष्णः काक उभयोरपि स्वात्मकत्वात्कृष्णः कृष्णात्मको न काकात्मकः । यदि काकात्मकः स्याद् भ्रमरादीनामपि काकत्वप्रसंगः काकश्च काकात्मको न कृष्णात्मकः । यदि कृष्णात्मकः शुक्लकाकाभावः स्यात् पंचवर्णत्वाच्च पित्तास्थिरुधिरादीनां पीतशुक्लरक्तादिवर्णत्वात्तद्व्यतिरेकेण काकाभावाच्च । न सामानाधिकरण्यमेकस्य पर्यायेभ्योऽनन्यत्वात्पर्याया एव विविक्तशक्तयो द्रव्यं नाम न किंचिदस्तीति । कृष्णगुणप्राधान्यादिति चेन्नास्थिरक्तादिष्वतिप्रसंगात्कषायमधुरे च मधुनि विरोधात् अप्रत्यक्षे चाख्यायमाने संशयदर्शनात् । कृष्णकाकविशेषज्ञेन केनचिद्द्वीपांतरनिवासिन्यनुपलब्धकृष्णकाकविशेषे पुरुषे प्रतिपद्यमाने संशयो जायते किमयं काकस्य कार्ष्ण्यं गुणप्राधान्यादाचष्टे द्रव्यस्यैव वा तथा परिणामादित्यतः पलालादिदाहाभावः। प्रतिविशिष्टकालपरिग्रहादस्य हि नयस्याविभागो वर्तमानसमयो विषयः। अग्निसंबंधनदीपनज्वलनदहनान्यसंख्येयसमयांतरालानि यतोऽस्य दहनाभावः। किं च यस्मिन् समये दाहः न तस्मिन् पलालं भस्मताभिनिर्वृत्तेः यस्मिंश्च पलाल न तस्मिन् दाह इति । यत्पलालं तद्दहतीति चेन्न सावशेषात् । समुदायाभिधायिनां शब्दानामवयवेषु वृत्तदर्शनाददोष इति चेन्न तदवस्थत्वात् । एकदेशदाहाभावस्योक्तत्वान्निरवशेषदाहासंभवादिति चेन्न वचनविरोधात् तदवस्थत्वाच्च । वचनविरोधस्तावद्यदि निरवशेषस्य पलालस्य दाहस्यासंभव इत्येकदेशदाहात्पलालदाहो नादाहः । ननु भवद्वचनस्य निरवशेषपरपक्षदूषकत्वाभावात् परपक्षैकदेशस्य दूषकत्वमतः, एकदेशदूषकत्वात्कृत्स्नमर्यादं दूषकमेवेत्यस्य साधकत्वसामर्थ्याभाव इति तदवस्थमप्येकसमयदाहाभाव इत्युक्तत्वादवयवानेकत्वे यद्यवयवदाहात्सर्वत्र दाहोऽवयवांतरादाहात् ननु सर्वदाहाभावः । अथ दाहः सर्वत्र कस्मान्नादाहोऽतो न दाहः । एवं पानभोजनादिव्यवहाराभावः । न शुक्लः कृष्णी भवत्युभयोर्भिन्नकालावस्थत्वात्प्रत्युत्पन्नविषये निवृत्तिपर्यायानभिसंबंधात्सर्वसंव्यवहारलोप इति चेन्न विषयमात्रप्रदर्शनात् पूर्वनयवक्तव्यात्संव्यवहारसिद्धिर्भवति ।

शपत्यर्थमाह्वयति प्रत्याययतीति शब्दः ॥ ८ ॥ उच्चरितः शब्दः कृतसंगतेः पुरुषस्य स्वाभिधेये प्रत्ययमादधाति इति शब्द इत्युच्यते ।

स च लिंगसंख्यासाधनादिव्यभिचारनिवृत्तिपरः ॥ ९ ॥ लिंगं स्त्रीत्वपुंस्त्वनपुंसकत्वानि । संख्या एकत्वद्वित्वबहुत्वानि । साधनमस्मदादि । एवमादीनां व्यभिचारोन न्याय्य इति तन्निवृत्तिपरोऽयं नयः । तद्यथा—लिंगव्यभिचारस्तावत्स्त्रीलिंगे पुल्लिंगाभिधानं तारका स्वातिरिति । पुल्लिंगे स्त्र्यभिधानमवगमो विद्येति । स्त्रीत्वे नपुंसकाभिधानं वीणाऽऽतोद्यमिति । नपुंसके स्त्र्यभिधानमायुधं शक्तिरिति । पुल्लिंगे नपुंसकाभिधानं पटो वस्त्रमिति । नपुंसके पुल्लिंगाभिधानं द्रव्यं परशुरिति । संख्याव्यभिचारः, एकत्वे द्वित्वं, नक्षत्रं पुनर्वसू इति, एकत्वे बहुत्वं नक्षत्रं शतभिषज इति। द्वित्वे एकत्वं गोदौ ग्राम इति। द्वित्वे बहुत्वं पुनर्वसू पंचतारकाः इति। बहुत्वे एकत्वमाम्राः वनमिति। बहुत्वे द्वित्वं देवमनुष्या उभौ राशी इति। साधनव्यभिचारः—*एहि मन्ये रथेन यास्यसि नहि यास्यसि यातस्ते पितेति* । आदिशब्देन कालादिव्यभिचारो

गृह्यते, विश्वदृश्वास्य पुत्रो जनिता भावि कृत्यमासीदिति कालव्यभिचारः। संतिष्ठते प्रतिष्ठते विरमत्युपरमतीत्युपग्रहव्यभिचारः। एवमादयो व्यभिचारा अयुक्ताः, कुतः ? अन्यार्थस्याऽन्यार्थेन संबंधाभावात्। यदि स्यात् ? घटः पटो भवतु पटो प्रासाद इति तस्माद्यथा—लिंगं यथासंख्यं यथासाधनादि च न्याय्यमभिधानं। लोकसमयविरोध इति चेद्विरुध्यतां तत्त्व मीमांस्यते सुहृत्सूपचारः।

नानार्थसमभिरोहणात्समभिरूढः ॥ १० ॥ यतो नानार्थान् समतीत्यैकमर्थमाभिमुख्येन रूढस्ततः समभिरूढः। कुतः ? वस्त्वंतरासंक्रमेण तन्निष्ठत्वात् कथं ? अवितर्कध्यानवत्। यथा तृतीयं शुक्लं सूक्ष्मक्रियमवितर्कमवीचारं ध्यानमर्थव्यंजनयोगसंक्रांत्यभावात्सूक्ष्मकाययोगनिष्ठत्वात्। तथा गौरित्ययं शब्दो वागादिषु वर्तमानो गव्यधिरूढः। एवं शेषेष्वपि रूढिशब्दोस्य विषयः। अथवार्थगत्यर्थः शब्दप्रयोग इति तत्रैकस्यार्थस्यैकेन गतत्वात् पर्यायशब्दप्रयोगोऽनर्थकः शब्दभेदश्चेदस्ति अर्थभेदेनाप्यवश्यं भवितव्यमिति। नानार्थसमभिरोहणात्समभिरूढः इंदनादिंद्रः शकनाच्छक्रः पूर्दारणात्पुरंदर इत्येवं सर्वत्र। अथवा यो यत्राभिरूढः स तत्र समेत्याभिमुख्येनारोहात्समभिरूढः। यथा क भवानास्ते स्वात्मनीति। कुतः ? वस्त्वंतरे वृत्त्यभावात् यद्यन्यस्यान्यत्र वृत्तिः स्याज्ज्ञानादीनां रूपादीनां चाकाशे वृत्तिः स्यात्।

येनात्मना भूतस्तेनैवाऽध्यवसाययतीत्येवंभूतः ॥ ११ ॥ येनात्मना येनाभिधेयेन भूतः शब्दस्तेनैवाऽध्यवसाययति। यथेंद्रशब्दः परमेश्वरत्वाभिधेयः स परिणामो यत्र यदा वर्तते तत्र तदैव युक्तो न नामस्थापनाद्रव्येषु तत्परिणामाभावात्। इत्येवमितरेष्वपि शब्देषु स्वाभिधेयक्रियापरणतिक्षण एव युक्तिर्नान्यदेति। अथवा येनात्मना येन स्वरूपेण भूतोर्थस्तेनैवाध्यवसाययति यथा गच्छतीति गौरिति यदैव गच्छति तदैव गौरिति न स्थितो न शयित इति। पूर्वोत्तरकालयोस्तदर्थाभावाद्दंडिवत्। एवमितरेष्वपि। अथवा येनात्मना येन ज्ञानेन भूतः परिणतस्तेनैवाध्यवसाययति यथेंद्राग्निज्ञानपरिणत आत्मैवेंद्रोऽग्निश्चेत्येवंभूतार्थप्रत्यायनाच्छब्द एवंभूतः तत्कार्यत्वाच्छब्दसिद्धेः।

दाहकत्वाद्यतिप्रसंग इति चेत्तदव्यतिरेकादप्रसंग इति ॥ १२ ॥ स्यादेतदग्न्यादिव्यपदेशो यद्यात्मनि क्रियते दाहकत्वाद्यतिप्रसज्यते ? इत्युच्यते तदव्यतिरेकादप्रसंगस्तानि नामादीनि येन रूपेण व्यपदिश्यंते ततस्तेषामव्यतिरेकः प्रतिनियतार्थवृत्तित्वाद्धर्माणां। ततो नो आगमभावाग्नौ वर्तमानं दाहकत्वं कथमागमभावाग्नौ वर्तेत ! उक्ता नैगमादयो नया उत्तरोत्तरसूक्ष्मविषयत्वादेषां क्रमः पूर्वपूर्वहेतुकत्वाच्च। एवमेते नयाः पूर्वपूर्वविरुद्धमहाविषया उत्तरोत्तरानुकूलाल्पविषया द्रव्यस्यानंतशक्तेः प्रतिशक्तिभिद्यमाना बहुविकल्पा जायंते। एते गुणप्रधानतया परस्परतंत्राः सम्यग्दर्शनहेतवः पुरुषार्थक्रियासाधनसामर्थ्यात्तंत्वादय इव यथोपायं विनिवेश्यमानाः पटादिसंज्ञाः स्वतंत्राश्चाऽसमर्थाः। तंत्वादिवदेवं विषम उपन्यासस्तंत्वादयो निरपेक्षा अपि कांचिदर्थमात्रां जनयंति। भवति हि कश्चित् प्रत्येकं तंतुस्त्वक्त्राणे समर्थ एकश्च वल्कलो बंधने समर्थः। इमे पुनर्नया निरपेक्षाः संतः न कांचिदपि सम्यग्दर्शनमात्रां प्रादुर्भावयंतीति। नैष दोषः। अभिहितानवबोधात् अभिहितमर्थमनवबुध्य परेणेदमुपालभ्यते। एतदुक्तं निरपेक्षेषु तंत्वादिषु पटादिकार्यं नास्तीति यत्तु तेनोपदर्शितं न तत्पटादिकार्यं किं तर्हि तंत्वादिकार्यं तंत्वादिकार्यमपि तंत्वाद्यवयवेषु निरपेक्षेषु नास्त्येवेत्यस्मत्पक्षसिद्धिरेव। अथ तंत्वादिकार्यं शक्त्यपेक्षयास्तीत्युच्यते नयेष्वपि निरपेक्षेषु बुद्ध्यभिधानरूपेषु कारणवशात् सम्यग्दर्शनहेतुत्वविपरिणतिसद्भावाच्छक्त्यात्मनाऽस्तित्वमिति साम्यमेवोपन्यासस्य। ज्ञानदर्शनयोस्तत्त्वं नयानां चैव लक्षणं। ज्ञानस्य च प्रमाणत्वमध्यायेस्मिन्निरूपितमिति ॥

जीयाच्चिरमकलंकब्रह्मा लघुहव्वनृपतिवरतनयः।
अनवरतनिखिलविद्वज्जननुतविद्यः प्रशस्तजनहृद्यः ॥

इति तत्त्वार्थराजवार्तिके व्याख्यानालंकारे प्रथमोध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ।

अत्राह मोक्षमार्गव्याख्याप्रसंगेन सम्यग्दर्शनादीन्युपदिश्यंते । तेषां च लक्षणोत्पत्तिविषयनिबंधाः दीनि व्याख्यातानि तत्र तत्त्वार्थश्रद्धानं सम्यग्दर्शनमुद्दिष्टं तत्त्वार्थश्च जीवादयस्तत्रादावुद्दिष्टस्य जीवस्य किं श्रद्धातव्यं यदवधारणप्रतिपत्त्युपासनादिभ्यस्तन्निष्पद्यत इत्युच्यते तत्त्वमात्मनः स्वभाव–श्रद्धेयः । यद्येवः मुच्यतां तदीयं किं तत्त्वमित्यत उत्तरं पठति–

औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिकपारिणामिकौ च

अथवा प्रमाणनया अनंतरं विनिर्दिष्टाः । स्ते च प्रमेयाधिगमरूपाः प्रमेयाश्च जीवादयः पदार्था इदानीं निर्देष्टव्याः । यद्येवमस्यैव तावदाद्युपदिष्टजीवस्य किं तत्त्वमित्यत आह–औपशमिकादीनि ।

कर्मणोऽनुद्भूतस्ववीर्यवृत्तितोपशमोऽधःप्रापितपंकवत् ॥ १ ॥ यथा सकलुषस्यांभसः कतकादिद्रव्यसंपर्कादधःप्रापितमलद्रव्यस्य तत्कृतकालुष्याभावात्प्रसाद उपलभ्यते । तथा कर्मणः कारणवशादनुद्भूतस्ववीर्यवृत्तिता आत्मनो विशुद्धिरुपशमः ।

क्षयो निवृत्तिरात्यंतिकी ॥ २ ॥ यथा तस्यैवांभसोऽधःशमितपंकस्य शुचिभाजनांतरसंक्रांतस्य प्रसाद आत्यंतिकः, स्तथात्मनोपि कर्मणोऽत्यंतविनिवृत्तौ विशुद्धिरात्यंतिकी क्षय इत्युच्यते ।

उभयात्मको मिश्रः क्षीणाक्षीणमदशक्तिकोद्रववत् ॥ ३ ॥ यथा प्रक्षालनविशेषात् क्षीणाक्षीणमदशक्तिकस्य कोद्रवद्रव्यस्य द्विधा वृत्तिः तथा यथोक्तक्षयहेतुसंनिधाने सति कर्मण एकदेशस्य क्षयादेकदेशस्य च वीर्योपशमादात्मनो भाव उभयात्मको मिश्र इति व्यपदिश्यते ।

द्रव्यादिनिमित्तवशात् कर्मणः फलप्राप्तिरुदयः ॥ ४ ॥ द्रव्यादिनिमित्तं प्रतीत्य कर्मणो विपच्यमानस्य फलोपनिपात उदय इतीमामाख्यां लभते ।

द्रव्यात्मलाभमात्रहेतुकः परिणामः ॥ ५ ॥ यस्य द्रव्यात्मलाभमात्रमेव हेतुर्भवति नान्यन्निमित्तमस्ति स परिणाम इति परिभाष्यते ।

तत्प्रयोजनत्वाद्वृत्तिवचनं ॥ ६ ॥ ते उपशमादयः प्रयोजनमस्येति वृत्तिः क्रियते स उपशमः प्रयोजनमस्येत्यौपशमिकः, क्षयःप्रयोजनमस्येति क्षायिकः, उदयः प्रयोजनमस्येत्यौदयिकः परिणामः प्रयोजनमस्येति पारिणामिकः । ते भावा जीवस्य स्वतत्त्वं स्वं तत्त्वं स्वतत्त्व स्वो भावोऽसाधारणो धर्मः ।

व्याप्तेरौदयिकपारिणामिकग्रहणमादाविति चेन्न भव्यजीवधर्मविशेषख्यापनार्थत्वादादावौपशमिकादि भाववचनं ॥ ७ ॥ स्यादेतत्सर्वजीवसाधारणत्वाद्व्याप्तेरौदयिकपारिणामिकग्रहणमादौ न्याय्यमिति । तन्न किं कारणं भव्यजीवधर्मविशेषख्यापनार्थत्वाद्भव्यस्य मोक्षप्रतिपादनार्थो ह्ययं प्रयासः । अतोस्य धर्मविशेष औपशमिकादिभाव आदावुच्यते ।

तत्र चादावौपशमिकवचनं तदादित्वात्सम्यग्दर्शनस्य ॥ ८ ॥ सम्यग्दर्शनस्य हि आदिरौपशमिको भावस्ततः क्षायोपशमिकस्ततः क्षायिकः इत्यत औपशमिकस्यादौ ग्रहणं क्रियते ।

अल्पत्वाच्च ॥ ९ ॥ अल्पश्चौपशमिको भावः क्षायिकात् क्षायोपशमिकाच्च कुतोल्पत्वं ? संचयकालस्याल्पत्वात् तद्यथा–उपशमसम्यग्दर्शनस्य कालोंतर्मुहूर्तः सोंतर्मुहूर्तोऽसंख्येयाः समयाः तत्र समये समये नैरंतर्येण संचीयमाना उपशमसम्यग्दृष्टय आअंतर्मुहूर्तसमाप्तेः पल्योपमाऽसंख्येयभागप्रमाणा इति सर्वेभ्योल्पे ।

ततो विशुद्धिप्रकर्षयुक्तत्वात् क्षायिकः ॥ १० ॥ औपशमिकाद्धि क्षायिकः प्रकृष्टशुद्ध्युपेतो मिथ्यात्वसम्यङ्मिथ्यात्वसम्यक्त्वानां साकल्येन संक्षयात् तत औपशमिकात्परं क्षायिकवचनं ।

बहुत्वाच्च ॥ ११ ॥ बहवो हि क्षायिकसम्यग्दृष्टय औपशमिकसम्यक्त्वेभ्यः । कुतः ? गुणकार-विशेषात् को गुणकारः ? आवलिकाया असंख्येयभागः सोऽसंख्येयाः समयाः कुतोऽसंख्येयस्य राशेरसं-ख्येया एव इति । तत आवलिकाया असंख्येयभागेन गुणिता उपशमसम्यग्दृष्टयः क्षायिकसम्यग्दृष्टीन्प्रा-प्नुवंति। कुतः संचयकालस्य महत्वात्। इह क्षायिकसम्यग्दृष्टेस्त्रयस्त्रिंशत्सागरोपमाणि सातिरेकाणि कालस्तस्य प्राथमिकसमयादारभ्य समये समये राचीयमाना आतत्कालपरिसमाप्तेर्बहवो भवंति ।

तदसंख्येयगुणत्वात्तदनंतरं मिश्रवचनं ॥ १२ ॥ क्षायिकादसंख्येयगुणः क्षायोपशमिकः द्रव्यतो न भावतः क्षायोपशमिकाद्धि क्षायिको भावतोऽनंतगुणः, विशुद्धिप्रकर्षयोगात्, स्माद्द्रव्यतोऽसंख्येय-गुणः क्षायिकात्क्षायोपशमिकः । कुतः ? गुणकारविशेषात् । को गुणकारः ? आवलिकाया असंख्येयभागः । कुतः संचयकालस्य महत्वात् । इह क्षायोपशमिकसम्यग्दृष्टेः षट्षष्टिसागरोपमाणि पूर्णानि कालस्तस्य प्रथम-समयादारभ्य समये समये संचीयमानाः क्षायोपशमिकसम्यग्दृष्टय आतत्कालपरिसमाप्तेर्भूयांसो भवंति ।

तदनंतगुणत्वादंते द्वयवचनं ॥ १३ ॥ तेषां सर्वेषामेवानंतगुणा औदयिकाः पारिणामिकाश्च ततोंते तेषां वचनं क्रियते ।

तैरेव चात्मनः समधिगमात् ॥ १४ ॥ अतींद्रियत्वादात्मनो मनुष्यतैर्यग्योनादिभिरौदयिकैः पारिणामिकैश्च चैतन्यजीवत्वादिभिः समधिगमो भवति ।

सर्वजीवतुल्यत्वाच्च ॥ १५ ॥ सर्वेषां हि जीवानां तुल्या औदयिकाः पारिणामिकाश्च ततस्तेषा-मंते वचनं न्याय्यं ।

तत्त्वमिति बहुवचनप्रसंग इति चेन्न भावस्यैकत्वात् ॥ १६ ॥ स्यादेतदौपशमिकादिपंचतय-भावसामानाधिकरण्यात्तत्त्वस्य बहुवचन प्राप्नोतीति तन्न । किं कारणं भावस्यैकत्वात्तत्त्वमित्येष एको भावः ।

फलभेदान्नानात्वमिति चेन्न स्वात्मभावभेदस्याऽविवक्षितत्वाद्गावोधनमिति यथा ॥ १७ ॥ स्यादेतदौपशमिकादिपंचतयत्वफलभेदाद्भावनानात्वमिति तन्न । किं कारणं स्वात्मभावभेदस्याऽविवक्षित-त्वाद्यथा गावोधनमिति । धिनोतेर्धन तच्चैकत्वेन विवक्षितं तथा तत्त्वमिति ।

प्रत्येकमभिसंबंधाच्च ॥ १८ ॥ एकत्वमुपपद्यते औपशमिको भावःस्वतत्त्वमित्यादि ।

द्वंद्वनिर्देशो युक्त इति चेन्नोभयधर्मव्यतिरेकेणाऽन्यभावप्रसंगात् ॥ १९ ॥ स्यान्मतं द्वंद-निर्देशोत्र युक्तः, औपशमिकक्षायिकमिश्रौदयिकपारिणामिका इति । तत्रायमप्यर्थो द्विश्चशब्दो न कर्तव्यो भवतीति । तन्न किं कारणमुभयधर्मव्यतिरेकेणान्यभावप्रसंगात् । उभाभ्यां भावाभ्यां व्यतिरेकेणान्योभावः प्राप्नोति चशब्दे पुनः सति पूर्वोक्तानुकर्षणार्थो युक्तो भवति ।

क्षायोपशमिकग्रहणमिति चेन्न गौरवात् ॥ २० ॥ यद्येवं क्षायोपशमिकग्रहणमेव कर्तव्यमन्य-भावनिवृत्त्यर्थं तन्न किं कारणं गौरवात् गौरवं स्यादिति ।

मध्ये मिश्रवचनं क्रियते पूर्वोत्तरापेक्षार्थं ॥ २१ ॥ मध्ये मिश्रवचनं क्रियते पूर्वोत्तरापेक्षार्थं किमपेक्षायां प्रयोजनं ? भव्यानामौपशमिकक्षायिकौ भावौ सम्यक्त्वचारित्राख्यौ क्षायोपशमिकाश्च ज्ञान दर्शनचारित्रभावाः । औदयिकपारिणामिका अभव्यानामपि क्षायोपशमिकाश्चेति । तत्र चाभव्यानां भव्यानां च मिथ्यादृष्टीनां चारित्रादृते क्षायोपशमिका ज्ञानदर्शनविकल्पाः ।

जीवस्येतिवचनमन्यद्रव्यनिवृत्त्यर्थं ॥ २२ ॥ जीवस्येदं स्वतत्त्वं नान्यस्येति ।

स्वभावपरित्यागापरित्यागयोः शून्यतानिर्मोक्षप्रसंग इति चेन्नाऽऽदेशवचनात् ॥ २३ ॥ इदमिह संप्रधार्यं आत्मा औपशमिकादिभावपरित्यागी वा स्यादपरित्यागी वा। किं चातो यदि तावत्परित्यजति शून्यता प्राप्नोत्यात्मनः स्वभावाभावादग्नेरौष्ण्यस्वभावपरित्यागेऽभाववत्। अथाऽपरित्यागी क्रोधादिस्वभावापरित्यागादात्मनोऽनिर्मोक्षः प्राप्नोतीति। तन्न किं कारणं? आदेशवचनात्। अनादिपारिणामिकचैतन्यद्रव्यार्थादेशात् स्यात्स्वभावाऽपरित्यागी आदिमदौदयिकादिपर्यायार्थादेशात् स्यात्स्वभावपरित्यागी इत्यादि सप्तभंगी पूर्ववत्। यस्यैकांतेन स्वभावपरित्यागः स्यादपरित्यागो वा तस्य यथोक्तदोषः स्यान्नानेकांतवादिनः।

अप्रतिज्ञानात् ॥ २४ ॥ नैतत्प्रतिजानीमहे स्वभावपरित्यागादपरित्यागाद्वा मोक्षः किं तर्हि अष्टतयकर्मपरिणामवशीकृतस्यात्मनः द्रव्यादिबाह्यनिमित्तसंनिधाने सत्याभ्यंतरसम्यग्दर्शनादिमोक्षमार्गप्रकर्षात्कृत्स्नकर्मसंक्षयान्मोक्षो विवक्षितस्ततो न दोषः, न चाग्नेरुष्णस्वभावपरित्यागेप्यभावः कस्माद्द्रव्यार्थावस्थानात् पुद्गलद्रव्यस्य हि पर्याय उष्णभावस्तस्याभावेपि सदचेतनत्वादिभिरवस्थानं। किं च—

कर्मसंनिधाने तदभावे चोभयभावाविशेषोपलब्धेर्नेत्रवत् ॥ २५ ॥ यथा नेत्रं रूपोपलब्धिस्वभावं यदा रूपं नोपलभते तदा रूपोपलब्धिस्वभावपरित्यागान्नास्त्यभावो यथा वा क्षायोपशमिकत्वे रूपोपलब्धिस्वभावस्य नेत्रस्य संक्षीणसकलावरणे केवलिनि मतिज्ञानस्वभावात्नेत्रात्मकस्य रूपोपलब्धिस्वभावस्य परित्यागेपि द्रव्यनेत्रावस्थानान्न नेत्राभावस्तथा कर्मनिमित्तानामौदयिकादीनामभावेपि क्षायिकभावसंनिधानादात्मनो नाऽभावो विशेषोपलब्धिरित्यत्र। आह तस्यात्मनो ये भावा औपशमिकादयस्ते किं भेदवंत उताऽभेदा इति। अत्रोच्यते भेदवतः यद्येवं ते उच्यतां कतिभेदा इत्यत उत्तरं पठति—

द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमं ॥ २ ॥

कोयं निर्देशः?

द्व्यादीनां कृतद्वंद्वानां भेदशब्देन वृत्तिः ॥ १ ॥ द्वौ च नव चाष्टादश चैकविंशतिश्च त्रयश्च द्विनवाष्टादशैकविंशतित्रय इति द्वंद्वे कृते पश्चाद्भेदशब्देन वृत्तिरियं वेदितव्या। ननु चेतरेतरयोगे द्वंद्वः स च तुल्ययोगे भवति न चात्र तुल्ययोगोस्ति कथं द्व्यादयः शब्दाः संख्येयप्रधाना एकविंशतिशब्दः संख्यानप्रधान इति? नैष दोषः संख्याशब्दानाममीषां संख्येयप्रधानत्वेपि निमित्तानुविधानात् संख्यानेपि वृत्तिर्भवति प्रधानं हि किंचिन्निमित्तमपेक्ष्यगुणमनुविधत्ते। यथा प्रधानभूतोपि राजा मन्त्रिणं गुणमाश्रयते तत्प्रयुक्तक्रियाफलार्थित्वात् तस्य प्राधान्यमप्यनुजानातीति। अस्त्ययं तर्काश्रयसमाधिः लक्षणशास्त्रेण तु विरुध्यते एवं हि तत्रोक्तमेकादयः प्राग्विंशतेः संख्येयप्रधानाः विंशत्यादयस्तु कदाचित्संख्यानप्रधानाः कदाचित्संख्येयप्रधाना इति। यदि द्व्यादयः संख्यानेपि वर्तेरन् विंशत्यादिभिस्तुल्याः स्युः तत्र को दोषः सबधिनां व्यतिरेकनिमित्तविभक्तिश्रवणं स्यात् स्वतश्च संख्यानस्यैकत्वादेकवचन श्रूयते विंशतिर्गवामिति यथा। ननु च तत्रैव संख्याने वृत्तिरुपलभ्यते द्व्येकयोरिति नासौ संख्याने प्रयोगः किं तर्ह्युपसर्जनावयवे समुदाये प्रयोगः यथा बहुशक्तिकीटकमिति। संख्याप्रधानत्वेपि तद्विषयत्वमेवांतरेणापि भावप्रत्ययं गुणप्रधानो भवति निर्देश इत्येवं तर्हि द्व्यादयः शब्दाः संख्येयप्रधाना एव। एकविंशतिशब्दोपि संख्येयवृत्तिः परिगृह्यत इति तुल्ययोगोपपत्तेर्युक्तो द्वंद्वो भेदशब्देन किं स्वपदार्था वृत्तिराहोस्विदन्यपदार्था स्वपदार्थप्रधाना कथं "विशेषणं विशेष्येणेति" द्विनवाष्टादशैकविंशतित्रय एव भेदा द्विनवाष्टादशैकविंशतित्रिभेदा इति। ननु च द्वियमुनमित्येवमादिषु पूर्वपदार्थप्रधाना वृत्तिरिति द्व्यादीनां विशेष्यत्वमुक्तं तेन भेदशब्दस्य विशेषणत्वे सति पूर्वनिपातः प्राप्नोति? नैषदोषः सामान्योपक्रमे विशेषाभिधाने तदुक्तं के द्वे यमुने इति युक्ते द्विशब्द प्रयोग एवानर्थक इति। इह तु बहुत्वात्संदेहः। भेदा इत्युक्ते कतीति द्विनवाष्टादशैकविंशतित्रय इति चोक्ते के ते इत्यत उभयव्यभिचाराद्विशेषणविशेष्ययोर्यथेष्टत्वात्। द्व्यादीनां गुणशब्दत्वाच्च विशेषणत्वं विव-

क्षितं । अथ पुनरस्त्वन्यपदार्था वृत्तिः, द्विनवाष्टादशैकविंशतित्रयो भेदा येषां त इमे द्विनवाष्टादशैकविंशतित्रिभेदाः । इत्यत्र हि संख्याशब्दस्य विशेष्यत्वेपि सर्वनामसंख्येययोरुपसंख्यानमिति संख्यायाः पूर्वनिपातः । पूर्वस्मिन्नर्थवशाद्विभक्तिपरिणाम इत्यौपशमिकादीनामित्यभिसंबंध उत्तरत्र पठितक्रमेणैव ।

भेदशब्दस्य प्रत्येकं परिसमाप्तिर्भुजिवत् ॥ २ ॥ यथा देवदत्ताजिनदत्तगुरुदत्ता भोज्यंतामिति प्रत्येकं भुजिः परिसमाप्यते । एवं भेदशब्दस्यापि प्रत्येकपरिसमाप्तिर्वेदितव्या द्विभेद नवभेद इत्यादि ।

यथा निर्दिष्टौपशमिकादिभावाभिसंबंधार्थं द्व्यादिक्रमवचनं ॥ ३ ॥ क्रमः आनुपूर्व्यं यो यः क्रमो यथाक्रमं यथौपशमिकादयो भावा निर्दिष्टास्तथैव द्व्यादिभिरभिसंबंधः । कथं स्याद् ? इति यथाक्रममित्युच्यते तत्रानिर्धारित संख्येयानां द्व्यादीनां संख्याशब्दानां प्रतिविशिष्टाभिधेयनिर्देशे प्राप्तकाले सति यौगपद्यासंभवात् । योऽसावादावुपदिष्टः औपशमिको भावस्तद्भेदप्रदर्शनार्थमाह—

सम्यक्त्वचारित्रे ॥ ३ ॥

व्याख्यातलक्षणे सम्यक्त्वचारित्रे । औपशमिकत्वं कथमिति चेदुच्यते—

सप्तप्रकृत्युपशमादौपशमिकं सम्यक्त्वं ॥ १ ॥ अनंतानुबंधिनः कषायाः क्रोधमानमायालोभाश्चत्वारः चारित्रमोहस्य । मिथ्यात्वसम्यङ्मिथ्यात्वसम्यक्त्वानि त्रीणि दर्शनमोहस्य । आसां सप्तानां प्रकृतीनामुपशमादौपशमिकं सम्यक्त्वमिति अनादिमिथ्यादृष्टेर्भव्यस्य कर्मोदयापादिते कालुष्ये सति कुतस्तदुपशमः ?

काललब्ध्याद्यपेक्षया तदुपशमः ॥ २ ॥ काल लब्ध्यादीन्प्रत्ययानपेक्ष्य तासां प्रकृतीनामुपशमो भवति । तत्र काललब्धिस्तावत्–कर्माविष्ट आत्मा भव्यः कालेऽर्धपुद्गलपरिवर्तनाख्येऽवशिष्टे प्रथमसम्यक्त्वग्रहणस्य योग्यो भवति नाधिक इतीय काललब्धिरेका । अपरा कर्मस्थितिका काललब्धिरुत्कृष्टस्थितिकेषु कर्मसु जघन्यस्थितिकेषु प्रथमसम्यक्त्वलाभो न भवति । क तर्हि भवति ? अंतःकोटीकोटिसागरोपम स्थितिकेषु कर्मसु बंधमापद्यमानेषु विशुद्धपरिणामवशात् सत्कर्मसु च ततः संख्येयसागरोपम सहस्रोनायामंतःकोटीकोटिसागरोपमस्थितौ स्थापितेषु प्रथमसम्यक्त्वयोग्यो भवति । तथाऽपरा काललब्धिर्भवापेक्षा सा वक्ष्यते । आदिशब्देन जातिस्मरणादयः परिगृह्यंते । स पुनर्भव्यः पंचेंद्रियः संज्ञी मिथ्यादृष्टिः पर्याप्तक सर्वविशुद्धः प्रथमं सम्यक्त्वमुत्पादयति । उत्पादयन्नसावंतर्मुहूर्तमेव वर्तयति अपवर्त्यं च मिथ्यात्वकर्म त्रि विभजते सम्यक्त्वं मिथ्यात्वं सम्यङ्मिथ्यात्वं चेति दर्शनमोहनीयं कर्मोपशमयन् कोपशमयति चतसृ गतिषु । तत्र नारकाः प्रथमसम्यक्त्वमुत्पादयंतः पर्याप्तका उत्पादयंति नापर्याप्तकाः पर्याप्तकाश्चांतर्मुहूर्तस्योपरि उत्पादयंति नाधस्तात् । एवं सप्तसु पृथिवीषु । तत्रोपरि तिसृषु पृथिवीषु नारकास्त्रिभिः क द-सम्यक्त्वमुपजनयंति केचिज्जातिं स्मृत्वा केचिद्धर्मं श्रुत्वा केचिद्वेदनाभिभूताः । अधस्ताच्चतसृषु पृ यो द्वाभ्यां कारणाभ्यां केचिज्जातिं स्मृत्वा अपरे वेदनाभिभूताः । तिर्यंचश्चोत्पादयंतः पर्याप्तका उत्पादयंतः नापर्याप्तकाः पर्याप्तकाश्च दिवसपृथक्त्वस्योपरि नाधस्तादेवं सर्वेषु द्वीपसमुद्रेषु तिरश्चां त्रिभिः कारणैः सम्यक्त्वस्योत्पत्तिः केचिज्जातिं स्मृत्वा अपरे धर्मं श्रुत्वा अन्ये जिनबिंबं दृष्ट्वा । मनुष्या उत्पादयंतः पर्याप्तका उत्पादयंति नापर्याप्तकाः पर्याप्तकाश्चाऽष्टवर्षस्थितेरुपर्युत्पादयंति नाधस्तादेवमर्धतृतीयद्वीपसमुद्रेषु तेषां त्रिभिः कारणैः सम्यक्त्वस्योत्पत्तिः । केषांचिज्जातिस्मरणादपरेषां धर्मश्रवणादन्येषां जिनबिंबदर्शनात् । देवाः सम्यक्त्वमुत्पादयंतः पर्याप्तका उत्पादयंति नापर्याप्तकाः पर्याप्तकाश्चांतर्मुहूर्तस्योपरि नाधस्तादेवमा उपरिमग्रैवेयकेभ्यः देवा भवनवास्यादय आसहस्रारकल्पाच्चतुर्भिः कारणैः प्रथमसम्यक्त्वं लभंते केचिज्जातिस्मरणेन इतरे धर्मश्रवणेन अपरे जिनमहिमावेक्षणेनान्ये देवर्द्धिनिरीक्षणेन । आनतप्राणतारणाच्युतेषु तैरेव देवर्द्धिविरहितैः । नवसु ग्रैवेयकेषु द्वाभ्यां कारणाभ्यां जातिस्मरणाद्धर्मश्रवणाच्च । उपरि देवा नियमेन सम्यग्दृष्टयः ।

अष्टाविंशतिमोहविकल्पोपशमादौपशमिकं चारित्रं ॥ ३ ॥ अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाः षोडशकषायाः हास्यरत्यरतिशोकभयजुगुप्सा स्त्रीपुंनपुंसकवेदा नव नोकषायाः इत्येवं चारित्रमोहः पंचविंशतिविकल्पः । मिथ्यात्वसम्यङ्मिथ्यात्वसम्यक्त्वभेदा त्रितयो दर्शनमोहः । एषामष्टाविंशतिमोहविकल्पानामुपशमादौपशमिकं चारित्रं ।

सम्यक्त्वस्यादौ वचनं तत्पूर्वकत्वाच्चारित्रस्य ॥ ४ ॥ पूर्वं हि सम्यक्त्वे पर्यायेणाविर्भाव आत्मनस्ततः क्रमाच्चारित्रपर्याय आविर्भवतीति सम्यक्त्वस्यादौ ग्रहणं क्रियते । यः क्षायिको भावो नवविध उद्दिष्टस्तद्भेदस्वरूपप्रतिपादनार्थमाह—

ज्ञानदर्शनदानलाभभोगोपभोगवीर्याणि च ॥ ४ ॥

चशब्देन सम्यक्त्वचारित्रे समुच्चीयेते ।

ज्ञानदर्शनावरणक्षयात्केवले क्षायिके ॥ १ ॥ ज्ञानावरणस्य कर्मणः दर्शनावरणस्य च कृत्स्नस्य च क्षयात् केवले ज्ञानदर्शने क्षायिके भवतः ।

अनंतप्राणिगणानुग्रहकरं सकलदानांतरायक्षयादभयदानं ॥ २ ॥ दानांतरायस्य कर्मणोऽत्यंतसंक्षयादाविर्भूतं त्रिकालगोचरानंतप्राणिगणानुग्रहकरं क्षायिकमभयदानं ।

अशेषलाभांतरायनिरासात् परमशुभपुद्गलानामादानं लाभः ॥ ३ ॥ लाभांतरायस्याशेषनिरासात् परित्यक्तकवलाहारक्रियाणां केवलिनां यतः शरीरबलाधानहेतवोऽन्यमनुजासाधारणाः परमशुभाः सूक्ष्माः अनंताः प्रतिसमयं पुद्गलाः संबंधमुपयांति स क्षायिको लाभः । तस्मादौदारिकशरीरस्य किंचिन्न्यूनपूर्वकोटिवर्षस्थितिः कवलाहारमंतरेण कथं संभवतीति यद्वचनं तदशिक्षितकृतं विज्ञायते ।

कृत्स्नभोगांतरायतिरोभावात्परमप्रकृष्टो भोगः ॥ ४ ॥ कृत्स्नस्य भोगांतरायस्य तिरोभावादाविर्भूतोऽतिशयवाननंतो भोगः क्षायिको यत्कृताः पंचवर्णसुरभिकुसुमवृष्टिविविधदिव्यगंधचरणनिक्षेपस्थानसप्तपद्मपंक्तिसुगंधिधूपसुखशीतमारुतादयो भावाः ।

निरवशेषोपभोगांतरायप्रलयादनंतोपभोगः क्षायिकः ॥ ५ ॥ निरवशेषस्योपभोगांतरायकर्मणः प्रलयात्प्रादुर्भूतोऽनंत उपभोगः क्षायिको यत्कृताः सिंहासनबालव्यजनाशोकपादपछत्रत्रयप्रभामंडलगंभीरस्निग्धस्वरपरिणामदेवदुंदुभिप्रभृतयो भावाः ।

वीर्यांतरायात्यंतसंक्षयादनंतवीर्यं ॥ ६ ॥ आत्मनः सामर्थ्यस्य प्रतिबंधिनो वीर्यांतरायकर्मणोऽत्यंतसंक्षयादुद्भूतवृत्ति क्षायिकमनंतवीर्यं ।

पूर्वोक्तमोहप्रकृतिनिरवशेषक्षयात् सम्यक्त्वचारित्रे ॥ ७ ॥ पूर्वोक्तस्य दर्शनमोहत्रिकस्य चारित्रमोहस्य च पंचविंशतिविकल्पस्य निरवशेषक्षयात्क्षायिके सम्यक्त्वचारित्रे भवतः । यद्यनंतदानलब्ध्यादय उक्ता अभयदानादिहेतवो दानांतरायादिसंक्षयाद्भवंति सिद्धेष्वपि तत्प्रसंगः? नैषदोषः शरीरनामकर्मोदयाद्यपेक्षत्वात्तेषां तदभावे तदप्रसंगः । परमानंताव्याबाधरूपेणैव तेषां च तत्र वृत्तिः केवलज्ञानरूपेणानंतवीर्यवृत्तिवत् । सिद्धत्वमपि क्षायिकमागमोपदिष्टमस्ति तस्योपसंख्यानमिह कर्तव्यं न कर्तव्यं, विशेषेषु निर्दिष्टेषु तद्विषयसामान्यमनुक्तसिद्धमेव पर्वादिनिर्देशेंगुलिसिद्धिवत् । सिद्धत्वं हि सर्वेषां क्षायिकाणां भावानां साधारणमिति । य उक्तः क्षायोपशमिको भावोष्टादशविकल्पस्तद्भेदनिरूपणार्थमाह—

ज्ञानाज्ञानदर्शनलब्धयश्चतुस्त्रित्रिपंचभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ५

चतुरादीनां कृतद्वंद्वानां भेदशब्देन वृत्तिः ॥ १ ॥ चत्वारश्च त्रयश्च त्रयश्च पंच च चतुस्त्रि

पञ्च ते भेदाः यासां ताश्चतुस्त्रित्रिपंचभेदा इति द्वंद्वगर्भो वृत्तिः। त्रिशब्दस्य द्वंद्वापवाद एकशेषः कस्मान्न भवति ? संख्यया अर्थासंप्रत्ययादस्यापदार्थत्वाच्चानेकशेषः। पृथगभिधाने प्रयोजनसद्भावाच्च। यथाक्रमवचनं ज्ञानादिभिरानुपूर्व्यसंबंधार्थं। इह यथाक्रममिति वक्तव्यं। किं प्रयोजनं ? चतुर्भेदं ज्ञानमित्येवमाद्यभिसंबंधार्थं तर्हि वक्तव्यं। न वक्तव्यं यथाक्रमामित्यनुवर्तते। क्व प्रकृतं ? द्विनवाष्टादशैकविंशातित्रिभेदा यथाक्रममिति। कस्य क्षयात्कस्य चोपशमात्क्षायोपशमिको भावो भवतीत्युच्यते—

सर्वघातिस्पर्धकानामुदयक्षयात्तेषामेव सदुपशमाद्देशघातिस्पर्धकानामुदये क्षायोपशमिको भावः ॥ २ ॥ द्विविधं स्पर्धकं देशघातिस्पर्धकं सर्वघातिस्पर्धकं चेति। तत्र यदा सर्वघातिस्पर्धकस्योदयो भवति तदेषदप्यात्मगुणस्याभिव्यक्तिर्नास्ति तस्मात्तदुदयस्याभावः क्षय इत्युच्यते। तस्यैव सर्वघाति स्पर्धकस्यानुदयप्राप्तस्य सदवस्था उपशम इत्युच्यते। अनुद्भूतस्ववीर्यवृत्तित्वादात्मसाद्भावितसर्वघातिस्पर्धकस्योदयक्षये देशघातिस्पर्धकस्य चोदये सति सर्वघात्यभावादुपलभ्यमानो भावः क्षायोपशमिक इत्युच्यते। किमिदं स्पर्धकं नाम ? उच्यते—

अविभागपरिच्छिन्नकर्मप्रदेशरसभागप्रचयपंक्तिक्रमवृद्धिः क्रमहानिः स्पर्धकं ॥ ३ ॥ उदयप्राप्तस्य कर्मणः प्रदेशा अभव्यानामनन्तगुणाः सिद्धानामनंतभागप्रमाणाः। तत्र सर्वजघन्यगुणः प्रदेशः परिगृहीतस्तस्यानुभागः प्रज्ञाछेदेन तावद्वा (र) परिच्छिन्नः यावत्पुनर्विभागो न भवति ते अविभागपरिच्छेदाः सर्वजीवानामनंतगुणाः एको राशिःकृतः। एवं तत्प्रमाणाः सर्वे तथैव परिच्छिन्नाः पंक्तीकृता वर्गाः वर्गणा। अपर एकाविभागपरिच्छेदाधिकः प्रदेशः परिगृहीतस्तथैव तस्याविभागपरिच्छेदाः कृताः स एको राशिर्वर्गः। तथैव समगुणाः पंक्तीकृताः वर्गा वर्गणा। एव पंक्तयः कृता यावदेकाविभागपरिच्छेदाधिकलाभं। तदलाभनंतरं भवत्येवमेतासां पंक्तीनां विशेषहीनानां क्रमवृद्धिक्रमहानियुक्तानां समुदयः स्पर्धकमित्युच्यते। तत उपरि द्वित्रिचतुःसंख्यया संख्येयगुणरसा न लभ्यते अनंतगुणरसा एव तत्रैकप्रदेशो जघन्यगुणः परिगृहीतस्तस्य चानुभागाविभागपरिच्छेदाः पूर्ववत्कृताः। एवं समगुणा वर्गाः समुदिता वर्गणा भवति। एकाविभागपरिच्छेदाधिकाः पूर्ववद्विरलीकृताः वर्गा वर्गणाश्च भवंति यावदंतरं भवति तावदेकस्पर्धकं भवति। एवमनेन क्रमेण विभागे क्रियमाणेऽभव्यानामनंतगुणानि सिद्धानामनंतभागप्रमाणानि स्पर्धकानि भवंति। तदेतत्समुदितमेकमुदयस्थानं भवति।

तत्र ज्ञानं चतुर्विधं क्षायोपशमिकमाभिनिबोधिकज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्ययज्ञानं चेति ॥ ४ ॥ वीर्यांतरायमतिश्रुतज्ञानावरणानां सर्वघातिस्पर्धकानामुदयक्षयात्सदुपशमाच्च देशघातिस्पर्धकानामुदये सति मतिज्ञानं श्रुतज्ञानं च भवति। देशघातिस्पर्धकानां रसस्य प्रकर्षाप्रकर्षयोगाद् गुणघातस्यातिशयानातिशयवत्त्वात्तज्ज्ञानभेदो भवति। एवमवधिमनःपर्ययज्ञानयोरपि स्वावरणक्षयोपशमभेदात्क्षायोपशमिकत्वं वेदितव्यं।

अज्ञानं त्रिविधं मत्यज्ञानं श्रुताज्ञानं विभंगं चेति ॥ ५ ॥ तेषां क्षायोपशमिकत्वं पूर्ववत्। ज्ञानाज्ञानविभागस्तु मिथ्यात्वकर्मोदयानुदयापेक्षः।

दर्शनं त्रिविधं क्षायोपशमिकं चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं चेति ॥ ६ ॥ एतात्रितयमपि पूर्ववत् स्वावरणक्षयोपशमापेक्षं द्रष्टव्यं।

लब्धयः पंच क्षायोपशमिकाः दानलब्धिर्लाभलब्धिर्भोगलब्धिरुपभोगलब्धिर्वीर्यलब्धिश्चेति ॥ ७ ॥ दानांतरायादिसर्वघातिस्पर्धकक्षयोपशमे देशघातिस्पर्धकोदयसद्भावे ताः पंचलब्धयो भवंति। सम्यक्त्वग्रहणेन वेदकसम्यक्त्वमिह परिगृह्यते। अनंतानुबंधिकषायचतुष्टयस्य मिथ्यात्वसम्यङ्मिथ्यात्वयोश्चोदयक्षयात्सदुपशमाच्च सम्यक्त्वस्य देशघातिस्पर्धकस्योदये सति तत्त्वार्थश्रद्धानं क्षायोपशमिकं सम्यक्त्वं। अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानद्वादशकषायोदयक्षयात्सदुपशमाच्च संज्वलनकषायचतु-

ष्टयान्यतमदेशघातिस्पर्धकोदये सति नोकषायनवकस्य यथासंभवोदये च निवृत्तिपरिणाम आत्मनः क्षायोपशमिकं चारित्रं । अनंतानुबंध्यप्रत्याख्यानकषायाष्टकोदयक्षयात्सदुपशमाच्च प्रत्याख्यानकषायोदये संज्वलनकषायस्य देशघातिस्पर्धकोदये नोकषायनवकस्य यथासंभवोदये च विरताविरतपरिणामः क्षायोपशमिकः संयमासंयमः ।

संज्ञित्वसम्यङ्मिथ्यात्वयोगोपसंख्यानमिति चेन्न ज्ञानसम्यक्त्वलब्धिग्रहणेन गृहीतत्वात् ॥ ८ ॥ स्यादेतत् संज्ञित्वसम्यङ्मिथ्यात्वयोगोपसंख्यानं कर्तव्यं तेऽपि हि क्षायोपशमिका इति । तन्न, किं कारणं ? ज्ञानसम्यक्त्वलब्धिग्रहणेन गृहीतत्वात् । संज्ञित्वं हि मतिज्ञानेन गृहीतं सम्यङ्मिथ्यात्वं सम्यक्त्वग्रहणेन । नोइंद्रियावरणक्षयोपशमापेक्षत्वादुभयात्मकस्य एकात्मपरिग्रहाच्चोदकव्यामिश्रक्षीरव्यपदेशवद्योगश्च वीर्यलब्धिग्रहणेन गृहीत इति । अथवा चशब्देन समुच्चयो वेदितव्यः । अथ पंचेंद्रियत्वे समाने नोइंद्रियावरणक्षयोपशमः कस्यचिद्भवे भवति कस्यचिन्नेति कुतोऽस्य विकल्पः ? उच्यते—संज्ञिजातिनामकर्मविशेषोदये बललाभे सति नोइंद्रियावरणक्षयोपशमो भवति तदभावे न भवतीत्ययं विशेषः । एकेंद्रियजातिनामाद्युदयविशेषापेक्षया एकेंद्रियादिक्षयोपशमभेदवत् । य एकविंशतिविकल्प औदयिको भाव उद्दिष्टः तस्य भेदसंज्ञाकीर्तनार्थमिदमारभ्यते—

गतिकषायलिंगमिथ्यादर्शनाज्ञानासंयतासिद्धलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः ॥ ६ ॥

गत्यादीनामितरेतरयोगो द्वंद्वः चतुरादीनां च द्वंद्वगर्भोऽन्यपदार्थप्रधाना वृत्तिः पूर्ववदेकशेषाभावः ।

गतिनामकर्मोदयादात्मनस्तद्भावपरिणामाद्गतिरौदयिकी ॥ १ ॥ येन कर्मणा आत्मनो नारकादिभावावाप्तिर्भवति तद्गतिनाम चतुर्विधं नरकगतिनाम तिर्यग्गतिनाम मनुष्यगतिनाम देवगतिनाम चेति । तत्र नरकगतिनामकर्मोदयान्नारको भावो भवतीति स औदयिकः । एवं तिर्यग्गतिनामकर्मोदयात्तिर्यग्भाव औदयिकः । मनुष्यगतिनामकर्मोदयान्मनुष्यभाव औदयिकः । देवगतिनामकर्मोदयाद्देवभाव औदयिकः ।

चारित्रमोहोदयात्कलुषभावः कषाय औदयिकः ॥ २ ॥ चारित्रमोहस्य कषायवेदनीयस्योदयादात्मनः कालुष्यं क्रोधादिरूपमुत्पद्यमानं कषत्यात्मानं हिनस्तीति कषाय इत्युच्यते स औदयिकश्चतुर्विधः, क्रोधो मानो माया लोभश्चेति । तद्भेदा अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाः ।

वेदोदयापादितोभिलाषविशेषो लिंगं ॥ ३ ॥ लिंगं द्विविधं द्रव्यलिंगं भावं च । तत्र यद्द्रव्यलिंगं नामकर्मोदयापादितं तदिह नाधिकृतमात्मपरिणामप्रकरणात् । भावलिंगमात्मपरिणामः स्त्रीपुंनपुंसकान्योन्याभिलाषलक्षणः स पुनश्चारित्रमोहविकल्पस्य नोकषायस्य स्त्रीवेदपुंवेदनपुंसकवेदस्योदयाद्भवतीत्यौदयिकः।

दर्शनमोहोदयात्तत्त्वार्थाश्रद्धानपरिणामो मिथ्यादर्शनं ॥ ४ ॥ तत्त्वार्थरुचिस्वभावस्यात्मनस्तत्प्रतिबंधकारणस्य दर्शनमोहस्योदयात्तत्त्वार्थेषु निरूप्यमाणेष्वपि न श्रद्धानमुत्पद्यते तन्मिथ्यादर्शनमौदयिकमित्याख्यायते ।

ज्ञानावरणोदयादज्ञानं ॥ ५ ॥ ज्ञस्वभावस्यात्मनस्तदावरणकर्मोदये सति नावबोधो भवति तदज्ञानमौदयिकं । घनसमूहस्थगितदिनकरो तेजोनभिव्यक्तिवत् । तद्यथा— एकेंद्रियस्य रसनघ्राणश्रोत्रचक्षुषामिंद्रियाणां प्रतिनियताभिनिबोधिकज्ञानावरणस्य सर्वघातिस्पर्धकस्योदयाद्रसगंधशब्दरूपाज्ञानं यत्तदौदयिकं । एवं द्वित्रिचतुरिंद्रियेषु शेषेंद्रियविषयाज्ञानं वाच्यं पंचेंद्रियतिर्यक्षु शुकसारिकादिवर्जितेषु मनुष्येषु च केषुचिदक्षरश्रुतावरणस्य सर्वघातिस्पर्धकस्योदयादक्षरश्रुतानिर्वृत्त्यभावादक्षरश्रुतज्ञानमौदयिकं । नोइंद्रियावरणस्य सर्वघातिस्पर्धकस्योदयाद्धिताहितपरीक्षां प्रत्यसामर्थ्यमसंज्ञित्वमौदयिकं तदप्यत्रैवांतर्भवति ।

एवमवधिमनःपर्ययकेवलज्ञानावरणोदयात्प्रत्येकमज्ञानमौदयिकं वाच्यमिति ।

चारित्रमोहोदयादनिवृत्तिपरिणामोऽसंयतः ॥ ६ ॥ चारित्रमोहोदयस्य सर्वघातिस्पर्धकस्योदयात्प्राण्युपघातेंद्रियविषये द्वेषाभिलापनिवृत्तिपरिणामरहितोऽसंयत औदयिकः ।

कर्मोदयसामान्यापेक्षोऽसिद्धः ॥ ७ ॥ अनादिकर्मसंबंधसंतानपरतंत्रस्यात्मनः कर्मोदयसामान्ये सति असिद्धत्वपर्यायो भवतीत्यौदयिकः स पुनर्मिथ्यादृष्ट्यादिषु सूक्ष्मसांपरायिकांतेषु कर्माष्टकोदयापेक्षः शांतक्षीणकषाययोः सप्तकर्मोदयापेक्षः सयोगिकेवल्ययोगिकेवलिनोरघातिकर्मोदयापेक्षः ।

कषायोदयरंजिता योगप्रवृत्तिर्लेश्या ॥ ८ ॥ द्विविधा लेश्या। द्रव्यलेश्या भावलेश्या चेति। तत्र द्रव्यलेश्या पुद्गलविपाकिकर्मोदयापादितेति सा नेह परिगृह्यत आत्मनो भावप्रकरणात् । भावलेश्या कषायोदयरंजिता योगप्रवृत्तिरिति कृत्वा औदयिकीत्युच्यते । ननु च योगप्रवृत्तिरात्मप्रदेशपरिस्पंदक्रिया सा वीर्यलब्धिरिति क्षायोपशमिकी व्याख्याता कषायश्चौदयिको व्याख्यातस्ततो लेश्यानर्थांतरभूतेति ? नैषदोषः कषायोदयतीव्रमंदावस्थापेक्षाभेदादर्थांतरत्व । सा षड्विधा—कृष्णलेश्या नीललेश्या कपोतलेश्या तेजोलेश्या पद्मलेश्या शुक्ललेश्या चेति । तस्यात्मपरिणामस्याऽशुद्धिप्रकर्षापेक्षया कृष्णादिशब्दोपचारः क्रियते । ननु चोपशांतकषाये क्षीणकषाये सयोगकेवलिनि च शुक्ललेश्यास्ति इत्यागमस्तत्र कषायानुरंजनाभावादौदयिकत्वं नोपपद्यते ? नैषदोषः पूर्वभावप्रज्ञापननयापेक्षया यासौ योगप्रवृत्तिः कषायानुरंजिता सैवेयमित्युपचारादौदयिकीत्युच्यते । तदभावादयोगिकेवल्यलेश्य इति च निश्चीयते । अत्र चोद्यते यथाऽज्ञानमौदयिकमेवमदर्शनमपिदर्शनावरणोदयाद्भवतीत्यौदयिकं निद्रानिद्रादयश्चौदयिकाः वेदनीयोदयात् सुखदुःखमौदयिकं नोकषायाश्च हास्यरत्यादयः षडौदयिकाः आयुरुदयाद्भवधारणं भवत्यौदयिकमुच्चैर्नीचैर्गोत्रकर्मोदयादुच्चनीचगोत्रपरिणामो भवतीत्यौदयिको नामकर्मणि च जात्यादय औदयिका एतेषामपरिग्रहान्न्यूनं लक्षणमिति ? अथ मतमात्मपरिणामस्याविक्षतत्वाच्छरीरादीनामौदयिकत्वेपि पुद्गलविपाकित्वात्तेषामसंग्रह इति । एवमपि ये जीवविपाकिनस्तेषां ग्रहणं कर्तव्यं जात्यादीनामत उत्तरं पठति—

मिथ्यादर्शने दर्शनावरोधः ॥९॥ मिथ्यादर्शने दर्शनावरोधो भवति निद्रानिद्रादीनामपि दर्शनसामान्यावरणत्वात्तत्रैवांतर्भावः । ननु च तत्त्वार्थाश्रद्धानं मिथ्यादर्शनमित्युक्तं सत्यमुक्तं सामान्यनिर्देशे विशेषांतर्भावात् । सोप्येको विशेषोऽयमपरो विशेषोऽदर्शनमप्रतिपत्तिर्मिथ्यादर्शनामिति ।

लिंगग्रहणे हास्यरत्याद्यंतर्भावः सहचारित्वात् ॥ १० ॥ लिंगग्रहणे हास्यरत्यादीनामंतर्भावो भवति कुतः सहचारित्वात् पर्वतग्रहणेन नारदग्रहणवत् ।

गतिग्रहणमघात्युपलक्षणं ॥ ११ ॥ अघातिकर्मोदयापादिता ये भावाः तेषां गतिग्रहणमुपलक्षणं यथा काकेभ्यो रक्षतां सर्पिरिति काकग्रहणमुपघातकोपलक्षणं । तेन जात्यादयो भावा नामकर्मविशेषोदयापादिता वेदनीयायुर्गोत्रोदयकृताश्च गृह्यंते । इह यथाक्रममिति वक्तव्यं गतिश्चतुर्विधेत्येवमाद्यानुपूर्व्यसंप्रत्ययार्थं । न वक्तव्यं यथाक्रममित्यनुवर्तते । यः पारिणामिको भावस्त्रिभेद उक्तस्तद्विकल्पस्वरूपप्रतिपादनार्थमाह—

जीवभव्याभव्यत्वानि च ॥ ७ ॥

अन्यद्रव्यासाधारणास्त्रयः पारिणामिकाः ॥ १ ॥ जीवत्वं भव्यत्वमभव्यत्वमित्येते पारिणामिका आत्मनस्त्रयो भावा अन्यद्रव्यासाधारणा वेदितव्याः । कुतः पुनरेषां पारिणामिकत्वं ?

कर्मोदयक्षयोपशमक्षयोपशमानपेक्षत्वात् ॥ २ ॥ न ह्येवंविधं कर्मास्ति यस्योदयात् क्षयात् क्षायोपशमाद्वा जीवो भव्योऽभव्यो वेति चोच्यते । तदभावादनादिद्रव्यभवनसंबंधपरिणामनिमित्तत्वात्पारिणामिका इति व्यपदिश्यंते ।

आयुर्द्रव्यापेक्षं जीवत्वं न पारिणामिकमिति चेन्न पुद्गलद्रव्यसंबंधे सत्यन्यद्रव्यसामर्थ्याभावात् ॥ ३ ॥ स्यादेतदायुर्द्रव्योदयाज्जीवतीति जीवो नानादिपारिणामिकत्वादिति चेन्न किं कारणं पुद्गलद्रव्यसंबंधे सत्यन्यद्रव्यसामर्थ्याभावात् । आयुर्हि पौद्गलिकं द्रव्यं यदि च तत्संबंधाज्जीवत्वं स्यान्नन्वेवमन्यद्रव्यस्यापि धर्मादेरायुःसंबंधाज्जीवत्व स्यात् । किं च—

सिद्धस्याजीवत्वप्रसंगात् ॥ ४ ॥ यद्यायुःसंबंधापेक्षं जीवत्वं ननु सिद्धस्यायुरभावादजीवत्वं प्रसज्येत । ततस्तदनपेक्षत्वाज्जीवत्वं पारिणामिकमेव ।

जीवे त्रिकालविषयविग्रहदर्शनादिति चेन्न रूढिशब्दस्य निष्पत्त्यर्थत्वात् ॥ ५ ॥ स्यान्मतं जीवत्यजीवज्जीविष्यतीति त्रिकालविषयो विग्रहो दृश्यते ततः प्राणधारणार्थत्वात्कर्मापेक्षत्वेन पारिणामिकत्वमिति ? तच्च न । कस्माद् ? रूढिशब्दस्य निष्पत्त्यर्थत्वात् । रूढिशब्देषु हि क्रियोपात्तकाला व्युत्पत्त्यर्थैव न तंत्रं यथा गच्छतीति गौरिति ।

चैतन्यमेव वा जीवशब्दस्यार्थः ॥ ६ ॥ अथवा चैतन्यं जीवशब्देनाभिधीयते तच्चानादिद्रव्यभवननिमित्तत्वात् पारिणामिकं ।

सम्यग्दर्शनज्ञानचारित्रपरिणामेन भविष्यतीति भव्यः ॥ ७ ॥ भव्यादीनां प्रायेण भविष्यत्कालविषयत्वात् सम्यग्दर्शनादिपर्यायेण य आत्मा भविष्यति स भव्य इतीमं व्यपदेशमास्कंदति ॥

तद्विपरीतोऽभव्यः ॥ ८ ॥ यो न तथा भविष्यत्यसावभव्य इत्युच्यते । किं कृतोऽयं विशेषः ? द्रव्यस्वभावकृतोऽतः पारिणामिकत्वमनयोः ।

योऽनंतेनापि कालेन न सेत्स्यत्यसावभव्य एवेति चेन्न भव्यराश्यंतर्भावात् ॥ ९ ॥ स्यादेतदनंतकालेनापि यो न सेत्स्यत्यसावभव्यतुल्यत्वादभव्य एव । अथ सेत्स्यति सर्वो भव्यस्तत उत्तरकालं भव्यशून्यं जगत् स्यादिति ? तन्न, किं कारणं ? भव्यराश्यंतर्भावात् यथा योऽनंतेनापि कालेन कनकपाषाणो न कनको भविष्यति न तस्यांधपाषाणत्वं कनकपाषाणशक्तियोगात् । यथा वाऽऽगामिकालो योऽनंतेनापि कालेन नागमिष्यति न तस्यागामित्वं हीयते । तथा भव्यस्यापि स्वशक्तियोगादसत्यामपि व्यक्तौ न भव्यत्वहानिः ।

भावस्यैकत्वनिर्देशो युक्त इति चेन्न द्रव्यभेदाद्भावभेदसिद्धेः ॥ १० ॥ स्यादेतज्जीवश्च भव्यश्चाऽभव्यश्च जीवभव्याभव्या इति द्वंद्वे कृते तेषां भावे विवक्षिते एकत्वनिर्देशो युक्तो जीवभव्याभव्यानां भावो जीवभव्याभव्यत्वमिति ? तन्न, किं कारणं ? द्रव्यभेदाद्भावभेदसिद्धेः । नहि भाव एकत्वेन वक्तव्य इति नियमोऽस्ति । ततो द्रव्यभेदाद्भेदे सति बहुत्वनिर्देशो युक्तो जीवभव्याभव्यानां भावा जीवभव्याभव्यत्वानीति । पुनः प्रत्येकमभिसंबंधो भवति जीवत्वं भव्यत्वमभव्यत्वमिति ।

द्वितीयगुणग्रहणमार्षोक्तत्वादिति चेन्न तस्य नयापेक्षत्वात् ॥ ११ ॥ अथ मतं द्वितीयगुणग्रहणमिह कर्तव्यं । कोऽसौ द्वितीयगुणः सासादनसम्यग्दृष्टिः सोपि जीवस्य साधारणः पारिणामिक एवं ह्यार्षे उक्तं सासादनसम्यग्दृष्टिरिति । को भावः ? पारिणामिको भाव इति । न कर्तव्यं कुतस्तस्य नयापेक्षत्वात् । मिथ्यात्वकर्मण उदयं क्षयमुपशमं वा नापेक्षत इत्यार्षे पारिणामिक इह पुनरसावौदयिक इत्येवं गृह्यतेऽनंतानुबंधिकषायोदयात्तस्य निर्वृत्तेः । चशब्दः किमर्थः ?

अस्तित्वान्यत्वकर्तृत्वभोक्तृत्वपर्यायवत्त्वाऽसर्वगतत्वाऽनादिसंततिबंधनबद्धत्वप्रदेशवत्त्वारूपत्वनित्यत्वादिसमुच्चयार्थश्चशब्दः ॥ १२ ॥ अस्तित्वादयोपि पारिणामिका भावाः संति तेषां समुच्चयार्थश्चशब्दः । यदि तेपि पारिणामिकाः सूत्रे तेषां ग्रहणं कस्मान्न कृतं ?

अन्यद्रव्यसाधारणत्वादसूत्रिताः ॥ १३ ॥ अस्तित्वादयो हि धर्मा अन्येषामपि द्रव्याणां

साधारणास्ततस्ते न सूत्रिताः । तद्यथा-अस्तित्वं तावत्साधारणं षड्द्रव्यविषयत्वात् । तत्कर्मोदयक्षयक्षयोपशमानपेक्षत्वात्पारिणामिकं । अन्यत्वमपि साधारणं सर्वद्रव्याणां परस्परतोन्यत्वात् कर्मोदयाद्यपेक्षाभावात् तदपि पारिणामिकं । कर्तृत्वमपि साधारणं क्रियानिष्पत्तौ सर्वेषां स्वातंत्र्यात् । ननु च जीवपुद्गलानां क्रियापरिणामयुक्तानां कर्तृत्वं युक्तं धर्मादीनां कथं ? तेषामपि अस्त्यादिक्रियाविशेषविषयकमस्ति कर्तृत्वं कर्मोदयाद्यपेक्षाभावात्तत्पारिणामिकं । ननु चात्मप्रदेशपरिस्पंदस्य योगसंज्ञकस्य यत्कर्तृत्वं न तत्साधारणमिति असाधारणेषूपसंख्येयं न तस्य क्षयोपशमनिमित्तत्वात् यदस्य पुण्यपापयोः कर्तृत्वं तदन्यद्रव्याणामसाधारणमपि सन्नपारिणामिकं । कस्माद् ? उदयक्षयोपशमनिमित्तत्वात् । मिथ्यादर्शनं हि दर्शनमोहोदयनिमित्तमविरतिप्रमादकषायाश्चारित्रमोहोदयनिमित्ताः योगाश्च क्षायोपशमिका इत्यन्यद्रव्यासाधारणानादिपारिणामिकचैतन्यसंनिधाने पुण्यपापयोः कर्तृत्वमिति पारिणामिकमिति चेन्न सर्वकालिककर्तृत्वप्रसंगात् । मुक्तानामपि चैतन्यमस्तीति पुण्यपापयोः कर्तृत्वं स्यात्संसारिणां चाविशिष्टं स्यात् । चैतन्यकारणस्याभेदाद्भोक्तृत्वमपि साधारणं । कुतः ? तल्लक्षणोपपत्तेर्वीर्यप्रकर्षात्परद्रव्यवीर्यादानसामर्थ्यं भोक्तृत्वलक्षणं यथात्माहारादेः परद्रव्यस्यापि वीर्यात्मसात्करणाद्भोक्ता । तथापि विषस्याचेतनस्य वीर्यप्रकर्षात् कोद्रवद्रव्यादिसारसंग्रहाद्भोक्तृत्वं । लवणादीनां च वीर्यप्रकर्षात्काष्ठादिद्रव्यलवणकरणाद्भोक्तृत्वं कर्मोदयापेक्षाभावात्तदपि पारिणामिकं यच्चात्मनः शुभाशुभकर्मफलस्योपभोक्तृत्वं न तत्साधारणं न च पारिणामिकं तस्य क्षयोपशमनिमित्तत्वाद् । वीर्यांतरायक्षयोपशमांगोपांगनामलाभावष्टंभादात्मनः शुभाशुभकर्मफलोपभोगे सामर्थ्यमाविर्भवति । आहारादिवीर्यात्मसात्करणलक्षणोपभोगश्च भोगांतरायक्षयोपशमादुपात्तस्य च जरणं वीर्यांतरायक्षयोपशमात्कर्मांतरेण विषादीनां कथं भोक्तृत्वमिति चेत्प्रतिनियतशक्तित्वाद्द्रव्याणां भास्करप्रतापवत् । पर्यायवावमपि साधारणं सर्वद्रव्याणां प्रतिनियतपर्यायोपपत्तेः कर्मोदयाद्यपेक्षाभावात्तदपि पारिणामिकं । असर्वगतत्वमपि साधारणं परमाण्वादीनामविभुत्वाद्धर्मादीनां च परिमितासंख्यातप्रदेशत्वात्कर्मोदयाद्यपेक्षाभावात्तदपि पारिणामिकं । यदस्य कर्मोपात्तशरीरप्रमाणानुविधायित्वं तदसाधारणमपि सन्नपारिणामिकं कर्मनिमित्तत्वात् । अनादिसंततिबंधनबद्धत्वमपि साधारणं । कस्मात् ? तस्यसर्वद्रव्याणां स्वात्मीयसंतानबंधनबद्धत्वं प्रत्यनादित्वात् । सर्वाणि द्रव्याणि जीवधर्माधर्माकाशकालपुद्गलाख्यानि प्रतिनियतानि पारिणामिकचैतन्योपयोगगतिस्थित्यवकाशदानवर्तनापरिणामवर्णगंधरसस्पर्शादिपर्यायसतानबंधनबद्धानि कर्मोदयाद्यपेक्षाभावात्तदपि पारिणामिकं । यदस्यानादिकर्मसंततिबंधनबद्धत्वं तदसाधारणमपि सन्नपारिणामिकं कर्मोदयनिमित्तत्वाद्वक्ष्यते हि अनादिसंबंधे च सर्वस्येति । प्रदेशवत्वमपि साधारणं सङ्ख्येयाऽसंख्येयानंतप्रदेशोपेतत्वात्सर्वद्रव्याणां तदपि कर्मोदयाद्यपेक्षाभावात्पारिणामिकं । अरूपत्वमपि साधारणं जीवधर्माधर्मकालाकाशानां रूपयोगाभावात् तदपि कर्मोदयाद्यपेक्षाभावात्पारिणामिकं । नित्यत्वमपि साधारणं द्रव्यार्थादेशात्सर्वद्रव्याणां व्ययोदययोगाभावात् तच्च कर्मोदयाद्यपेक्षाभावात्पारिणामिकं । ऊर्ध्वगतित्वमपि साधारणमग्न्यादीनामूर्ध्वगतिपारिणामिकत्वात् तच्च कर्मोदयाद्यपेक्षाभावात्पारिणामिकमेव । अन्ये चात्मनः साधारणाः पारिणामिका योज्याः ।

अनंतरसूत्रनिर्दिष्टोपसंग्रहार्थश्चशब्द इति चेन्नाऽनिष्टत्वात् ॥ १४ ॥ स्यान्मतमनंतरसूत्रे निर्दिष्टानां गत्यादीनामुपसंग्रहार्थश्चशब्दो नास्तित्वादिसमुच्चयार्थ इति, तन्न—किं कारणं अनिष्टत्वात् । नहिं गत्यादीनां पारिणामिकत्वमिष्यते तल्लक्षणाभावात् ।

त्रिभेदपारिणामिकभावप्रतिज्ञानाच्च ॥ १५ ॥ यतश्चौपशमिकादिभावसंख्याविधायिनि सूत्रे त्रिभेदः पारिणामिक इति प्रतिज्ञातमतो न गत्यादिसमुच्चयार्थश्चशब्दः ।

गत्यादीनामुभयवत्त्वं क्षायोपशमिकभाववदिति चेन्नाऽन्वर्थसंज्ञाकरणात् ॥ १६ ॥ अथ मतमेतत् यथा क्षायोपशमिकभावस्य क्षयोपशमात्मकत्वादुभयवत्वं तथा गत्यादीनामुभयवत्त्वादौदयिकपारिणामिकश्च त्रिभेद इति सिद्धमिति । तन्न, किं कारण ? अन्वर्थसंज्ञाकरणात् । परिणामः स्वभावः प्रयोजनमस्येति पारिणामिक इत्यन्वर्थसंज्ञा । न चासौ स्वभावो गत्यादिषु विद्यते कर्मोदयनिमित्तत्वात् । किं च-

तथानभिधानात् ॥ १७ ॥ यथोभयवत्वाज्ज्ञानादयः क्षायोपशमिका इत्यभिधीयंते तथा गत्यादय औदयिकपारिणामिका इत्यभिधीयेरन् । न चाभिधीयंते तथानभिधानात् क्षायोपशमिकवद्गत्यादयो नोभयवंतः । किं च—

अनिर्मोक्षप्रसंगात् ॥ १८ ॥ गत्यादीनामुभयवत्वात्पारिणामिकत्वे सत्यनिर्मोक्षप्रसंगः सातत्यावस्थानात् । तस्मात्स्थितमेतदस्तित्वादिसमुच्चयार्थ एव चशब्द इति ।

आदिग्रहणमत्र न्याय्यमिति चेन्न त्रिविधपारिणामिकभावप्रतिज्ञाहानेः ॥ १९ ॥ स्यादेतज्जीवभव्याभव्यत्वानीत्यत्रादिग्रहणं न्याय्यं । अस्तित्वादीनामपीष्टत्वादिति । तन्न, किं कारणं ? त्रिविधपारिणामिकभावप्रतिज्ञाहानेः । आदिग्रहणे हि क्रियमाणे जीवभव्याभव्यत्वास्तित्वादीनां पारिणामिकभावत्वात्त्रिविध इति यत्पुरस्तात्प्रतिज्ञातं तस्य हानिः स्यात् ।

समुच्चयार्थेपि चशब्दे तुल्यमिति चेन्न प्रधानापेक्षत्वात् ॥ २० ॥ स्यान्मतं समुच्चयार्थेपि चशब्देऽस्तित्वादीनां पारिणामिकत्वेन समुच्चयात्त्रिभेदप्रतिज्ञाहानिस्तुल्येति। तन्न, किं कारणं ? प्रधानापेक्षत्वात्। कंठोक्तानि त्रीणि प्रधानानि तदपेक्षा त्रिभेदप्रतिज्ञेति नास्ति विरोधः। अस्तित्वादीनि तु साधारणत्वा चशब्देन द्योतितानीति तेषां गुणभावः । आदिशब्दे हि क्रियमाणेऽस्तित्वादीनां प्राधान्यं स्यात् जीवत्वादीनामुपलक्षणार्थत्वादप्राधान्यं । तद्गुणसंविज्ञाने चोभयेषां प्राधान्यं प्रसज्येत ।

सान्निपातिकभावोपसंख्यानमिति चेन्नाऽभावात् ॥ २१ ॥ स्यादेतदार्षे सांनिपातिकभाव उक्तः स इहोपसंख्यातव्य इति । तन्न, किं कारणं ? अभावान्नहि षष्ठो भावोस्ति ।

मिश्रशब्देनाक्षिप्तत्वाच्च ॥ २२ ॥ यद्यप्यसौ विद्यते मिश्रशब्देनासावाक्षिप्तः । ननु च मिश्रशब्दः क्षायोपशमिकसंग्रहार्थो न सान्निपातिकग्रहणार्थ इत्युच्यते—

चशब्दवचनात् ॥ २३ ॥ औपशमिकक्षायिकौ भावौ मिश्रौ जीवस्य स्वतत्वमौदयिकपारिणामिकौ चेति सिद्धे यन्मिश्रशब्दसमापे चशब्दकरणं तेन ज्ञायते मिश्रशब्देनोभयमुच्यते इति । मिश्रश्च कः क्षायोपशमिको भावः सान्निपातिकश्चेति इदमयुक्तं वर्तते । किमत्रायुक्तं ? यद्यस्ति सांनिपातिकोभावोऽभावादिति विरुध्यते। अथ नास्ति, कथमार्षे सान्निपातिको भावो नास्तीत्यभावादित्युच्यते संयोगभंगापेक्षयास्तीत्यार्षे वचनं । तत्राभावपक्षे आदिसूत्रे पूर्वोक्तानुकर्षणार्थश्चशब्द उक्तो भावपक्षे सान्निपातिकप्रतिपादनार्थश्चशब्दः पूर्वोक्तानुकर्षणापेक्षया वेदितव्यः । अथार्षोक्तः सान्निपातिकभावः कतिविध इत्यत्रोच्यते—

षड्विंशतिविधः षट्त्रिंशद्विध एकचत्वारिंशद्विध इत्येवमादिरागमे उक्तः ॥ २४ ॥ तत्र-दुग तिग चदु पंचे वय संजोगा होंति सन्निवादेसु । दस दस पंचय एक्कय भावा छब्वीस पिंडेण । द्विभावसंयोगेन दशौदयिकं परिगृह्यौपशमिकादिचतुष्टयस्य चैकैकत्यागेन प्रथमे द्विभेदसंयोगे चत्वारो भंगाः । तत्रैक औदयिकौपशमिकसान्निपातिकजीवभावो नाम मनुष्य उपशांतक्रोधः । द्वितीय औदयिकक्षायिक सान्निपातिक जीवभावो नाम मनुष्यः क्षीणकषायः । तृतीय औदयिकक्षायोपशमिकसान्निपातिक जीव भावो नाम मनुष्यः पंचेंद्रियः । चतुर्थ औदयिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्यो जीवः द्वितीयद्विभावसंयोगे औदयिकं परित्यज्यौपशमिकपरिग्रहात् क्षायिकादिभावत्रयस्यैकैकत्यागेन त्रयो भंगाः। तत्रैक औपशमिकक्षायिकसान्निपातिकजीवभावो नामोपशांतलोभः क्षीणदर्शनमोहत्वात् क्षायिकसम्यग्दृष्टिः । द्वितीयः औपशमिकक्षायोपशमिकसान्निपातिकजीवभावो नामोपशांतमान आभिनिबोधिक ज्ञानी । तृतीय औपशमिकपरिणामिकसान्निपातिकजीवभावो नाम उपशांतमायो भव्यः । तृतीयद्विभावसंयोगे औपशमिकं परित्यज्य क्षायिकपरिग्रहात्क्षायोपशमिकपारिणामिकयोरेकैकत्यागाद्द्वौ भंगौ । तत्रैकः क्षायिकक्षायोपशमिकसान्निपातिकजीवभावो नाम क्षायिकसम्यग्दृष्टिः श्रुतज्ञानी । द्वितीयः क्षायिकपारिणामिकसान्निपातिकजीवभावो नाम क्षीणकषायो भव्यः । चतुर्थद्विभावसंयोगे क्षायिकपरित्यागादेकः क्षायोपशमिकसान्निपातिक

जीवभावो नामाऽवधिज्ञानी जीवः। त एते द्विभावसंयोगभंगाः समुदिताः दश। प्रथमत्रिभावसंयोगे औदयिकौपशमिकौ परिगृह्य क्षायिकादिभावत्रयस्यैकैकभावपरिग्रहात्त्रयो भंगाः। तत्रैक औदयिकौपशमिकक्षायिकसान्निपातिकजीवभावो नाम मनुष्य उपशांतमोहः क्षायिकसम्यग्दृष्टिः। द्वितीय औदयिकौपशमिकक्षायोपशमिकसांनिपातिकजीवभावो नाम मनुष्य उपशांतक्रोधो वाग्योगी। तृतीय औदयिकौपशमिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्य उपशांतमानो जीवः। द्वितीयत्रिभावसंयोगे औपशमिकं परित्यज्यौदयिकक्षायिकौ परिगृह्य क्षायोपशमिकपारिणामिकयोरेकैकस्य परिग्रहाद् द्वौ भंगौ। तत्रैकः औदयिकक्षायिकक्षायोपशमिकसान्निपातिकजीवभावो नाम मनुष्यः क्षीणकषायः श्रुतज्ञानी। द्वितीय औदयिकक्षायिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्यः क्षीणदर्शनमोहो जीवः। तृतीयत्रिभावसंयोगे औदयिकपरिग्रहादौपशमिकक्षायिकत्यागादेकः औदयिकक्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्यमनोयोगी जीवः। चतुर्थत्रिभावसंयोगे औदयिकं परित्यज्यौपशमिकादिभावचतुष्टयस्यैकैकत्यागे चत्वारो भंगाः। तत्रैक औपशमिकक्षायिकक्षायोपशमिकसान्निपातिकजीवभावो नामोपशांतमानः क्षीणदर्शनमोहः काययोगी। द्वितीय औपशमिकक्षायिकपारिणामिकसान्निपातिकजीवभावो नामोपशांतवेदः क्षायिकसम्यग्दृष्टिर्भव्यः। तृतीय औपशमिकक्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नामोपशांतमानो मतिज्ञानी जीवः। चतुर्थः क्षायिकक्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नाम क्षीणमोहः पंचेंद्रियः भव्यः। त एते त्रिभावसंयोगभंगाः समुदिता दश। चतुर्भावसंयोगेन पंचभंगा औदयिकादीनामेकैकत्यागात्। तत्रैक औपशमिकक्षायिकक्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नामोपशांतलोभः क्षीणदर्शनमोहः पंचेंद्रियो जीवः। द्वितीय औदयिकक्षायिकक्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्यः क्षीणकषायो मतिज्ञानी भव्यः। तृतीय औदयिकौपशमिकक्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्य उपशांतवेदः श्रुतज्ञानी जीवः। चतुर्थः औदयिकौपशमिकक्षायिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्य उपशांतरागः क्षीणदर्शनमोहो जीवः। पंचम औदयिकौपशमिकक्षायोपशमिकसान्निपातिकजीवभावो नाम मनुष्य उपशांतमोहः क्षायिकसम्यग्दृष्टिरवधिज्ञानी। पंचभावसंयोगेनैकः औदयिकौपशमिकक्षायिकक्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्य उपशांतमोहः क्षायिकसम्यग्दृष्टिः पंचेंद्रियो जीवः। एवं षड्विंशतिविधः सान्निपातिकभावः।

षड्त्रिंशद्विध उच्यते—द्वयोरौदयिकयोः सन्निपातादौदयिकस्यौपशमिकादिभिः चतुर्भिरेकशः सान्निपातात्पंच भंगाः। तत्र प्रथम औदयिकौदयिकसान्निपातिकजीवभावो नाम मनुष्यः क्रोधी शांतः। द्वितीय औदयिकौपशमिकसान्निपातिकजीवभावो नाम मनुष्यः उपशांतक्रोधः। तृतीय औदयिकक्षायिकसान्निपातिकजीवभावो नाम मनुष्यः क्षीणकषायः। चतुर्थ औदयिकक्षायोपशमिकसान्निपातिकजीवभावो नाम क्रोधी मतिज्ञानी। पंचम औदयिकपारिणामिकसान्निपातिकजीवभावो नाम मनुष्यो भव्यः। द्वयोरौपशमिकयोः सन्निपातादौपशमिकस्यौदयिकादिभिरेकशः सान्निपातात्पंच भगाः। तत्रैक औपशमिकौपशमिकसान्निपातिकजीवभावो नामोपशमसम्यग्दृष्टिरुपशांतकषायः। द्वितीय औपशमिक औदयिकसान्निपातिकजीवभावो नामोपशांतकषायो मनुष्यः। तृतीयऔपशमिकक्षायिकसान्निपातिकजीवभावो नामोपशांतक्रोधः क्षायिकसम्यग्दृष्टिः। चतुर्थ औपशमिकक्षायोपशमिकसान्निपातिकजीवभावो नामोपशांतकषायः अवधिज्ञानी। पंचम औपशमिकपारिणामिकसान्निपातिकजीवभावो नामोपशांतदर्शनमोहो जीवः। द्वयोः क्षायिकयोः सान्निपातात् क्षायिकस्य चौदयिकादिभिः चतुर्भिरेकशः सन्निपातात्पंच भंगाः। तत्रैकः क्षायिकक्षायिकसान्निपातिकजीवभावो नाम क्षायिकसम्यग्दृष्टिः क्षीणकषायः। द्वितीयः क्षायिकौदयिकसान्निपातिकजीवभावो नाम क्षीणकषायो मनुष्यः। तृतीयः क्षायिकौपशमिकसान्निपातिकजीवभावो नाम क्षायिकसम्यग्दृष्टिरुपशांतवेदः। चतुर्थः क्षायिकक्षायोपशमिकसान्निपातिकजीवभावो नाम क्षीणकषायो मतिज्ञानी पंचमः क्षायिकपारिणामिकसान्निपातिकजीवभावो नाम क्षीणमोहो भव्यः। द्वयोः क्षायोपशमिकयोः सन्निपातात्क्षायोपशमि-

कस्य चौदयिकादिभिश्चतुर्भिरेकशःसन्निपातात् पंचभगाः। तत्रैकः क्षायोपशमिकक्षायोपशमिकसान्निपातिकजीवभावो नाम संयतोऽवधिज्ञानी। द्वितीयः क्षायोपशमिकौदयिकसान्निपातिकजीवभावो नाम संयतो मनुष्यः। तृतीयः क्षायोपशमिकौपशमिकसान्निपातिकजीवो नाम संयत उपशांतकषायः। चतुर्थः क्षायोपशमिकक्षायिकसन्निपातिकजीवभावो नाम संयतासंयतः क्षायिकसम्यग्दृष्टिः। पंचमः क्षायोपशमिकपारिणामिकसान्निपातिकजीवभावो नाम अप्रमत्तसंयतो जीवः। द्वयोः पारिणामिकयोः सन्निपातात् पारिणामिकत्वात् पारिणामिकस्य चौदयिकादिभिः चतुर्भिरेकशः सान्निपातात्पंच भंगाः। तत्रैकः परिणामिकपारिणामिकसान्निपातिकजीवभावो नाम जीवो भव्यः। द्वितीयः पारिणामिकौदयिकसान्निपातिकजीवभावो नाम जीवः क्रोधी। तृतीयः पारिणामिकौपशमिकसान्निपातिकजीवभावो नाम भव्य उपशांतकषायः। चतुर्थः पारिणामिकक्षायिकसान्निपातिकजीवभावो नाम भव्यः क्षीणकषायः। पंचमः पारिणामिकक्षायोपशमिकसान्निपातिकजीवभावो नाम संयतो भव्यः। ततस्त एते द्विभावसंयोगाः पंचविंशतिस्त्रिभावसंयोगभंगा दश पूर्वोक्ताः पंचभावसंयोगेन चैकः। एते सपिंडिताः षट्त्रिंशत्पूर्वोत्पन्नचतुर्भावसंयोगात्पंच पंच भंगसंप्रपादेन एवं षड्त्रिंशदेकचत्वारिंशद्भंगा भवंति। एवमादयोऽन्ये च विकल्पा नेतव्या आगमाविरोधेन ॥

औपशमिकाद्यात्मतत्त्वानुपपत्तिरतद्भावादिति चेन्न तत्परिणामात् ॥ २५ ॥ स्यान्मतं य एत औपशमिकादयो भावा एतेषामात्मतत्त्वव्यपदेशो नोपपद्यते कुतोऽतद्भावात्। सर्वे हि ते पौद्गलिकाः कर्मबंधोदयनिर्जरापेक्षत्वादिति ? तन्न, किं कारणं ? तत्परिणामात्। पुद्गलद्रव्यशक्तिविशेषवशीकृत आत्मा तद्रजनः संस्तन्निमित्तं यं यं परिणाममास्कंदति तदा तदा तन्मयत्वात्तद्रूपेण एव भवति। उक्तं च—परिणमदि जेण दव्वं तक्कालं तम्मयत्ति पण्णत्तं तह्मा धम्मपरिणदो आदा धम्मो मुणेयव्वो इति ॥ स परिणामोऽन्यद्रव्यासाधारणत्वादात्मतत्त्वमित्याख्यायते ॥

अमूर्तत्वादभिभवानुपपत्तिरिति चेन्न तद्विशेषसामर्थ्योपलब्धेश्चैतन्यवत् ॥ २६ ॥ अथ मतमेतदमूर्तिरात्मा कर्मपुद्गलैर्नाभिभूयते ततस्तत्परिणामाभाव इति ? तन्न, किं कारणं ? तद्विशेषसामर्थ्योपलब्धेः। सोऽस्यानादिकर्मबंधसंतानान्तर्गतस्तद्वतो विशेषसामर्थ्यं। कथं ? चैतन्यवत्। यथाऽनादिपारिणामिकचैतन्यवशीकृत आत्मा तद्वान् तस्य तद्वतश्चैतन्यवतः नारकादिमत्यादिपर्यायविशेषवृत्तिरपि चेतना। तथाऽनादिकार्माणशरीरासक्तत्वात्कर्मवत आत्मनो मूर्तिमत्वाद्गत्यादिपर्यायविशेषसामर्थ्योपलब्धिरपि मूर्तिमतीत्येवं सति नामूर्तिरात्मा। किं च—

अनेकांतात् ॥ २८ ॥ अनादिकर्मबंधसंतानपरतंत्रस्यात्मनः अमूर्तिं प्रत्यनेकांतो बंधपर्यायं प्रत्येकत्वात्स्यान्मूर्तिः। तथापि ज्ञानादिस्वलक्षणापरित्यागात्स्यादमूर्तिरित्यादि पूर्ववत्। यस्यैकांतेनाऽमूर्तिरेवात्मा भवेत्तस्यायं दोषो नार्हतस्य। किं च—

सुराभिभवदर्शनात् ॥ २८ ॥ मदमोहविभ्रमकरीं सुरां पीत्वा नष्टस्मृतिर्जनः काष्ठवदपरिस्पंद उपलभ्यते। तथा कर्मेंद्रियाभिभवादात्मा नाविर्भूतस्वलक्षणो मूर्त इति निश्चीयते।

करणमोहकरं मद्यमिति चेन्न तद्विविधकल्पनायां दोषोपपत्तेः ॥ २९ ॥ स्यादाकूतं चक्षुरादीनां करणानां व्यामोहकारणं मद्यं पृथिव्यादिभूतप्रसादात्मकत्वादिंद्रियाणां नात्मगुणस्याऽमूर्तित्वादिति। तन्न, किं कारणं ? तद्विविधकल्पनायां दोषोपपत्तेः। इदमिह संप्रधार्यं तानि करणानि चेतनानि वा स्युरचेतनानि वा ? यद्यचेतनानि, अचेतनत्वात्तेषां न मदकरं मद्यं यदि स्यात्प्रागेव स्वभाजनानां मदकरं स्यात्। अथ चेतनानि पृथगनुपलब्धचैतन्यस्वभावानां पृथिव्यादीनां चेतनाद्रव्यसंबंधत्वादेव चैतन्यव्यपदेशः स्यात्मगुणस्यैव मोहकरत्वं सिद्धं। अथ मतमेतत्पृथिव्यादीनामेव संयोगविशेषे सति पिष्टकिण्वोदकादिसमाहारे मदशक्तिव्यक्तिवत् सुखदुःखाद्यभिव्यक्तिरिति नैतद्युक्तं रूपादिवैधर्म्यात्। रूपादयो हि पृथिव्यादिगुणाः संतो विभक्तेष्वविभक्तेषु च क्रमेणैव हनिमास्कंदंति। न च तथा शरीरावयवेषु विभक्तेष्वविभक्तेषु

च सुखादीनां क्रमेणैव हानिर्युगपच्चोपलभ्यते तस्मान्न पृथिव्यादिगुणाः। किंच यदि पृथिव्यादिगुणाः सुखादयो नव शवशरीरावस्थायामप्युपलभ्येरन् रूपादिवत्। सूक्ष्मभूतापगमान्नोपलब्धिरिति चेद् भूयसां स्थूलानां संभवात् तदुपलब्धिः स्यात्। किं च— तदपाये तदनुपलब्धेस्तेषामेव ते गुणा इति समुदायधर्मत्वाभावान्मद्यदृष्टांतायुक्तिः। किं च भूतसूक्ष्मास्तित्वसिद्धिवदात्मसिद्धिरपि स्यात्। अथवा तान्यंतःकरणानि वा स्युः बहिःकरणानि वा? यदि वहिःकरणानि तेषामचेतनत्वात व्यामोहाभावः। अथांतःकरणानि तेषामपि चेतनत्वमचेतनत्वं वा। स्यादचेतनत्वं पूर्ववन्मोहाभावः चेतनत्वे विज्ञानरूपत्वाद् व्यामोहो युक्तो न युक्तममूर्तत्वादभिभवाभाव इति। यद्येवं कर्मोदयमद्यावेशवशीकृतस्य तस्यास्तित्वं दुरुपलक्ष्यं? नैषदोषः, तदावेशेपि स्वलक्षणत्वेनोपलब्धिर्भवति। उक्तं च—बंधं पडि एयत्तं लक्खणदो होदि तस्स णाणत्तं। तह्मा अमुत्तिभावो णेयंतो होदि जीवस्स। यद्येवं तदेव तावदुच्यतां लक्षणं यत्संनिधानाद्बंधपरिणामं प्रत्यविवेकेपि सति विभागोवगृह्यंते जीवस्येत्यत आह—

उपयोगो लक्षणं ॥ ८ ॥

उपयोग इत्युच्यते। क उपयोगो नाम?

बाह्याभ्यंतरहेतुद्वयसंनिधाने यथा संभवमुपलब्धुश्चैतन्यानुविधायी परिणाम उपयोगः ॥ १ ॥ द्विविधो हेतुर्बाह्य आभ्यंतरश्च। द्वाववयवौ यस्य स द्वयः। ननु च स्वरूपनिर्देशादेव द्वित्वप्रतीतेर्द्वयवचनमनर्थकं? नानर्थकं प्रत्येकं द्वैविध्यसंप्रत्ययार्थं बाह्यो हेतुर्द्वय आभ्यंतरश्चेति। तत्र बाह्यो हेतुर्द्विविध आत्मभूतोनात्मभूतश्चेति। तत्रात्मना संबंधमापान्नविशिष्टनामकर्मोपात्तपरिच्छिन्नस्थानपरिणामनिर्माणश्चक्षुरादिकरणग्राम आत्मभूतः। प्रदीपादिरनात्मभूतः। आभ्यंतरश्च द्विविधः। अनात्मभूत आत्मभूतश्चेति। तत्र मनोवाक्कायवर्गणालक्षणो द्रव्ययोगश्चिंताद्यालंबनभूतोंतराभिनिविष्टत्वादाभ्यंतर इति व्यपदिश्यमान आत्मनोऽन्यत्वादनात्मभूत इत्यभिधीयते। तन्निमित्तो भावयोगो वीर्यांतरायज्ञानदर्शनावरणक्षयक्षयोपशमनिमित्त आत्मनः प्रसादश्चात्मभूत इत्याख्यामर्हति। तस्यैतस्य हेतुविकल्पस्य यथासंभवमुपलब्धुः संनिधानं भवति। तद्यथा—प्रदीपादेस्तावत् केषांचित्संनिधानं तेन विना चक्षुरादिविज्ञानाप्रवृत्तेः केषांचित्तु द्वीपिमार्जारादीनां तमंतरेणाप्युपलब्धेरनियमः। चक्षुरादीनामपि पंचेंद्रियविकलेंद्रियैकेंद्रियविषयत्वेन संनिधानं प्रत्यनियमः। अंतःकरणमपि असंज्ञिनां मनोवर्जितं। संज्ञिनां त्रितयं। एकेंद्रियाणां विग्रहगतिमुपगतानां समुद्घातगतानां च सयोगकेवलिनामक एव काययोगः भावयोगश्च तत्कृतः तच्च तत्र नियतः क्षयोपशमश्चाक्षीणकषायात्। अत ऊर्ध्वं क्षय इत्येवं यथा संभवं संनिधाने सति चैतन्यमात्मनः स्वभावोऽनादिः तमनुविधदातीत्येवं शीलश्चैतन्यानुविधायी सुवर्णभावानुविधायी कटकांगदकुंडलादिविकारवत्। स एव प्रकार आत्मनः परिणाम उपयोगइत्युपदिश्यते। अत्र कश्चिदाह—चैतन्यं सुखदुःखमोहरूपतदनुविधायिना परिणामेन सुखदुःखक्रोधादिना भवितव्यं उत्तरत्र च उपयोगप्रकारा ज्ञानदर्शनविकारा वक्ष्यंते तदिदं पूर्वापरविरुद्धमालक्ष्यत इति? नैष दोषः चैतन्यं नामात्मधर्मः सामान्यभूतो यस्याऽसंनिधानादितरेषु द्रव्येषु जीवस्य जीवव्यपदेशो नास्ति यद्भेदाश्चैते ज्ञानदर्शनादयस्तेषां समुदाये वर्तमानश्चैतन्यशब्दः क्वचिदवयवेपि सुखादौ वर्तते इति। समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तंते इति। इह पुनः समुदाय एव वर्तमानः परिगृहीतः। उत्तरत्र च तद्भेदा ज्ञानदर्शनविकारा वक्ष्यंते इति नास्ति विरोध.। अथ किं लक्षणं?

परस्परव्यतिकरे सति येनान्यत्वं लक्ष्यते तल्लक्षणं ॥ २ ॥ बंधपरिणामानुविधानात् परस्परप्रवेशादव्यतिकीर्णस्वभावत्वेपि सत्यन्यत्वप्रतिपत्तिकारणं लक्षणमिति समाख्यायते। यथा सुवर्णरजतयोः सत्त्यपि बंधे प्रत्येकत्वे वर्णप्रमाणादिरसाधारणो धर्मः ॥

अलक्षणमुपयोगो गुणगुणिनोरन्यत्वमिति चेन्नोक्तत्वात् ॥ ३ ॥ स्यादतदौष्ण्यं गुणोग्नि

गुणी तथा वा॰१०८मा गुणा ज्ञानादिर्गुणः इति । तयोश्च लक्षणभेदादन्यत्वमिति ? तन्न, किं कारणं ? उक्तत्वात् । उक्तमेतत्—अतत्स्वभाव्येऽनवधारणप्रसंगोऽग्निवदित्यादि ॥

लक्ष्यलक्षणभेदादिति चेन्नाऽनवस्थानात् ॥ ३ ॥ अथमतमेतत् लक्ष्यो गुणी गुणो लक्षणं लक्ष्याच्च लक्षणेनार्थांतरभूतेन भवितव्यमित्यतोऽनयोरन्यत्वमिति ? तन्न, किं कारणं ? अनवस्थानात् येन लक्षणेन लक्ष्यं लक्ष्यते तत्सलक्षणमलक्षणं वा ? यदि तदलक्षणं मण्डूकशिखंडवदभावमापद्येत । असति च तस्मिन् लक्ष्यानवधारणं । अथ सलक्षणं तदपि ततोऽन्यत्तदपि ततोऽन्यदित्यनवस्था स्यात् । किंच—

आदेशवचनात् ॥ ४ ॥ लक्ष्यलक्षणयोर्व्यतिरेकात्स्यादेकत्वं संज्ञादिभेदत्वाच्च स्यान्नानात्वमित्यादेशवचनादेकांतदोषानुषंगाभावः ॥ कश्चिदाह—

नोपयोगलक्षणो जीवस्तदात्मकत्वात् ॥ ५ ॥ इह लोके यद्यदात्मकं न तत्तेनोपयुज्यते यथा क्षीरं क्षीरात्मकं न तत्तेनैवात्मनोपयुज्यते । एवमात्मनोऽपि ज्ञानाद्यात्मकत्वान्न तेनैवोपयोग इति जीवस्योपयोगाभावः । कुतश्च—

विपर्ययप्रसंगात् ॥ ६ ॥ सति चानन्यत्वे उपयोगमिच्छतोऽनिच्छितश्च कस्यचिद्विपर्ययः प्राप्नोति कथमविपर्ययवत् । तद्यथा— जीव एव ज्ञानादनन्यत्वे सति ज्ञानात्मनोपयुज्यत इति मन्यसे न क्षीरादयः क्षीराद्यात्मभिरेवं क्षीरादय एव क्षीराद्यात्मभिः परिणमेयुः । ननु जीवो ज्ञानात्मना नोपयुज्यतेऽनिष्टं चैतत् ?

नातस्तत्सिद्धेः ॥ ७ ॥ नैतद्युक्तं कुतोऽतस्तत्सिद्धेर्यत एवानन्यत्वमत एवोपयोगः सिद्धः । नह्यत्यंतमन्यत्वे उपयोगः सिध्यति आकाशस्य रूपाद्युपयोगाभावात् । ननु चोक्तं यथा क्षीरं क्षीरात्मकं न तत्तेनात्मनोपयुज्यत इति नातस्तत्सिद्धिरित्येव । यथा तृणजलादिकारणवशात् क्षीरभावावाप्तिप्रत्यभिमुखं क्षीरं क्षीरव्यपदेशभाक् तच्छक्त्यव्यतिरेकात्क्षीरात्मना परिणमति इत्युच्यते । तथात्मापि ज्ञानादिस्वभावशक्तिप्रत्ययवशात् घटपटाद्याकारावग्रहरूपेण परिणमतीत्युपयोगः सिद्धः इतरथा ह्यतद्भावे तद्भावाऽभावादुपयोगाभावः स्यात् । किं च—

उभयथापि त्वद्वचनासिद्धेः ॥ ८ ॥ अनेकांतवादप्रवणमार्हत्न्यायमविज्ञाय यदुपादिक्षत् भवान् यद्यदात्मकं न तस्य तेनैव परिणाम इति नन्वेवमुभयथापि त्वदीयस्य वचसोऽसिद्धिस्तद्यथा तदात्मकानुपयोगवादिनः स्ववचसः स्वपरपक्षसाधनदूषणात्मकस्य स्वपक्षपरपक्षयोः साधकत्वदूषकत्वापरिणामात्त्रोपदिष्टः तत्रासाधकस्तेऽयं हेतुर्यथा क्षीरस्य दधित्वेन परिणाम इष्यते न क्षीरत्वेनैव तथैव त्वद्वचसः स्वपक्षसाधनात्मकस्य तेनैवापरिणामाद् दूषकत्वेन परिणाम एषितव्यो न साधकत्वेन । अस्यैव च परपक्षदूषकात्मकस्य तेनैवापरिणामात् साधकत्वेन परिणाम एषितव्यो न दूषकत्वेनातस्तदात्मकत्वेनुपयोगादिति त्वद्वचनासिद्धिः । अथ त्वद्वचनं स्वपरपक्षसाधकदूषकात्मकमपि सत् स्वपरपक्षयोः साधकदूषकपर्यायाभ्यां परिणमति । नन्वेवमपि यदवोचद्भवांस्तदात्मकत्वेनुपयोगान्न तस्य तेनैव परिणाम इति तदसत् । किंच—

स्वसमयविरोधात् ॥ ९ ॥ यदि यद्यदात्मकं न तत्तेनैव परिणमतीष्टं वः । ननु पृथिव्यप्तेजोवायुमहाभूतानां रूपाद्यात्मकत्वाद्रूपाद्यात्मना विपरिणामः स्यादिष्यते च शुक्लादिरूपादिविशेषपरिणामः । अतः स्वसमयविरोधः । किं च—

केनचिद्विज्ञानात्मकत्वात् ॥ १० ॥ यस्यैकांतेन ज्ञानात्मक आत्मा स्यात्तस्य ज्ञानात्मना परिणामाभावः परिणतत्वादार्हतस्य तु केनचिद्विज्ञानात्मकस्तत्पर्यायादेशात् केनचिदन्यात्मक इतरपर्यायादेशादिति कथंचित्तदात्मकत्वात्केनचिदतदात्मकत्वात्परिणामासिद्धिः । यदि चैकांतेन ज्ञानात्मक एव स्यादितरात्मक एव वा तद्भावाविरामः स्याद्विरामे चात्मनोऽपि विरामः प्रसक्तः । किं च—

तदात्मकस्य तेनैव परिणामदर्शनात् क्षीरवत् ॥ ११ ॥ यथा क्षीरं द्रवमधुरादिक्षीरस्वभावमजहद्गुडादिद्रव्यसंबंधाद् गुडक्षीरादिपरिणामांतरमास्कंदति गवादेः स्तनांतरनिर्गतमात्रं चोष्णं पुनः शीतं भवति पुनश्चाग्निद्रव्यसंबंधादुष्णं घनं च भवति तदभावे च शीतमिति क्षीरजातिमजहदुष्णक्षीरादिव्यपदेशभागिति क्षीरं क्षीरात्मनैव परिणतं । यदि क्षीरं क्षीरात्मना न परिणमेत्तत्र तत्र क्षीरव्यपदेशाभावः स्यात् । तथोपयोगात्मक आत्मा उपयोगस्वभावमजहज्ज्ञानात्मना परिणाममियर्तीति नास्ति विरोधः ।

अतश्चैतदेवं यदि हि न स्यान्नि'परिणामत्वप्रसंगोऽर्थस्वभावसंकरो वा ॥ १२ ॥ यदि यद्यदात्मकं तस्य तेनापरिणामः स्याज्ज्ञानानां निष्परिणामत्वप्रसंगस्ततश्च सर्वथा नित्यत्वे क्रियाकारकव्यवहारलोपः स्यात् । परिणामवत्त्वे च परात्मना परिणामात्सर्वपदार्थस्वभावसंकरप्रसंगः स्यात् । अथैतदुभयेनेष्यते सिद्धः स्वेनात्मना परिणामः । कश्चिदाह—

उपयोगलक्षणानुपपत्तिर्लक्ष्याभावात् ॥ १३ ॥ इह लोके सतो लक्ष्यस्य लक्षणं भवति यथा सतो देवदत्तस्य दंडादि न चासतः शशविषाणादेः किंचिल्लक्षणमस्ति । तथा स एवात्मा लक्ष्यो दुरुपपादस्तदभावात्कुत उपयोगस्य लक्षणत्वमिति । तत्कथं ? इति चेदुच्यते

तदभावश्चाकारणत्वादिभिः ॥ १४ ॥ तस्य लक्ष्यस्यात्मनोऽभावः. कुतः अकारणत्वादेः मंडूकशिखंडवत् ।

सत्यपि लक्षणत्वानुपपत्तिरनवस्थानात् ॥ १५ ॥ सत्यात्मनि लक्ष्ये उपयोगस्य लक्षणं च नोपपद्यते कुतोऽनवस्थानात् । उपयोगो हि ज्ञानदर्शनस्वभावः स चानवस्थितः क्षणिकत्वात् न चानवस्थितं लक्षणं भवति । तदपाये तदनुपलब्धेर्यथाकृतरदेवदत्तस्य गृहमधो यत्रासौ काक इत्युत्पतिते काके नष्टं तद्गृहं भवति तथा ज्ञानादिलक्षणस्याभावस्तदभावेऽभावः. प्राप्नोति इत्यत्रोच्यते—

आत्मनिह्नवो न युक्तः साधनदोषदर्शनात ॥ १६ ॥ इहात्मनो निह्नवो न युक्त कुतः साधनदोषदर्शनात् । यत्तावदुक्तं नास्त्यात्मा अकारणत्वान्मंडूकशिखंडवदिति —

हेतुरयमसिद्धो विरुद्धोऽनैकांतिकश्च ॥ १७ ॥ कारणवानेवात्मा इति निश्चयो न. नरकादिभवव्यतिरिक्तद्रव्यार्थाभावात्तस्य च मिथ्यादर्शनादिकारणत्वादसिद्धता । अत एव द्रव्यार्थाभावात्पर्यायस्य च पर्यायांतरानाश्रयत्वादाश्रयाभावादप्यसिद्धताकारणमेव ह्यस्ति सर्वं घटादि तेनायं द्रव्यार्थिकस्य विरुद्ध एव सतोऽकारणत्वात् यदस्ति तन्नियमेनैवाकारणेन हि किंचिदस्ति च कारणवत्त्वं यदि तदस्त्येव किमस्य कारणेन नित्यनिर्वृत्तत्वात् कारणत्वं चासत एव कार्यार्थत्वात्कारणस्येति विरुद्धार्थता। मंडूकशिखंडकादीनामसत्प्रत्ययहेतुत्वेन परिच्छिन्नसत्वानामभ्युपगमात्तेषां च कारणाभावात् । उभयपक्षवृत्तेरनैकांतिकत्वं । दृष्टांतोऽपि साध्यसाधनोभयधर्मविकलः कर्मविशवशान्नानाजातिसंबंधमापन्नवतो जीवतो जीवस्य मंडूकभवावाप्तौ तद्व्यपदेशभाजः । पुनर्युवतिजन्मन्यवाप्ते यः शिखंडकः स एवायमित्येकजीवसंबंधत्वान्मंडूकशिखंड इत्यस्ति पुद्गलद्रव्यस्याप्यनाद्यनंतपरिणामस्य युवतिभुक्ताहारादिकेशभावपरिणामाच्छिखंडनिष्पत्तेः कारणत्वमिति नास्तित्वाकारणत्वधर्माभावात् । एवं बंध्यापुत्रशशविषाणादिष्वपि योज्यं । आकाशकुसुमे कथ ? तत्रापि यथा वनस्पतिनामकर्मोदयापादितविशेषस्य वृक्षस्य जीवपुद्गलसमुदायस्य पुष्पमिति व्यपदिश्यते । अन्यदपि पुद्गलद्रव्यं पुष्पभावेन परिणतं तेन व्याप्तत्वादेवमाकाशेनापि व्याप्तत्वं समानमिति तत्तस्यापीति व्यपदेशो युक्तः । अथ तत्कृतोपकारापेक्षया तस्येत्युच्यते आकाशकृतावगाहनोपकारापेक्षया कथं तस्य न स्याद् वृक्षात्प्रच्युतमप्याकाशान्न प्रच्यवते इति नित्यं तत्संबंधि अर्थांतरभावात्तस्य न स्यादिति मतं वृक्षस्यापि न स्यात्सर्वत्रैवात्र नामाद्यपेक्षया संबंधो योजयितव्यः । बहिरंगार्थाकारपरिणतविज्ञानविषयत्वापेक्षया वा दोषो-

द्भावनमूहितव्यं। यदप्युच्यते नास्त्यात्मा ऽप्रत्यक्षत्वाच्छशशृंगवदित्ययमपि न हेतुः। असिद्धविरुद्धानैकांतिकताप्रच्युतेः। सकलविषयकेवलज्ञानप्रत्यक्षत्वाच्छुद्धात्मा प्रत्यक्ष। कर्मनोकर्मबंधपरतन्त्रपिंडात्मा च अवधिमनःपर्ययज्ञानयोरपि प्रत्यक्ष इत्यप्रत्यक्षत्वादित्यसिद्धो हेतुः। इंद्रियप्रत्यक्षत्वाभावादप्रत्यक्ष इति चेन्न तस्य परोक्षत्वाभ्युपगमात्। अप्रत्यक्षाः घटादयोऽग्राहकनिमित्तग्राह्यत्वाद् धूमाद्यनुमिताग्निवद्ग्राहकमिंद्रियं तद्विगमेपि गृहीतस्मरणाद्गवाक्षवत्। किं च प्रत्यक्षादन्यो प्रत्यक्ष इति पर्युदासो वा स्यात्? प्रत्यक्षो न भवतीत्यप्रत्यक्ष इति प्रसज्यप्रतिषेधो वा? यदि पर्युदासोऽन्यत्वस्य द्विष्ठत्वाद्वस्तुत्वसिद्धेः नास्तित्वविरोध्यस्तित्वसाधनाद्विरुद्धः। अथ प्रसज्यप्रतिषेधः सति प्रतिषेध्ये प्रतिषेधसिद्धेः विधिविपर्यासिद्धिरिति कथंचित्प्रत्यक्षत्वोपपत्तेः पुनरप्यसिद्धता। असति च शशशृंगादौ सति च विज्ञानादौ अप्रत्यक्षत्वस्य वृत्तेरनैकांतिकता। अथ विज्ञानादेः स्वसंवेद्यत्वात्, योगिप्रत्यक्षत्वाच्च हेतोरभाव इति चेदात्मनि कोऽपरितोषः। दृष्टांतोपि साध्यसाधनोभयधर्मविकलः पूर्वोक्तेन विधिनाऽप्रत्यक्षत्वस्य नास्तित्वस्य चासिद्धेः। किं च सर्वस्य वागर्थस्य विधिप्रतिषेधात्मकत्वात्, न हि किंचिद्वस्तु सर्वनिषेधगम्यमस्ति। अस्तित्वे? तदुभयात्मकं यथा कुरवका रक्तश्वेतव्युदासेपि नावर्णा भवंति नापि रक्ता एव श्वेता एव वा प्रतिषिद्धत्वात्। एवं वस्त्वपि परात्मना नास्तीति प्रतिषेधेपि स्वात्मनानास्तीत्यसिद्धं। तथा चोक्तं,—

अस्तित्वमुपलब्धिश्च कथंचिदसतः स्मृतेर्नास्तितानुपलब्धिश्च कथंचित्सत एव ते ॥ १ ॥

सर्वथैव सतो नेमौ धर्मौ सर्वात्मदोषतः सर्वथैवाऽसतो नेमौ वाचां गोचरताऽत्ययादिति ॥ २ ॥

नास्तित्वाप्रत्यक्षत्वाभ्यामपि रहितं तदवस्त्विति धर्म्यऽसिद्धिश्च। एवमन्येपि हेतव एकांतवादिभिरुपनीतादोषवत्तयोत्प्रेक्ष्याः। तदस्तित्वं च साध्यते—

ग्रहणविज्ञानासंभविफलदर्शनाद्गृहीतृसिद्धिः ॥ १८ ॥ यान्यमूनि ग्रहणानि पूर्वकृतकर्मनिर्वर्तितानि हि[1]कृतस्वभावसामर्थ्यजनितभेदानि रूपरसगंधस्पर्शशब्दग्राहकाणि चक्षूरसनघ्राणत्वक्श्रोत्राणि। एतानि च ज्ञानानि तत्संनिकर्षजनितानि तेष्वसंभाविफलमुपलभ्यते। किं पुनस्तदात्मस्वभावस्थानज्ञानं विषयसम्प्रतिपत्तिः। तदेतद्ग्रहणानां तावन्न संभवत्यचेतनत्वात्क्षणिकत्वाच्च। विज्ञानानां च न संभवत्येकार्थग्राहित्वादुत्पत्त्यनंतरनिरोधाच्च। दृश्यते चेदमकस्माच्च न भवतीति तत्प्रतिपत्तिपटुना ततो व्यतिरिक्तेन केनचिद्भवितव्यमिति गृहीतृसिद्धिः। किं च—

अस्मदात्मास्तित्वप्रत्ययस्य सर्वविकल्पेष्विष्टसिद्धेः ॥ १९ ॥ योयमस्माकमात्मास्तीति प्रत्ययः स संशयानध्यवसायविपर्ययसम्यक्प्रत्ययेषु यः कश्चित्स्यात् सर्वेषु विकल्पेष्विष्टं सिध्यति। न तावत्संशयः निर्णयात्मकत्वात् सत्यपि संशये तदालंबनात्मसिद्धेः। न हि अवस्तुविषयः संशयो भवति। नाप्यनध्यवसायो जात्यंधबधिररूपशब्दवत् अनादिसंप्रतिपत्तेः। स्याद्विपर्यय एवमप्यात्मास्तित्वसिद्धिः। पुरुषे स्थाणुप्रतिपत्तौ स्थाणुसिद्धिवत् स्यात्सम्यक्प्रत्ययः। अविवादमेतदात्मास्तित्वमिति सिद्धो नः पक्षः।

संतानादिति चेन्न तस्य संवृतिसत्त्वाद् द्रव्यसत्वे वा संज्ञाभेदमात्रं ॥ २० ॥ स्यान्मतं संतानो नाम कश्चिदर्थोस्ति एकोनेकक्षणवृत्तिः तदाश्रयं ग्रहणविज्ञानात्मस्वभावस्थानादिसंप्रतिपादनमिति। तन्न किं कारणं? तस्य संवृत्तिसत्त्वात्। स हि संतानः संवृतिः सन् तस्मिन्नसति कल्पितात्मनि कथं स्याद्विशेषप्रत्ययः। अथ द्रव्यसत्वमस्यावसीयते? संज्ञाभेदमात्रमात्मसंतान इति नार्थविप्रतिपत्तिः। यदुक्तं सत्यपि लक्षणत्वानुपपत्तिरनवस्थानादिति? कथंचिदवस्थानादुपयोगस्य लक्षणत्वोपपत्तिः। न हि सर्वथा विनाशोऽवस्थानं वोपयोगस्याभ्युपगम्यते, किं तर्हि कथंचिद्विनाशः कथंचिदवस्थानं च। पर्ययार्थादेशात्सतोर्थस्यानुपलब्धेर्विनाशो द्रव्यार्थादेशादवस्थानमिति असकृत्परीक्षितं। तस्मादुपयोगस्य लक्षणत्वमुपपद्यते।

तदुपरमाभावाच्च ॥ २१ ॥ कस्यचिदुपयोगस्योत्पादः कस्यचिद्विनाश इत्युपयोगपरंपरा नोपरमतीति तस्य लक्षणत्वमवसेयं।

---

१ प्रथक्।

सर्वथाविनाशे पुनरनुस्मरणाभावः ॥ २२ ॥ यदि सर्वथोपयोगस्य विनाशः स्यादनुस्मरणं न स्यात्। अनुस्मरणं हीदं स्वयमनुभूतस्यार्थस्य दृष्टं नाननुभूतस्य नान्येनानुभूतस्य तदभावात्तन्मूलः सर्वलोकसंव्यवहारो विनाशमुपगच्छेत्।

उपयोगसंबंधो लक्षणमिति चेन्नाऽन्यत्वे संबंधाभावात् ॥ २३ ॥ स्यान्मतमुपयोगो लक्षणमात्मनो नोपपद्यते कुतोऽन्यत्वात्। किं तर्हि ? तत्संबंधो लक्षणं। यथा देवदत्तस्य न दंडो लक्षणं किं तर्हि संबंधः, यदि हि दंडो लक्षणमसर्क्तोऽपि लक्षणं स्यादेवं च कृत्वोक्तं क्रियावद्गुणवत्समवायिकारणं द्रव्यलक्षणमिति ? तन्न किं कारणमन्यत्वे संबंधाभावाद् द्रव्याद् गुणोऽर्थांतरभूतो यदि स्यात्तस्य संबंधाभाव इत्युक्तं पुरस्तात्। तस्मादात्मभूत उपयोगो लक्षणमिति न कश्चिद्दोषः। य उक्त उपयोगस्तद्भेददर्शनार्थमाह-

स द्विविधोऽष्टचतुर्भेदः ॥ ९ ॥

कथं द्विविधः ?

साकारानाकारभेदाद् द्विविधः ॥ १ ॥ साकार उपयोगोऽनाकार उपयोगश्चेति द्विविधः। साकारं ज्ञानमनाकारं दर्शनं।

अभ्यर्हितत्वाज्ज्ञानग्रहणमादौ ॥ २ ॥ ज्ञानं ह्यभ्यर्हितमर्थानां विभावकत्वादर्शनमालोचनामात्रमतस्तस्मात्पूर्वकालभाविनोऽपि दर्शनाज्ज्ञानं प्राग्गृह्यते। कथं पुनर्ज्ञायते ज्ञानग्रहणमादौ क्रियत इति ?—

सख्याविशेषनिर्देशात्तन्निश्चयः ॥ ३ ॥ यतः संख्याविशेषनिर्देशः क्रियतेऽष्टभेदश्चतुर्भेद इति ततस्तन्निश्चयो वेदितव्यः। ननु च चतुःशब्दस्य पूर्वनिपातेन भवितव्यं "संख्याया अल्पीयस्याः"—इति वचनात् यथा चतुर्दशेति ? नैषदोषः उक्तमेतदभ्यर्हितत्वात्पूर्वनिपात इति। तत्र ज्ञानोपयोगोऽष्टविधो मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मनःपर्ययज्ञानं केवलज्ञानं मत्यज्ञानं श्रुताऽज्ञानं विभंगज्ञानं चेति। दर्शनोपयोगश्चतुर्विधः चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं केवलदर्शनं चेति। एषां च लक्षणादीनि व्याख्यातानि। अवग्रहाज्ज्ञान्यद्दर्शनमिति चेद्व्याख्यातमन्यत्वं। छद्मस्थेषु तयोः क्रमेण वृत्तिर्निरावरणेषु युगपत्। यथोक्तेनानेनाहितपरिणामेन सर्वात्मसाधारणेनोपलक्षि॥ उपयोगिन, ते द्विविधाः-

संसारिणो मुक्ताश्च ॥ १० ॥

आत्मोपचितकर्मवशादात्मनो भवांतरावाप्तिः संसारः ॥ १ ॥ आत्मोपचितं कर्माष्टविधं प्रकृतिस्थित्यनुभागप्रदेशभेदाभिन्नं तद्वशादात्मनो भवांतरावाप्तिः संसार इत्युच्यते। द्विरात्मग्रहणं किमर्थं ? आत्मैव कर्मणः कर्ता तत्फलस्य चाऽऽत्मैव भोक्तेत्येतस्य प्रदर्शनार्थं। अन्ये तु त्रैगुण्यं कर्तृ, परमात्मा भोक्तेति मन्यंते तदयुक्तमचेतनस्य पुण्यपापविषयकर्तृतानुपपत्तेर्घटादिवत्। परकृतफलभोगे वा निर्मोक्षप्रसंगः स्यात् कृतप्रणाशश्चेति तस्माद्यः कर्ता स एव भोक्तेति युक्तं। संसारः पंचविधो द्रव्यतः क्षेत्रतः कालतो भावतो भवतश्चेति।

स येषामस्ति ते संसारिणः ॥२॥ निरस्तद्रव्यभावबंधा मुक्ताः ॥३॥ बंधो द्विविधो द्रव्यबंधो भावबंधश्चेति। तत्र द्रव्यबंधः कर्मनोकर्मपरिणतः पुद्गलद्रव्यविषयः। तत्कृतः क्रोधादिपरिणामवशीकृतो भावबंधः स उभयोऽपि निरस्तो यैः ते मुक्ताः।

द्वंद्वनिर्देशो लघुत्वादिति चेन्नाऽर्थांतरप्रतीतेः ॥४॥ स्यान्मतं द्वंद्वनिर्देशोऽत्र युक्तः, कुतो लघुत्वात् द्वंद्वे हि सति उक्तार्थत्वाच्चशब्दाप्रयोगे लाघवं भवति इति। तन्न किं कारणमर्थांतरप्रतीतेः संसारिणश्च मुक्ताश्चेति। द्वंद्वे सति अल्पाक्षरत्वादभ्यर्हितत्वाच्च मुक्तशब्दस्य पूर्वनिपाते सति मुक्तसंसारिण इति प्राप्नोति। तथा च सत्यर्थांतरं प्रतीयेत मुक्तः संसारो येन भावेन मुक्तसंसारास्तथा मुक्तसंसारिण इति तथा सति मुक्तानामेवोपयोगत्वमुक्तं स्यान्न संसारिणामतो वाक्यमेव क्रियते।

समुच्चयाभिव्यक्त्यर्थं च शब्दोनर्थक इति चेन्नोपयोगस्य गुणभावप्रदर्शनार्थत्वात् ॥५॥ स्यान्मतं च शब्दोनर्थकः कुतः ? अर्थभेदात्समुच्चयसिद्धेः। भिन्ना हि संसारिणो मुक्ताश्च ततो विशेषणविशेष्यत्वानुपपत्तेः समुच्चयः सिद्धः यथा पृथिव्यप्तेजोवायुरिति। तन्न किं कारणमुपयोगस्य गुणभावप्रदर्शनार्थत्वात्। नायं च शब्दः समुच्चये किं तर्ह्यन्वाचये। तत्र ह्येकः प्रधानभूत इतरो गुणभूतः। यथा भैक्षं चर देवदत्तं चानयेति प्रधानशिष्टं भैक्ष्यचरणं, देवदत्तानयनमप्रधानशिष्टं। तथा संसारिणः प्राधान्येनोपयोगिनो मुक्ता गुणभावेनेत्येतस्य प्रदर्शनार्थः। कथं संसारिषु मुख्य उपयोगः कथं वा मुक्तेषु गौणः ?—

परिणामांतरसंक्रमाभावाद् ध्यानवत् ॥ ६ ॥ यथैकाग्रचिंतानिरोधो ध्यानमिति छद्मस्थे ध्यानशब्दार्थो मुख्यश्चिंताविक्षेपवतः तन्निरोधोपपत्तेः। तदभावात्केवलिन्युपचरितः फलदर्शनात्। तथोपयोगशब्दार्थोपि संसारिषु मुख्यः परिणामांतरसंक्रमात्। मुक्तेषु तदभावाद्गौणः कल्प्यते उपलब्धिसामान्यात्।

संसारिग्रहणमादौ बहुविकल्पत्वात्तत्पूर्वकत्वाच्च स्वसंवेद्यत्वाच्च ॥७॥ संसारिग्रहणमादौ क्रियते बहुविकल्पत्वात्। बहवो हि संसारिणां विकल्पा गत्यादयः। किं च तत्पूर्वकत्वात्। संसारिपूर्वका हि मुक्ताः, पूर्वं संसारिण इति। स्वसंवेद्यत्वाच्च स्वसंवेद्या हि संसारिणो गत्यादिपरिणामानामनुभूतत्वात्। मुक्ताः पुनरत्यंतपरोक्षास्तदनुभवस्याप्राप्तत्वात्। तत्र य एते शुभाशुभकर्मफलानुभवनसंबंधवशीकृतस्वभावा अप्रच्युतसंसरणाः पूर्वकृतनामकर्मनिमित्तजनितविशेषाः प्राणिनस्ते खलु—

समनस्काऽमनस्काः ॥ ११ ॥

मनःसंनिधानासंनिधानापेक्षया द्विविधाः संसारिणः। मनो द्विविधं द्रव्यमनो भावमनश्चेति। तत्र पुद्गलविपाकिकर्मोदयापेक्षं द्रव्यमनो वीर्यांतरायनोइंद्रियावरणक्षयोपशमापेक्षा आत्मनो विशुद्धिर्भावमनः। तेन मनसा सह वर्तंत इति समनस्काः। न विद्यते मनो येषां तेऽमनस्का इति द्विविधाः संसारिणो भवंति। अत्राह—

द्विविधजीवप्रकरणाद्यथासंख्यप्रसंगः ॥ १ ॥ द्विविधा हि जीवाः प्रकृताः संसारिणो मुक्ताश्च। तत्र संसारिणः समनस्काः मुक्ताश्चाऽमनस्का इति यथासंख्यं प्राप्नोति।

इष्टमिति चेन्न सर्वसंसारिणां समनस्कत्वप्रसंगात् ॥ २ ॥ स्यादेतदिष्टमेवेदं संसारिणः समनस्का मुक्ताश्चामनस्का इति ? तन्न किं कारणं ? सर्वसंसारिणां समनस्कत्वप्रसंगात्। एकद्वित्रिचतुरिंद्रियाणां पंचेंद्रियेषु च केषांचिन्मनोविषयविशेषव्यवहाराभावात् अमनस्कत्वेष्टं तद्व्याघातोऽतः स्यादत्रोच्यते—

पृथग्योगप्रक्रमे संसारिसंप्रत्ययः ॥ ३ ॥ यदिदं पृथग्योगकरणं तेन ज्ञायते संसारिणोत्र संबध्यंत इति। इतरथाहि एक एव योगः क्रियते संसारिणो मुक्ताश्च 'समनस्कामनस्का' इति।

उपरिष्टसंसारिवचनप्रत्यासत्तेश्च ॥ ४ ॥ उपरिष्टमस्ति संसारिवचनं तस्य प्रत्यासत्तेरभिसंबंधाच्च संसारिसंप्रत्ययो भवति ॥

अत्राह तदभिसंबंधे यथासंख्यप्रसंगः ॥ ५ ॥ यदि तदभिसंबंधः क्रियते तत्तत्र त्रसस्थावरग्रहणमस्ति तेन यथासंख्यं प्राप्नोति समनस्कास्त्रसा अमनस्काः स्थावरा इति।

इष्टमेवेति चेन्न सर्वत्रसानां समनस्कत्वप्रसंगात् ॥ ६ ॥ स्यादेतदिष्टमेवेदं त्रसाः समनस्काः स्थावरा अमनस्का इति ? तन्न किं कारणं सर्वत्रसानां समनस्कत्वप्रसंगात्। द्वित्रिचतुरिंद्रियाणामसंज्ञिपंचेंद्रियाणामपि समनस्कत्वं प्रसज्येत। अनिष्टं चैतदत्रोच्यते—नानभिसंबंधात् संसारिग्रहणमात्रमत्राभिसंबध्यते न त्रसस्थावरग्रहणं। इच्छावशेन हि संबंधो भवति एकयोगाकरणात्। यदि त्रसस्थावरग्रहणेनापि संबंध इष्टः स्यादेक एव योगः क्रियते समनस्कामनस्काः संसारिणस्त्रसस्थावरा इति नत्वेवं कृतः तेन ज्ञायते त्रसस्थावरग्रहणं न संबध्यत इति। अथवैकयोगाकरणान्मन्यामहेऽतीतस्य संसारिमुक्तग्रहणस्य वक्ष्यमाणस्य च त्रसस्थावरग्रहणस्य "समनस्कामनस्काः" ग्रहणेनाभिसंबंधो न भवतीति।

इतरथान्यतरत्र संसारिग्रहणे सतीष्टार्थत्वादुपरिसंसारिग्रहणमनर्थकं ॥ ७ ॥ इतरेण प्रकारेणेतरथा कथं ? यदि संसारिमुक्तग्रहणेन च त्रसस्थावरग्रहणेन चास्याभिसंबंधः स्यादेक एव योगः क्रियेत संसारिमुक्ताः समनस्कामनस्कास्त्रसस्थावराश्चेति। तथा सत्यन्यतरत्र संसारिग्रहणं कर्तव्यं स्यात् क्वान्यतरत्र ? समनस्कामनस्का सूत्रस्यादावेत वैवं सतीष्टार्थस्य सिद्धत्वात्संसारिणः त्रसस्थावरा इत्यत्र संसारिग्रहणमनर्थकं स्यात्।

आदौ समनस्कग्रहणमभ्यर्हितत्वात् ॥ ८ ॥ आदौ समनस्कग्रहणं क्रियते कुतोऽभ्यर्हितत्वात्। कथमभ्यर्हितत्वं ? तत्र हि समग्राणि करणानीति। य एते स्वकृतकर्मफलापेक्षपरिपूर्णापरिपूर्णकरणग्रामाहितद्वैविध्यविशिष्टाः कार्मणशरीरप्रणालिकापादितनियतावस्थाविशेषास्ते खलु—

संसारिणस्त्रसस्थावराः ॥ १२ ॥

अत्राह के त्रसाः के स्थावरा इत्युच्यते—

त्रसनामकर्मोदयापादितवृत्तयस्त्रसाः ॥ १ ॥ त्रसनामकर्मणो जीवविपाकिन उदयापादितवृत्तिविशेषाः, त्रसा इति व्यपदिश्यंते।

त्रसेरुद्वेजनक्रियस्य त्रसा इति चेन्न गर्भादिषु तदभावादत्रसत्वप्रसंगात् ॥ २ ॥ स्यान्मतं त्रसेरुद्वेजनक्रियस्य त्रस्यंतीति त्रसा इति ? तन्न किं कारणं गर्भादिषु तदभावादत्रसत्वप्रसंगात्। गर्भाडजमूर्च्छितसुप्तादीनां त्रसानां बाह्यभयनिमित्तोपनिपाते सति चलनाभावादत्रसत्वं स्यात्। कथं तर्ह्यस्य निष्पत्तिस्त्रस्यंतीति त्रसा इति ? व्युत्पत्तिमात्रमेव नार्थः प्राधान्येनाश्रियते गोशब्दप्रवृत्तिवत्।

स्थावरनामकर्मोदयोपजनितविशेषाः स्थावराः ॥ ३ ॥ स्थावरनामकर्मणो जीवविपाकिन उदयेनोपजनितविशेषाः स्थावरा इत्याख्यायंते।

स्थानशीलाः स्थावरा इति चेन्न वाय्वादीनामस्थावरत्वप्रसंगात् ॥ ४ ॥ स्यादेतत्तिष्ठंतीत्येवं शीलाः स्थावरा इति ? तन्न किं कारणं वाय्वादीनामस्थावरत्वप्रसंगात् वायुतेजोम्भसा हि देशांतरप्राप्तिदर्शनादस्थावरत्वं स्यात्। कथं तर्ह्यस्य निष्पत्तिः ? स्थावरा इत्यत्र रूढिविशेषवललाभात् क्वचिदेव वर्तते।

इष्टमेवेति चेन्न समयार्थानवबोधात् ॥ ५ ॥ अथ मतमेतदिष्टमेव वाय्वादीनामस्थावरत्वमिति ? तन्न किं कारणं समयार्थानवबोधात्। एवं हि समयोऽवस्थितः सत्प्ररूपणायां कायानुवादे त्रसानां द्वींद्रियादारभ्य आ अयोगिकेवलिन इति। तस्मान्न चलनाचलनापेक्षं त्रसस्थावरत्वं कर्मोदयापेक्षमेवेति स्थितं।

त्रसग्रहणमादावल्पाच्तरत्वादभ्यर्हितत्वाच्च ॥ ६ ॥ त्रसग्रहणमादौ क्रियते कुतः ? अल्पाच्तरत्वादभ्यर्हितत्वाच्च सर्वोपयोगसंभवादभ्यर्हितत्वं। सामान्यविशेषसंज्ञाहितभेदमात्रविज्ञाने सति विशेषेणाऽनिर्ज्ञातानां त्रसस्थावराणां निर्ज्ञाने कर्तव्ये एकेंद्रियाणामतिबहुवक्तव्याभावाद्विभज्यानुपूर्वीस्थावरभेदप्रतिपत्त्यर्थमाह—

पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः ॥ १३ ॥

नामकर्मोदयनिमित्ताः पृथिव्यादयः संज्ञाः ॥ १ ॥ स्थावरनामकर्मभेदाः पृथिवीकायादयः संति तदुदयनिमित्ता जीवेषु पृथिव्यादयः संज्ञा वेदितव्याः। प्रथनादिप्रकृतिनिष्पन्ना अपि रूढिवशात्प्रथनाद्यनपेक्षा वर्तंते। एषां पृथिव्यादीनामार्षे चातुर्विध्यमुक्तं। प्रत्येकं तत्कथमितिचेदुच्यते—पृथिवी पृथिवीकायः पृथिवीकायिकः पृथिवीजीवइत्यादि। तत्राऽचेतना वैश्रसिकपरिणामनिर्वृत्ता काठिन्यादिगुणात्मिका पृथिवी। अचेतनत्वादसत्यपि पृथिवीकायिकनामकर्मोदये प्रथनक्रियोपलक्षितैवेयं। अथवा पृथिवीसामान्यं; उत्तरत्रयेऽपि संभवात्। कायः शरीरं पृथिवीकायिकजीवपरित्यक्तः पृथिवीकायः, मृतमनुष्यादिकायवत्। पृथिवी कायो-

ऽस्यास्तीति पृथिवीकायिकः तत्कायसंबंधवशीकृत आत्मा समवाप्तपृथिवीकायिकनामोदयः कार्मणकाययोगस्थः, यो न तावत्पृथिवीं कायत्वेन गृह्णाति स पृथिवीजीवः । एवमापः, अप्कायः, अप्कायिकः, अप्जीवः । तेजः, तेजस्कायः, तेजस्कायिकः, तेजोजीवः । वायुर्वायुकायो वायुकायिको वायुजीवः । वनस्पतिर्वनस्पतिकायो वनस्पतिकायिको वनस्पतिजीव इति योज्यं ।

सुखग्रहणहेतुत्वात्स्थूलमूर्तित्वादुपकारभूयस्त्वाच्चादौ पृथिवीग्रहणं ॥ २ ॥ पृथिव्यां हि सत्यामपां कुंभादिभिरग्नेश्च शरावादिभिर्वायोश्च चर्मघटादिभिः सुखेन ग्रहणं क्रियते । स्थूलमूर्तिश्च पृथिवी विमानभवनप्रस्तारादिभावपरिणामात् । स्नपनाद्युपकारादपां, पाकशोषप्रकाशनाद्युपकाराच्चाग्नेः, खेदस्वेदापनोदोपकाराच्च वायोर्भूयानुपकारः पृथिव्या अशनाच्छादनवसनादिभावो वनस्पतेः । अबादीनां यश्चोक्त उपकारः प्रतिनियत इति स सत्यां पृथिव्यां संभवति, इतरथा हि कावस्थितानां स उपकारः स्यादतः पृथिव्या ग्रहणमादौ क्रियते ।

तदनंतरमपां वचनं भूमितेजसोर्विरोधादाधेयत्वाच्च ॥ ३ ॥ तदनंतरमपां वचनं क्रियते कुतः ? भूमितेजसोर्विरोधादाधेयत्वाच्च । भूमेर्हि तेजो विरोधि, विनाशकत्वादतोऽद्भिर्व्यवधानं क्रियते । भूरपामाधारः आधेया आप इति च ।

ततस्तेजोग्रहणं तत्परिपाकहेतुत्वात् ॥ ४ ॥ पृथिव्या अपां च परिपाकहेतुस्तेजस्तदनंतरं तस्य ग्रहणं क्रियते ।

तेजोऽनंतरं वायुग्रहणं तदुपकारकत्वात् ॥ ५ ॥ वायुर्हि तिर्यक्पचनकर्मा तेजसः प्रेरणेनोपकरोतीति तदनंतरं गृह्यते ।

अंते वनस्पतिग्रहणं सर्वेषां तत्प्रादुर्भावे निमित्तत्वादनंतगुणत्वाच्च ॥ ६ ॥ वनस्पतिप्रादुर्भावे हि पृथिव्यादयः सर्वे निमित्ततामुपव्रजंति । सर्वेभ्यो तेषां वनस्पतिकायिका अनंतगुणास्ततोंते वनस्पतिग्रहणं क्रियते । एते पंचविधाः प्राणिनः स्थावराः । कति पुनरेषां प्राणाः ? चत्वारः, स्पर्शनेंद्रियप्राणः कायबलप्राण उच्छ्वासनिश्वासप्राण आयुःप्राणश्चेति । अथ के त्रसा ? इत्यत्रोच्यते—

द्वींद्रियादयस्त्रसाः ॥ १४ ॥

आदिशब्दस्यानेकार्थत्वे विवक्षातो व्यवस्था ॥ १ ॥ प्रकारसामीप्यादिवचनत्वात्तत्र विवक्षात इह व्यवस्थायां गृह्यते । आगमे हि ते व्यवस्थिता द्वींद्रियस्त्रींद्रियश्चतुरिंद्रियः पंचेंद्रियश्चेति । कोऽस्य विग्रहः ?, द्वे इंद्रिये यस्य सोऽयं द्वींद्रियः स आदिर्येषां ते द्वींद्रियादय इति । यद्येवं—

अन्यपदार्थनिर्देशाद्द्वींद्रियाग्रहणं ॥ २ ॥ अन्यपदार्थोऽत्र प्राधान्येनाश्रितः, द्वींद्रियग्रहणमुपलक्षणं अतस्त्रसग्रहणे द्वींद्रियस्य ग्रहणं न प्राप्नोति यथा पर्वतादीनि क्षेत्राणीति न पर्वतः क्षेत्रग्रहणेन गृह्यते ?

न वा तद्गुणसंविज्ञानात् ॥ ३ ॥ न वैष दोषः, किं कारणं ? तद्गुणसंविज्ञानात् यथा शुक्लवाससमानयेति तद्गुणमानीयते तथेहापि द्वींद्रियस्याप्यंतर्भावो भवति ।

अवयवेन विग्रहे सति समुदायस्य वृत्त्यर्थत्वाद्वा ॥ ४ ॥ अथ वाऽवयवेन विग्रहः समुदायो वृत्त्यर्थ इति द्वींद्रियस्योपलक्षणस्यापि त्रसत्वेंतर्भावः, यथा सर्वादिः सर्वनाम इति । कथं तर्हि पर्वतादीनि क्षेत्राणीति पर्वतस्य बहिर्भावः, पर्वतस्य क्षेत्रत्वसंभवाभावाद् व्युदासः । ते, एते चतुर्विधाः प्राणिनस्त्रसाः । कति पुनरेषां प्राणाः ?– द्वींद्रियस्य तावत्षट्प्राणाः, स्पर्शनरसनेंद्रियप्राणौ, वाक्कायबलप्राणौ उच्छ्वासनिश्वासप्राणः आयुःप्राणश्चेति । त्रींद्रियस्य सप्त त एव प्राणाः घ्राणाधिकाः । चतुरिंद्रियस्याष्टौ, त एव चक्षुरधिकाः । पंचेंद्रियस्य तिरश्चोऽसंज्ञिनो नव प्राणास्त एव श्रोत्राधिकाः । संज्ञिपंचेंद्रियतिर्यङ्मनुष्यदेवनारकाणां दश प्राणा मनोबलाधिकास्त एव । आदिशब्देन निर्दिष्टानामिंद्रियाणामनिर्ज्ञातसंख्यानामियत्तावधारणार्थमाह—

पंचेंद्रियाणि ॥ १५ ॥

अथवा स्वां प्रक्रियां, आचिख्यासवः केचित् पंच षडेकादश चेंद्रियाणि इत्यध्यवस्यंति तत्रानिष्टनिवृत्त्यर्थं नियमयन्नाह पंचेंद्रियाणि नाधिकानीति—

इंद्रस्यात्मनो लिंगमिंद्रियं ॥ १ ॥ उपभोक्तुरात्मनोऽनिवृत्तकर्मबंधस्यापि परमेश्वरत्वशक्तियोगादिंद्रव्यपदेशमर्हतः स्वयमर्थान् गृहीतुमसमर्थस्योपयोगोपकरणं लिंगमिंद्रियमित्युच्यते।

इंद्रेण कर्मणा सृष्टमिति वा ॥ २ ॥ अथवा स्वकृतकर्मविपाकवशादात्मा देवेंद्रादिषु तिर्यगादिषु चेष्टानिष्टमनुभवतीति कर्मैव तत्रेंद्रः, तेन सृष्टमिंद्रियमित्याख्यायते। तद्भेदाः स्पर्शनादयः पंच वक्ष्यमाणाः।

मनोपींद्रियमिति चेन्नानवस्थानात् ॥ ३ ॥ स्यान्मतं मनोपींद्रियमित्युपसंख्येयं, कर्ममलीमसस्यात्मनोऽसहायस्य स्वयमेवार्थचिंतनं प्रत्यसहिष्णोर्बलाधानं भवति मनः, कर्मकृतं चेति ? तन्न। किं कारणं ? अनवस्थानात्। यथा चक्षुरादीनि प्रतिनियतदेशावस्थानानि न तथा मन इत्यनींद्रियं तत्।

इंद्रियपरिणामाच्च प्राक् तद्व्यापारात् ॥ ४ ॥ चक्षुरादीनां रूपादिविषयोपयोगपरिणामात्प्राक् मनसो व्यापारः। कथं ? शुक्लादिरूपं दिदृक्षुः प्रथमं मनसोपयोगं करोति। एवंविधं रूपं पश्यामि रसमास्वादयामि इति ततस्तद्बलाधानीकृत्य चक्षुरादीनि विषयेषु व्याप्रियंते ततश्चास्याऽनिंद्रियत्वं।

कर्मेंद्रियोपसंख्यानमिति चेन्नोपयोगप्रकरणात् ॥ ५ ॥ स्यादेतत्कर्मेंद्रियाणि वागादीनि वचनादिक्रियानिमित्तानि संति तेषामिहोपसंख्यानं कर्तव्यमिति ? तन्न किं कारणमुपयोगप्रकरणादुपयोगोऽत्र प्रकृतः, तदुपकरणानीहेंद्रियाणि गृह्यंते, तेन कर्मेंद्रियाणामप्रसंगः।

अनिंद्रियत्वं वा तेषामनवस्थानात् ॥ ६ ॥ न वागादीनामिंद्रियत्वमस्ति उपयोगसाधनेषु हींद्रियव्यपदेशो युक्तो न क्रियासाधनेषु। यदि च क्रियासाधनेष्वपि स्यादनवस्था प्रसज्येत सर्वाणि ह्यंगोपांगादीनि मूर्धादीनि क्रियासाधनानीति। इष्टानिष्टविषयोपलब्ध्यर्थानि भोक्तुरात्मनो यान्यमूनींद्रियाणि तेषामुक्तसामर्थ्यविशेषादुपनियतभेदानां प्रत्येकं भेदप्रतिपत्त्यर्थमाह—

द्विविधानि ॥ १६ ॥

विधशब्दस्य प्रकारवाचिनो ग्रहणं ॥ १ ॥ अयं विधशब्दः प्रकारवाची गृह्यते विधयुक्तगतप्रकाराः समानार्था इति। द्वौ विधौ येषां तानि द्विविधानि द्विप्रकाराणीत्यर्थः को च द्वौ प्रकारौ ? द्रव्येंद्रियं भावेंद्रियमिति। तत्र द्रव्येंद्रियस्वरूपनिर्ज्ञानार्थमाह—

निर्वृत्युपकरणे द्रव्येंद्रियं ॥ १७ ॥

निर्वर्त्यत इति निर्वृत्तिः ॥ १ ॥ कर्मणा या निर्वर्त्यत निष्पाद्यते सा निर्वृत्तिरित्युपदिश्यते। सा—

द्वेधा बाह्याभ्यंतरभेदात् ॥ २ ॥ तत्र विशुद्धात्मप्रदेशवृत्तिराभ्यंतरा ॥ ३ ॥ उत्सेधांगुलस्याऽसंख्येयभागप्रमितानां विशुद्धानामात्मप्रदेशानां प्रतिनियतचक्षुरादींद्रियसंस्थानमानावमानावस्थितानां वृत्तिराभ्यंतरा निर्वृत्तिः।

तत्र नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयो बाह्या ॥ ४ ॥ तेष्वात्मप्रदेशेष्विंद्रियव्यपदेशभाक् यः प्रतिनियतसंस्थानो नामकर्मोदयापादितावस्थाविशेषः पुद्गलप्रचयः, स बाह्या निर्वृत्तिः।

उपक्रियतेऽनेनेत्युपकरणं ॥ ५ ॥ येन निर्वृत्तेरुपकारः क्रियते तदुपकरणं—

तद्द्विविधं पूर्ववत् ॥ ६ ॥ तदुपकरणं द्विविधं पूर्ववद्बाह्याभ्यंतरभेदात्।

तत्राभ्यंतरं शुक्लकृष्णमंडलं बाह्यमक्षिपत्रपक्ष्मद्वयादि ॥ ७ ॥ एवं शेषेष्वपींद्रियेषु ज्ञेयं। भावेंद्रियमुच्यते—

लब्ध्युपयोगौ भावेंद्रियं ॥ १८ ॥

लब्धिरिति ? कोयं शब्द: ?, लाभो लब्धि: । यद्येवं त्वित्वादङ् प्राप्नोति ? अनुबंधकृतमनित्यमिति न भवति यथा वर्णानुपलब्धौ वा तदर्थगतेरित्येवमादिषु । अथवा स्त्रियां क्तिः लभादिभ्यश्चेति क्तिर्भवति, इष्टाश्च लभादय इति । अथ कोऽस्यार्थ: ?

इंद्रियनिर्वृत्तिहेतुः क्षयोपशमविशेषो लब्धिः ॥ १ ॥ यत्संनिधानादात्मा द्रव्येंद्रियनिर्वृत्तिं प्रति व्याप्रियते स ज्ञानावरणक्षयोपशमविशेषो लब्धिरिति विज्ञायते ।

तन्निमित्तः परिणामविशेष उपयोगः ॥ २ ॥ तदुक्तं निमित्तं प्रतीत्य उत्पद्यमान आत्मनः परिणाम उपयोग इत्युपदिश्यते तदुभयं भावेंद्रियमिति ।

उपयोगस्य फलत्वादिंद्रियव्यपदेशानुपपत्तिरिति चेन्न कारणधर्मस्य कार्यानुवृत्तेः ॥३॥ स्यान्मतमिंद्रियफलमुपयोगः स कथमिहेंद्रियव्यपदेशमापद्यत इति ? तन्न किं कारणं कारणधर्मस्य कार्यानुवृत्तेः । कार्यं हि लोके कारणमनुवर्तमानं दृष्टं यथा घटाकारपरिणतं विज्ञानं घट इति । तथेंद्रियनिमित्त उपयोग इंद्रियमिति व्यपदिश्यते ।

शब्दार्थसंभवाच्च ॥ ४ ॥ यः शब्दार्थ इंद्रस्य लिंगमिंद्रेण सृष्टमिति वा स उपयोगे प्राधान्येन विद्यत इतींद्रियव्यपदेशो युक्तः । उक्तानां पंचानामिंद्रियाणां संज्ञानुपूर्व्यविशेषप्रतिपादनार्थमाह—

स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि ॥ १९ ॥

स्पर्शनादीनां करणसाधनत्वं पारतंत्र्यात् कर्तृसाधनत्वं च स्वातंत्र्याद्बहुलवचनात् ॥ १ ॥ इमानि स्पर्शनादीनि करणसाधनानि । कुतः ? पारतंत्र्यात् इंद्रियाणां हि लोके पारतंत्र्येण विवक्षा विद्यते, आत्मनः स्वातंत्र्यविवक्षायां यथानेनाऽक्ष्णा सुष्ठु पश्यामि, अनेन कर्णेन सुष्ठु शृणोमीति । ततो वीर्यांतरायप्रतिनियतेंद्रियावरणक्षयोपशमांगोपांगनामलाभावष्टंभात् स्पृशत्यनेनात्मेति स्पर्शनं, रसयत्यनेनात्मेति रसनं, जिघ्रत्यनेनात्मेति घ्राणं, चष्टेरनेकार्थत्वात्तद्दर्शनार्थविवक्षायां चष्टेऽर्थान् पश्यत्यनेनात्मेति चक्षुः शृणोत्यनेनात्मेति श्रोत्रं । कर्तृसाधनत्वं च भवति स्वातंत्र्यविवक्षायां, इंद्रियाणां हि लोके स्वातंत्र्येण विवक्षा, यथेदं मेऽक्षि सुष्ठु पश्यति, अयं मे कर्णः सुष्ठु शृणोति इति । तेन पूर्वोक्तहेतुसन्निधाने सति स्पृशत्यात्मैवेति स्पर्शनं ? कथं ? कर्तरि युट् बहुलवचनात् । रसयतीति रसनं, जिघ्रतीति घ्राणं, चष्टे इति चक्षुः, शृणोतीति श्रोत्रमिति । अतेंद्रियाणीति केषांचित्पाठः नासौ युक्तः । कुतः ?

अधिकृतत्वादिंद्रियाणीत्यवचनं ॥ २ ॥ पंचेंद्रियाणीत्यत इंद्रियग्रहणमनुवर्तते तेनेहेंद्रियाणीति वचनमनर्थकं ।

स्पर्शनग्रहणमादौ शरीरव्यापित्वात् ॥ ३ ॥ यतो वितत्य शरीरमवतिष्ठते स्पर्शनमतोस्य ग्रहणमादौ क्रियते "वनस्पत्यंतानामेकमिति" । तत्र स्पर्शनस्य ग्रहणार्थमादौ वचनं ।

सर्वसंसारिषूपलब्धेश्च ॥ ४ ॥ सर्वेषु संसारिषु स्पर्शनमस्त्यतो नानाजीवापेक्षया व्यापित्वाच्चादौ ग्रहणं क्रियते ।

ततो रसनघ्राणचक्षुषां क्रमवचनमुत्तरोत्तराल्पत्वात् ॥ ५ ॥ ततः पश्चाद्रसनादीनां त्रयाणां क्रमवचनं क्रियते, कुतः, उत्तरोत्तराल्पत्वात्, तद्यथा— सर्वतः स्तोकाश्चक्षुःप्रदेशाः । श्रोत्रेंद्रियप्रदेशाः संख्येयगुणाः । घ्राणेंद्रिये विशेषाधिकाः जिह्वायामसंख्येयगुणाः, स्पर्शनेऽनंतगुणा इति । यद्येवं चक्षुषोंते ग्रहणं कर्तव्यं सर्वेभ्योऽल्पीयस्त्वात् ? सत्यमेवमेतत् तथापि—

श्रोत्रस्यांते वचनं बहूपकारित्वात् ॥ ६ ॥ यतः श्रोत्रबलाधानादुपदेशं श्रुत्वा हिताहितप्राप्तिपरिहारार्थमा[१]द्रियंतेऽतः श्रोत्रं बहूपकारीति, अंते गृह्यते ।

---

१ जना इति शेषः ।

रसनमपि वक्तृत्वेनेति चेन्नाभ्युपगमात् ॥७॥ स्यादेतद्रसनमपि बहूपकारि, कथं ? वक्तृत्वेन यतो रसनमभ्युदयनिःश्रेयसार्थोच्चारणाऽध्ययनादिषु प्रमाणमतो रसनमेवाते वाच्यमिति ? तन्न किं कारणं ? अभ्युपगमात् । अभ्युपगम्य श्रोत्रस्य बहूपकारित्वं रसनस्यापि बहूपकारित्वं वर्णयता भवता तदभ्युगतमिति अवसितोभिमतो वादः । अनभ्युपगमे वा ? प्रसंगनिवृत्तिः, रसनमपि बहूपकारीति । किं च—

श्रोत्रप्रणालिकापादितोपदेशात् ॥ ८ ॥ श्रो[1]त्रप्रणालिकयोपदेशमुपश्रुत्य रसनं वक्तृत्वं प्रति व्याप्रियते श्रोत्रमेव बहूपकारि ।

सर्वज्ञे तदभाव इति चेन्नेंद्रियाधिकारात् ॥ ९ ॥ स्यान्मतं न हि सर्वज्ञः श्रोत्रेंद्रियबलाधानात् परत उपश्रुत्य वक्तृत्वमास्कंदति किं तु सकलज्ञानावरणसंक्षयाविर्भूतातींद्रियकेवलज्ञानः रसनोष्ठंपभमात्रादेव वक्तृत्वेन परिणतः सकलान् श्रुतिविषयानर्थानुपदिश्यति अतो रसनमेव बहूपकारीति ? तन्न किं कारणमिंद्रियाधिकारोयमतो येष्विंद्रियकृतो हिताहितोपदेशः साकल्येनास्ति तान्प्रत्येतदुक्तं, न सर्वज्ञं प्रतीति नास्ति दोषः ।

एकैकवृद्धिक्रमज्ञापनार्थं च स्पर्शनादिवचनं ॥ १० ॥ कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानीति वक्ष्यते तत्र वृद्धिक्रमज्ञापनार्थं च स्पर्शनादीनामानुपूर्व्यं वेदितव्यं ।

एषां च स्वतस्तद्वतश्चैकत्वपृथक्त्वं प्रत्यनेकांतः ॥ ११ ॥ एषां च स्पर्शनादीनामिंद्रियाणां स्वतस्तद्वतश्चैकत्वपृथक्त्वं प्रत्यनेकांतो वेदितव्यः । स्यादेकत्वं स्यात्पृथक्त्वमित्यादि । तद्यथा स्वतस्तावज्ज्ञानावरणक्षयोपशमशक्तेरभेदविवक्षायां स्पर्शनादीनां स्यादेकत्वं, समुदायव्यतिरेकाभावात् समुदायिनां समुदायस्यैकत्वादवयवानामप्येकत्वमिति वा स्यादेकत्वं । प्रतिनियतक्षयोपशमलब्धिविशेषापेक्षया स्यान्नानात्वं, अवयवभेदविवक्षायां वा स्यान्नानात्वं । इंद्रियबुद्ध्यभिधानानुवृत्तिव्यावर्तनार्पणाभेदाद्वा स्यादेकत्वं स्यात्पृथक्त्वं च । तद्वतोपि चैतन्यापरित्यागेनोभयपरिणामकारणापेक्षस्येंद्रियपर्यायात्मलाभे सति निष्टप्तायःपिंडवत् तथा परिणामात्तद्व्यतिरेकेणेंद्रियस्यानुपलब्धेरिति स्यादिंद्रियेंद्रिवतोरेकत्वं । इतरथैकांतान्यत्वेऽनिंद्रिय आत्मा स्यात् घटवत् तथान्यतमेंद्रियनिवृत्तौ तद्वतोवस्थानात् स्यान्नानात्वं । पर्यायिपर्यायभेदाच्च स्यान्नानात्वं । संज्ञाभेदाभेदविवक्षोपपत्तेश्च स्यादेकत्वं स्यान्नानात्वं वाऽत्रसेयं पूर्ववदुत्तरे च भंगा नेतव्याः । तेषामिंद्रियाणां विषयप्रदर्शनार्थमाह—

स्पर्शरसगंधवर्णशब्दास्तदर्थाः ॥ २० ॥

स्पर्शादीनां कर्मभावसाधनत्वं द्रव्यपर्यायविवक्षोपपत्तेः ॥ १ ॥ स्पर्शादीनां कर्मसाधनत्वं भावसाधनत्वं च भवति । कुतः ? द्रव्यपर्यायविवक्षोपपत्तेः । यदा द्रव्यं प्राधान्येन विवक्षितं तदेंद्रियेण द्रव्यमेव संनिकृष्यते ततो न व्यतिरिक्ताः स्पर्शादयः केचन संतीति । एतस्यां विवक्षायां कर्मसाधनत्वं स्पर्शादीनामवसीयते, स्पृश्यत इति स्पर्शः, रस्यत इति रसः, गंध्यत इति गंधः, वर्ण्यत इति वर्णः, शब्द्यत इति शब्दः । यदा तु पर्यायः प्राधान्येन विवक्षितस्तदा भेदोपपत्तेरौदासीन्यावस्थितभावकथनाद्भावसाधनत्वं स्पर्शादीनां युज्यते। ततः स्पर्शनं स्पर्शः, रसनं रसः, गंधनं गंधः, वर्णनं वर्णः, शब्दनं शब्द इति। यद्येवं सूक्ष्मेषु परमाण्वादिषु स्पर्शादिव्यवहारो न प्राप्नोति ? नैष दोषः सूक्ष्मेष्वपि ते स्पर्शादयः संति तत्कार्येषु स्थूलेषु दर्शनादनुमीयमानाः । न ह्यत्यंतमसतां प्रादुर्भावोस्तीति । किंत्विंद्रियग्रहणयोग्या न भवंत्ययोग्यत्वेपि तेषु स्पर्शादिव्यवहारो रूढिवशाद्भवति । तदर्था इति कोयं शब्दः ? तेषामर्थास्तदर्था इति तेषां केषामिंद्रियाणां । यद्येवं—

तदर्था इति वृत्त्यनुपपत्तिरसमर्थत्वात् ॥ २ ॥ तदा इति वृत्तिर्नोपपद्यते कुतोऽसमर्थत्वात् समर्थायवयवानां हि वृत्त्या भवितव्यं । नचात्र सामर्थ्यमस्ति कुतः? सापेक्षमसमर्थं भवति । इंद्रियाणि ह्यत्रापेक्ष्यंते ?

---

[1] श्रोत्रप्रणालिकायामित्यपि ग पुस्तके पाठः ।

न वा गमकत्वान्नित्यसापेक्षेषु संबंधिशब्दवत् ॥३॥ न वैषदोषः, किं कारणं? गमकत्वादत्र वृत्तिर्भवति। गमकत्वं च नित्यसापेक्षेषु। कथं? संबंधिशब्दवत्। यथा संबंधिशब्देषु देवदत्तस्य गुरुकुलं, देवदत्तस्य गुरुपुत्र, इत्येवमादिषु वृत्तिर्भवति गुरुशब्दो हि नित्यशिष्यमपेक्षत इति। एवमिहापि तच्छब्दः सामान्यवचनोऽविशेषाकांक्षी सन् प्रकृतानींद्रियाण्यपेक्षमाणोपि वृत्तिं लभते।

स्पर्शादीनामानुपूर्व्येण निर्देश इंद्रियक्रमाभिसंबंधार्थः ॥ ४ ॥ स्पर्शश्च रसश्च गंधश्च वर्णश्च शब्दश्च स्पर्शरसगंधवर्णशब्दा इत्यानुपूर्व्येण निर्देशः स्पर्शनादिभिरिंद्रियैः क्रमेणाभिसंबंधो यथा स्यात्, इति एते पुद्गलद्रव्यस्य गुणा अविशेषेण वेदितव्याः। अत्र केचिद्विशिष्य तान् कल्पयंति—रूपरसगंधस्पर्शवती पृथिवी। रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाश्च। तेजो रूपस्पर्शवत्। वायुः स्पर्शवानिति तदयुक्तं—रूपादिमान् वायुः स्पर्शवत्वाद्घटवत्। तेजोपि रसगंधवद्रूपवत्वाद्गुडवत्। आपोपि गंधवत्यः रसवत्त्वादाम्रफलवत्। किंचाऽवादिषु गंधादीनां साक्षादुपलब्धेश्च। पार्थिवपरमाणुसंयोगादुपलब्धिरिति चेन्न विशेषहेत्वभावात्। नात्र विशेषहेतुरस्ति पार्थिवपरमाणूनामेते गुणाः संसर्गात्त्वन्यत्रोपलभ्यंते नत्वबादीनामिति। वयं ब्रूमहे तद्गुणः तत्रोपलब्धेरिति। यदि हि संयोगादुपलब्धिः कथ्यते रसाद्युपलब्धिरपि संयोगादेव कल्प्यतां। नच पृथिव्यादीनां जातिभेदोस्ति पुद्गलजातिमजहतः परमाणुस्कंधविशेषा निमित्तवशाद्विश्वरूपतामापद्यंत इति दर्शनात्। दृश्यते हि पृथिव्याः कारणवशाद्द्रवता। द्रवाणां चापां करकात्मभावेन घनभावो दृष्टः, घनश्च द्रवभावः। तेजसोपि मषीभावः। वायोरपि दृष्टा रूपादयः। कथं गम्यत? इतिचेत्परमाणुषु तेषां रूपादीनां कथं गतिः?, तत्कार्येषु दर्शनादनुमानमिति चेदिहापि तत एव वेदितव्यं।

तेषां च स्वतस्तद्वतश्चैकत्वं पृथक्त्वं प्रत्यनेकांतः ॥ ५ ॥ तेषां च स्पर्शादीनां स्वतस्तद्वतश्चैकत्वपृथक्त्वं प्रत्यनेकांतो वेदितव्यः। स्यादेकत्वं स्यात्पृथक्त्वमित्यादि। अत्रान्ये एकत्वं पृथक्त्वं चैकांतेनाध्यवस्यंति? तदयुक्तं कथं? यद्येकांतेनैकत्वं स्यात्स्पर्शनेन स्पर्शोपलब्धौ रसादीनामप्युपलब्धिः स्यात्। तद्वतोपि तेषामपृथक्त्वे तदेव वा स्यात्त एव वा? तदेव चेल्लक्षणाभावाल्लक्ष्याभावः, अथ त एव? निराधारत्वात्तेषामप्यभावः। अथैकांतेन प्रथक्त्वं, घटरूपोपलब्धौ घटानुरूपानुपलब्धिवत् स्पर्शोपलब्धौ रूपादीनामनुपलब्धेः स्पृष्टो घटोय मिति न ज्ञायेत स्पर्शाद्यनात्मकत्वात् तस्मात्तद्वतोप्यत्यंतप्रथक्त्वे?, उभयेषामभावः स्यात्। ग्रहणभेदात्स्पर्शादीनामन्यत्वमिति चेन्न। ग्रहणाभेदेपि नानात्वोपलब्धेः शुक्लकृष्णादिषु संख्यापरिमाणप्रथक्त्वसंयोगविभाग परत्वापरत्वकर्मसत्तागुणत्वानां रूपसमवायाच्चाक्षुराणां नानात्वोपलब्धेश्च। संज्ञा स्वतत्त्वमिति लक्षणभेदान्नानात्वमिति चेन्न। तदभेदेपि द्रव्यगुणकर्मणां नानात्वोपलब्धेः। अनानात्वमिति चेन्न। प्रतिज्ञाविरोधात्। यदि ह्येवं स्यान्महदादिपरिणतानां सत्वरजस्तमसां व्यतिरेकेणानुपलभ्यमानानामपि प्रतिज्ञातमन्यत्वं हीयते। यदि हि तत्राप्यनन्यत्वमेव स्यात्? व्यक्ताव्यक्तलक्षणभेदकल्पनाऽनर्थिका स्यात्, तस्मात्स्यादेकत्वं स्यात्प्रथक्त्वं चाभ्युपगंतव्यं द्रव्यार्पणादेकत्वं पर्यायार्पणान्नानात्वमिति। अत्राह— यन्मनोनवस्थानादिंद्रियं न भवतीति प्रत्याख्यातं नन्किमुपयोगस्योपकारकमुत नेति? तदप्युपकार्येव तेन विनेंद्रियाणां विषयेषु स्वप्रयोजनवृत्त्यभावात्। किमस्यैषां सह कारित्वमात्रमेव प्रयोजनमुतान्यदपीत्यत आह—

श्रुतमनिंद्रियस्य ॥ २१ ॥

श्रुतज्ञानविषयोर्थः श्रुतं स विषयोनिंद्रियस्य। परिप्राप्तश्रुतज्ञानावरणक्षयोपशमस्यात्मनः श्रुतार्थेऽनिंद्रियालंबनज्ञानप्रवृत्तेः। अथवा श्रुतज्ञानं श्रुतं तदनिंद्रियस्यार्थः प्रयोजनमिति यावत् तत्पूर्वकत्वात्तस्य। इत्ययमनिंद्रियस्येंद्रियव्यापारनिर्मुक्तोर्थः।

श्रुतं श्रोत्रेंद्रियस्य विषय इति चेन्न श्रोत्रेंद्रियग्रहणे श्रुतस्य मतिज्ञानव्यपदेशात् ॥ १ ॥ स्यान्मतं न श्रुतमनिंद्रियस्य विषयः, कस्य तर्हि? श्रोत्रेंद्रियस्येति, तन्न। किं कारणं श्रोत्रेंद्रियग्रहणात् श्रुतस्य मति-

ज्ञानमिति व्यपदेशात्। यदा हि श्रोत्रेण गृह्यते तदा तन्मतिज्ञानमवग्रहादि व्याख्यातं, तत उत्तरकालं यत्तत्पूर्वकं जीवादिपदार्थस्वरूपाविषयं तच्छ्रुतमनिंद्रियस्येत्यवसेयं। उक्तानामिंद्रियाणां प्रतिनियतविषयाणां स्वामित्वनिर्देशे कर्तव्ये यत्प्रथमगृहीतं स्पर्शनं तस्य तावत्स्वामित्वावधारणार्थमाह—

वनस्पत्यंतानामेकं ॥ २२ ॥

अंतशब्दस्याऽनेकार्थत्वे विवक्षातोवसानगतिः ॥१॥ अयमंतशब्दोनेकार्थः, क्वचिदवयवे, यथा वस्त्रांतो वसनांतः। क्वचित्सामीप्ये, यथोदकांतं गत उदकसमीपे गत इति। क्वचिदवसाने वर्तते यथा संसारांतं गतः संसारावसानं गत इति। तत्रेह विवक्षातोवसानगतिर्वेदितव्या। वनस्पत्यंतानां, वनस्पत्यवसानानामिति।

सामीप्यवचने हि वायुत्रससंप्रत्ययप्रसंगः ॥ २ ॥ वनस्पत्यंतानां वनस्पतिसमीपानामित्यर्थे गृह्यमाणे वायुकायिकानां त्रसानां च संप्रत्ययः प्रसज्येत!

अंतशब्दस्य संबंधिशब्दत्वादादिसंप्रत्ययः ॥ ३ ॥ अयमंतः शब्दः संबंधिशब्दत्वात् कांश्चित् पूर्वानपेक्ष्य वर्तते, ततोर्थादादिसंप्रत्ययो भवति। तस्मादयमर्थो गम्यते, पृथिव्यादीनां वनस्पत्यंतानामेकमिंद्रियमिति। अत्राह—

अविशिष्टैकेंद्रियप्रसंगोऽविशेषात् ॥४॥ पृथिव्यादीनां वनस्पत्यंतानां स्पर्शनादिषु चाविशिष्टमेकमिंद्रियं प्राप्नोति। कुतः?, अविशेषात्। न हि कश्चिद्विशेषोस्त्यनेनैवैकेन भवितव्यमिति। संख्यावाची ह्ययमेकशब्दः!

न वा प्राथम्यवचने स्पर्शनसंप्रत्ययात् ॥ ५ ॥ न वैष दोषः। किं कारणं? प्राथम्यवचने स्पर्शन संप्रत्ययात्। अयमेकशब्दः प्राथम्यवचनः। सूत्रपाठे च प्राथम्यमाश्रितं, ततः स्पर्शनस्य संप्रत्ययो भवति। अस्ति च लोके प्राथम्यवचनः, एको गोत्रे प्रथमो गोत्र इति। तस्योत्पत्तिकारणमुच्यते— वीर्यांतरायस्पर्शनेंद्रियावरणक्षयोपशमे शेषेंद्रियसर्वघातिस्पर्धकोदये च शरीरांगोपांगलाभोपष्टंभे, एकेंद्रियजातिनामोदयवशवर्तितायां च सत्यां, स्पर्शनमेकमिंद्रियमाविर्भवति। इतरेषामिंद्रियाणां स्वामित्वप्रदर्शनार्थमाह—

कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि ॥ २३ ॥

एकैकमिति वीप्सानिर्देशः ॥ १ ॥ एकैकमितिशब्दो वीप्सायां द्रष्टव्यः।

बहुत्वनिर्देशः सर्वेंद्रियापेक्षः ॥ २ ॥ सर्वाणींद्रियाण्यपेक्ष्य बहुत्वनिर्देशः कृतः। एकैकवृद्धमेषां तान्येकैकवृद्धानीति। तत्र किं पूर्वमुत्तरं? इति संदेहः—

असंदिग्धं स्पर्शनमेकैकेन वृद्धमित्यादिविशेषणात् ॥ ३ ॥ स्पर्शनमित्यनुवर्तते तदारभ्यैकैकेन वृद्धमित्यादि विशेषणात् नास्ति संदेहः। तत्कथं?

वाक्यांतरोपप्लवात् ॥ ४ ॥ अस्मादभिन्नस्थानाद्वाक्याद्वाक्यांतराण्युपप्लवंते यथा— अक्ष इत्येतस्मादक्षो भक्ष्यतां, अक्षो भज्यतां, अक्षो दीव्यतामिति वाक्यांतरोपप्लवः क्रियते। एवमिहापि स्पर्शनं रसनवृद्धं कृम्यादीनां। स्पर्शनरसने घ्राणवृद्धे पिपीलिकादीनां। स्पर्शनरसनघ्राणानि चक्षुर्वृद्धानि भ्रमरादीनां। तानि श्रोत्रवृद्धानि मनुष्यादीनामिति वाक्यांतराण्युपप्लवंते।

आदिशब्दः प्रकारे व्यवस्थायां वा वेदितव्यः ॥ ५ ॥ यदागमो नापेक्षितस्तदा प्रकारे कृमिप्रकाराः कृम्यादय इति। यदा त्वागमोऽपेक्षते तदा व्यवस्थायां, आगमे हि ते व्यवस्थिता इति तेषां निष्पत्तिः स्पर्शनोत्पत्त्या व्याख्याता, उत्तरोत्तरसर्वघातिस्पर्धकोदयेन। एवमेतेषु संसारिषु द्विभेदेष्विंद्रियभेदात्पंचविधेषु ये पंचेंद्रियास्तद्भेदस्यानुक्तस्य प्रतिपत्त्यर्थमाह—

---

१ प्राथम्यवचन एकशब्द इत्यर्थः।

संज्ञिनः समनस्काः ॥ २४ ॥

मनो व्याख्यातं सह तेन ये वर्तंते ते संज्ञिनः। अत्र चोद्यते—

समनस्कविशेषणमनर्थकं संज्ञिशब्देन गतत्वात् ॥ १ ॥ संज्ञिन इत्यनेनैव विशेषणेन गतत्वात्समनस्का इति विशेषणमनर्थकं। कथमिति चेदुच्यते—

हिताहितप्राप्तिपरिहारयोर्गुणदोषविचारणात्मिका संज्ञा ॥ २ ॥ इदं हितमिदमहितमस्य प्राप्तौ परिहारे चायं गुणोऽयं दोष इति च विचारणात्मिका संज्ञेत्युच्यते।

व्रीह्यादिपाठादिनि, सिद्धिः ॥३॥ तस्मात्संज्ञाशब्दाद्व्रीह्यादिपाठादिनि सति संज्ञिन इति सिध्यंति।

न वा शब्दार्थव्यभिचारात् ॥ ४ ॥ संज्ञाशब्दार्थो हि व्यभिचरति तत्र को दोषः संज्ञायां ?, इति चेन्निवर्त्याभावो (?) यदि संज्ञारूढित्वमित्युच्यते सा सर्वेषां प्राणिनां प्रतिनियतास्तीत्यसंज्ञिनामभावान्निवर्त्याभावः स्यात्। संज्ञानं संज्ञा ज्ञानमिति चेत्तुल्यः को निवर्त्याभावः ?, सर्वेषां प्राणिनां ज्ञानात्मकत्वात्।

आहारादिसंज्ञेति चेन्नाऽनिष्टत्वात् ॥ ५ ॥ स्यादेतदाहार–भय–मैथुन–परिग्रहविषया संज्ञेति ! तन्न किं कारणमनिष्टत्वात्। सर्वे हि संसारिण आहार-भय-मैथुन-परिग्रह संज्ञासन्निधानात्संज्ञिनः स्युः। अनिष्टं चैतत्तस्मात्समनस्का इति विशेषणमर्थवत्। एवं च कृत्वा गर्भांड–मूर्छित–सुप्ताद्यवस्थासु हिताहितपरीक्षाभावेपि मनःसंनिधानात् संज्ञित्वमुपपन्नं भवति। यद्यस्य संसारिणो हिताहितप्राप्तिनिवृत्तिहेतुः परिस्पंदो मनःकारणसंनिधाने सति भवति। अथाभिनवशरीरं प्रत्यागूर्णस्य विशीर्णपूर्वमूर्तेरात्मनो निर्मनस्कस्य यत्कर्म तत्कुतः ? इत्यत्रोच्यते—

विग्रहगतौ कर्मयोगः ॥ २५ ॥

अथवा यदि संप्रधार्य समनस्काः प्राणिनः क्रियाः प्रारंभंते भिन्नदेहस्याऽसति मनस्युपपादक्षेत्रं प्रत्याभिमुख्येन या प्रवृत्तिर्विग्रहार्था सा कुतो भवतीत्यत आह विग्रहगतौ कर्मयोग इति—

विग्रहो देहस्तदर्था गतिर्विग्रहगतिः ॥ १ ॥ औदारिकादिशरीरनामोदयात्तन्निवृत्तिसमर्थान्विविधान् गृह्णाति विगृह्यते वासौ संसारिणेति विग्रहो देहः, विग्रहाय गतिर्विग्रहगतिः। ननु विकृतिप्रकृत्यभिसंबंधे सति तादार्थ्ये वृत्तिः, इह विकृतिप्रकृत्यसंबंधाभावादवृत्तिर्न प्राप्नोति ? नैष दोषः अश्वघासादिवद्वृत्तिर्वेदितव्या तादर्थ्ये चतुर्थ्या वाक्ये प्रदर्श्यते।

विरुद्धो ग्रहो विग्रहो व्याघात इति वा ॥ २ ॥ अथवा विरुद्धो ग्रहो विग्रहो व्याघातः पुद्गलाधाननिरोध इत्यर्थः।

विग्रहेण गतिर्विग्रहगतिः ॥ ३ ॥ आधाननिरोधेन गतिरित्यर्थः।

कर्मेति सर्वशरीरप्ररोहणसमर्थं कार्मणं ॥ ४ ॥ सर्वाणि शरीराणि यतः प्ररोहंति तद्बीजभूतं कार्मणं शरीरं कर्मेत्युच्यते।

योग आत्मप्रदेशपरिस्पंदः ॥५॥ कायादिवर्गणानिमित्त आत्मप्रदेशपरिस्पंदः योग इत्याख्यायते।

कर्मनिमित्तो योगः कर्मयोगः ॥ ६ ॥ तस्यां विग्रहगतौ कार्माणशरीरकृतो योगो भवति यत्कृतं कर्मादानं। यदुपपादिता चाऽमनस्कस्यापि विग्रहार्था गतिः। अथाकाशप्रदेशेषु परमाणुप्रतिष्ठासंबंधेनोपचरितेष्वाधेया जीवपुद्गला देशांतरप्राप्तिं प्रत्यभिमुखाः किं निराकृतप्रदेशक्रमां गत्यामभिनिर्वर्तयंति, उताक्रांतप्रदेशक्रमामिति विचारे सति तन्निर्धारणार्थमाह—

अनुश्रेणिगतिः ॥ २६ ॥

आकाशप्रदेशपंक्तिः श्रेणिः ॥ १ ॥ लोकमध्यादारभ्योर्ध्वमधस्तिर्यक्चाकाशप्रदेशानां (क्रमसंनिविष्टानां) पंक्तिः श्रेणिरित्युच्यते ।

अनोरानुपूर्व्ये वृत्तिः ॥ २ ॥ अनुशब्दस्यानुपूर्व्ये वृत्तिर्भवति श्रेणिरानुपूर्व्येणानुश्रेणिरिति ।

जीवाधिकारात्पुद्गलासंप्रत्यय इति चेन्न गतिग्रहणात् ॥ ३ ॥ स्यादेतज्जीवाधिकारात्पुद्गलानामनुश्रेणिगतिसंप्रत्ययो न भवतीति ? तन्न । किं कारणं ? गतिग्रहणात् । यदि हि जीवस्यैव गतिरिहेष्टा स्याद् गत्यधिकारे पुनर्गतिग्रहणमनर्थकं स्यात्ततो ज्ञायते सर्वेषां गतिमतां गतिर्गृह्यते ।

क्रियांतरे निवृत्त्यर्थं गतिग्रहणमितिचेन्नावस्थानाद्यसंभवात् ॥ ४ ॥ स्यान्मतं गतिग्रहणं क्रियांतरनिवृत्त्यर्थं गतिरेव नान्या क्रियेति ? तन्न किं कारणमवस्थानाद्यसंभवात् । न विग्रहगतिमापन्नस्य...तोरवस्थानशयनादयः क्रियाः संभवंति ।

उत्तरसूत्रे जीवग्रहणाच्च ॥ ५ ॥ "अविग्रहा जीवस्य" इत्युत्तरत्र जीवग्रहणाच्च मन्यामहे ...भयगतिराश्रितेति ।

विश्रेणिगतिदर्शनान्नियमायुक्तिरितिचेन्न कालदेशनियमात् ॥ ६ ॥ स्यादेतद्विश्रेणिरपि दृश्यते चक्रादीनां ज्योतिषां च मेरुप्रदक्षिणगतीनां मंडलिकवायूनां विद्याधराणां च मेर्वादिप्र... काले, ततोऽनुश्रेणिगतिरिति नियमो नोपपद्यते ? तन्न । किं कारणं कालदेशनियमात् । कालनियम... वानां मरणकाले भवांतरसंक्रमे । मुक्तानां चोर्ध्वगमनकालेऽनुश्रेण्येव गतिः । देशनियमेऽपि चोर्ध्वलोका... रधोलोकाच्चोर्ध्वगतिस्तिर्यग्लोकाच्चाधोगतिरूर्ध्वं वानुश्रेण्येव । पुद्गलानामपि च या लोकांतप्रापणी सा ...मादनुश्रेणिगतिः । यात्वन्या सा भजनीया । ततो भ्रमणरेचनादिगतिः सिद्धा । पूर्वभावप्रज्ञापकनयापेक्षया... व्यवहारमंतर्नीय रूढिवशाद्वा विनिर्मुक्तकर्मबंधनस्यापि जीवत्वमवधृत्येदमुपादिक्षत्—

अविग्रहा जीवस्य ॥ २७ ॥

विग्रहो व्याघातः कौटिल्यमित्यनर्थांतरं स यस्या न विद्यतेऽसावविग्रहा गतिः, कस्य ? जीवस्य । कीदृश... मुक्तस्य । कथं गम्यते ?—

उत्तरत्र संसारिग्रहणादिह मुक्तगतिः ॥ १ ॥ उत्तरसूत्रे संसारिग्रहणादिह मुक्तगतिर्विज्ञा... किमर्थमिदमुच्यते ? ननु श्रेण्यंतरसंक्रमो विग्रहस्तस्याभावोऽनुश्रेणिगतिरित्यनेनैव सिद्धः; नार्थोऽनेन ? इदं प्रयो... पूर्वं सूत्रे जीवपुद्गलानां क्वचिद्विश्रेणिरपि गतिर्भवतीत्येतस्य ज्ञापनार्थं । ननु तत्रैवोक्तं कालदेशनियमादनुश्रेणि... वति न सर्वत्रेति, न अतस्तत्सिद्धेः । यद्यसंगस्यात्मनोऽप्रतिबंधेन गतिरालोकांतादवधृतकाला प्रतिज्ञायते संदेह... पुनर्गतिः किं प्रतिबंधिन्युत मुक्तात्मवदिति परिप्रश्ने सतीदमुच्यते—

विग्रहवती च संसारिणः प्राक्चतुर्भ्यः ॥ २८ ॥

कालपरिच्छेदार्थं प्राक्चतुर्भ्य इति वचनं ॥ १ ॥ समयो वक्ष्यते चतुर्भ्यः समयेभ्यः प्रा... विग्रहवती गतिर्भवतीति कालपरिच्छेदार्थं प्राक्चतुर्भ्य इत्युच्यते । ऊर्ध्वं कस्मान्नेतिचेत् ? विग्रहनिमित्ताभावात् । सर्वोत्कृष्टविग्रहनिमित्तनिष्कुटक्षेत्रे उत्पित्सुः प्राणी निष्कुटक्षेत्रानुपूर्व्यर्जुश्रेण्यभावात्, इषुगत्यभावे निष्कुटक्षेत्रप्रापणनिमित्तां त्रिविग्रहां गतिमारभते नोर्ध्वं तथाविधोपपादक्षेत्राभावात् । तेनैव च कालेनोपपादक्षेत्र... षष्टिकाद्यात्मलाभवत् । यथा षष्टिकादीनां व्रीहीणां परिच्छिन्नकालावधिपरिपाको न न्यूनेन नाभ्यधिके— तथान्तरभवे कालनियमो वेदितव्यः ।

चशब्दः समुच्चयार्थः ॥ २ ॥ चशब्द उपपादक्षेत्रं प्रति ऋज्वी गतिरविग्रहा, कुटिला विग्रहवती।

आङ्ग्रहणं लघ्वर्थमिति चेन्नाभिविधिप्रसंगात् ॥ ३ ॥ स्यादेतदाङ्ग्रहणं कर्तव्यं लघ्वर्थमिति ? तन्न किं **कारणं** ? अभिविधिप्रसङ्गात्। तेन चतुर्थसमयमभिव्याप्य विग्रहः प्रवर्तते स चानिष्टः ॥

उभयसंभवे व्याख्यानान्मर्यादासंप्रत्यय इति चेन्न प्रतिपत्तेर्गौरवात् ॥ ४ ॥ स्यान्मतं मर्यादाभिविध्योराङ् **तत्र** व्याख्यानतो विशेषप्रतिपत्तिरिति मर्यादासंप्रत्यय इत्याङ्यपि सति न दोष इति ? तन्न। किं कारणं ? **प्रतिपत्तेर्गौरवात्** । एवं सति प्रतिपत्तेर्गौरवं स्यात्, तस्माद्विस्पष्टार्थं प्राग्ग्रहणं क्रियते। आसां चतसृणां **गतीनामार्षोक्ताः** संज्ञा — इषुगतिः, पाणिमुक्ता, लाङ्गलिका, गोमूत्रिका, चेति। तत्राविग्रहा प्राथमिकी, **शेषा विग्रहवत्यः** । इषुगतिरिवेषुगतिः, क उपमार्थः ? यथेषोर्गतिरालक्ष्यदेशादृज्वी, तथा संसारिणां सिध्यतां च **जीवानां** ऋज्वी गतिरेकसमयिकी। पाणिमुक्तेव पाणिमुक्ता, क उपमार्थः ? यथा पाणिना तिर्यक् प्रक्षिप्तस्य **द्रव्यस्य** गतिरेकविग्रहा तथा संसारिणामेकविग्रहा गतिः पाणिमुक्ता द्वैसमयिकी। लाङ्गलमिव लाङ्गलिका, **क उपमार्थः** ? यथा लाङ्गलं द्विवक्रितं, तथा द्विविग्रहा गतिर्लाङ्गलिका त्रैसमयिकी। गोमूत्रिकेव गोमूत्रिका, **क उपमार्थः** ? यथा गोमूत्रिका बहुवक्रा, तथा त्रिविग्रहा गतिर्गोमूत्रिका चातुःसमयिकी। यद्यमुष्या विग्रहवत्याः **क्रियायाश्चा**तुःसमयिक्यवस्था निर्धार्यते परित्यक्तरूपाबाधा पुनर्गतिः कियत्कालाभवतीत्यत आह—

एकसमयाऽविग्रहा ॥ २९ ॥

अधिकृतगतिसामानाधिकरण्यात् स्त्रीलिंगनिर्देशः ॥ १ ॥ गतिरधिकृता तत्सामानाधिकरण्यादत्र **स्त्रीलिंगनिर्देशो** द्रष्टव्यः, एकः समयोऽस्या एकसमया, न विद्यते विग्रहोऽस्या अविग्रहेति। गतिमतां हि जीवपुद्गलानामव्याघातेनैकसमयिकी गतिरालोकान्तादपीति।

आत्मनोऽक्रियावत्त्वसिद्धेरयुक्तमिति चेन्न क्रियापरिणामहेतुसद्भावाल्लोष्टवत् ॥ २ ॥ स्यादेतत्सर्वगतत्वान्निष्क्रियस्यात्मनः क्रियावत्त्वं नास्ति ततो गतिकल्पनमयुक्तमिति ? तन्न। किं कारणं ? क्रियापरिणामहेतुसद्भावात्, कथं ? लोष्टवत्। यथा लोष्टं द्रव्यं क्रियापरिणामित्वाद्बाह्याभ्यन्तरकारणापेक्षो देशांतरप्राप्तिसमर्थां क्रियामारभमाणो दृष्टः तथात्मा कर्मवशाच्छरीरपरिणामानुविधायी तद्विधेयां क्रियामास्कंदति। **तदभावे च** पूर्वप्रयोगवशात् स्वाभाविकीमिति नास्ति दोषः। सर्वगतत्वे तु संसाराभावः। यदि च सर्वगत **आत्मा स्यात्** ? क्रियाभावात्संसाराभावः स्यात्। बन्धमतीतिप्रत्ययनादौ कर्मोपचयसन्निकर्षबंधेन चादिमति पंचविधेऽपि **द्रव्यक्षेत्र**कालभवभावे मिथ्यादर्शनादिप्रत्ययसंनिधाने च सत्युपयोगात्मकोऽयमात्मा सति येन कर्माण्याददानो **विग्रहगता**वप्याहारकः प्रसक्तस्ततो नियमार्थमिदमुच्यते—

एकं द्वौ त्रीन्वाऽनाहारकः ॥ ३० ॥

समयसंप्रत्ययः प्रत्यासत्तेः ॥ १ ॥ एकसमयाविग्रहेत्यत्र समयशब्द उक्तस्तेनेह प्रत्यासत्तेरभिसंबंधो वेदितव्यः। एकं समयं, द्वौ समयौ, त्रीन्समयान् इति। ननु च तत्र समयशब्द उपसर्जनीभूतः कथमिहाभिसंबध्यते ? अन्यस्यासंभवात् सामर्थ्यात्संबंधो द्रष्टव्यः।

वा शब्दोऽत्र विकल्पार्थो ज्ञेयः ॥ २ ॥ विकल्पश्च यथेच्छातिसर्गः, एकं वा द्वौ वा त्रीन्वेति।

सप्तमीप्रसंग इति चेन्नात्यंतसंयोगस्य विवक्षितत्वात् ॥ ३ ॥ स्यादेतदाहरणक्रियाया अधिकरणं काल इति सप्तमी प्राप्नोतीति ? तन्न किं कारणं ? अत्यंतसंयोगस्य विवक्षितत्वात्। अत्यंतसंयोगे हि तदपवादो द्वितीया विधीयते ॥

त्रयाणां शरीराणां षण्णां पर्याप्तीनां योग्यपुद्गलग्रहणमाहारः ॥ ४ ॥ तैजसकार्मण

शरीरे हि आसंसारांतान्नित्यमुपचीयमानस्तद्योग्यपुद्गले[1], अतः शेषाणां त्रयाणां शरीराणामौदारिकवैक्रियिकाहारकाणामाहाराद्यभिलापकारणानां षण्णां पर्याप्तीनां योग्यपुद्गलगृहणमाहार इत्युच्यते ।

विग्रहगतावसंभवादाहारकशरीरनिवृत्तिः ॥ ५ ॥ ऋद्धिप्राप्तानामृषीणामाहारकशरीरमाविर्भवति इति विग्रहगतौ तस्यासंभवान्निवृत्तिः ।

शेषाहाराभावो व्याघातात् ॥६॥ विग्रहगतौ शेषस्याहारस्याभावः, कुतश्च ? व्याघातात्, अष्टविधकर्मपुद्गलसूक्ष्मपरिणतोपचितमूर्तिकार्मणशरीरवशात् प्रावृट्कालपरिणत जलधरनिर्गतसलिलग्रहणसमर्थ निक्षिप्ततप्तायसमायकवत् पूर्वदेहनिर्वृत्तिसमुद्घातः दुःखोष्मत्वात्[2] जलप्याहारकः, वक्रगतिवशादेकं द्वौ त्रीन्वा समयाननाहारको भवति । तत्रैकसमयिक्यामिषुगतौ उक्तमाहारमनुभवन्नेव गच्छति । पाणिमुक्तायामेकविग्रहायां द्विसमयायां प्रथमसमयेऽनाहारकः । लांगलिकायां द्विविग्रहायां त्रिसमयायां प्रथमद्वितीयोः समययोरनाहारकस्तृतीये आहारकः । गोमूत्रिकायां त्रिविग्रहायां चतुःसमयायां चतुर्थसमये आहारक इतरेष्वनाहारकः । तस्य खलु संसारिणः शुभाशुभफलप्रदकार्मणशरीरानुगृहीतक्रियाविशेषस्यानुश्रेण्यास्कंदतः पूर्वोपात्तानुभवनं प्रति कर्मभिरापूर्यमाणस्याविग्रहविग्रहवद्गमनद्वयाक्षिप्तदेशांतरस्याभिनवमूर्त्यंतरनिर्वृत्तिप्रकारप्रतिपादनार्थमिदमाह—

संमूर्छनगर्भोपपादा जन्म ॥ ३१ ॥

समंततो मूर्छनं संमूर्छनं ॥१॥ त्रिषु लोकेषूर्ध्वमधस्तिर्यक् च देहस्य समंततो मूर्छनमवयवप्रकल्पनं ।

शुक्रशोणितगरणाद्गर्भः ॥ २ ॥ यत्र शुक्रशोणितयोर्गरणं मिश्रणं भवति स गर्भः ।

मात्रोपभुक्ताहारात्मसात्करणाद्वा ॥३॥ अथवा मात्रोपभुक्तस्याहारस्यात्मसात्करणाद्गरणाद्गर्भः ।

उपेत्युपपद्यतेऽस्मिन्नित्युपपादः ॥ ४ ॥ हल इत्यधिकरणसाधनो घञ् । देवनारकोत्पत्तिस्थान विशेषस्य संज्ञेति । एते त्रयः संसारिणां जीवानां जन्मप्रकाराः ।

संमूर्छनग्रहणमादौ अतिस्थूलत्वात् ॥ ५ ॥ संमूर्छनजं हि शरीरमतिस्थूलमतोस्य ग्रहणमादौ क्रियते । ननु गर्भजशरीरमपि वैक्रियिकशरीरादतिस्थूलं तयोः कस्यादौ वचनं न्याय्यमित्युच्यते—

अल्पकालजीवित्वात् संमूर्छनं ॥ ६ ॥ गर्भौपपादिकजीविभ्यः संमूर्छनजाः प्राणिनोऽल्पकाल जीविनस्ततः संमूर्छनस्यादौ न्याय्य । किं च—

तत्कार्यकारणप्रत्यक्षत्वात् ॥ ७ ॥ गर्भोपपादजन्मनोः कार्यकारणेऽप्रत्यक्षे यत्पुनः संमूर्छनजन्मनः कारणं मांसादि तत्कार्यं च शरीरं तदुभयंलोके प्रत्यक्षं ततश्चास्यादौ ग्रहणं क्रियते ।

तदनंतरं गर्भग्रहणं कालप्रकर्षनिष्पत्तेः ॥ ८ ॥ गर्भजन्म हि संमूर्छनजन्मनः कालप्रकर्षेण निष्पद्यते ततस्तदनंतरं तस्य ग्रहणं न्याय्यं ।

उपपादग्रहणमंते दीर्घजीवित्वात् ॥ ९ ॥ संमूर्छनजेभ्यो गर्भजेभ्यश्चौपपादिका दीर्घजीविन इत्यंते ग्रहणं क्रियते । किं कृतोऽयं जन्मविकल्पः ? इत्युच्यते—

अध्यवसायविशेषात्कर्मभेदे तत्कृतो जन्मविकल्पः ॥ १० ॥ अध्यवसायः परिणामः सोऽसंख्येयलोकविकल्पः तद्भेदात्तत्कार्यकर्मबंधविकल्पस्ततस्तत्फलं जन्मविकारो वेदितव्यः । कारणानुरूपं हि लोके दृश्यते कार्यं । शुभाशुभलक्षणं कर्म तद्रूपमेव जन्म प्रादुर्भावयति ।

प्रकारभेदाज्जन्मभेद इति चेन्न तद्विषयसामान्योपादानात् ॥ ११ ॥ स्यादेतत्प्रकारा बहुत्वास्तत्सामानाधिकरण्याज्जन्मनोपि बहुत्वं प्राप्नोति यथा जीवादयः पदार्था इति ? तन्न । किं कारणं ? तद्विषय सामान्योपादानात् तत्प्रकारविषयमिह सामान्यं जन्मशब्देनोपादीयते, तत एकत्वनिर्देशः, यथा जीवादयस्तत्त्वमिति । अथाधिकृतस्य संसारिविषयोपभोगलब्ध्यधिष्ठानप्रवणस्य जन्मनो योनिविकल्पो वक्तव्य इत्यत आह—

१ द्वितीयांतमेतत् । २ दुःखोष्णत्वादित्यपि ग. पुस्तके पाठः ।

सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥ ३२ ॥

आत्मनः परिणामविशेषश्चित्तं ॥ १ ॥ आत्मनश्चैतन्यस्य परिणामविशेषश्चित्तं, तेन सह वर्तंत इति सचित्ताः।

शीत इति स्पर्शविशेषः ॥ २ ॥ शीत इत्यनेन स्पर्शविशेषो गृह्यते, शुक्लादिवदुभयवचनत्वात्तद्युक्तं द्रव्यमप्याह।

संवृतो दुरुपलक्षः ॥ ३ ॥ सम्यग्वृतः संवृत इति दुरुपलक्षः प्रदेश उच्यते।

सेतराः सप्रतिपक्षाः ॥४॥ सह इतरैः सेतराः सप्रतिपक्षा इत्यर्थः के पुनरितरे? अचित्तोष्णविवृताः।

मिश्रग्रहणमुभयात्मकसंग्रहार्थं ॥ ५ ॥ मिश्रग्रहणं क्रियते उभयात्मकसंग्रहार्थं सचित्ताचित्तशीतोष्णसंवृताविवृता इति।

चशब्दः प्रत्येकसमुच्चयार्थः ॥ ६ ॥ मिश्राश्चेति च शब्दः क्रियते प्रत्येकसमुच्चयार्थः। इतरथा हि पूर्वोक्तानामेव विशेषणं स्यात्। तेन सचित्त-शीत-संवृताः सेतरा यदा मिश्रास्तदा योनयो भवन्तीत्ययमर्थो लभ्येत। चशब्दे पुनः सचित्तादयः प्रत्येकं च योनयो भवंती मिश्राश्चेत्ययमर्थो लब्धः। न चांतरेणापि तत्प्रतीतेः। नैतत् प्रयोजनमस्ति कुतोऽन्तरेणापि तत्प्रतीतेरंतरेणापि हि चशब्दं समुच्चयार्थः प्रतीयते यथा पृथिव्यापस्तेजोवायुरिति। ननु चोक्तमितरथा हि पूर्वोक्तानामेव विशेषणं स्यादिति नैष दोषः विशेषणस्य समुच्चयस्य च संभवे समुच्चय इति व्याख्यायते।

इतरयोनिभेदसमुच्चयार्थस्तु ॥ ७ ॥ सूत्रेऽनुक्तानां योनिभेदानां समुच्चयार्थस्तर्हि चशब्दः। के पुनस्ते? उत्तरत्र वक्ष्यंते।

एकशो ग्रहणं क्रममिश्रप्रतिपत्त्यर्थं ॥ ८ ॥ एकैकः, एकश इति वीप्सायां शस्, तस्य ग्रहणं क्रममिश्रप्रतिपत्त्यर्थं। यथैवं विज्ञायेत सचित्तश्चाऽचित्तश्च शीतश्चोष्णश्च संवृतश्च विवृतश्चेति। मैवं विज्ञायि सचित्तशीतश्चेत्यादि।

तद्ग्रहणं क्रियते प्रकृतापेक्षार्थं ॥ ९ ॥ तेषां योनयस्तद्योनयः केषां संमूर्छनादीनामिति।

यूयत इति योनिः ॥ १० ॥ सचित्तादिद्वंद्वे पुंवद्भावाभावो भिन्नार्थत्वात् ॥ ११ ॥ योनि शब्दोयं स्त्रीलिंगस्तदपेक्षास्सचित्तादयः शब्दाः स्त्रीलिंगास्तेषां द्वंद्वे पुंवद्भावो न प्राप्नोति सचित्ताश्च शीताश्च संवृताश्च सचित्तशीतसंवृता इति। कुतः? भिन्नार्थत्वादेकाश्रये हि पुंवद्भाव उक्तः?।

न वा योनिशब्दस्योभयलिंगत्वात् ॥ १२ ॥ न वैष दोषः, किं कारणं? उभयलिंगत्वाद्योनिशब्दस्य, इह पुल्लिंगो वेदितव्यः।

योनिजन्मनोरविशेष इतिचेन्नाऽऽधाराधेयभेदाद्विशेषोपपत्तेः ॥ १३ ॥ स्यान्मतं योनिजन्मनोरविशेषः? यत आत्मैव देवादिजन्मपर्यायादौपपादिक इत्युच्यते सैव च योनिरिति? तन्न किं कारणं? आधाराधेयविशेषोपपत्तेः। आधारो हि योनिराधेयं जन्म, यतः सचित्तादियोन्याधिष्ठान आत्मा संमूर्छनादिजन्मना शरीराहारेंद्रियादियोग्यान् पुद्गलानादत्ते।

सचित्तग्रहणमादौ चेतनात्मकत्वात् ॥ १४ ॥ सचित्तग्रहणमादौ क्रियते कुतश्चेतनात्मकत्वात्, चेतनात्मको लोके ह्यर्थः प्रधानं।

तदनंतरं शीताभिधानं तदाप्यायनहेतुत्वात् ॥ १५ ॥ तदनंतरं शीताभिधानं क्रियते कुतस्तदाप्यायनहेतुत्वात् सचेतनस्य ह्यर्थस्य शीतमाप्यायनकारणं भवति।

---

१ ग. पुस्तके वार्तिकस्वरूपे पठितमिदं वाक्यं। २ चशब्दमंतरेणापीत्यर्थः। ३ नायं ग. पुस्तके चकारः।

अंते संवृतग्रहणं गुप्तरूपत्वात् ॥ १६ ॥ अंते संवृतग्रहणं क्रियते, कुतः? गुप्तरूपत्वात्। गुप्तरूपं हि लोके कर्मप्राह्यं भवति।

एक एव योनिरिति चेन्न प्रत्यात्मं सुखदुःखानुभवनहेतुसद्भावात् ॥ १७ ॥ स्यान्मतमेक एव योनिरस्तु सर्वेषां जीवानामिति? तन्न। किं कारणं? प्रत्यात्मं सुखदुःखानुभवनसद्भावात्। शुभाशुभपरिणामा हि प्रत्यात्मं भिन्नास्तज्जनितश्च कर्मबंधो विचित्रः, अतस्तेन सुखदुःखानुभवनकारणं बहुविधमारभ्यते।

तत्राऽचित्तयोनिका देवनारकाः ॥ १८ ॥ देवाश्च नारकाश्चाऽचित्तयोनिकास्तेषां हि योनिरुपपादप्रदेशपुद्गलप्रचयोऽचित्तं।

गर्भजा मिश्रयोनयः ॥ १९ ॥ गर्भजा ये जीवास्ते मिश्रयोनयो वेदितव्यास्तेषां हि मातुरुदरे शुक्रशोणितमचित्तं, तदात्मना चित्तवता मिश्रं।

शेषास्त्रिविकल्पाः ॥ २० ॥ शेषाः संमूर्छनजास्त्रिविकल्पा भवंति। केचित्सचित्तयोनयः, अन्येऽचित्तयोनयः, परे मिश्रयोनय इति। तत्र सचित्तयोनयः साधारणशरीराः। कुतः? परस्पराश्रयत्वात्। इतरेऽचित्तयोनयो मिश्रयोनयश्च।

शीतोष्णयोनयो देवनारकाः ॥ २१ ॥ देवा नारकाश्च शीतयोनयो भवंति। उष्णयोनयश्च, तेषां चोपपादनस्थानानि कानि चिदुष्णानि कानि चिच्छीतानीति।

उष्णयोनिस्तेजस्कायिकः ॥ २२ ॥ अग्निकायिको जीव उष्णयोनिर्द्रष्टव्यः।

इतरे त्रिप्रकाराः ॥ २३ ॥ इतरे जीवास्त्रिप्रकारयोनयो भवंति केचिच्छीतयोनयोऽन्ये, उष्णयोनयः, अपरे मिश्रयोनय इति।

देवनारकैकेंद्रियाः संवृतयोनयः ॥ २४ ॥ देवनारका एकेंद्रियाश्च संवृतयोनयो भवंति।

विकलेंद्रिया जीवा विवृतयोनयो वेदितव्याः ॥ २५ ॥

मिश्रयोनयो गर्भजाः ॥ २६ ॥ गर्भजा जीवा मिश्रयोनयोऽवगंतव्याः।

तद्भेदाश्च शब्दसमुचिताः प्रत्यक्षज्ञानिदृष्टा इतरेषामागमगम्याश्चतुरशीतिशतसहस्रसंख्याः ॥ २७ ॥ तेषां तत्रानां योनीना भेदाः कर्मभेदजनितविविक्तवृत्तयः प्रत्यक्षज्ञानिभिर्दिव्येन चक्षुषा दृष्टाः, इतरेषां छद्मस्थानामागमेन श्रुताख्येन गम्याश्चतुरशीतिशतसहस्रसंख्या आम्नायंते। तद्यथा— नित्यनिगोतानां सप्तशतसहस्राणि, अनित्यनिगोतानां च सप्तशतसहस्राणि। के पुनर्नित्यनिगोताः? केचाऽनित्यनिगोताः? त्रिष्वपि कालेषु त्रसभावयोग्या ये न भवंति ते नित्यनिगोताः त्रसभावमवाप्ता अवाप्स्यंति च ये तेऽनित्यनिगोताः। पृथिव्यप्तेजोवायूनां सप्तशतसहस्राणि, वनस्पतिकायिकानां दशशतसहस्राणि, विकलेंद्रियाणां ष सहस्राणि, देवनारकपंचेंद्रियतिरश्चां प्रत्येक चत्वारिंशत्सहस्राणि, मनुष्याणां चतुर्दशशतसहस्राणि तान्येतानि समुदितानि चतुरशीतिशतसहस्राणि आम्नायंते॥ उक्तं च— "णिच्चिदरधादुसत्तय तरुदस वियलिंदिएसु छच्चेव सुरणिरयतिरियचउरो चोद्दसमणुए सदसहस्सा इति"। एवमेतस्मिन्नवयोनिभेदसंकटे त्रिविधे जन्मनि सर्वप्राणिभृतामनियमेन प्रसक्तेऽवधारणार्थमाह—

जरायुजांडजपोतानां गर्भः ॥ ३३ ॥

जालवत्प्राणिपरिवरणं जरायुः ॥ १ ॥ यज्जालवत्प्राणिपरिवरणं विततमांसशोणितं तज्जरायुरित्युच्यते।

शुक्रशोणितपरिवरणमुपात्तकाठिन्यं नखत्वक्सदृशं परिमंडलमंडं ॥ २ ॥ यत्र खलु नखत्वक्सदृशमुपात्तकाठिन्यं शुक्रशोणितपरिवरणं मंडलं तदंडमित्याख्यायते।

संपूर्णावयवः परिस्पंदादिसामर्थ्योपलक्षितः पोतः ॥ ३ ॥ किंचित् परिवरणमंतरेण परिपूर्णावयवो योनिनिर्गतमात्र एव परिस्पंदादिसामर्थ्योपेतः पोत इत्युच्यते। जरायौ जाताः जरायुजाः, अंडे जाता अंडजाः, जरायुजाश्चांऽडजाश्च पोताश्च जरायुजांडजपोताः ।

पोतजा इत्ययुक्तमर्थभेदाभावात्॥४॥ केचित्पोतजा इति पठंति तदयुक्तं। कुतः ? अर्थभेदाभावात् न हि पोते कश्चिदन्यो जातोस्ति ॥

आत्मा पोतज इतिचेन्न तत्परिणामात् ॥ ५ ॥ स्यान्मतमात्मा पोते जातः पोतज इत्यर्थभेदोस्तीति ? तन्न किं कारणं ? तत्परिणामादात्मैव पोतपरिणामिन परिणतः पोत इत्युच्यते न पृथगात्मनः पोतो नाम कश्चिदस्ति । जरायुवत्पोतोऽजनिष्ट पोतज इतिचेदर्थविशेषो नास्ति ॥

जरायुजगृहणमादावभ्यर्हितत्वात् ॥ ६ ॥ जरायुजगृहणमादौ क्रियते कुतोऽभ्यर्हितत्वात् कथमभ्यर्हितत्वं ?

क्रियारंभशक्तियोगात् ॥७॥ अंडजपोतासाधारण्यो हि भाषाध्ययनादयः क्रिया जरायुजेषु दृश्यंते।

केषांचिन्महाप्रभावत्वात् ॥ ८ ॥ तत्र हि जाताः केचन चक्रधरवासुदेवादयो महाप्रभावा भवंति। किं च—

मार्गफलाभिसंबंधात॥९॥ सम्यग्दर्शनादिमार्गफलेन मोक्षसुखेनाभिसंबंधो नान्येषामित्यभ्यर्हितत्वं ।

तदनंतरमंडजग्रहणं पोतेभ्योभ्यर्हितत्वात् ॥ १० ॥ तदनंतरमंडजग्रहणं क्रियते। कुतः ? पोतेभ्योभ्यर्हितत्वात् । अंडजेषु हि केषुचित् शुकसारिकादयोऽक्षरोच्चारणादिषु क्रियासु कुशला भवंतीत्यभ्यर्हिताः पोतेभ्यः ।

उद्देशवन्निर्देश इति चेन्न गौरवप्रसंगात् ॥ ११ ॥ स्यान्मतमुद्देशवन्निर्देशेन भवितव्यमिति संमूर्छनजानां प्राग्ग्रहणं कर्तव्यमिति ? तन्न किं कारणं ? गौरवप्रसंगात् । यदि हि संमूर्छनजनिर्देश आदौ क्रियते शास्त्रगौरवं स्यादेकद्वित्रिचतुरिंद्रियाणां पंचेंद्रियाणां तिरश्चां मनुष्याणां च केषांचित्संमूर्छनं, इत्यतो गर्भजोपपादिकानुक्त्वा शेषाणां संमूर्छनमिति लघुनोपायेन निर्देक्ष्यामीत्युद्देशक्रमोऽतिक्रांतः ।

सिद्धे विधिरवधारणार्थः ॥ १२ ॥ जरायुजादीनां सामान्येन सिद्धे गर्भजन्मसंबंधे पुनर्विधिरारभ्यमाणो नियमार्थः, जरायुजांडजपोतानामेव। गर्भ एवेति नियमः कस्मान्न भवति ? उत्तरत्र शेषाणामिति वचनात् । यद्येवं जरायुजांडजपोतानां गर्भोवधार्यते, अथोपपादः खलु केषां भवतीत्यत आह—

देवनारकाणामुपपादः ॥ ३४ ॥

देवादिगत्युदय एवास्य जन्मेति चेन्न शरीरनिर्वर्तकपुद्गलाभावात् ॥ १ ॥ स्यान्मतं मनुष्यस्तैर्यग्योनो वा छिन्नायुः कार्मणकाययोगस्थो देवादिगत्युदयाद्, देवादिव्यपदेशभागिति कृत्वा तदेवास्य जन्मेति मतमिति ? तन्न । किं कारण ? शरीरनिर्वर्तकपुद्गलाभावात् । देवादिशरीरनिर्वृत्तौ हि देवादिजन्मेष्टं तस्यां चावस्थायामनाहारकत्वान्न देवादिशरीरनिर्वृत्तिरस्ति तत उपपादो जन्म युक्तं, तच्च देवनारकाणामिति । निर्दिष्टजन्मभेदेभ्यो जरायुजादिभ्योऽन्येषां किं जन्म ? इत्यत आह—

शेषाणां संमूर्छनं ॥ ३५ ॥

उभयत्र नियमः पूर्ववत् ॥१॥ उभयोरपि योगयोः पूर्ववन्नियमो वेदितव्यः, देवनारकाणामेवोपपादः, शेषाणामेव संमूर्छनं नोक्तानामिति । कथं पुनर्ज्ञायते पूर्वत्र जन्मनियमो न जन्मवन्नियम इति ? शेषग्रहणाज्ज्ञायते पूर्वत्र जन्मनियम इति । जरायुजांडजपोतानामेव गर्भो देवनारकाणामेवोपपाद इत्यवधारणे गर्भोपपादजन्मनी नियते, जरायुजादयो न नियतास्तेषां संमूर्छनमपि प्राप्तमतः शेषग्रहणं क्रियते। शेषाणामेव

सम्मूर्छन नोक्तानामित्यवधारणार्थं । यदि हि जन्मवतां नियमः स्याज्जरायुजाण्डजपोतानां गर्भ एव देवनारकाणामुपपाद एवेति गर्भोपपादयोरनवधारणात् यत्र संमूर्छनं चान्यच्चास्ति तत्र संमूर्छनमेवेति नियमाच्छेषग्रहणमनर्थकं स्यात्। आहेदं सूत्रमनर्थकं कथं? पूर्वयोर्योगयोरुभयतो नियमे सति जरायुजादीनां गर्भोपपादयोश्चाऽसति व्यभिचारे, शेषाणामेव संमूर्छनमुत्सर्गोवतिष्ठते इति। उच्यते स एवोभयो नियमो दुर्लभः,यत्तस्यैकत्वात्, अतोन्यतरनियम एवाश्रयितव्यस्तस्मिंश्च सति सूत्रमिदमारब्धव्यं। तेषां पुनः संसारिणां त्रिविधजन्मनामाहितबहुविकल्पनवयोनिभेदानां शुभाशुभनामकर्मनिर्वर्तितानि निबंधफलानुभवनाधिष्ठानानि शरीराणि कानीत्यत आह—

औदारिकवैक्रियिकाहारकतैजसकार्मणानि शरीराणि ॥ ३६ ॥

शीर्यंत इति शरीराणि घटाद्यतिप्रसंग इति चेन्न नामकर्मनिमित्तत्वाभावात् ॥ १ ॥ यदि शीर्यंत इति शरीराणि घटादीनामपि विशरणमस्तीति शरीरत्वमति प्रसज्येत ? तन्न। किं कारणं? नामकर्मनिमितत्वाभावात् । शरीरं नामकर्मोदयाच्छरीरं न च घटादिषु सोस्तीति नास्त्यतिप्रसंगः ।

विग्रहाभाव इति चेन्न रूढिशब्देष्वपि व्युत्पत्तौ क्रियाश्रयात् ॥ २ ॥ स्यान्मतं यदि शरीरनामकर्मोदयाच्छरीरव्यपदेशः शीर्यंत इति शरीराणीति विग्रहो नोपपद्यते इति ? तन्न। किं कारणं? रूढिशब्देष्वपि व्युत्पत्तौ क्रियाश्रयाद्। यथा गच्छतीति गौरिति विगृह्यते, एवं शीर्यंत इति शरीराणि इति विग्रहो भवति ।

शरीरत्वादिति चेन्न तदभावात् ॥ ३ ॥ स्यान्मतं शरीरत्वं नाम सामान्यविशेषो[1]स्ति। तद्योगाच्छरीरं न नाम कर्मोदयादिति ? तन्न। किं कारणं? तदभावादतत्स्वभावेऽनवधारणप्रसंगो।द्रव्यादित्वेवमादिनार्थांतरभूतजातिसंबंधकल्पना प्रतिविहितेति नास्ति शरीरत्वं ।

उदारात्स्थूलवाचिनो भवे प्रयोजने वा ठञ् ॥ ४ ॥ उदारं स्थूलमिति यावत्, ततो भवे प्रयोजने वा ठञि, औदारिकमिति भवति ।

विक्रियाप्रयोजनं वैक्रियिकं ॥ ५ ॥ अष्टगुणैश्वर्ययोगादेकानेकाणुमहच्छरीरविविधकरणं विक्रिया सा प्रयोजनमस्येति वैक्रियिकं ।

आह्रियते तदित्याहारकं ॥ ६ ॥ सूक्ष्मपदार्थनिर्ज्ञानार्थमसंयमपरिजिहीर्षया च प्रमत्तसंयतेनाह्रियते निर्वर्त्यते तदित्याहारकं ।

तेजोनिमित्तत्वात्तैजसं ॥७॥ यत्तेजोनिमित्तं तत्तैजसमिदं तेजसि भवं वा तैजसमित्याख्यायते।

कर्मणामिदं कर्मणां समूह इति वा कार्मणं ॥ ८ ॥ कर्मणामिदं कार्यं कर्मणां समूह इति वा कथंचिद्भेदाभेदविवक्षोपपत्तेः कार्मणमिति व्यपदिश्यते ।

सर्वेषां कार्मणत्वप्रसंग इति चेन्न प्रतिनियतौदारिकादिनिमित्तत्वात् ॥ ९ ॥ स्यान्मतं यदि कर्मणामिदं कर्मणां समूह इति वा कार्मणमित्युच्यते सर्वेषामपि तत्तुल्यमित्यौदारिकादीनामपि कार्मणत्वप्रसंग इति ? तन्न। किं कारणं? प्रतिनियतौदारिकादिनिमित्तत्वात्। औदारिकशरीरनामादीनि हि प्रतिनियतानि कर्माणि संति तदुभयभेदाद्भेदो भवति ।

तत्कृतत्वेप्यन्यत्वदर्शनाद्घटादिवत् ॥ १० ॥ यथा मृत्पिंडकारणाविशेषेपि घटशरावादीनां संज्ञास्वालक्षण्यादिभेदाद्भेदस्तथा कर्मकृतत्वाविशेषेपि औदारिकादीनां संज्ञादिभेदाद्भेदोऽवसेयः ।

---

१ तार्किकोपकल्पितजातिरित्यर्थः ।

तत्प्रणालिकया चाभिनिर्वृत्तेः ॥ ११ ॥ कार्मणशरीरप्रणालिकया चौदारिकादीनामभिनिर्वृत्तेः कार्यकारणभेदान्न सर्वेषां कार्मणत्वं । किं च—

विस्रसोपचयेन व्यवस्थानात् क्लिन्नगुडरेणुश्लेषवत् ॥ १२ ॥ यथा वैस्रसिकपरिणामात् क्लिन्नगुडे रेणूनामुपश्लिष्टानामवस्थानं तथा कर्मण्यप्यौदारिकादीनां वैस्रसिकोपचयेनावस्थानमिति नानात्वं सिद्धं ।

कार्मणमसन्निमित्ताभावादिति चेन्न निमित्तनिमित्तिभावात्तस्यैव प्रदीपवत् ॥ १३ ॥ स्यादेतन्न कार्मणं नाम शरीरमस्ति कुतः? निमित्ताभावात् । यस्य च निमित्तं नास्ति तदसत् यथा खरविषाणमिति? तन्न । किं कारणं? तस्यैव निमित्तनिमित्तिभावात्प्रदीपवत् यथा प्रदीपात्मैवात्मप्रकाशनात्प्रकाश्यः प्रकाशकश्च तथा कार्मणमेवात्मनो निमित्तं निमित्ति चेति सिद्धं ।

मिथ्यादर्शनादिनिमित्तत्वाच्च ॥ १४ ॥ न कार्मणस्य निमित्तं नास्ति, किं तर्हि निमित्तं? मिथ्यादर्शनादि, ततो ऽसिद्धमेतन्निमित्ताभावादिति ।

इतरथा ह्यनिर्मोक्षप्रसंगः ॥१५॥ यदि कार्मणमनिमित्तमिति गृह्येत अनिर्मोक्षः स्यात्, अहेतुकस्य विनाशहेतुत्वाभावात् ।

अशरीरं विशरणाभावादिति चेन्नोपचयापचयधर्मत्वात् ॥ १६ ॥ स्यादेतद्यथौदारिकादि शीर्यत इति शरीरं न तथा कार्मणं शीर्यत इत्यशरीरत्वमस्येति? तन्न । किं कारणं उपचयापचयधर्मत्वात् । निमित्तवशाद्धि कर्मायव्ययौ सततं स्त इति विशरणमस्त्येव ।

तद्ग्रहणमादाविति चेन्न तदनुमेयत्वात् ॥ १७ ॥ स्यादेतत्कार्मणग्रहणमादौ कर्तव्यं कुतस्तदधिष्ठानत्वादितरेषामिति? तन्न । किं कारणं? तदनुमेयत्वात्, यथा घटादिकार्योपलब्धेः परमाण्वाद्यनुमानं तथौदारिकादिकार्योपलब्धेः कार्मणानुमानं । कार्यलिंगं हि कारणमिति ।

तत एव कर्मणो मूर्तिमत्त्वं सिद्धं ॥ १८ ॥ यस्मान्मूर्तिमदस्य कार्यं तत एव कर्मणः कारणस्य मूर्तिमत्वं सिद्धं । न ह्यमूर्तेनात्मगुणेन निष्क्रियेणाऽदृष्टेन मूर्तिमतः क्रियावतो द्रव्यस्यारंभो युक्त इति ।

औदारिकग्रहणमादावतिस्थूलत्वात् ॥१९॥ अतिस्थूलमिदमौदारिकमिंद्रियग्राह्यत्वात्ततोस्य ग्रहणमादौ क्रियते ।

उत्तरेषां क्रमः सूक्ष्मक्रमप्रतिपत्त्यर्थः ॥ २० ॥ उत्तरेषां वैक्रियिकादीनां पाठक्रमः सूक्ष्मक्रमप्रतिपत्त्यर्थो वेदितव्यः । वक्ष्यते हि परं परं सूक्ष्ममिति । यथौदारिकस्येंद्रियैरुपलब्धिस्तथेतरेषां कस्मान्न भवतीत्यत आह—

परं परं सूक्ष्मं ॥ ३७ ॥

परशब्दस्यानेकार्थत्वे विवक्षातो व्यवस्थार्थगतिः ॥ १ ॥ परशब्दोयमनेकार्थवचनः, क्वचिद्व्यवस्थायां वर्तते यथा पूर्वः पर इति । क्वचिदन्यार्थे वर्तते यथा परपुत्रः परभार्येति अन्यपुत्रोन्यभार्येति गम्यते । क्वचित्प्राधान्ये वर्तते यथा परमियं कन्याऽस्मिन्कुटुंबे प्रधानमिति गम्यते । क्वचिदिष्टार्थे वर्तते यथा परं धाम गत इष्टं धाम गत इत्यर्थः । तत्रेह विवक्षातो व्यवस्थार्थो गृह्यते ।

पृथग्भूतानां शरीराणां सूक्ष्मगुणेन वीप्सानिर्देशः ॥ २ ॥ संज्ञा–लक्षण–प्रयोजनादिभिः पृथग्भूतानां शरीराणां सूक्ष्मगुणेन वीप्सानिर्देशः क्रियते परं परमिति । यदि परं परं सूक्ष्मं प्रदेशतोपि नूनं परं परं हीनमिति विपरीतप्रतिपत्तिनिवृत्त्यर्थमाह—

प्रदेशतोऽसंख्येयगुणं प्राक् तैजसात् ॥ ३८ ॥

प्रदेशाः परमाणवः ॥ १ ॥ प्रदिश्यंते इति प्रदेशाः परमाणवस्ते हि घटादिष्ववयवत्वेन प्रदिश्यंते, प्रदिश्यंते एभिरिति वा प्रदेशास्तैर्हि आकाशादीनां क्षेत्रविभागः प्रदिश्यते ।

प्रदेशेभ्यः प्रदेशतः ॥ २ ॥ अपादाने हीयरुहोरिति तसिः ।

प्रदेशैर्वा प्रदेशतः ॥ ३ ॥ तस्मिन् प्रकरणे आद्यादिभ्य उपसंख्यानमिति तसिः ।

संख्यानातीतोऽसंख्येयः ॥ ४ ॥ संख्यानं गणनमतीतो यः सोऽसंख्येयः, असंख्येयो गुणोऽस्य तदिदमसंख्येयगुणं ।

परंपरमित्यनुवृत्तेः प्राक् तैजसादिति वचनं ॥ ५ ॥ परंपरमित्यनुवर्तते तेन आकर्मणादसंख्येयगुणत्वे प्राप्ते मर्यादानिर्णयार्थं प्राक् तैजसादित्युच्यते ।

प्रदेशत इति विशेषणमवगाहक्षेत्रनिवृत्त्यर्थं ॥ ६ ॥ प्रदेशतः परंपरमसंख्येयगुणं नावगाहक्षेत्रत इत्येतस्य प्रतिपत्त्यर्थं प्रदेशत इति विशेषणमुपादीयते । तेनैतदुक्तं भवति– औदारिकाद्वैक्रियिकमसंख्येयगुणप्रदेशं वैक्रियिकादाहारकमसंख्येयगुणप्रदेशमिति । को गुणकारः पल्योपमस्यासंख्येयभागः ।

उत्तरोत्तरस्य महत्वप्रसंग इति चेन्न प्रचयविशेषादयःपिंडतूलनिचयवत् ॥ ७ ॥ स्यान्मतं यद्युत्तरोत्तरमसंख्येयगुणप्रदेशं परिमाणमहत्वेनापि भवितव्यमिति ? तन्न । किं कारणं ? प्रचयविशेषादयःपिंडतूलनिचयवत् । यथाऽयःपिंडस्य बहुप्रदेशत्वेपि अल्पपरिमाणत्वं तूलनिचयस्य चाल्पप्रदेशत्वेपि महापरिमाणत्वं प्रचयविशेषात् । तथोत्तरस्य शरीरस्यासंख्येयगुणप्रदेशत्वेपि अल्पपरिमाणत्वं बंधविशेषाद्वेदितव्यं । उक्तं प्राक् तैजसात्परं परमसंख्येयगुणमिति, अथोत्तरयोः किं समप्रदेशत्वमुतास्ति कश्चिद्विशेषः ? अस्तीत्याह–

अनंतगुणे परे ॥ ३९ ॥

प्रदेशत इत्यनुवर्तते तेनैवमभिसंबंधः क्रियते आहारकात्तैजसं प्रदेशतोऽनंतगुणं तैजसात्कार्मणं प्रदेशतोऽनंतगुणमिति । को गुणकारः अभव्यानामनंतगुणः सिद्धानामनंतभागः ।

अनंतगुणत्वादुभयोस्तुल्यत्वमिति चेन्नानंतस्यानंतविकल्पात् ॥ १ ॥ स्यादेतदनंतगुणत्वादुभयोस्तैजसकार्मणयोस्तुल्यत्वमिति । तन्न । किं कारणमनंतस्यानंतविकल्पादनंतो ह्यनंतविकल्पः संख्येयस्य संख्येयविकल्पवत् ।

आहारकादुभयोरनंतगुणत्वमिति चेन्न परं परमित्यभिसंबंधात् ॥ २ ॥ स्यान्मतमाहारकादुभयोरनंतगुणत्वमेव गम्यते न तैजसात्कार्मणस्यानंतगुणत्वमतस्तयोस्तुल्यप्रदेशत्वं प्राप्नोतीति तन्न । किं कारणं ? परंपरमित्यभिसंबंधत्वात्परं परमनंतगुणमिति गम्यते ।

परस्मिन्सत्यारातीयस्यापरत्वात् परापर इति निर्देशः ॥ ३ ॥ परं कार्मणं तस्मिन् सति तैजसमपरं भवत्यत परापरे इति निर्देशो न्याय्यः ।

न वा बुद्धिविषयव्यापारात् ॥४॥ न वैषदोषः किं कारणं ? बुद्धिविषयव्यापारात् । न शब्दोच्चारणक्रमेण तैजसकार्मणयोः परत्वव्यपदेशः किं, तर्हि ? बुद्ध्या तैजसकार्मणे तिर्यग्व्यवस्थाप्याहारकात् परे इति व्यपदेशः ।

व्यवहिते वा परशब्दप्रयोगात् ॥ ५ ॥ अथवा व्यवहिते परशब्दप्रयोगो दृश्यते यथा परा पाटलिपुत्रान्मथुरेति तथाहारकात्तैजसस्य परत्वं तैजसेन व्यवहितस्यापि कार्मणस्य परत्वमिति ।

बहुद्रव्योपचितत्वात्तदुपलब्धिप्रसंग इति चेन्नोक्तत्वात् ॥ ६ ॥ स्यादेतद्बहुद्रव्योपचितत्वात्तैजसकार्मणयोरुपलब्धिः प्राप्नोतीति ? तन्न। किं कारणमुक्तमेतत्प्रचयविशेषात्सूक्ष्मपरिणाम इति । तत्रैतत्स्याच्छल्यकवन्मूर्तिमद्द्रव्योपचितत्वात्संसारिणो जीवस्याभिप्रेतगतिनिरोधप्रसंग इति तन्न। किं कारणं ? यस्मादुभे अप्येते—

अप्रतीघाते ॥ ४० ॥

प्रतीघातो मूर्त्यंतरेण व्याघातः ॥ १ ॥ मूर्तिमतो मूर्त्यंतरेण व्याघातः प्रतीघात इत्युच्यते ।

तदभावः सूक्ष्मपरिणामादयःपिंडे तेजोनुप्रवेशवत् ॥ २ ॥ यथाऽयःपिंडस्यांतःसूक्ष्मपरिणामात्तेजोनुप्रवेशो दृष्टस्तथा तैजसकार्मणयोरपि नास्ति वज्रपटलादिषु व्याघात इत्यप्रतिघाते इत्युच्यते ।

वैक्रियिकाहारकयोरप्यप्रतिघात इति चेन्न सर्वत्र विवक्षितत्वात् ॥ ३ ॥ स्यान्मतं वैक्रियिकाहारकयोरपि प्रतिघातो नास्ति सूक्ष्मपरिणामादेव, तत्र किमुच्यते तैजसकार्मणे एवाप्रतिघाते इति ? तन्न। किं कारणं ? सर्वत्र विवक्षितत्वात् । आलोकातात्सर्वत्र तैजसकार्मणयोर्नास्ति प्रतिघात इत्ययं विशेषो विवक्षितः । वैक्रियिकाहारकयोस्तु न तथास्ति प्रतिघातः । आह किमेतावानेव विशेष आहोस्वित्कश्चिदन्योप्यस्ति ? इत्यत आह—

अनादिसंबंधे च ॥ ४१ ॥

अथवानादित्वादात्मनः शरीरस्यादिमत्वाद्विकरणस्यादिशरीरसंबंधः किं कृतः ? इत्यत आह—अनादिसंबंधे चेति । च शब्द किमर्थः—

चशब्दो विकल्पार्थः ॥ १ ॥ च शब्दो विकल्पार्थो वेदितव्यः, अनादिसंबंधे सादिसंबंधे चेति। कथमिति चेदुच्यते—

बंधसंतत्यपेक्षयानादिः संबंधः सादिश्च विशेषतो बीजवृक्षवत् ॥ २ ॥ यथा वृक्षो बीजादुत्पन्नः, तच्च बीजमपरस्माद्वृक्षात् , स चापरस्माद्बीजादिति कार्यकारणसंबंधसामान्यापेक्षयाऽनादिसंबंधः । अस्माद्बीजादयं वृक्षोऽस्माच्च वृक्षादिदं बीजमिति विशेषापेक्षया सादिः । एवं तैजसकार्मणयोरपि पौनर्भविकनिमित्तनैमित्तिकसंतत्यपेक्षयाऽनादिसंबंधः, विशेषापेक्षया सादिरिति ।

एकांतेनादिमत्वेऽभिनवशरीरसंबंधाभावो निर्निमित्तत्वात ॥ ३ ॥ यस्यैकांतेनादिमान् शरीरसंबंधस्तस्य प्रागात्यंतिकीं शुद्धिमादधतो जीवस्याभिनवशरीरसंबंधो न स्यात् कुतः ? निर्निमित्तत्वात् ।

मुक्तात्माभावप्रसंगश्च ॥ ४ ॥ यद्येकांतेन सादिसंबंधो यथा सादिशरीरमकस्मात्संबध्यते एवं मुक्तात्मनोप्याकस्मिकशरीरसंबंधः स्यादिति मुक्तात्माभावप्रसंगः स्यात् ।

एकांतेनानादित्वे चानिर्मोक्षः प्रसंगः ॥ ५ ॥ अथैकांतेनानादित्वं कल्प्यते एवमपि यस्यानादित्वं तस्यांतोपि नास्तीत्याकाशवत्कार्यकारणसंबंधाभावात् ततश्चानिर्मोक्षः प्रसजति । ननु चानादेरपि बीजवृक्षसंतानस्याग्निसंबंधे सत्यंतो दृष्टः न तस्यैकांतेनाऽनादित्वाभावात् । बीजवृक्षौ हि विशेषापेक्षयाऽऽदिमंताविति । तस्मात्साधूक्तं केनचित्प्रकारेण, अनादिसंबंधः केनचित्प्रकारेणादिमानिति । ते एते तैजसकार्मणे किं कस्यचिदेव भवतः उताऽविशेषेणेत्यत आह—

सर्वस्य ॥ ४२ ॥

सर्वशब्दो निरवशेषवाची ॥१॥ निरवशेषस्य संसारिणो जीवस्य ते द्वे अपि शरीरे भवत इत्यर्थः ।

संसरणधर्मसामान्यादेकवचननिर्देशः ॥ २ ॥ संसरणधर्मसामान्ययोगादेकवचननिर्देशः

क्रियते। यदि हि कस्यचित्संसारिणस्ते न स्यातां संसारित्वमेवास्य न स्यात्। अविशेषाभिधानात्तैरौदारिकादिभिः सर्वस्य संसारिणो यौगपद्येन संबंधप्रसंगे संभविशरीरप्रदर्शनार्थमिदमुच्यते—

तदादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥ ४३ ॥

तद्ग्रहणं प्रकृतशरीरद्वयप्रतिनिर्देशार्थं ॥ १ ॥ प्रकृते द्वे शरीरे तैजसकार्मणे, तत्प्रतिनिर्देशार्थं तदित्युच्यते।

आदिशब्देन व्यवस्थावाचिना शरीरविशेषणं ॥ २ ॥ पूर्वसूत्रे व्यवस्थितानां शरीराणामानुपूर्व्यप्रतिपादनेनाऽऽदिशब्देन विशेषणं क्रियते, ते आदिर्येषां तानीमानि तदादीनीति।

पृथक्त्वादेव तेषां भाज्यग्रहणमनर्थकमिति चेन्न, एकस्य द्वित्रिचतुःशरीरसंबंधविभागोपपत्तेः ॥ ३ ॥ भाज्यानि, पृथक् कर्तव्यानीत्यर्थः। तान्यौदारिकादीनि परस्परत आत्मनश्च पृथग्भूतान्येव लक्षणभेदादतो भाज्यग्रहणमनर्थकमिति ? तन्न, किं कारणं ? एकस्य द्वित्रिचतुःशरीरसंबंधविभागोपपत्तेः कस्यचिदात्मनो द्वे तैजसकार्मणे, अपरस्य त्रीण्यौदारिकतैजसकार्मणानि, वैक्रियिकतैजसकार्मणानि वा, अन्यस्य चत्वार्यौदारिकाऽऽहारकतैजसकार्मणानीति विभागः क्रियते।

युगपदिति कालैकत्वे ॥ ४ ॥ युगपदित्ययं निपातः कालैकत्वे द्रष्टव्य एकस्मिन् काले, कालभेदे तु पंचापि भवंत्येव।

आङभिध्यर्थः ॥ ५ ॥ आङयमभिविध्यर्थो द्रष्टव्यः, तेन चत्वार्यपि कस्यचिद्भवंति। मर्यादायां सत्यां चत्वारि न स्युः। अथ पंच युगपत्कस्मान्न भवंतीति।

वैक्रियिकाहारकयोर्युगपदसंभवात् पंचाभावः ॥ ६ ॥ यस्य संयतस्याहारकं न तस्य वैक्रियिकं, यस्य देवस्य नारकस्य वा वैक्रियिकं न तस्याहारकमिति युगपत्पंचानामसंभवः। पुनरपि तेषां शरीराणां विशेषप्रतिपत्त्यर्थमाह—

निरुपभोगमंत्यं ॥ ४४ ॥

सूत्रक्रमापेक्षयांतेभवमंत्यं कार्मणं, निरुपभोगमिति वचनात् अर्थादापन्नमेतदितराणि सोपभोगानीति।

कर्मादाननिर्जरासुखदुःखानुभवनहेतुत्वात् सोपभोगमिति चेन्न विवक्षितापरिज्ञानात्॥ १॥ स्यान्मतं कार्मणकाययोगेन कर्मादत्ते निर्जरयति च, सुखदुःखं चानुभवति, ततः सोपभोगमेव न निरुपभोगमिति ? तन्न, किं कारणं ? विवक्षितापरिज्ञानात्। विवक्षितमुपभोगमपरिज्ञाय परेणेदं चोदितं। कोऽसौ विवक्षित उपभोगः ?

इंद्रियनिमित्तशब्दाद्युपलब्धिरुपभोगः ॥ २ ॥ इंद्रियप्रणालिकया शब्दादीनामुपलब्धिरुपभोग इत्युच्यते। विग्रहगतौ सत्यामपींद्रियोपलब्धौ द्रव्येंद्रियनिर्वृत्त्यभावाच्छब्दादिविषयानुभवनाभावान्निरुपभोगं कार्मणमिति कथ्यते। ननु तैजसमपि निरुपभोगं तत्र किमुच्यते निरुपभोगमंत्यं ? इत्यत आह—

तैजसस्य योगनिमित्तत्वाभावादनधिकारः ॥ ३ ॥ तैजसं शरीरं योगनिमित्तमपि न भवति ततोऽस्योपभोगविचारेऽनधिकारस्ततो योगनिमित्तेषु शरीरेष्वंत्यं निरुपभोगं। सोपभोगानीतराणीत्ययमर्थोऽत्र विवक्षितः। तत्राम्नातलक्षणेषु जन्मस्वमूनि शरीराणि प्रादुर्भावमापद्यमानानि किमविशेषेण भवंति उत कश्चिदस्ति प्रतिविशेषः ? अस्तीत्याह—

गर्भसंमूर्छनजमाद्यं ॥ ४५ ॥

सूत्रक्रमापेक्षयाऽऽदौ भवमाद्यमौदारिकमित्यर्थः। यद्गर्भजं यच्च समूर्छनजं तत्सर्वमौदारिकं द्रष्टव्यं। तदनंतरं यन्निर्दिष्टं तत्कस्मिन् जन्मनीत्यत आह—

औपपादिकं वैक्रियिकं ॥ ४६ ॥

उपपादे भवमौपपादिकं। अध्यात्मादित्वादिकः, तत्सर्वं वैक्रियिकं वेदितव्यं। यद्यौपपादिकं वैक्रियिकमनौपपादिकस्य वैक्रियिकत्वाभावः? इत्यत आह—

लब्धिप्रत्ययं च ॥ ४७ ॥

वैक्रियिकमित्यभिसंबध्यते—

प्रत्ययशब्दस्यानेकार्थत्वे विवक्षातः कारणगतिः ॥ १ ॥ अयं प्रत्ययशब्दोऽनेकार्थः क्वचिज्ज्ञाने वर्तते, यथार्थाभिधानप्रत्यया इति। क्वचित्सत्यतायां वर्तते, प्रत्ययं कुरु सत्यं कुर्वित्यर्थः। क्वचित्कारणे वर्तते मिथ्यादर्शनाविरतिप्रमादकषाययोगाः प्रत्यया इति। तत्रेह विवक्षातः कारणपर्यायवाची वेदितव्यः।

तपोविशेषर्द्धिप्राप्तिर्लब्धिः ॥ २ ॥ तपोविशेषाद् ऋद्धिप्राप्तिर्लब्धिरित्युच्यते, लब्धिः प्रत्ययो यस्य तल्लब्धिप्रत्ययं। अथ लब्ध्युपपादयो को विशेषः?

निश्चयकादाचित्कीकृतो विशेषो लब्ध्युपपादयोः ॥ ३ ॥ उपपादो हि निश्चयेन भवति जन्मनिमित्तत्वात्? लब्धिस्तु कादाचित्कीति जातस्य सत उत्तरकालं तपोविशेषाद्यपेक्षत्वात्, इत्ययमनयोर्विशेषः

सर्वशरीराणां विनाशित्वाद्वैक्रियिकविशेषानुपपत्तिरिति चेन्न विवक्षितापरिज्ञानात् ॥४॥ स्यान्मतं विक्रिया विनाशः, सा च सर्वशरीराणां साधारणी मुहुर्मुहुरुपचयापचयधर्मत्वाद् उच्छेदाच्च, ततो न वैक्रियिके कश्चिद्विशेषोऽस्तीति? तन्न, किं कारणं? विवक्षितापरिज्ञानात्। नात्र विक्रियेति विनाशो विवक्षितः, किं तर्हि? विविधकरणं विक्रिया, सा द्वेधा—एकत्वविक्रिया पृथक्त्वविक्रिया चेति। तत्रैकत्वविक्रिया स्वशरीरादपृथग्भावेन सिंहव्याघ्रहंसकुररादिभावेन विक्रिया। पृथक्त्वविक्रिया स्वशरीरादन्यत्वेन प्रासादमंडपादि विक्रिया। सा, उभयी च विद्यते भवनवासिव्यंतरज्योतिष्ककल्पवासिनां। वैमानिकानां आसर्वार्थसिद्धेः प्रशस्तरूपैकत्वविक्रियैव। नारकाणां त्रिसूलचक्रासिमुद्गरपरशुभिंडिमालाद्यनेकायुधैकत्वविक्रिया न पृथक्त्वविक्रिया। आ षष्ठ्याः सप्तम्यां महागोकीटप्रमाणलोहितकुंथुरूपैकत्वविक्रिया, नानैकप्रहरणविक्रिया, न च पृथक्त्वविक्रिया। तिरश्चां मयूरादीनां कुमारादिभावं प्रति विशिष्टैकत्वविक्रिया, न पृथक्त्वविक्रिया। मनुष्याणां तपोविद्यादिप्राधान्यात्प्रतिविशिष्टैकत्वपृथक्त्वविक्रिया। किमेतदेव लब्ध्यपेक्षमुतान्यदप्यस्ति? इत्यत आह—

तैजसमपि ॥ ४८ ॥

ननु च वैक्रियिकानंतरमाहारकं वक्तव्यमकालप्राप्तं तैजसं किमर्थमिहोच्यते?

लब्धिप्रत्ययापेक्षार्थं तैजसग्रहणं ॥ १ ॥ लब्धिप्रत्ययमित्यनुवर्तते, तदभिसमीक्ष्येह तैजसग्रहणं क्रियते। वैक्रियिकानंतरं यदुपदिष्टं तस्य स्वरूपनिर्धारणार्थं स्वामिनिर्देशनार्थं चाह—

शुभं विशुद्धमव्याघाति चाहारकं प्रमत्तसंयतस्यैव ॥ ४९ ॥

शुभकारणत्वाच्छुभव्यपदेशोऽन्नप्राणवत् ॥१॥ यथा प्राणकारणेष्वन्नेषु प्राणव्यपदेशः, "अन्नं वै प्राणा इति" तथा शुभकर्मण आहारकाययोगस्य कारणत्वादाहारकं शरीरं शुभमित्युच्यते।

विशुद्धकार्यत्वाद्विशुद्धाभिधानं कार्पासतंतुवत् ॥ २ ॥ यथा कार्पासकार्येषु तंतुषु कार्पासव्यपदेशः कार्पासास्तंतव इति। तथा विशुद्धस्य पुण्यकर्मणोऽशवलस्य निरवद्यस्य कार्यत्वाद्विशुद्धमित्याख्यायते।

उभयतो व्याघाताभावादव्याघाति ॥ ३ ॥ न ह्याहारकशरीरेणान्यस्य व्याघातो नाप्यन्येनाहारकस्येत्युभयतो व्याघाताभावादव्याघातीति व्यपदिश्यते।

चशब्दस्तत्प्रयोजनसमुच्चयार्थः ॥ ४ ॥ तस्य प्रयोजनसमुच्चयार्थश्चशब्दः क्रियते। तद्यथा—

कदाचिल्लब्धिविशेषसद्भावज्ञानार्थं, कदाचित्सूक्ष्मपदार्थनिर्धारणार्थं, संयमपरिपालनार्थं च भरतैरावतेषु केवलिविरहे जातसंशयस्तन्निर्णयार्थं महाविदेहेषु केवलिसकाशं जिगमिषुरौदारिकेण मे महानसंयमो भवतीति विद्वानाहारकं निर्वर्तयति ।

आहारकमिति प्रागुक्तस्य प्रत्याम्नायः ॥ ५ ॥ एवं प्रकारमाहारकमित्येतस्य प्रतिपादनार्थं पुनस्तस्य प्रत्याम्नायः क्रियते ।

प्रमत्तसंयतग्रहणं स्वामिविशेषप्रतिपत्त्यर्थं ॥ ६ ॥ यदाहारकशरीरं निर्वर्तयितुमारभते तदा प्रमत्तो भवतीति प्रमत्तसंयतस्येत्युच्यते ।

इष्टतोऽवधारणार्थमेवकारोपादानं ॥ ७ ॥ यथैव विज्ञायते प्रमत्तसंयतस्यैवाहारकं नान्यस्येति । मैवं विज्ञायि प्रमत्तसंयतस्याहारकमेवेति माऽभूदौदारिकादिनिवृत्तिरिति ।

एषां शरीराणां परस्परतः संज्ञास्वालक्षण्यस्वकारणस्वामित्वसामर्थ्यप्रमाणक्षेत्रस्पर्शनकालांतरसंख्याप्रदेशभावाल्पबहुत्वादिभिर्विशेषोवसेयः ॥ ८ ॥ उक्तानुक्तार्थसंग्रहार्थमिदं वाक्यं । तत्र संज्ञातोऽन्यत्वमौदारिकादीनां घटपटादिवत् । स्वालक्षण्यान्नानात्वं, स्थौल्यलक्षणमौदारिकं । विविधर्द्धिगुणयुक्तविकरणं वैक्रियिकं । दुरधिगमसूक्ष्मपदार्थतत्त्वनिर्णयलक्षणमाहारकं । शंखधवलप्रभालक्षणं तैजसं । तद्द्विविधं निःसरणात्मकमितरच्च । औदारिकवैक्रियिकाहारकदेहाभ्यंतरस्थं देहस्य दीप्तिहेतुरनिःसरणात्मकं । यतेरुग्रचारित्रस्यातिक्रुद्धस्य जीवप्रदेशसंपृक्तं बहिर्निष्क्रम्य दाह्यं परिवृत्यावतिष्ठमानं निष्पावकहरितपरिपूर्णं स्थालीमग्निरिव पचति पक्त्वा च निवर्तते, अथ चिरमवतिष्ठते अग्निसाद्दाह्योऽर्थो भवति तदेतन्निःसरणात्मकं । सर्वकर्मशरीरप्ररोहलक्षणं कार्मणं । स्वकारणतोऽन्यत्वं– औदारिकशरीरनामकरणमौदारिकं, वैक्रियिकशरीरनामकारणं वैक्रियिक, आहारकशरीरनामकरणमाहारकं, तैजसशरीरनामकारणं तैजसं, कार्मणशरीरनामकारणं कार्मणं । स्वामिभेदादन्यत्वं– औदारिकं तिर्यङ्मनुष्याणां, वैक्रियिकं देवनारकाणां, तेजो वायुकायिकं, पंचेंद्रियतिर्यङ्मनुष्याणां च केषांचित् । आह चेदेकः जीवस्थाने योगभंगे सप्तविधकाययोगश्च तिर्यङ्मनुष्याणां, वैक्रियिककाययोगो वैक्रियिकमिश्रकाययोगश्च देवनारकाणामुक्तः, इह तिर्यङ्मनुष्याणामपीत्युच्यते– तदिदमार्षविरुद्धं, इत्यत्रोच्यते न, अन्यत्रोपदेशात् । व्याख्याप्रज्ञप्तिदंडकेषु शरीरभंगे वायोरौदारिकवैक्रियिकतैजसकार्मणानि चत्वारि शरीराण्युक्तानि मनुष्याणां च एवमप्यार्षयोरनयोर्विरोधः, न विरोध अभिप्रायकत्वाज्जीवस्थाने सर्वदेवनारकाणां सर्वकालवैक्रियिकदर्शनात् तद्योगविधिरित्यभिप्रायः नैवं तिर्यङ्मनुष्याणां लब्धिप्रत्ययं वैक्रियिकं सर्वेषां सर्वकालमस्ति कादाचित्कत्वाद्व्याख्याप्रज्ञप्तिदंडकेष्वस्तित्वमात्रमभिप्रेत्योक्तं । आहारकं प्रमत्तसंयतस्य । तैजसकार्मणे सर्वसंसारिणां । सामर्थ्यतोऽन्यत्वं– औदारिकस्य सामर्थ्यं द्वेधा भवगुणप्रत्ययत्वात्, तिर्यङ्मनुष्याणामिहाष्टपदचक्रधरवासुदेवादीनां प्रकृष्टविकृष्टवीर्यदर्शनाद्भवप्रत्ययं । तपोबलानामृषीणां यच्छरीरविकरणसामर्थ्यं तद्गुणप्रत्ययं । तपःसामर्थ्यं तदिति चेन्नौदारिकशरीरादृते तपसः केवलस्य शरीरविकरणसामर्थ्याभावात् । वैक्रियिकस्य सामर्थ्यं मेरुप्रचलनसकलमहीमंडलोद्वर्तनादि । आहारकस्य सामर्थ्यमप्रतिहतवीर्यता । वैक्रियिकस्याप्यप्रतिहतसामर्थ्यं वज्रपटलादिष्वप्रतिघातदर्शनात् ? इति चेन्नेंद्रसामानिकादीनां प्रकर्षदर्शनादनंतवीर्ययतिना चेंद्रवीर्यस्य प्रतिघातश्रुतेः सप्रतिघातसामर्थ्यं वैक्रियिकं । सर्वाणि चाहारकशरीराणि तुल्यवीर्यत्वादप्रतिहतत्वाच्चाऽप्रतिघातवीर्याणि । तैजसस्य सामर्थ्यं कोपप्रसादापेक्षं दाहानुग्रहरूपं । कार्मणस्य सामर्थ्यं सर्वकर्मावकाशदानं । प्रमाणतोऽन्यत्वं । सर्वजघन्येनांगुलासंख्येयभागप्रमाणं सूक्ष्मनिगोतौदारिकं, उत्कर्षेण साधिकयोजनसहस्रप्रमाणं नंदीश्वरवापीपद्मौदारिकं । वैक्रियिकं मूलशरीरतो जघन्येनारत्निप्रमाणं सर्वार्थसिद्धिदेवस्य, उत्कर्षेण पंचधनुःशतप्रमाणं, तमस्तमः प्रभायां नारकस्य विक्रियियोत्कर्षेण जंबूद्वीपप्रमाणं, वैक्रियिक शरीरं विकरोति देवः । आहारकमरत्निप्रमाणं । तैजसकार्मणे जघन्येन यदोपात्तौदारिकशरीर

प्रमाणे, उत्कर्षेण केवलिसमुद्घाते सर्वलोकप्रमाणे। क्षेत्रतोऽन्यत्वं– औदारिकवैक्रियिकाहारकाणि लोकस्यासंख्येयभागक्षेत्रे। तैजसकार्मणे लोकस्यासंख्येयभागेऽऽसंख्येयेषु भागेषु सर्वलोके वा प्रतरलोकपूरणयोः। स्पर्शनतोऽन्यत्वं– औदारिकादानीमेकजीवं प्रति वक्ष्यामः। औदारिकेण तिर्यग्भिः सर्वलोकः स्पृष्टः। मनुष्यैः लोकस्यासंख्येयभागः। मूलवैक्रियिकशरीरेण लोकस्यासंख्येयभागा उत्तरवैक्रियिकेणाऽष्टौ चतुर्दशभागा देशोनाः, कथं? सौधर्मदेवाः स्वपरप्रधान्यादारणाच्युतविहारात् षड्रज्जुर्गच्छंति स्वप्राधान्यात्, अथ आ वालुकपृथिव्या द्वे रज्जू इति। आहारकेण लोकस्यासंख्येयभागं स्पृशति, तैजसकार्मणाभ्यां सर्वलोकं। कालतोऽन्यत्वं– एकं जीवं प्रति वक्ष्यामः। मिश्रकं वर्जयित्वौदारिकस्य तिर्यङ्मनुष्याणां जघन्येनांतर्मुहूर्तः, उत्कर्षेण त्रीणि पल्योपमान्यंतर्मुहूर्तोनानि, स चांतर्मुहूर्तोऽपर्याप्तकालः। वैक्रियिकस्य देवान्प्रति मूलवैक्रियिकदेहस्य जघन्येन दशवर्षसहस्राण्यपर्याप्तकालांतर्मुहूर्तोनानि, उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाण्यपर्याप्तकालांतर्मुहूर्तोनानि, उत्तरवैक्रियिकस्य जघन्य उत्कृष्टश्चांऽतर्मुहूर्तः। तीर्थकरजन्मनंदीश्वरार्हदायतनादिपूजासु कथमिति चेत् पुनः पुनर्विकरणात्सातत्यावच्छेदः। आहारकस्य कालो जघन्यउत्कृष्टाश्चांतर्मुहूर्तः, तैजसकार्मणयोः संतत्यादेशादभव्यान्प्रत्यनादिरपर्यवसानः कालः। भव्यांश्च कांश्चित्प्रति येऽनंतेनापि कालेन न सेत्स्यंति। ये सेत्स्यंति तान् प्रत्यनादिः सपर्यवसान एकसमयिकः। निषेकं प्रति तैजसस्य षट्षष्टिसागरोपमाणि। कार्मणस्य कर्मस्थितिः सप्ततिसागरोपमकोटिकोट्यः। अंतरेऽन्यत्वमौदारिकादीनामेकजीवं प्रति वक्ष्यामि– मिश्रकं वर्जयित्वौदारिकस्यातर्मुहूर्तांतरं जघन्यं, कतरोंतर्मुहूर्तः? औदारिकमिश्रकालोनमुहूर्तः। कथं? इह चातुर्गतिकः तिर्यङ्मनुष्येषूत्पन्नोंतर्मुहूर्तमपर्याप्तको भूत्वा पर्याप्तकत्वं प्राप्यांतर्मुहूर्तं जीवित्वा मृतः, पुनस्तिर्यङ्मनुष्ययोरन्यतरत्रोत्पन्नः अपर्याप्तिकीमांतर्मुहूर्तिकीमनुभूय पर्याप्तको जातः, लब्धमौदारिकांतरं। उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि सातिरेकाणि। कथं? यो मनुष्यस्त्रयस्त्रिंशत्सागरोपमायुष्षु देवेषूत्पद्य स्थितिक्षये प्रच्युतः पुनर्मनुष्येषूत्पद्यते तस्य यो पर्याप्तिकालस्तेनाधिकानि त्रयस्त्रिंशत्सागरोपमाणि। वैक्रियिकस्य जघन्यमंतरमंतर्मुहूर्तः, कथं? मनुष्यस्तिर्यग्वा मृतः, दशवर्षसहस्रायुष्कदेवेषूत्पद्य च्युतः मनुष्येषु तिर्यक्षु चोत्पद्याऽपर्याप्तकालमनुभूय पुनर्देवायुर्बद्ध उत्पद्यते लब्धमंतरं, वैक्रियिकस्योत्कर्षेणांतरमनंतकालः, कथं? देवत्वाच्च्युतोऽनंतकालं तिर्यङ्मनुष्येष्वटित्वा देवो जातः, अपर्याप्तकालमनुभूय वैक्रियिकशरीरो दृष्टः लब्धमंतरं, आहारकस्यांतरं जघन्यमंतर्मुहूर्तः प्रमत्तसंयत आहारकं निर्वर्त्यांतर्मुहूर्तमाहारकेण स्थितः प्रकृताहारकशरीरकार्यमुपसंहृत्य पुनर्लब्धमंनिधानादंतर्मुहूर्तमवस्थाय निर्वर्तयतीति लब्धमंतरं। उत्कर्षेणार्धपुद्गलपरिवर्तोऽतर्मुहूर्तोनः, कथं? योऽनादिमिथ्यादर्शनमोहमुपशम्योपशमसम्यक्त्वं संयमं च युगपत्प्रतिपन्न उपशमसम्यक्त्वाच्च्युतो वेदकं सम्यक्त्वेनोत्पद्यान्तर्मुहूर्तस्थितः सन्नप्रमत्तसंयतस्थाने आहारकं बध्वा ततः प्रमत्तसंयतो निर्वर्त्य मूलशरीरं प्रविश्य मिथ्यात्वं गतः सोऽर्धपुद्गलपरिवर्तं देशोनमटित्वा मनुष्येषूत्पद्य पूर्वविधिना सम्यक्त्वमुत्पाद्याऽसंयतसम्यग्दृष्टिसंयतासंयतयोऽन्यतरत्र दर्शनमोहं क्षपयित्वा संयमं प्रतिपद्याप्रमत्ताहारस्य बंधकः प्रमत्तो निर्वर्तयतीति लब्धमंतरं। अत्र ये क्षयोपशमप्राथमिकाश्चत्वारोंतर्मुहूर्तास्ते कतरे? प्रथमो दर्शनमोहोपशमसम्यक्त्वसमानकालसंयमांतर्मुहूर्तः। द्वितीयो वेदकसम्यक्त्वांतर्मुहूर्तः। तृतीय आहारकबंधांतर्मुहूर्तः। चतुर्थ आहारकनिर्वृत्त्यंतर्मुहूर्तः। एते चत्वार आद्या अंतर्मुहूर्ता उत्तरकालमाहारकशरीर निर्वृत्त्यंतर्मुहूर्तः पंचमो मूलशरीरं प्रविश्य प्रमत्ताप्रमत्ताभ्यां बहून्वाराननुभवतो बहवोंतर्मुहूर्ता अतोऽधः प्रवृत्तकरणविशुद्ध्या विशुद्धो विश्रांतः। अपूर्वकरणानिवृत्तिसूक्ष्मसांपरायक्षीणकषायसयोग्ययोगिनामेकैकोऽतर्मुहूर्त इयता कालेन हीनोऽर्धपुद्गलपरिवर्तः। तैजसकार्मणयोर्नास्त्यंतर सर्वसंसारिषु सर्वकालं संनिधानात्। संख्यातोऽन्यत्वं– औदारिकाण्यसंख्येया लोकाः, वैक्रियिकाण्यसंख्याताः श्रेणयो लोकप्रतरस्यासंख्येयभागः, आहारकाणि संख्येयानि चतुः पंचाशतः, तैजसकार्मणान्यनंतानि अनंतानंतलोकाः। प्रदेशतोऽन्यत्वं– औदारिकस्यानंताः प्रदेशाः अभव्यानामनंतगुणाः सिद्धानामनंतभागाः। एवं शेषाणां चतुर्णामपि शरीराणामनंतस्यानंतविकल्पत्वादुत्तरोत्तराण्यधिकानि, आधिक्यपरिमाणं प्रागुक्तं। भावतोऽन्यत्वं– औदारिकादित्वशरीर-

नामोदयात्सर्वाण्यौदयिकभावाः। अल्पबहुत्वतोऽन्यत्वं– सर्वतः स्तोकान्याहारकाणि, वैक्रियिकाण्यसंख्येयगुणानि को गुणकारः असंख्याताः ? श्रेणयः, लोकप्रतरस्यासंख्येयभागः, तत औदारिकाणि असंख्येयगुणानि। को गुणकारः ? असंख्येया लोकाः। तजैसकार्मणानामनंतगुणानि को गुणकारः सिद्धानामनंतगुणाः। आत्माधिश्रितकार्मणनिमित्तविजृंभितानि शरीराणि बिभ्रतां संसारिणां चातुर्विध्यवतामिंद्रियसंबंधप्रतिविकल्पभाजां प्रतिप्राणिनः किं त्रिलिंगसन्निधानमुतलिंगानियमः कश्चिदस्तीत्यत उत्तरं पठति—

नारकसंमूर्छिनो नपुंसकानि ॥ ५० ॥

धर्मार्थकाममोक्षकार्यनरणान्नराः ॥ १ ॥ धर्मार्थकाममोक्षलक्षणानि कार्याणि नृणंति नयंतीति नराः।

नरान् कायंतीति नरकाणि ॥ २ ॥ शीतोष्णासद्वेद्योदयापादितवेदनया नरान् कायंति शब्दायंत इति नरकाणि।

नृणंतीति वा ॥ ३ ॥ अथवा पापकृतः प्राणिन आत्यंतिकं दुःखं नृणंति नयंतीति नरकाणि। औणादिकः कर्तर्यकः।

नरकेषु भवा नारकाः ॥ ४ ॥

संमूर्छनं संमूर्छ सः एषामस्तीति संमूर्छिनः ॥५॥ नारकाश्च संमूर्छिनश्च नारकसंमूर्छिनः।

नपुंसकवेदाशुभनामोदयान्नपुंसकानि ॥ ६ ॥ चारित्रमोहविकल्पनोकषायभेदस्य नपुंसकवेदस्याशुभनाम्नश्चोदयान्न स्त्रियो न पुमांस इति नपुंसकानि भवंति। नारकसंमूर्छिनो नपुंसकान्येवेति नियमः। तत्र हि स्त्रीपुंसविषया मनोज्ञशब्दगंधरूपरसस्पर्शसंबंधनिमित्ताऽल्पापि सुखमात्रा नास्ति। यद्येवमवध्रियतेऽर्थादापन्नमेतदुक्तेभ्योऽन्ये ये संसारिणः, तेषां त्रिलिंगत्वमिति। यत्रात्यंतनपुंसकलिंगस्याभावस्तत्प्रतिपादनार्थमाह—

न देवाः ॥ ५१ ॥

स्त्रीपुंसविषयनिरतिशयसुखानुभवनाद्देवेषु नपुंसकाभावः ॥ १ ॥ स्त्रैणं पौंस्नं च यन्निरतिशयं सुखं शुभगतिनामोदयापेक्षं तद्देवानुभवंतीति न तेषु नपुंसकानि संति तच्चोपरि वक्ष्यते। अथेतरे कियल्लिंगा इत्यत आह—

शेषास्त्रिवेदाः ॥ ५२ ॥

त्रयो वेदा येषां ते त्रिवेदाः के पुनस्ते ? स्त्रीत्वं पुंस्त्वं नपुंसकत्वमिति। कथं तेषां सिद्धिः ?

नामकर्मचारित्रमोहनोकषायोदयाद्वेदत्रयसिद्धिः ॥ १ ॥ नामकर्मणश्चारित्रमोहविकल्पस्य नोकषायस्य चोदयाद्वेदत्रयस्य सिद्धिर्भवति। वेद्यत इति वेदो लिंगमित्यर्थः तल्लिंगं द्विविधं द्रव्यलिंगं भावलिंगं चेति। नामकर्मोदयाद्योनिमेहनादि द्रव्यलिंगं भवति। नोकषायोदयाद्भावलिंगं। तत्र स्त्रीवेदोदयात्स्त्यायत्यस्यां गर्भ इति स्त्री, पुंवेदोदयात्सूते जनयत्यपत्यमिति पुमान्, नपुंसकवेदोदयात्तदुभयशक्तिविकलं नपुंसकं। रूढिशब्दाश्चैते। रूढिषु च क्रिया व्युत्पत्त्यर्थैव, यथा गच्छतीति गौरिति। इतरथा हि गर्भधारणादिक्रियाप्राधान्ये बालवृद्धानां तिर्यङ्मनुष्याणां देवानां कार्मणकाययोगस्थानां च तदभावात्स्त्रीत्वादिव्यपदेशो न स्यात्। तत्र हि स्त्रीवेदोऽगारवत् पुंवेदस्तृणाग्निवत् इष्टकाग्निवन्नपुंसकवेदस्त एते त्रयोऽपि वेदाः शेषाणां गर्भजानां भवंति। य इमे जन्मयोनिशरीरलिंगसंबंधाहितविशेषाः प्राणिनो निर्दिश्यंत देवादयो विचित्रधर्माधर्मवशीकृताश्चतसृषु गतिषु शरीराणि धारयंतः किं यथाकालमुपभुक्तायुषो मूर्त्यंतराण्यास्कंदंति उतायथाकालमपीत्यत उत्तरं पठति—

औपपादिकचरमोत्तमदेहा संख्येयवर्षायुषोऽनपवर्त्यायुषः ॥ ५३ ॥

औपपादिका उक्ताः ॥ १ ॥ उक्ता व्याख्याता औपपादिका देवनारका इति ।

चरमशब्दस्यांतवाचित्वात्तज्जन्मनि निर्वाण हेग्रहणं ॥ २ ॥ चरमशब्दोऽन्त्यपर्यायवाची चरमो देहो येषां त इमे चरमदेहा इति पर्यंतसंसारास्तज्जन्मनिर्वाणार्हा गृह्यंते ।

उत्तमशब्दस्योत्कृष्टवाचित्वाच्चक्रधरादिग्रहणं ॥ ३ ॥ अयमुत्तमशब्द उत्कृष्टवाची उत्तमो देहो येषां त इमे उत्तमदेहा इति चक्रधरादिग्रहणं वेदितव्यं ।

उपमाप्रमाणगम्यायुषोऽसंख्येयवर्षायुषः ॥ ४ ॥ अतीतसंख्यानामुपमाप्रमाणेन पल्यादिना गम्यमायुर्येषां त इमेऽसंख्येयवर्षायुषस्तिर्यङ्मनुष्याणामुत्तरकुर्वादिषु प्रसूताः ।

बाह्यप्रत्ययवशादायुषो ह्रासोपवर्तः ॥ ५ ॥ बाह्यस्योपघातनिमित्तस्य विषशस्त्रादेः सति सन्निधाने ह्रासोऽपवर्त इत्युच्यते । अपवर्त्यमायुर्येषां त इमेऽपवर्त्यायुषः, नापवर्त्यायुषोऽनपवर्त्यायुषः, एते औपपादिकादय उक्ता अनपवर्त्यायुषो न हि तेषामायुषो बाह्यनिमित्तवशादपवर्तोऽस्ति ।

अंत्यचक्रधरवासुदेवादीनामायुषोपवर्तदर्शनादव्याप्तिः ॥ ६ ॥ उत्तमदेहाश्चक्रधरादयोऽनपवर्त्यायुष इत्येतत् लक्षणमव्यापि । कुतः ? अंतस्य चक्रधरस्य ब्रह्मदत्तस्य वासुदेवस्य च कृष्णस्य अन्येषां च तादृशानां बाह्यनिमित्तवशादायुरपवर्तदर्शनात् ?

न वा चरमशब्दस्योत्तमविशेषणत्वात् ॥ ७ ॥ न वैषदोषः किं कारणं ? चरमशब्दस्योत्तमविशेषणत्वात् । चरम उत्तमो देह एषां ते चरमोत्तमदेहा इति ।

उत्तमग्रहणमेवेति चेन्न तदनिवृत्तेः ॥ ८ ॥ स्यादेतदुत्तमग्रहणमेवास्तु उत्तमदेहा इति ? तन्न किं कारणं ? तदनिवृत्तेः, यो दोष उक्तोऽव्याप्तिरिति स तदवस्थ एव तेषामप्युत्तमदेहत्वात् ।

चरमग्रहणमेवेति चेन्न तस्योत्तमत्वप्रतिपादनार्थत्वात् ॥ ९ ॥ स्यान्मतं चरमग्रहणमेवास्तु चरमदेहा इति नार्थ उत्तमग्रहणेनेति ? तन्न किं कारणं ? तस्योत्तमत्वप्रतिपादनार्थत्वात् । स हि चरमो देहः सर्वेषामुत्तम इत्यर्थः प्रतिपाद्यते । चरमदेहा इति केषांचित्पाठ एतेषां नियमेनायुरनपवर्त्यमितरेषामनियमः ।

अप्राप्तकालस्य मरणानुपलब्धेरपवर्ताभाव इति चेन्न दृष्टत्वादाम्रफलादिवत् ॥१०॥ यथावधारितपाककालात्प्राक् सोपायोपक्रमे सत्याम्रफलादीनां दृष्टः पाकस्तथा परिच्छिन्नमरणकालात् प्रागुदीरणाप्रत्यय आयुषो भवत्यपवर्तः ।

आयुर्वेदसामर्थ्याच्च ॥ ११ ॥ यथाष्टांगायुर्वेदविद्भिषक् प्रयोगेतिनिपुणो यथाकालवाताद्युदयात्प्राग्वमनविरेचनादिनानुदीर्णमेव श्लेष्मादि निराकरोति । अकालमृत्युव्युदासार्थं रसायनं चोपदिशत्यन्यथा रसायनोपदेशस्य वैयर्थ्यं न चादोऽस्ति ? अत आयुर्वेदसामर्थ्यादस्त्यकालमृत्युः ।

दुःखप्रतीकारार्थ इति चेन्नोभयथा दर्शनात् ॥ १२ ॥ स्यान्मतं दुःखप्रतीकारोर्थ आयुर्वेदस्येति ? तन्न किं कारणं ? उभयथा दर्शनात् । उत्पन्नवेदनयोर्हि चिकित्सादर्शनात् ।

कृतप्रणाशप्रसंग इति चेन्न दत्त्वैव फलं निवृत्तेः ॥ १३ ॥ स्यान्मतं यद्यकालमृत्युरिति कृतप्रणाशः प्रसज्यते इति ? तन्न किं कारणं ? दत्त्वैव फलं निवृत्तेर्नाकृतस्य कर्मणः फलमुपभुज्यते नच कृतकर्मफलविनाशः, अनिर्मोक्षप्रसंगात्, दानादिक्रियारंभाभावप्रसंगाच्च । किंतु कृतं कर्म कर्त्रे फलं दत्त्वैव निवर्तते विततार्द्रपटशोषवत् अयथाकालनिर्वृत्तः पाक इत्ययं विशेषः ।

इति तत्त्वार्थवार्तिके व्याख्यानालंकारे द्वितीयोध्यायः ॥ २ ॥

अथ तृतीयोध्यायः ।

ओंनमः सिद्धेभ्यः ।

मोक्षमार्गे त्रिविधे कृते आदावुपदिष्टस्य सम्यग्दर्शनस्य विषयप्रदर्शनार्थे जीवादिपदार्थोपदेशे कर्तव्ये जीवा निर्दिष्टाः । इदानीं तदधिष्ठानव्याख्यानप्रसंगेन लोकविभागो वक्तव्यः स पुनस्त्रिविधः अधोलोकस्तिर्यग्लोक ऊर्ध्वलोकः । तत्र क्रमप्राप्तस्याऽधोलोकस्य वर्णनार्थमुच्यते। अथवा संवेगहेतुत्वात् स नारकीः शीतोष्णनिमित्ताः सुतीव्रवेदनाः श्रुत्वाऽयं कथं संविग्नः स्यादिति प्रथममधोलोक उच्यते । अथवा भवप्रत्ययोवधिर्देवनारकाणामित्येवमादिषु नारकाः श्रुताः, ततः पृच्छति के ते नारका? इति तत्प्रतिपादनार्थं तदधिकरणनिर्देशः क्रियते—

रत्नशर्करावालुकापंकधूमतमोमहातमःप्रभाभूमयो घनांबुवाताकाशप्रतिष्ठाः सप्ताधोधः ॥ १ ॥

रत्नादीनामितरेतरयोगे द्वंद्वः ॥ १ ॥ रत्नं च शर्करा च वालुका च पंकश्च धूमश्च तमश्च महातमश्च रत्नशर्करावालुकापंकधूमतमोमहातमांसीति इतरेतरयोगे द्वंद्वो द्रष्टव्यः ।

प्रभाशब्दस्य प्रत्येकं परिसमाप्तिर्भुजिवत् ॥ २ ॥ यथा देवदत्तजिनदत्तगुरुदत्ता भोज्यंतामिति प्रत्येकं भुजिः परिसमाप्यते । एवं प्रभाशब्दस्यापि प्रत्येकं परिसमाप्तिर्वेदितव्या । रत्नप्रभा शर्कराप्रभा वालुकाप्रभा पंकप्रभा धूमप्रभा तमःप्रभा महातमःप्रभा चेति ।

साहचर्यात्ताच्छब्द्यसिद्धिर्यष्टिवत् ॥ ३ ॥ यथा यष्टिसहचरितो देवदत्तो यष्टिरित्युच्यते तथा चित्र-वज्र-वैडूर्य-लोहित-क्षमसार-गल्व-गोमेद-प्रवाल-ज्योती-रसांजन-मूलकांक-स्फटिक-चंदन-वर्चक-वकुल-शिलामयाख्यषोडशधापरिक्लृप्तरत्नप्रभासहचरितत्वाद्रत्नप्रभा भूमिः । शर्कराप्रभासहचरिता शर्कराप्रभा, वालुकाप्रभासहचरिता वालुकाप्रभा, पंकप्रभासहचरिता पंकप्रभा, धूमप्रभासहचरिता धूमप्रभा, तमःप्रभासहचरिता तमःप्रभा, महातमःप्रभासहचरिता महातमःप्रभेति ।

तमःप्रभेति विरुद्धमिति चेन्न स्वात्मप्रभोपपत्तेः ॥ ४ ॥ स्यन्मतं तमोंधकारः, प्रभा प्रकाश इति विरुद्धावेतावर्थौ यदि तमो न प्रभा, अथ प्रभा न तमस्तमःप्रभेत्यभिधानमनुपपन्नमिति? तन्न किं, कारणं? स्वात्मप्रभोपपत्तेः । न दीप्तिरूपैव प्रभा किं तर्हि द्रव्याणां स्वात्मैव मृजा प्रभा यत्संनिधानान्मनुष्यादीनामयं संव्यवहारो भवति स्निग्धकृष्णप्रभमिदं रूक्षकृष्णप्रभमिति ततस्तमःप्रभेति ।

भेदे रूढिशब्दानामगमकत्वमवयवार्थाभावादिति चेन्न सूत्रस्य प्रतिपादनोपायत्वात् ॥५॥ स्यादेतद्यद्येते नैमित्तिकाः रूढिशब्दाः भेदे गमकत्वमेषां नास्ति कुतोऽवयवार्थाभावादिति? तन्न किं,कारणं सूत्रस्य प्रतिपादनोपायत्वात् तेषां संज्ञाशब्दानां प्रतिपादनोपायभूतमिदमस्मान्निर्वचनस्थानाच्छब्दांतराण्युपप्लवंते यैरर्थाः संज्ञायंते ।

भूमिग्रहणमधिकरणविशेषप्रतिपत्त्यर्थं ॥ ६ ॥ यथा स्वर्गपटलानि भूमिमनाश्रित्याऽवस्थितानि न तथा नारकावासाः किं तर्हि? भूमीराश्रित्य व्यवस्थिता इत्यधिकरणविशेषप्रतिपत्त्यर्थं भूमिग्रहणं ।

घनांब्वादिग्रहणं तदालंबननिर्ज्ञानार्थं ॥ ७ ॥ तासां भूमीनामालंबननिर्ज्ञानार्थं घनांब्वादिग्रहणं क्रियते घनमेवांबु घनांबु घनांबु च वातश्चाकाशं च घनांबुवाताकाशानि तानि प्रतिष्ठाऽऽश्रयो यासां ता घनांबुवाताकाशप्रतिष्ठाः । सर्वा एता भूमयः घनोदधिवलयप्रतिष्ठाः, घनोदधिवलयं घनवातवलयप्रतिष्ठं,घनवातवलयं तनुवातवलयप्रतिष्ठं, तनुवातवलयमाकाशप्रतिष्ठमाकाशमात्मप्रतिष्ठं, तस्यैवाधाराधेयत्वात् । त्रीण्यप्येतानि

वलयान्यन्वर्थसंज्ञानि प्रत्येकं विंशतियोजनसहस्रबाहुल्यानि । तत्र घनोदधयो मुद्गसन्निभाः, घनवाता गोमूत्रवर्णाः, अव्यक्तवर्णास्तनुवाताः । तत्र रत्नप्रभाया बाहुल्यमेकयोजनशतसहस्रमशीतिश्च योजनसहस्राणि । तस्यास्त्रयोभागाः खरपृथिवीभागः,पंकबहुलः,अब्बहुलश्चेति । तत्र चित्रादिषोडशधाप्रकल्पसरत्नांचितः खरपृथिवीभागः षोडशयोजनसहस्रबहुलः।पंकबहुलः चतुरशीतियोजनसहस्रबहुलः।अब्बहुलोऽशीतियोजनसहस्रबहुलः। तत्र खरपृथिवीभागस्योपर्यधश्चैकैकं योजनसहस्रं परित्यज्य मध्यमभागेषु चतुर्दशसु योजनसहस्रेषु किंनरकिंपुरुषमहोरगगंधर्वयक्षराक्षसभूतपिशाचानां सप्तानां व्यंतराणां, नागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराणां नवानां भवनवासिनां चावासाः । पंकबहुलभागेऽसुरराक्षसानामावासाः । अब्बहुलभागे नरकाणि । शर्कराप्रभाया बाहुल्यं द्वात्रिंशद्योजनसहस्राणि ततोधोधस्तानि चतुर्भिश्चतुर्भिर्योजनसहस्रोनानि बाहुल्यानि वेदितव्यानि आषष्ठ्याः । सप्तम्या अष्टौ योजनसहस्राणि । सर्वासां तासामंतराणि तिर्यक् चासंख्येया योजनकोटीकोट्यः ।

सप्तग्रहणमियत्तावधारणार्थं ॥ ८ ॥ यथा गम्येत सप्तैव नरकाधारभूमयो नाष्टौ न षट् चेति संख्यांतरनिवृत्त्यर्थं । संति हि केचित्तत्रांतरीयाः अनंतेषु लोकधातुष्वनंताः पृथिवीप्रस्तारा इत्यध्यवसिताः । कथं तेषां निवृत्तिः ? स्याद्वादनीतिनिरूपितकर्मफलसंबंधादियुक्तिसद्भावात् । आर्हतस्यागमस्य प्रामाण्य न शेषाणां तदभावादिति ।

अधोधोवचनं तिर्यक्प्रचयनिवृत्त्यर्थं ॥ ९ ॥ यथा गम्येताधोध एव सप्तापि भूमयो न तिर्यक्प्रचयेनावस्थिता इति प्रतिपत्त्यर्थमधोधोग्रहणं ।

सामीप्याभावाद् द्वित्वानुपपत्तिरिति चेन्नांतरस्याविवक्षितत्वात् ॥ १० ॥ स्यान्मतं प्रत्येकं भूमीनामंतराण्यसंख्यातयोजनकोटीकोटिपरिमाणानि ततः सामीप्याभावाद् द्वित्वाभाव इति ? तन्न किं कारणं ? अंतरस्याविवक्षितत्वात् । कथमविवक्षा सतः ? सतोप्यविवक्षा भवति यथा लोमिकांडका अनुदरा कन्येति ।

तुल्यजातीयेनाव्यवधानं सामीप्यमिति वा ॥ ११ ॥ अथवा यदंतरं तत्पूर्वोत्तरभागांतःपातित्वात्सामीप्यमिति तद्द्योतनार्थं द्वित्व ।

पृथुतरा इति केषांचित्पाठः ॥ १२ ॥ केचिदत्र पृथुतरा इति पठंति अत्र तरनिर्देशः, कुतः ? प्रकर्षाभावात् । द्वयोर्द्वयोर्वाभिसंबंधे सति महत्त्वविशेषप्रख्यापनार्थस्तरशब्दः । एवमपि रत्नप्रभायाः पृथुतराव्यपदेशो नास्ति प्रतियोग्यभावादपि च शर्कराप्रभादीनां प्रकर्षाभावोऽधोधोहीनपरिमाणत्वात् तस्मादधोधः पृथुतरा इति व्यपदेशो नोपपद्यते । स्यादेतदधोलोकस्य वेत्रासनसंस्थानत्वादधोधः पृथुत्वप्रकर्षात् पृथुतरा इति व्यपदेश इति तच्च न भूमिभ्यो बहिस्तत्पृथुत्वमेवं ह्युक्तं स्वयंभूरमणसमुद्रांतादवस्थिता रज्जुः सप्तम्याः भूमेरवसाने पूर्वादिदिग्विभागावगाहिकालमहाकालरौरवमहारौरवांते पततीति । अथापि कथंचित्स्यात्प्रकर्षः तिर्यक् पृथुतरा इति वक्तव्यं स्यान्नाधोधः इति । अथापि कथंचिदनेन विशेषणेनार्थ एवग्राह्यमधोधो वेदनाप्रकर्षाप्रकर्षयोगादायुषोतिशयाद्वा तन्निमित्तस्य तद्व्यपदेशदर्शनात् तत्संबंधाद्वा भूमयः पृथुतरा इति व्यपदिश्यते । एवमपि रत्नप्रभायां पृथुतराव्यपदेशो नोपपद्यत एव । अत्राह किं ता भूमयो नारकाणां सर्वत्रावासा आहोस्वित् क्वचित् क्वचिदिति ? तन्निर्धारणार्थमाह—

तासु त्रिंशत्पंचविंशतिपंचदशदशत्रिपंचोनैकनरकशतसहस्राणि पंच चैव यथाक्रमं ॥ २ ॥

तासु रत्नप्रभादिषु भूमिषु नरकाण्यनेन संख्यायंते ।

त्रिंशदादीनां परस्पराभिसंबंधे वृत्तिः ॥ १ ॥ त्रिंशदादीनां पदानां परस्पराभिसंबंधे सति वृत्तिर्वेदितव्या। पंचाभिरूनं पंचोनं पचोनं च यदेकं च तत्पंचानैकं त्रिंशच्च पंचविंशतिश्च पंचदश च दश च त्रयश्च पंचोनैकं च त्रिंशत्पचविंशतिपंचदशदशत्रिपंचोनैकानि, शतानां सहस्राणि शतसहस्राणि नरकाणां शतसहस्राणि नरकशतसहस्राणि, त्रिंशत्पचविंशतिपचदशदशत्रिपंचोनैकनरकशतसहस्राणि । यथाक्रमवचनं यथासंख्याभिसंबंधार्थं । यो यः क्रमो यथाक्रमः, तस्य वचनं रत्नप्रभादिभिः त्रिंशतादीनां यथासंख्यमभिसंबंधो यथा स्यादिति । तद्यथा– रत्नप्रभायां त्रिंशन्नरकशतसहस्राणि। शर्कराप्रभायां पचविंशतिनरकशतसहस्राणि। वालुकाप्रभायां पंचदशनरकशतसहस्राणि । पंकप्रभायां दशनरकशतसहस्राणि। धूमप्रभायां त्रीणि नरकशतसहस्राणि । तमःप्रभायां पचोनमेकनरकशतसहस्रं । महातमःप्रभायां पंचनरकाणि । तत्र रत्नप्रभायां अब्बहुलभागे उपर्यधश्चैकैकं योजनसहस्रं वर्जयित्वा मध्ये नरकाणि भवंति । तानि त्रिधा वर्ण्यंते, इंद्रकश्रेणिपुष्पप्रकीर्णकविभागेन। तत्र रत्न भायां त्रयोदशनरकप्रस्तारा:, त्रयोदशैवेंद्रकनरकाणि-सीमंतक-निरय-रौरव-उभ्रांत– उद्भ्रांत-संभ्रांत– असंभ्रांत-विभ्रांत-तप्त-त्रस्त-व्युत्क्रांत– अवक्रांत विक्रांतनामानि। शर्कराप्रभायामेकादश नरकप्रस्ताराः एकादशैवेंद्रकनरकाणि, संस्तन-स्तनक-मनक-घाट-संघाट-जिह्व– उज्जिह्विक– अलोल-लोलुक-स्तनलोलुकाख्यानि। वालुकाप्रभायां नव नरकप्रस्तारा नवैवेंद्रकनरकाणि तप्त-त्रस्त-तपन-आतपन-निदाघ ज्वलित-जाज्वलित-संज्वलित-संप्रज्वलितसंज्ञकानि। पंकप्रभायां सप्तनरकप्रस्ताराः सप्तैवेंद्रकनरकाणि आर-मार-तार-वर्चस्क-वैमनस्क-खाट– अखाटाख्यानि । धूमप्रभायां पंच नरकप्रस्ताराः पंचैवेंद्रकनरकाणि तम-भ्रम-झष– अध तमिस्राभिधानानि। तमःप्रभायां त्रयो नरकप्रस्तारा:, त्रीण्येवेंद्रकनरकाणि हिम, वर्दल, लल्लकनामधेयानि। महातमःप्रभायामेको नरकप्रस्तारः, एकमेवेंद्रकनरकमप्रतिष्ठानाख्यं । तत्र सीमंतनरकस्य चतसृषु दिक्षु चतस्रो नरकश्रेण्यो निर्गतास्तथा विदिक्ष्वपि। तदंतरेषु पुष्पप्रकीर्णकनरकाणि। तत्रैकैकस्यां दिङ्नरकश्रेण्यामेकान्तपंचाशदेकोनपचाशन्नरकाणि तथैकैकस्यां विदिङ्नरकश्रेण्यामष्टचत्वारिंशदष्टचत्वारिंशन्नरकाणि । एवं निरयादिष्वप्येकैकं परिहाप्य नेतव्यानि– तत्र प्रथमायां पृथिव्यां श्रेणींद्रकनरकाणां संख्या चतुश्चत्वारिंशच्छतानि त्रयस्त्रिंशानि। पुष्पप्रकीर्णकानामेकोनत्रिंशच्छतसहस्राणि पंचनवतिश्च सहस्राणि पंचशतानि सप्तषष्ठ्यधिकानि। एतावुभावपि राशी सपिंडितौ त्रिंशन्नरकशतसहस्राणि। द्वितीयायां श्रेणींद्रकनरकसंख्या षड्विंशतिः शतानि पंचनवत्युत्तराणि। पुष्पप्रकीर्णकानां संख्या चतुर्विंशतिः शतसहस्राणि सप्तनवतिः सहस्राणि त्रीणि शतानि पंच च, एतावुभावपि राशी सपिंडितौ पंचविंशतिनरकशतसहस्राणि। तृतीयायां श्रेणींद्रकनरकसंख्या चतुर्दशशतानि पंचाशीत्यधिकानि । पुष्पप्रकीर्णकसंख्या चतुर्दशशतसहस्राणि अष्टानवतिः सहस्राणि पचशतानि पंचदशाधिकानि एतावुभावपि राशी सपिंडितौ पंचदशनरकशतसहस्राणि । चतुर्थ्यां श्रेणींद्रकनरकसंख्या सप्ताधिकानि सप्तशतानि। पुष्पप्रकीर्णकसंख्या नवनरकशतसहस्राणि नवनवतिश्च सहस्राणि द्वे शते त्रिनवत्युत्तरे। एतावुभावपि राशी सपिंडितौ दशनरकशतसहस्राणि। पंचम्यां श्रेणींद्रकनरकसंख्या द्वे नरकशते पंचषष्ठ्यधिके। पुष्पप्रकीर्णकसंख्या द्वे शतसहस्रे नवनवतिश्च सहस्राणि सप्तशतानि पंचत्रिंशानि च एतावुभावपि राशी सपिंडितौ त्रीणि नरकशतसहस्राणि। षष्ठ्यां श्रेणींद्रकनरकसंख्या त्रिषष्टिनरकाणि, पुष्पप्रकीर्णकसंख्या नवनवतिर्नरकसहस्राणि नवशतानि द्वात्रिंशानि, एतावुभावपि राशी सपिंडितौ नवनवतिः सहस्राणि नवशतानि पंचनवत्युत्तराणि। सप्तम्यामिंद्रकनरकमेकमप्रतिष्ठानं नाम-श्रेणीनरकाणि चत्वारि। प्राच्यां दिशि कालं, प्रतीच्यां महाकालं, अपाच्यां रौरवं, उदीच्यां महारौरवं, विदिक्श्रेणीनरकाणि न संति, तान्येतानि पच सर्वश्रेणींद्रकनरकसंख्या षण्णवतिर्नरकशतानि त्रिपंचाशानि। सर्वपुष्पप्रकीर्णकसंख्या त्र्यशीतिर्नरकशतसहस्राणि । तासु सप्तास्वपि पृथिवीषु कानि चिन्नरकाणि संख्येयविस्ताराणि कानि चिदसंख्येयविस्ताराणि । यानि संख्येयविस्ताराणि तानि संख्येययोजनशतसहस्रविस्ताराणि, यान्यसंख्येयविस्ताराणि तान्यसंख्येययोजनशतसहस्रविस्ताराणि । सर्वत्र च नरकाणां पंचमो भागः संख्येयविस्ताराणां चत्वारो भागा असंख्येयविस्ताराणां बाहुल्यमुच्यते। क्रोशः प्रथमपृथिव्यां इतरास्वर्धाधिकाः क्रमेणैव

चत्वारः। सप्तम्यां सर्वेंद्रकनरकबाहुल्यं स्वेंद्रकबाहुल्यं स्वत्रिभागपरिवर्धितं तच्छ्रेण्याः श्रेणींद्रकबाहुल्यसहितं ज्ञेयं प्रकीर्णकस्य। तान्येतानि नरकाणि उष्ट्रकाद्यशुभसंस्थानानि शोचनरोदनाक्रंदनाद्यशुभनामानि वेदितव्यानि। अथ तेषु सीमंतकादिषु नरकेषु पापकर्मवशात्प्रादुर्भवंतः प्राणिनः किंलक्षणाः? इत्यत आह—

नारका नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः ॥ ३ ॥

लेश्यादिशब्दा उक्तार्थाः ॥ १ ॥ लेश्यादयः शब्दा उक्तार्था वेदितव्याः। लेश्या च परिणामश्च देहश्च वेदना च विक्रिया च लेश्यापरिणामदेहवेदनाविक्रियाः। लोके प्रतियोग्यंतरापेक्षया प्रकर्षो दृष्टः, इहाऽशुभतरा इति किमपेक्ष्य प्रकर्षनिर्देशः? उच्यते—

तिर्यग्व्यपेक्षोऽतिशयनिर्देशः ॥ २ ॥ तिरश्चामप्यशुभा लेश्यादयो नारकाणां च। ततः प्रकर्षेण नारकाणामित्यशुभतराः।

ऊर्ध्वापेक्षो वाऽधोगतानां ॥ ३ ॥ अथवा ऊर्ध्वनरकाशुभतरलेश्याद्यपेक्षयाऽधोगतानां प्रकर्षो द्रष्टव्यः।

नित्यग्रहणाल्लेश्याद्यनिवृत्तप्रसंग इति चेन्नाभीक्ष्ण्यवचनत्वात् नित्यप्रहसितवत् ॥ ४ ॥ स्यादेतन्नित्यशब्दोयं कूटस्थेष्वविचलेषु भावेषु दृष्टः, यथा नित्या द्यौ नित्या पृथिवी नित्यमाकाशमिति तथा लेश्यादीनामपि व्ययोदयाभावान्नित्यत्वे सति नरकादप्रच्यवः स्यादिति? तन्न किं कारणमाभीक्ष्ण्यवचनान्नित्यप्रहसितवत्। यथा नित्यप्रहसितो देवदत्त इत्युच्यते योऽभीक्ष्णं प्रहसति नच तस्य प्रहसनानिवृत्तिः? कारणे सति भावात्। तथा शुभकर्मादयनिमित्तवशात् लेश्यादयोऽनारतं प्रादुर्भवंतीति आभीक्ष्ण्यवचनो नित्यशब्दः प्रयुक्तः। नित्यमशुभतरा नित्याशुभतराः सुप्सुपेति वृत्तिर्मयूरव्यंसकादित्वाद्वा। नित्याशुभतरा लेश्यापरिणामदेहवेदनाविक्रिया येषां त इमे नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः। तत्राशुभतरलेश्या इति,प्रथमद्वितीययोः कापोतलेश्या। तृतीयायामुपरिष्टात्कापोती अधोनीला। चतुर्थ्यां नीला। पंचम्यामुपरि नीलाऽधः कृष्णा। षष्ठ्यां कृष्णा। सप्तम्यां परमकृष्णा। एतेषा नारकाणां स्वायुःप्रमाणावधृता द्रव्यलेश्या उक्ताः, भावलेश्यास्तु षडपि प्रत्येकमंतर्मुहूर्तपरिवर्तिन्यः। अशुभतरपरिणामा इति स्पर्शरसगंधवर्णशब्दपरिणामाः क्षेत्रविशेषनिमित्तवशादतिदुःखहेतवोऽशुभतराः। अशुभतरदेहा इति तेषां शरीराण्यशुभनामप्रत्ययादशुभांगोपांगस्पर्शरसगंधवर्णस्वराणि हुंडसंस्थानानि लूनाण्डजशरीराकृतीनि क्रूरकरणबीभत्सप्रतिभयदर्शनानि, यथेह श्लेष्ममूत्रपुरीषमलरुधिरवसामेदःपूयवमनपूतिमांसकेशास्थिचर्माद्यशुभमौदारिकगतं ततोप्यतीवाशुभत्वं वैक्रियिकशरीरत्वेपि। तत्र रत्नप्रभायां नारकशरीरोत्सेधः सप्तधनूंषि त्रयोहस्ताः षट् चांगुल्यः। अधोधो द्विगुणद्विगुण उत्सेधः। अशुभतरवेदना इति अभ्यंतरासद्वेद्योदये सत्यनादिपारिणामिकशीतोष्णबाह्यनिमित्तजनिताः सुतीव्रवेदना भवंति नारकाणां। तद्यथा— निदाघे मध्याह्ने व्यभ्रे नभसि पटुतपनकिरणसंतप्तदिगंतराले दूरीकृतशीतवाते दवाग्निदाहोद्ग्राहिष्यसमीरणे रूक्षदेशे सर्वतो दीप्ताग्निशिखापरीतस्य तृष्णार्तस्य पित्तज्वर संतापितशरीरस्य निष्प्रतीकारस्य यादृगुष्णजं दुःखं ततोप्यनंतगुणमुष्णनरकेषु दुःखं भवति। माघमासे [illegible] मानीपतनव्याप्तशीतदिगंतराले नभसि, प्रस्पंदजलाप्लुतकर्दममहीतले, रात्रौ शीतवातपातप्रस्फुरितगात्रस्य दंतवीणस्य शीतज्वराभिभूततनोर्निरस्ताश्रयप्रावरणस्य यादृक् शीतसमुद्भवं दुःखं ततोप्यनंतगुणं कष्टं शीतनरकेषु दुःखं भवति। अथवा हिमवन्मात्रस्ताम्रगिरिरुष्णनरकेषु यदि निक्षिप्येत क्षिप्रमेव हि द्रवीभवेत्। स एको द्रवीभूतः शीतनरकेषु यदि निक्षिप्येत अक्षिनिमेषमात्र एव घनः स्यादित्येवमनुमीयमानं शीतोष्णं तत्र वेदितव्यं। प्रथमाद्द्वितीयातृतीयाचतुर्थीपूष्णवेदनान्येव नरकाणि। पंचम्यामुपरि उष्णवेदने द्वे नरकशतसहस्रे, अधः शीतवेदनानामेकं शतसहस्रं, षष्ठीसप्तम्योः शीतवेदनान्येव सर्वसमुदायेन द्व्यशीतिनरकशतसहस्राणि उष्णवेदनानि, द्वे नरकशतसहस्रे शीतवेदने। अशुभतरविक्रिया इति शुभं करिष्याम इत्यशुभतर-

मेव विकुर्वंति । दुःखाभिभूतमनसश्च दुःखप्रतीकारचिकीर्षया गरीयस एव दुःखहेतून् विकुर्वंति । एते भावा अधोधोऽशुभतराः वेदितव्याः । किमेषां नारकाणां शीतोष्णजनितमेव दुःखमुतान्यथापि भवतीत्यत आह—

परस्परोदीरितदुःखाः ॥ ४ ॥

कथं परस्परोदीरितदुःखत्वं ?

निर्दयत्वात्परस्परदर्शने सति कोपोत्पत्तेः श्ववत् ॥ १ ॥ यथा श्वानः शाश्वतिकजातिकारणानादिकालप्रवृत्तजातिकृतवैरापादितनिर्दयत्वात्परस्परभक्षणभेदनछेदनाद्याहितदुःखा भवंति, तथा नारका अपि भवप्रत्ययेनावधिज्ञानेन मिथ्यादर्शनोदयाद्विभंगव्यपदेशभाजा च दूरादेव दुःखहेतूनवगम्योत्पन्नदुःखाः प्रत्यासत्तौ परस्परालोकनाच्च प्रज्वलितकोपाग्नयः स्वविक्रतासिवासीपरशुभिंडिपालादिभिः परस्परदेहतक्षणभेदनछेदनपीडनादिभिरुदीरितदुःखाः भवंति । किमेतावानेव दुःखोत्पत्तिकारणप्रकार उतान्योपि कश्चिदस्तीत्यत आह—

संक्लिष्टासुरोदीरितदुःखाश्च प्राक् चतुर्थ्याः ॥ ५ ॥

पूर्वभवसंक्लेशपरिणामोपात्ताशुभकर्मोदयात्सततं क्लिष्टाः संक्लिष्टाः ॥ १ ॥ पूर्वजन्मनि भावितेनातिसंक्लेशपरिणामेन यदुपार्जितं पापकर्म तस्योदयात्सततमविरतं क्लिष्टाः संक्लिष्टाः ।

असुरनामकर्मोदयादसुराः ॥ २ ॥ देवगतिनामकर्मविकल्पस्यासुरत्वसंवर्तनस्य कर्मण उदयादस्यंति परानित्यसुराः ॥

संक्लिष्टविशेषणमन्यासुरनिवृत्त्यर्थं ॥ ३ ॥ न सर्वेऽसुरा नारकाणां दुःखमुत्पादयंति किं तर्हि ? अंबावरीषादय एव केचनेति प्रदर्शनार्थं संक्लिष्टविशेषणं ।

असुराणां गतिविषयनियमप्रदर्शनार्थं प्राक्चतुर्थ्या इति वचनं ॥ ४ ॥ तेषां संक्लिष्टानामसुराणां वेदनोदीरणकारणानां त्रिषु पृथिवीषु गतिर्नातःपरमिति प्रदर्शनार्थं प्राक्चतुर्थ्या इत्युच्यते ।

आङो ग्रहणं लघ्वर्थमिति चेन्न संदेहात् ॥ ५ ॥ स्यान्मतमाङत्र प्रयोक्तव्यः, लघ्वर्थं स एव मर्यादां गमयतीति ? तन्न किं कारणं ? संदेहादभिविधावपि आङ् वर्तते मर्यादायामपि ततः संदेहः स्यात् किं सह चतुर्थ्या उत ततः प्रागित्यतोऽसंदेहार्थं प्राग्वचनमेव युक्तं ।

चशब्दः पूर्वहेतुसमुच्चयार्थः ॥ ६ ॥ संक्लिष्टासुरोदीरितदुःखाश्च पूर्वोक्तहेतूदीरितदुःखाश्चेति समुच्चयार्थश्चशब्दः इतरथा हि तिसृषु भूमिषु पूर्वोक्तहेत्वभावः प्रतीयते ।

अनंतरत्वादुदीरितग्रहणानर्थक्यमिति चेन्न तस्य वृत्तौ परार्थत्वात् ॥ ७ ॥ स्यान्मतमनंतरमुदीरितग्रहणमस्ति तेनैवात्राभिसंबंधः कर्तव्यः, अनर्थकं पुनरुदीरितग्रहणमिति ? तन्न किं कारणं ? तस्य वृत्तौ परार्थत्वात् । स ह्युदीरितशब्दः वृत्तौ परार्थे संव्यवस्थित इह संबंद्धुमशक्यः ।

वाक्यवचनमिति चेन्नोदीरणहेतुप्रकारदर्शनार्थत्वात् ॥ ८ ॥ स्यादेतद्वाक्यमेव वक्तव्यं परस्परेणोदीरितदुःखाः संक्लिष्टासुरैश्च प्राक् चतुर्थ्या इति ? तन्न किं कारणं ? उदीरणहेतुप्रकारदर्शनार्थत्वात् पुनरुदीरितग्रहणेनोदीरणकारणप्रकाराः प्रदर्श्यंते तद्यथा— तप्तायोरसपायननिष्टप्तायस्तंभालिंगनकूटशाल्मल्यारोहणावतरणायोधनाभिघातवासिक्षुरतक्षणक्षारतप्ततैलावसेचनायःकुंभीपाकांबरीषभर्जनयंत्रपीलनैः शूलशलाकाव्यधनक्रकचपाटनांगारधानीवाहनसूचीशाड्वलावकर्षणैः व्याघ्रर्क्षद्वीपिश्वशृगालवृककोकमार्जारनकुलखरसर्पवायसगृध्रकंकोलूकश्येनादिखादनैः तप्तवालुकाविचरणासिपत्रवनप्रवेशनवैतरण्यवतारणपरस्परचोदनादिभिश्च ते संक्लिष्टासुरा दुःखमुदीरयंति नारकाणां, किमर्थं त एव कुर्वंतीति चेत् पापकर्माभिरतत्वात्, यथा गोमहिषमेषवराहकुक्कुटवर्तिकालावकान् मल्लांश्च युद्धयमानान् परस्परं अभ्यस्त

दृष्ट्वा रागद्वेषमोहाभिभूतानां अकुशलानुबंधिपुण्यानां नराणां प्रीतिरुत्पद्यते । तथा तेषामसुराणां नारकांस्तथा कारयतामन्योन्यं च घ्नतः पश्यतां परा प्रीतिरुत्पद्यते । तेषां सत्यपि देवत्वे मायानिदानमिथ्यादर्शनशल्यतीव्रकषायोपहतस्यानालोचितभावदोषस्याप्रत्यवमर्शस्याकुशलानुबंधस्य पुण्यस्य कर्मणस्तपसश्च भावदोषानुकर्षिणस्तत्फलं यत्सत्स्वपि अनेकेषु प्रीतिहेतुषु अशुभा एव प्रीतिहेतव इति । एवं छेदभेदादिभिः शकलीकृतमूर्तिनामपि तेषां न मरणमकाले विद्यते, कुतः ? औपपादिका अनपवर्त्यायुष इति वचनात् । तेष हि जघान्यमध्यमोत्कृष्टभेदभिन्नं यावदायुरवबद्धं तावद्यथाकालमेव विपच्यते नोदीरणाप्रत्ययवशादपवर्त्यते । यद्येवं तदेव तावदुच्यतां नारकाणां कियदायुरित्यत आह—

तेष्वेकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमा सत्वानां परा स्थितिः ॥ ६ ॥

सागरोपमेति कोयं शब्दः ? सागर उपमा यस्याः सेयं सागरोपमा क उपमार्थः ?

सागरस्योपमात्वं द्रव्यभूयस्त्वात् ॥ १ ॥ यथा सागरो जलसमूहेन भूयसा युक्तस्तथायुःकर्मापि भवधारणपुद्गलद्रव्यसमूहेन महता योगात्सागरेणोपमीयते ।

एकादीनां कृतद्वंद्वानां सागरोपमाविशेषणत्वं ॥ २ ॥ एकादयः शब्दाः कृतद्वंद्वाः सागरोपमाशब्दस्य विशेषणत्वेन नियुज्यंते एका च तिस्रश्च सप्त च दश च सप्तदश च द्वाविंशतिश्च त्रयस्त्रिंशच्च एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशतस्ता एव सागरोपमाः एकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमाः । कथमेकशब्दस्य पुंवद्भावः ननु भिन्नाधिकरणत्वान्न प्राप्नोति ? नापि पुंवद्भाव उत्तरपदिकं ह्रस्वत्वं, यथैकक्षीरमिति । अथवा सागर उपमा यस्य तत्सागरोपममायुरेकं च त्रीणि च सप्त च दश च सप्तदश च द्वाविंशतिश्च त्रयस्त्रिंशच्च एकत्रिसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपममायुर्यस्याः सैकत्रिसप्तदशसप्तदशद्वाविंशतित्रयस्त्रिंशत्सागरोपमेति स्थित्यपेक्षः स्त्रीलिंगनिर्देशः ।

रत्नप्रभादिभिरानुपूर्व्येण संबंधो यथाक्रमानुवृत्तेः ॥ ३ ॥ यथाक्रममित्यनुवर्तते ततो रत्नप्रभादिभिरेकादीनामानुपूर्व्येण संबंधो वेदितव्यः । रत्नप्रभायामेकसागरोपमा स्थितिः, शर्कराप्रभायां त्रिसागरोपमा स्थितिः, वालुकाप्रभायां सप्तसागरोपमा स्थितिः, पंकप्रभायां दशसागरोपमा स्थितिः, धूमप्रभायां सप्तदशसागरोपमा स्थितिः, तमः प्रभायां द्वाविंशतिसागरोपमा स्थितिः, महातमः प्रभायां त्रयस्त्रिंशत्सागरोपमास्थितिरिति ।

नरकप्रसंगस्तेष्विति वचनादिति चेन्न रत्नप्रभाद्युपलक्षितत्वात् ॥४॥ स्यान्मतं तेष्विति-वचनान्नरकाभिसंबंधः प्राप्नोति, ततः किं, ? रत्नप्रभायां त्रयोदशेंद्रकनरकसंज्ञानि तत्रारादेव सीमंतकादिष्विंद्रकनरकेषु स्थितिरियं परिसमाप्येत नेष्यते च तस्मात्तेष्विति वचनमयुक्तमिति ? तन्न किं कारणं ? रत्नप्रभाद्युपलक्षितत्वात् यानि रत्नप्रभाद्यधिकरणत्वेनोपलक्षितानि त्रिंशच्छतसहस्राद्यवधृतपरिमाणानि तेष्वेकत्रिसागरोपमादिका स्थितिरिति नास्ति दोषः ।

साहचर्याद्वा ताच्छब्द्यसिद्धिः ॥ ५ ॥ अथवा नरके सहचरिता भूमयोपि नरकाणीत्युच्यंतेऽतस्तेषु रत्नप्रभादिषु नरकेषु प्रादुर्भवतां सत्वानामेकसागरोपमादिका स्थितिरित्यभिसंबंधः, एवं च कृत्वा तेष्विति वचनमर्थवत्, इतरथा हि व्यवधानाद् भूमिभिरनभिसंबंधः स्यात् ।

नरकस्थितिप्रसंग इतिचेन्न सत्वानामिति वचनात् ॥६॥ स्यादेतद्यदि पृथिव्युपलक्षितनरकाभिसंबंधः इष्टः, ननु नरकाणामेवैकसागरोपमादिस्थितिसंबंधः प्राप्नोति न नारकाणामिति ? तन्न किं कारणं ? सत्वानामिति वचनात्, तेषु नरकेषु सत्वानामियं स्थितिर्न नरकाणामिति ।

परोत्कृष्टेति पर्यायौ ॥७॥ परा उत्कृष्टेति पर्यायशब्दाविमौ तेन नरकाणामुक्ता स्थितिरुत्कृष्टा । रत्न-

प्रभादिषु प्रतिप्रस्तारं जघन्यापि स्थितिरुच्यते– सीमंतकेंद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या-स्थितिर्दशवर्षसहस्राण्युत्कृष्टा नवतिवर्षसहस्राणि, अजघन्योत्कृष्टा मध्ये समयोत्तरा। निरयेंद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या नवतिवर्षसहस्राणि, "दशवर्षसहस्राणीति क्वापि पाठः" उत्कृष्टा नवतिवर्षशतसहस्राणि अजघन्योत्कृष्टा मध्ये समयोत्तरा। रौरुकेंद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या एका पूर्वकोटी, उत्कृष्टेना संख्याताः पूर्वकोट्यः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। भ्रांतेद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या असंख्याताः पूर्वकोट्यः, उत्कर्षेण सागरोपमस्यैकोदशभागः, अजघन्योत्कृष्टा मध्ये समयोत्तराः। उद्भ्रांतेंद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्यैको दशभागः, उत्कृष्टा सागरोपमस्य द्वौ दशभागौ, अजघन्योत्कृष्टा मध्ये समयोत्तरा। सम्भ्रांतेद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य द्वौ दशभागौ उत्कर्षेण सागरोपमस्य त्रयोदशभागाः, अजघन्योत्कृष्टा मध्ये समयोत्तरा, असंभ्रांतेद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य त्रयोदशभागाः, उत्कृष्टा सागरोपमस्य चत्वारो दशभागाः अजघन्योत्कृष्टा मध्ये समयोत्तरा। विभ्रांतेद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य चत्वारो दशभागाः उत्कृष्टा सागरोपमस्य पंचदशभागाः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। तप्तेंद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य पचदशभागाः, उत्कृष्टा सागरोपमस्य षड्दशभागाः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। त्रस्तेंद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य षड्दशभागाः, उत्कृष्टा सागरोपमस्य सप्तदशभागाः, अजघन्योत्कृष्टा मध्ये समयोत्तरा। व्युत्क्रांतेद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य सप्तदशभागाः उत्कृष्टा सागरोपमस्याष्टौ दशभागाः अजघन्योत्कृष्टा मध्ये समयोत्तरा। अवक्रांतेंद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्याष्टौ दशभागाः, उत्कृष्टा सागरोपमस्य नवदशभागाः अजघन्योत्कृष्टा मध्ये समयोत्तरा। विक्रांतेद्रके तच्छ्रेणिषु चाष्टास्वपि नारकाणां जघन्या सागरोपमस्य नवदशभागाः, उत्कृष्टा सागरोपमा, अजघन्योत्कृष्टा मध्ये समयोत्तरा। शर्कराप्रभादिषु प्रतिप्रस्तारमुत्कृष्टा स्थितिकरणक्रमेण वेदितव्या कथमितिचेदुच्यते। 'आर्या' उपरिस्थितेर्विशेषः स्वप्रतरविभाजितेष्टसंगुणितः उपरिपृथिवीस्थितियुतः स्वेष्टप्रतरस्थितिर्महती। १। उपर्युत्कृष्टाऽधो जघन्या सर्वत्रसमयाधिका अजघन्योत्कृष्टा मध्यमा समयोत्तरा अथैतेषां नारकाणामुत्पादविरहकालः कियानित्यत्रोच्यते–सर्वासु पृथिवीषु जघन्य एकसमयः, उत्कृष्टाश्चतुर्विंशतिमुहूर्ताः, सप्तरात्रिंदिवानि, पक्षः, मासः, द्वौ मासौ, चत्वारो मासाः, षण्मासा इति रत्नप्रभादिषु क्रमेण ज्ञेयाः। अथोत्पादः क केषामित्यत्रोच्यते-प्रथमायामसंज्ञिन उत्पद्यंते। प्रथमाद्द्वितीययोः सरीसृपाः। तिसृषु पक्षिणः। चतसृषूरगाः। पंचसु सिंहाः। षट्सु स्त्रियः। सप्तसु मत्स्यमनुष्याः। न च देवनारका वा नरकेषु उत्पद्यंते। प्रथमायामुत्पद्यमाना नारका मिथ्यात्वेनाधिगताः केचिन्मिथ्यात्वेन निर्यांति। मिथ्यात्वेनाधिगताः केचित्सासादनसम्यक्त्वेन निर्यांति। मिथ्यात्वेनाधिगताः केचित्सम्यक्त्वेन। केचित्सम्यक्त्वेनाधिगताः सम्यक्त्वेनैव निर्यांति। क्षायिकसम्यग्दृष्ट्यपेक्षया द्वितीयादिषु पंचसु नारका मिथ्यात्वेनाधिगताः केचिन्मिथ्यात्वेन निर्यांति। मिथ्यात्वेनाधिगताः केचित् सासादनसम्यक्त्वेन निर्यांति। मिथ्यात्वे प्रावष्टाः केचित् सम्यक्त्वेन निर्यांति। सप्तम्यां नारकाः मिथ्यात्वेनाधिगता मिथ्यात्वेनैव निर्यांति। षड्भ्य उपरि पृथिवीभ्यो मिथ्यात्वसासादनसम्यक्त्वाभ्यामुद्वर्तिताः केचित्तिर्यङ्मनुष्यगतिमायांति। तिर्यक्ष्वायाताः पंचेंद्रियगर्भजसंज्ञिपर्याप्तकसंख्येयवर्षायुष्षूत्पद्यंते, नेतरेषु। मनुष्येष्वायाता गर्भजपर्याप्तकेषु संख्येयवर्षायुःषूत्पद्यंते नेतरेषु। नारकाः सम्यग्मिथ्यादृष्टयस्तेन गुणेन नोद्वर्तंते। नारकाः सम्यग्दृष्टयः सम्यक्त्वेनोद्वर्तिता एकामेव मनुष्यगतिमायांति, मनुष्येष्वायाताः गर्भजपर्याप्तकसंख्येयवर्षायुःषूत्पद्यंते नेतरेषु। सप्तम्यां नारका मिथ्यादृष्टयो नरकेभ्य उद्वर्तिता एकामेव तिर्यग्गतिमायांति तिर्यक्ष्वायाताः पंचेंद्रियगर्भजपर्याप्तकसंख्येयवर्षायुःषूत्पद्यंते नेतरेषु। तत्र चोत्पन्नाः सर्वे मतिश्रुतावधिसम्यक्त्वसम्यङ्मिथ्यात्वसंयमासंयमान्नोत्पादयंति, षष्ठ्या उद्वर्तिता नारकास्तिर्यङ्मनुष्येषु जाताः केचिन्मतिश्रुतावधिसम्यक्त्वसम्यग्मिथ्यात्वसंयमासंयमान् षडुत्पादयंति न सर्वे नाप्यतोन्यत्, पंचम्या उद्वर्तितास्तिर्यक्षूत्पन्नाः

केचित्षडुत्पादयंति न सर्वे नाप्यतोन्यत्, मनुष्येषूत्पन्नाः केचिन्मतिश्रुतावधिमनःपर्ययसम्यक्त्वसम्यङ्मि-थ्यात्वसंयमासंयमसंयमानुत्पादयंति न सर्वे नाप्यतोन्यत । चतुर्थ्या उद्वर्तितास्तिर्यक्षूत्पन्नाः केचिन्मत्यादीन् षडुत्पादयंति न सर्वे नाप्यतोन्यत्, मनुष्येषूत्पन्ना केचिन्मतिश्रुतावधिमनःपर्ययकेवलसम्यक्त्वसम्यङ्मिथ्यात्व-संयमासंयमसंयमानुत्पादयंति, न च बलदेववासुदेवचक्रधरतीर्थकरत्वान्युत्पादयंति, केचित्कर्माष्टकांतकराः सिध्यंति। उपरि तिसृभ्य उद्वर्तितास्तिर्यक्षु जाता केचित्षडुत्पादयंति। मनुष्येषूत्पन्नाः केचिन्मतिश्रुतावधिमनः-पर्ययकेवलसम्यक्त्वसम्यङ्मिथ्यात्वसंयमासयमसंयमानुत्पादयंति न च बलदेववासुदेवचक्रधरत्वान्युत्पादयंति केचित्तीर्थकरत्वमुत्पादयंति, अपरे कर्माष्टकांतकराः सिध्यंति । उक्तः सप्तावनिविस्तीर्णोऽधोलोकः । इदानीं तिर्यग्लोकोवसरप्राप्तो व्याख्येयः। तत्रैतत्स्यात्किमत्र व्याख्येयं, द्वीपसमुद्राधिष्ठातृधरणीधरणीधरवनक्षेत्रांतरपरि-माणादि। यद्येवं तदवतिष्ठतामिदमेव तावद्व्याक्रियतां कुतः पुनरियं तिर्यग्लोकसंज्ञा प्रवृत्ता? इत्युच्यते यतोऽसं-ख्येयाः स्वयंभूरमणपर्यंतास्तिर्यक्प्रचयविशेषेणावस्थिता द्वीपसमुद्रास्ततः तिर्यग्लोक इति, यद्येवं के पुनस्तिर्यगव-स्थिता इत्यत आह—

जंबूद्वीपलवणोदादयः शुभनामानो द्वीपसमुद्राः ॥ ७ ॥

आह कुतः पुनरियं जंबूद्वीपसंज्ञेत्युच्यते—

प्रतिविशिष्टजंबूवृक्षासाधारणाधिकरणत्वाज्जंबूद्वीपः ॥ १ ॥ अयं हि द्वीपः प्रतिविशि-ष्टस्य जंबूवृक्षस्य सपरिवारस्यासाधारणाधिकरणत्वं बिभर्ति नान्ये धातकीखंडादयो द्वीपास्ततोस्य तत्साहचर्-यात् जंबूद्वीप इति संज्ञाऽनादिकालप्रवृत्ता। तद्यथा– उत्तरकुरुमध्ये जगती पंचयोजनशतायामविष्कंभा तत्त्रि-गुणसातिरेकपरिक्षेपा ततः प्रदेशहान्या बहिःपरिहीयमाणा मध्ये द्वादशयोजनबाहुल्या, अंते क्रोशद्वयबाहुल्या सा चैकया पद्मवरवेदिकया जांबूनदमया परिक्षिप्ता, तस्या बहुदेशमध्यभागे नानारत्नमयमेकं पीठमष्टयोजना-यामं चतुर्योजनविष्कंभं तावदुच्छ्राय द्वादशभिः पद्मवेदिकाभिः परिक्षिप्तं, तासां च पद्मवेदिकानां प्रत्येकं चत्वारि तोरणानि श्वेतानि वरकनकस्तूपिकानि, तस्योपरि मणिमयमुपपीठं योजनायामविष्कंभं क्रोशद्वयो-च्छ्रायं, तन्मध्ये जंबूवृक्षः सुदर्शनाख्यो योजनद्वयोच्छ्रितस्कंधः षड्योजनोत्सेधविटपः, मध्ये षड्योजनविष्कं-भपरिमंडलः अष्टयोजनायामः तदर्धमुच्छ्रितानां जंबूनामष्टशतेन परिवृत्तः सुरवनिताक्रांतस्तद्योगाज्जंबूद्वीपः।

लवणरसांबुयोगाल्लवणोदः ॥ २ ॥ लवणरसेनांबुना योगात्समुद्रो लवणोद इति संज्ञायते उदक् शब्दस्य पूर्वपदभूतस्य उत्तरपदभूतस्य च संज्ञायामुदभावोन्वाख्यातः । जंबूद्वीपश्च लवणोदश्च जंबूद्वीपलव-णोदौ तावादी येषां ते जंबूद्वीपलवणोदादयः । द्वीपाश्च समुद्राश्च द्वीपसमुद्रा यथासंख्यमभिसंबंधः । जंबू-द्वीपादयो द्वीपा लवणोदादयः समुद्रा इति । किं नामानस्ते शुभनामानः, यानि लोके शुभानि नामानि तान्येषां नामानि तद्यथा– जंबूद्वीपो लवणोदः धातुकीखंडः कालोदः पुष्करवरः पुष्करोदः वारुणीवरः वारुणोदः क्षीर-वरः क्षीरोदः घृतवरः घृतोदः इक्षुवरः इक्षूदः नंदीश्वरवरः नंदीश्वरोदः इत्येवमादयोऽसंख्येया द्वीपसमुद्राः स्वयंभूरमणद्वीपस्वयंभूरमणोदपर्यंताः । कियदसंख्येयाः ? अर्धतृतीयसागरोपमसमयसंख्याः । अमीषां वि-ष्कंभसन्निवेशसंस्थानविशेषप्रतिपत्त्यर्थमाह—

द्विर्द्विर्विष्कंभाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः ॥ ८ ॥

द्विर्द्विरिति वीप्साभ्यां वृत्तिवचनं विष्कंभद्विगुणत्वव्याप्त्यर्थं ॥ १ ॥ आद्यस्य द्वीपस्य यो विष्कंभस्तद्द्विगुणो जलधिस्तद्द्विगुणविष्कंभो द्वितीयो द्वीपः तद्द्विगुणविष्कंभो द्वितीयो जलधिरिति द्वैगुण्य व्याप्त्यर्थं द्विर्द्विरित्युच्यते । द्विर्द्विर्विष्कंभो येषां ते द्विर्द्विर्विष्कंभाः ननु च वृत्त्याभ्यावृत्तिरुच्यते द्विदश द्विदशा इति वीप्सा च क्वचिदुच्यते सप्तपर्ण इति तद्वदिह वीप्साभ्यावृत्त्योर्वृत्त्योक्तत्वात् द्वित्वस्य सुचश्चाप्रयोगः प्राप्नो ति ? नैष दोषः यत्र गम्यते न तत्र प्रयुज्यते, इह तु द्विविष्कंभा इत्युक्ते तदर्थागतेर्द्विर्द्विरित्युच्यते।

अनिष्टविनिवेशव्यावृत्त्यर्थं पूर्वपूर्वपरिक्षेपिवचनं ॥ २ ॥ ग्रामनगरादिवदनिष्टविनिवेशो मा विज्ञायीति पूर्वपूर्वपरिक्षेपिण इत्युच्यते । तेनोत्तरोत्तरानंतर्यसिद्धिर्भवति । पूर्वं पूर्वं परिक्षिपतीत्येवं शीलाः पूर्वपूर्वपरिक्षेपिणः, अत्राप्यगमकत्वाद् द्वित्वं ।

चतुरस्रादिनिवृत्त्यर्थं वलयाकृतिवचनं ॥ ३ ॥ आकृतिस्संस्थानः, वलयस्येवाकृतिर्येषां ते वलयाकृतयः एतेन चतुरस्रादिसंस्थानांतरनिवृत्तिः कृता भवति । ततो मिथ्यावादिप्रणीतसंस्थानांतरप्रतिकल्पना न तत्त्वं । अत्राह जंबूद्वीपस्य प्रदेशसंस्थानविष्कंभा वक्तव्याः, तन्मूलत्वादितरविष्कंभादिविज्ञानस्येत्यत आह—

तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कंभो जंबूद्वीपः ॥९॥

तच्छब्दः पूर्वद्वीपसमुद्रनिर्देशार्थः ॥ १ ॥ पूर्वोक्तानामसंख्येयानां द्वीपसमुद्राणां निर्देशार्थस्तच्छब्दो दृष्टव्यः तेषां मध्ये नाभिरिव नाभिः, मेरुनाभिर्यस्य स भवति मेरुनाभिः,वृत्त आदित्यमंडलोपमानः शतानां सहस्रं शतसहस्रं योजनानां शतसहस्रं योजनशतसहस्र विष्कंभो यस्य सोयं योजनशतसहस्रविष्कंभस्तस्य परिक्षेपः । त्रीणि शतसहस्राणि षोडशसहस्राणि द्वे शते, सप्तविंशतिश्च योजनानां, त्रीणि गव्यूतानि शतं धनुषामष्टाविंशत्युत्तरं, त्रयोदशांगुल्यः अर्धांगुलं सातिरेकं तस्य समंतात् परिक्षेत्री जगत्येकाऽर्धयोजनावगाहाऽष्टयोजनोत्सेधा मूलमध्यांतेषु द्वादशाष्टचतुर्योजनविष्कंभा वज्रमयमूला वैडूर्यमयांताः सर्वरत्ननिर्मितमध्या गवाक्षघंटामुक्ता हेममणिकिंकिणीकपद्मरत्नकनकरत्नसर्वरत्नजालैर्नवभिरुपर्युपरिस्थितैः प्रत्येकमर्धयोजनोच्छ्रायैः पंचधनुश्शतविष्कंभजगती समायामैरलंकृता । तस्याःपूर्वदक्षिणापरोत्तरासु चतसृषु दिक्षु विजयवैजयंतजयंतापराजितसंज्ञानि चत्वारि महाद्वाराणि, यथाक्रमं तानि चतुर्योजनविष्कंभाण्यष्टयोजनोत्सेधानि विष्कंभसमप्रवेशानि । तत्र विजयवैजयंतयोरंतरमेकोनाशीतिसहस्राणि द्विपंचाशद्योजनान्यर्धयोजनं योजनचतुर्भागः अर्धगव्यूतं गव्यूतचतुर्भागः द्वात्रिंशच्च धनूंषि तिस्रोऽगुल्यः अंगुलचतुर्भागोऽर्धांगुलचतुर्भागश्च सातिरेकः । एवमितरेषामप्यंतराणां प्रमाणं वेदितव्यं । तत्र जंबूद्वीपे षड्भिःकुलपर्वतैर्विभक्तानि सप्तक्षेत्राणि कानि तानीत्यत आह—

भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि ॥१०॥

भरत इति संज्ञा, कुतः ?

भरतक्षत्रिययोगाद्वर्षो भरतः ॥१॥ विजयार्धस्य दक्षिणतो जलधेरुत्तरः गंगासिन्ध्वोर्बहुमध्यदेशभागे विनीता नाम नगरी द्वादशयोजनायामा, नवयोजनविस्तारा, तस्यामुत्पन्नः सर्वराजलक्षणसंपन्नो भरतो नामाद्यश्चक्रधरः षट्खंडाधिपतिः, अवसर्पिण्या राज्यविभागकाले तेनादौ भुक्तत्वात् तद्योगाद्भरत इत्याख्यातो वर्षः ।

अनादिसंज्ञासंबंधाद्वा ॥ २ ॥ अथवा जगतोनादित्वादहेतुकाऽनादिसंबंधपारिणामिकी भरतसंज्ञा । अथ क्व भरत इत्यत्रोच्यते—

हिमवत्समुद्रत्रये मध्ये भरतः ॥ ३ ॥ हिमवतोऽद्रेस्त्रयाणां समुद्राणां पूर्वदक्षिणपराणां मध्ये भरतो वेदितव्यः। स पुनर्गंगासिंधुभ्यां विजयार्धेन च षड्भागसंविभक्तः । कोसौ विजयार्धो नाम ?

पंचाशद्योजनविस्तारस्तदर्धोत्सेधः सक्रोशषड्योजनावगाहो रजताद्रिविजयार्धोऽन्वर्थः ॥ ४ ॥ चक्रभृद्विजयार्धकरत्वाद्विजयार्ध इति गुणतः कृताभिधानो रजताद्रिस्तस्य पंचाशद्योजनानि विस्तारः पंचविंशतियोजनान्युत्सेधः सक्रोशानि षड्योजनान्यवगाहः पूर्वपरकोटिभ्यामसौ पूर्वापरजलधिं स्पृशति । तस्य पूर्वापरपार्श्वबाहू चत्वारि योजनशतानि अष्टाशीत्यधिकानि षोडश चैकोनविंशतिभागाः

योजनस्यार्धभागश्च सातिरेकः । विजयार्धोत्तरपार्श्वज्या दशयोजनसहस्राणि सप्त च शतानि विंशतियोजनानां द्वादश चैकोनविंशतिभागा योजनस्य किंचिद्विशेषोना । अस्याः ज्यायाः धनुषः पृष्ठं दशयोजनानां सहस्राणि सप्तशतानि त्रिचत्वारिंशानि पंचदश चैकान्नविंशतिभागा योजनस्य सविशेषाः । विजयार्धदक्षिणपार्श्वज्या नवसहस्राणि सप्तशतान्यष्टचत्वारिंशानि योजनानां द्वादशभागाः किंचिद्विशेषाधिकाः । अस्याः ज्यायाः धनुषः पृष्ठं नवसहस्राणि सप्तशतानि षट्षष्ठ्युत्तराणि योजनानामेकश्च भागः सविशेषः । तस्योभयोः पार्श्वयोरर्धयोजनविष्कंभपर्वतसमानायामावर्धयोजनोच्छ्रायपंचधनुःशतविष्कंभवनसमायामाभ्यां क्वचित्क्वचित्कनकस्तूपिकाभ्यामलंकृतबहुतोरणोपेतपद्मवरवेदिकाभ्यां प्रत्येकं परिक्षिप्तौ सर्वर्तुजफलकुसुमतरुवरमंडितौ वनखंडौ । तस्य द्वे गुहे तमिस्रखंडप्रपातसंज्ञे पंचाशद्योजनोदग्दक्षिणायते, प्राक्प्रत्यग्द्वादशयोजनविष्कंभे, अष्टयोजनोत्सेधोत्तरदक्षिणद्वारद्वये, षट्क्रोशषड्योजनविष्कंभक्रोशबाहुल्याष्टयोजनोच्छ्रायवज्रमयकपाटे । याभ्यां चक्रवर्ती उत्तरभरतविजयार्धं याति । यतश्च गंगासिंधू निर्गते । तत्र चाभ्यंतरे विजयार्धप्रभवे प्रत्येकं द्विनद्यौ गंगासिंधू अनुप्रविष्टे, उन्मग्नजला निमग्नजला चान्वर्थसंज्ञे । तृणादेः पतितस्य द्रव्यस्याधस्तादुपरितलप्रक्षेपणादुन्मग्नजला । तथा तृणादेः पतितस्याधस्तलप्रक्षेपणान्निमग्नजला । तस्यैवाद्रेर्भूमितलाद्दशयोजनान्युत्प्लुत्योभयोः पार्श्वयोर्दशयोजनविस्तारे पर्वतसमायामे द्वे विद्याधरश्रेण्यौ भवतः । तत्र दक्षिणश्रेण्यां रथनूपुरचक्रवालादीनि पंचाशद्विद्याधरनगराणि । उत्तरश्रेण्यां गगनवल्लभादीनि षष्टिर्विद्याधरनगराणि । तन्निवासिनो विद्याधरा भरतवत् षट्कर्मजीविनः केवलं प्रज्ञप्त्यादिविद्याधरणमात्रादेव विशिष्टाः । ततो दशयोजनान्युत्प्लुत्योभयोः पार्श्वयोर्दशयोजनविस्तारे पर्वतसमायामे द्वे व्यंतरश्रेण्यौ भवतः । तत्र शक्रलोकपालानां सोमयमवरुणवैश्रवणानां अभियोग्यव्यंतरदेवानां निवासा भवंति । ततः पंचयोजनान्युत्प्लुत्य शिखरतलं भवति दशयोजनविष्कंभं पर्वतसमायामं । तत्र प्राच्यां दिशि षड्योजनक्रोशाधिकोच्छ्रायविष्कंभं सिद्धायतनकूटं पद्मवरवेदिकापरिवृत्तं तस्योपर्युदग्दक्षिणायामं प्राक्प्रत्यग्विस्तारं क्रोशायामं क्रोशार्धविष्कंभं देशोनक्रोशोच्छ्रायं पद्मवरवेदिकापरिवृतं अर्हदायतनं पूर्वोत्तरदक्षिणद्वारं अर्हदायतनवर्णनोपेतं । तस्य पश्चाद्दक्षिणार्धभरतकूट-खंडकप्रपातकूट-माणिकभद्रकूट-विजयार्धकूट-पूर्णभद्रकूट-तामिस्रगुहाकूट-उत्तरार्धभरतकूट-वैश्रवणकूटनामान्यष्टौकूटानि सिद्धायतनकूटसमोच्छ्रायविष्कंभायामानि । तेषामुपरि दक्षिणार्धभरतदेव-वृत्तमाल्यदेव-माणिभद्रदेव विजयार्धगिरिकुमारदेव-पूर्णभद्रदेव-कृतमालदेव-उत्तरार्धभरतदेव-वैश्रवणदेवानां यथाक्रमं प्रासादाः सिद्धायतनसमायामविष्कंभोच्छ्रायाः । सोयं विजयार्धपर्वतो नवभिः कूटैर्मुकुटैरिवोद्गतैर्गिरिराजत्वं प्राप्त इवाभाति । अथो हैमवत इति कथं संज्ञा ?

हिमवतो दूरभवः सोऽस्मिन्नस्तीति वा हैमवतः ॥ ५ ॥ हिमवान्नाम पर्वतः तस्यादूरभवः सोऽस्मिन्नस्तीति वाऽणि सति हैमवतो वर्षः । क पुनरसौ ?

क्षुद्रहिमवन्महाहिमवतोर्मध्ये ॥ ६ ॥ क्षुद्रहिमवंतमुत्तरेण दक्षिणेन महाहिमवंतं पूर्वापरसमुद्रयोर्मध्ये हैमवतः ।

तन्मध्ये शब्दवान् वृत्तवेदाढ्यः ॥ ७ ॥ तस्य हैमवतस्य मध्ये शब्दवान्नाम पटहाकारः वृत्तत्वाद् वृत्तवेदाढ्य इत्यन्वर्थसंज्ञः योजनसहस्रोच्छ्रायः अर्धतृतीययोजनशतावगाहः उपरि मूले च योजनसहस्रायामविष्कंभस्त्रिगुणसातिरेकपरिक्षेपः पर्वतः, अर्धयोजनविष्कंभाद्रिपरिक्षेपायामयुक्तया पूर्वादिदिग्विभागविनिवेशिचतुस्तोरणविभक्तया पद्मवरवेदिकयालंकृतः । तत्तलमध्ये सक्रोशद्वयद्विषष्टियोजनोत्सेधः सक्रोशैकत्रिंशद्योजनविष्कंभः स्वातिदेवविहारः । अथ कथं हरिवर्षसंज्ञा ?

हरिवर्णमनुष्ययोगाद्धरिवर्षः ॥ ८ ॥ हरिः सिंहस्तस्य शुक्लरूपपरिणामित्वात्तद्वर्णमनुष्यानुषितत्वाद्धरिवर्ष इत्याख्यायते । क पुनरसौ ?

निषधमहाहिमवतोरंतराले ॥ ९ ॥ निषधस्य दक्षिणतो महाहिमवत उत्तरतः पूर्वापरसमुद्रयोरंतराले हरिवर्षः ।

तन्मध्ये विकृतवान् वृत्तवेदाढ्यः ॥१०॥ तस्य हरिवर्षस्य मध्ये विकृतवान्नाम वृत्तवेदाढ्यः शब्दवद्वृत्तवेदाढ्येन तुल्यवर्णनः । तस्योपर्यरुणदेवविहारः । अथ कथं विदेहसंज्ञा ?

विदेहयोगाज्जनपदे विदेहव्यपदेशः ॥ ११ ॥ विगतदेहाः विदेहाः । के पुनस्ते ? येषां देहो नास्ति, कर्मबंधसंतानोच्छित्तये वा सत्यपि देहे विगतशरीरसंस्कारास्ते विदेहास्तद्योगाज्जनपदे विदेहव्यपदेशः । तत्र हि मुनयो देहोच्छेदार्थं यतमाना विदेहत्वमास्कंदंति । ननु च भरतैरावतयोरपि विदेहाः ? सत्यं संति कदाचिन्न तु सर्वकालं, तत्र तु सततं धर्मोच्छेदाभावाद्विदेहाः संतीति प्रकर्षापेक्षो विदेहव्यपदेशः । क्व पुनरसौ ?

निषधनीलवतोरंतराले तत्सन्निवेशः ॥ १२ ॥ निषधस्योत्तरात् नीलवतो दक्षिणात्पूर्वापरसमुद्रयोरंतरे तस्य विदेहस्य सन्निवेशो दृष्टव्यः ।

स चतुर्विधः पूर्वविदेहादिभेदात् ॥ १३ ॥ स विदेहश्चतुर्विधः, कुतः ? पूर्वविदेहादिभेदात् । पूर्वविदेहः, अपर विदेहः, उत्तरकुरवो देवकुरवश्चेति । कुतः पुनः पूर्वविदेहादिव्यपदेशः ? मेरोः प्राक् क्षेत्रं पूर्वविदेहः उत्तरं क्षेत्रमुदक्कुरवः, अपरं क्षेत्रमपरविदेहः दक्षिणक्षेत्रं देवकुरव इति नैष युक्तो व्यपदेशः। पूर्वविदेहे हि सविता नीलादुदेति, निषधेऽस्तमुपैति । तत्र प्राङ् नीलः प्रत्यङ् निषधः अपाङ् समुद्रः, मेरुरुदङ् । अपरविदेहे तु निषधे उदयः नीलेऽस्तमय इति । अत्र: प्राङ् निषधः, प्रत्यङ् नीलः, अपाङ् समुद्रः, उदङ् मेरुः । उदक्कुरुषु गंधमादनादुदयो माल्यवतोऽस्तमयः। तत्र गंधमादनः प्राङ्, माल्यवान् प्रत्यङ्, नीलः अपाङ्, मेरुः-उदङ् । देवकुरुषु सौमनसादुदयः विद्युत्प्रभेऽस्तमयः । तत्र सौमनसः प्राङ्, विद्युत्प्रभः प्रत्यङ्, निषधोऽपाङ् मेरुरुदङिति ? सत्यमेवमेतद्यदि तत्रत्यो दिग्विभाग आश्रियेत । इह भरतक्षेत्रे दिग्विभागमाश्रित्य मेरोःपूर्वादिव्यपदेशो युक्तः। तत्र विदेहमध्यभागे मेरुः। तस्मादपरोत्तरदिशि गंधमालिनी। विषयसमीपदेवारण्यात्प्राक् गंधमादनाख्यो वक्षारपर्वतः उदक्दक्षिणायामः प्राक्प्रत्यक्विस्तीर्णः दक्षिणोत्तरकोटिभ्यां मेरुनीलाद्रिस्पर्शी द्वाभ्यामर्धयोजनविष्कंभपर्वतसमायाभ्यां वनखंडाभ्यामलंकृतः, मूलमध्याग्रेषु सुवर्णमयः नीलाद्रिपर्यंतचतुर्योजनशतोच्छ्रितः, योजनशतावगाहः प्रदेशवृद्ध्या वर्धमानः मेरुपर्यंते पंचयोजनशतोत्सेधः पंचविंशतियोजनशतावगाहः, पंचयोजनशतविष्कंभः । ततः प्रदेशहान्या हीयमानः नीलांतेऽर्धतृतीययोजनशतविष्कंभः । त्रिंशतसहस्राणि द्वे च नवोत्तरे शते योजनानां षट् चैकान्नविंशतिभागाः सातिरेका आयामः । तस्योपरि मेरुपर्यंते पंचविंशतियोजनशतोच्छ्रायमूलविष्कंभसिद्धायतनकूटं । तस्योत्तरतः क्रमेण व्यवस्थितानि षट् कूटानि-गंधमादन-उदक्कुरु-गंधमालि-स्फटिक-लोहिताक्ष-आनंदकूटनामानि । तत्र सिद्धायतनकूटे जिनायतनं । स्फटिककूटस्योपरि प्रासादे भोगंधरी[1] देवी पल्योपमस्थितिका । लोहिताक्षकूटस्योपरि प्रासादे पल्योपमस्थितिका दिक्कुमारी भोगावती वसति । शेषेषु चतुर्षु कूटेषु स्वकूटनामानो देवा वसंति । मेरोरुदक् प्राच्यां दिशि नीलादपाच्यां कच्छविषयात्प्रतीच्यां माल्यवान् वक्षारपर्वतः मूलमध्याग्रेषु वैडूर्यमयः विष्कंभायामोच्छ्रायावगाहसंस्थानैर्गंधमादनेन समः । तस्योपरि मेरुपर्यंते सिद्धायतनकूटं यथोक्तपरिमाणं। तस्योपर्यर्हदायतनं । तस्योत्तरतो यथाक्रमं माल्यवत्-उदक्कुरु-कच्छ-विजय-सागर-रजत-पूर्णभद्र-सिता-हरिमहाकूटानि नव भवंति । सागरकूटे सुभगा दिक्कुमारी, रजतकूटे भोगमालिनी दिक्कुमारी वसति । शेषेषु सप्तसु कूटेषु कूटसमनामानो देवा वसंति। मेरोरुदक्, गंधमादनात्प्राक्, नीलादपाङ्, माल्यवतः प्रत्यङ्, उदक्कुरवः प्राक्प्रत्यगायताः, उदक्प्रागुविस्तीर्णा यमकाद्रिद्वयपंचसरोवरकांचनगिरिशतोपशोभिताः। एकादशसहस्राणि अष्टौ शतानि द्वाचत्वारिंशानि योजनानां द्वौ चैकान्नविंशतिभागौ उदक्कुरुविष्कंभः । नीलसमीपे त्रिपंचाशद्योजनसहस्राणि ज्याषष्ठिसहस्राणि चत्वारि शतानि अष्टादशानि योजनानां द्वादश चैकान्नविंशतिभागाः साधिका धनुः । तत्र सीतायाः प्राग्दिग्भागे जंबूवृक्षो वर्णितः, तस्योत्तरस्यां दिशि

१ ग. पुस्तके गांधारीदेवीति पाठः ।

शाखायामर्हदायतनं क्रोशायामार्धक्रोशविष्कंभदेशोनक्रोशोत्सेधं। प्राच्यां दिशि शाखायां तत्तुल्यप्रासादः, तत्र जंबूद्वीपाधिपतिर्व्यंतरेश्वरोऽनावृतनामा वसति। दक्षिणस्यां दिशि शाखायां प्रतीच्यां च प्रासादयोः शयनीयानि रमणीयानि। ततः पूर्वोत्तरापरोत्तरासु दिक्ष्वनावृतदेवसामानिकानां चत्वारि जंबूसहस्राणि। दक्षिणपूर्वस्यां दिशि अभ्यंतरपरिषद्देवानां द्वात्रिंशत्सहस्राणि। दक्षिणस्यां मध्यमपरिषद्देवानां चत्वारिंशत्सहस्राणि। दक्षिणापरस्यां दिशि बाह्यपरिषद्देवानामष्टचत्वारिंशत्सहस्राणि। प्रतीच्यामनीकमहत्तराणां सप्तानां सप्तजंब्वः, चतसृणामग्रमहिषीणां सपरिवाराणां जम्ब्वः,चतस्रः। पूर्वदक्षिणापरोत्तरासु षोडशसहस्रात्मरक्षदेवानां च षोडशसहस्राणि। एते सुदर्शनजंबूवृक्षस्य परिवारभूताः पूर्वोक्ताष्टशतेन समुदिताः एकं शतसहस्रं चत्वारिंशत्सहस्राणि शतं चैकान्नविंशतिः। एते सर्व एव जंबूवृक्षाः पद्मवरवेदिकापरिवृताः सर्वरत्नकांचनपरिणामाः मुक्तामणिहेमघंटाजालमाल्यदामध्वजपताकाछत्रादित्रयविभूषिताः। सुदर्शनाख्योसौ जंबूवृक्षः पद्मवरवेदिकापरिक्षिप्तैस्त्रिभिर्वनखंडैः परिक्षिप्तः। प्राथमिकवनखंडे चतसृषु दिक्षु क्रोशायामक्रोशार्धविष्कंभदेशोनक्रोशोत्सेधानि चत्वारि भवनानि। विदिक्षु चतस्रः पुष्करिण्यो दशदशयोजनावगाहाः पंचाशद्योजनायामाः तदर्धविष्कंभाः चतुष्कोणा आयतचतुरस्राः शुचिसुरभिसलिलपूर्णाः। तेषां भवनानां पुष्करिणीनां चाष्टासु दिक्षु श्वेतान्युर्जुनसुवर्णनिर्वृत्तानि प्रत्येकमष्टौ कूटानि। तेषामुपरि प्रत्येकं क्रोशायामक्रोशार्धविष्कंभदेशोनक्रोशोच्छ्रायाः चत्वारः प्रासादाः। नीलाद्दक्षिणस्यां दिश्येकं योजनसहस्रं तिर्यगतीत्य सीतामहानद्या उभयोः पार्श्वयोः पंचयोजनशतांतरौ सप्रणिधी द्वौ यमकाद्री योजनसहस्रोच्छ्रायौ अर्धतृतीययोजनशतावगाहौ मूलमध्याग्रेषु योजनैकसहस्रार्धाष्टमयोजनशतपंचयोजनशतविष्कंभौ। तयोरुपरि योजनार्धद्विषष्ठ्यर्धयोजनोच्छ्रायौ सक्रोशैकत्रिंशद्योजनविष्कंभौ तावत्प्रवेशौ प्रासादौ। तत्र यमकनामानौ देवौ वसतः। प्राच्यां दिशि द्वेऽर्हदायतने यमकाभ्यामवाक्पंचयोजनशतानि तिर्यगतीत्य सीतामहानद्याः योजनसहस्रोदगपागायतः पंचयोजनशतप्राक्प्रत्यग्विष्कंभः दशयोजनावगाहः नीलो नाम महाह्रदो भवति। ह्रदमध्ये जलस्योपर्यर्धयोजनोच्छ्रायाणि दशयोजनावगाहनालानि मध्ये योजनविष्कंभाणि क्रोशायतपत्राणि द्विक्रोशकीर्णकान्यग्रमूलयोर्द्विक्रोशविस्तराणि पद्मानि पद्महृदजपद्मवर्णनोपेतानि। तत्र नीलसंज्ञो नागेंद्रकुमारो वसति। तस्य पद्मानि जंबूवृक्षसमसंख्यानि। नीलह्रदात्प्रागद्रे दश कांचनाद्रयः सप्रणिधयो योजनशतोत्सेधाः पंचविंशतियोजनावगाहाः मूलमध्याग्रेषु शतपंचसप्ततिपंचाशद्योजनविष्कंभाः कांचनपरिणामाः। तेषामुपरि सक्रोशैकत्रिंशद्योजनोत्सेधाः सक्रोशपंचदशयोजनविष्कंभाः प्रासादाः कांचनसंज्ञदेवानामावासाः। तादृशा एव प्रत्यक्-दशकांचनाद्रयः। नीलह्रदादपाक् पंचयोजनशतानि तिर्यगतीत्योत्तरकुरुह्रदो भवति उत्तरसंज्ञनागेंद्रकुमारावासः। नीलह्रदतुल्यवर्णनाः, प्राक्प्रत्यग् दशदशकांचनाद्रयः। उदक्कुरुह्रदादपाक् पंचयोजनशतान्यतीत्य चंद्रह्रदः, चंद्रनागेंद्रकुमारावासः। पूर्ववत्कांचनाद्रयश्च। चंद्रह्रदादपाक् पंचयोजनशतानि तिर्यगतीत्यैरावतह्रदो भवति ऐरावतनागेंद्रकुमारावासः। पूर्ववत्कांचनाद्रयश्च। ऐरावतह्रदादपाक् पंचयोजनशतानि तिर्यगतीत्य माल्यवान्नाम ह्रदो भवति माल्यवन्नागेंद्रकुमारावासः। पूर्ववत्कांचनाद्रिशते पूर्वादिङ्निवेशि जिनायतनशतं। मेरोरपाक् प्राच्यां दिशि मंगलावद्विषयात् प्रत्यङ्, निषधादुदङ्, सौमनसो नाम वक्षारगिरिः सर्वस्फटिकपरिणामः, गंधमादनेन विष्कंभायामोच्छ्रायावगाहसंस्थानैस्तुल्यः। तस्योपरि मेरुपर्यंते सिद्धायतनकूटमर्हदायतनालंकृतं पूर्वोक्तपरिमाणं। तस्य दक्षिणतो यथाक्रमं सौमनस-देवकुरु-मंगलावत्-पूर्वविदेह-कनक-कांचन विशिष्ट-उज्वलकूटान्यष्टौ गंधमादनकूटसमानानि। तत्र कनककूटस्योपरि प्रासादे सुवत्सा दिक्कुमारी, कांचनकूटस्योपरि प्रासादे वत्समित्रा दिक्कुमारी, शेषेषु स्वकूटनामानो देवाः। मेरोरपाक् प्रतीच्यां दिशि निषधादुदङ् पद्मवद्विषयात् प्राङ् विद्युत्प्रभो नाम वक्षारगिरिस्तपनीयपरिणामो गंधमादनसमवर्णनः। तस्योपरि मेरुपर्यन्ते सिद्धायतनकूटमर्हदायतनालंकृतं। तस्य दक्षिणतो यथाक्रमं विद्युत्प्रभ-देवकुरु-पद्मवद्विषय-अपरविदेह-स्वस्तिक-शतजाल-सीतोदा-हरिनामान्यष्टौकूटानि गंधमादनकूटसमानानि। तत्र पद्मद्विषयकूटस्योपरि प्रासादे वारिषेणा नाम दिक्कुमारी, स्वस्तिककूटस्योपरि प्रासादे बला नाम

दिक्कुमारी, शेषेषु स्वकूटनामानो देवाः । मेरोरपाक् सौमनसात्प्रत्यक् निषधादुदक् विद्युत्प्रभात्प्राक् देवकुरवः । तेषां ज्याधनुरिषुगणना उत्तरकुरुगणनया ख्याता । मेरोर्दक्षिणापरस्यां दिशि निषधादुदङ् सीतोदायाः प्रत्यङ् विद्युत्प्रभात्प्राक् मध्ये सुप्रभा नाम शाल्मलिः सुदर्शनया जंब्वा ख्यातवर्णना । तस्या उत्तरशाखायामर्हदायतनं । पूर्वदक्षिणापरासु शाखासु प्रासादेषु गुरुत्मान् वेणुदेवो वसति । तस्य परिवारः सर्वोऽनावृत्तदेवपरिवारेण तुल्यः । निषधादुदगेकयोजनसहस्रं तिर्यगतीत्य सीतोदायाः महानद्या उभयोः पार्श्वयोश्चित्रकूटविचित्रकूटौ गिरी । यमकपर्वताभ्यां तुल्यवर्णनौ निषध-देवकुरु-सूर्य-सुलस-विद्युत्प्रभह्रदाख्याः पंचह्रदाः । उत्तरकुरुषु ह्रदैर्व्याख्यातवर्णनाः । कांचनगिरिशतं च तद्वदेव ज्ञेयं । सीतया महानद्या पूर्वविदेहो द्विधा विभक्तः उत्तरो दक्षिणश्चेति । तत्रोत्तरो भागश्चतुर्भिर्वक्षारपर्वतैस्तिसृभिर्विभंगनदीभिश्च विभक्तोऽष्टधा भिन्नः अष्टाभिश्च चक्रधरैरुपभोग्यः । तत्र चित्रकूटः पद्मकूटो नलिनकूटः एकशिलश्चेति वक्षारास्तेषामंतरेषु ग्राहावती-ह्रदावती-पंकावती चेति विभंगनद्यः । तत्र चत्वारोऽपि वक्षारका दक्षिणोत्तरकोटिभ्यां सीतानीलस्पृशो नीलांते चतुर्योजनशतोत्सेधाः योजनशतावगाहाः प्रदेशवृद्ध्या वर्धमानाः शीतानद्यंते पंचयोजनशतोत्सेधाः पंचयोजनशतावगाहाः अश्वस्कंधाकाराः सर्वत्र पंचयोजनशतविष्कंभाः । षोडशसहस्राणि पंचशतानि द्वानवत्यधिकानि योजनानां द्वौ चैकान्नविंशतिभागौ तेषामायामः । तत्र चित्रकूटस्योपरि चत्वारि कूटानि-सिद्धायतन-चित्र-कच्छविजय-सुकच्छाविजयकूटाख्यानि । पद्मकूटस्योपरि चत्वारि कूटानि सिद्धायतन-पद्म-महाकच्छ-कच्छवद्विजयकूटाभिधानानि । नलिनकूटस्योपरि चत्वारि कूटानि सिद्धायतन-नलिन-नलिनावर्त लांगलावर्तकूटसंज्ञानि । एकशिलस्योपरि चत्वारि कूटानि सिद्धायतन-एकशिल पुष्कल पुष्कलावर्तकूटनामानि । सर्वाण्यप्येतानि हिमवदद्रिकूटतुल्यपरिमाणानि तद्गतार्हदायतनप्रासादतुल्यवर्णनजिनायतनप्रासादानि सर्वत्र सीतावर्तसिद्धायतनकूटानि तेषु कूटसमनामानो देवाः । तिस्रोपि विभंगनद्यः स्वतुल्यनामकुंडेभ्यो विंशतियोजनशतविष्कंभायामेभ्यो वरवज्रतलेभ्यः सुवृत्तेभ्यः स्वतुल्यनामदेवीनिवासालंकृतदशयोजनद्विगव्यूतोच्छ्रायषोडशयोजनविष्कभायामद्वीपोपेतेभ्यः नीलाद्रिनितंबनिवेशिभ्यो निर्गताः, प्रभवे द्विक्रोशाधिकद्वादशयोजनविष्कंभा गव्यूतावगाहाः, मुखे पंचविंशतियोजनशतविष्कंभा दशगव्यूतावगाहाः प्रत्येकमष्टाविंशतिनदीसहस्रपरिवृत्ताः सीतां प्रविशंति । एतैर्विभक्ता अष्टौ जनपदाः कच्छ-सुकच्छ-महाकच्छ कच्छक-कच्छकावर्त-लांगलावर्त-पुष्कल-पुष्कलावर्ताख्याः । तेषां मध्ये राजधान्यः-क्षमा क्षमपुरी अरिष्टा अरिष्टपुरी खड्गा मंजूषा औषधिः पौंडरीकिणी चेति नगर्यः । तत्र सीताया उदक् नीलादपाक् चित्रकूटात्प्रत्यक् माल्यवत्समीपदेवारण्यात्प्राक् कच्छविषयः चित्रकूटसमायामः द्वे सहस्रे द्वे शते त्रयोदश योजनानां केन चिद्विशेषेणोनः, प्राक्प्रत्यग्विस्तीर्णः । तस्य बहुदेश मध्यभागे विजयार्धतुल्योच्छ्रायावगाहविष्कंभः कच्छविषयविस्तारसमायामः । तत्रोभयोर्विद्याधरश्रेण्योः, प्रत्येकं पंचपंचाशन्नगराणि । व्यंतरश्रेण्योः ऐशानस्य देवराजस्य लोकपालानां सोमयमवरुणवैश्रवणानामाभियोग्यदेवनगराणि । प्राच्यसिद्धायतनादिकूटनवके च दक्षिणार्धकच्छोत्तरार्धकच्छकूटे वाच्ये विजयार्धादुदक् नीलादपाक् सिद्धकूटाद्वृषभाद्रेश्च प्राक् चित्रकूटात् प्रत्यक् त्रिषष्टियोजनविष्कंभायामं तत्त्रिगुणसातिरेकपरिक्षेपं दशयोजनावगाहं वरवज्रतलं गंगाकुंडं । अस्य बहुमध्य देशभवो द्वीपोऽष्टयोजनविष्कंभायामो दशयोजनाद्विगव्यूतोच्छ्रायः पद्मवरवेदिकाचतुस्तोरणालंकृतः सुवृत्तो गंगादेवीनिवासः । ततो दक्षिणतोरणाद्विनिःसृता अपाङ्मुखी भरतक्षेत्रगंगातुल्यविष्कंभावगाहा विषयसमायामा विजयार्धखंडप्रपातगुहातोरणनिर्गता चतुर्दशनदीसहस्रपरिवारा गंगा महानदी सीतां प्रविशति । विजयार्धादुदङ् नीलादपाक् वृषभाद्रेः प्रत्यङ् माल्यवत्समीपदेवारण्यात्प्राक् सिंधुकुंडं गंगाकुंडतुल्यवर्णनं सिंधुदेवीनिवासालंकृतं । ततो विनिःसृता गंगातुल्या विजयार्धतमिस्रगुहांतरान्निर्गता चतुर्दशनदीसहस्रपरिवारा सिंधुर्महानदी सीतां प्रविशति । तत्र सीताया उदक् विजयार्धादपाक् गंगासिंध्वोर्बहुमध्यदेशभाविनी क्षमा नाम राजधानी । एवमितरे सप्तापि जनपदाः क्रमेण पूर्वदेशनिवेशिनो नेतव्याः । लवणसमुद्रवेदिकायाः

प्रत्यक् पुष्कलावत्याः प्राक् सीताया उदक् नीलादपाक् देवारण्यं नाम वनं, तस्य द्वे सहस्रे नव च शतानि द्वाविंशतिर्योजनानां सीतामुखे विष्कंभः। षोडशसहस्राणि पंचशतानि द्वानवत्यधिकानि योजनानां द्वौ चैकान्नविंशतिभागौ आयामः। सीताया अपाक् निषधादुदक् वत्सविषयात्प्राक् लवणसमुद्रवेदिकायाः प्रत्यक् पूर्ववद्देवारण्यं । सीताया दक्षिणतः पूर्वविदेहश्चतुर्भिर्वक्षारपर्वतैस्तिसृभिश्च विभंगनदीभिर्विभक्तोऽष्टधा भिन्नः अष्टभिश्चक्रधरैरुपभोग्यः । तत्र त्रिकूटो वैश्रणकूटः अंजनः आत्मांजनश्चेति वक्षाराः । तेषामंतरेषु तप्तजला मत्तजला उन्मत्तजला चेति तिस्रो विभंगनद्यः । एतैर्विभक्ता अष्टौ जनपदाः- वत्सा-सुवत्सा-महावत्सा-वत्सवती-रम्य-रम्यक-रमणीय-मंगलावत्यः। तेषां मध्ये राजधान्यः[१]- सुसीमा-कुंडला-अपराजिता-प्रभाकरी-अंकावती-पद्मावती-शुभा-रत्नसंचयावती-नगर्यः । तेषु जनपदेषु द्वे द्वे नद्यौ रक्तारक्तोदासंज्ञे । एको विजयार्धः। तेषां सर्वेषां विष्कंभायामादिवर्णना पूर्ववद्वेदितव्याः। वक्षारपर्वतेषु प्रत्येकं चत्वारि कूटानि सिद्धायतन-स्वनाम-पूर्वापरदेशनामानि । सीताया उत्तरतटे दक्षिणतटे च प्रतिजनपदं त्रीणि त्रीणि तीर्थानि मागध-वरदा-प्रभाससंज्ञानि, तानि समुदितानि अष्टचत्वारिंशत्तीर्थानि, पूर्वविदेहे। सीतोदया महानद्या अपरविदेहो द्विधा विभक्तो दक्षिण उत्तरश्चेति । तत्र दक्षिणो भागश्चतुर्भि-वक्षारपर्वतैस्तिसृभिश्च विभंगनदीभिर्विभक्तोऽष्टधा भिन्नः। अष्टाभिश्चक्रधरैरुपभोग्यः। तत्र शब्दवत्-विकृतावत्-आशीविष-सुखावहसंज्ञाश्चत्वारो वक्षाराद्रयः। तेषामंतरेषु क्षीरोदा-सीतोदा स्रोतोऽन्तर्वाहिनी चेति तिस्रो विभंगनद्यः। एतैर्विभक्ता अष्टौ जनपदाः पद्म-सपद्म-महापद्म-पद्मावर्त-शंख-नलिन-कुमुद सरिदाख्याः। तेषां मध्ये राजधान्यः अश्वपुरी सिंहपुरी महापुरी अरजा विरजा अशोका वीतशोका चेति नगर्यः। तेषु जनपदेषु द्वे द्वे नद्यौ रक्तारक्तोदासंज्ञे। एकैको विजयार्धश्च। तेषां सर्वेषां विष्कंभायामादिवर्णना पूर्ववद्वेदितव्या। वक्षारपर्वतेषु प्रत्येकं चत्वारि कूटानि सिद्धायतन स्वनाम पूर्वापरदेशनामानि। देवारण्ये द्वेऽपि पूर्ववद्वेदितव्ये। उत्तरो विभागश्चतुर्भिर्वक्षारपर्वतैस्तिसृभिर्विभंगनदीभिश्च विभक्तोऽष्टधा भिन्नः। अष्टाभिश्चक्रधरैरुपभोग्यः। तत्र चंद्र-सूर्य-नाग-देवसंज्ञाश्चत्वारो वक्षारपर्वताः। तेषामंतरेषु गंभीरमालिनी फेनमालिनी धर्मिमालिनी चेति तिस्रो विभंगनद्यः। एतैर्विभक्ता अष्टौ जनपदाः वप्र-सुवप्र-महावप्र-वप्रावत्-वल्गु-सुवल्गु-गंधिल-गंधिमालिसंज्ञाः। तेषां मध्ये राजधान्यः विजया वैजयंती जयंती अपराजिता चक्रपुरी खड्गपुरी अयोध्या अवध्या चेति नगर्यः। तेषु जनपदेषु गंगासिंधुसंज्ञे द्वे नद्यौ। एकैको विजयार्धश्च। तेषां सर्वेषां विष्कंभायामादिवर्णना पूर्व-वद्वेदितव्या । वक्षारपर्वतेषु प्रत्येकं चत्वारि कूटानि-सिद्धायतनस्वनामपूर्वापरदेशनामानि। सीतोदाया अपि तीर्थानि, सीताया इवाष्टचत्वारिंशत्। विदेहस्य मध्ये मेरुर्नवनवतियोजनसहस्रोत्सेधः धरणीतले सहस्रावगाहः दशसहस्राणि नवतिश्च योजनानां दश चैकादशभागाः। अधस्तलेऽस्य विस्तारः एकत्रिंशत्सहस्राणि नवति-शतान्येकादश च योजनानि किंचित्-न्यूनानि। अधस्तलेऽस्य परिधिः दशसहस्राणि योजनानां। भूतलस्य विष्कंभ एकत्रिंशत्सहस्राणि षट्शतानि त्रयोविंशानि योजनानि किंचित्-न्यूनानि। तत्रास्य परिधिः सचतुर्वनः त्रिखंडः त्रिश्रेणिः। चत्वारि वनानि भद्रशालवनं नंदनं सौमनसं पांडुकं चेति। भूमितले भद्रशालवनं पूर्वा-परदिशोर्द्वाविंशतियोजनसहस्राण्यायतं । दक्षिणोत्तरदिशोरर्धतृतीययोजनशतान्यायतं । एकयार्धयोज-नोच्छ्रायपंचशतधनुर्विष्कंभवनसमायामया बहुतोरणविभक्तया पद्मवरवेदिकया परिवृतं। मेरोश्चतसृषु दिक्षु भद्रशालवने पद्मोत्तर-नील-स्वस्तिक-अंजन-कुमुद-पलाश-अवतंस रोचनसंज्ञान्यष्टौ कूटान्येकैकस्यां दिशि द्वे द्वे कूटे भवतः। तत्र मेरोः प्रागुदक्कूले सीतायाः पद्मोत्तरकूटं। मेरोः प्राक्, अपाक्कूले सीतायाः नीलकूटं। मेरोरपाक् सीतोदाया प्राक्कूले स्वस्तिककूटं। मेरोरपाक् सीतोदाया प्रत्यक्कूले अंजनकूटं। मेरोः प्रत्यक् सीतोदाया दक्षिणकूले कुमुदकूटं। मेरोः प्रत्यक् सीतोदायाः उत्तरकूले पलाशकूटं। मेरोरुदक् सीतायाः प्रत्यक्कूलेऽवतंसकूटं। मेरोरुदक् सीतायाः प्राक्कूले रोचनकूटं। तान्येतानि सर्वाणि कूटानि पंचविंशतियोजनावगाहनानि योजन-

---

१ ग. पुस्तके त्रिकांड इति पाठः।

शतमूलविस्ताराणि पंचसप्ततियोजनमध्यविष्कंभाणि पंचाशद्योजनाग्रविस्ताराणि पद्मवरवेदिकापरिवृतानि। तेषामुपरि मध्यदेशभाजः सक्रोशैकत्रिंशद्योजनोत्सेधाः पंचदशयोजनद्विगव्यूतायामविष्कंभा अष्टा प्रासादाः। तेषु स्वकूटनामानः सोमयमवरुणवैश्रवणानां लोकपालानामाभियोग्यानैरावनरूपविकरणसमर्थाः दिग्गजेंद्राः देवा वसंति। तत्र पद्मोत्तरनीलस्वस्तिकांजनकूटेषु शक्रलोकपालानां भौमविहाराः। कुमुदपलाशावतंसरोचनकूटेषु ऐशानलोकपालानां भौमविहाराः। मेरोः प्राक् सीतायाः प्रत्यक् पंचाशद्योजनविष्कंभाणि षोडशयोजनोच्छ्रायतदर्धविष्कंभतावत्प्रवेशप्रागुदग्दक्षिणद्वाराणि नानामणिकांचनरजतपरिणामानि सहस्रजिह्वेनापि वर्णयितुमशक्यानि, यानि सहस्राक्षः सहस्रमक्ष्णां विस्तार्य विलोकमानोपि सततं न तृप्तिमुपयाति। तेषां पुरस्ताद्योजनशतायामतदर्धविष्कंभसातिरेकषोडशयोजनोच्छ्राया मुखमंडपाः। तेषां पुरस्ताद्योजनशतायामतदर्धविष्कंभसातिरेकषोडशयोजनोच्छ्रायाः प्रेक्षागृहाः। तेषां पुरस्ताच्चतुःषष्टियोजनायामविष्कंभास्तत्त्रिगुणसातिरेकपरिधयः स्तूपाः। तेषां पुरस्ताच्चैत्यवृक्षपीठानि षोडशयोजनायामानि तदर्धविष्कंभाणि तावदुत्सेधानि प्रत्येकं चतुस्तोरणविभक्तानां पद्मवरवेदिकानां चतुर्विंशत्या परिवृतानि। तेषां मध्ये सिद्धार्थनामकाः-चैत्यवृक्षाः सिद्धार्थतीर्थंकरप्रतिकृतिपवित्रीकृताः षोडशयोजनोच्छ्राया चतुर्योजनोत्सेधयोजनविष्कंभस्कंधा द्वादशयोजनोच्छ्रायतावद्बाहुल्यविटपाः। तेभ्यः प्राक् नानामणिरत्नमयपीठनिवेशिनः षोडशयोजनोच्छ्रायगव्यूतविष्कंभायाममर्हेद्ध्वजाः। ततः प्राङ् नंदाख्याः पुष्करिण्यः योजनशतायामतदर्धविष्कंभदशयोजनावगाहाः अर्हदायतनमध्यदेशनिवेशिनः षोडशयोजनायामतदर्धविष्कंभोच्छ्राया रत्नमया देवछंदाः। तत्र पंचधनुःशतोत्सेधाः कनकमयदेहास्तपनीयहस्तपादतलताल्वजिह्वा लोहिताक्षमणिपरिक्षिप्तांकस्फाटिकमणिनयना अरिष्टमणिमयनयनतारकाः रजतमयदंतपंक्तयः विद्रुमच्छायाधरपुटाः अंजनमूलमयपक्ष्मभूतला नीलमणिविरचितासितांचितकेशाः प्रगृहीतसितविमलवरचामराग्रहस्तोभयपार्श्वस्थविविधमणिकनकविकृताभरणालंकृतयक्षनागमिथुनाः सुश्लिष्टाष्टसहस्रलक्षणव्यंजनांकिताः वैडूर्यदंडमणिहेममुक्ताजालालंकृतरत्नशलाकाशतकांचनतुंबविवरजतच्छदछत्रादिकच्छन्ना भव्यजनस्तवनवंदनपूजनार्हा अर्हत्प्रतिमा अनाद्यनिधना अष्टशतसंख्याः विशिष्टगुणवर्णितगुणाः अष्टशतकलशभृंगारधूपकरणपरिवाराः वर्णनातीतविभवाः मूर्ता इव जिनधर्मा विराजंते। ततो भूमिजलात्पंचयोजनशतान्युत्प्लुत्य 'उत्सृत्येति वा पाठः' पंचयोजनशताविष्कंभं मेरुसमायाममंडलं पद्मवरवेदिकापरिक्षिप्तं वृत्तवलयपरिधि नंदनवनं। तत्र बाह्यगिरिविष्कंभः नवसहस्राणि नव च शतानि चतुःपंचाशानि योजनानां षट् चैकादशभागाः। तत्परिधिरेकत्रिंशत्सहस्राणि चत्वारि शतानि एकानाशीत्यधिकानि सातिरेकाणि योजनानां। अभ्यंतरगिरिविष्कंभोष्टौ सहस्राणि नवशतानि चतुःपंचाशानि योजनानां षट्चैकादशभागाः। तत्परिधिरष्टाविंशतिसहस्राणि त्रीणि शतानि षोडशानि योजनानामष्टौ चैकादशभागाः। चतसृषु दिक्षु चतस्रो गुहाः-प्राच्यां दिशि मणिगुहा, अपाच्यां गंधर्वगुहा, प्रतीच्यां चारणगुहा, उदीच्यां चंद्रगुहा। ता एतास्त्रिंशद्योजनविष्कंभायामाः साधिकनवतियोजनपरिधयः पंचाशद्योजनावगाहाः। तासु यथासंख्यं सोमयमवरुणखचराणां विहाराः। मेरोः पूर्वोत्तरदिशि नंदनवने बलभद्रकूटं योजनसहस्रोच्छ्रायं मूलमध्याग्रेषु योजनसहस्रार्धाष्टयोजनशतपंचयोजनशतविस्तारं। तत्त्रिगुणसातिरेका परिधिस्तस्योपरि मंदराधिपतेरावासाः। मेरोश्चतसृषु दिक्षु द्वे द्वे कूटे-प्राच्यां दिशि तावन्नंदनमंदिरे। अपाच्यां निषधहैमवते। प्रतीच्यां रजतरुचके। उदीच्यां सागरचित्रवज्रे। अष्टावप्येतानि कूटानि पंचयोजनशतोच्छ्रायानि मूलमध्याग्रेषु पंचशतपंचसप्तत्यधिकशतत्रयार्धतृतीयशतयोजनाविष्कंभाणि। तेषामुपरि द्विषष्टियोजनद्विगव्यूतोच्छ्रायाः सक्रोशैकत्रिंशद्योजनविष्कंभास्तावत्प्रवेशा एवाष्टौ प्रासादाः। तेषु मेघंकरी-मेघवती-सुमेघमालिनी-तोयंधरा-विचित्रा-पुष्करमाला-अनिंदिता-संज्ञा अष्टौ दिक्कुमार्यः यथाक्रमं परिवसंति। मेरोर्दक्षिणपूर्वस्यां दिशि उत्पलगुल्मा नलिन-उत्पल-उत्पलोज्वलाख्याश्चतस्रो वाप्यः। दक्षिणापरस्यां भृंगा-भृंगनिभा-कज्जलप्रभाश्चतस्रः पुष्करिण्यः। अपरोत्तरस्यां दिशि श्रीकांता-श्रीचंद्रा-श्रीनिलया-श्रीमहिताश्चतस्रो.

वाप्यः । उत्तरपूर्वस्यां दिशि पद्मा पद्मगुल्मा कुमुदा कुमुदप्रभाश्चतस्रो वाप्यः । ताः सर्वाः पंचाशद्योजनायामतदर्धविष्कंभदशयोजनावगाहाः चतुःकोणाः आयतचतुरस्राः । तासां मध्ये प्रत्येकमेकैकः प्रासादः द्विषष्टियोजनार्धयोजनोत्सेधः सगव्यूतैकत्रिंशद्योजनविष्कंभस्तावत्प्रदेशः । तत्र दक्षिणस्यां दिशि विदिशोः प्रासादाः शक्रस्य भौमविहाराः । उत्तरस्यां दिशि विदिशोरैशानस्य भौमविहाराः । मेरोश्चतसृषु दिक्षु नंदनवने चत्वारि जिनायतनानि षट्‌त्रिंशद्योजनोत्सेधानि पंचाशद्योजनायामतदर्धविष्कंभाणि तावत्प्रवेशानि अष्टयोजनोच्छ्रायतदर्धविष्कंभायामप्राग्द्वाराणि 'प्रागुदगपाग्द्वाराणीत्यपिपाठः' अर्हदायतनवर्णनोपेतानि । नंदनात्समभूमिभागाद्द्विषष्टियोजनसहस्राणि पंचशतान्युत्प्लुत्य वृत्तवलयपरिधिपंचयोजनशतविष्कंभं पद्मवरवेदिकापरिक्षिप्तं सौमनसवनं । तत्र बाह्यगिरिविष्कंभश्चत्वारि सहस्राणि द्वे शते द्वासप्ततिश्च योजनानामष्टौ चैकादशभागाः । तत्परिधिस्त्रयोदशसहस्राणि पंचशतान्येकादशानि योजनानां षट्चैकादशभागाः । अभ्यंतरगिरिविष्कंभस्त्रीणि सहस्राणि द्वे शते द्वासप्ततिर्योजनानामष्टौ चैकादशभागाः । तत्परिधिर्दशसहस्राणि त्रीणि शतान्येकान्नपंचाशानि योजनानां त्रयश्चैकादशभागाः किंचिद्विशेषोनाः । बलभद्रकूटदिक्कुमारीकूटाष्टकहीनं सौमनसं । षोडशात्र वाप्यः नंदनवापीसदृशायामविष्कंभावगाहास्तन्मध्यदेशे भवनानि । पंचाशद्योजनायामतदर्धविस्तारषट्‌त्रिंशद्योजनोच्छ्रयाणि । चतुर्दिशं चत्वार्यर्हदायतनानिः अष्टयोजनोच्छ्रिततदर्धविस्तारतावत्प्रवेशप्रागुदगपाग्द्वाराणि जिनायतनवर्णनोपेतानि। सौमनसात्समाद् भूभागात्षट्‌त्रिंशत्सहस्राण्यारुह्य योजनानि वृत्तवलयपरिधिपांडुकवनं चतुर्नवत्युत्तरचतुःशतविष्कंभं पद्मवरवेदिकापरिवृत्तं चूलिकां परीत्य स्थितं । शेखरं मेरोरेकयोजनसहस्रविष्कंभं तत्परिधिस्त्रीणि सहस्राणि षोडशाधिकं शतं योजनानां साधिकं । पांडुकवनबहुमध्यदेशभाविनी चत्वारिंशद्योजनोच्छ्राया मूलमध्याग्रेषु द्वादशाष्टचतुर्योजनविष्कंभा सुवृत्ता चूलिका । तस्यां प्राच्यां दिशि पांडुकशिला उदक्दक्षिणायामा प्राक्प्रत्यग्विस्तारा । अपाच्यां पांडुकंवलशिला प्राक्प्रत्यगायामा उदग्दक्षिणविस्तारा। प्रतीच्यां रक्तकंबलशिला उदगपाग्विस्तीर्णा । उदीच्यां अतिरिक्तकंबलशिला प्राक्प्रत्यगायता उदगपाग्विस्तीर्णा । तत्रार्जुनसुवर्णमयी पांडुकशिला। रजतपरिणामा पांडुकंबलशिला। विद्रुमवर्णा रक्तकंबलशिला। जांबूनदसुवर्णमयी अतिरिक्तकंबलशिला एताश्चतस्रोपि पंचयोजनशतायामतदर्धविष्कंभाश्चतुर्योजनबाहुल्या अर्धचंद्रसंस्थाना अर्धयोजनोत्सेधपंचधनुः शतविष्कंभशिलासमायामैकपद्मवरवेदिकापरिवृताः श्वेतवरकनकस्तूपिकालंकृतचतुस्तोरणद्वारविराजिताः । तासामुपरि बहुमध्यदेशभावीनि पंचधनुःशतोत्सेधायामतदर्धविष्कंभाणि प्राङ्मुखानि सिंहासनानि। पौरस्त्ये सिंहासने पूर्वविदेहजान्, अपाच्ये भरतजान्, प्रातीच्ये अपरविदेहजान्, उदीच्ये ऐरावतजांस्तीर्थकरांश्चतुर्निकायदेवाधिपाः सपरिवाराः महत्या विभूत्या क्षीरोदवारिपरिपूर्णाष्टसहस्रकनककलशैरभिषिंचति। अत्रापि षोडशपुष्करिण्यः पूर्ववद्वेदितव्याः। चूलिकायाश्चतसृषु महादिक्षु सक्रोशत्रयस्त्रिंशद्योजनायामानि द्विगव्यूताधिकषोडशयोजनविष्कंभाणि पंचविंशतियोजनोच्छ्रायाणि योजनोत्सेधतदर्धविष्कंभतावत्प्रवेशप्रागपागुदग्द्वाराणि चत्वार्यर्हदायतनानि अर्हदायतनवर्णनोपेतानि । भद्रशालवनभाविनि भूतले लोहिताक्षकल्पपरिक्षेपः। तत ऊर्ध्वमर्धसप्तदशयोजनसहस्राण्यारुह्य द्वितीयः पद्मवर्णः। ततोप्यर्धसप्तदशयोजनसहस्राण्यारुह्य तृतीयस्तपनीयवर्णः। ततोप्यर्धसप्तदशयोजनसहस्राण्यारुह्य चतुर्थो वैडूर्यवर्णः। ततोप्यर्धसप्तदशयोजनसहस्राण्यारुह्य पंचमो नीलवर्णः। ततोप्यर्धसप्तदशयोजनसहस्राण्यारुह्य षष्टो हरितालवर्णः। ततोप्यर्धसप्तदशयोजनसहस्राण्यारुह्य जंबूनदसुवर्णवर्णो भवति । अधोभूम्यवगाही योजनसहस्रायामः प्रदेशः पृथिव्युपलवालुकाशर्कराचतुर्विधपरिणामः उपरि वैडूर्यपरिणामः प्रथम कांडः । सर्वरत्नमयः द्वितीयः कांडः। जांबूनदमयः तृतीयः कांडः । चूलिकाः वैडूर्यमयी । मेरुरयं त्रयाणां लोकानां मानदंडः । अस्याधस्तलादधोलोकः। चूलिकामूलादूर्ध्वमूर्ध्वलोकः मध्यमप्रमाणस्तिर्यग्विस्तीर्णस्तिर्यग्लोकः । एवं च कृत्वाऽन्वर्थनिर्वचनं क्रियते । लोकत्रयं मिनातीति मेरुरिति । तस्य भूमितलादारभ्याऽऽशिखरादेकादशिकी प्रदेशहानिः। एकादशसु प्रदेशेषु एकप्रदेशो हीयते। एकादशसु गव्यूतेषु एकगव्यूतं हीयते । एकादशसु योजनेषु

एकयोजनं हीयते एवं सर्वत्र शिखराद् भूमितलस्याधः एकादशसु प्रदेशेषु एकः प्रदेशो वर्धते। एकादशसु योजनेषु एकं योजनं वर्धते। एवं सर्वत्र अधस्तलात्। अथ कथं रम्यकसंज्ञा?

रमणीयदेशयोगाद्रम्यकाभिधानं ॥ १४ ॥ यस्माद्रमणीयैर्देशैः सरित्पर्वतकाननादिभिर्युक्तस्तस्मादसौ रम्यक इत्यभिधीयते। अन्यत्रापि रम्यकदेशयोगः समानः? इति चेन्न रूढिविशेषबललाभाद्गोशब्दवृत्तिवत्। अत एव संज्ञायां को विहितः। क पुनरसौ?

नीलरुक्मिणोरंतराले तत्संनिवेशः ॥ १५ ॥ नीलादुदक् रुक्मिणोऽपाक् पूर्वापरसमुद्रयोरंतराले तस्य रम्यकस्य सन्निवेशो द्रष्टव्यः।

तन्मध्ये गंधवान्वृत्तवेदाढ्यः ॥ १६ ॥ तस्य रम्यकस्य मध्ये गंधवान्नाम वृत्तवेदाढ्यः शब्दवद्वृत्तवेदाढ्येन तुल्यवर्णनस्तस्योपरि प्रासादे पद्मदेवो वसति। अथ कथं हैरण्यवतसंज्ञा?

हिरण्यवतोऽदूरभवत्वाद्धैरण्यवतव्यपदेशः ॥१७॥ हिरण्यवान् रुक्मिनामा पर्वतस्तस्याऽदूरभवत्वाद्धैरण्यवतव्यपदेशः। क पुनरसौ?

रुक्मिशिखरिणोरंतराले तद्विस्तारः ॥ १८ ॥ रुक्मिण उदक् शिखरिणोऽपाक् पूर्वापरसमुद्रयोरंतराले तस्य हैरण्यवतस्य विस्तारो वेदितव्यः।

तन्मध्ये माल्यवान् वृत्तवेदाढ्यः ॥ १९ ॥ तस्य हैरण्यवतस्य मध्ये माल्यवान्नाम वृत्तवेदाढ्यः शब्दवद्वृत्तवेदाढ्येन तुल्यवर्णनः। तस्योपरि प्रासादे प्रभासदेवो वसति। अथ कथमैरावतसंज्ञा?

ऐरावतक्षत्रिययोगादैरावताभिधानं ॥ २० ॥ रक्तारक्तयोः बहुमध्यदेशभाविनी अयोध्या नाम नगरी। तस्यामुत्पन्न ऐरावतो नाम राजा तत्परिपालितत्वाज्जनपदस्यैरावताभिधानं। क पुनरसौ?

शिखरिसमुद्रत्रयांतरे तदुपन्यासः ॥ २१ ॥ शिखरिणः गिरेस्त्रयाणां पूर्वापरोत्तराणां समुद्राणां मध्ये तस्यैरावतस्य उपन्यासो वेदितव्यः।

तन्मध्ये पूर्ववद्विजयार्धः ॥ २२ ॥ तस्यैरावतस्य मध्ये विजयार्धो रजतगिरिः पूर्ववद्वेदितव्यः। यैर्विभक्तानि सप्तक्षेत्राणि व्याख्यातानि। के पुनस्ते कथं व्यवस्थिताः? इत्यत आह—

तद्विभाजिनः पूर्वापरायता हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणो वर्षधरपर्वताः ॥ ११ ॥

तानि विभजंतीत्येवं शीला तद्विभाजिनः पूर्वापराभ्यामायताः पूर्वापरायताः पूर्वापरकोटिभ्यां लवणजलधिस्पर्शिन इत्यर्थः तद्विभाजित्वादेव तेषां वर्षधरव्यपदेशोऽसंकरेण भरतादिवर्षाणां धारणात्। कथं हिमवानिति संज्ञा?

हिमाभिसंबंधाद्धिमवद्व्यपदेशः ॥ १ ॥ हिममस्यास्तीति हिमवानिति व्यपदेशः। अन्यत्रापि तत्संबंधः? इतिचेत् रूढिविशेषबललाभात्तत्रैव वृत्तिः। क्वासौ हिमवानित्युच्यते—

भरतहैमवतयोः सीमनि स्थितः ॥ २ ॥ भरतस्य हैमवतस्य च सीमनि व्यवस्थितः क्षुद्रहिमवान् वेदितव्यः। कथं पुनरस्य क्षुद्रत्वं? महाहिमवदपेक्षया। सूत्रेऽनुक्तं कथं गम्यते? इति चेन्महाहिमवत्प्रयोगादेव। सति हि क्षुद्रे महत्त्वमित्यर्थात्क्षुद्रत्वं गम्यते। स पंचविंशतियोजनावगाहः योजनशतोच्छ्रायः योजनसहस्रं द्विपंचाशद्योजनानां द्वादशैकान्नविंशतिभागाः तस्य विष्कंभः। तस्योत्तरपार्श्वे ज्या चतुर्विंशतिसहस्राणि नवशतानि द्वात्रिंशानि योजनानामेकश्चैकान्नविंशतिभागो देशोनः। अस्या ज्यायाः धनुः पचविंशतिसहस्राणि द्वे शते त्रिंशच्चत्वारश्चैकान्नविंशतिभागाः साधिकाः। तस्य पूर्वापरपार्श्वबाहू प्रत्येकं पंचसहस्राणि त्रीणि शतानि पंचाशद्योजनानि पंचदश चैकान्नविंशतिभागाः साधिकार्धभागश्च। तस्योपरि

प्राचीदिशि सिद्धायतनकूटं पंचयोजनशतोच्छ्रायमूलविष्कंभं पंचसप्तत्यधिकशतत्रयमध्यविष्कभं अर्धतृतीयशताग्रविष्कभं। तत्त्रिगुणसातिरेकपरिधिः,[1] तस्योपरि[2] षट्त्रिंशद्योजनोच्छ्रायं पंचाशद्योजनोदग्दक्षिणायामं पंचविंशतियोजनप्राक्प्रत्यग्विस्तारं तावत्प्रवेशमष्टयोजनोत्सेधतदर्धविष्कभं तावत्प्रवेशोदग्दक्षिणपूर्वद्वारमर्हदायतनं। द्वारत्रये सातिरेकाष्टयोजनोच्छ्रायपंचाशद्योजनायामतदर्धविष्कंभाग्रयोमुखमंडपाः। सातिरेकाष्टयोजनोच्छ्रायपंचाशद्योजनायामविष्कंभाणि त्रीणि प्रेक्षागृहकाणि। पौरस्त्यप्रेक्षागृहात्प्राक् स्तूपादयः पूर्वोक्ताः। चैत्यालयाभ्यंतरवर्णना पूर्ववद्वेदितव्या। तेषां सर्वेषामेव परिक्षेप्त्री चतुस्तोरणद्वारविभक्ता पद्मवरवेदिका। ततः प्रतीच्यां दिशि दशकूटानि। हिमवद्भरते लागंगा-श्रीरोहितास्या-सिंधु-सुर हैमवत-वैश्रवणकूटाभिधानानि यथाक्रमं वेदितव्यानि सिद्धायतनकूटतुल्यानि। तेषामुपरि प्रासादाः दशैव सक्रोशद्वयार्द्धषष्ठियोजनोत्सेधाः सक्रोशैकत्रिंशद्योजनविष्कंभास्तावत्प्रवेशाः। तेषु स्वकूटनामानो देवा देव्यश्च वसंति। हिमवद्भरतहैमवतवैश्रवणकूटेषु देवाः इतरेषु देव्यः। अथ कथं महाहिमवत्संज्ञा?

महाहिमवति चोक्तं ॥ ३ ॥ किमुक्तं? हिमाभिसंबंधाद्धिमवदभिधानं। महांश्चासौ हिमवांश्च महाहिमवानित्यसत्यपि हिमे हिमवदाख्या। इंद्रगोपवत्। क पुनरसौ?

हैमवतहरिवर्षयोर्विभागकरः ॥ ४ ॥ हैमवतादुदङ् हरिवर्षादपाङ् तयोर्विभागकरो महाहिमवान् वेदितव्यः। स द्वियोजनशतोच्छ्रायः पंचाशद्योजनावगाहः चत्वारि योजनसहस्राणि द्वे च शते दशोत्तरे दश चैकान्नविंशतिभागाः तस्य विष्कंभः। पूर्वापरपार्श्वबाहू प्रत्येकं नवयोजनसहस्राणि द्वे च शते षट्सप्तत्यधिके योजनानां नव चैकान्नविंशतिभागाः अर्धभागश्च साधिकः। तस्योत्तरपार्श्वे ज्या त्रिपंचाशद्योजनसहस्राणि नव च शतानि एकत्रिंशानि षट्चैकान्नविंशतिभागाः साधिकाः। तस्याः ज्याया धनुः सप्तपंचाशद्योजनसहस्राणि द्वे शते त्रिनवत्युत्तरे दश चैकान्नविंशतिभागाः साधिकाः। तस्योपर्यष्टौ कूटानि सिद्धायतन-महाहिमवत्-हैमवत रोहित्-हरि-हरिकांता-हरिवर्ष-वैडूर्यकूटाभिधानानि। क्षुद्रहिमवत्कूटतुल्यप्रमाणानि। तेषामुपरि जिनायतनप्रासादास्तु तुल्या एव। प्रासादेषु स्वकूटनामानो देवा देव्यश्च वसंति। अथ कथं निषधसंज्ञा?

निषीधंति तस्मिन्निति निषधः ॥ ५ ॥ यस्मिन् देवा देव्यश्च क्रीडार्थं निषीधंति स निषधः पृषोदरादिपाठात् सिद्धः। अन्यत्रापि तत्तुल्यकारणत्वात्प्रसंगः? इति चेत् रूढिविशेषबललाभात्। क पुनरसौ?

हरिविदेहयोर्मर्यादाहेतुः ॥६॥ हरिवर्षादुदक् विदेहादपाक् तयोर्मर्यादाहेतुर्निषध इत्याख्यायते। स चतुर्योजनशतोत्सेधः, योजनशतावगाहः षोडशयोजनसहस्राण्यष्टौ च शतानि द्वाचत्वारिंशानि द्वौ चैकान्नविंशतिभागौ तस्य विष्कंभः। पूर्वापरपार्श्वबाहू प्रत्येकं विंशतियोजनसहस्राणि पंचषष्ट्यधिकमेकं च शतं द्वौ चैकान्नविंशतिभागौ अर्धभागश्च साधिकः। उत्तरपार्श्वज्या चतुर्नवतिसहस्राणि षट्पंचाशमेकं च योजनशतं द्वौ चैकान्नविंशतिभागौ साधिकौ। तस्या धनुरेकं योजनशतसहस्रं चतुर्विंशतिसहस्राणि त्रीणि च शतानि षट्चत्वारिंशानि नव चैकान्नविंशतिभागाः साधिकाः। तस्योपरि नवकूटानि सिद्धायतन-निषिध—हरिवर्ष-पूर्वविदेह-हरिधृति-सीतोदा-अपरविदेह— रुचकनामानि, क्षुद्रहिमवत्कुटतुल्यप्रमाणानि। तेषामुपरि जिनायतनप्रासादास्तुल्याः। प्रासादेषु स्वकूटनामानो देवा देव्यश्च वसंति। अथ कथं नीलसंज्ञा?

नीलवर्णयोगान्नीलव्यपदेशः ॥ ७ ॥ नीलेन वर्णेन योगात्पर्वतो नील इति व्यपदिश्यते। संज्ञावास्य, वासुदेवस्य कृष्णव्यपदेशवत्। क पुनरसौ?

विदेहरम्यकविनिवेशविभागी ॥ ८ ॥ स नीलाख्यः पर्वतः विदेहस्य रम्यकस्य च विनिवेशं विभजते। स निषधेन व्याख्यातप्रमाणः। तस्योपरि नवकूटानि सिद्धायतन-नील-पूर्वविदेह-सीता-कीर्ति-नारी कांत-अपरविदेह-रम्यक-आदर्शककूटसंज्ञानि, क्षुल्लकहिमवत्कूटतुल्यप्रमाणानि। तेषामुपरि जिनायतनप्रासादाः तत्तुल्याः। प्रासादेषु स्वकूटनामानो देवा देव्यश्च वसंति। अथ कथं रुक्मिसंज्ञा?

---

१ ग. पुस्तके तत्त्रिगुणसातिरेकपरिधिं, इति पाठः। २ नायं पाठः ग. पुस्तके।

रुक्मसद्भावाद्रुक्मीत्यभिधानं रुक्ममस्यास्तीति रुक्मीत्यभिधानं ॥ ९ ॥ अन्यत्रापि तत्संभवाद्रूढिवशाद्विशेषे वृत्तिः । करिवत् । क्व पुनरसौ ?

रम्यकहैरण्यवतविवेककरः ॥ १ ॥ रम्यकस्य हैरण्यवतस्य च विवेकं करोत्यसौ । स महाहिमवता तुल्यप्रमाणः । तस्योपरि अष्टौ कूटानि सिद्धायतन-रुक्मि-रम्यक-नरकांता-बुद्धि-रूप्यकूल-हैरण्यवत-मणिकांचन-कूटाख्यानि क्षुद्रहिमवत्कूटतुल्यप्रमाणानि । तेषामुपरि जिनायतनप्रासादास्तत्तुल्याः । प्रासादेषु स्वकूटनामानो देवा देव्यश्च वसंति । अथ कथं शिखरिसंज्ञा ?

शिखरसद्भावाच्छिखरीति संज्ञा ॥११॥ शिखराणि कूटान्यस्य संतीति शिखरीति संज्ञायते । अन्यत्रापि तत्सद्भावे रूढिवशाद्विशेषे वृत्तिः शिखंडिवत् । क्व पुनरसौ ?

हैरण्यवतैरावतसेतुबंधः स गिरिः ॥ १२ ॥ हैरण्यवतस्यैरावतस्य च सेतुबंध इव स गिरिरवस्थितः क्षुद्रहिमवत्तुल्यप्रमाणः । तस्योपर्येकादश कूटानि सिद्धायतन-शिखरि हैरण्यवत-रसदेवी-रक्तावली-श्लक्ष्णकूला-लक्ष्मी-गंधदेवी-ऐरावत-मणि-कांचनकूटनामानि क्षुद्रहिमवत्तुल्यप्रमाणानि । तेषामुपरि जिनायतनप्रासादास्तत्तुल्याः । प्रासादेषु स्वकूटनामानो देवा देव्यश्च वसंति । तेषां वर्णविशेषप्रतिपत्त्यर्थमाह—

हेमार्जुनतपनीयवैडूर्यरजतहेममयाः ॥ १२ ॥

त एते हिमवदादयः पर्वताः हेमादिमयाः वेदितव्याः । मयः प्रत्येकं परिसमाप्यते यथाक्रमं हिमवदादयः संबध्यंते । हेममयो हिमवान् चीनपट्टवर्णः, अर्जुनमयो महाहिमवान् शुक्लः, तपनीयमयो निषधः तरुणादित्यवर्णः, वैडूर्यमयो नीलः मयूरग्रीवाभः, रजतमयो रुक्मी शुक्लः, हेममयः शिखरी चीनपट्टवर्ण इति षडपि चैतेऽद्रयः प्रत्येकं उभयपार्श्वगतार्धयोजनविष्कंभाद्रिसमायामाभ्यां बहुतोरणविभक्तैकपद्मवरवेदिकापरिवृतवनखंडाभ्यामुपेताः । पुनरपि तद्विशेषणार्थमेवाह—

मणिविचित्रपार्श्वा उपरि मूले च तुल्यविस्ताराः ॥१३॥

नानावर्णप्रभावादिगुणोपेतैर्मणिभिर्विविधैश्चित्राणि विचित्राणि, मणिविचित्राणि पार्श्वानि येषां त इमे मणिविचित्रपार्श्वाः ।

अनिष्टसंस्थाननिवृत्त्यर्थमुपर्यादिवचनं ॥ १ ॥ अनिष्टसंस्थाननिवृत्त्यर्थमुपर्यादिवचनं क्रियते च शब्दो मध्यसमुच्चयार्थः । यो येषां मूलविस्तारः स उपरि मध्ये च तुल्यः । तेषां मध्ये लब्धास्पदा ह्रदा उच्यंते—

पद्ममहापद्मतिगिंछकेसरिमहापुंडरीकपुंडरीकाः ह्रदास्तेषामुपरि ॥ १४ ॥

पद्मादिभिः सहचरणाद्ध्रदेषु पद्मादिव्यपदेशः ॥ १ ॥ पद्मं महापद्मं तिगिंछं केसरि महापुंडरीकं पुंडरीकमिति पद्मनामानि तैः सहचरणात् ह्रदेषु पद्मादिसंज्ञावृत्तिर्भवति । तेषां हिमवदादीनामुपरि यथाक्रमं ते ह्रदा वेदितव्याः । तत्राद्यस्य संस्थानविशेषप्रतिपत्त्यर्थमाह—

प्रथमो योजनसहस्रायामस्तदर्धविष्कंभो ह्रदः ॥ १५ ॥

प्राक् प्रत्यक् योजनसहस्रायामः उदगपाक् पंचयोजनशतविस्तारः वज्रमयतलः, विविधमणिकनकरजतविचित्रतटः श्वेतवरकनकस्तूपिकालंकृतचतुस्तोरणविभक्तार्धयोजनोत्सेधपंचधनु.शतविष्कंभह्रदसमायामैकपद्मवरवेदिकापरिवृतः चतुर्दिग्गतचतुर्वनखंडमंडितः विमलस्फटिकमणिस्वच्छगंभीराक्षयवारिः विविधजैलजकुसुमपरिभ्राजितः शरदि प्रसन्नचंद्रताराराजिविराजितपर्यंतपरीतविचित्रपयोधरपटलः, विपर्यस्तो नभोभाग इव विभाति पद्मनामा ह्रदः । तस्यैवावगाहप्रतिपत्त्यर्थमिदमुच्यते—

---

१ रसवतीत्यपि पाठः । २ ग. पुस्तके कृतद्वन्द्वा इमे ह्रदाः । ३ ग. पुस्तके जलकुंभपरिभ्राजित इति पाठः ।

दशयोजनावगाहः ॥ १६ ॥

अवगाहोऽधःप्रवेशो निम्नता । दशयोजनान्यवगाहोऽस्य दशयोजनावगाहः ।

तन्मध्ये योजनं पुष्करं ॥ १७ ॥

योजनप्रमाणं योजनं क्रोशायामपत्रत्वात्, क्रोशद्वयविष्कंभकर्णिकत्वाच्च । योजनायामविष्कंभजलतलात् क्रोशद्वयोच्छ्रायनालं तावद्बहुलपत्रप्रचयं वज्रमयमूलमरिष्टमणिकंदं रजतमणिमृडालं वैडूर्यसुप्रतिष्ठनालं, तस्य बाह्यपत्रं तपनीयपरिशिष्टं जांबूनदाभ्यंतरदलं तपनीयकेसरं नानामणिविचित्रसुवर्णकर्णिकं पुष्करमवगंतव्यं तदर्धोत्सेधैरष्टशतसंख्यैः पद्मैः परिवृतं । तस्मात्पूर्वोत्तरापरोत्तरासु तिसृषु दिक्षु श्रियः सामानिकदेवानां चत्वारि पद्मसहस्राणि । दक्षिणपूर्वस्यां दिश्यभ्यंतरपरिषद्देवानां द्वात्रिंशत्पद्मसहस्राणि । दक्षिणस्यां मध्यमपरिषद्देवानां चत्वारिंशत्पद्मसहस्राणि । दक्षिणापरस्यां बाह्यपरिषद्देवानामष्टचत्वारिंशत्पद्मसहस्राणि । अपरस्यां सप्तानामनीकमहत्तराणां सप्तपद्मानि । चतसृषु महादिक्षु आत्मरक्षदेवानां षोडशपद्मसहस्राणि । तान्येतानि सर्वाणि परिवारपद्मानि तदर्धोत्सेधानि एकं शतसहस्रं चत्वारिंशत्सहस्राणि शतं च पंचाशत् । इतरेषां ह्रदानां पुष्कराणां चायामादिज्ञापनार्थमाह—

तद्द्विगुणद्विगुणा ह्रदाः पुष्कराणि च ॥ १८ ॥

स च तच्च ते तयोर्द्विगुणद्विगुणास्तद्द्विगुणद्विगुणाः ।

द्विगुणद्विगुणा इति द्वित्वं व्याप्त्यर्थं ॥ १ ॥ द्विगुणद्विगुणा इति द्वित्वं उच्यते । किमर्थं ? व्याप्त्यर्थं । द्विगुणेनोत्तरेषां व्याप्तिर्यथास्यादिति । केन द्विगुणाः ? आयामादिना, पद्मह्रदस्य द्विगुणायामविष्कंभावगाहो महापद्मह्रदः । महापद्मह्रदस्य द्विगुणायामविष्कंभावगाहस्तिगिंछह्रदः । पुष्कराणि च किं ? द्विगुणानि इत्यभिसंबध्यते ।

द्वित्वात्तयोर्बहुवचनाभाव इति चेन्न विवक्षितापरिज्ञानात् ॥ २ ॥ स्यादेतत्तयोर्ह्रदयोः पुष्करयोश्च द्वित्वाद्बहुवचनं नोपपद्यते इति ? तन्न किं कारणं ? विवक्षितापरिज्ञानात् । आद्यंताभ्यां पद्मपुंडरीकह्रदाभ्यां तुल्यप्रमाणाभ्यामन्ये ह्रदाः दक्षिणत उत्तरतश्च द्वैगुण्येन निर्दिष्टा इति विवक्षितोऽत्रायमर्थः । अतो बहुवचनमुपपद्यते । कथं पुनस्तच्छब्दे पूर्वनिर्दिष्टापेक्षे सत्यनिर्दिष्टार्थो गृह्यते ?

बहुवचननिर्देशात्तद्ग्रहणं ॥ ३ ॥ बहुवचननिर्देशात्तस्य ग्रहणं विज्ञायते । बहुवचननिर्देशात् केसर्यादयः कथं न गृह्यंते ?

व्याख्यानतो वक्ष्यमाणसंबंधाच्चानिष्टनिवृत्तिः ॥४॥ "व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षण"मित्यनिष्टस्य निवृत्तिर्भवति । अथवा वक्ष्यत एतत् उत्तरा दक्षिणतुल्या इति तदभिसंबंधाच्चेष्टसंप्रत्ययः कर्तव्यः । तद्यथा– महाहिमवत उपरि बहुमध्यदेशभावी महापद्मह्रदः यो द्वियोजनसहस्रायामस्तदर्धविष्कंभो विंशतियोजनावगाहः । तन्मध्ये जलतलाद् द्विक्रोशोच्छ्रायं योजनबहुलपत्रप्रचयं द्विक्रोशायामपत्रत्वाद् योजनायामकर्णिकत्वाच्च द्वियोजनविष्कंभं पुष्करं । तत्परिवारपद्मसंख्या पूर्वोक्तैव । निषधस्योपरि बहुमध्यदेशभाक् तिगिंछह्रदः चतुर्योजनसहस्रायामस्तदर्धविष्कंभः, चत्वारिंशद्योजनावगाहः । तन्मध्ये जलतलाद् द्विक्रोशोद्गमं द्वियोजनबहुलपत्रप्रचयं योजनायामपत्रत्वाद् द्वियोजनायतकर्णिकत्वाच्चतुर्योजनायामविष्कंभं पुष्करं । तत्परिवारपद्मसंख्या पूर्वोक्तैव । नीलस्योपरि बहुमध्यदेशभावी केसरिह्रदः तिगिंछह्रदतुल्यः पद्मानि च तत्तुल्यप्रमाणानि । रुक्मिण उपरि बहुमध्यदेशभाक् महापुंडरीको ह्रदः महापद्मह्रदतुल्यः, पद्मानि च तुल्यप्रमाणानि । शिखरिण उपरि बहुमध्यदेशभावी पुंडरीको ह्रदः पद्मह्रदतुल्यः । पुष्कराणि च तद्गतपद्मप्रमाणानि । अत्र चोद्यते तच्छब्दस्य यदि द्विगुणशब्देन वृत्तिः क्रियते द्वित्वं संघातस्य प्राप्नोति । अथ कृतद्वित्वेन तच्छ-

ब्दस्य वृत्तिः क्रियते समुदायस्याऽसुवंतत्वाद् वृत्तिर्न प्राप्नोति । वीप्सायां द्वित्वे सति वाक्यमेवावतिष्ठत इति ? नैष दोषः तदित्ययं निपातः अपादानार्थे वर्तते । तद्विगुणास्ततो द्विगुणा द्विगुणा इत्यर्थः । तन्निवासिनीनां देवीनां संज्ञाजीवितपरिवारप्रतिपादनार्थमाह—

तन्निवासिन्यो देव्यः श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः पल्योपमस्थितयः ससामानिकपरिषत्का ॥ १९ ॥

तेषु पुष्करेषु कर्णिकामध्यमैकदेशविनिवेशिनः शरद्विमलपूर्णचंद्रद्युतिहराः क्रोशायामक्रोशार्धविष्कंभदेशोत्सेधाः प्रासादास्तेषु निवसंतीत्येवं शीला देव्यस्तन्निवासिन्यः ।

श्र्यादीनामितरेतरयोगे द्वंद्वः ॥ १ ॥ श्रीश्च ह्रीश्च धृतिश्च कीर्तिश्च बुद्धिश्च लक्ष्मीश्च श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्य इतीतरेतरयोगलक्षणो द्वंद्वः । तेषु पद्मादिषु ह्रदेषु यथाक्रमं देव्यः श्र्यादयो वसंति ।

स्थितिविशेषनिर्ज्ञानार्थं पल्योपमवचनं ॥ २ ॥ देवीसामान्यस्थितौ विशेषनिर्ज्ञानार्थं पल्योपमा स्थितिरासां ताः पल्योपमस्थितय इति ।

परिवारनिर्ज्ञानार्थं सामानिकपरिषत्कवचनं ॥ ३ ॥ परिवारप्रतिपत्त्यर्थं सामानिकपरिषद्ग्रहणं क्रियते । समाने स्थाने भवाः सामानिकाः । समानस्य तदादेश्च'इति ठञ्। सामानिकाश्च परिषदश्च सामानिकपरिषदः, अभ्यर्हितत्वात्सामानिकपदस्य पूर्वनिपातः सह सामानिकपरिषद्भिर्वर्तंते इति ससामानिकपरिषत्काः । तेषां पद्मानि निर्दिष्टानि तन्मध्यवर्तिषु प्रासादेषु वसंति । यकाभिः सरद्भिस्तानि क्षेत्राणि विभक्तानि उच्यते-

गंगासिंधूरोहिद्रोहितास्याहरिद्धरिकांतासीतासीतोदानारीनरकांतासुवर्णरूप्यकूलारक्तारक्तोदाः सरितस्तन्मध्यगाः ॥ २० ॥

गंगादीनामितरेतरयोगे द्वंद्व उदकस्य उत्भाव उक्तः सरितो न वाप्यः । ताः किमतरा उत समीपाः ? इत्यत आह -तन्मध्यगा इति । तेषां क्षेत्राणा मध्ये मध्येन वा गच्छंतीति तन्मध्यगाः । एकत्र सर्वासां प्रसंगनिवृत्त्यर्थं दिग्विशेषप्रतिपत्त्यर्थं चाह—

द्वयोर्द्वयोः पूर्वाः पूर्वगाः ॥ २१ ॥

द्वयोर्द्वयोरेकक्षेत्रं विषयः इत्यभिसंबंधादेकत्र सर्वासां प्रसंगानिवृत्तिः ॥ १ ॥ विकल्पो हि वाक्यशेषः, वाक्यं वक्तर्यधीनं हीतीच्छातो वाक्यशेषप्रक्लृप्तेः, द्वयोर्द्वयोरेकक्षेत्रं विषय इत्यभिसंबंधात्सर्वासां सरितां एकस्मिन् क्षेत्रे प्रसंगो निवर्तितो भवति ।

पूर्वाः पूर्वगा इतिवचनं दिग्विशेषप्रतिपत्त्यर्थं ॥ २ ॥ तत्र पूर्वगाः सरितस्ताः पूर्वगाः पूर्वसमुद्रं गच्छंतीति पूर्वगाः । किमपेक्षं पूर्वत्वं सूत्रनिर्देशापेक्षं । यद्येवं गंगासिंध्वादयः सप्त पूर्वगा इति प्राप्तं ? नैष दोषः द्वयोर्द्वयोरित्यभिसंबंधाद्द्वयोर्द्वयोः पूर्वाः पूर्वगा वेदितव्याः । ननु च यद्द्वयोर्द्वयोरिति ग्रहणं, अन्यार्थमुक्तं, अन्यार्थमपि प्रकृतमन्यार्थं भवति । इतरासां दिग्विभागप्रतिपत्त्यर्थमाह—

शेषास्त्वपरगाः ॥ २२ ॥

द्वयोर्द्वयोरवशिष्टा यास्ता अपरगा वेदितव्या अपरं समुद्रं गच्छंतीत्यपरगाः तत्र पद्मह्रदप्रभवा पूर्वतोरणद्वारनिर्गता गंगा ॥ १ ॥ क्षुल्लकहिमवत उपरि पद्मह्रदो वर्णितश्चतुस्तोरणद्वारमंडितः । तत्र पूर्वतोरणद्वारेण निर्गता पंचयोजनशतानि प्राङ्मुखी गत्वा गंगाकूटं स्रोतसा स्फाल्यं । पंचयोजन-

---

जैनेन्द्रीयसूत्रं ।

शतानि त्रयोविंशतिपट्चैकान्नविंशतिभागान् अपाङ्मखी गत्वा स्थूलमुक्तावलीव साधिकयोजनशतप्रमाण-धाराप्रपाता सक्रोशषड्योजनविस्तारा योजनार्धबाहुल्या। षष्टियोजनायामविष्कंभे दशयोजनावगाहे वज्रमय-तले श्रीदेवीग्रहप्रमाणप्रासादमंडितमध्ये सद्विक्रोशदशयोजनोच्छ्रायाष्टयोजनायामविष्कंभद्वीपालंकृतांतरे कुंडे पतिता दक्षिणतोरणद्वारेण विनिःसृता अर्धगव्यूतावगाहा सक्रोशषड्योजनविस्तारा क्रमेण वर्धमाना भुजंग-कुटिलगामिनी खंडकप्रपातगुहामुखेन विजयार्धं व्यतीत्य दक्षिणमुखा दक्षिणार्धभरतमध्यं प्राप्य प्राङ्मुखी सती मुखे सक्रोशयोजनावगाहा सार्धद्विषष्टियोजनविस्तारा लवणोदधिं मागधतीर्थेन प्राविशत् ।

अपरतोरणद्वाराद्विनिर्गता सिंधुः ॥ २ ॥ पाश्चात्यतोरणद्वाराद्विनिर्गता पंचयोजनशतं गत्वा सिंधूकूटं वीचीवाहूपगुहेनाऽऽस्फाल्यं। गंगावत्सिंधूकुंडे पतिता तमिश्रगुहामुखेन विजयार्धं व्यतीत्य प्रभास-तीर्थेनापरसमुद्रं प्राविक्षत् । तत्र गंगाकुंडद्वीपप्रासादे गंगादेवी वसति । सिंधूकुंडद्वीपप्रासादे सिंधूदेवी वसति । हिमवत उपरि किंचित्प्राक् प्रत्यक् चातीत्य गंगासिंध्वोर्मध्ये द्वे पद्माकारे कूटे वैडूर्यपरिणामनाले जलस्योपरि क्रोशमुच्छ्रिते क्रोशद्वयायामविष्कंभे लोहिताक्षमणिमयार्धगव्यूतायतपत्रे तपनीयकेसरेऽर्कमणिनि-र्वृत्तगव्यूतायतकर्णिके। तयोः कर्णिकयोर्मध्ये रत्नमयमेकैकं कूटं । तत्र चैकैकः प्रासादः । प्राच्यकूटप्रासादे पल्योपमस्थितिका बला नाम देवी वसति । प्रतीच्यप्रासादकूटे पल्योपमस्थितिका लवणा नाम देवी वसति ।

उदीच्यतोरणद्वारनिर्गता रोहितास्या ॥ ३ ॥ पद्महृदस्यैव उदीच्यतोरणद्वारनिर्गता द्वे योज-नशते षट्सप्तत्युत्तरे षट्चैकान्नविंशतिभागान् हिमवत उपरि उदङ्मुखी गत्वा गंगातुल्यायामधाराप्रपातार्ध-त्रयोदशयोजनविस्तारा योजनबाहुल्या। विंशतियोजनशतायामविष्कंभे विंशतियोजनावगाहे वज्रतले श्रीदेवी-ग्रहप्रमाणप्रासादमंडितमध्ये सद्विक्रोशदशयोजनोच्छ्रायषोडशयोजनायामविष्कंभद्वीपालंकृतांतरे कुंडे पतिता। ततः कुंडादुदीच्यतोरणद्वारेण निर्गता उदङ्मुखी शब्दवद्वृत्तवेदाढ्यं प्रदक्षिणीकृत्यार्धयोजनेनाऽप्राप्य प्रत्यङ्मुखी सती प्रभवे क्रोशावगाहाऽर्धत्रयोदशयोजनविष्कंभा मुखेऽर्धतृतीययोजनावगाहा पंचविंशतियो-जनशतविष्कंभा रोहितास्या अपरलवणोदधिं प्राविशत् । रोहितास्याकुंडप्रासादे रोहितास्या देवी वसति ।

महापद्महृदप्रभवाऽपाच्यतोरणद्वारेण निर्गता रोहित् ॥ ४ ॥ महाहिमवत उपरि महापद्महृदा-दपाच्यतोरणद्वारेण निर्गता षोडशयोजनशतानि पंचोत्तराणि पंचैकान्नविंशतिभागान् अपागागम्य पतिते-त्यादि रोहितास्यया तुल्यं । अयं तु विशेषः साधिकद्वियोजनशतायामधारा। रोहित्कुंडप्रासादनिवासिनी रोहि-देवी । सा रोहिन्महानदी पूर्वार्णवं प्राविशत् ।

उदीच्यतोरणद्वारनिर्गता हरिकांता ॥ ५ ॥ तत एव महापद्महृदादुदीच्यतोरणद्वारेण निर्गता हरिकांता नाम महानदी रोहिदिवाद्रितले गत्वा उदङ्मुखी साधिकद्वियोजनशतधाराप्रपाताद्वियोजनबाहुल्या पंचविंशतियोजनविस्तारा श्रीदेवीगृहतुल्यप्रासादमंडितमध्ये सद्विक्रोशयोजनोच्छ्रायद्वात्रिंशद्योजनायामविष्कंभद्वी-पालंकृतांतरे चत्वारिंशद्योजनावगाहे चत्वारिंशद्द्विशतयोजनायामविष्कंभे वज्रतले कुंडे पतिता। ततः कुंडादु-दीच्यतोरणद्वारेण निर्गता प्रवाहेऽर्धयोजनावगाहा पंचविंशतियोजनविष्कंभा विकृतवद्वृत्तवेदाढ्यमर्धयोजनेना-ऽप्राप्य प्रदक्षिणीकृत्य प्रत्यङ्मुखी सती मुखे पंचयोजनावगाहाऽर्धतृतीययोजनशतविष्कंभा पाश्चात्याऽर्णवं प्राविक्षत् । हरिकांताकुंडप्रासादे हरिकांतादेवी वसति ।

तिगिंछहृदप्रभवा दक्षिणद्वारनिर्गता हरित् ॥ ६ ॥ निषधस्योपरि तिगिंछहृदाद् दक्षिण तोरणद्वारेण विनिःसृता हरिन्महानदी सप्तसहस्राणि चत्वारि शतान्येकविंशानि योजनानामेकं चैकान्नविं-शतिभागमद्रितले प्राङ्मुखी गत्वा पतितेत्यादि सर्वं हरिकांतातुल्यं । अयं तु विशेषः साधिकचतुर्योजन-शतायामधारा । हरित्कुंडप्रासादनिवासिनी हरिद्देवी । सा प्राच्यमुदधिं प्राविक्षत् ।

उदीच्यतोरणद्वारविनिर्गता सीतोदा ॥ ७ ॥ तत एव तिगिंछहृदादुदीच्यतोरणद्वारेण

हरिदिवाद्रितलं गत्वोदङ्मुखी साधिकचतुर्योजनशतधाराप्रपाता चतुर्योजनबाहुल्या पंचाशद्योजनावस्तारा, श्रीदेवीगृहप्रमाणप्रासादमंडितमध्ये सद्विक्रोशदशयोजनोच्छ्रायचतुष्पष्टियोजनायामविष्कंभद्वीपालंकृतांतरे साशीतिचतुर्योजनशतायामविष्कंभे अशीतियोजनावगाहे वज्रतले कुंडे पतिता । ततः कुंडादुदीच्यतोरणद्वारेण निर्गता देवकुरुषु चित्रविचित्रकूटमध्येनोदङ्मुखी गत्वार्धयोजनेनाऽप्राप्ता मेरुं प्रदक्षिणीकृत्य विद्युत्प्रभं विदीर्य अपरविदेहमध्यगामिनी, प्रभवे योजनावगाहा पंचाशद्योजनविस्तारा मुखे दश योजनावगाहा पंचयोजनशतविस्तारा सीतोदा नाम महानदी पाश्चात्यसमुद्रं प्राविक्षत् । सीतोदाकुंडप्रासादनिवासिनी सीतोदा देवी ।

केसरिह्रदप्रभवाऽपाच्यद्वारनिर्गता सीता ॥ ८ ॥ नीलस्योपरि केसरिह्रदादपाच्यतोरणद्वारेण निर्गता सीता महानदीत्यादि सर्वं सीतोदातुल्यं । अयं तु विशेषः सीताकुंडप्रासादे सीतादेवी वसति सा माल्यवंतं विदीर्य पूर्वविदेहमध्यगामिनी प्राच्यसमुद्रं प्राविक्षत् इति ।

उदीच्यतोरणद्वारनिर्गता नरकांता ॥ ९ ॥ तत एव केसरिह्रदादुदीच्यतोरणद्वारेण निर्गता नरकांतामहानदीत्यादि सर्वं हरिता व्याख्यातं । अयं तु विशेषः नरकांताकुंडप्रासादे नरकांता देवी वसति गंधवद्वृत्तवेदाढ्यं प्रदक्षिणीकृत्य पाश्चात्यसमुद्रं प्राविक्षदिति ।

महापुंडरीकह्रदप्रभवा दक्षिणतोरणद्वारनिर्गता नारी ॥ १० ॥ रुक्मिण उपरि महापुंडरीकह्रदाद्दक्षिणतोरणद्वारेण निर्गता नारी महानदीत्यादि सर्वं हरिकांतया व्याख्यातं । अयं तु विशेषः नारीकुंडप्रासादे नारीदेवी वसति गंधवद्वृत्तवेदाढ्यं प्रदक्षिणीकृत्य पूर्वोदधिं प्राविक्षदिति ।

उदीच्यद्वारनिर्गता रूप्यकूला ॥ ११ ॥ तस्मादेव महापुंडरीकह्रदादुदीच्यतोरणद्वारेण निर्गता रूप्यकूला महानदीत्यादि सर्वं तु रोहिता व्याख्यातं । अयं तु विशेषः रूप्यकूलाकुंडप्रासादे रूप्यकूला देवी वसति माल्यवद्वृत्तवेदाढ्यं प्रादक्षिणीकृत्य प्रतीच्यसमुद्रं प्राविक्षत् इति ।

पुंडरीकह्रदप्रभवापाच्यतोरणद्वारनिर्गता सुवर्णकूला ॥ १२ ॥ शिखरिणि उपरि पुंडरीकह्रदाद्दक्षिणतोरणद्वारेण विनिर्गता सुवर्णकूला महानदीत्यादि सर्वं रोहितास्यया व्याख्यातं । अयं तु विशेषः सुवर्णकूलाकुंडप्रासादे सुवर्णकूला देवी वसति । माल्यवद्वृत्तवेदाढ्यं प्रदक्षिणीकृत्य प्राच्यमर्णवं प्राविक्षदिति ।

पूर्वतोरणद्वारनिर्गता रक्ता ॥ १३ ॥ तस्मादेव पुंडरीकह्रदात्पूर्वतोरणद्वारेण विनिर्गता रक्ता महानदीत्यादि सर्वं गंगया व्याख्यातं । अयं तु विशेषः रक्ताकुंडप्रासादे रक्तादेवी वसति ।

प्रतीच्यद्वारनिर्गता रक्तोदा ॥ १४ ॥ तस्मादेव पुंडरीकह्रदात्प्रतीच्यतोरणद्वारेण विनिर्गता रक्तोदा महानदीत्यादि सर्वं सिंध्वा वर्णितं । अयं तु विशेषः रक्तोदाकुंडप्रासादे रक्तोदा देवी वसति । गंगासिंधूरक्तारक्तोदाः भुजंगकुटिलगतयः अन्यत्र गिरितलधाराप्रपाताभ्यां । शेषा ऋजुगतयः अन्यत्र मेरुनाभिगिरिप्रदेशेभ्यः । चतुर्दशाप्येता अर्धयोजनविष्कंभनदीसमायामाभ्यामुभयपार्श्वगताभ्यां प्रत्येकमर्धयोजनोत्सेधपंचधनुःशतविष्कंभवनसमायामपद्मवरवेदिकाद्वयपरिवृताभ्यां वनखंडाभ्यामलंकृताः । तासां परिवारप्रतिपादनार्थमाह—

चतुर्दशनदीसहस्रपरिवृता गंगासिंध्वादयो नद्यः ॥ २३ ॥

गंगासिंध्वाद्यग्रहणं प्रकरणादिति चेन्नानंतरग्रहणप्रसंगात् ॥ १ ॥ स्यान्मतं गंगासिध्वादिग्रहणमनर्थकं कुतः ? प्रकरणात् प्रकृता हि ता इति तन्न किं कारणं ? अनंतरग्रहणप्रसंगात् अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति अपरगानामेव ग्रहणं स्यात् ।

गंगादिग्रहणमिति चेन्न पूर्वगाग्रहणप्रसंगात् ॥ २ ॥ अथ मतं गंगादिग्रहणमेवास्तु अनंतरनिवृत्त्यर्थमिति तच्च न, कस्मात् ? पूर्वगाग्रहणप्रसंगात् गंगादयो हि पूर्वगा इति ।

नदीग्रहणात् सिद्धिरिति चेन्न द्विगुणाभिसंबंधार्थत्वात् ॥ ३ ॥ स्यादेतन्नद्यः प्रकृतास्ततो नदीग्रहणमंतरेणापि नदीसंप्रत्ययसिद्धेस्तद्ग्रहणं सर्वनदीसंप्रतिपत्त्यर्थं भविष्यति नार्थो गंगासिंध्वादिग्रहणेनेति? तन्न किं कारणं? द्विगुणाभिसंबंधार्थत्वात्। द्विगुणा द्विगुणा इत्यस्याभिसंबंध इह कथं स्यादिति गंगासिंध्वादिग्रहणं क्रियते। किं गतमेतदनेनाहोस्विच्छब्दाधिक्यादर्थाधिक्यं गतमित्याह कथं द्विगुणानुवृत्तौ गंगाचतुर्दशनदीसहस्रपरिवृता तद्द्विगुणनदीसहस्रपरिवारा सिंधुरिति प्रसक्तिः तन्निवृत्त्यर्थं सिंधुग्रहणमिति। तत्र गंगासिंध्वौ प्रत्येकं चतुर्दशनदीसहस्रपरिवृते। ततो द्विगुणा द्विगुणाः परिवारनद्यो वेदितव्या आसीतोदायाः, ततः परतोऽर्धहीना उक्तो जंबूद्वीपविष्कंभोऽभिनिविष्टदसरित्पर्वतवर्षनिवेशक्रमः। इदमिदानीं प्रतीयतां किममूनि क्षेत्राणि तुल्यविस्ताराण्युतविस्तारविशेषोऽस्तीत्यत आह—

भरतः षड्विंशतिपंचयोजनशतविस्तारः षट्चैकान्नविंशतिभागा योजनस्य ॥ २४ ॥

षडधिका विंशतिः षड्विंशतिः षड्विंशतिरधिका येषु तानि षड्विंशानि पंचयोजनशतानि विस्तारोऽस्य षड्विंशपंचयोजनशतविस्तारो भरतः, किमेतावानेव नेत्याह षट्चैकान्नविंशतिभागा योजनस्य विस्तारोऽस्येत्यभिसंबध्यते। इतरेषां विष्कंभविशेषप्रतिपत्त्यर्थमाह—

तद्द्विगुणद्विगुणविस्तारा वर्षधरवर्षा विदेहांताः ॥ २५ ॥

ततो द्विगुणो द्विगुणो विस्तारो येषां त इमे तद्द्विगुणद्विगुणविस्ताराः।

वर्षधरशब्दस्य पूर्वनिपात आनुपूर्व्यप्रतिपत्त्यर्थः ॥ १ ॥ वर्षधरशब्दस्य पूर्वनिपातः क्रियते आनुपूर्व्यप्रतिपत्तिर्यथास्यादिति। इतरथा हि वर्षधराश्च वर्षाश्चेति द्वंद्वे वर्षशब्दस्य पूर्वनिपातः प्रसज्येत अल्पाच्तरत्वात्। न च लक्षणमस्ति आनुपूर्व्यप्रतिपत्त्यर्थः पूर्वप्रयोगः कर्तव्य इति? सत्यं नास्ति कंठोक्तं ज्ञापकात्तु भवति लक्षणहेत्वोः क्रियाया इति।

विदेहांतवचनं मर्यादार्थं ॥ २ ॥ विदेह अंतो येषां त इमे विदेहांता इति मर्यादा क्रियते। इतरथा हि नीलादयोऽपि द्विगुणद्विगुणविस्ताराः प्रसज्येरन्। तथाहि— हिमवतो विष्कंभो द्विपंचाशमेकं योजनसहस्रं द्वादश चैकान्नविंशतिभागाः। हैमवतस्य द्वियोजनसहस्रे पंचोत्तरशतं पंच चैकान्नविंशतिभागाः। महाहिमवतश्चत्वारि योजनसहस्राणि दशाधिके द्वे शते दश चैकान्नविंशतिभागाः। हरिवर्षस्याष्टौ योजनसहस्राणि चत्वारि शतानि एकविंशति एकश्चैकान्नविंशतिभागः। निषधस्य षोडशयोजनसहस्राण्यष्टौ शतानि द्विचत्वारिंशानि द्वौ चैकान्नविंशतिभागौ। विदेहस्य त्रयस्त्रिंशद्योजनसहस्राणि षट्शतानि चतुरशीत्यधिकानि चत्वारश्चैकान्नविंशतिभागाः। यद्येवं भरतादीनां विदेहांतानां विस्तारक्रम उक्तः। अथोत्तरेषां कथमित्यत आह—

उत्तरा दक्षिणतुल्याः ॥ २६ ॥

उत्तरा ऐरावतादयः नीलांतभरतादिभिर्दक्षिणैस्तुल्या: दृष्टव्या अतीतस्य पर्वतस्यायं विशेषो दृष्टव्यः (?)। अत्राह उक्तेषु भरतादिषु क्षेत्रेषु मनुष्याणां किं तुल्योनुभवादिः आहोस्वित्कश्चिदस्ति प्रतिविशेष इत्यत आह—

भरतैरावतयोर्वृद्धिह्रासौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणीभ्यां ॥ २७ ॥

इमौ वृद्धिह्रासौ? कस्य भरतैरावतयोर्ननु क्षेत्रे व्यवस्थितौ, अधिके कथं तयोर्वृद्धिह्रासौ? अत उत्तरं पठति

तात्स्थ्यात्तच्छब्द्यसिद्धेर्भरतैरावतयोर्वृद्धिह्रासयोगः ॥ १ ॥ इहलोके तात्स्थ्यात्ताच्छब्द्यं भवति यथा गिरिस्थितेषु वनस्पतिषु दह्यमानेषु गिरिर्दाह इत्युच्यते। तथा भरतैरावतस्थेषु मनुष्येषु वृद्धिह्रासावापद्यमानेषु भरतैरावतयोर्वृद्धिह्रासावुच्येते।

---

१ अन्यत्र षट्चैकोनविंशतिभागा इति पाठः। २ ग. पुस्तके नायं पाठः।

अधिकरणनिर्देशो वा ॥ २ ॥ अथवा भरतैरावतयोरित्यधिकरणनिर्देशोयं स चाधेयमाकांक्षतीति भरते ऐरावते च मनुष्याणां वृद्धिह्रासौ वेदितव्यौ । किं कृतौ पुनस्तौ ?

अनुभवायुःप्रमाणादिकृतौ वृद्धिह्रासौ ॥ ३ ॥ अनुभवः उपभोगपरिभोगसंपत्, आयुर्जीवितपरिमाण, प्रमाणं शरीरोत्सेध इत्येवमादिकृतौ मनुष्याणां वृद्धिह्रासौ प्रत्येतव्यौ । किं हेतुकौ पुनस्तौ ?

कालहेतुकौ सच कालो द्विविध उत्सर्पिणी अवसर्पिणी चेति तद्भेदाः षट् ॥ ४ ॥ प्रत्येकमन्वर्थसंज्ञोच्यते—

अनुभवादिभिरवसर्पणशीलाऽवसर्पिणी ॥ ५ ॥ अनुभवादिभिः पूर्वोक्तैरवसर्पणशीला हानिस्वाभाविकाऽवसर्पिणीसमा ।

तद्विपरीतोत्सर्पिणी ॥ ६ ॥ तद्विपरीतैरेवोत्सर्पणशीला वृद्धिस्वाभाविकोत्सर्पिणीत्युच्यते । तत्रावसर्पिणी षड्विधा सुषमसुषमा सुषमा सुषमदुःषमा दुःखमसुषमा दुःषमा अतिदुःषमा चेति । उत्सर्पिण्यपि अतिदुःखमाद्या सुषमसुषमांता षड्विधैव भवति । अवसर्पिण्याः परिमाणं दशसागरोपमकोटीकोट्यः, उत्सर्पिण्यपि तावत्येव । सोभयी कल्प इत्याख्यायते । तत्र सुषमसुषमा चतस्रः सागरोपमकोटीकोट्यः । तदादौ मनुष्या उत्तरकुरुमनुष्यतुल्याः । ततः क्रमेण हानौ सत्यां सुषमा भवति तिस्रः सागरकोटीकोट्यः । तदादौ मनुष्या हरिवर्षमनुष्यसमा। ततः क्रमेण हानौ सत्यां सुषमदुःषमा भवति द्वे सागरोपमकोटीकोट्यौः तदादौ मनुष्या हैमवतमनुष्यसमाना भवंति । ततः क्रमेण हानौ सत्यां दुःषमसुषमा भवति एकसागरोपमकोटीकोटीद्विचत्वारिंशद्वर्षसहस्रोना, तदादौ मनुष्या विदेहजनतुल्या भवंति । ततः क्रमेण हानौ सत्यां दुषमा भवति एकविंशतिवर्षसहस्राणि । ततः क्रमेण हानौ सत्यां अतिदुःषमा भवति एकविंशतिवर्षसहस्राणि । एवमुत्सर्पिण्यपि विपरीतक्रमा वेदितव्या । अथेतरासु भूमिषु कावस्थितिरत आह—

ताभ्यामपरा भूमयोवस्थिताः ॥ २८ ॥

ताभ्यां भरतैरावताभ्यामपरा भूमय अवस्थिता भवंति न हि तत्रोत्सर्पिण्यवसर्पिण्यौ स्तः । किं तासु भूमिषु मनुष्यास्तुल्यायुष आहोश्वित् कश्चिदस्ति प्रतिविशेषः ? इत्यस्तीत्याह—

एकद्वित्रिपल्योपमस्थितयो हैमवतकहारिवर्षकदैवकुरवकाः ॥ २९ ॥

हैमवतादिभ्यो भवार्थे वुञ् मनुष्यप्रतिपत्त्यर्थः ॥१॥ हैमवतभवा इत्येवमादिना विग्रहेण वुञि कृते हैमवतकादिसिद्धिर्भवति स किमर्थः ? मनुष्यप्रतिपत्त्यर्थः । तत्र भवा मनुष्याः प्रतिपद्येरन्निति ।

एकादीनां हैमवतकादिभिर्यथासंख्यं संबंधः ॥ २ ॥ हैमवतकादयस्त्रय एकादयस्त्रय. तत्र यथासंख्यं संबंधो भवति । एकपल्योपमस्थितयो हैमवतकाः । द्विपल्योपमस्थितयो हारिवर्षाः । त्रिपल्योपमस्थितयो दैवकुरवका इति । तत्र पंचसु हैमवतेषु सुषमदुःषमा सदावस्थिता । तत्र मनुष्या एकपल्योपमायुषो द्विधनुःसहस्रोच्छ्रिताश्चतुर्थभक्ताहारा नीलोत्पलवर्णाः । पंचसु हरिवर्षेषु सुषमा सदावस्थिता तत्र मनुष्या द्विपल्योपमस्थितयः चतुश्चापसहस्रोत्सेधाः षष्ठभक्ताहाराः शंखवर्णाः । पंचसु देवकुरुषु सुषमसुषमा सदावस्थिता तत्र मनुष्यास्त्रिपल्योपमायुषः षड्धनुःसहस्रोत्सेधा अष्टमभक्ताहारा कनकवर्णाः । अथोत्तरेषु कास्थितिरित्यत आह—

अथोत्तराः ॥ ३० ॥

यथा दक्षिणाः, तथोत्तरा वेदितव्याः । हैरण्यवतका हैमवतकैस्तुल्या । रम्यका हरिवर्षकैस्तुल्याः । दैवकुरुवकैरुत्तरकुरुवका व्याख्याताः । अथ विदेहेष्ववस्थितेषु का स्थितिक्रिया अत उच्यते—

विदेहेषु संख्येयकालाः ॥ ३१ ॥

सर्वेषु विदेहेषु संख्येयकालाः मनुष्याः । तत्र कालः सुषमदुःषमांतोपमः सदावस्थितः । मनुष्याश्च पंच-धनुःशतोत्सेधा नित्याहाराः उत्कर्षेण पूर्वकोटिस्थितिका जघन्येनांतर्मुहूर्तायुषः ।

भरतस्य विष्कंभो जंबूद्वीपस्य नवतिशतभागः ॥ ३२ ॥

किमर्थमिदमुच्यते ननु पुरस्ताद्भरतस्य विष्कंभो व्याख्यातः ? ।

पुनर्भरतविष्कंभवचनं प्रकारांतरप्रतिपत्त्यर्थं ॥ १ ॥ पुनर्भरतविष्कंभ उच्यते प्रकारांतरेण प्रतिपत्तिः कथं स्यादिति । भरतविष्कंभप्रमाणैः खंडैः छिद्यमानो जंबूद्वीपः । नवत्युत्तरेण खंडशतेन परिच्छि-द्यत इत्यर्थः ।

उत्तराभिसंबंधार्थं वा ॥ २ ॥ अथवा-उत्तरत्र वक्ष्यते 'द्विर्धातकीखंडे' 'पुष्करार्धे च' इति तद-भिसंबंधार्थं पुनर्वचनं क्रियते ।

तलमूलयोर्दशयोजनसहस्रविस्तारो लवणोदः ॥ ३ ॥ समे भूमितले द्वियोजनशतसहस्रवि-ष्कंभ इत्युक्तं पुरस्तात्, तस्य गोतीर्थवदुभयतोऽर्धं क्रमेण हान्या मूले दशयोजनसहस्रविस्तारः तावद्विष्कंभ-जलतलः योजनसहस्रावगाहः समाद् भूमितलादूर्ध्वं षोडशयोजनसहस्रजलोत्सेधः यवराशिरिवोच्छ्रितजलः मृदंगसंस्थानः, लवणोदो वेदितव्यः ।

तन्मध्ये दिक्षु महापातालानि योजनशतसहस्रावगाहानि ॥ ४ ॥ तस्य लवणोदस्य मध्ये चतसृषु दिक्षु रत्नवेदिकायाः पंचनवतियोजनसहस्राणि तिर्यगतीत्य क्षितिविवराणि वज्रमयतलपार्श्वानि, अंजनसंस्थानानि प्रत्येकमेकयोजनशतसहस्रावगाहानि तावन्मध्यविष्कंभाणि तलमूलयोर्दशयोजनसहस्रवि-स्ताराणि महापातालानि वेदितव्यानि चत्वारि पाताल-वडवामुख-यूपकेसर-कलंबुकसंज्ञानि । तत्र प्राच्यां दिशि पातालं, प्रतीच्यां वडवामुखं, उदीच्यां यूपकेसरं, अपाच्यां कलंबुकं । तेषामेकैकस्त्रिभागस्त्रयस्त्रिंशत्सहस्राणि योज-नानां त्रीणि शतानि त्रयस्त्रिंशानि योजनत्रिभागश्च साधिकः । तेषामधस्त्रिभागे वातस्तिष्ठति । मध्यत्रिभागे वायुतोये । उपरित्रिभागे तोयं । रत्नप्रभाखरपृथ्वीभागसंनिवेशिभवनालयवातकुमारतद्वनिताक्रीडाजनिता-ऽनिलसंक्षोभकृतपातालोन्मीलननिमीलनहेतुकौ वायुतोयनिष्क्रमप्रवेशौ भवतः । तत्कृता दशयोजनसहस्र-विस्तारमुखजलस्योपरि पंचाशद्योजनावधृता जलवृद्धिः । तत उभयत आ रत्नवेदिकायाः सर्वत्र द्विगव्यूतप्रमा-णा जलवृद्धिः । पातालोन्मीलनवेगोपशमेन हानिः । पातालानां चतुर्णामभ्यंतराणि प्रत्येकं द्वे शतसहस्रे सप्तविं-शतिसहस्राणि सप्ततिशतं च योजनानां त्रीणि च गव्यूतानि साधिकानि ।

विदिक्षु क्षुद्रपातालानि दशयोजनसहस्रावगाहानि ॥ ५ ॥ तन्मध्ये चतसृषु विदिक्षु चत्वारि क्षुद्रपातालानि दशयोजनसहस्रावगाहानि तावन्मध्यविष्कंभाणि मुखमूलयोर्योजनसहस्रविस्ताराणि वेदित-व्यानि । तेषामेकैकस्त्रिभागस्त्रीणि सहस्राणि त्रीणि शतानि त्रयस्त्रिंशानि योजनानां योजनत्रिभागश्च साधि-कः । अधस्त्रिभागे वातः, मध्यत्रिभागे वायुतोये, उपरि त्रिभागे तोयं ।

तदंतरेषु क्षुद्रपातालानां योजनसहस्रावगाहानां सहस्रं ॥ ६ ॥ तेषां दिग्विदिग्विभागानां पातालानां अंतरेष्वष्टास्वपि योजनसहस्रावगाहानां तावन्मध्यविष्कंभाणां मुखमूलयोस्तदर्धविस्ताराणां क्षुद्रपा-तालानां सहस्रं प्रत्येतव्यं । तेषां त्रिभागाः पूर्ववद्वेदितव्याः । तत्रैकैकस्मिन्नंतरे क्षुद्रपातालानां मुक्तावलीवदव-स्थितानां शतपंचविंशमन्यान्यपि पातालानि संति । अंतरालेषु सप्तसहस्राण्यष्टौ शतान्यशीतिश्च पातालसमुदायः ।

दिक्षु वेलंधरनागाधिपतिनगराणि चत्वारि ॥ ७ ॥ रत्नवेदिकायास्तिर्यग्द्वाचत्वारिंशद्योजन सहस्राणि गत्वा चतसृषु दिक्षु द्वाचत्वारिंशद्योजनसहस्रायामविष्कंभाणि चत्वारि वेलंधरनागाधिपतिनगराणि भवंति । तेषु वेलंधरनागाधिपतयः पल्योपमायुषः दशकार्मुकोत्सेधाः प्रत्येकं चतसृभिरग्रमहिषीभिः परिवृ-

---

"अदः क्रमेणेत्यपिपाठः (क) पुस्तके" । २ मृदंग संस्थानानि इत्यपि ग. पुस्तके पाठः ।

ता वेलंधरनागाश्च निवसंति । तत्र द्वाचत्वारिंशन्नागसहस्राणि लवणोदाभ्यंतरवेलां धारयंति । द्वासप्ततिनाग सहस्राणि बाह्यां वेलां धारयंति । अष्टाविंशतिनागसहस्राणि अग्रोदकं धारयंति । तान्येतानि समुदितान्येकं शतसहस्रं द्वाचत्वारिंशच्च सहस्राणि ।

द्वादशयोजनसहस्रायामविष्कंभो गौतमद्वीपश्च ॥ ८ ॥ रत्नवेदिकायास्तिर्यग्द्वादशयोजनसहस्राणि गत्वा द्वादशयोजनसहस्रायामविष्कंभो गौतमस्य समुद्राधिपतेर्द्वीपश्च तत्र भवति । रत्नवेदिकायास्तिर्यक्पंचनवतिप्रदेशेषु गतेषु एकप्रदेशावगाहः, पंचनवतिहस्तेषु गतेष्वेकहस्तावगाहः, पंचनवतियोजनेषु गतेष्वेकयोजनावगाहः, पंचनवतियोजनशतेषु गतेष्वेकयोजनशतावगाहः, पंचनवतियोजनसहस्रेषु गतेष्वेकयोजनसहस्रावगाहः । लवणोदस्यांते यथा वेला तथा बहिरपि, विजयादीनि द्वाराणि च । अत्र लवणोदस्यैव वेला नान्योदधीनां, तत्रैव च पातालानि नान्यत्र । सर्वे च लवणोदादयः स्वयंभूरमणपर्यंता एकयोजनसहस्रावगाहाः । द्वीपोदधिपर्यंते चोभे वेदिके । याः द्वीपांते ताः द्वीपानां याः समुद्रांते ताः समुद्राणां । लवणोदः उच्छ्रितसलिलः, शेषाः प्रसारजलाः । भिन्नरसाश्चत्वारः, त्रय उदकरसाः, शेषा इक्षुरसाः सागराः । लवणोदो लवणरसजलः । वारुण्यदो वारुणीरसजलः । क्षीरोदः क्षीररसजलः । घृतोदो घृतरसजलः । कालोदपुष्करोदस्वयंभूरमणोदा उदकरसाः । लवणोदकालोदस्वयंभूरमणोदा मत्स्यकूर्मादिजलचराश्रमाः, नेतरे । लवणोदे नदीमुखे नवयोजनशरीराः मत्स्याः, सागराभ्यंतरेऽष्टादशयोजनशरीराः । कालोदे नदीमुखेऽष्टादशयोजनशरीराः मत्स्याः, सागराभ्यंतरे षड्विंशद्योजनशरीराः । स्वयंभूरमणोदे नदीमुखे पंचशतयोजनशरीराः मत्स्याः, सागराभ्यंतरे एकयोजनसहस्रशरीराः मत्स्याः । योऽयं वर्षवर्षधरह्रदपुष्करादीनां संख्याविष्कंभादिविधिरुक्तो जंबूद्वीपे, तद्द्विगुणो धातकीखंडे इति प्रतिपादयितुमिच्छन्नाह—

द्विर्धातकीखंडे ॥ ३३ ॥

द्रव्याभ्यावृत्तौ सुजभाव इति चेन्न क्रियाध्याहाराद् द्विस्तावानिति यथा ॥ १ ॥ स्यान्मतं भरतादीनि द्रव्याणि अत्राभ्यावर्तंते न तु क्रिया ततो न सुजिति ? तन्न, किं कारणं ? क्रियाध्याहारात् । यथा द्विस्तावानयं प्रासाद इति मीयते इत्येवमाद्यध्याह्रियमाणक्रियापेक्षया सुजुत्पत्तिः, एवमिहापि धातकीखंडे भरतादयो द्विःसंख्यायंते इत्येवं सामर्थ्यप्रापितक्रियापेक्षया सुज्वेदितव्यः । तच्च संख्यानं द्विधा स्वरूपभेदेन विष्कंभादिभेदेन च । तत्र स्वरूपसंख्यानं द्वौ भरतौ द्वौ हिमवंतावित्येवमादि । विष्कंभादिसंख्यानं जंबूद्वीपे हिमवदादीनां वर्षधराणां यो विष्कंभः तद्द्विगुणो धातकीखंडे हिमवदादीनामिति ।

अथ धातकीखंडे भरतस्य को विष्कंभः ? उच्यते—

षट्षष्ठिशतानि चतुर्दशानि योजनानां धातकीखंडभरताभ्यंतरविष्कंभः एकान्नत्रिंशच्च भागशतं ॥ २ ॥ षट्सहस्राणि षट्शतानि चतुर्दशोत्तराणि योजनानां योजनस्य द्वादशद्विशतभागाः एकान्नत्रिंशच्च भागशतं धातकीखंडभरताभ्यंतरविष्कंभः ।

सैकाशीति पंचशताधिकद्वादशसहस्राणि मध्यविष्कंभः षट्त्रिंशच्च भागाः ॥ ३ ॥ द्वादशसहस्राणि योजनानां पंचशतान्येकाशीत्युत्तराणि षट्त्रिंशच्च भागाः धातकीखंडभरतमध्यविष्कंभः ।

सप्तचत्वारिंशत्पंचशताष्टादशसहस्राणि बाह्यविष्कंभः पंचपंचाशच्च भागशतं ॥ ४ ॥ अष्टादशसहस्राणि योजनानां पंचशतानि सप्तचत्वारिंशानि पंचपंचाशच्च भागशतं बाह्यभरतविष्कंभः ।

वर्षाद्वर्षश्चतुर्गुणविस्तार आ विदेहात् ॥ ५ ॥ वर्षाद्वर्षश्चतुर्गुणविस्तार आ विदेहाद्द्रष्टव्यः । भरताच्चतुर्गुणविष्कंभो हैमवतः । हैमवताच्चतुर्गुणविष्कंभो हरिवर्षः । हरिवर्षाच्चतुर्गुणविष्कंभो विदेह इति । तथा च भरततुल्यविस्तार ऐरावतः । ऐरावताच्चतुर्गुणविस्तारो हैरण्यवतः, हैरण्यवताच्चतुर्गुणविस्तारो रम्यकः । धातकी-

खंडवलयविष्कंभश्चत्वारि योजनशतसहस्राणि । तत्परिधिरेकचत्वारिंशद्योजनशतसहस्राणि दशसहस्राणि नव योजनशतानि विशेषेणैकषष्ठ्युत्तराणि एकशतसहस्रं अष्टसप्ततिसहस्राणि अष्टौ शतानि चत्वारिंशानि योजनानि। धातकीखंडे वर्षधररुद्धक्षेत्रं। तत्परिधिमपनीयावशिष्टं द्वादशाद्विशतभागहृतं लब्धं। भरतविष्कंभ उक्तः।

वर्षाणां वर्षधराणां सरितां वृत्तवेदाढ्यानां ह्रदानामन्येषां च तान्येवावगाहादीनि ॥६॥ वर्षधरा हिमवदादयः उक्तोत्सेधावगाहाः द्विगुणविस्ताराश्चत्वारोपि वृत्तवेदाढ्या उक्तोच्छ्रायावगाहसमाः द्वियोजनसहस्रविस्ताराः। यमकाद्री च व्याख्यातोत्सेधावगाही द्वियोजनसहस्रमूलविस्तारौ पंचदशयोजनशतमध्येविष्कंभौ उपर्येकयोजनसहस्रविस्तारौ। कांचनाद्रयश्च व्याख्यातोच्छ्रायावगाहाः द्विगुणविस्ताराः। ह्रदाश्च पद्मादयः षडपि द्विगुणायामविष्कंभावगाहाः। द्वीपाः पद्मानि च द्विगुणायामविष्कंभावगाहानि।

भरतैरावतविभाजिनाविष्वाकारगिरी ॥७॥ भरतैरावतयोर्विभागहेतू कालोदलवणोदस्पर्शिनौ योजनशतावगाहौ चतुर्योजनशतोत्सेधौ अध उपरि चैकयोजनसहस्रविस्तारौ कांचनपरिणामौ इष्वाकारगिरी भवतः। तत्र धातकीखंडे द्वौ मेरू पूर्वापरौ योजनसहस्रावगाहौ पंचनवतियोजनशतमूलविष्कंभौ धरणीतले चतुर्नवतियोजनशतविस्तारौ चतुरशीतियोजनसहस्रोत्सेधौ योजनसहस्रविस्तारतलौ पूर्वोक्तप्रमाणभूतलिकौ। समाद् भूमितलात्पंचयोजनशतान्युत्प्लुत्य नंदनवनं भवति, पचयोजनशतविस्तारं पंचपंचाशद्योजनसहस्राणि पंचशतानि च योजनानि। तत उत्प्लुत्य सौमनसं नाम वनं पंचशतयोजनविष्कंभं भवति। ततोऽष्टाविंशयोजनसहस्राण्युत्प्लुत्य पाडुकवनं भवति। तयोर्देशमु. प्रदेशेष्वेन.प्रदेशवृद्धिः। जंबूद्वीपे यत्र जंबूवृक्षः तत्र धातकीखंडे धातकीवृक्षः। परिवाराश्च पूर्वोक्तवर्णनाः। तन्निवासी द्वीपाधिपतिस्तत एव द्वीपस्य धातकीखंड इति नाम वेदितव्यं। तत्र चक्रारांतरसंस्थाना वर्षा वर्षधराश्च चक्राराकारा उभयजलधिस्पर्शिनः। तत्परिक्षेपिकालोदसमुद्रः टंकच्छिन्नतीर्थः अष्टयोजनशतसहस्रवलयविष्कंभ एकनवतिशतसहस्राणि सप्ततिश्च सहस्राणि साधिकपंचोत्तराणि षट्शतानि योजनानां तत्परिधिः। कालोदपरिक्षेपिपुष्करद्वीपः षोडशयोजनशतसहस्रवलयविष्कंभः। तत्र द्वीपांभोनिधिद्विगुणपरिक्लृप्तिवत् धातकीखंडवर्षादिद्विगुणविधिप्रमाणविशेषावधारणार्थमाह—

पुष्करार्धे च ॥ ३४ ॥

च शब्दः किमर्थः ?

संख्याभ्यावृत्त्यनुवर्तनार्थश्चशब्दः ॥ १ ॥ द्विरित्येतस्याः संख्याभ्यावृत्तेरनुवर्त्तनार्थश्चशब्दः। क्रियते, पुष्करार्धे च द्विर्भरतादयः संख्यायंत इति। किं जंबूद्वीपभरतादिसंख्या द्विरावर्त्यत इत्यभिसंबध्यते आहोस्वित् धातकीखंडभरतादिकसंख्येति जंबूद्वीपभरतादिसंख्यैव संबध्यते। अनतरा कस्मान्नाभिसंबध्यत इति इच्छातो विशेषणसंबंध इत्यतश्चैतदेवं धातकीखंडे हिमवदादीनामपि विष्कंभः। पुष्करार्धे च हिमवदादीनां द्विगुण इष्यत इति। नामानि च तान्येव वेदितव्यानि। अथ भरतस्य को विष्कंभः ?

एकान्नाशीत्युत्तरपंचशताधिकैकचत्वारिंशद्योजनसहस्राणि भरताभ्यंतरविष्कंभः स त्रिसप्ततिभागशतं च ॥ २ ॥ एकचत्वारिंशत्सहस्राणि पंचशतान्येकान्नाशीत्युत्तराणि योजनानां त्रिसप्तत्युत्तरभागशतं च भरताभ्यंतरविष्कंभो वेदितव्यः।

द्वादशपंचशतोत्तरात्रिपंचाशद्योजनसहस्राणि मध्यविष्कंभो नवनवत्यधिकं च भागशतं ।३। त्रिपंचाशत्सहस्राणि योजनानां पंचशतानि द्वादशानि नवनवत्यधिकं च भागशतं मध्यभरतविष्कंभः।

द्वाचत्वारिंशच्चतुःशतोत्तरपंचषष्टिसहस्राणि बाह्यविष्कंभस्त्रयोदश च भागाः ॥ ४ ॥ पंचषष्टिसहस्राणि योजनानां चत्वारि शतानि त्रयोदशभागाः बाह्यभरतविष्कंभः।

वर्षाद्वर्षश्चतुर्गुणविस्तार आ विदेहाद्द्रष्टव्यः ॥५॥ भरताच्चतुर्गुणविष्कंभो हैमवतः, हैमवता-

श्चतुर्गुणविष्कंभो हरिवर्षः, हरिवर्षाच्चतुर्गुणविष्कंभो विदेह इति । तथा भरततुल्यविस्तार ऐरावतः, ऐरावताच्चतुर्गुणविस्तारो हैरण्यवतः, हैरण्यवताच्चतुर्गुणविस्तारो रम्यक इति । एककोटिर्द्वाचत्वारिंशच्छतसहस्राणि त्रिंशत्सहस्राणि द्वे शते योजनानां सविशेषं चैकान्नपंचाशत् । पुष्करार्धतः परिधिः त्रीणि शतसहस्राणि पंचपंचाशत्सहस्राणि षट्शतानि चतुरशीतिश्च योजनानि पुष्करार्धे पर्वतरुद्धक्षेत्रमपनीयाऽवशिष्टं द्वादशाद्विशतभागाद्धृतं लब्धं । भरतविष्कंभ उक्तः, वर्षधरविजयार्धवृत्तवेदाढ्यादयः जंबूद्वीपवर्णनायां विहितोत्सेधावगाहाः विहितद्विगुणविस्ताराः पुष्करार्धे च वेदितव्याः । इष्वाकारौ मंदरौ च तावत्परिमाणावेव । यत्र जंबूवृक्षस्तत्र पुष्करं सपरिवारं वेदितव्यं तन्निवासिद्वीपाधिपतिस्तत एवाऽस्य द्वीपस्य नाम रूढं पुष्करद्वीप इति । अथ कथं पुष्करार्धसंज्ञा ?

मानुषोत्तरशैलेन विभक्तार्धत्वात्पुष्करार्धसंज्ञा ॥ ६ ॥ पुष्करद्वीपस्य बहुमध्यदेशभावी वलयवृत्तो मानुषोत्तरनामशैलस्तेन विभक्तार्धत्वात् पुष्करार्धसंज्ञा वेदितव्या । सप्तदशयोजनशतान्येकविंशान्यस्योच्छ्रायः । चत्वारि योजनशतानि त्रिंशानि सक्रोशान्यवगाहः । द्वाविंशयोजनसहस्रं मूलविस्तारः । सप्तयोजनशतानि त्रयोविंशानि मध्यविस्तारः । चतुर्विंशानि चत्वारि योजनशतान्युपरि विस्तारः । सोऽयमभ्यंतरमुखनिषण्णसिंहाकृतिरर्धयवराश्युपमानमानुषोत्तराद्रिः । तस्योपरि चतसृषु दिक्षु पंचाशद्योजनायामतदर्धविस्तारसार्धयोजनसप्तत्रिंशद्योजनोत्सेधानि अष्टयोजनोत्सेधतदर्धविष्कंभतावत्प्रवेशद्वाराण्यर्हदायतनवर्णनोपेतानि चत्वार्यर्हदायतनानि प्रागादिषु दिक्षु प्रदक्षिणावृतानि । वैडूर्य-अश्मगर्भ सौगंधिक-रुचक-लोहिताक्ष-अंजनक-अंजनमूल-कनक-रजत-स्फटिक-अंक-प्रवाल-वज्र-तपनीय-कूटसंज्ञानि चतुर्दशकूटानि पंचयोजनशतोच्छ्रायाणि पंचयोजनशतमूलविष्कंभाणि पंचसप्तत्युत्तरत्रियोजनशतमध्यविष्कंभाणि अर्धतृतीययोजनशतोपरिविष्कंभाणि । तत्र चतसृषु दिक्षु त्रीणि त्रीणि कूटानि-पूर्वोत्तरस्यां दिश्येकं पूर्वदक्षिणस्यां दिश्येकं । तेषु यशस्वदादयः पल्योपमस्थितयः सुपर्णकुमाराणां राजानो निवसंति । प्राच्यां दिशि वैडूर्ये यशस्वान्, अश्मगर्भे यशस्कांतः, सौगंधिके यशोधरः । अपाच्यां रुचके नंदनः, लोहिताक्षे नंदोत्तरः, अंजनकेऽशनिघोषः । प्रतीच्यामंजनमूले सिद्धार्थः कनके क्रमणः, रजते मानुषः । उदीच्यां स्फटिके सुदर्शनः, अंकेऽमोघः, प्रवाले सुप्रबुद्धः । पूर्वोत्तरस्यां वज्रे हनूमान् । पूर्वदक्षिणस्यां तपनीये स्वातिः । चतसृषु विदिक्षु पुनरिमानि चत्वारि कूटानि रत्न-सर्वरत्न-वलंब प्रभंजननामानि पूर्वकूटपरिमाणानि । निषधाद्रिस्पृष्टभागे पूर्वदक्षिणस्यां रत्ने पन्नगेंद्रो वेणुदेवः । नीलाद्रिस्पृष्टभागे पूर्वोत्तरस्यां सर्वरत्ने सुपर्णेंद्रो वेणुतालः । निषधाद्रिस्पृष्टभागेऽपरदक्षिणस्यां वेलंबकूटे वातेंद्रो वेलंबः । नीलाद्रिस्पृष्टभागेऽपरोत्तरस्यां प्रभंजनकूटे वातेंद्रः प्रभंजनो निवसति । अत्राह किमर्थं जंबूद्वीपवर्षधरादिसंख्या द्विरावृत्ता पुष्करार्धे कथ्यते न पुनः कृत्स्न एव पुष्करद्वीपे इत्यत्रोच्यते—

प्राङ् मानुषोत्तरान्मनुष्याः ॥ ३५ ॥

यस्मात् प्राङ् मानुषोत्तरान्मनुष्या न बहिः, ततो न बहिः पूर्वोक्तक्षेत्रविभागोऽस्ति । अथवा उक्तमिंद्रियविकल्पाधिकारे 'कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानीति' तत्र न ज्ञायते क्व मनुष्याः? इत्यतस्तदधिकरणविशेषप्रतिपत्त्यर्थमुच्यते—जंबूद्वीपादारभ्य प्राङ् मानुषोत्तरान् मनुष्या न बहिरिति । व्याख्यातो मानुषोत्तराद्रिः, नास्मादुत्तरं कदाचिदपि विद्याधराः ऋद्धिप्राप्ता अपि मानुषा गच्छंति अन्यत्रोपपादसमुद्घाताभ्यां, ततोऽस्याऽन्वर्थसंज्ञा । एवं द्विगुणद्विगुणवलयविष्कंभेषु द्वीपसमुद्रेषु गतेष्वष्टमो नंदीश्वरो द्वीपस्तस्य वलयविष्कंभः कोटिशतं त्रिषष्टिकोट्यः चतुरशीतिश्च योजनशतसहस्राणि । तत्परिधिश्च कोटिसहस्रं द्विसप्ततिकोटयः त्रयस्त्रिंशच्छतसहस्राणि चतुःपंचाशत्सहस्राण्येकं शतं नवतियोजनानि गव्यूतं च साधिकं । तद्बहुमध्यदेशभाविनश्चतसृषु दिक्षु चत्वारोऽजनगिरयः योजनसहस्रावगाहाश्चतुरशीतियोजनसहस्रोत्सेधाः मूलमध्याग्रेषूत्सेधसमानविष्कंभाः पटहाकाराः । तेषां चतसृषु दिक्षु तिर्यगेकं योजनशतसहस्रमतीत्य प्रत्येकं चतस्रो वाप्यो भवंति । तत्र पौरस्त्यांजनगिरेर्नंदा-नंदवती-नंदोत्तरा-नंदिघोषासंज्ञा योजनसहस्रावगाहाः योजनशतसहस्रायामविष्कंभा-

श्चतुःकोणाः मत्स्यकच्छपादिजलचरविरहिताः पद्मोत्पलादिजलरुहकुसुमसंछादितस्फटिकमणिस्वच्छगंभीरनीराः। प्राच्यां दिशि नंदा शक्रस्य, अपाच्यां नंदवती ऐशानस्य, प्रतीच्यां नंदोत्तरा चमरस्य, उदीच्यां नंदिघोषा वैरोचनस्य। दाक्षिणात्यांजनगिरेर्विजया वैजयंती जयंती अपराजिता चेति चतस्रो वाप्यः पूर्वोक्तप्रमाणवर्णनाः शक्रलोकपालानां। प्राच्यां दिशि विजया वरुणस्य, अपाच्या वैजयंती यमस्य, प्रतीच्यां जयंती सोमस्य, उदीच्यामपराजिता वैश्रवणस्य। पाश्चात्यांजनगिरेरशोका सुप्रबुद्धा कुमुदा पुंडरीकिणी चेति चतस्रो वाप्यः पूर्वोक्तप्रमाणवर्णनाः। पूर्वस्यां दिशि अशोका वेणुदेवस्य, दक्षिणस्यां सुप्रबुद्धा (सुप्रसिद्धा) वेणुतालस्य, अपरस्यां कुमुदा वरुणस्य, उत्तरस्यां पुंडरीकिणी भूतानदस्य। उदीच्यांजनगिरेः प्रभंकरा सुमना आनंदा सुदर्शना चेति चतस्रो वाप्यः पूर्वोक्तप्रमाणवर्णनाः, ऐशानलोकपालानां। प्राच्यां दिशि प्रभंकरा वरुणस्य, अपाच्यां सुमना यमस्य, प्रतीच्यां नंदा सोमस्य, उदीच्यां सुदर्शना वैश्रवणस्य। षोडशानामप्यासामभ्यंतरांतराणि पंचषष्टिसहस्राणि योजनानां पंचशतानि पंचचत्वारिंशानि। मध्यांतराणि एकं शतसहस्रं योजनानां चत्वारिंशत्सहस्राणि षट्शतानि द्वियोजनोत्तराणि। बाह्यांतराणि द्वे शतसहस्रे योजनानां त्रयोविंशतिसहस्राणि षट्शतान्येकषष्ठ्युत्तराणि। षोडशानामपि तासां मध्येषु सहस्रावगाहाः मूलमध्याग्रेषु दशयोजनसहस्रायामविष्कंभाः तावदुत्सेधाः पटहाकाराः जाबूनदमयाः, अर्जुनसुवर्णशिखरत्वाद्दधिमुखा इति कृतान्वर्थसंज्ञाः षोडशनगवराः। परितस्ताः वाप्यः। चत्वारि वनानि प्रत्येकमशोक-सप्तपर्ण-चंपक-चूतनामानि वापीसमायामानि तदर्धविष्कंभाणि।

पूर्वेणाऽशोकवनं दक्षिणतः सप्तपर्णवनमाहुः अपरेण चंपकवनमुत्तरतश्चूतवृक्षवनं। १।

एतद्वापीकोणसमीपस्थाः प्रत्येकं चत्वारो नगाः रतिकराख्याः अर्धतृतीययोजनशतावगाहाः एकयोजनसहस्रोत्सेधाः मूलमध्याग्रेषु तावदायामविष्कंभाः पटहाकाराः कांचनमणिपरिणामाः। सर्वे ते समुदिताश्चतुःषष्टिः। तत्र योऽभ्यंतरकोणस्थाः द्वात्रिंशन्नगाः देवानामाक्रीडनस्थानैरलंकृताः। ये बाह्यकोणस्थाः द्वात्रिंशद्रतिकरा अंजनाद्रयो दधिमुखाश्च तेषां द्विपंचाशदुपरि बहुमध्यदेशभावीनि प्राङ्मुखानि योजनशतायामतदर्धविष्कंभाणि पंचसप्ततियोजनोत्सेधानि अष्टयोजनोत्सेधतदर्धविस्तारतावत्प्रवेशपूर्वोत्तरदक्षिणद्वाराणि द्विपंचाशदर्हदायतनान्यर्हदायतनवर्णनोपेतानि चातुर्मासिकमहामहिमाऽर्हाणि। पूर्वोक्तचतुःषष्टिवनखंडबहुमध्यदेशभाविनः द्विषष्टियोजनोत्सेधाः एकत्रिंशद्योजनायामविष्कंभा अष्टयोजनोत्सेधतदर्धविस्तारद्वाराश्चतुःषष्टिरेव प्रासादाः। एतेष्वशोकवरावतंसकादयः पल्योपमायुषः दशकार्मुकोत्सेधाः स्वस्ववननामानो देवा निवसंति। एवं द्विगुणवलयाविष्कंभेषु द्वीपसमुद्रेषु गतेष्वेकादशमः कुंडलवरद्वीपः। तद्बहुमध्यदेशभाविवलयाकारः संपूर्णयवराश्युपमानः कुंडलनगः योजनसहस्रावगाहः द्विचत्वारिंशद्योजनसहस्रोत्सेधः द्वाविंशदशसहस्रयोजनमूलविस्तारः त्रयोविंशसप्तसहस्रयोजनमध्यविस्तारः चतुर्विंशचतुर्योजनसहस्राग्रविस्तारः। तस्योपरि पूर्वादिदिग्विभावीनि वज्र-वज्रप्रभ-कनक-कनकप्रभ-रजत-रजतप्रभ-सुप्रभ-महाप्रभ-अंक-अंकप्रभ-मणि-मणिप्रभ-स्फटिक-स्फटिकप्रभ-हिमवन् महेंद्रकूटसंज्ञानि षोडशकूटानि मानुषोत्तरकूटतुल्यप्रमाणानि। एकैकस्यां दिशि चत्वारि चत्वार्यवसेयानि, पूर्वस्यां दिशि वज्रे त्रिशिरा, वज्रप्रभे पंचशिराः, कनके महाशिराः, कनकप्रभे महाभुजः। अपाच्यां रजते पद्मः, रजतप्रभे पद्मोत्तरः, सुप्रभे महापद्मः महाप्रभे वासुकिः। अपरस्यामंके स्थिरहृदयः, अंकप्रभे महाहृदयः मणिकूटे श्रीवृक्षः, मणिप्रभे स्वस्तिकः। उदीच्यां स्फटिके सुंदरः, स्फटिकप्रभे विशालाक्षः, हिमवति पांडुरः, महेंद्रे पांडुकः। एते त्रिशिरप्रभृतयः पांडुकांताः षोडशापि नागेंद्राः पल्योपमायुषः पूर्वापरयोर्दिशोः कुंडलनगे एकयोजनसहस्रोत्सेधे-तावन्मूलविष्कंभे अर्धाष्टमशतमध्यविष्कंभे पंचशताग्रविष्कंभे कुंडलवरद्वीपाधिपतेरावासौ द्वे कूटे। तस्यैवोपरि पूर्वादिदिक्षु चत्वार्यर्हदायतनानि अंजनाद्रिजिनायतनतुल्यप्रमाणानि। कुंडलवरद्वीपद्विगुणवलयविष्कंभः कुंडलवरोदः, तद्द्विगुणवलयविष्कंभः शंखवरद्वीपः, तद्द्विगुणवलयविष्कंभः शंखवरोदः तद्द्विगुणवलयविष्कंभः रुचकवरद्वीपः। तद्बहुमध्यदेशभावी वलयाकारः रुचकवरनगः एकयोजनसहस्रावगाहश्चतुरशीतियोजनसहस्रोत्सेधः, मूलमध्याग्रेषु द्विचत्वारिंशद्योजनसहस्रविस्तारः। तस्योपरि पूर्वादिषु दिक्षु चत्वा

रि कूटानि नंद्यावर्तक-स्वस्तिक-श्रीवृक्ष-वर्धमानसंज्ञानि पंचयोजनशतोत्सेधानि मूलमध्याग्रेषु योजनसहस्रायामविष्कंभाणि। प्राच्यां दिशि नंद्यावर्ते पद्मोत्तरः, अपाच्यां स्वस्तिके सुहस्ती, प्रतीच्यां श्रीवृक्षे नीलः, उदीच्यां वर्धमानेऽजनगिरिः। त एते पद्मोत्तरादयः चत्वारो दिग्गजेंद्राः पल्योपमायुषः। तस्यैवोपरि पूर्वस्यां दिशि वैडूर्य-कांचन-कनक-अरिष्ट-दिक्स्वस्तिक-नंदन-अंजन-अंजनमूलकनामान्यष्टौ कूटानि पूर्वोक्तकूटतुल्यप्रमाणानि। वैडूर्ये विजया, कांचने वैजयंती, कनके जयंती, अरिष्टेऽपराजिता, दिक्स्वस्तिके नंदा, नंदने नंदोत्तरा, अंजने आनंदा अंजनमूलके नांदी वर्धमाना[1]। एताः दिक्कुमार्यः तीर्थकरजन्मकाले इहाऽऽगत्याऽर्हन्मातृसमीपे भृंगारान् गृहीत्वाऽवतिष्ठंते। दक्षिणस्याममोघ-सुप्रबुद्ध-मंदिर-विमल-रुचक-रुचकोत्तर-चंद्र-सुप्रतिष्ठसंज्ञान्यष्टौ कूटानि पूर्वोक्तकूटतुल्यप्रमाणानि। अमोघे सुस्थिता, सुप्रबुद्धे सुप्रणिधिः, मंदिरे सुप्रबुद्धा, विमले यशोधरा, रुचके लक्ष्मीमती, रुचकोत्तरे कीर्त्तिमती, चंद्रे वसुंधरा, सुप्रतिष्ठे चित्रा। एता दिक्कुमार्यः इहाऽऽगत्याऽर्हन्मातृसमीपे आदर्शधारिण्योऽवतिष्ठंते। अपरस्यां लोहिताक्ष-जगत्कुसुम-पद्म-नलिन-कुमुद-सौमनस यशः- भद्राख्यान्यष्टौ कूटानि पूर्वोक्तकूटतुल्यप्रमाणानि। लोहिताक्षे इलादेवी, जगत्कुसुमे सुरादेवी, पद्मे पृथिवी, नलिने पद्मावती, कुमुदे कानना, सौमनसे नवमिका, यशसि यशस्विनी, भद्रकूटे भद्रा। एता दिक्कुमार्य इहाऽऽगत्याऽर्हन्मातृसमीपे छत्राणि धारयंत्यः गायंत्य आसते। उदीच्यां स्फटिक-अंक-अंजन-कांचन-रजत-कुंडल-रुचिर-सुदर्शनसंज्ञान्यष्टौ कूटानि पूर्वोक्तकूटतुल्यप्रमाणानि। स्फटिकेऽलंभूषा, अंके मिश्रकेशा, अंजने पुंडरीकिणी, कांचने वारुणी, रजत आशा, कुंडले ह्री, रुचिरे श्रीः, सुदर्शने धृतिरिति। एता दिक्कुमार्यः प्रगृहीतचामराः अर्हन्मातृः सेवंते। पूर्वादिषु दिक्षु पुनरपराणि चत्वारि कूटानि विमल-नित्यालोक स्वयंप्रभ-नित्योद्योतसंज्ञानि। पूर्वस्यां दिशि विमले चित्रा, दक्षिणस्यां नित्यालोके कनकचित्रा, अपरस्यां स्वयंप्रभे त्रिशिरा, उत्तरस्यां नित्योद्योते सूत्रमणिः। एता विद्युत्कुमार्यः इहाऽऽगत्य जिनमातृसमीपे भास्करवदुद्योतं कुर्वंत्य आसते। विदिक्षु चत्वारि कूटानि वैडूर्य-रुचक मणिप्रभ-रुचकोत्तमनामानि। पूर्वोत्तरस्यां वैडूर्ये रुचका, पूर्वदक्षिणस्यां रुचके रुचकाभाः, अपरदक्षिणस्यां मणिप्रभे रुचकांता, अपरोत्तरस्यां रुचकोत्तमे रुचकप्रभा एता दिक्कुमारीमहत्तरिकाः। विदिक्षु पुनरपराणि चत्वारि कूटानि रत्न-रत्नप्रभ-सर्वरत्न-रत्नोच्चयाख्यानि। पूर्वोत्तरस्यां रत्ने विजया, पूर्वदक्षिणस्यां रत्नप्रभे वैजयंती, अपरदक्षिणस्यां सर्वरत्ने जयंती, अपरोत्तरस्यां रत्नोच्चये अपराजिता। एता विद्युत्कुमारीमहत्तरिकाः। एता अष्टावपि महत्तरिका आगत्य तीर्थकराणां जातिकर्माणि कुर्वंति। तान्येतानि विद्युत्कुमारीणां च कूटानि द्वादशाप्येकयोजनसहस्रोत्सेधानि मूलमध्याग्रेषु एकसहस्राऽर्धाऽष्टमशतपंचशतविस्ताराणि। रुचकनगस्योपरि चतसृषु दिक्षु चत्वार्यर्हदायतनानि प्राङ्मुखान्यंजनाद्रिजिनालयतुल्यप्रमाणानि। एवं द्विगुणद्विगुणवलयविष्कंभा असंख्येया द्वीपसमुद्रा वेदितव्याः। यो मानुषोत्तराद्बहिरुक्तः तस्मात्प्राग्भवंतः गतिनामापेक्षाभिधानाः पूर्वोदिता द्विविधाः कथं? इति चेदुच्यते—

आर्या म्लेच्छाश्च ॥ ३६ ॥

आर्या द्विविधा ऋद्धिप्राप्तेतरविकल्पात् ॥ १ ॥ गुणैर्गुणवद्भिर्वा अर्यंते सेव्यंते इत्यार्याः ते द्विविधाः ऋद्धिप्राप्तार्याः, अनृद्धिप्राप्तार्याश्चेति।

अनृद्धिप्राप्तार्याः पंचविधाः क्षेत्रजातिकर्मचारित्रदर्शनभेदात् ॥ २ ॥ येऽनृद्धिप्राप्तार्यास्ते पंचविधाः भवंति क्षेत्रार्याः जात्यार्याः कर्मार्याः चारित्रार्याः दर्शनार्याश्चेति। तत्र क्षेत्रार्याः काशीकोशलादिषु जाताः। इक्ष्वाकुजातिभोजादिषु[2] कुलेषु जाताः जात्यार्याः। कर्मार्यास्त्रेधा सावद्यकर्मार्या अल्पसावद्यकर्मार्या असावद्यकर्मार्याश्चेति। सावद्यकर्मार्याः षोढा असि–मसि कृषि-विद्या-शिल्प-वणिक्कर्मभेदात्। असिधनुरादिप्रहरणप्रयोगकुशलाः असिकर्मार्याः। द्रव्यायव्ययादिलेखननिपुणा मषिकर्मार्याः। हलकुलिशदंतालकादिकृष्युपकरणविधानविदः कृषिवलाः कृषिकर्मार्याः। आलेख्यगणितादिद्विसप्ततिकलावादता विद्या-

---

१ वर्धनेत्यपि पाठः। २ ग. पुस्तके भोजनादिष्वपि पाठः।

कर्मार्याः । चतुर्वर्णाश्च रजकनापिताऽयस्कारकुलालसुवर्णकारादयः शिल्पकर्मार्याः । चंदनादिगंधघृतादि-रसशाल्यादिधान्यकार्पासाद्याच्छादनमुक्तादिनानाद्रव्यसंग्रहकारिणो बहुविधा वणिक्कर्मार्याः । षडप्येतेऽविरति प्रवणत्वात्सावद्यकर्मार्याः । अल्पसावद्यकर्मार्याश्च श्रावकाः । रतिविरतिपरिणतत्वादसावद्यकर्मार्याः संयताः । कर्मक्षयार्थोद्यतविरतिपरिणतत्वाच्चारित्रार्याः द्वेधा-अभिगतचारित्रार्याः अनभिगतचारित्रार्याश्चेति । तद्भेदः, अनुपदेशोपदेशापेक्षभेदकृतः । चारित्रमोहस्योपशमात् क्षयाच्च बाह्योपदेशानपेक्षाः आत्मप्रसादादेव चारित्रपरिणामास्कंदिन उपशांतकषायाः क्षीणकषायाश्चाऽभिगतचारित्रार्याः । अंतश्चारित्रमोहक्षयोपशमसद्भावे सति बाह्योपदेशनिमित्तविरतिपरिणामा अनभिगतचारित्रार्याः । दर्शनार्याः दशधा आज्ञामार्गोपदेशसूत्रबीजसंक्षेपविस्तारार्थावगाढपरमावगाढरुचिभेदाच्च । तत्र भगवदर्हत्सर्वज्ञप्रणीताज्ञामात्रनिमित्तश्रद्धानाः आज्ञारुचयः । निःसंगमोक्षमार्गश्रवणमात्रजनितरुचयः मार्गरुचयः । तीर्थकरबलदेवादिशुभचरितोपदेशहेतुकश्रद्धाना उपदेशरुचयः । प्रव्रज्यामर्यादाप्ररूपणाचारसूत्रश्रवणमात्रसमुद्भूतसम्यग्दर्शनाः सूत्ररुचयः । बीजपदग्रहणपूर्वकसूक्ष्मार्थतत्त्वार्थश्रद्धानाः बीजरुचयः । जीवादिपदार्थसामान्यसंबोधनसमुद्भूतश्रद्धानाः संक्षेपरुचयः । अंगपूर्वविषयजीवाद्यर्थविस्तारप्रमाणनयादिनिरूपणोपलब्धश्रद्धाना विस्ताररुचयः । वचनविस्तारविरहितार्थग्रहणजनितप्रसादा अर्थरुचयः । आचारादिद्वादशांगाऽभिनिविष्टश्रद्धाना अवगाढरुचयः । परमावधिकेवलज्ञानदर्शनप्रकाशितजीवाद्यर्थविषयप्रसादाः परमावगाढरुचयः । **ऋद्धिप्राप्तार्या अष्टविधाः बुद्धि-क्रिया-विक्रिया-तपः-बल-औषध-रस-क्षेत्रभेदात् ।** ऋद्धिप्राप्तार्या अष्टविधा भवंति बुद्ध्यादिविकल्पात् । तत्र बुद्धिरवगमो ज्ञानं तद्विषया अष्टादशविधाः ऋद्धयः-केवलज्ञानमवधिज्ञानं मनःपर्ययज्ञानं बीजबुद्धिः कोष्ठबुद्धिः पदानुसारित्वं संभिन्नश्रोतृत्वं दूरादास्वादनदर्शनस्पर्शनघ्राणश्रवणसमर्थता दशपूर्वित्वं चतुर्दशपूर्वित्वं अष्टांगमहानिमित्तज्ञता प्रज्ञाश्रवणत्वं प्रत्येकबुद्धता वादित्वं चेति । तत्र केवलाऽवधिमनःपर्ययाः व्याख्याताः । सुकृष्टसुमथान्विते (सुमथिते) क्षेत्रे सारवति कालादिसहायापेक्षं बीजमेकमुप्तं[1] यथानेकबीजकोटिप्रदं भवति तथा नोइंद्रियावरणश्रुतावरणवीर्यांतरायक्षयोपशमप्रकर्षे सति एकबीजपदग्रहणादनेकपदार्थप्रतिपत्तिर्बीजबुद्धिः । कोष्ठागारिकस्थापितानामसंकीर्णानामविनष्टानां भूयसां धान्यबीजानां यथा कोष्ठेऽवस्थानं तथा परोपदेशादनवधारितानां अर्थग्रंथबीजानां[2] भूयसामव्यतिकीर्णानां बुद्धाववस्थानं कोष्ठबुद्धिः । पदानुसारित्वं त्रेधा अनुश्रोतः प्रतिश्रोतः उभयथा चेति । एक पदस्यार्थं परतः उपश्रुत्यादौ अंते च मध्ये वा शेषग्रंथार्थावधारणं पदानुसारित्वं । द्वादशयोजनायामे नवयोजनविस्तारे चक्रधरस्कंधावारे गजवाजिखरोष्ट्रमनुष्यादीनां अक्षरानक्षररूपाणां नानाविधशब्दानां युगपदुपपन्नानां तपोविशेषबललाभापादितसर्वजीवप्रदेशश्रोत्रेंद्रियपरिणामात् सर्वेषामेककालग्रहणं संभिन्नश्रोतृत्वं । तपःशक्तिविशेषाविर्भावितासाधारणरसनेंद्रियश्रुतावरणवीर्यांतरायक्षयोपशमांगोपांगनामलाभापेक्षस्याऽवधृतनवयोजनक्षेत्राद्बहिर्बहुयोजनविप्रकृष्टक्षेत्रादायातस्य रसस्याऽऽस्वादनसामर्थ्यं, एवं शेषेष्वपि इंद्रियविषयेषु,अवधृतक्षेत्राद्बहिर्बहुयोजनप्रकृष्टदेशायातेषु ग्रहणसामर्थ्यं योज्यं । महारोहिण्यादिभिस्त्रिभिरागताभिः प्रत्येकमात्मीयरूपसामर्थ्याविष्करणकथनकुशलाभिर्वेगवतीभिर्विद्यादेवताभिरविचालितचारित्रस्य दशपूर्वदुस्तरसमुद्रोत्तरणं दशपूर्वित्वं । संपूर्णश्रुतकेवलिता चतुर्दशपूर्वित्वं । अष्टौ महानिमित्तानि अंतरिक्ष-भौम-अंग-स्वर-व्यंजन-लक्षण-छिन्न स्वप्ननामानि । तत्र रविशशिग्रहनक्षत्रभगणोदयास्तमयाद्भिरतीतानागतफलप्रविभागदर्शनमंतरिक्षं । भुवो घनशुषिरस्निग्धरूक्षादिविभावनेन पूर्वादिदिक्सूत्रनिवासेन वा वृद्धिहानिजयपराजयादिविज्ञानं भूमेरंतर्निहितसुवर्णरजतादिसंसूचनं च भौमं । अंगप्रत्यंगदर्शनादिभिस्त्रिकालभाविसुखदुःखादिविभावनमंगं । अक्षरानक्षरशुभाशुभशब्दश्रवणेनेष्टानिष्टफलाविर्भावनं महानिमित्तं स्वरं । शिरोमुखग्रीवादिषु तिलकमशकलक्ष्मव्रणादिवीक्षणेन त्रिकालहिताहितवेदनं व्यंजनं । श्रीवृक्षस्वस्तिकभृंगारकलशादिलक्षणवीक्षणात्त्रैकालिकस्थानमानैश्वर्यादिविशेषज्ञानं लक्षणं । वस्त्रशस्त्रछत्रोपानदासनशयनादिषु देवमा-

---

[1] क. पुस्तके बीजमेकमुक्तमित्यपिपाठः । [2] ग. पुस्तके अर्थग्रहबीजानामिति पाठः ।

नुषराक्षसादिविभागैः शस्त्रकंटकमूषिकादिकृतछेदनदर्शनात् कालत्रयविषयलाभालाभसुखदुःखादिसूचनं छिन्नं । वातपित्तश्लेष्मदोषोदयरहितस्य पश्चिमरात्रिभागे चंद्रसूर्यधरादिसमुद्रमुखप्रवेशनसकलमहीमंडलोपगूहनादिशुभघृततैलाक्तात्मीयदेहखरकरभारूढावादिग्गमनाद्यशुभस्वप्नदर्शनादागामिजीवितमरणसुखदुःखाद्याविर्भावकः स्वप्नः । एतेषु महानिमित्तेषु कौशलमष्टांगमहानिमित्तज्ञता । अतिसूक्ष्मार्थतत्त्वविचारगहने (गहिन) चतुर्दशपूर्विण एव विषयेऽनुयुक्तेऽनधीतद्वादशांगचतुर्दशपूर्वस्य प्रकृष्टश्रुतावरणवीर्यांतरायक्षयोपशमाविर्भूताऽसाधारणप्रज्ञाशक्तिलाभान्निःसंशयं निरूपणं प्रज्ञाश्रमणत्वं । परोपदेशमंतरेण स्वशक्तिविशेषादेव ज्ञानसंयमविधाननिपुणत्वं प्रत्येकबुद्धता । शक्रादिष्वपि प्रतिवंधिषु सत्स्वप्रतिहततया निरुत्तराभिधानं परंध्रापेक्षणं च वादित्वं । क्रियाविषया ऋद्धिर्द्विविधा चारणत्वमाकाशगामित्वं चेति । तत्र चारणा अनेकविधाः जलजंघातंतुपुष्पपत्रश्रेण्यग्निशिखाद्यालंवनगमनाः । जलमुपादाय वाप्यादिष्वप्कायान् जीवानविराधयंतः भूमाविव पादोद्धारनिक्षेपकुशला जलचारणाः । भुव उपर्याकाशे चतुरंगुलप्रमाणे जंघोत्क्षेपनिक्षेपशीघ्रकरणपटवो बहुयोजनशतासु गमनप्रवणा जंघचारणाः । एवमितरे च वेदितव्याः । पर्यंकावस्थानिपण्णा वा कायोत्सर्गशरीरा वा । पादोद्धारनिक्षेपणविधिमंतरेणाऽऽकाशगमनकुशला आकाशगामिनः । विक्रियगोचरा ऋद्धिरनेकविधा–अणिमा महिमा लघिमा गरिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वमप्रतिघातोऽतर्धानं कामरूपित्वमित्येवमादिः । तत्राणुशरीरविकरणमणिमा विसछिद्रमपि प्रविश्याऽऽसित्वा तत्र च चक्रवर्तिपरिवारविभूतिं सृजेत् । मेरोरपि महत्तरशरीरविकरणं महिमा । वायोरपि लघुतरशरीरता लघिमा । वज्रादपि गुरुतरशरीरता गरिमा । भूमौ स्थित्वांऽगुल्यग्रेण मेरुशिखरदिवाकरादिस्पर्शनसामर्थ्यं प्राप्तिः । अप्सु भूमाविव गमनं भूमौ जल इवोन्मज्जनकरणं प्राकाम्यं । त्रैलोक्यस्य प्रभुता ईशित्वं । सर्वजीववशीकरणलब्धिर्वशित्वं । अद्रिमध्ये वियतीव गमनागमनमप्रतीघातः । अदृश्यरूपशक्तितांऽतर्धानं । युगपदनेकाकाररूपविकरणशक्तिः कामरूपित्वमिति । तपोतिशयर्द्धिः सप्तविधा उग्र-दीप्त-तप्त-महाघोर-तपोघोर-पराक्रमघोर-ब्रह्मचर्यभेदात् । चतुर्थषष्ठाष्टमदशमद्वादशपक्षमासाद्यनशनयोगेष्वन्यतमयोगमारभ्याऽऽमरणादनिवृत्तका उग्रतपसः । महोपवासकरणेपि प्रवर्धमानकायवाङ्मानसवलाः विगंधरहितवदनाः पद्मोत्पलादिसुरभिनिश्वासाः अप्रच्युतमहादीप्तिशरीराः दीप्ततपसः । तप्तायसकटाहपतितजलकणवदाशुशुष्काल्पाहारतया मलरुधिरादिभावपरिणामविरहिताभ्यवहाराः तप्ततपसः । सिंहनिःक्रीडितादिमहोपवासानुष्ठानपरायणयतयो महातपसः । वातपित्तश्लेष्मसंनिपातसमुद्भूतज्वरकासश्वासाक्षिशूलकुष्ठप्रमेहादिविविधरोगसंतापितदेहा अप्यप्रच्युताऽनशनकायक्लेशादितपसो भीमश्मसानाद्रिमस्तकगुहादरीकंदरशून्यग्रामादिषु प्रदुष्टयक्षराक्षसपिशाचप्रवृत्तवेतालरूपविकारेषु परुषशिवारुतानुपरसिंहव्याघ्रादिव्यालमृगभीषणस्वनघोरचौरादिप्रचरितेष्वभिरुचितावासाश्च घोरतपसः । त एव गृहीततपोयोगवर्धनपरा घोरपराक्रमाः । चिरोषिताऽस्खलितब्रह्मचर्यवासाः प्रकृष्टचारित्रमोहनीयक्षयोपशमात् प्रणष्टदुःस्वप्नाः घोरब्रह्मचारिणः । बलालंबना ऋद्धिस्त्रिधा मनोवाक्कायभेदात् । तत्र मनःश्रुतावरणवीर्यांतरायक्षयोपशमप्रकर्षे सत्यंतर्मुहूर्ते सकलश्रुतार्थचिंतनेऽवदाता मनोबलिनः । मनोजिह्वाश्रुतावरणवीर्यांतरायक्षयोपशमातिशये सत्यंतर्मुहूर्ते सकलश्रुतोच्चारणसमर्थाः सततमुच्चैरुच्चारणे सत्यपि श्रमविरहिताः अहीनकंठाश्च वाग्बलिनः । वीर्यांतरायक्षयोपशमाविर्भूताऽसाधारणकायवलत्वान्मासिकचातुर्मासिकसांवत्सरिकादिप्रतिमायोगधारणेपि श्रमक्लमविरहिताः कायबलिनः । औषधर्द्धिरष्टविधा असाध्यानामप्यामयानां सर्वेषां निवृत्तिहेतुरामर्शक्ष्वेलजल्लमलविट्सर्वौषधिप्राप्तास्याविषदृष्टिविषविकल्पात् । आमर्शनः संस्पर्शः यदीयहस्तपादाद्यामर्शऔषधिप्राप्तो येस्ते आमर्शौषधिप्राप्ताः । क्ष्वेलो निष्ठीवनमौषधिर्येषां ते क्ष्वेलौषधिप्राप्ताः । स्वेदालंवनो रजोनिचयो जल्लः स औषधि प्राप्तो येषां ते जल्लौषधिप्राप्ताः । कर्णदंतनासाक्षिसमुद्भवं मलं औषधि प्राप्तं येषां ते मलौषधिप्राप्ताः । विड्उच्चार औषधिर्येषां ते विडौषधिप्राप्ताः । अंगप्रत्यंगनखदंतकेशादिरवयवः तत्संस्पर्शी वाय्वादिस्सर्वः औषधि प्राप्तो येषां ते सर्वौषधिप्राप्ताः । उग्रविषसंपृक्तोप्याहारो येषामास्यगतो निर्विषी भवति यदयास्यानिर्गतवचःश्रवणाद्वा महाविषपरीता अपि निर्विषी भवंति ते आस्याविषाः

येषामालोकनमात्रादेवातितीव्रविषदूषिता अपि संतः विगतविषा भवंति ते दृष्टिविषाः । रसर्द्धिप्राप्तार्याः षड्विधाः आस्यविषा दृष्टिविषाः क्षीरास्रविणः मध्वास्रविणः सर्पिरास्रविणः अमृतास्रविणश्चेति । प्रकृष्टतपोबला यतयो यं ब्रुवते म्रियस्वेति स तत्क्षण एव महाविषपरीतो म्रियते, ते आस्यविषाः । उत्कृष्टतपसो यतयः क्रुद्धा यमीक्षंते स तदैवोग्रविषपरीतो म्रियते ते दृष्टिविषाः । विरसमप्यशनं येषां पाणिपुटविक्षिप्तं क्षीररसगुणपरिणामि जायते, येषां वा वचनानि क्षीरवत्क्षीणानां संतर्पकाणि भवंति ते क्षीरास्रविणः । येषां पाणिपुटपतित आहारो नीरसोपि मधुररसवीर्यपरिणामो भवति, येषां वचांसि श्रोतॄणां दुःखार्दितानामपि मधुगुणं पुष्णंति ते मध्वास्रविणः । येषां पाणिपात्रगतमन्नं रूक्षमपि सर्पीरसवीर्यविपाकानाप्नोति, सर्पिरिव वा येषां भाषितानि प्राणिनां संतर्पकाणि भवंति ते सर्पिरास्रविणः । येषां पाणिपुटप्राप्तं भोजनं यत्किंचिदमृततामास्कंदति, येषां वा व्याहृतानि प्राणिनां अमृतवदनुग्राहकाणि भवंति तेऽमृतास्रविणः । क्षेत्रर्द्धिप्राप्तार्या द्वेधा अक्षीणमहानसाः अक्षीणमहालयाश्चेति । लाभांतरायक्षयोपशमप्रकर्षप्राप्तेभ्यो यतिभ्यो यतो भिक्षा दीयते ततो भाजनाच्चक्रधरस्कंधावारोपि यदि भुंजीत तद्दिवसे नान्नं क्षीयते ते अक्षीणमहानसाः । अक्षीणमहालयलब्धिप्राप्ता यतयो यत्र वसंति देवमनुष्यतैर्यग्योना यदि सर्वेपि तत्र निवसेयुः परस्परमबाधमानाः सुखमासते त एते सर्वे ऋद्धिप्राप्तार्याः ।

म्लेच्छाः द्विविधाः अंतरद्वीपजाः कर्मभूमिजाश्चेति ॥ ४ ॥ म्लेच्छा द्विविधा वेदितव्याः अंतरद्वीपजाः कर्मभूमिजाश्चेति । तत्रांतरद्वीपाः लवणोदधेरष्टासु दिक्ष्वष्टौ, तदंतरे चाष्टौ । हिमवच्छिखरिणो-रुभयोश्च विजयार्धयोरंतेष्वष्टौ । तत्र दिक्षु द्वीपाः वेदिकायास्तिर्यक्पंचयोजनशतानि प्रविश्य भवंति । दिक्ष्वंतरेषु च द्वीपाः पंचाशेषु पंचयोजनशतेषु गतेषु भवंति । शैलांतेषु द्वीपाः षट्सु योजनशतेषु भवंति । दिक्षु द्वीपाः शतयोजनविस्तीर्णाः, विदिक्ष्वंतरेषु च द्वीपाः तदर्धविष्कंभाः । शैलांतेषु पंचविंशतियोजनविस्ताराः । तत्र पूर्वस्यां दिशि एकोरुकाः । अपरस्यां लांगूलिनः । उत्तरस्यामभाषकाः । दक्षिणस्यां विषाणिनः । शशकर्णशष्कुलीकर्णकर्णप्रावरणलंबकर्णाः । विदिक्षु अश्व-सिंह-श्व-महिष-वराह-व्याघ्र-उलूक-कपिमुखाः । अंतरेषु मेघविद्युन्मुखाः । शिखरिणि उभयोरंतयोर्मत्स्यमुखाः कालमुखाः । हिमवत उभयोरंतयोर्हस्तिमुखादर्शमुखाः । उत्तरविजयार्धस्योभयोरंतयोर्गोमुखमेषमुखाः । दक्षिणविजयार्धस्योभयोरंतयोरेकोरुका मृदाहाराः गुहावासिनः, शेषाः पुष्पफलाहाराः वृक्षवासिनः, सर्वे ते पल्योपमायुषः । ते चतुर्विंशतिरपि द्वीपाः जलतलादेकयोजनोत्सेधाः, तथा कालोदेऽपि वेदितव्याः । एते अंतरद्वीपजाः म्लेच्छाः । कर्मभूमिजाश्च शक-यवन-शबर-पुलिंदादयः । काः पुनः कर्मभूमय इत्यत आह—

भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः ॥ ३७ ॥

अथवा मोक्षमार्गस्त्रितयः प्रकृतः स किं सर्वेषु क्षेत्रेषु भवति ? न इत्याह कर्मभूमिष्वेव । कुत एतत् ? भोगभूमिषु हि यद्यपि मनुष्याणां ज्ञानदर्शने स्तः चारित्रं तु नास्ति अविरतभोगपरिणामित्वात् । यद्येवं कास्ताः कर्मभूमयः ? इत्यतस्तत्प्रतिपादनार्थमिदमुच्यते—

कर्मभूमय इति विशेषणानुपपत्तिः सर्वत्र कर्मणोव्यापारात् ॥ १ ॥ अष्टविधस्य कर्मणो बंधस्तत्फलानुभवनं च सर्वेष्वेव मनुष्यक्षेत्रेषु साधारणः-अतः कर्मभूमय इति विशेषणं नोपपद्यते ?

न वा प्रकृष्टशुभाशुभकर्मोपार्जननिर्जराधिष्ठानोपपत्तेः ॥ २ ॥ न वा एष दोषः, किं कारणं ? यतः प्रकृष्टं शुभकर्म सर्वार्थसिद्धिसौख्यप्रापकं तीर्थकरत्वमहर्द्धिनिर्वर्तकं चासाधारणं । अशुभकर्म च प्रकृष्टं [1] सकलपृथिवीमहादुःखप्रापकं अप्रतिष्ठाननरकगमनं च कर्मभूमिष्वेवोपार्ज्यते द्रव्य-भव-क्षेत्र-काल-भावापेक्षत्वात् कर्मबंधस्य । सकलं च संसारकारणनिर्जराकर्म वात्रैव प्रवर्तते अतो भरतादिष्वेव कर्मभूमय इति युक्तो व्यपदेशः ।

---

१ कलंकलसकलपृथिवींमहादुःखप्रापकमिति ख. पुस्तके पाठः ।

षट्कर्मदर्शनाच्च ॥ ३ ॥ षण्णां कर्मणां असि-कृषि-मषि-विद्या-वणिक्-शिल्पानामत्रैव दर्शनाच्च कर्मभूमिव्यपदेशो युक्तिमान् ।

अन्यत्रशब्दः परिवर्जनार्थः ॥ ४ ॥ यथा न कचित्सर्वदा सर्वविस्रंभगमनं नयः अन्यत्र धर्मार्थस्य, अन्योमार्ग एव न विद्यते इति धर्मं वर्जयित्वार्थकामयोरविस्रंभगमनं नयः धर्मेषु विस्रंभ एव कार्य इति, एवमिहापि विदेहाः कर्मभूमय इत्युक्ते विदेहाभ्यंतरत्वादेवकुरूत्तरकुरूणामपि कर्मभूमित्वप्रसंगेऽन्यत्रवचनादेवकुरूत्तरकुरुभ्योऽन्ये विदेहाः कर्मभूमयः । देवकुरूत्तरकुरवो हैमवतादयश्च भोगभूमय इति वेदितव्याः । सर्वास्वेव भूमिषु मनुष्याणां स्थितिपरिच्छेदार्थमाह—

नृस्थिती परावरे त्रिपल्योपमांतर्मुहूर्ते ॥ ३८ ॥

यथासंख्यमभिसंबंधः ॥ १ ॥ त्रिपल्योपमांतर्मुहूर्तयोर्यथासंख्यमभिसंबंधो वेदितव्यः । परा नृस्थितिः त्रिपल्योपमा, अपरांऽतर्मुहूर्ता इति । त्रीणि पल्यानि उपमा यस्याः स्थितेः सा त्रिपल्योपमा । अंतर्गर्भोमुहूर्तो यस्या सा अंतर्मुहूर्ता । अत्राह किमिदं पल्यं[1] नाम ? इत्युच्यते— तत्परिच्छेदः प्रमाणविधिनिर्णयपुरस्सर इति प्रमाणविधिरेव तावदुच्यते—

प्रमाणं द्विविधं लौकिकलोकोत्तरभेदात् ॥२॥ लौकिकं लोकोत्तरमिति प्रमाणं द्वेधा विभज्यते—

लौकिकं षोढा मानोन्मानावमानगणनाप्रतिमानतत्प्रमाणभेदात् ॥ ३ ॥ लौकिकं मानं षोढा विभज्यते-मानमुन्मानमवमानं गणना प्रतिमानं तत्प्रमाणं चेति । तत्र मानं द्वेधा-रसमानं बीजमानं चेति । घृतादिद्रव्यपरिच्छेदकं षोडशिकादि रसमानं । कुडवादि बीजमानं । कुष्ठतगरादिभांडं येनोत्क्षिप्य मीयते तदुन्मानं निवर्तनादि । विभागेन क्षेत्रं येनावगाह्य मीयते तदवमानं दंडादि । एकद्वित्रिचतुरादिगणितमानं गणनामानं । पूर्वमानापेक्षं मानं प्रतिमानं प्रतिमल्लवत् । चत्वारि महाधिकतृणफलानि श्वेतसर्षप एकः, षोडशसर्षपफलानि धान्यमाषफलमेकं, द्वे धान्यमाषफले गुंजाफलमेकं, द्वे गुंजाफले रूप्यमाष एकः, षोडशरूप्यमाषकाः धरणमेकं, अर्धतृतीयधरणानि सुवर्णानि सुवर्णः, स च कंसः, चत्वारः कंसाः पलं, पलशतं तुला, अर्धकंसः त्रीणि च पलानि कुडवः, चतुःकुडवः प्रस्थः, चतुःप्रस्थमाढकं, चतुराढकं द्रोणः षोडशद्रोणा खारी, विंशखार्यो वाह इत्यादि नागरिकप्रमाणं । मणिजात्यश्वादेर्द्रव्यस्य दीप्त्युच्छ्रायगुणविशेषादिमूल्यपरिमाणकरणे प्रमाणमस्येति तत्प्रमाणं । तद्यथा– मणिरत्नस्य दीप्तिर्यावत्क्षेत्रमुपरि व्याप्नोति तावत्प्रमाणं सुवर्णकूटं मूल्यमिति । अश्वस्य च यावानुच्छ्रायस्तावत्प्रमाणं सुवर्णकूटं मूल्यं । यावता रत्नस्वामिनः परितोषः तावद्रत्नमूल्यमेवमन्येषामपि द्रव्याणां ।

लोकोत्तरं चतुर्धा द्रव्यक्षेत्रकालभावभेदात् ॥ ४ ॥ लोकोत्तरं प्रमाणं चतुर्धा भिद्यते, कुतः ? द्रव्यक्षेत्रकालभावभेदात् । तत्र द्रव्यप्रमाणं जघन्यमध्यमोत्कृष्टं एकपरमाणु द्वित्रिचतुरादिप्रदेशात्मकमामहास्कंधात् । क्षेत्रप्रमाणं जघन्यमध्यमोत्कृष्टमेकाकाशद्वित्रिचतुरादिप्रदेशनिष्पन्नमासर्वलोकात् । कालप्रमाणं जघन्यमध्यमोत्कृष्टमेकद्वित्रिचतुरादिसमयनिष्पन्नमा अनंतकालात् । भावप्रमाणमुपयोगः साकारानाकारभेदः, जघन्यः सूक्ष्मनिगोतस्य, मध्यमोऽन्यजीवानां, उत्कृष्टः केवलिनः ।

तत्र द्रव्यप्रमाणं द्वेधा संख्योपमाभेदात् ॥ ५ ॥ संख्याप्रमाणमुपमाप्रमाणं चेति द्वेधा द्रव्यप्रमाणं विभज्यते ।

तत्र संख्याप्रमाणं त्रिधा संख्येयासंख्येयानंतभेदात् ॥ ६ ॥ तत्र संख्येयप्रमाणं त्रेधा इतरे द्वे नवधा ज्ञेये । जघन्यमजघन्योत्कृष्टमुत्कृष्टं चेति संख्येयं त्रिविधं । संख्येयप्रमाणावगमार्थं जंबूद्वीपतुल्यायाम-

---

१ ग. पुस्तके पल्योपमेति पाठांतरं ।

विष्कंभाः योजनसहस्रावगाहाः बुद्ध्या कुशूलाश्चात्वारः कर्तव्याः, शलाकाप्रतिशलाकामहाशलाकाख्यास्त्र-योवस्थिताः चतुर्थोनवस्थितः । अत्र द्वौ सर्षपौ निक्षिप्तौ जघन्यमेतत्संख्येयप्रमाणं तमनवस्थितं सर्षपैः पूर्णं गृहीत्वा कश्चिद्देवः एकैकं सर्षपमेकैकस्मिन् द्वीपे समुद्रे च प्रक्षिपेत् तेन विधिना स रिक्तः। रिक्त इति शलाकाकुशूले एकं सर्षपं प्रक्षिपेत् । यत्र अंत्यसर्षपो निक्षिप्तस्तमवधिं कृत्वा अनवस्थितं कुशूलं परिकल्प्य सर्षपैः पूर्णं कृत्वा ततः परेषु द्वीपसमुद्रेष्वेकैकसर्षपप्रदानेन स रिक्तः कर्तव्यः । रिक्त इति शलाकाकुशूले पुनरेकं प्रक्षिपेत् । अनेन विधिनाऽनवस्थितकुशूलपरिवर्धनेन प्रतिशलाकाकुशूले परिपूर्णे, पूर्णइति एकः सर्षपो निक्षेप्तव्यः । एवं तावत्कर्तव्यो यावत्प्रतिशलाकाकुशूलः परिपूर्णो भवति । परिपूर्ण इति शलाकाकुशूले एकः सर्षपः प्रक्षेप्तव्यः सोऽपि तथैव परिपूर्णः । एवमेतेषु चतुर्ष्वपि पूर्णेषु उत्कृष्टसंख्येयमतीत्य जघन्यपरीतासंख्येयं गत्वैकं रूपं पतितं, ततः एकस्मिन् रूपेऽपनीते उत्कृष्टसंख्येयं भवति । मध्यमजघन्योत्कृष्टसंख्येयं यत्र संख्येयेन प्रयोजनं तत्राजघन्योत्कृष्टसंख्येयं ग्राह्यं । यदसंख्येयं तत्रिविधं परीतासंख्येयं युक्तासंख्येयं असंख्यासंख्येयं चेति । तत्र परीतासंख्येयं त्रिविधं जघन्योत्कृष्टमध्यमभेदात् । एवमितरे चाऽसंख्येये भिद्येते । तथाऽनंतमपि त्रिविधं परीतानंतं युक्तानंतं अनंतानंतं चेति । तदपि प्रत्येकं पूर्ववत्त्रिधा भेद्यं । यज्जघन्यपरीतासंख्येयं तद्विरलीकृत्य मुक्तावलीकृता अत्रैकैकस्यां मुक्तायां जघन्यपरीतासंख्येयं देयं । एवमेतद्वर्गितं प्राथमिकी मुक्तावलीमपनीय यान्येकैकस्यां मुक्तायां जघन्यपरीतासंख्येयानि दत्तानि तानि संपीड्य मुक्तावली कार्या । ततो यो जघन्यपरीतासंख्येयसंपीडनान्निष्पन्नो राशिः स देयः । एकैकस्यां मुक्तायां एवमेतत्संवर्गितं उत्कृष्टपरीतासंख्येयमतीत्य जघन्ययुक्तासंख्येयं गत्वा पतितमेकरूपं । तत एकरूपेऽपनीते उत्कृष्टपरीतासंख्येयं भवति । मध्यमजघन्योत्कृष्टपरीतासंख्येयं यत्रावलिकया कार्यं तत्र जघन्ययुक्तासंख्येयं ग्राह्यं यज्जघन्ययुक्तासंख्येयं तद्विरलीकृत्य मुक्तावली रचिता । तत्रैकैकमुक्तायां युक्तासंख्येयानि देयानि एवमेतत्सकृद्वर्गितमुत्कृष्टयुक्तासंख्येयमतीत्य जघन्याऽसंख्येयाऽसंख्येयं गत्वा पतितं, तत एकरूपेऽपनीते उत्कृष्टं युक्तासंख्येयं भवति । मध्यमजघन्योत्कृष्टयुक्तासंख्येयं भवति । यज्जघन्याऽसंख्येयासंख्येयं तद्विरलीकृत्य पूर्वविधिना त्रीन्वारान् वर्गितसंवर्गितं उत्कृष्टासंख्येयं न प्राप्नोति ततो धर्माधर्मैकजीवलोकाकाशप्रत्येकशरीरजीवबादरनिगोतशरीराणि षडप्येतान्यसंख्येयानि स्थितिबंधाध्यवसायस्थानान्यनुभागबंधाध्यवसायस्थानानि योगविभागपरिच्छेदरूपाणि चाऽसंख्येयलोकप्रदेशपरिमाणान्युत्सर्पिण्यवसर्पिणीसमयांश्च प्रक्षिप्य पूर्वोक्तराशौ त्रीन्वारान् वर्गितसंवर्गितं कृत्वा उत्कृष्टाऽसंख्येयाऽसंख्येयमतीत्य जघन्यपरीतानंतं गत्वा पतितं । तत एकरूपेऽपनीते उत्कृष्टाऽसंख्येयाऽसंख्येयं भवति, मध्यमजघन्योत्कृष्टाऽसंख्येयाऽसंख्येयं भवति । यत्रासंख्येयाऽसंख्येयेन प्रयोजनं तत्राऽजघन्योत्कृष्टाऽसंख्येयाऽसंख्येयं ग्राह्यं । यज्जघन्यपरीतानंतं तत्पूर्ववद्वर्गितमुत्कृष्टपरीतानंतमतीत्य जघन्ययुक्तानंतं गत्वा पतितं । तत एकरूपेऽपनीते उत्कृष्टपरीतानंतं तद्भवति । मध्यमजघन्योत्कृष्टपरीतानंतं अभव्यराशिप्रमाणमार्गणे जघन्ययुक्तानंतं ग्राह्यं । यज्जघन्ययुक्तानंतं तद्विरलीकृत्यात्रैकैकरूपे जघन्ययुक्तानंतं दत्त्वा सकृद्वर्गितमुत्कृष्टयुक्तानंतमतीत्य जघन्यमनंतानंतं गत्वा पतितं । तत एकरूपेऽपनीते उत्कृष्टयुक्तानंतं भवति । मध्यमजघन्योत्कृष्टयुक्तानंतं यज्जघन्याऽनंताऽनंतं तद्विरलीकृत्य पूर्ववत्त्रीन्वारान् वर्गितसंवर्गितमुत्कृष्टाऽनंताऽनंतं न प्राप्नोति ततः सिद्धनिगोतजीववनस्पतिकायातीताऽनागतकालसमयसर्वपुद्गलसर्वाऽऽकाशप्रदेशधर्माधर्मास्तिकायाऽगुरुलघुगुणाननंतान् प्रक्षिप्य प्रक्षिप्य त्रीन् वारान् वर्गितसंवर्गिते कृते उत्कृष्टाऽनंताऽनंतं न प्राप्नोति ततोऽनंते केवलज्ञाने दर्शने च प्रक्षिप्ते उत्कृष्टाऽनंताऽनंतं भवति । ततः एकरूपेऽपनीतेऽजघन्योत्कृष्टाऽनंताऽनंतं भवति । यत्राऽनंताऽनंतं मार्गणं तत्राजघन्योत्कृष्टाऽनंताऽनंतं ग्राह्यं ।

उपमाप्रमाणमष्टविधं पल्यसागरसूचीप्रतरघनांगुलजगच्छ्रेणीलोकप्रतरलोकभेदात् ॥७॥

अंतादिमध्यहीनः अविभागोऽतींद्रियः एकरसगंधवर्णः द्विस्पर्शः परमाणुः । अनंतानंतपरमाणुसंघातपरिमाणभेदा-

---

१ अधिकृत्वेतिच पाठः

विर्भूता उत्संज्ञासंज्ञैका । अष्टावुत्संज्ञासंज्ञास्संहताः संज्ञासंज्ञैका । अष्टौ संज्ञासंज्ञा एकस्त्रुटिरेणुः । अष्टौ त्रुटिरेणवः संहताः एकस्त्रसरेणुः । अष्टौ त्रसरेणवः संहताः ऐको रथरेणुः । अष्टौ रथरेणवः संहताः एका देवकुरूत्तरकुरुमनुजकेशाग्रकोटी भवति । ता अष्टौ समुदिता एका रम्यकहरिवर्षमनुजकेशाग्रकोटी भवति । अष्टौ ताः संहताः हैरण्यवतहैमवतमनुजकेशाग्रकोटी भवति । ता अष्टौ सपिंडिताः भरतैरावतविदेहमनुजकेशाग्रकोटी भवति । ता अष्टौ संहताः एका लिक्षा भवति । अष्टौ लिक्षा संहताः एका यूका भवति । अष्टौ यूका एकं यवमध्यं । अष्टौ यवमध्यानि एकमंगुलमुत्सेधाख्यं । एतेन नारकतिर्यग्योनानां देवमनुष्याणामकृत्रिमजिनालयप्रतिमानां च देहोत्सेधो मातव्यः । तदेव पंचशतगणितं प्रमाणांगुलं भवति । एतदेव चाऽवसर्पिण्यां प्रथमचक्रधरस्याऽऽत्मांगुलं भवति । तदानीं तेन ग्रामनगरादिप्रमाणपरिच्छेदो ज्ञेयः । इतरेषु योगेषु[1] मनुष्याणां यदाऽऽत्मांगुलं तेन तेन तदा ग्रामनगरादिप्रमाणपरिच्छेदो ज्ञेयः । यत्तत्प्रमाणांगुलं तेन द्वीपसमुद्रजगतीवेदिकापर्वतविमाननरकप्रस्तारायकृत्रिमद्रव्यायामविष्कंभादिपरिच्छेदोवसेयः । तत्र षडंगुलः पादः । द्वादशांगुलो वितस्तिः । द्विवितस्तिः हस्तः । द्विहस्तः किष्कुः । द्विकिष्कुर्दंडः । द्वे दंडसहस्रे गव्यूतं । चतुर्गव्यूतं योजनं ।

पल्यं त्रिविधं व्यवहारोद्धाराद्धाविकल्पादन्वर्थात् ॥८॥ व्यवहारपल्यं उद्धारपल्यं अद्धापल्यमिति त्रिधा पल्यं विभज्यते । अन्वर्थश्चायं विकल्पः, आद्यं व्यवहारपल्यमुत्तरपल्यव्यवहारबीजत्वान्नानेन किंचित्परिच्छेद्यमस्ति । द्वितीयमुद्धारपल्यं तत उद्धृतैर्लोमच्छेदैर्द्वीपसमुद्रसंख्यानिर्णय इति । तृतीयमद्धापल्यं अद्धाकाल इत्यर्थः, अतो हि स्थितेः परिच्छेदः इति । तद्यथा— प्रमाणांगुलपरिमितयोजनायामविष्कंभावगाहानि त्रीणि पल्यानि कुशूला इत्यर्थः । एकादिसप्ताहोरात्रिजातोविकलोमाग्राणि[2] तावच्छिन्नानि यावद्द्वितीयं कर्तरिच्छेदं नाबाप्नुवंति । तादृशैर्लोमच्छेदैः परिपूर्णं घनीकृतं व्यवहारपल्यमित्युच्यते ततो वर्षशते वर्षशतेऽपैनीते[3] एकैकलोमापकर्षणविधिना यावता कालेन तद्रिक्तं भवेत् तावत्कालः व्यवहारपल्योपमाख्यः । तैरेव रोमच्छेदैः प्रत्येकमसंख्येयवर्षकोटिसमयमात्रच्छिन्नैः पूर्णमुद्धारपल्यं । ततः समये समये एकैकस्मिन् रोमच्छेदे प्रकृष्यमाणे यावता कालेन तद्रिक्तं भवेत् तावत्कालः उद्धारपल्योपमाख्यः । एषामुद्धारपल्यानां दशकोटीकोट्यः एकमुद्धारसागरोपमं । अर्धतृतीयसागरोपमाणां यावंतो रोमच्छेदास्तावंतो द्वीपसमुद्राः । पुनरुद्धारपल्यरोमच्छेदैर्वर्षशतसमयमात्रच्छिन्नैः पूर्णमुद्धारपल्यं । ततः समये समये एकैकस्मिन् रोमच्छेदे प्रकृष्यमाणे यावता कालेन तद्रिक्तं भवति तावत्कालः अद्धापल्योपमाख्यः । एषामद्धापल्यानां दशकोटीकोट्यः एकमद्धासागरोपमं । दशाद्धासागरोपमकोटीकोट्यः एकावसर्पिणी, तावत्येवोत्सर्पिणी । अनेन अद्धापल्येन नारकतैर्यग्योनानां देवमनुष्याणां च कर्मस्थितिर्भवस्थितिरायुःस्थितिः कायस्थितिश्च परिच्छेत्तव्या । अद्धापल्यस्याऽर्धच्छेदेन शलाकाविरलीकृत्य प्रत्येकमद्धापल्यप्रदानं कृत्वा अन्योन्यगुणिते कृते यावंतश्छेदास्तावद्भिराकाशप्रदेशैर्मुक्तावली कृता सूच्यंगुलमित्युच्यते । तदेवाऽपरेण सूच्यंगुलेन गुणितं प्रतरांगुलं । तत्प्रतरांगुलमपरेण सूच्यंगुलेनाऽभ्यस्तं घनांगुलं । असंख्येयानां वर्षाणां यावन्तः समयास्तावत्खंडमद्धापल्यं कृतं ततोऽसंख्येयान् खंडानपनीयाऽसंख्येयमेकं भागं बुद्ध्या विरलीकृत्य एकैकस्मिन् घनांगुलं दत्त्वा परस्परेण गुणिता जगच्छ्रेणी, सा अपरया जगच्छ्रेण्याऽभ्यस्ता प्रतरलोकः, स एवाऽपरया जगच्छ्रेण्या संवर्गितो घनलोकः ।

क्षेत्रप्रमाणं द्विविधं अवगाहक्षेत्रं विभागनिष्पन्नक्षेत्रं चेति ॥ ८ ॥ तत्रावगाहक्षेत्रमनेकविधं एकद्वित्रिचतुःसंख्येयाऽसंख्येयाऽनंतप्रदेशपुद्गलद्रव्यावगाह्येकाद्यसंख्येयाऽऽकाशप्रदेशभेदात् । विभागनिष्पन्नक्षेत्रं चाऽनेकविधं असंख्येयाकाशश्रेणयः, क्षेत्रप्रमाणांगुलस्यैकोऽसंख्येयभागः, असंख्येयाः क्षेत्रप्रमाणांगुलाऽसंख्येयभागाः, क्षेत्रप्रमाणांगुलमेकं भवति । पादवितस्त्यादि पूर्ववद्वेदितव्यं । कालप्रमाणमुच्यते—सर्वज-

१ योगेषु । २ मेषलोमानीत्यर्थः । ३ अतीते इति पाठांतरं । ४ प्रमाणामिति ग. पुस्तके पाठः ।

बन्धगतिपरिणतस्य परमाणोः स्वावगाढप्रदेशव्यतिक्रमकालः परमनिषिद्धो निर्विभागः समयः असंख्येयाः समयाः आवलिकाऽसंख्येयावलिका एक उच्छ्वासस्तावानेव निश्वासः तावुभावनुपहतस्य पुंसः प्राणः एकः। सप्तप्राणाः स्तोकः,सप्तस्तोकाः लवः,सप्त सप्ततिलवाः मुहूर्तः, त्रिंशन्मुहूर्ता अहोरात्रः, पंचदशाऽहोरात्राः पक्षः, द्वौपक्षौ मासः, द्वौ मासौ ऋतुः, ऋतवस्त्रयोऽयनं, द्वेऽयने संवत्सरं, चतुरशीतिवर्षशतसहस्राणि पूर्वांगं, चतुरशीतिपूर्वांगशतसहस्राणि पूर्वं । एवमनयैव वृद्ध्या पूर्वांगपूर्वनयुतांगनयुतकुमुदांगकुमुदपद्मांगपद्मनलिनांगनलिनकमलांगकमलतुत्र्यांगतुत्र्यअटटांगअटटअममांगअममहूहूअंगहूहूलतांगलतामहालताप्रभृतिसंज्ञाः । कालो वर्षगणनागम्यः संख्येयो वेदितव्यः, ततः परोऽसंख्येयः पल्योपमसागरोपमप्रमितः, ततः, परोऽनंतः कालोऽतीतो ऽनागतश्च सर्वज्ञप्रत्यक्षः ।

भावप्रमाणं पंचविधं ज्ञानं ॥९॥ पुरस्ताद्व्याख्यातं। यथैवेते उत्कृष्टजघन्ये स्थिती नृणां तथैव—

तिर्यग्योनिजानां च ॥ ३९ ॥

तिरश्चां योनिस्तिर्यग्योनिः का पुनरसौ ?

तिर्यङ्नामकर्मोदयापादितजन्म तिर्यग्योनिः ॥ १ ॥ तिर्यग्गतिनाम्नः कर्मणः उदयेनाऽऽपादितं जन्म तिर्यग्योनिरिति व्यपदिश्यते तिर्यग्योनौ जातास्तिर्यग्योनिजाः। तेषां तिर्यग्योनिजानां उत्कृष्टा भवस्थितिः त्रिपल्योपमा, जघन्यांऽतर्मुहूर्ता । मध्ये विकल्पः-तत्प्रतिपादनार्थमिदमुच्यते—

तिर्यंचः त्रिविधाः एकेंद्रियविकलेंद्रियपंचेंद्रियभेदात् ॥ २ ॥ एकेंद्रियाः विकलेंद्रियाः पंचेंद्रियाश्चेति त्रिविधाः तिर्यंचो वेदित्व्याः ।

द्वादशद्वाविंशतिदशसप्तत्रिवर्षसहस्राणि एकेंद्रियाणामुत्कृष्टा स्थितिर्यथासंभवं त्रीणि रात्रिंदिवानि च ॥ ३ ॥ एकेंद्रियाः पंचविधाः पृथिवीकायिकाः अप्कायिकाः तेजस्कायिकाः वायुकायिकाः वनस्पतिकायिकाश्चेति-तत्र पृथिवीकायिकाः द्विविधाः शुद्धपृथिवीकायिकाः खरपृथिवीकायिकाश्चेति । तत्र शुद्धपृथिवीकायिकानां उत्कृष्टा स्थितिर्द्वादशवर्षसहस्राणि। खरपृथिवीकायिकानां द्वाविंशतिर्वर्षसहस्राणि। वनस्पतिकायिकानां दशवर्षसहस्राणि अप्कायिकानां सप्तसहस्राणि वायुकायिकानां त्रीणि वर्षसहस्राणि तेजःकायिकानां त्रीणि रात्रिंदिवानि ।

विकलेंद्रियाणां द्वादशवर्षा एकान्नपंचाशद्रात्रिंदिवानि षण्मासाश्च ॥ ४ ॥ द्वींद्रियाणामुत्कृष्टा स्थितिर्द्वादशवर्षाः। त्रींद्रियाणां एकान्नपंचाशद्रात्रिंदिवानि। चतुरिंद्रियाणां षण्मासाः ।

पंचेंद्रियाणां पूर्वकोटिनवपूर्वांगानि द्विचत्वारिंशद्वासप्ततिवर्षसहस्राणि त्रिपल्योपमा च ॥ ५ ॥ पंचेंद्रियाः तैर्यग्योनाः पंचविधाः जलचराः, परिसर्पाः, उरगाः, पक्षिणः, चतुःपादश्चेति । तत्र जलचराणामुत्कृष्टा स्थितिः मत्स्यादीनां पूर्वकोटी। परिसर्पाणां गोधानकुलादीनां नवपूर्वांगानि । उरगाणां द्विचत्वारिंशद्वर्षसहस्राणि। पक्षिणां द्वासप्ततिवर्षसहस्राणि। चतुःपदां त्रीणि पल्योपमानि। सर्वेषां तेषां जघन्या स्थितिरंतर्मुहूर्ता । किमर्थो योगविभागः ?

पृथग्योगकरणं यथासंख्यनिवृत्त्यर्थं ॥ ६ ॥ प्रत्येकमुभयथा स्यातामिति यथासंख्यनिवृत्त्यर्थो योगविभागः क्रियते। अथैतेषां भवस्थितिः कायस्थितिः का ? कः पुनरनयोर्विशेषः ? एकभवविषया भवस्थितिः कायस्थितिरेककायापरित्यागेन नानाभवग्रहणविषया। यद्येवमुच्यतां कस्य का कायस्थितिः ? उच्यते-पृथिव्यप्तेजोवायुकायिकानां कायस्थितिरुत्कृष्टा असंख्येया लोकाः । वनस्पतिकायिकस्याऽनंतः कालः असंख्येयाः पुद्गलपरिवर्ताः आवलिकाया असंख्येयभागमात्राः । विकलेंद्रियाणां असंख्येयानि वर्षसहस्राणि। पंचेंद्रियाणां तिर्यङ्मनुष्याणां तिस्रः पल्योपमाः पूर्वकोटीपृथक्त्वेनाऽभ्यधिकाः। तेषां सर्वेषां जघन्या कायस्थितिरंतर्मुहूर्ता । देवनारकाणां भवस्थितिरेव कायस्थितिरिति ।

इति तत्त्वार्थराजवार्तिके व्याख्यानालंकारे तृतीयोऽध्यायः समाप्तः ।

* अथ चतुर्थोऽध्यायः प्रारभ्यते । *

असकृद्देवशब्द उक्तः भवप्रत्ययोऽवधिर्देवनारकाणामित्येवमादिषु तत्र न ज्ञायते के देवाः ? कियंतो वा ? इति तन्निश्चयार्थमित उत्तर प्रक्रम्यते । अथवा सम्यग्दर्शनविषयजीवभेदत्रसस्थावरनिर्णयाय तदधिकरणभूताधस्तिर्यग्लोकनिवेशक्रमो व्याख्यात इतस्तद्विशेषप्रतिपत्त्यर्थं ऊर्ध्वलोकविभागो वक्तव्यः तत्र बहुवक्तव्यसद्भावेऽप्यधिपतिप्रतिपादनपुरस्सरस्तदधिकरणविभागनिर्णय इतीदमुच्यते—

देवाश्चतुर्णिकायाः ॥ १ ॥

देवगतिनामकर्मोदये सति द्युत्याद्यर्थावरोधाद्देवाः ॥ १ ॥ अंतरंगहेतौ देवगतिनामकर्मोदये सति बाह्यद्युत्यादिक्रियासबंधमंतर्नीय दीव्यंतीति देवा इति व्यपदिश्यते । एकत्वेन निर्देशः कर्तव्यः देवश्चतुर्णिकाय इति सजात्यभिधानाद्बहूनामर्थानां प्रतिपादको भवति ? इत्यत उत्तरं पठति—

बहुत्वनिर्देशोऽन्तर्गतभेदप्रतिपत्त्यर्थः ॥ २ ॥ इंद्रादिकृताः स्थित्यादिजनिताश्चांऽतर्गता बहवो देवभेदाः सति तेषां तेषां प्रतिपत्त्यर्थं बहुत्वनिर्देशः क्रियते ।

स्वधर्मविशेषापादितसामर्थ्यात् निचीयंत इति निकायाः ॥ ३ ॥ तस्य देवगतिनामकर्मोदयस्वधर्मविशेषापादितभेदस्य सामर्थ्यान्निचीयत इति निकायाः संघाता इत्यर्थः । चत्वारो निकाया येषां ते चतुर्णिकायाः । के पुनस्ते ? भवनवासिनो व्यंतरा ज्योतिष्का वैमानिकाश्चेति । तेषां लेश्यावधारणार्थमुच्यते

आदितस्त्रिषु पीतांतलेश्याः ॥ २ ॥

आदित इति वचनं विपर्यासनिवृत्त्यर्थं ॥ १ ॥ अंते अन्यथा वा ग्रहणं मा विज्ञायीति आदित इत्युच्यते । आदौ आदितः

द्व्येकनिवृत्त्यर्थं त्रिग्रहणं ॥ २ ॥ द्वयोरेकस्य च निवृत्त्यर्थं त्रिग्रहणं क्रियते । अथ चतुर्णां निवृत्त्यर्थं कस्मान्न भवति ? आदित इति वचनात् ।

लेश्यावधारणार्थं पीतांतवचनं ॥ ३ ॥ षड्लेश्या उक्ताः तत्र चतसृणां लेश्यानामवधारणार्थं क्रियते पीतांतग्रहणं । पीत तेजः इत्यर्थः । पीता अंते यासां ताः पीतांताः, पीतांता लेश्या येषां ते पीतांतलेश्याः । तेनैतदुक्तं भवति-आदितस्त्रिषु निकायेषु भवनवासिव्यंतरज्योतिष्कनामसु देवानां कृष्णा नीला कापोता पीतेति चतस्रो लेश्या भवंतीति । तेषां निकायानामतर्विकल्पप्रतिपादनार्थमाह—

दशाष्टपंचद्वादशविकल्पाः कल्पोपपन्नपर्यंताः ॥ ३ ॥

चतुर्णां दशादिभिर्यथासंख्यमभिसंबंधः ॥ १ ॥ चतुर्णां देवनिकायानां दशादिभिः संख्याशब्दैः *यथासंख्यमभिसंबंधो वेदितव्यः । दशविकल्पा भवनवासिनः, अष्टविकल्पा व्यंतराः, पंचविकल्पाः* ज्योतिष्काः, द्वादशविकल्पा वैमानिका इति । सर्वेषां वैमानिकानां द्वादशविकल्पांतःपातित्वे प्रसक्ते तद्व्यपोहार्थमाह—

कल्पोपपन्नपर्यंतवचनं ग्रैवेयकादिव्युदासार्थं ॥ २ ॥ ग्रैवेयकादयो वक्ष्यंते तेषां द्वादशविकल्पेष्वंतर्भावो मा विज्ञायीति विशेषणमुपादीयते । अथ कथं कल्पाः ?

इंद्रादिविकल्पाधीनकरणत्वात्कल्पा रूढिवशात् ॥ ३ ॥ इंद्रादयः प्रकाराः वक्ष्यमाणा दश एषु कल्प्यते इति कल्पाः । भवनवासिषु च दशविकल्पसद्भावात् कल्पप्रसंग इति चेन्न रूढिवशादिति विशे-

षोक्तत्वात् कल्पेषूपपन्नाः कल्पोपपन्नाः कल्पोपपन्नाः पर्यंता येषां ते इमे कल्पोपपन्नपर्यंताः । कल्पोपपन्ना इति कथं वृत्तेः ? साधनं ? कृतेति वा मयूरव्यंसकादित्वाद्वा वा । पुनरपि तद्विशेषप्रतिपत्त्यर्थमिदमाह—

इंद्रसामानिकत्रायस्त्रिंशपारिषदात्मरक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्विषिकाश्चैकशः ॥ ४ ॥

परमैश्वर्यादिंद्रव्यपदेशः ॥ १ ॥ अन्यदेवाऽसाधारणाणिम दिग्रहणयोगादिंद्राः ।

तत्स्थानार्हत्वात्सामानिकाः ॥ २ ॥ तेषामिंद्राणामाज्ञैश्वर्यवर्जितं यत् स्थानं आयुर्वीर्यपरिवारभोगोपभोगादितत्तेषां समानं, समाने भवाः सामानिकाः "समानस्य तदादेश्च"[1] इति ठञ् । महत्तरपितृगुरूपाध्यायतुल्याः ।

मंत्रिपुरोहितस्थानीयास्त्रायस्त्रिंशाः ॥ ३ ॥ यथेह राज्ञां मंत्रिपुरोहिता हितानुशासिनस्तथा तत्रेंद्राणां त्रायस्त्रिंशा वेदितव्याः । कथं त्रायस्त्रिंशाः ? त्रयस्त्रिंशति जाताः त्रायस्त्रिंशाः "दृष्टे नाम्नि च जाते च अण्डिद्वा विधीयते" इत्यभिधानमस्तीति अण्डिद्भवति । ननु च भेदाभावाद्वृत्तिर्न प्राप्नोति ? संख्यानसंख्येय भेदविवक्षायां आधाराधेयत्वोपपत्तेर्वृत्तिर्भवति । स्वार्थकेऽण्, त्रयस्त्रिंशदेव त्रायस्त्रिंशा इति हृत इति बहुलनिर्देशादंतमादिवत् ।

वयस्यपीठमर्दसदृशाः पारिषदाः ॥ ४ ॥ परिषदि जाताः भवा वा पारिषदाः ते वयस्यपीठमर्दसदृशा वेदितव्याः ।

आत्मरक्षाः शिरोरक्षोपमाः ॥ ५ ॥ आत्मानं रक्षतीति आत्मरक्षास्ते शिरोरक्षोपमाः । आवृतावरणाः प्रहरणोद्यताः रौद्राः पृष्ठतोवस्थायिनः । अपायाभावात्तत्कल्पनावैयर्थ्यमिति चेन्न ऋद्धिविशेषस्थापनार्थत्वात् प्रीतिप्रकर्षहेतुत्वात् च ।

आरक्षकार्थचर (वर) समा लोकपालाः ॥ ६ ॥ लोकं पालयतीति लोकपाला अर्थचरा (वरा) रक्षकसमाः ते वेदितव्याः ।

दंडस्थानीयान्यनीकानि ॥ ७ ॥ पदात्यादीनि सप्तानीकानि दंडस्थानीयानि वेदितव्यानि ।

प्रकीर्णकाः पौरजनपदकल्पाः ॥ ८ ॥ यथेह राज्ञां पौरा. जानपदाश्च प्रीतिहेतवः तथा तत्रेंद्राणां प्रकीर्णकाः प्रत्येतव्याः ।

आभियोग्याः दाससमानाः ॥ ९ ॥ यथेह दासाः वाहनादिव्यापारं कुर्वंति तथा तत्राऽऽभियोग्याः वाहनादिभावेनोपकुर्वंति । आभिमुख्येन योगोऽभियोगः अभियोगे भवा आभियोग्याः ततः स्वार्थे चातुर्वर्ण्यादिवद्यण् । अथवा अभियोगे साधवः आभियोग्याः अभियोगमर्हंतीति वा ।

अंत्यवासिस्थानीयाः किल्विषिकाः ॥ १० ॥ किल्विषं पापं तदेषामस्तीति किल्विषिकाः तेऽत्यवासिस्थानीया मताः ।

एकश इति वीप्सार्थे शस् ॥ ११ ॥ एकैकस्य निकायस्य एकश इति वीप्सार्थे द्योत्ये शस् प्रयुज्यते । एत इंद्रादयो दश विकल्पाश्चतुर्षु निकायेषु, उत्सर्गेण प्रसक्तास्ततोऽपवादार्थमाह—

त्रायस्त्रिंशलोकपालवर्ज्या व्यंतरज्योतिष्काः ॥ ५ ॥

व्यंतरेषु ज्योतिष्केषु त्रायस्त्रिंशान् लोकपालांश्च वर्जयित्वा इतरेऽष्टौ विकल्पाः द्रष्टव्याः । अथ तेषु निकायेषु किमेकैकस्येंद्रः उताऽन्यः प्रतिनियमः कश्चिदस्तीत्याह—

---

१ जैनेंद्रीयसूत्रमिदं । २ हृत इति जैनेंद्रीयसूत्रं 'तद्धिता इति पाणिनीयसूत्रस्थाने ।

पूर्वयोर्द्वींद्राः ॥ ६ ॥

पूर्वयोरिति वचनं प्रथमद्वितीयनिकायप्रतिपत्त्यर्थं ॥ १ ॥ प्रथमस्य द्वितीयस्य च निकायस्य प्रतिपत्त्यर्थं पूर्वयोरिति द्विवचनं क्रियते । कथं पूर्वशब्दो द्वितीयं गमयति ? तृतीयापेक्षया पूर्वोपपत्तेः । चतुर्थापेक्षया तृतीयस्यापि पूर्वत्वप्रसंग इति चेन्न प्रत्यासत्तेर्द्वितीयस्यैवोपादानात् । अथ कथमत्र भेदः ? ननु व्यतिरेकाभावादभेदेन निर्देशो न्याय्यः, उच्यते—

समूहसमूहिनोः कथंचिदर्थांतरत्वोपपत्तेर्भेदविवक्षा ॥ २ ॥ संज्ञालक्षणप्रयोजनादिभिः कथंचिदर्थांतरत्व समूहसमूहिनोर्लोके दृष्टं । यथा व्रीहीणां राशिः, आम्राणां वनमिति । तथा देवानां निकायैश्च भेदविवक्षायां अधिकरणत्वेन सम्बंधित्वेन वा निर्देशः ।

द्वींद्रा इत्यंतर्नीतवीप्सार्थो निर्देशः ॥ ३ ॥ द्वौ द्वाविंद्रौ येषां ते द्वींद्रा इति वीप्सार्थमंतर्नीय निर्देशः क्रियते यथा द्विपदिका त्रिपदिका इति युज्यते । तत्र वीप्सागतिर्वीप्सायां वुनो विधानात्, इह तु न विधानमस्ति यथा तर्हि सप्तपर्णाष्टापदमिति चोच्यते वीप्सायामिति गम्यते, तथेहापि वीप्सार्थसप्रत्ययः । के पुनस्तद्वित्ववीप्साविषयत्वेन विवक्षिताः ? इत्यत्रोच्यते— भवनवासिषु तावत् द्वावसुरकुमाराणामिंद्रौ चमरो वैरोचनश्च । नागकुमाराणां धरणो भूतानंदश्च । विद्युत्कुमाराणां हरिसिंहो हरिकांतश्च । सुपर्णकुमाराणां वेणुदेवो वेणुधारी च । अग्निकुमाराणां अग्निशिखोऽग्निमाणवश्च । वातकुमाराणां वैलंवः प्रभजनश्च । स्तनितकुमाराणां सुघोषो महाघोषश्च । उदधिकुमाराणां जलकांतो जलप्रभश्च । द्वीपकुमाराणां पूर्णो वशिष्टश्च । दिक्कुमाराणां अमितगतिरमितवाहनश्चेति । व्यंतरेष्वपि द्वौ किन्नराणामिंद्रौ किंनरः किंपुरुषश्च । किंपुरुषाणां सत्पुरुषो महापुरुषश्च । महोरगाणां अतिकायो महाकायश्च । गंधर्वाणां गीतरतिर्गीतयशाश्च । यक्षाणां पूर्णभद्रो माणिभद्रश्च । राक्षसानां भीमो महाभीमश्च । पिशाचानां कालो महाकालश्च । भूतानां प्रतिरूपोऽप्रतिरूपश्च । अथ एषां देवानां सुखं कीदृशमित्युक्ते सुखावबोधार्थमुच्यते—

कायप्रवीचारा आ ऐशानात् ॥ ७ ॥

प्रवीचार इति कोयं शब्दः ?

मैथुनोपसेवनं प्रवीचारः ॥ १ ॥ प्रविपूर्वाच्चरेः संज्ञायां घञ् । प्रविचरणं प्रवीचारः मैथुनव्यवहार इत्यर्थः । काये प्रवीचारो येषां ते इमे कायप्रवीचाराः ।

आङ्ग्रहणमभिविध्यर्थं ॥ २ ॥ आङयमभिविध्यर्थो वेदितव्य ईशानोधिपतिः "[1]तस्येदम्" इत्यणि, ऐशानः कल्पः । आ एतस्मादधो ये देवास्ते कायप्रवीचाराः संक्लिष्टकर्मत्वान्मनुष्यवत्स्त्रीविषयसुखमनुभवंतीत्यर्थः । प्राग्ग्रहणे हि क्रियमाणे ऐशाने कल्पे देवान्वर्जयित्वेत्ययमर्थः संप्रतीयेत ।

असंहितानिर्देशोऽसंदेहार्थः ॥ ३ ॥ आ ऐशानादित्यसंहितया निर्देशः क्रियतेऽसंदेहार्थं । ऐशानादित्युच्यमाने सदेहः स्यात् किमाङंतर्भूत दिवशब्दोऽध्याहार्यः इति, अथवा विमुच्य ? संशयमनिष्टं कल्प्यते पूर्वयोरित्यधिकारात् ऐशानात्पूर्वयोरित्यवधिग्रहणात् । इतरेषां सुखविभागेऽनिर्ज्ञाते तत्प्रतिपादनार्थमाह—

शेषाः स्पर्शरूपशब्दमनःप्रवीचाराः ॥ ८ ॥

शेषग्रहणं किमर्थं ?

उक्तावशिष्टसंग्रहार्थं शेषग्रहणं ॥ १ ॥ उक्तानामवशिष्टानां संग्रहार्थं शेषग्रहणं क्रियते । के पुनस्ते ? सनत्कुमारादिकल्पनिवासिनः, इतरथा हि ग्रैवेयकादिष्वपि संप्रत्ययः स्यात् परेऽप्रवीचारा इति वक्ष्यमाणमनवधारितविषयं स्यात् । स्पर्शश्च रूपं च शब्दश्च मनश्च स्पर्शरूपशब्दमनांसि स्पर्शरूपशब्दमनःसु प्रवीचारो येषां त इमे स्पर्शरूपशब्दमनःप्रवीचाराः । अत्र चोद्यते—

---

१ जैनेंद्रीयं सूत्रं ।

विषयविवेकापरिज्ञानादनिर्देशः ॥ २ ॥ इमे स्पर्शप्रवीचाराः इत्यादिविषयविवेकापरिज्ञानादयमनिर्देशः, अगमको निर्देशः ।

द्वयोर्द्वयोरिति वचनात्सिद्धिरिति चेन्नाऽऽर्षविरोधात् ॥ ३ ॥ स्यान्मतं द्वयोर्द्वयोरिति वक्तव्यं तेन विषयविवेकसिद्धिर्भवति इति ? तन्न । किं कारणं ? आर्षविरोधात् । आर्षे ह्युक्तं सानत्कुमारमाहेंद्रयोर्देवाः स्पर्शप्रवीचाराः । ब्रह्मब्रह्मोत्तरलांतवकापिष्ठेषु रूपप्रवीचाराः । शुक्रमहाशुक्रसतारसहस्रारेषु शब्दप्रवीचाराः । आनतप्राणताऽऽरणाऽच्युतेषु मनः प्रवीचाराः ।

इंद्रापेक्षयेति चेन्नाऽऽनतादिषु दोषात् ॥ ४ ॥ स्यादेतदिंद्रापेक्षया द्वयोरिति वचनं नार्षविरोधि ? तद्यथा- सानत्कुमारमाहेंद्रयोर्द्वाविंद्रौ तयोर्देवाः स्पर्शप्रवीचाराः । ब्रह्मब्रह्मोत्तरयोरेक इंद्रः, लांतवकापिष्ठयोरप्येकः, तयोर्देवाः रूपप्रवीचाराः । शुक्रमहाशुक्रयोरेक इंद्रः, सतारसहस्रारयोरप्येकस्तयोर्देवाः शब्दप्रवीचाराः इति ? तन्न । किं कारणं ? आनतादिषु दोषात् । आनतादिषु चत्वार इंद्राः । कथं तर्हि निर्देशः कर्तव्यः ? यथागममिति स तर्हि तथा निर्देशः कर्तव्यः ?

न वा पुनःप्रवीचारग्रहणादिष्टार्थगतेः ॥ ५ ॥ कथं प्रवीचारग्रहणमनुवर्तते । क्व प्रकृतं ? "कायप्रवीचार इति" । ननु च तद्वृत्तावुपसर्जनीभूतमशक्यमनुवर्तयितुं ? अर्थवशात् अनुवर्तत इति व्याख्यायते । एवं वक्तव्यं शेषाः स्पर्शरूपशब्दमनःस्विति । एवमप्यनुवर्तमानः प्रवीचारशब्दः भावसाधनो वृत्तिमंतरेण शेषा इत्यनेन सामानाधिकरण्यं न प्रतिपद्यते ?, शेषाणामिति तर्हि निर्देशः कर्तव्यः, एवं सिद्धे यत्पुनः प्रवीचारग्रहणं तस्यैतत्प्रयोजनं, इष्टप्रवीचारसिद्धिः कथं स्यात् इति । कः पुनरिष्टः ? आर्षाविरोधी सानत्कुमारमाहेंद्रयोर्हि देवान् मैथुनसुखप्रेप्सयोत्पन्नेच्छान् विदित्वा देव्यः उपतिष्ठंते, तदंगस्पर्शनमात्रादेव प्रीतिमुपलभंते विनिवृत्तेच्छाश्च भवंति तथा देव्योपि । ब्रह्मब्रह्मोत्तरलांतवकापिष्ठेषु देवा दिव्यांगनास्वभावसुभगशृंगाराकारविलासचतुरमनोज्ञवेषरूपालोकनमात्रादेव परं सुखमवाप्नुवंति । शुक्रमहाशुक्रसतारसहस्रारेषु देवाः सुरवनितानां मधुरसंगीतमृदुहसितकथनभूषणरवोपदर्शनश्रवणरसायनं पीत्वैव परां प्रीतिमास्कंदंति । आनतप्राणताऽऽरणाऽच्युतकल्पेषु देवाः स्वांगनामनःसंकल्पमात्रादेव परं सुखमनुभवंति । अथोत्तरेषां किं प्रकारं सुखं ? इत्युक्ते तन्निश्चयार्थमाह—

परेऽप्रवीचाराः ॥ ९ ॥

पर इति किमर्थमप्रवीचारा इत्येव सिद्धं उत्तरेषां ग्रहणं ?—

परवचनं कल्पातीतसर्वदेवसंग्रहार्थं ॥ १ ॥ कल्पातीतानां सर्वेषां देवानां संग्रहार्थं परवचनं क्रियते इतरथाऽनिष्टमपि कल्पयितुं शक्येत ।

अप्रवीचारग्रहणं प्रकृष्टसुखप्रतिपत्त्यर्थं ॥ २ ॥ प्रवीचारो हि वेदनाप्रतीकारस्तदभावे तेषां परमसुखमनवरतमित्येतस्य प्रतिपत्त्यर्थमप्रवीचारा इत्युच्यंते । उक्तमादिनिकायदेवा दश विकल्पा इति तेषां सामान्यविशेषसंज्ञानिर्ज्ञानार्थमाह—

भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥ १० ॥

भवनेषु वसनशीला भवनवासिनः ॥ १ ॥ भवनेषु वसंतीत्येवंशीला भवनवासिन इति प्रथमनिकायस्येयं सामान्यसंज्ञा ।

असुरादयस्तद्विकल्पाः ॥ २ ॥ भवनवासिनामसुरादयो दश विकल्पा द्रष्टव्याः ।

सर्वे नामकर्महेतुकाः ॥ ३ ॥ सर्वे ते नामकर्मोदयापादिता वेदितव्याः ।

अस्यंति देवैः सहासुरा इति चेन्नाऽवर्णवादात् ॥ ४ ॥ स्यान्मतं युद्धे देवैः सहास्यंति प्रह-

रणादीनित्यसुरा इति ? तन्न, किं कारणं? अवर्णवादात्। अवर्णवाद एषः देवानामुपरि मिथ्याज्ञाननिमित्तः। कुतः?

महाप्रभावत्वात् ॥ ५ ॥ ते हि सौधर्मादयो देवाः महाप्रभावाः, न तेषामुपरि इतरेषां निकृष्टवलानां मनसापि प्रातिलोम्येन वृत्तिरस्ति । अपि च—

वैरकारणाभावात् ॥ ६ ॥ तेषां प्रतिविशिष्टशुभकर्मोदयापादितविभावानामर्हत्पूजाभोगानुभवनमात्रतन्त्राणां परदारहरणादिनिमित्तं न वैरमस्ति ततो नासुराः सुरैर्युध्यंते । अथ ते कथं कुमाराः ?

कौमारवयोविशेषविक्रियादियोगात्कुमाराः[1] ॥ ७ ॥ सर्वेषां देवानामवस्थितवयःस्वभावत्वेपि कौमारवयोविशेषस्वभावस्वरूपं विक्रियावत्कुमारवदुद्धतवेषभाषाऽऽभरणप्रहरणावरणयानवाहनत्वं च उल्वणं, रागक्रीडने प्रियत्वं चेत्यतैर्योगात् कुमारा इति व्यपदिश्यंते ।

प्रत्येकमभिसम्बंधः ॥ ८ ॥ तस्य कुमारशब्दस्य प्रत्येकमभिसम्बंधः क्रियते—असुरकुमारा नागकुमारा इति एवमादि । अत्राह क्व तेषां भवनानि ? इत्यत्रोच्यते—

अस्या रत्नप्रभायाः पंकबहुलभागेऽसुरकुमाराणां भवनानि चतुःषष्टिशतसहस्राणि ॥९॥ अस्माज्जम्बूद्वीपात् तिर्यगपागसंख्येयान् द्वीपसमुद्रान् अतीत्य पंकबहुलभागे चमरस्याऽसुरेंद्रस्य चतुस्त्रिंशद्भवनशतसहस्राणि, चतुःषष्टिः सामानिकसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशाः, तिस्रः परिषदः, सप्तानीकानि, चत्वारो लोकपालाः, पंचाग्रमहिष्यः, चत्वारि चतुःषष्ट्युत्तराणि आत्मरक्षसहस्राणि, एवं विभवपरिवारः दक्षिणाधिपतिः दिव्यान् भोगान् अनुभवति । तथोत्तरस्या दिशि वैरोचनस्य त्रिंशद्भवनशतसहस्राणि, चतुःषष्टिसामानिकसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशाः, तिस्रः परिषदः, सप्तानीकानि, चत्वारो लोकपालाः, पंचाग्रमहिष्यः, चत्वारि चतुःषष्ठ्युत्तराणि आत्मरक्षसहस्राणि, एवं विभवपरिवारः उत्तराधिपतिः दिव्यान् भोगान् अनुभुंक्ते ।

खरपृथ्वीभागे उपर्यधश्चैकैकयोजनसहस्रं वर्जयित्वा शेषे नवानां कुमाराणां भवनानि भवंति ॥ १० ॥ तद्यथा— अस्माज्जम्बूद्वीपात्तिर्यगपागसंख्येयान् द्वीपसमुद्रानतीत्य धरणस्य नागराजस्य चतुश्चत्वारिंशत् भवनशतसहस्राणि, षष्टिः सामानिकसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशाः, तिस्रः परिषदः, सप्तानीकानि, चत्वारो लोकपालाः, षडग्रमहिष्यः, षडात्मरक्षसहस्राण्याख्यायंते । तथाऽस्माज्जम्बूद्वीपात्तिर्यगुदगसंख्येयान् द्वीपसमुद्रान् अतीत्य भूतानंदस्य नागेंद्रस्य चत्वारिंशद्भवनशतसहस्राणि, अवशिष्टं धरणेंद्रवज्ज्ञेयं । तान्येतानि नागकुमाराणां चतुरशीतिः भवनशतसहस्राणि । तथा सुपर्णकुमाराणां द्विसप्तति भवनशतसहस्राणि । तत्र वेणुदेवस्य दक्षिणाधिपतेः-अष्टत्रिंशद्भवनशतसहस्राणि । इतरद्धरणेंद्रवज्ज्ञेयं । उत्तराधिपतेर्वेणुधारिणः चतुस्त्रिंशद्भवनशतसहस्राणि । अवशिष्टं धरणेंद्रवज्ज्ञेयं । विद्युदग्निस्तनितोदधिद्वीपदिक्कुमाराणां षण्णामपि प्रत्येकं षट्सप्ततिर्भवनशतसहस्राणि । तत्र दक्षिणेंद्राणां हरिसिंहाग्निशिखसुघोषजलकांतपूर्णामितगतीनां प्रत्येकं चत्वारिंशद्भवनशतसहस्राणि हरिकांताग्निमाणवमहाघोषजलप्रभवशिष्टामितवाहनानां उत्तराधिपतीनां प्रत्येकं षट्त्रिंशद्भवनशतसहस्राणि । वातकुमाराणां षण्णवतिर्भवनशतसहस्राणि । तत्र वैलंबस्य दक्षिणेंद्रस्य पंचाशद्भवनशतसहस्राणि । उत्तराधिपतेः प्रभंजनस्य षट्चत्वारिंशद्भवनशतसहस्राणि । सर्वेषां एषां धरणेंद्रवज्ज्ञेय । तान्येतानि भवनानि समुदितानि सप्तकोट्यो द्विसप्ततिश्च शतसहस्राणि । द्वितीयनिकायसामान्यविशेषसंज्ञावधारणार्थमाह—

व्यंतराः किन्नरकिंपुरुषमहोरगगंधर्वयक्षराक्षसभूतपिशाचाः ॥ ११ ॥

विविधदेशांतरनिवासित्वाद् व्यंतराः ॥ १ ॥ विविधदेशांतराणि येषां निवासास्ते व्यंतरा इत्यन्वर्थाः । सामान्यसंज्ञेयमष्टानामपि विकल्पानां ।

---

१ कुमार इति पाटांतर ।

किंनरादयस्तद्विकल्पाः ॥ २ ॥ तेषां व्यंतराणामष्टौ विकल्पाः किंनरादयो द्रष्टव्याः ।

नामकर्मोदयविशेषतस्तद्विशेषसंज्ञाः ॥ ३ ॥ देवगतिनाम्नो मूलस्य उत्तरोत्तरप्रकृतिभेदस्योदयाद्विशेषसंज्ञा भवंति । किन्नरनामकर्मोदयात् किन्नराः, किंपुरुषनामकर्मोदयात् किंपुरुषाः इत्यादि ।

क्रियानिमित्ता एवेति चेन्नोक्तत्वात् ॥ ४ ॥ स्यादेतत् क्रियानिमित्ता एवैताः संज्ञाः, किंनरान् कामयंत इति किन्नराः । किंपुरुषान् कामयत इति किंपुरुषाः । पिशिताशनात् पिशाचा इत्यादि ? तन्न, किं कारणं ? उक्तत्वात् । उक्तमेतत् अवर्णवादः एष देवानामुपरीति । कथं ? न हि ते शुचिवैक्रियिकदेहाः अशुच्यौदारिकशरीरान् नरान् कामयंति नापि पिशितमश्नंति । मांसमदिरादिषु दृष्टा लोके प्रवृत्तिरिति चेन्न क्रीडासुखनिमित्तत्वात, मानसाहाराणि च । क पुनस्तेषामावासाः ? इत्यत्रोच्यते– अस्माज्जम्बूद्वीपात्तिर्यगपागसंख्येयान् द्वीपसमुद्रान् अतीत्य उपरिष्टखरपृथिवीभागे किंनरस्य किन्नरेंद्रस्य असंख्येयानि नगरशतसहस्राणि वर्ण्यंते, तस्य चत्वारि सामानिकसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, चतस्रोग्रमहिष्यः षोडशात्मरक्षसहस्राणि । उदीच्यां दिशि पूर्ववदेव किंनरेंद्रः । किंपुरुषस्तादृग्विभवपरिवारः । एवं शेषाणां षण्णां दक्षिणेंद्राणां सत्पुरुषातिशयगीतिरतिपूर्णभद्रस्वरूपकालाख्यानां दक्षिणे भागे आवासाः । तथा महापुरुषमहाकायगीतयशोमाणिभद्राऽप्रतिरूपमहाकालानां तु उत्तराधिपतीनां तु उत्तरभागे आवासास्तावंत एव वेदितव्याः । राक्षसेंद्रस्य भीमस्य दक्षिणस्यां दिशि पंकबहुलभागेऽसंख्येयानि नगरशतसहस्राणि, आख्यायंते । उत्तरस्यां दिशि महाभीमस्य राक्षसेंद्रस्य पंकबहुलभागेऽसंख्येयानि नगरशतसहस्राणि वर्ण्यंते । षोडशानामपि एषां व्यंतराणां सामानिकादिपरिवारास्तुल्याः । भूमितलेपि द्वीपाद्रिसमुद्रदेशग्रामनगरत्रिकचतुष्कचत्वरगृहांगणरथ्याजलाशयोद्यानदेवकुलादीनि असंख्येयानि, आवासशतसहस्राणि तेषामाख्यायंते । तृतीयनिकायस्य सामान्यविशेषसंज्ञासंकीर्तनार्थमाह—

ज्योतिष्काः सूर्याचंद्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्च ॥ १२ ॥

द्योतनस्वभावत्वाज्ज्योतिष्काः ॥ १ ॥ द्योतनं प्रकाशनं तत्स्वभावत्वादेषां पंचानामपि विकल्पानां ज्योतिष्का इतीयमन्वर्था सामान्यसंज्ञा । तस्याः सिद्धिः—

ज्योतिःशब्दात्स्वार्थे के[1] निष्पत्तिः ॥ २ ॥ ज्योतिःशब्दात्स्वार्थे के सति ज्योतिष्का इति निष्पद्यते । कथं स्वार्थे कः ? यवादिषु पाठात् ।

प्रकृतिलिंगानुवृत्तिप्रसंग इति चेन्नातिवृत्तिदर्शनात् ॥ ३ ॥ स्यान्मतं यदि स्वार्थिकोयं कः ज्योतिःशब्दस्य नपुंसकलिंगत्वात् कांतस्यापि नपुंसकलिंगता प्राप्नोतीति ? तन्न । किं कारणं, अतिवृत्तिदर्शनात् । प्रकृतिलिंगातिवृत्तिरपि दृश्यते यथा कुटीरः समीरशुंडार इति ।

तद्विशेषाः सूर्यादयः ॥ ४ ॥ तेषां ज्योतिष्काणां सूर्यादयः पंच विकल्पाः द्रष्टव्याः ।

पूर्ववत्तन्निर्वृत्तिः॥५॥ तेषां संज्ञाविशेषाणां पूर्ववन्निर्वृत्तिर्वेदितव्या देवगतिनामकर्मविशेषोदयादिति ।

सूर्याचंद्रमसावित्यानङ् देवताद्वंद्वे ॥ ६ ॥ सूर्यश्च चंद्रमाश्च द्वंद्वे कृते पूर्वपदस्य "देवताद्वंद्वे[2] इत्यानङ् भवति ।

सर्वत्र प्रसंग इति चेन्न पुनर्द्वंद्वग्रहणादिष्टे वृत्तिः ॥ ७ ॥ स्यादेतत् यदि "देवताद्वंद्वे" इत्यानङ् भवति इहापि प्राप्नोति ग्रहनक्षत्रप्रकीर्णकताराः किंनरकिंपुरुषादयः असुरनागादय इति तन्न किं कारणं ? आनङ् द्वंद्व इत्यतः द्वंद्व इति वर्तमाने पुनर्द्वंद्वग्रहणात्[3] जायते इति ।

पृथग्ग्रहणं प्राधान्यख्यापनार्थं ॥ ८ ॥ सूर्याचंद्रमसोर्ग्रहादिभ्यः पृथक् ग्रहणं क्रियते प्राधान्यख्यापनार्थं । ज्योतिष्केषु हि सर्वेषु सूर्याणां चंद्रमसां च प्राधान्यं । किं कृतं पुनस्तत् ? प्रभावादिकृतं ।

---

१ के प्रत्यये इत्यर्थः । २ जैनेंद्रीय सूत्र । ३ पुनर्द्वंद्वग्रहणे इष्टे वृत्तिर्जायते पाठोऽयं ख- पुस्तके ।

सूर्यस्यादौ ग्रहणं अल्पाच्तरत्वात् अभ्यर्हितत्वाच्च ॥ ९ ॥ सूर्यशब्द आदौ प्रयुज्यते कुतः अल्पाच्तरत्वात् अभ्यर्हितत्वाच्च सर्वाभिभवसमर्थाद्धि अभ्यर्हितः सूर्यः ।

ग्रहादिषु च ॥ १० ॥ किमल्पाच्तरत्वात् अभ्यर्हितत्वाच्च पूर्वनिपातः ? इति वाक्यविशेषः । ग्रहशब्दस्तावत् अल्पाच्तरोऽभ्यर्हितश्च तारकाशब्दान्नक्षत्रशब्दोऽभ्यर्हितः । क्व पुनस्तेषां निवासः ? इत्यत्रो-च्यते—अस्मात् समात् भूमिभागादूर्ध्वं सप्तयोजनशतानि नवत्युत्तराणि उत्प्लुत्य सर्वज्योतिषां अधोभाविन्यस्तारकाश्चरंति । ततो दशयोजनान्युत्प्लुत्य सूर्याश्चरंति । ततोऽशीतिर्योजनान्युत्प्लुत्य चंद्रमसो भ्रमंति । ततस्त्रीणि योजनान्युत्प्लुत्य नक्षत्राणि । ततस्त्रीणि योजनानि उत्प्लुत्य बुधाः । ततस्त्रीणि योजनानि उत्प्लुत्य शुक्राः । ततः त्रीणि योजनान्युत्प्लुत्य बृहस्पतयः । ततः चत्वारि योजनान्युत्प्लुत्य अंगारकाः । ततः चत्वारि योजनान्युत्क्रम्य शनैश्चराश्चरंति । स एष ज्योतिर्गणगोचरः नभोऽवकाशः दशाधिकयोजनशतबहुलः तिर्यगसंख्यातद्वीपसमुद्रप्रमाणो घनोदधिपर्यंतः । उक्तं च—

णवदुत्तरसत्तसया दससीदिच्चदुतिगं च दुगचदुक्कं ।
ताराराविससिरिक्खा बुहभग्गावगुरुअंगिरारसणी ॥ १ ॥

तत्राभिजित् सर्वाभ्यंतरचारी, मूलः सर्वबहिश्चारी, भरण्यः सर्वाधश्चारिण्यः, स्वातिः सर्वोपरिचारी । तप्ततपनीयसमप्रभाणि लोहिताक्षमणिमयानि अष्टचत्वारिंशद्योजनैकषष्टिभागविष्कंभायामानि तत्त्रिगुणाधिकपरिधीनि चतुर्विंशतियोजनैकषष्टिभागबाहुल्यानि अर्धगोलकाकृतीनि षोडशभिर्देवसहस्रैरूढानि सूर्यविमानानि, प्रत्येकं पूर्वदक्षिणोत्तरान् भागान् क्रमेण सिंहकुंजरवृषभतुरगरूपाणि विकृत्य चत्वारि चत्वारि देवसहस्राणि वहंति । एषामुपरि सूर्याख्याः देवास्तेषां प्रत्येकं चतस्रोऽग्रमहिष्यः । सूर्यप्रभा सुसीमा अर्चिमालिनी प्रभंकरा चेति । प्रत्येकं देवीचतुःसहस्रविकरणसमर्थाः । ताभिः सह दिव्यसुखमनुभवंतोऽसंख्येयशतसहस्राधिपतयः सूर्याः परिभ्रमंति । विमलमृणालवर्णान्यंकमयानि चंद्रविमानानि षट्पंचाशद्योजनैकषष्टिभागविष्कंभायामानि अष्टाविंशतियोजनैकषष्ठिभागबाहुल्यानि, प्रत्येकं षोडशभिः देवसहस्रैः पूर्वादिषु दिक्षु क्रमेण सिंहकुंजराश्ववृषभरूपविकारिभिरूढानि । तेषामुपरि चंद्राख्या देवाः । तेषां प्रत्येकं चतस्रोऽग्रमहिष्यः चंद्रप्रभा सुसीमा अर्चिमालिनी प्रभंकरा चेति, प्रत्येकं चतुर्देवीरूपविकरणपटवस्ताभिः सह सुखमुपभुंजंतश्चंद्रमसोऽसंख्येयविमानशतसहस्राधिपतयो विहरंति । अंजनसमप्रभाणि अरिष्टमणिमयानि राहुविमानान्येकयोजनायामविष्कंभाण्यर्धतृतीयधनुःशतबाहुल्यानि । नवमल्लिकाप्रभाणि रजतपरिणामानि शुक्रविमानानि गव्यूतायामविष्कंभाणि, जात्यमुक्ताद्युतीनि अंकमणिमयानि बृहस्पतिविमानानि देशोनगव्यूतायामविष्कंभाणि, कनकमयान्यर्जुनवर्णानि बुधविमानानि, तपनीयमयानि तप्ततपनीयाभानि शनैश्चरविमानानि, लोहिताक्षमयानि तप्तकनकप्रभाण्यंगारकविमानानि, बुधादिविमानान्यर्धगव्यूतायामविष्कंभाणि । शुक्रादिविमानानि राहुविमानतुल्यबाहुल्यानि । राह्वादिविमानानि प्रत्येकं चतुर्भिः देवसहस्रैरूह्यंते । नक्षत्रविमानानां प्रत्येकं चत्वारि देवसहस्राणि वाहकानि । तारकाविमानानां प्रत्येकं द्वे देवसहस्रे वाहके । राह्वाद्याभियोग्यानां रूपविकाराश्चंद्रवन्नेयाः । नक्षत्रविमानानां उत्कृष्टो विष्कंभः क्रोशः । तारकाविमानानां वैपुल्यं जघन्यं क्रोशचतुर्भागः । मध्यमं साधिकः क्रोशचतुर्भागः । उत्कृष्टं अर्धगव्यूतं । ज्योतिष्कविमानानां सर्वजघन्यवैपुल्यं पंचधनुःशतानि । ज्योतिषामिंद्राः सूर्याः चंद्रमसस्ते चाऽसंख्याताः । ज्योतिष्काणां गतिविशेषप्रतिपत्त्यर्थमाह—

क्षिणा·

मेरुप्रदिक्षणा नित्यगतयो नृलोके ॥ १३ ॥

मेरुप्रदक्षिणवचनं गत्यंतरनिवृत्त्यर्थं ॥ १ ॥ मेरोः प्रदिक्षणाः मेरुप्रदिक्षणा इत्युच्यते । किमर्थं ? गत्यंतरनिवृत्त्यर्थं विपरीता गतिर्माभूत् ॥

गतेः क्षणे क्षणेऽन्यत्वात् नित्यत्वाभाव इतिचेन्नाऽऽभीक्ष्ण्यस्य विवक्षितत्वात् ॥ २ ॥ अयं नित्यशब्दः कूटस्थेष्वविचलेषु भावेषु वर्तते, गतिश्च क्षणे क्षणेऽन्या, ततोऽस्या नित्येति विशेषणं नोपपद्यत इति चेन्न। किं कारणं? आभीक्ष्ण्यस्य विवक्षितत्वात्। यथा नित्यप्रहसितो नित्यप्रजल्पित इति आभीक्ष्ण्यं गम्यत इति। एवमिहापि नित्यगतयः अनुपरतगतयः, इत्यर्थः।

अनेकांताच्च ॥ ३ ॥ यथा सर्वभावेषु द्रव्यार्थादेशात् स्यान्नित्यत्वं, पर्यार्थादेशात् स्यादनित्यत्वं तथा गतावपीति नित्यत्वमविरुद्धमविच्छेदात्।

नृलोकग्रहणं विषयार्थं ॥ ४ ॥ ये अर्धतृतीयेषु द्वीपेषु द्वयोश्च समुद्रयोर्ज्योतिष्कास्ते मेरुप्रदिक्षणा नित्यगतयः नान्ये इति विषयावधारणार्थं नृलोकग्रहणं क्रियते।

गतिकारणाभावादयुक्तिरिति चेन्न गतिरताभियोग्यदेववहनात् ॥ ५ ॥ स्यान्मतं इहलोके भावानां गतिः कारणवती दृष्टा न च ज्योतिष्कविमानानां गतेः कारणमस्ति ततस्तदयुक्तिरिति तन्न। किं कारणं? [1]गतिरताभियोग्यदेववहनात्। गतिरता हि अभियोग्यदेवा वहंतीत्युक्तं पुरस्तात्।

कर्मफलविचित्रभावाच्च ॥ ६ ॥ कर्मणां हि फलं वैचित्र्येण पच्यते ततस्तेषां गतिपरिणतिमुखेनैव कर्मफलमवबोद्धव्यं। एकादशभिः योजनशतैरेकविंशैर्मेरुमप्राप्य ज्योतिष्काः प्रदक्षिणाश्चरंति। तत्र जंबूद्वीपे द्वौ सूर्यौ, द्वौ चंद्रमसौ, षट्पंचाशन्नक्षत्राणि, षट्सप्तत्यधिकं ग्रहशतं, एकं कोटीकोटिशतसहस्रं त्रयस्त्रिंशत्कोटीकोटिसहस्राणि नवकोटीकोटिशतानि पंचाशच्च कोटीकोट्यस्तारकाणां। लवणोदे चत्वारः सूर्याः, चत्वारश्चंद्राः, नक्षत्राणां शतं, द्वादश ग्रहाणां, त्रीणि शतानि द्वापंचाशानि द्वे कोटीकोटिशतसहस्रे सप्तषष्टिः कोटीकोटिसहस्राणि नव च कोटीकोटिशतानि तारकाणां। धातकीखंडे द्वादश सूर्याः, द्वादश चंद्राः, नक्षत्राणां त्रीणि शतानि, षट्त्रिंशानि ग्रहाणां, सहस्रं षट्पंचाशं अष्टौ कोटीकोटिशतसहस्राणि सप्तत्रिंशच्च कोटीकोटिशतानि तारकाणां। कालोदे द्वाचत्वारिंशदादित्याः, द्वाचत्वारिंशच्चंद्राः, एकादश नक्षत्रशतानि, षट्सप्तत्यधिकानि षट्त्रिंशत् ग्रहशतानि षण्णवत्यधिकानि अष्टाविंशतिः कोटीकोटिशतसहस्राणि द्वादशकोटीकोटिसहस्राणि नवकोटीकोटिशतानि पंचाशत्कोटीकोट्यस्तारकाणां। पुष्करार्धे द्वासप्ततिः सूर्याः, द्वासप्ततिश्चंद्राः, द्वे नक्षत्रसहस्रे, षोडशत्रिषष्टिः ग्रहशतानि, षट्त्रिंशानि अष्टचत्वारिंशत्कोटीकोटिशतसहस्राणि द्वाविंशतिः कोटीकोटिसहस्राणि द्वे कोटीकोटिशते तारकाणां। बाह्ये पुष्करार्धे च ज्योतिषामियमेव संख्या ततश्चतुर्गुणाः पुष्करवरोदे, ततः परा द्विगुणाद्विगुणा ज्योतिषां संख्या अवसेया। जघन्यं तारकांतरं गव्यूतसप्तभागः। मध्यं पंचाशत् गव्यूतानि। उत्कृष्टं योजनसहस्रं। जघन्य सूर्यांतरं चंद्रांतरं च नवनवतिः सहस्राणि योजनानां षट्शतानि चत्वारिंशदधिकानि। उत्कृष्टमेकं योजनशतसहस्रं षट्शतानि षष्ठ्युत्तराणि। जंबूद्वीपादिषु एकैकस्य चंद्रमसः षट्षष्ठिकोटीकोटिसहस्राणि नवकोटीकोटिशतानि पंचसप्ततिश्च कोटीकोट्यः तारकाणां। अष्टाशीतिर्महाग्रहाः, अष्टाविंशतिर्नक्षत्राणि। परिवारः सूर्यस्य चतुरशीतिमंडलशतं। अशीतिः योजनशतं जंबूद्वीपस्य अंतरमवगाह्य प्रकाशयति। तत्र पंचषष्टिरभ्यंतरमंडलानि। लवणोदस्यांतस्त्रीणि त्रिशानि योजनशतान्यवगाह्य प्रकाशयति। तत्र मंडलानि बाह्यान्येकान्नविंशतिशतं, द्वियोजनमेकैकमंडलांतरं, द्वे योजने अष्टचत्वारिंशद्योजनैकषष्ठिभागाश्च एकैकमुदयांतरं, चतुश्चत्वारिंशद्योजनसहस्रैः अष्टाभिश्च शतैर्विंशैरप्राप्य मेरु सर्वाभ्यंतरमंडलं सूर्यः प्रकाशयति। तस्य विष्कंभो नवनवतिः सहस्राणि षट्शतानि चत्वारिंशानि योजनानां। तदाहनि मुहूर्ताः अष्टादश भवंति। पंचसहस्राणि द्वे शते एकपंचाशद्योजनानां एकान्नत्रिंशद्योजनषष्ठिभागाश्च मुहूर्तगतिक्षेत्र। सर्वबाह्यमंडले चरन् सूर्यः पंचचत्वारिंशत्सहस्रैः त्रिभिश्च शतैः त्रिंशैर्योजनानां मेरुमप्राप्य भासयति। तस्य विष्कंभः एकं शतसहस्रं षट्शतानि च षष्ठ्यधिकानि योजनानां। तदा दिवसस्य

---

१ पाठोयं न ग. पुस्तके।

द्वादश मुहूर्ताः । पंचसहस्राणि त्रीणि शतानि पंचोत्तराणि योजनानां पंचदशयोजनषष्ठिभागाश्च मुहूर्तगतिक्षेत्र । तदा एकत्रिंशद्योजनसहस्रेषु अष्टसु च योजनशतेषु अर्धे द्वात्रिंशेषु स्थितो दृश्यते । सर्वाभ्यंतरमंडल दर्शनविषयपरिमाण प्रागुक्तं । मध्ये हानिवृद्धिक्रमो यथागमं वेदितव्यः । चद्रमंडलानि, पंचदशद्वीपावगाहः, समुद्रावगाहश्च सूर्यवद्वेदितव्यः । द्वीपाभ्यंतरे पंच मंडलानि । समुद्रमध्ये दश । सर्वबाह्याभ्यंतरमंडलविष्कंभत्रिधिः, मेरुचंद्रांतरप्रमाण च सूर्यवत् प्रत्येतव्यं । पंचदशानां मंडलानामंतराणि चतुर्दश । तत्रैकैकस्य मंडलांतरस्य प्रमाण पचत्रिंशद्योजनानि योजनैकषष्ठिभागास्त्रिंशत् तद्भागस्य चत्वारः सप्तभागा ३५-३०-४। सर्वाभ्यंतरमंडले पंचसहस्राणि त्रिसप्तत्यधिकानि योजनानां ६१-७ सप्तसप्ततिर्भागशतानि चतुश्चत्वारिंशानि मंडल त्रयोदशभिर्भागसहस्रैः सप्तभिश्च भागशतैः पंचविंशैः स्थित्वा अवशिष्टानि । चंद्रः एकैकेन मुहूर्तेन गच्छति सर्वबाह्यमडले पंचसहस्राणि शत च पंचविंशं योजनानां एकान्नसप्ततिर्भागशतानि नवत्यधिकानि मंडलं त्रयोदशभिः भागसहस्रैः सप्तभिश्च भागशतैः पंचविंशैः स्थित्वाऽवशिष्टानि । चंद्रः एकैकेन मुहूर्तेन गच्छति दर्शनविषयपरिमाणं सूर्यवद्वेदितव्यं । हानिवृद्धिविधान च यथागमं अवसेयं । पंचयोजनशतानि दशोत्तराणि सूर्याचद्रमसोश्चारक्षेत्रविष्कंभः । गतिमज्ज्योतिःसंबंधेन व्यवहारकालप्रतिपत्त्यर्थमाह—

तत्कृतः कालविभागः ॥ १४ ॥

तदिति किमर्थं ?

गतिमज्ज्योतिःप्रतिनिर्देशार्थं तद्वचनं ॥ १ ॥ गतिमतां ज्योतिषां प्रतिनिर्देशार्थं तदित्युच्यते । न हि केवलगत्या नापि केवलैर्ज्योतिर्भिः कालः परिछिद्यते, अनुपलब्धेरपरिवर्तनाच्च । ज्योतिः परिवर्तनलभ्यो हि कालपरिच्छेदः । कालो द्विविधो व्यावहारिको मुख्यश्च । तत्र व्यावहारिकः कालविभागः तत्कृतः समयावलिकादिर्व्याख्यातः क्रियाविशेषपरिच्छिन्नः अन्यस्यापरिच्छिन्नस्य परिच्छेदहेतुः । मुख्योऽन्यो वक्ष्यमाणलक्षणः । आह— न मुख्यः कालोस्ति सूर्यादिगतिव्यतिरिक्तो लिंगाभावात् अपि च कलानां समूहः कालः कलाश्च क्रियावयवयवाः, किं च पचास्तिकायोपदेशात् पंचैवास्तिकाया आगमे उपदिष्टाः न षष्ठः ततो न मुख्यः कालोस्ति इत्यपरीक्षिताभिधानमेतत्-यत्तावदुक्त लिंगाभावान्नास्ति मुख्यः काल इत्यत्रोच्यते क्रियायां काल इति गौणव्यवहारदर्शनात् मुख्यसिद्धिः । योयमादित्यगमनादौ क्रियेति रूढः काल इति व्यवहारः कालनिर्वर्तनापूर्वकः मुख्यस्य कालस्यास्तित्वं गमयति । नहि मुख्ये गव्यसति वाहीके गौणे गोशब्दस्य व्यवहारो युज्यते ॥

अत एव न कलासमूह एव कालः ॥ २ ॥ अत एव,कुत एव ? मुख्यस्य कालस्यास्तित्वादेव, कलानां समूह एव काल इति व्यपदेशो नोपपद्यते । कल्यते क्षिप्यते प्रेर्यते येन क्रियावद्द्रव्यं स कालस्तस्य विस्तरेण निर्णय उत्तरत्र वक्ष्यते ।

प्रदेशप्रचयाभावादस्तिकायेष्वनुपदेशः ॥ ३ ॥ प्रदेशप्रचयो हि कायः स एषामस्ति ते अस्तिकाया इति जीवादयः पचैव उपदिष्टाः । कालस्य त्वेकप्रदेशत्वादस्तिकायत्वाभावः । यदि हि अस्तित्वमेव अस्य न स्यात् षट्द्रव्योपदेशो न युक्तः स्यात् । कालस्य हि द्रव्यत्वमस्यागमेऽपरलक्षणाभावः स्वलक्षणोपदेशसद्भावात् । इतरत्र ज्योतिषामवस्थाप्रतिपादनार्थमाह—

बहिरवस्थिताः ॥ १५ ॥

बहिरित्युच्यते कुतो बहिः ? नृलोकात् । कथमवगम्यते ? अर्थवशाद्विभक्तिपरिणाम इति ॥

---

१ द्वित्वा इति पाठांतरं ।

नृलोके नित्यगतिवचनादन्यत्रावस्थानासिद्धिरितिचेन्नोभयासिद्धेः ॥ १ ॥ स्यान्मतं नृलोके नित्यगतयः इति वचनात् अन्यत्र अवस्थानं ज्योतिषां सिद्धं अतो बहिरवस्थिता इति वचनमनर्थकं, इति तन्न। किं कारणं? उभयासिद्धेः। नृलोकादन्यत्र बहिर्ज्योतिषामस्तित्वमवस्थानं चाऽप्रसिद्धं अतस्तदुभय-सिद्ध्यर्थं "बहिरवस्थिता" इत्युच्यते। असति हि वचने नृलोके एव संति नित्यगतयश्च इत्यवगम्येत। तुरीयस्य निकायस्य सामान्यसंज्ञाकीर्तनार्थमाह—

वैमानिकाः ॥ १६ ॥

वैमानिकग्रहणमधिकारार्थं ॥ १ ॥ इत ऊर्ध्वं ये वक्ष्यंते तेषु वैमानिकसंप्रत्ययः कथं स्यात् इत्यधि-कारः क्रियते। विशेषेण आत्मस्थान् सुकृतिनो मानयंतीति विमानानि विमानेषु भवा वैमानिकाः। तानि विमानानि त्रिविधानि-इंद्रक-श्रेणि-पुष्पप्रकीर्णकभेदेन। तत्रेंद्रकविमानानि इंद्रवन्मध्येऽवस्थितानि। तेषां चतसृषु दिक्षु आकाशप्रदेशश्रेणिवदवस्थानात् श्रेणिविमानानि। विदिक्षु प्रकीर्णपुष्पवत् अवस्थानात् पुष्पप्रकीर्णकानि। तेषां वैमानिकानां भेदावबोधनार्थमाह—

कल्पोपपन्नाः कल्पातीताश्च ॥ १७ ॥

कल्पेषूपपन्नाः कल्पोपपन्नाः कल्पानतीताः कल्पातीताः। ग्रैवेयकादिषु नवादिकल्पना-संभवात् कल्पत्वप्रसंगः इति चेन्न उक्तत्वात् ॥ १ ॥ स्यान्मतं नवग्रैवेयका नवानुदिशाः पंचानु-त्तराः इति च कल्पनासंभवात् तेषामपि कल्पत्वप्रसंग इति तन्न। किं कारणं? उक्तत्वात्। उक्तमेतदिंद्रादि-दशतया कल्पनसद्भावात् कल्पा इति। नवग्रैवेयकादिषु इंद्रादिकल्पना नास्ति तेषामहमिंद्रत्वात्। तेषामव-स्थानविशेषनिर्ज्ञानार्थमाह—

उपर्युपरि ॥ १८ ॥

उपर्युपरिवचनमतिर्यगसमस्थिति[1] प्रतिपत्त्यर्थं ॥ १ ॥ न ज्योतिष्कवत्तिर्यगवस्थिता नापि व्यंतरवदसमस्थितय इति प्रतिपत्त्यर्थमुपर्युपरीत्युच्यते। कथमत्र द्वित्वं? सामीप्येऽधोध्युपरीति[2]। ननु च नात्र सामीप्यमस्ति असंख्येययोजनांतरत्वात्[3] तेषां, नैष दोषः, तुल्यजातीयेनाऽव्यवधानं सामीप्यं नच तेषां तुल्यजातीयं व्यवधायकं विवक्षितं। इदं विचार्यते– किमत्रावेयत्वेन कल्प्यमानाः देवा उत विमानानि आहोस्वित् कल्पा इति किं वा कामचारः।

देवा इति चेन्नाऽनिष्टत्वात् ॥ २ ॥ यदि देवा उपर्युपरीत्यनेनाभिसंबंध्यंते, तन्न, किं कारणं, अ-निष्टत्वात् देवानां हि उपर्युपरि अवस्थानमनिष्टं।

विमानानि इति चेन्न श्रेणिप्रकीर्णकानां तिर्यगवस्थानात् ॥ ३ ॥ अथ विमानान्युपर्युप-रीति कल्प्यते तदपि नोपपद्यते। श्रेणिप्रकीर्णकानां तिर्यगवस्थानात्। श्रेणिविमानानि पुष्पप्रकीर्णकविमा-नानि च प्रतींद्रकं तिर्यगवस्थितानि इति इहेष्यंते।

कल्पा इति चेददोषः ॥ ४ ॥ यदि कल्पाः न दोषो भवति 'यथा न दोषः तथास्तु' कल्पा हि उपर्युपरि स्थिता इति।

उपसर्जनत्वादनभिसंबंध इति चेन्न दृष्टत्वात् ॥ ५ ॥ स्यादेतत्कल्पोपपन्ना इत्यत्र कल्पग्रह-णमुपसर्जनं तेनात्र संबंधो नोपपद्यते इति तन्न। किं कारणं? दृष्टत्वात् दृष्टो हि उपसर्जनभूतस्यापि अर्थस्य बुद्ध्यापेक्षितस्य विशेषणेनाभिसंबंधः। राजपुरुषोयं, कस्य? राज्ञः इत्येवमिहापि प्रत्यासत्तेः बुद्ध्या उपसर्जन-मपि कल्पग्रहणमभिसंबध्यते उपर्युपरि कल्पा इत्यर्थः। कल्पातीतेषु किमभिसंबध्यते? विमानानि। यद्येवं कियत्सु कल्पविमानेषु ते देवा भवंति इत्यत आह—

---

१ युगसमस्थिति इत्यपि पाठांतरं। २ जैनेन्द्रीयं सूत्रं। ३ योजनांतरत्वात्।

सौधर्मेशानसानत्कुमारमाहेंद्रब्रह्मब्रह्मोत्तरलांतवकापिष्ठशुक्रमहाशुक्रशतारसहस्रारेष्वानतप्राणतयोरारणाऽच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयंतजयंताऽपराजितेषु सर्वार्थसिद्धौ च ॥ १९ ॥

कथमेषां सौधर्मादीनां कल्पाभिधानं ?

चातुरर्थिकेनाऽणा स्वभावतो वा कल्पाभिधानं ॥ १ ॥ चातुरर्थिकेनाऽणा स्वभावतो वा कल्पस्याभिधानं भवति। अथ कथमिंद्राभिधानं ?

स्वभावतः साहचर्यादिंद्राभिधानं ॥ २ ॥ स्वभावतो वा साहचर्याद्वा इंद्राभिधानं दृष्टव्यं। तत्कथमिति चेदुच्यते–सुधर्मा नाम सभा अस्मिन्नस्तीत्यण् सौधर्मः कल्पः, तदस्मिन्नस्तीत्यण्। तत्कल्पसाहचर्यादिंद्रोपि सौधर्मः। ईशानो नाम इंद्रः स्वभावतः, ईशानस्य निवासः कल्पः ऐशानः, "तस्य निवासः" इत्यण्, तत्साहचर्यादिंद्रोपि-ऐशानः। सनत्कुमारो नाम इंद्रः स्वभावतः तस्य निवासः कल्पः सानत्कुमारः, तत्साहचर्यादिंद्रोपि सानत्कुमारः। महेंद्रो नाम इंद्रःस्वभावतः तस्य निवासः कल्पः माहेंद्रः, तत्साहचर्यात् इंद्रोपि माहेंद्रः। ब्रह्मा इंद्रः तस्य लोको ब्रह्मलोकः कल्पः, एवं ब्रह्मोत्तरश्च। ब्रह्मणः इंद्रस्य निवासः ब्रह्मः इति कल्पाभिधानं भवति, तत्साहचर्याद्ब्रह्म इतींद्रस्याऽभिधानं। लांतवस्य इंद्रस्य निवासः लांतवः कल्पः तत्साहचर्याद्वा इंद्रोपि लांतवः। शुक्रस्य इंद्रस्य निवासः शौक्रः कल्पः तत्साहचर्यात् इंद्रोपि शौक्रः, अथवा शुक्रः कल्पः तत्साहचर्यात् इंद्रोपि शुक्रः। शतारस्येंद्रस्य निवासः शतार इति कल्पः तत्साहचर्यादिंद्रोपि शतारः, अथवा शतारः कल्पः तत्साहचर्यात् इंद्रोपि शतारः। सहस्रारस्याप्येवं। आनतस्येंद्रस्य निवासः–आनतः कल्पः तत्साहचर्यात् इंद्रोपि आनतः, अथवा आनतः कल्पः तत्साहचर्यात् इंद्रोप्यानतः। प्राणतस्य इंद्रस्य निवासः प्राणतः कल्पः तत्साहचर्यात् इद्रोपि प्राणतः, अथवा प्राणतः कल्पः तत्सहचरित इंद्रोपि प्राणतः। आरणस्य इंद्रस्य निवास आरणः कल्पः तत्साहचर्यात् इंद्रोप्यारणः। अथवा आरणः कल्पः तत्सहचरित इंद्रोप्यारणः। अच्युतस्येंद्रस्य निवासः अच्युतः कल्पः तत्साहचर्यात् इंद्रोप्यच्युतः, अथवा अच्युतः कल्पः तत्सहचरित इंद्रोप्यच्युतः। लोकपुरुषस्य ग्रीवास्थानीयत्वात् ग्रीवाः ग्रीवासु भवानि ग्रैवेयकाणि विमानानि तत्साहचर्यात् इंद्रा अपि ग्रैवेयकाः। विजयादयोऽन्वर्थसंज्ञाः अभ्युदयविघ्नहेतुविजयात्। सर्वार्थानां सिद्धेश्च विजयादीनि विमानानि तत्साहचर्यात् इंद्रा अपि विजयादिनामानः। अथ किमर्थं सर्वार्थसिद्धस्य पृथग्ग्रहणं न तैः सह द्वंद्वः कर्तव्यः ?

सर्वार्थसिद्धस्य पृथग्ग्रहणं स्थित्यादिविशेषप्रतिपत्त्यर्थं ॥ ३ ॥ विजयादिषु चतुर्षु जघन्या स्थितिर्द्वात्रिंशत्सागरोपमा साधिका। उत्कृष्टा त्रयस्त्रिंशत्सागरोपमा। सर्वार्थसिद्धेः जघन्योत्कृष्टा च त्रयस्त्रिंशत्सागरोपमाः। यः प्रभावः सर्वार्थसिद्धैकदेवस्य नासौ सर्वविजयादिदेवानां इत्येवमादिविशेषप्रतिपत्त्यर्थं विजयादिभ्यः सर्वार्थसिद्धस्य पृथग्ग्रहणं क्रियते ॥

ग्रैवेयकादीनां पृथग्ग्रहणं कल्पातीतत्वनिर्ज्ञापनार्थं ॥ ४ ॥ सौधर्मादयः अच्युतांताः द्वादश कल्पाः ततोन्ये कल्पातीताः इत्येतस्य निर्ज्ञापनार्थं ग्रैवेयकादीनां पृथक् ग्रहणं क्रियते।

नवशब्दस्य वृत्त्यकरणं अनुदिशसूचनार्थं ॥ ५ ॥ नवशब्दस्य ग्रैवेयकशब्देन वृत्तिः कर्तव्या नवग्रैवेयकेष्विति। तदकरणं अन्यान्यपि नव संति इत्येतस्य सूचनार्थं। तेन अनुदिशसंग्रहः कृतो भवति। इतरथा हि लघ्वर्थो वृत्तिः क्रियेत। किमिदमनुदिशमिति प्रतिदिशमित्यर्थः। दिक्शब्दस्य शरत्प्रभृतिषु उपादानात् अनुदिशं विमानानि। आकारांतो वा दिशाशब्दो दिक् पर्यायवाची इति तेनानोर्वृत्तिः।

उपर्युपरीत्यनेन द्वयोर्द्वयोरभिसंबंधः ॥ ६ ॥ आगमाऽपेक्षया व्यवस्था भवति इति उपर्यु-

१ जैनेंद्रीयं सूत्रं। २ जैनेंद्रीयं सूत्र।

रीत्यनेन द्वयोर्द्वयोरभिसंबंधो वेदितव्यः । प्रथमौ सौधर्मैशानकल्पौ तयोरुपरि सानत्कुमारमाहेंद्रौ । तयोरुपरि ब्रह्मलोकब्रह्मोत्तरौ । तयोरुपरि लांतवकापिष्ठौ । तयोरुपरि शुक्रमहाशुक्रौ । तयोरुपरि सतारसहस्रारौ । तयोरुपरि आनतप्राणतौ । तयोरुपरि आरणाऽच्युतौ ।

प्रत्येकमिंद्रसंबंधो मध्ये प्रतिद्वयं ॥ ७ ॥ प्रत्येकमिंद्रसंबंधो वेदितव्यः मध्ये प्रतिद्वयं । सौधर्मैशानकल्पयोर्द्वाविंद्रौ । सानत्कुमारमाहेंद्रयोर्द्वौ । ब्रह्मलोकब्रह्मोत्तरयोरेकः ब्रह्मनामा । लांतवकापिष्ठयोरेको लांतवाऽऽख्यः । शुक्रमहाशुक्रयोरेकः शुक्रसंज्ञः । सतारसहस्रारयोरेकः शतारनामा । आनतप्राणययोर्द्वौ । आरणाऽच्युतयोर्द्वौ ।

तथा चोत्तरयोः पृथग्वचनमर्थवत् ॥८॥ एवं कृत्वा उत्तरयोः पृथग्वचनमर्थवत् भवति । आनतप्राणतयोरारणाऽच्युतयोरिति । इतरथा हि लघ्वर्थं एक एव द्वंद्वः क्रियते तद्यथा—अस्माद्भूमितलान्नवनवतियोजनसहस्राणि चत्वारिंशच्च योजनान्युत्प्लुत्य सौधर्मैशानकल्पौ भवतः, तयोरेकत्रिंशद्विमानप्रस्ताराः— ऋतु - चंद्र - विमल - वल्गु - वीर - अरुण - नंदन - नलिन - लोहित-कांचन-वंचन्-मारुतऋ-द्धीश-वैडूर्य-रुचक-रुचिर-अंक - स्फटिक - तपनीय - मेघ- हारिद्र-पद्म-लोहिताक्ष वज्र-नंद्यावर्त-प्रभंकर-पिष्टाक-गज-मस्तक-चित्र-प्रभासंज्ञाः । मंदरचूलिकाया उपरि ऋतुविमानं, तयोरंतरं वालाग्रमात्रं । ऋतुविमानाच्चतसृषु दिक्षु चतस्रः विमानश्रेण्यो निर्गताः, प्रत्येकं द्विपाष्टिविमानसंख्या । विदिक्षु पुष्पप्रकीर्णकविमानानि एवं एकैकश्रेणीविमानहानिरा प्रभाविमानाद्वेदितव्या । एकैकप्रस्तारांतरमसंख्येयानि योजनशतसहस्राणि, तत्र प्रभासंज्ञादिंद्रकविमानाद्दक्षिणस्यां दिशि श्रेण्यां द्वात्रिंशद्विमानसंख्यायामष्टादशश्रेणीविमानं तत्कल्पविमानं । तस्य स्वस्तिक-वर्धमान-विश्रुताख्यास्त्रयः प्राकाराः । तत्र बाह्यप्राकारांतरनिवासीनि अनीकानि पारिषदाश्च, मध्यप्रकारांतरवासिनस्त्रायस्त्रिंशाः, विमानाभ्यंतरप्राकारनिवासी देवराजः शक्रः सौधर्म इति चोच्यते । तस्य विमानस्य चतसृषु दिक्षु चत्वारि नगराणि कांचन—अशोकमंदिर-मस्तार-गल्वसंज्ञानि । तस्य द्वात्रिंशद्विमानशतसहस्राणि, त्रयस्त्रिंशत् त्रायस्त्रिंशाः, चतुरशीतिरात्मरक्षसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, चतुरशीतिः सामानिकसहस्राणि, चत्वारो लोकपालाः, पद्मा शिवा सुजाता सुलसा अंजुका कालिंदी श्यामा भानुरित्येता अष्टावग्रमहिष्यः । अन्यानि चत्वारिंशद्वल्लभिकाना देवीनां सहस्राणि । सर्वाश्चैता अग्रमहिष्यो वल्लभिकाश्च प्रत्येकं पंचपल्योपमस्थितिकाः षोडशदेवीसहस्रपरिवृताः । एकैका चाऽग्रमहिषी वल्लभिकाश्च षोडशदेवीरूपसहस्रविकरणसमर्थाः । तत्र शक्रस्याभ्यंतरपरिषत् समिता नाम, द्वादशसहस्राणि देवाना पंचपल्योपमायुषां । चंद्रा नाम मध्यपरिषत् चतुर्दशसहस्राणि देवानां चतुःपल्योपमायुषां । जातुर्नाम बाह्यपरिषत् षोडश सहस्राणि देवानां त्रिपल्योपमायुषां । आभ्यंतरपरिषदि देवानामेकैकस्य देव्यः सप्तशतसंख्या अर्धतृतीय पल्योपमस्थितयः । मध्यमपरिषदि देवानामेकैकस्य देवस्य देव्यः षट्शतसंख्याः द्विपल्योपमस्थितयः । बाह्यपरिषदि देवानामेकैकस्य देवस्य देव्यः पंचशतसंख्याः अध्यर्धपल्योपमस्थितयः, तावद्देवीरूपविकरणसमर्थाः । अष्टानामपि-अग्रमहिषीणामभ्यतरपरिषत् सप्तदेवीशतानि । मध्यमपरिषत्षड्देवीशतानि । बाह्यपरिषत्पंचदेवीशतानि । एतासु तिसृषु अपि परिषत्सु देव्यः; अर्धतृतीयपल्योपमस्थितयः । पदातयश्च गजवृषभरथनर्तकीगंधर्वाख्यानि सप्तानीकानि पल्योपमस्थितीनि । अनीकमहत्तराश्च पल्योपमायुषः । तत्र वायुर्नाम पदात्यनीकमहत्तरः सप्तभिः कक्षाभिः परिवृतः । प्रथमा कक्षा चतुरशीतिः पदातिशतसहस्राणि । द्वितीया तद् द्विगुणा । एवं द्विगुणा द्विगुणा पदातिसंख्या आ सप्तम्याः । हरिरश्वानीकमहत्तरः । ऐरावतो गजानीकमहत्तरः । दामयष्टिर्वृषभानीकमहत्तरः । मातुली रथानीकमहत्तरः । नीलांजना नर्तकी गणमहत्तरिका । अरिष्टयशस्को नाम गंधर्वानीकमहत्तरः । एषां षण्णामप्यनीकानां संख्या पदातिसंख्यया तुल्या, सैषा विक्रियाकृता । प्राकृती तु एकैकस्यानीकस्य षट्छतसंख्या । तेषां प्राकृतानां देवानां प्रत्येकं षट्छतसंख्यानामेकैकस्य देवस्य षट्देवीशतानि । एकैका चात्र देवी षड्देवीरूपविकरणसमर्था अर्धपल्योपमस्थितिका । सप्तानामप्यनीकमहत्तराणामेकैकस्य षट्देवीशतानि एकैका चात्र देवी देवीषड्रूपविकरणसमर्था अर्धपल्योपमस्थितिका । आत्म-

• [illegible]

रक्षाणां चतुरशीतिसहस्रसंख्यानां पल्योपमायुषामेकैकस्य द्वे द्वे देवीशते, एकैका चात्र देवी षड्देवीरूपविकरणसमर्था अर्धपल्योपमस्थितिका । शक्रस्य बालको नामाऽऽभियोग्यः पल्योपमायुः, जंबूद्वीपप्रमाणयानविमानविक्रियासमर्थः, तस्य षड्देवीशतानि एकैका चात्र षड्देवीरूपविकरणसमर्था अर्धपल्योसमस्थितिका । प्राच्यां दिशि स्वयंप्रभे विमाने सोमो लोकपालः अर्धतृतीयपल्योपमायुः, तस्य चत्वारि सामानिकसहस्राणि अर्धतृतीयपल्योपमायूंषि, चत्वारि देवीसहस्राणि अर्धतृतीयपल्योपमायूंषि। चतुर्णामपि लोकपालानां चतस्रोऽग्रमहिष्यः अर्धतृतीयपल्योपमायुषः । सोमस्याभ्यंतरपरिषत् ईषा नाम पंचाशद्देवाः सपादपल्योपमायुषः । दृढा नाम मध्यमपरिषत् चत्वारि देवशतानि सपादपल्योपमायूंषि। चतुरंता नाम बाह्यपरिषत् पंचदेवशतानि सपादपल्योपमायूंषि । अपाच्यां दिशि वरज्येष्ठे विमाने यमो नाम लोकपालः शेषं सोमवत्। प्रतीच्यां दिशि अंजने विमाने वरुणो नाम लोकपालः पदोनत्रिपल्योपमायुः । ईषा नाम तस्याऽभ्यंतरपरिषत् षष्टिर्देवाः अध्यर्धपल्योपमायुषः । मध्या दृढा पंचदेवशतानि देशोनाध्यर्धपल्योपमायूंषि । बाह्या चतुरंता षड्देवशतानि देशाधिकाध्यर्धपल्योपमायूंषि । तिसृष्वपि परिषत्सु स्वभर्तृस्थितयो देव्यः, शेषं सोमवत् । उदीच्यां दिशि वल्गुविमाने वैश्रवणो नाम लोकपालः त्रिपल्योपमायुः, तस्याऽभ्यंतरपरिषत् ईषा सप्ततिर्देवाः अध्यर्धपल्योपमायुषः । मध्या दृढा षड्देवशतानि देशोनाध्यर्धपल्योपमायूंषि। बाह्या चतुरंता सप्तदेवशतानि सपादपल्योपमायूंषि । तिसृष्वपि परिषत्सु स्वभर्तृस्थित्यर्धस्थितयो देव्यः, शेषं सोमवत्। चतुर्णां लोकपालानामेकैकस्याऽर्धचतुर्थकोटीसंख्या अप्सरसः । सौधर्मेंद्रकविमानानां एकत्रिंशच्छ्रेणीविमानानां चत्वारि सहस्राणि त्रीणि शतानि एकसप्तत्यधिकानि । पुष्पप्रकीर्णकविमानानां एकत्रिंशच्छतसहस्राणि पंचनवतिः सहस्राणि पंचशतान्यष्टनवत्यधिकानि । तान्येतानि समुदितानि द्वात्रिंशद्विमानशतसहस्राणि भवंतीत्युक्तः सौधर्मकल्पः । तथा तस्मात् प्रभाविमानात् उदक्श्रेण्यां द्वात्रिंशद्विमानविरचितायां यदष्टादशं तत्कल्पविमानं, तस्य परिवारवर्णना पूर्ववद्वेदितव्या । तस्य पतिः–ऐशानो देवराजः, यस्याऽष्टाविंशतिर्विमानशतसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः, अशीतिः सामनिकसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, अशीतिरात्मरक्षसहस्राणि, चत्वारो लोकपालाः। श्रीमती सुसीमा सुमित्रा वसुंधरा जया जयसेना अमला प्रभा चेत्यष्टावग्रमहिष्यः सप्तपल्योपमास्थितयः। द्वात्रिंशद्वल्लभिकासहस्राणि सप्तपल्योपमायूंषि। अभ्यंतरपरिषत्समिता दशदेवसहस्राणि सप्तपल्योपमायूंषि । चंद्रा मध्यमा परिषत् द्वादशदेवसहस्राणि षट्पल्योपमायूंषि । जातुर्बाह्यपरिषत् चतुर्दशदेवसहस्राणि पंचपल्योपमायूंषि—लघुपराक्रमः पदात्यनीकमहत्तरः, अमितगतिः अश्वानीकमहत्तरः, द्रुमकांतो वृषभानीकमहत्तरः, किन्नरो रथानीकमहत्तरः, पुष्पदंतो गजानीकमहत्तरः, गीतयशा गंधर्वानीकमहत्तरः श्वेता नर्तकी गणमहत्तरिका । तत्र पदात्यनीकमहत्तरस्य प्रथमा कक्षा अशीतिर्देवसहस्राणि, द्वितीया द्विगुणा, एवं द्विगुणा द्विगुणा आ सप्तम्याः। एवं शेषाणामप्यनीकानां विक्रिया संख्याता। एते सर्वे अनीकदेवाः तन्महत्तराश्च साधिकपल्योपमायुषः। ऐशानस्य दाक्षिणस्यां दिशि समे विमाने सोमो नाम लोकपालः; अर्धपंचपल्योपमायुः। तस्याभ्यंतरपरिषद् षष्टिर्देवाः। मध्यपरिषत् पंचदेवशतानि। बाह्यपरिषत् षड्देवशतानि सप्त च देवाः । अपरस्यां दिशि सर्वतोभद्रे यमो लोकपालः अर्धपंचपल्योपमायुः, शेषः सोमवत्। उत्तरस्यां दिशि सुभद्रे वरुणो लोकपालः पंचपल्योपमायुः । तस्याभ्यंतरपरिषदशीतिर्देवाः । मध्यमपरिषत् सप्त देवशतानि बाह्यपरिषदष्टौ देवशतानि। पूर्वस्यां दिशि अमिते विमाने वैश्रवणो लोकपालः पादोनपंचपल्योपमायुः। तस्याभ्यंतरपरिषत् सप्ततिर्देवाः। मध्यमपरिषत् षड्देवशतानि। बाह्यपरिषत्सप्तदेवशतानि। ईशानस्य पुष्पको नाम आभियोग्यो देवः बालकतुल्यः जंबूद्वीपप्रमाणपुष्पकयानविमानविकरणसमर्थः, शेषः शक्रवज्ञेयः। एवमुत्तरश्रेणिविमानपुष्पकप्रकीर्णकाधिपतीशानो वर्णितः। प्रभाविमानादूर्ध्वं बहूनि योजनसहस्राणि,उत्प्लुत्य सानत्कुमारमाहेंद्रकल्पौ भवतः। तयोः सप्तविमानप्रस्ताराः-अंजन-वनमाल-नाग-गरुड-लांगल-बलभद्र-चक्राभिधानाः। तत्रांजनविमानाच्चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यो निर्गताः। विदिक्षु पुष्पप्रकीर्णकविमानानि । तत्रैकैकस्यां विमानश्रेण्यां एकत्रिंशद्विमानानि एवं श्रेणीविमानानि एकैकहीनान्याचक्रात्। तेषामंतराण्यपि बहूनि योजनशतसहस्राणि । चक्राख्यादंतविमानाद्दक्षिणश्रेण्यां पंचविंशतिविमानविराजितायां पंचदशकल्पविमानं सौधर्म-

कल्पविमानसदृश। तस्याधिपतिः सानत्कुमारो देवराजः-यस्य द्वादशविमानशतसहस्राणि, त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः, द्विसप्ततिः सामानिकसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, द्विसप्ततिः आत्मरक्षसहस्राणि, चत्वारो लोकपालाः। अष्टावग्रमहिष्यः शक्राग्रमहिषीसमानाः नवपल्योपमायुषः। एकैका चात्राऽष्टादशभिः देवीसहस्रैः परिवृताः द्वात्रिंशद्देवीसहस्रविकरणसमर्थाः। अष्टावन्यानि वल्लभिकानां सहस्राणि तावदायुर्विकरणसमर्थानि। समिताभ्यंतरपरिषदष्टौ देवसहस्राणि साधिकार्धचतुर्थसागरोपमायूंषि। चंद्रा मध्यपरिषद्दशदेवसहस्राणि साधिकार्धचतुर्थसागरोपमायूंषि जातुर्बाह्यपरिषत् द्वादशदेवसहस्राणि साधिकार्धचतुर्थसागरोपमायूंषि। अभ्यंतरपरिषद्देवानां-एकैकस्य सप्तदेवीशतानि पंचपल्योपमायूंषि। मध्यमपरिषद्देवानां एकैकस्य षड्देवीशतानि पंचपल्योपमायूंषि। बाह्यपरिषद्देवानां एकैकस्य पंचदेवीशतानि पंचपल्योपमायूंषि। सर्वाणि च तानि तावद्विक्रियासमर्थानि। तस्यानीकमहत्तराः शक्रानीकमहत्तरसमाना अर्धचतुर्थसागरोपमायुषः। पदातीनां प्रथम कक्षा द्विसप्ततिसहस्राणि। द्वितीया तद्द्विगुणा। एवं द्विगुणा द्विगुणाः आ सप्तम्याः। तथा शेषेष्वपि षट्सु अनीकेषु अनीकमहत्तराणामेकैकस्य त्रीणि देवीशतानि पंचपल्योपमायूंषि। आत्मरक्षदेवानां एकैकस्य देवीशतं पंचपल्योपमायुः। वालकविमानाभियोग्यदेवस्याऽऽयुः, अर्धचतुर्थानि सागरोपमाणि। त्रीणि देवीशतानि पंचपल्योपमायूंषि। पूर्वादिषु दिक्षु स्वयंप्रभ-वरज्येष्ठ-स्वयंजन-वल्गुविमानवासिनः सोमयमवरुणवैश्रवणाः चत्वारो लोकपालाः। एषामेकैकस्य दश दश सामानिकशतानि, दशदशदेवीशतानि, चतस्रोऽग्रमहिष्यः, तिस्रः परिषदः। सागरोपमस्थिती सोमयमौ। पादाधिकतावदायुर्वरुणः। अर्धाधिकतावदायुर्वैश्रवणः। सोमयमयोरभ्यंतरपरिषच्चत्वारिंशद्देवाः। मध्यमपरिषत् त्रीणि देवशतानि। बाह्या परिषच्चत्वारि देवशतानि। वरुणस्याऽभ्यंतरपरिषत्पंचाशद्देवाः। मध्या चत्वारि देवशतानि। बाह्या पंचदेवशतानि। वैश्रवणस्य अभ्यंतरपरिषत् षष्टिर्देवाः। मध्या पंचदेवशतानि। बाह्या परिषत् षड्देवशतानि। चतसृष्वपि अभ्यंतरपरिषत्सु देवानामायुः, त्रीणि सागरोपमाणि। एकैकस्य देवीशतं। चतसृष्वपि मध्यमपरिषत्सु देवानामायुः देशोनानि त्रीणि सागरोपमाणि। एकैकस्य सप्ततिर्देव्यः। चतसृष्वपि बाह्यपरिषत्सु देवा अर्धतृतीयसागरोपमायुषः। एकैकस्य पंचाशद्देव्यः। तस्माच्चक्रविमानादुत्तरस्यां दिशि, श्रेण्यां पंचविंशतिविमानमंडितयां पंचदशकल्पविमानं पूर्वोक्तवर्णनं। तस्येश्वरो महेंद्रो देवराजः। यस्याऽष्टौ विमानशतसहस्राणि। त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः, सप्ततिः सामानिकसहस्राणि, तिस्रः परिषदः। सप्ततिरात्मरक्षसहस्राणि। चत्वारो लोकपालाः। ऐशानाग्रमहिषीतुल्यसंज्ञा अष्टावग्रमहिष्यः एकादशपल्योपमायुषः। अष्टौ चास्य वल्लभिकानां सहस्राणि तावदायूंषि। शेषः सानत्कुमाराग्रमहिषीवल्लभिकावत्। समिताभ्यंतरपरिषत् षड्देवसहस्राणि। चंद्रा मध्यमपरिषत् अष्टौ देवसहस्राणि। जातुर्बाह्यपरिषत् दशदेवसहस्राणि। तिसृष्वपि परिषत्सु देवानां सानत्कुमारपरिषद्देवस्थितेरधिका स्थितिः। शेषो देवीगणपरिमाणायुः, विक्रियासामर्थ्यादिविधिः सानत्कुमारपरिषद्वत्। अनीकमहत्तराणामाख्याः ऐशानवद्वेदितव्याः। पदात्यनीकस्य प्रथमकक्षा सप्ततिर्देवसहस्राणि, द्वितीया तद्द्विगुणा, एवं द्विगुणा द्विगुणा आ सप्तम्याः। तथा शेषेष्वपि षट्सु अनीकेषु। अनीकमहत्तराणां एकैकस्य त्रीणि देवीशतानि, एकैका चाऽत्र सप्तपल्योपमस्थितिका। आत्मरक्षाणामायुः साधिकार्धचतुर्थानि सागरोपमाणि। एकैकस्य सप्तपल्योपमायुषां देवीनां शतं। दक्षिणादिषु दिक्षु सम-सर्वतोभद्र सुभद्र-समितविमानवासिनः सोमयमवरुणवैश्रवणलोकपालाः। एकैकस्य दश दश सामानिकशतानि, तावत्संख्या देव्यः, चतस्रोऽग्रमहिष्यः, तिस्रः परिषदः। तत्रार्धचतुर्थसागरोपमस्थितिर्वरुणः, तदूनस्थितिर्धनदः, ततोऽप्यूनस्थिती सोमयमौ, सोमयमयोरभ्यंतरपरिषत् पंचाशद्देवाः। मध्या चत्वारि देवशतानि। बाह्या पंचदेवशतानि। वैश्रवणस्याऽभ्यंतरपरिषत् षष्टिर्देवाः। मध्या पंचदेवशतानि। बाह्या षड्देवशतानि। वरुणस्याभ्यंतरपरिषत्सप्ततिर्देवाः। मध्या षड्देवशतानि। बाह्या सप्तदेवशतानि। लोकपालचतुष्टयाभ्यंतरपरिषद्देवानामेकैकस्य देवीशतं। मध्यमपरिषद्देवानां एकैकस्य सप्ततिर्देव्यः। बाह्यपरिषद्देवानां एकैकस्य पंचाशद्देव्यः। आयुश्च तेषां यथासंख्यं। साधिकानि समानि देशोनानि च त्रीणि सागरोपमाणि। पुष्पकयान विमानाभियोग्यदेवः साधिकार्धचतुर्थसागरोपमायुः, तस्य देवानां साधिकद्विसागरायुषां शतं। शक्रविमानादूर्ध्वं बहूनि योजनशतसहस्राणि उत्प्लुत्य ब्रह्मलोकब्रह्मोत्तरकल्पौ [illegible]

देवसमितो ब्रह्म ब्रह्मोत्तर इति । अरिष्टविमानाच्च चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यो निर्गताः । चतुर्विंशति-विमानगणना विदिक्षु पुष्पप्रकीर्णकान्येवं; एकैकश्रेणिविमानहान्यो नेतव्याः आ ब्रह्मोत्तरात् । तेषां प्रस्ताराणामतराण्यपि बहूनि योजनशतसहस्राणि । ब्रह्मोत्तरविमानाद्दक्षिणश्रेण्यां एकविंशतिविराजितायां द्वादश-कल्पविमानं पूर्वोक्तवर्णनं । तस्याधिपतिः ब्रह्मा देवराजः, यस्य साधिके द्वे विमानशतसहस्रे । त्रयस्त्रिंशत्त्रा-यस्त्रिंशाः देवाः । षट्त्रिंशत्सामानिकसहस्राणि । तिस्रः परिषद । सप्तानीकानि । षडत्रिंशदात्मरक्षसहस्राणि चत्वारो लोकपालाः । पद्माद्यः शक्राग्रमहिषीतुल्यसंज्ञा अष्टाधग्रमहिष्यः त्रयोदशपल्योपमस्थितयः चतुर्देवी सहस्रपरिवृताः । द्वे च वल्लभिकासहस्रे त्रयोदशपल्योपमस्थितिके । एकैकाग्रमहिषी वल्लभिका चतुष्षष्टिदेवी रूपसहस्रविकरणसमर्था । समिताभ्यंतरपरिषत् चत्वारि देवसहस्राणि अष्टसागरोपमायूंषि । अभ्यंतरपरिषद्दे-वानामेकैकस्य पचाशद्देव्यः । मध्यमपरिषद्देवाना चत्वारिंशद्देव्यः । बाह्यपरिषद्देवानां त्रिंशद्देव्यः । वायव्यादयः सप्तानीकमहत्तरा अर्धाष्टमसागरोपमायुषः । तत्र वायोः पदात्यनीकमहत्तरस्य प्रथमकक्षा षट्त्रिंशत्सहस्राणि, द्वितीया तद्द्विगुणा, एवं द्विगुणा द्विगुणा आ सप्तम्याः । सर्वेषामनीकमहत्तराणामेकैकस्य अर्धतृतीयानि देवी शतानि चतस्रोऽग्रमहिष्यः । आत्मरक्षदेवानामायुः अर्धाऽष्टमानि सागरोपमाणि । एकैकस्य पचाशद्देव्यः । वालकाभियोग्यदेवोऽपि तावदायुर्देवीकः । पूर्वादिषु दिक्षु स्वयंप्रभवरज्येष्टस्वयंजनवल्गुविमानवासिनः सोम-यमवरुणवैश्रवणाः लोकपालाः तेषामेकैकस्य पंचसामानिकशतानि पंचदेवीशतानि चतस्रोऽग्रमहिष्यः । अर्धा-ष्टमसागरोपमायुर्धनदः, तदूनायुर्वरुणः, ततोऽप्यूनस्थिती सोमयमौ । सोमयमयोरभ्यंतरपरिषत्त्रिंशद्देवाः । मध्या द्वे देवशते । बाह्या त्रीणि देवशतानि वरुणस्याभ्यंतरपरिषच्चत्वारिंशद्देवाः । मध्या त्रीणि देवशतानि । बाह्या चत्वारि देवशतानि । वैश्रवणस्याभ्यंतरपरिषत्पंचाशद्देवाः । मध्या चत्वारि देवशतानि । बाह्या पचशतानि । चतसृषु अभ्यंतरपरिषत्सु देवानामायुरष्टौ सागरोपमाणि । मध्यपरिषद्देवानां देशोनान्यष्टौ सागरोपमाणि । बाह्य परिषद्देवानां तान्येवार्धाष्टमानि । तेषां देव्यो यथासंख्यं पंचाशच्चत्वारिंशत्त्रिंशच्च वेदितव्याः । ब्रह्मोत्तरादुत्तर-श्रेण्यामेकविंशतिविमानायां द्वादश कल्पविमानं पूर्ववत् । तस्याधिपतिः ब्रह्मोत्तरः । यस्य न्यूने द्वे विमानशतसह-स्रे, त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः, द्वात्रिंशत्सामानिकसहस्राणि, तिस्रः परिषदः, सप्तानीकानि, द्वात्रिंशदात्म-रक्षसहस्राणि, चत्वारो लोकपालाः । ऐशानेंद्राग्रमहिषीतुल्यसंज्ञा अष्टावग्रमहिष्यः पचदशपल्योपमायुषः । द्वे च वल्लभिकासहस्रे तावदायुषी, अवशिष्टं ब्रह्मेंद्रवत् । ब्रह्मोत्तरस्याभ्यंतरपरिषत् समिता द्वे देवसहस्रे । चद्रा मध्या चत्वारि देवसहस्राणि । जातुर्बाह्या षड्देवसहस्राणि । अवशिष्टं ब्रह्मेंद्रपरिषद्वत् । पुष्पकाभियोग्योऽपि तद्वदेव । पदात्यनीकस्य प्रथमकक्षा द्वात्रिंशद्देवसहस्राणि इतरद् ब्रह्मेंद्रवत् । आत्मरक्षाश्च तद्वदेव । दक्षिणादिदिक्षु सोमादयो लोकपाला ब्रह्मेंद्रवद्वेद्याः । ब्रह्मोत्तरविमानादूर्ध्वं बहुयोजनशतसहस्राणि उत्प्लुत्य लांतवकापिष्ठौ कल्पौ भवतः । ययोर्द्वौ विमानप्रस्तारौ ब्रह्महृदयलांतवाख्यौ । तत्र लांतवविमानाद्दक्षिणश्रेण्यां एकान्नविंशति विमानविरचितायां नवमं कल्पविमानं पूर्वोक्तपरिवारं । तस्याधिपतिर्लांतवो नाम देवराजः । यस्याधिकानि पंचविंशतिविमानसहस्राणि । त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः । चतुर्विंशतिः सामानिकसहस्राणि । तिस्रः परिषदः । सप्तानीकानि चतुर्विंशतिरात्मरक्षसहस्राणि । चत्वारो लोकपालाः । शक्राग्रमहिषीसमानसंज्ञा अष्टावग्रमहिष्यः सप्तदशपल्योपमायुषः । प्रत्येकं द्वाभ्यां देवीसहस्राभ्यां परिवृताः । अन्यानि च वल्लभिकानां तावदायुषां पचशतानि, एकैका चाग्रमहिषी वल्लभिका च एकं देवीशतसहस्रं अष्टाविंशतिं च देवीसहस्राणि विकरोति । समिताभ्यंतरपरिषत् एकं देवसहस्रं । तत्रैकैकस्य साधिकानि दशसागरोपमाणि आयुः, सप्ताशीतिश्च देव्यः । मध्या चद्रा द्वे देवसहस्रे । अत्रैकैकस्य देशोनानि दशसागरोपमाण्यायुषः, पंचसप्ततिश्च देव्यः । जातुर्बाह्या चत्वारि देवसहस्राणि तत्रैकैकस्य मध्यपरिषद्देवायुषः किंचिन्न्यूनमायुः, त्रिषष्टिश्च देव्यः । वालकाभियोग्यो बाह्यपरिषत्स-मायुः, षष्टिश्चास्य देव्यः । अनीकानां तन्महत्तराणां चायुः मध्यमपरिषदायुषः किञ्चिन्न्यूनमायुः । सर्वेषां प्रथमकक्षा चतुर्विंशतिः सहस्राणि, ततो द्विगुणा द्विगुणा आ सप्तम्याः, तत्रैकैकस्य देवस्य महत्तरस्य च षष्टिर्देव्यः । पूर्वादिषु दिक्षु स्वयंप्रभ-वरज्येष्ठ-स्वयंजन-वल्गुविमानवासिनः सोमादयश्चत्वारो लोकपालाः । तत्रैकैकस्य चत्वारि सामानि-

१ चातुरित्यपि पाठांतरं ।

कशतानि, अर्धतृतीयानि देवीशतानि चतस्रोऽग्रमहिष्यः, तिस्रः परिषदः, जातुपरिषत्सदृशायुर्वैश्रवणः, ततो न्यूनायुर्वरुणः, ततोन्यूनायुषौ सोमयमौ। सोमयमयोरभ्यंतरपरिषद्विंशतिर्देवाः, मध्या देवशतं, बाह्या द्वे देवशते। वरुणस्याभ्यंतरपरिषत्त्रिंशद्देवाः। मध्या द्वे देवशते। बाह्या त्रीणि देवशतानि। वैश्रवणस्याभ्यंतरपरिषच्चत्वारिंशद्देवाः। मध्या त्रीणि देवशतानि। बाह्या चत्वारि देवशतानि। सर्वाभ्यंतरपरिषद्देवानामायुरेकादशसागरोपमाणि। मध्यमपरिषद्देवानां तान्येव किंचिन्न्यूनानि। बाह्यपरिषद्देवानां ततोपि किंचिन्न्यूनानि। तेषां यथाक्रमं पंचविंशतिः विंशतिः पंचदशदेव्यः। लांतवविमानादुत्तरश्रेण्यां; एकान्नविंशतिविमानविराजितायां नवमं कल्पविमानं पूर्वोक्तवर्णनं। तस्याधिपतिः कापिष्ठः। यस्योनानि पंचविंशतिः विमानसहस्राणि। त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः। द्वाविंशतिः सामानिकसहस्राणि। तिस्रः परिषदः। ससानीकानि। द्वाविंशतिरात्मरक्षसहस्राणि। चत्वारो लोकपालाः। श्रीमत्यादयोऽष्टावग्रमहिष्यः पंचशतसंख्याश्च वल्लभिका एकान्नविंशतिपल्योपमायुषः। अवशिष्टं लांतवेंद्रवत्। परिषदश्च सर्वेषामनीकानां प्रथमकक्षा द्वाविंशतिः सहस्राणि, इतरल्लांतवेंद्रवत्। आत्मरक्षादिविधिश्च तथैव ज्ञेयः। अयं तु विशेषः लांतवेंद्रजातुपरिषत्सदृशायुर्वरुणः। तत ऊनायुः–वैश्रवणः। ततोप्यूनायुषौ सोमयमौ। लांतवविमानाद्बहूनि योजनशतसहस्राणि उत्प्लुत्य महाशुक्रो नाम विमानप्रस्तारो भवति। शुक्रमहाशुक्रौ स्तः। ततो महाशुक्रविमानात् दक्षिणश्रेण्या अष्टादशविमानपरिमंडितायां द्वादश कल्पविमानं पूर्वोक्तपरिवारं। तस्याधिपतिः शुक्रो नाम देवराजः। यस्याधिकानि विंशतिः विमानसहस्राणि। त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः। चतुर्दशसामानिकसहस्राणि। तिस्रः परिषदः। ससानीकानि। चतुर्दशाऽऽत्मरक्षसहस्राणि। चत्वारो लोकपालाः। पद्मादयोऽष्टावग्रमहिष्यः, एकैकं चात्र दशभिर्देवीसहस्रैः परिवृता वल्लभिकाश्च अर्धतृतीयशतसंख्याः। एकैका यत्राग्रमहिषी वल्लभिका चैकविंशतिपल्योपमायुषी द्वे देवीरूपशतसहस्रे षट्पंचाशतं च देवीरूपसहस्राणि विकरोति। समिताभ्यंतरपरिषत् पंचदेवशतानि चतुर्दशसागरोपमायूंषि। तत्रैकैकस्य त्रिचत्वारिंशद्देव्यः। चंद्रा मध्या एकं देवसहस्रं देशोनचतुर्दशसागरोपमायुः, तत्रैकैकस्याऽष्टात्रिंशद्देव्यः। जातुर्बाह्या द्वे देवसहस्रे मध्यमपरिषदूनायुषी, अत्रैकैकस्य पंचत्रिंशद्देव्यः। अनीकानां महत्तराणां च जातुवदायुः। सर्वेषां प्रथमकक्षा चतुर्दशदेवसहस्राणि एकैकस्य पंचाशद्देव्यः। वालकाभियोग्यानि नानदायुर्देवीकः। आत्मरक्षाश्च पूर्वादिदिक्षु स्वयंप्रभ-वरज्येष्ठ-स्वयंजन-वल्गुविमानवासिनः सोमादयश्चत्वारो लोकपालाः। धनदस्य जातुवदायुः, ततोप्यूनायुर्वरुणः, ततोप्यूनायुषौ सोमयमौ। तयोरभ्यंतरपरिषदष्टदेवाः। मध्या पंचाशत्। बाह्या देवशतं। वरुणस्याभ्यंतरपरिषत् विंशतिर्देवाः। मध्या देवशतं। बाह्या द्वे देवशते। वैश्रवणस्याभ्यंतरपरिषद्विंशतिर्देवाः। मध्या द्वे देवशते। बाह्या त्रीणि देवशतानि। सर्वाभ्यंतरपरिषद्देवानामायुः पंचदशसागरोपमाणि। मध्यपरिषद्देवानामायुस्तान्येव देशोनानि। बाह्यपरिषद्देवानामायुः सार्धचतुर्दशसागरोपमाणि। तेषां यथाक्रमं विंशतिः पंचदश दश च देव्यो भवंति। महाशुक्रविमानादुत्तरश्रेण्यां अष्टादशविमानशोभितायां द्वादशं कल्पविमानं। तस्याधिपतिः महाशुक्रः यस्योनानि विंशति विमानसहस्राणि। त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः। द्वादशसामानिकसहस्राणि। तिस्रः परिषदः। ससानीकानि। द्वादशात्मरक्षसहस्राणि। चत्वारो लोकपालाः। श्रीमत्यादयोऽष्टावग्रमहिष्यः अर्धतृतीयशतसंख्याश्च वल्लभिकाः त्रयोविंशतिपल्योपमायुषः। शेषं शुक्रवत्। तिस्रोपि परिषदः शुक्रवदत्र वेदितव्याः। अनीकानां प्रथमकक्षा द्वादशदेवसहस्राणि। शेषं शुक्रवत्। आत्मरक्षाणां पुष्पकाभियोग्यस्य च तथैव विधिः। दक्षिणादिषु दिक्षु सम-सर्वतोभद्र-सुभद्र,-समितविमाननिवासिनः सोमादयश्चत्वारो लोकपालाः। शुक्रजातुपरिषत्समस्थितिर्वरुणः। तत ऊनायुर्वैश्रवणः ततोप्यूनायुषौ सोमयमौ शेषं शुक्रवत्। महाशुक्रविमानादूर्ध्वं बहूनि योजनशतसहस्राणि उत्प्लुत्य सहस्रार एकविमानप्रस्तारो भवति। यत्र दक्षिणोत्तरौ शतारसहस्रारकल्पौ तत्र सहस्रारविमानाद्दक्षिणश्रेण्यां सप्तदश विमानगणनायां नवकं कल्पविमानं। तस्याधिपतिः शतारो नाम देवराजः। यस्याधिकानि त्रीणि विमानसहस्राणि। त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः। चत्वारि सामानिकसहस्राणि। तिस्रः परिषदः। ससानीकानि। चत्वारि आत्मरक्षसहस्राणि। चत्वारो लोकपालाः। पद्मादयोऽष्टावग्रमहिष्यः पंचविंशतिपल्योपमायुषः। एकैका चात्र पंचभिः देवीशतैः परिवृताः पंचदेवीरूपशतसहस्राणि द्वादशदेवीरूपसहस्राणि विकरोति, द्विषष्टिर्वल्लभिकास्ता-

वदायुर्विक्रियाः ।समिताभ्यंतरपरिषदर्धतृतीयानि देवशतानि साधिकषोडशसागरोपमायूंषि । तेषामेकैकस्यैक
विंशतिर्देव्यः । चंद्रा मध्या पंचदेवशतानि देशोनषोड़शसागरोपमायूंषि तेषां; एककैस्याऽष्टादशदेव्यः ।
जातुर्बाह्या एकं देवसहस्रं चंद्रायुरूनायुः तेषामेकैकस्य पंचदशदेव्यः । सर्वेषामप्यनीकानां महत्तराणां च
जातुवदायुः । प्रथमकक्षा चत्वारि देवसहस्राणि एकैकस्य चत्वारिंशद्देव्यः । पूर्वादिदिक्षु स्वयंप्रभादिविमान-
निवासिनः सोमादयश्चत्वारो लोकपालाः । जातुपरिषत्समायुर्वैश्रवणः, तत ऊनायुर्वरुणः, ततोप्यूनायुषो सो-
मयमौ । तयोरभ्यंतरपारिषत्पंचदेवाः मध्या पचविंशतिर्देवाः । बाह्या पंचाशद्देवाः । वरुणस्याभ्यंतरपरिषद्देवाः
मध्या पंचाशद्देवाः।बाह्या देवशतं । वैश्रवणस्याभ्यंतरपरिषत् पंचदशदेवाः । मध्या देवशतं बाह्या द्वे देवशते ।
सर्वाभ्यंतरपारिषद्देवानामायुः सप्तदशसागरोपामाणि । मध्यपरिषद्देवानामायुः तान्येव देशोनानि । बाह्यपरिषद्देवा-
नामायुः सार्धानि षोडशसागरोपमाणि । तेषां यथाक्रमं पंचदशदशपंचदेव्यो भवंति । सहस्रारविमानादुत्तर-
श्रेण्यां सप्तदशविमानभूषितायां नवमं कल्पविमानं । तस्याधिपतिः सहस्रारः यस्योनानि त्रीणि विमान-
सहस्राणि त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः, द्वे सामानिकसहस्रे, तिस्रः परिषदः, सप्तानीकानि, द्वे आत्मरक्ष
सहस्रे, चत्वारो लोकपालाः । श्रीमत्यादयोष्टावग्रमहिष्यः सप्तविंशतिपल्योपमायुषः । शेषः शतारेंद्रवत् । परिष-
दात्मरक्षाऽनीकाभियोग्यवर्णना च शतारेंद्रवत् । अयं तु विशेषः—अनीकानां प्रथमकक्षे द्वे देवसहस्रे ।
दक्षिणादिदिक्षु सम-सर्वतोभद्र-सुभद्र-समितविमाननिवासिनः सोमादयश्चत्वारो लोकपालाः । तेषामेकैकस्य द्वे
सामानिकशते, षष्टिर्देव्यः, चतस्रोग्रमहिष्यः, तिस्रः परिषदः । शेषः शतारेंद्रवत् । शतारेंद्रजातुपरिषत् सदृशा-
युर्वरुणः । ततो न्यूनायुर्धनदः । ततोप्यूनायुषौ सोमयमौ । शेषः शतारेंद्रवत् । सहस्रारविमानादूर्ध्वं बहूनि योज-
नशतसहस्राणि उत्प्लुत्य आनतप्राणताऽऽरणाच्युतकल्पाः संति । तत्र षड्विमानप्रस्ताराः आनत--प्राणत-
पुष्पक-सातक-रारण अच्युतसंज्ञाकाः । तत्रानतविमानाच्चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यो निर्गताः । विदिक्षु
पुष्पप्रकीर्णकानि । तत्रैकैकस्यां विमानश्रेण्यां षोडशश्रेणिविमानानि । एवमौपरिष्टेषु पंचसु विमानप्रस्तारेषु
एकश्रेणिविमानहानिर्वेदितव्या । तत्रारणाच्युतविमानाद्दक्षिणश्रेण्यां एकादशविमानविरचितायां षष्ठं कल्प-
विमानं । तस्याधिपतिरारणो नाम देवराजः यस्याधिकान्यर्धचतुर्थानि विमानशतानि, त्रयस्त्रिंशत्त्रायस्त्रिंशाः
देवाः, दशसामानिकशतानि, तिस्र-परिषदः, सप्तानीकानि, दशात्मरक्षशतानि, चत्वारो लोकपालाः । पद्मादयो-
ष्टावग्रमहिष्यः अष्टचत्वारिंशत्पल्योपमायुषः । एकैका चात्राऽर्धतृतीयैः देवीशतैः परिवृता दशदेवीरूपशतसह-
स्राणि विकरोति । वल्लभिकाश्च पंचदश तावदायुर्विक्रियाः । समिताभ्यंतरपारिषत् पंचविंशतिर्देवशतं, तत्रैकैकः
साधिकविंशतिसागरोपमायुर्दशदेवीकः । चंद्रा मध्या अर्धतृतीयानि देवशतानि, तत्रैकैकः देशोनविंशति-
सागरोपमस्थितिरष्टदेवीकः । जातुर्बाह्या पंचदेवशतानि तत्रैकैकः अर्धविंशतिसागरोपमास्थितिः षड्देवीकः ।
अनीकानां प्रथमकक्षा एकदेवसहस्रं । सर्वेषां देवानां तन्महत्तराणां च एकैकस्य त्रिंशद्देव्यः । आत्मरक्षाणां
च त्रिंशत्वाहकाभियोग्यस्य चंद्रायुषः ऊनमायुः, त्रिंशद्देव्यः । पूर्वादिषु दिक्षु स्वयंप्रभादिविमाननिवासिनः
सोमादयश्चत्वारो लोकपालाः । तेषामेकैकस्य सामानिकशतं । द्वात्रिंशद्देव्यः । चतस्रोग्रमहिष्यः । तिस्रः परि-
षदः । जातुसमानायुर्वैश्रवणः । ततो न्यूनायुर्वरुणः । ततो न्यूनायुषौ सोमयमौ । तयोरभ्यंतरपरिषत्त्रयो देवाः ।
मध्या द्वादश । बाह्या पंचविंशतिः । वरुणस्याभ्यंतरपरिषत्पंचदेवाः । मध्या पंचविंशतिः । बाह्या पंचाशत् । वैश्र-
वणस्याभ्यंतरपरिषत्षड्देवाः । मध्या पंचाशत् । बाह्या शतं तेषां यथाक्रमं एकविंशतिसागरोपमाणि तान्येव
देशोनानि तान्येव चार्धोनान्यायुरवगतव्यं । सप्त पंच तिस्रश्च देव्यो ज्ञेयाः । आरणाच्युतविमानादुत्तरश्रेण्यां
एकादशविमानभूषितायां षष्ठं कल्पविमानं । तस्याधिपतिरच्युतो नाम देवराजः । यस्योनान्यर्धचतुर्थानि वि-
मानशतानि । त्रयस्त्रिंशत्त्रायस्त्रिंशाः देवाः । दश सामानिकशतानि । तिस्रः परिषदः । सप्तानीकानि । दश आत्म-
रक्षशतानि । चत्वारो लोकपालाः । श्रीमत्यादयोष्टावग्रमहिष्यः पंचपंचाशत्पल्योपमायुषः, वल्लभिकाश्च पंचदश
तावदायुषः, अवशिष्टं–आरणेंद्रवत् । परिषदादिविधिश्च तथैव नेयः । अयं तु विशेषः वरुणोधिकायुः । ततो
न्यूनायुर्धनदः । ततोप्यूनायुषौ सोमयमौ । त एते लोकानुयोगोपदेशेन चतुर्दशेंद्रा उक्ताः । इह द्वादश इष्यंते
पूर्वोक्तेन क्रमेण ब्रह्मोत्तरकापिष्ठमहाशुक्रसहस्रारेंद्राणां दक्षिणेंद्रानुवर्तित्वात् आनतप्राणतकल्पयोश्च एकैकेंद्र

त्वात् । सौधर्मविमानसंख्या प्रागुक्ता । ऐशानेऽष्टाविंशतिर्विमानशतसहस्राणि । श्रेणिविमानानि चतुर्दशशतानि सप्तपंचाशानि । पुष्पप्रकीर्णकानां सप्तविंशतिः शतसहस्राणि अष्टनवतिः सहस्राणि पंचशतानि त्रिचत्वारिंशानि । सानत्कुमारे द्वादशविमानशतसहस्राणि श्रेणिविमानानां पंचशतानि पंचनवत्यधिकानि प्रकीर्णकानां एकादशशतसहस्राणि नवनवतिः सहस्राणि चत्वारि शतानि पंचोत्तराणि । माहेंद्रेऽष्टौ विमानशतसहस्राणि श्रेणिविमानानां; एकं शतं षण्णवत्यधिकं, प्रकीर्णकानां सप्तशतसहस्राणि नवनवतिसहस्राणि अष्टौ शतानि चतुरुत्तराणि । ब्रह्मलोकब्रह्मोत्तरकल्पयोः चत्वारि विमानशतसहस्राणि श्रेणिविमानानां त्रीणि शतानि चतुःषष्ट्यधिकानि । प्रकीर्णकानां त्रीणि शतसहस्राणि नवनवतिः सहस्राणि । षट्छतानि षट्त्रिंशानि । लांतवकापिष्ठयोः पंचाशत्सहस्राणि श्रेणिविमानानां शतं अष्टपंचाशं प्रकीर्णकानामेकान्नपंचाशत्सहस्राणि अष्टौ शतानि द्विचत्वारिंशानि । शुक्रमहाशुक्रयोः चत्वारिंशत्सहस्राणि श्रेणिविमानानां त्रिसप्ततिः । प्रकीर्णकानां एकान्नचत्वारिंशत्सहस्राणि नवशतानि सप्तविंशानि । शतारसहस्रारकल्पयोः षड्विमानसहस्राणि श्रेणिविमानानां एकान्नसप्ततिः । प्रकीर्णकानां एकान्नषष्ठिशतानि एकत्रिंशानि । आरणाच्युतकल्पयोः सप्तविमानशतानि श्रेणिविमानानां त्रीणि शतानि त्रिंशानि । प्रकीर्णकानां त्रीणि शतानि सप्तत्यधिकानि । चतुर्दशस्वपि कल्पविमानेषु विमानसंख्या चतुरशीतिः शतसहस्राणि षण्णवतिः सहस्राणि सप्त च विमानशतानि, आरणाच्युतविमानादूर्ध्वं बहूनि योजनशतसहस्राण्युत्प्लुत्य संति । तत्राधोग्रैवेयकविमानानि, येषु त्रयो विमानप्रस्ताराः सुदर्शनामोघसुप्रबुद्धाः । तत्र सुदर्शनेंद्राच्चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यः । तत्रैकैकस्यां विमानश्रेण्यां दश विमानानि । सुदर्शनादूर्ध्वं बहूनि योजनशतसहस्राणि-उत्प्लुत्याऽस्ति अमोघो नाम विमानप्रस्तारः । अत्रापि चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यो निर्गताः अत्रैकस्यां विमानश्रेण्यां नवविमानानि । अमोघादूर्ध्वं बहूनि योजनशतसहस्राणि उत्प्लुत्य अस्ति सुप्रबुद्धो नामा विमानप्रस्तारः । अत्रापि चतसृष्वपि दिक्षु चतस्रो विमानश्रेण्यो विनिर्गताः । एकैकस्यां विमानश्रेण्यां अष्टौ विमानानि, त्रिष्वप्येतेषु पुष्पप्रकीर्णकविमानानि न संति । तान्येकादशोत्तरविमानं शतं सुप्रबुद्धविमानादूर्ध्वं बहूनि योजनशतसहस्राणि उत्प्लुत्य संति । तत्र मध्यमग्रैवेयकविमानानि येषु त्रयः प्रस्ताराः यशोधरसुभद्रविशालाः, पूर्ववदत्रापि एकैकश्रेणिविमानहान्या पंचसप्ततिः श्रेणिविमानानि, पुष्पप्रकीर्णकानि द्वात्रिंशत् , तान्येतानि सप्तोत्तरं शतं सुविशालविमानादूर्ध्वं बहूनि योजनशतसहस्राणि उत्प्लुत्य संति । तत्रोपरिमग्रैवेयकविमानानि येषु त्रयः प्रस्ताराः सुमनाः सौमनाः प्रीतिंकर इति पूर्ववदत्राप्येकैकविमानहान्या एकान्नचत्वारिंशत् श्रेणिविमानानि द्वापंचाशत्पुष्पप्रकीर्णकानि, तान्येतानि समुदितानि एकनवतिर्विमानानां प्रीतिंकरविमानादूर्ध्वं बहूनि योजनशतसहस्राणि उत्प्लुत्य संति । तत्राऽनुदिशविमानानि येष्वेक एवाऽऽदित्यो नाम विमानप्रस्तारः तत्र दिक्षु विदिक्षु चत्वारि चत्वारि श्रेणिविमानानि । प्राच्यां दिशि अर्चिर्विमानं, अपाच्यामर्चिमाली, प्रतीच्यां वैरोचनं, उदीच्यां प्रभासं, मध्ये आदित्याख्यं । विदिक्षु पुष्पप्रकीर्णकानि चत्वारि । पूर्वदक्षिणस्यामर्चिप्रभं । दक्षिणापरस्यां अर्चिर्मध्यं । अपरोत्तरस्यां अर्चिरावर्तं । उत्तरपूर्वस्यामर्चिर्विशिष्टं । तान्येतानि नवादित्यविमानादूर्ध्वं बहूनि योजनशतसहस्राणि-उत्प्लुत्य संति । तत्रानुत्तरविमानानि यत्रैक एव सर्वार्थसिद्धिसंज्ञो विमानप्रस्तारः । दिक्षु प्रदक्षिणानि विजयवैजयंतजयंतापराजितविमानानि चत्वारि मध्ये सर्वार्थसिद्धिसंज्ञं, पुष्पप्रकीर्णकानि न संति । सौधर्मैशानयोर्विमानानि सप्तविंशैकयोजनशतबाहुल्यानि पंचयोजनशतोच्छ्रायाणि । सानत्कुमारमाहेंद्रयोर्ब्रह्मलोकब्रह्मोत्तरलांतवकापिष्ठेषु शुक्रमहाशुक्रशतारसहस्रारेषु आनतप्राणताऽऽरणाऽच्युतेषु नवसु ग्रैवेयकेषु अनुदिशाऽनुत्तरेषु च विमानानां बाहुल्यमेकैकयोजनविहीनं । उच्छ्रायश्च एकैकयोजनशताधिको यथाक्रमं वेदितव्यः । तान्येतानि श्रेणींद्रप्रकीर्णकविमानानि कानि चित् संख्येययोजनविस्ताराणि कानिचिदसंख्येययोजनविस्ताराणि । यानि संख्येयविस्ताराणि तानि संख्येययोजनशतविस्ताराणि यान्यसंख्येयविस्ताराणि तानि; असंख्येययोजनशतसहस्रविस्ताराणि । सौधर्मैशानयोर्विमानानि पंचवर्णानि कृष्णनीलरक्तहारिद्रशुक्लवर्णानि । सनत्कुमारमाहेंद्रयोश्चतुर्वर्णानि कृष्णहीनानि । ब्रह्मलोकब्रह्मोत्तरलांतवकापिष्ठेषु त्रिवर्णानि विमानानि कृष्णनीलवर्जितानि । शुक्रमहाशुक्रशतारसहस्राराऽऽनतप्राण-

तारणाच्युतेषु द्विवर्णानि विमानानि हारिद्रशुक्लवर्णानि । ग्रैवेयकानुदिशानुत्तरविमानानि शुक्लवर्णान्येव, परमशुक्लं सर्वार्थसिद्धिविमानं । एषामधिकृतानां वैमानिकानां देवानां परस्परतो विशेषप्रतिपत्त्यर्थमाह—

स्थितिप्रभावसुखद्युतिलेश्याविशुद्धीन्द्रियावधिविषयतोऽधिकाः ॥२०॥

स्वोपात्तायुष उदयात् स्थानं स्थितिः ॥ १ ॥ स्वेनोपात्तस्य देवायुष उदयात्तस्मिन्भवे तेन शरीरेण स्थानं स्थितिरुच्यते ।

शापानुग्रहलक्षणः प्रभावः ॥ २ ॥ शापोऽनिष्टापादनं, अनुग्रह इष्टप्रतिपादनं तल्लक्षणः, प्रवृद्धो भाव प्रभाव इत्याख्यायते ।

सद्वेद्योदये सति इष्टविषयानुभवनं सुखं ॥ ३ ॥ सद्वेद्योदयमूलहेतौ सति बाह्यस्येष्टविषयस्य उपनिपाते तद्विषयमनुभवनं सुखमिति कथ्यते ।

शरीरवसनाभरणादिदीप्तिर्द्युतिः ॥ ४ ॥ शरीरस्य वसनस्याऽऽभरणादीनां च दीप्तिः द्युतिरिति उपाख्यायते ।

लेश्याशब्द उक्तार्थः ॥५॥ लेश्याशब्द उक्तार्थ एव वेदितव्यः लेश्याया विशुद्धिः लेश्याविशुद्धिः ।

इंद्रियावधिभ्यां विषयाभिसंबंधः ॥ ६ ॥ विषयशब्दस्य इंद्रियावधिभ्यामभिसंबंधो भवति । इंद्रियं चाऽवधिश्च इंद्रियावधी तयोर्विषय इंद्रियावधिविषय इति ।

इतरथा हि तदाधिक्यप्रसंगः ॥ ७ ॥ अक्रियमाणे ह्येवमभिसंबंधे उपर्युपरि देवेषु इंद्रियाणामाधिक्यं प्रसज्येत ।

स्थितिग्रहणमादौ तत्पूर्वकत्वादितरेषां ॥ ८ ॥ स्थितिग्रहणमादौ क्रियते तत्पूर्वकत्वादितरेषां प्रभावादीनां । स्थितिमतां हि प्रभावादयो नाऽस्थितस्येति ।

तेभ्यस्तैर्वाऽधिका इति तसिः ॥ ९ ॥ तेभ्यः स्थित्यादिभ्यः अधिका इति 'अपादानेऽहीयरुहोरिति' तसिः । तैर्वाधिका इति तसिप्रकरणे 'आद्यादिभ्य उपसंख्यानमिति तसि.' उपर्युपरि वैमानिका इत्यनुवर्तते तेनैवमभिसंबध्यते उपर्युपरि वैमानिकाः प्रतिकल्पं प्रति प्रस्तारं च स्थित्यादिभिरधिका इति । तत्र स्थितिः-उत्कृष्टा जघन्या च । सा उपरिष्टाद्वक्ष्यते । इह तु वचनं येषां समा भवति तेषामपि गुणतोऽधिकत्वज्ञापनार्थं । यः प्रभावः सौधर्मकल्पदेवानां निग्रहानुग्रहविक्रियापराभियोगादिषु, उपर्युपरि ततोऽनंतगुणः । मदाभिमानतया अल्पसंक्लिष्टत्वाच्च न प्रवर्तते । एवं सुखादयोऽपि प्रत्येतव्याः । लेश्यानियमः उपरि वक्ष्यते इह तु वचनं यत्र विधानं समानं तत्रापि कर्मविशुद्धितोऽधिका भवति इति प्रतिपादनार्थं[१] । यथा स्थित्यादिभिरुपर्यधिका एवं गत्यादिभिरपि इत्यतिप्रसंगे तन्निवृत्त्यर्थमाह—

गतिशरीरपरिग्रहाभिमानतो हीनाः ॥२१॥

देशांतरप्राप्तिहेतुर्गतिः ॥ १ ॥ उभयनिमित्तवशात् उत्पद्यमानः कायपरिस्पंदो गतिरित्युच्यते ।

शरीरमुक्तलक्षणं ॥ २ ॥ औदारिकवैक्रियिकाऽऽहारकतैजसकार्मणानि शरीराणि, इत्यत्र शरीरमुक्तलक्षणं ।

लोभकषायोदयान्मूर्छा परिग्रहः ॥ ३ ॥ लोभकषायवेदनीयस्य उदयान्मूर्छासंकल्पः परिग्रह इत्याख्यायते ।

मानकषायोदयापादितोभिमानः ॥ ४ ॥ मानकषायवेदनीयस्य उदयापादितोऽहंकारः अभिमान इति कथ्यते । गतिश्च शरीरंच परिग्रहश्च अभिमानश्च गतिशरीरपरिग्रहाभिमानाः तैः गतिशरीरपरि-

१ जैनेन्द्रोऽयसूत्रं । २ विग्रहादिरातभावः ।

ग्रहाभिमानतः । तसिप्रकरणे 'आद्यादिभ्य उपसंख्यानं, इति तसिः । यदि हि अपादानविवक्षा स्यात् अहीयरुहोरिति प्रतिषेधः स्यात् ।

गतिग्रहणमादौ लक्षणद्वययोगात् ॥ ५ ॥ गतिग्रहणमादौ क्रियते कुतः ? लक्षणद्वययोगात् द्वंद्वे सुबिस अल्पान्तर, इति ॥

ततः शरीरग्रहणं तस्मिन् सति परिग्रहोपपत्तेः ॥ ६ ॥ ततः परं शरीरग्रहणं क्रियते कुतः ? तस्मिन् सति परिग्रहोपपत्तेः । सति शरीरे परिग्रहो ममेदं बुद्धिरुपजायते ।

तद्भावेऽपि केवलिनः परिग्रहेच्छाभाव इति चेन्न देवाधिकारात् ॥७॥ स्यादेतत्-शरीरत्वेऽपि केवलिनः ममेदमिति संकल्पो न विद्यते ततोऽयं हेतुर्व्यभिचार इति तन्न, किं कारणं ? देवाधिकारात् । देवा हि रागादिमंतः-अधिकृताः, तेषामवश्यं सति शरीरे परिग्रहाभिलाषेण भवितव्यमिति नास्ति व्यभिचारः ।

तन्मूलत्वात्तदनंतरमभिमानग्रहणं ॥ ८ ॥ परिग्रहवान् हि लोकेऽभिमानी दृष्टः, ततोऽस्य तदनंतरं ग्रहणं क्रियते । उपर्युपरीत्यनुवर्तते तेनोपर्युपरि देवाना उक्ता गत्यादयो हीना वेदितव्याः । तद्यथा-सौधर्मैशानयोर्देवाः क्रीडादिनिमित्तां गतिं महाविषयत्वेन मुहुर्मुहुर्वृत्त्या वाऽधिकामास्कंदंति न तथोपरि देवाः विषयाभिष्वंगोद्रेकाभावात् । तन्निमित्ता गतिरपि क्रमेण हीयते । शरीरमपि सौधर्मैशानयोर्देवानां सप्तारत्निप्रमाणं । सनत्कुमारमाहेंद्रयोः षडरत्निप्रमाणं । ब्रह्मलोकब्रह्मोत्तरलांतवकापिष्ठेषु पंचारत्निः । शुक्रमहाशुक्रशतारसहस्रारेषु च चतुररत्निः । आनतप्राणतयोरर्धचतुर्थारत्निः । आरणाच्युतयोररत्नित्रितयप्रमाणं । अधोग्रैवेयकेषु अर्धतृतीयारत्निः, मध्यमग्रैवेयकेषु अरत्निद्वयम्, उपरिमग्रैवेयकेषु अनुदिशविमानेषु च अध्यर्धारत्निः, अनुत्तरेष्वरत्निप्रमाणमात्रं । परिग्रहोऽपि विमानपरिवारादिलक्षण उपर्युपरि हीन इत्युक्तं पुरस्तात् । कुतः पुनरुपर्युपरि परिग्रहाभिमानहानिरुच्यते—

प्रतनुकषायत्वादल्पसंक्लेशावधिविशुद्धित्वादवलोकनसंवेगपरिणामानामुत्तरोत्तराधिक्यादभिमानहानिः ॥ ९ ॥ प्रतनुकषायत्वादल्पसंक्लेशो भवति, ततोऽवधिविशुद्धिर्जायते, संक्लेशवशाद्ध्यवधिर्हीयत इत्युक्तं पुरस्तात् । ततोऽवधिविशुद्धेः उपर्युपरि देवाः शारीरमानसदुःखपरीतान् नारकतैर्यग्योनमानुषान् प्रकर्षेणाऽवलोकयन्ति । तन्निमित्तसंवेगपरिणामः संसाराद्भीरुता, उपजायते । ततो दुःखहेतुषु दुरतेषु परिग्रहेषु अभिमानो हीयते । किं च—

विशुद्धपरिणामप्रकर्षनिमित्तत्वाच्च उपर्युपर्युपपत्तेः ॥ १० ॥ इह विशुद्धपरिणामभेदनिमित्तः पुण्यकर्मबंधविकल्पः, तत्पूर्वको देवेषु उपपाद इति उपर्युपरि अभिमानहानिः । कारणसदृशं हि कार्यं दृष्टमिति । तद्यथा—तैर्यग्योनेषु असंज्ञिनः पर्याप्ताः पंचेंद्रियाः संख्येयवर्षायुषः, अल्पशुभपरिणामवशेन पुण्यबंधमनुभूय भवनवासिषु व्यंतरेषु च उत्पद्यंते । त एव संज्ञिनो मिथ्यादृष्टयः, सासादनसम्यग्दृष्टयश्चाऽऽसहस्राराद्रुत्पद्यंते त एव सम्यग्दृष्टयः सौधर्मादिषु अच्युतांतेषु जायंते । असंख्येयवर्षायुषः तिर्यङ्मनुष्याः मिथ्यादृष्टयः सासादनसम्यग्दृष्टयश्च आ ज्योतिष्केभ्य उपजायंते । तापसाश्चोत्कृष्टाः त एव सम्यग्दृष्टयः सौधर्मैशानयोर्जन्मानुभवंति । मनुष्याः संख्येयवर्षायुषः मिथ्यादर्शनाः सासादनसम्यग्दर्शनाश्च भवनवासिप्रभृतिषूपरिमग्रैवेयकांतेषु उपपादमास्कंदंति । परिव्राजकानां देवेषूपपादः आ ब्रह्मलोकात् । आजीवकानां आ सहस्रारात् । तत ऊर्ध्वमन्यलिंगानां नास्त्युपपादः । निर्ग्रंथलिंगधराणामेव-उत्कृष्टतपोनुष्ठानोपचितपुण्यबंधानां । असम्यग्दर्शनानामुपरिमग्रैवेयकांतेषु उपपादः तत ऊर्ध्वं सम्यग्दर्शनज्ञानचरणप्रकर्षोपेतानामेव जन्म नेतरेषां । श्रावकाणां सौधर्मादिष्वच्युतांतेषु जन्म नाधो नोपरीति परिणामविशुद्धिप्रकर्षयोगादेव कल्पस्थानातिशये योगो विरोधः । पुरस्तात्त्रिषु निकायेषु देवानां लेश्याविधिरुक्त इदानीं वैमानिकेषु लेश्याविधिप्रतिपत्त्यर्थमाह—

---

१ जैनेंद्रीयं सूत्रं ।

पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु ॥ २२ ॥

किमर्थं पृथग्लेश्याविधानं क्रियते ननु यत्रैवान्यो लेश्याविधिः तत्रैवेदं वक्तव्यं ? अत उत्तरं पठंति—

पृथग्लेश्याभिधानं लघ्वर्थं ॥ १ ॥ पृथग्लेश्याभिधानं क्रियते लघ्वर्थं तत्र हि पाठे क्रियमाणे वैमानिकानां स्वामिनां भेदेन निर्देशः कर्तव्यः स्यात्। अथ कोऽयं निर्देशः ? पीतपद्मशुक्ललेश्या इति। पीता च पद्मा च शुक्ला च पीतपद्मशुक्लाः ता लेश्या येषां त इमे पीतपद्मशुक्ललेश्या इति। यद्येवं द्वंद्वे पुंवदभावात् निर्देशो नोपपद्यते ? नैष दोषः औत्तरपदिकं ह्रस्वत्वं, यथाकार्यविपरिणामाद्वा सिद्धं। "द्रुतायां तपरकरणे मध्यमाविलंबितयोरुपसंख्यानमि" त्यत्रौत्तरपादिकं ह्रस्वत्वमेवमिहापि वेदितव्यं।

तत्र कस्य का लेश्या इत्यत्रोच्यते—

सौधर्मैशानीयाः पीतलेश्याः ॥ २ ॥ सौधर्मैशानीया देवाः पीतलेश्या द्रष्टव्याः।

सानत्कुमारमाहेंद्रीयाः देवाः पीतपद्मलेश्याः ॥ ३ ॥ सनत्कुमारे माहेंद्रे च देवाः पीतपद्मलेश्याः प्रत्येतव्याः।

ब्रह्मलोकब्रह्मोत्तरलांतवकापिष्ठेषु पद्मलेश्याः ॥ ४ ॥ चतुर्ष्वेषु देवाः पद्मलेश्याः द्रष्टव्याः।

शुक्रमहाशुक्रशतारसहस्रारेषु पद्मशुक्ललेश्याः ॥ ५ ॥ चतुर्ष्वेषु देवाः पद्मशुक्ललेश्या विज्ञेयाः।

आनतादिषु शेषेषु देवाः शुक्ललेश्याः ॥६॥ आनतादिषु शेषेषु देवाः शुक्ललेश्याः प्रत्येतव्याः। तत्राप्यनुदिशानुत्तरेषु परमशुक्ललेश्याः।

शुद्धमिश्रलेश्याविकल्पानुपपत्तिः सूत्रेऽनभिधानादिति चेन्न मिश्रयोरन्यतरग्रहणात् यथालोके ॥७॥ स्यान्मतं-उक्तो लेश्याविकल्पः शुद्धो मिश्रश्च नोपपद्यते, कुतः ? सूत्रेऽनभिधानात् इति तन्न, किंकारण ? मिश्रयोरन्यतरग्रहणात्, यथालोके। तद्यथा—छत्रिणो गच्छंतीत्यछत्रिष्वपि छत्रिव्यपदेशः एवमिहापि मिश्रयोरप्यन्यतरग्रहणेन ग्रहणं भवति इति पीतपद्मलेश्याः पूर्वग्रहणेन परग्रहणेन वा गृह्यंते, एवं पद्मशुक्ललेश्या अपीति नास्ति दोषः।

द्वित्रिशेषग्रहणादग्रहणमिति चेन्नेच्छातः संबंधोपपत्तेः ॥ ८ ॥ स्यान्मतमेवमपि ग्रहणं नोपपद्यते कुतः ? द्वित्रिशेषग्रहणात् सूत्रे ह्येवं पठ्यते द्वयोः पीतलेश्याः, त्रिषु पद्मलेश्याः, शेषेषु शुक्ललेश्या इति तच्चानिष्टमिति, तन्न किं कारणं ? इच्छातः संबंधोपपत्तेः। एवं हि संबंधः क्रियते-द्वयोः कल्पयुगलयोः पीतलेश्याः, सानत्कुमारमाहेंद्रयोः पद्मलेश्याया अविवक्षातः। ब्रह्मलोकादिषु त्रिषु कल्पयुगलेषु पद्मलेश्याः शुक्रमहाशुक्रयोः शुक्ललेश्याया अविक्षातः। शेषेषु शतारादिषु शुक्ललेश्याः पद्मलेश्याया अविवक्षातः, इति नास्त्यार्षविरोधः।

पाठांतराश्रयाद्वा ॥ ९ ॥ अथवा पाठांतरमाश्रियते किं पुनः तत् पीतमिश्रपद्ममिश्रशुक्ललेश्या ? द्विद्विचतुश्चतुःशेषेष्विति, ततो न कश्चिदार्षविरोधः।

निर्देशवर्णपरिणामसंक्रमकर्मलक्षणगतिस्वामित्वसाधनसंख्याक्षेत्रस्पर्शनकालांतरभावाल्पबहुत्वैश्च साध्या लेश्याः ॥ १० ॥ एतैर्निर्देशादिभिः षोडशभिरनुयोगद्वारैः लेश्याः साधयितव्याः। तत्र निर्देशस्तावत्—कृष्णलेश्या नीललेश्या कपोतलेश्या तेजोलेश्या पद्मलेश्या शुक्ललेश्या चेति। वर्णो भ्रमरमयूरकंठकपोततपनीयपद्मशंखवर्णाः यथाक्रमं लेश्याः। वर्णांतरमासां अनंतविकल्पं, एकद्वित्रिचतुःसंख्येयाऽसंख्येयाऽनंतकृष्णगुणयोगात् कृष्णलेश्याऽनंतविकल्पा। एवमितरा अपि। परिणामः—संख्येयलोकप्रदेशप्रमाणेषु असंख्येयगुणेषु कषायोदयस्थानेषु उत्कृष्टमध्यमजघन्यांशकेषु संक्लेशहान्या परिणामात्मनः अशुभास्तिस्रः कृष्णनीलकपोतलेश्याः परिणमंते तथा जघन्यमध्यमोत्कृष्टांशकेषु विशुद्धिवृद्ध्या तिस्रः शुभाः तेजः पद्मशुक्ललेश्याः परिणमंते। तथोत्कृष्टमध्यमजघन्यांशकेषु विशुद्धिहान्या तिस्रःशुभाः परिणमंते। तथा जघन्यमध्यमोत्कृष्टांशेषु संक्लेशविवृद्ध्या तिस्रः, अशुभाः परिणमंते। एकैका चात्र लेश्या असंख्येयलोकप्रदेशप्रमाण

परिणामाऽध्यवसायस्थाना। संक्रमः, कृष्णलेश्यासंक्लिश्यमानो नान्यां लेश्यां संक्रामति, कृष्णलेश्ययैव षट्स्थानपतितेन संक्रमेण वर्धते तद्यथा—कृष्णलेश्याया यत्प्राथमिकं संक्लेशस्थानं ततः स्थानादनंतभागाभ्यधिका वृद्धिरसंख्येयभागाऽभ्यधिका वा संख्येयभागाभ्यधिका वा संख्येयगुणाभ्यधिका वा असंख्येयगुणाभ्यधिका वा अनंतगुणाभ्यधिका वा। तथा हीयमानापि लेश्यांतरसंक्रम न करोति कृष्णलेश्ययैव षट्स्थाननिपतितसंक्रमेण हीयते तद्यथा—कृष्णलेश्याया यदुत्कृष्टसंक्लेशस्थानं ततः स्थानादनंतभागहान्या असंख्येयभागहान्या संख्येयभागहान्या वा संख्येयगुणहान्या वा असंख्येयगुणहान्या वा अनंतगुणहान्या वा, यदा कृष्णलेश्या अनंतगुणहान्या हीयते तदा नीललेश्याया उत्कृष्टं स्थानं संक्रामति तदैव कृष्णलेश्यासंक्लिश्यमानस्य एको विकल्पो वृद्धौ स्वस्थानसंक्रमो नाम। हानौ पुनर्द्वौ विकल्पौ स्वस्थानसंक्रमः परस्थानसंक्रमश्चेति। एवमितरास्वपि लेश्यासु वृद्धिहान्योः संक्रमविकल्पविधिर्वेदितव्यः। अयं तु विशेषः-शुक्ललेश्यस्य विशुद्धिवृद्धौ लेश्यांतरसंक्रमो नास्ति स्वस्थानसंक्रमोस्ति। संक्लेशवृद्धौ विशुद्धिहानौ तु स्वस्थानसंक्रमोप्यस्ति परस्थानसंक्रमोपि। मध्यलेश्यानां हानौ वृद्धौ च उभावपि संक्रमौ स्तः। अनंतभागपरिवृद्धिः कया परिवृद्ध्या ? सर्वजीवैरनंतभागपरिवृद्ध्या। असंख्येयभागपरिवृद्धिः कया परिवृद्ध्या ? असंख्येयलोकभागपरिवृद्ध्या। संख्येयभागपरिवृद्धिः कया परिवृद्ध्या ? उत्कृष्टसंख्येयभागपरिवृद्ध्या। संख्येयगुणवृद्धिः कया परिवृद्ध्या ? उत्कृष्टसंख्येयगुणपरिवृद्ध्या। असंख्येयगुणपरिवृद्धिः कया परिवृद्ध्या ? असंख्येयलोकगुणपरिवृद्ध्या। अनंतगुणपरिवृद्धिः कया परिवृद्ध्या ? सर्वजीवाऽनंतगुणपरिवृद्ध्या। लेश्याकर्म उच्यते—जंबूफलभक्षणं निदर्शनं कृत्वा, स्कंधविटपशाखानुशाखा पिंडिकाछेदनपूर्वकं फलभक्षणं स्वयं पतितफलभक्षणं चोद्दिश्य कृष्णलेश्यादयः प्रवर्तंते। अथ लक्षणमुच्यते- " अनुनयानभ्युपगमोपदेशाग्रहणवैरामोचनाऽतिचंडत्वदुर्मुखत्वनिरनुकंपताक्लेशनमारणापरितोषणादि कृष्णलेश्यालक्षणं,। 'आलस्यविज्ञानहानिकार्यानिष्ठापनभीरुताविषयातिगृद्धिमायातृष्णातिमानवंचनाऽनृतभाषिता चापलातिलुब्धत्वादि नीललेश्यालक्षणं,। 'मात्सर्यपैशून्यपरपरिभवाऽऽत्मप्रशंसापरपरिवादवृद्धिहान्यगणनाऽऽत्मीयजीवितानिराशताप्रशस्यमानधनदानयुद्धमरणोद्यमादि कपोतलेश्यालक्षणं,। दृढमित्रतासानुक्रोशत्व सत्यवाददानशीलात्मीयकार्यसंपादनपटुविज्ञानयोगसर्वधर्मसमयदर्शनादि तेजोलेश्या लक्षणं। ' सत्यवाक्यक्षमोपेतपंडितसात्विकदानविशारदचतुरर्जुगुरुदेवतापूजाकरणनिरतत्वादि पद्मलेश्यालक्षणं,। 'वैरागमोहविरहारिपुदोषाग्रहणानिदानवर्जनसर्वसावद्यकार्यारंभौदासीन्यश्रेयोमार्गानुष्ठानादि शुक्ललेश्यालक्षणं,। गतिरुच्यते--कपोतलेश्यापरिणत आत्मा कां गतिं गच्छतीति षड्विंशतिविकल्पेषु लेश्यांशकेषु आयुषो ग्रहणहेतवः अष्टावंशकाः मध्यमाः। कुतः पुनरेतदनुगम्यते, इति चेत् अष्टाभिः--अपकर्षैः मध्यमेन परिणामेनाऽऽयुर्बध्नाति इत्यार्षोपदेशात्। शेषा अष्टादशलेश्यांशकाः गतिविशेषहेतवः पुण्यपापविशेषोपचयहेतुत्वात्तेषां तदपेक्षो मध्यमपरिणामः तद्योग्यायुर्बंधहेतुर्भवति तत आयुर्नामकर्मोदयापादितो गतिविशेषो लेश्यावशादवसेयः। तद्यथा--उत्कृष्टशुक्ललेश्यांशकपरिणामादात्मानः कालं कृत्वा सर्वार्थसिद्धं यांति। जघन्यशुक्ललेश्यांशकपरिणामात् शुक्रमहाशुक्रशतारसहस्रारान् यांति। मध्यमशुक्ललेश्यांशकपरिणामात् आनतादिषु प्राक् सर्वार्थसिद्धादुत्पद्यंते उत्कृष्टपद्मलेश्यांशकपरिणामात् सहस्रारमुपगच्छंति जघन्यपद्मलेश्यांशकपरिणामात् सानत्कुमारमाहेंद्रौ यांति मध्यमपद्मलेश्यांशकपरिणामात् ब्रह्मलोकादिषु आ शतारादुपपद्यंते। उत्कृष्टतेजोलेश्यांशकपरिणामात् सानत्कुमारमाहेंद्रकल्पांत्यचक्रेंद्रकश्रेणिविमानान्यास्कंदंति। जघन्यतेजोलेश्यांशकपरिणामात् सौधर्मैशानप्रथमेंद्रकश्रेणि विमानानि यांति। मध्यमतेजोलेश्यांशकपरिणामात् चंद्रादींद्रकश्रेणिविमानाद् आ बलभद्रेंद्रकश्रेणिविमानेभ्य उपपद्यंते। उत्कृष्टकृष्णलेश्यांशकपरिणामात् अप्रतिष्ठानमधितिष्ठंति। जघन्यकृष्णलेश्यांशकपरिणामात् पंचम्यामध इंद्रकनरकं तमिश्रसंज्ञकं संश्रयंते। मध्यमकृष्णलेश्यांशकपरिणामात् हिमेंद्रकादिषु आ महारौरवादुपजायंते। उत्कृष्टनीललेश्यांशकपरिणामात् पंचम्यां मध्येंद्रकमवाप्नुवंति। जघन्यनीललेश्यांशकपरिणामात् वालुकायां तप्तेंद्रकं यांति। मध्यमनीललेश्यांशकपरिणामात् वालुकायां त्रस्तेंद्रकादिषु झषेंद्रकांतेषु उत्पद्यंते। उत्कृष्टकपोतलेश्यांशकपरिणामात् वालुकाप्रभायां संप्रज्वलितनरकं यांति जघन्यकपोतलेश्यांशकपरिणामात् रत्नप्रभायां सीमंतकं यांति। मध्यमकपोतलेश्यांशकपरिणामात् रौरुकादिषु आ संज्वलितेंद्रकादुपप-

यंते । मध्यमकृष्णनीलकपोततेजोलेश्यांशकपरिणामात् भवनवासिव्यंतरज्योतिष्कपृथिव्यंबुवनस्पतीन् व्रजति । मध्यमकृष्णनीलकपोतलेश्यांशपरिणामात् तेजोवायुकायिकेषु जायंते । देवनारकाः स्वलेश्याभिः तिर्यङ्मनुष्यायुर्योग्यानां [illegible] । [illegible] । [illegible]शर्कराप्रभयोः नारकाः कपोतलेश्याः । वालुका-प्रभायां नीलकपोतलेश्याः । पंकप्रभायां नीललेश्याः । धूमप्रभायां नीलकृष्णलेश्याः । तमःप्रभायां कृष्णलेश्याः । महातमःप्रभायां परमकृष्णलेश्याः । [illegible] । [illegible]कृष्णनीलकपोतलेश्याः । एकद्वित्रिच-तुरिंद्रियाः संक्लिष्टलेश्याः । [illegible] संक्लिष्टचतुर्लेश्याः । संज्ञिपंचेंद्रियतिरश्चां मनुष्याणां च मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यङ्मिथ्या[illegible]सम्यग्दृष्टीनां षडपि लेश्याः । संयतासंयतप्रमत्तसंयताऽ-प्रमत्तसंयतानां तिस्रः शुभाः । अपूर्वकरणादीनां सयोगकेवल्यंतानां शुक्लेश्यैव । अयोगकेवलिनोऽलेश्याः । सौधर्मैशानीयाः तेजोलेश्याः । सानत्कुमारमाहेंद्रीया[illegible] पद्मलेश्याः । ब्रह्मब्रह्मोत्तरलांतवकापिष्टेषु देवाः पद्मले-श्याः । शुक्रमहाशुक्रशतारसहस्रारेषु पद्मशुक्ललेश्याः । आनतादिष्वासर्वार्थसिद्धात् शुक्ललेश्याः । सर्वार्थसिद्धाः पर-मशुक्ललेश्याः । साधनमुच्यते—द्रव्यलेश्या नामकर्मोदयनिमित्ताः । भावलेश्याः कषायोदयक्षयोपशमोपशमप्रक्षय-कृताः । संख्या कथ्यते — कृष्णनीलकापोतलेश्या एकशो द्रव्यप्रमाणेनाऽनंताऽनंताः । अनंतानंताभिरुत्सर्पि-ण्यवसर्पिणीभिर्नापह्रियंते कालेन । क्षेत्रेणाऽनंतानंतलोकाः । तेजोलेश्याः । द्रव्यप्रमाणेन ज्योतिर्देवाः, साधिकाः पद्मलेश्याः । द्रव्यप्रमाणेन संज्ञिपंचेंद्रियतिर्यग्योनीनां संख्येयभागाः शुक्लेश्याः पल्योपमस्याऽसंख्येयभागाः । क्षेत्रमुच्यते—कृष्णनीलकापोतलेश्या एकशः स्व[illegible]समुद्घातोपपादैः सर्वलोके वर्तंते । तेजःपद्मलेश्या एकशः स्वस्थानसमुद्घातोपपादैः [illegible] संख्येयभागे [illegible] स्वस्थानोपपादाभ्यां लोकस्यासंख्येय-भागे समुद्घातेन लोकस्यासंख्ये[illegible] [illegible] भागेषु सर्वलोके वा । स्पर्शनमुच्यते—कृष्णनीलकापो-तलेश्यैः स्वस्थानसमुद्घातोपपादैः सर्वलोकः स्पृष्टः । तेजोलेश्यैः स्वस्थानेन लोकस्यासंख्येयभागः, अष्टौ चतु-र्दशभागा वा देशोनाः । समुद्घातेन लोकस्याऽसंख्येयभागः—अष्टौ नव चतुर्दशभागा वा देशोनाः । उपपा-देन लोकस्यासंख्येयभागाः अध्यर्धचतुर्दशभागा वा देशोनाः । [illegible] स्वस्थानसमुद्घाताभ्यां लोकस्या-संख्येयभागः अष्टौ चतुर्दशभागा वा देशोनाः । उपपादेन लोकस्यासंख्येयभागः पंचचतुर्दशभागा वा देशो-नाः । शुक्लेश्यैः स्वस्थानोपपादाभ्यां लोकस्यासंख्येयभागः स्पृष्टः षट्चतुर्दश भागा वा देशोनाः । समुद्घा-तेन लोकस्याऽसंख्येयभागः षट्चतुर्दशभागा वा देशोनाः, असंख्येया वा भागाः सर्वलोको वा । काल उच्यते—कृष्णनीलकापोतलेश्यानां एकशः [illegible]ऽन्तर्मुहूर्तः, उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि साधि-कानि सप्तदशसागरोपमाणि साधिकानि सप्त सागरोपमाणि साधिकानि । तेजःपद्मशुक्ललेश्यानामेकशः कालः जघन्येन; अन्तर्मुहूर्तः, उत्कर्षेण द्वे सागरोपमे साधिके अष्टादश सागरोपमाणि साधिकानि त्रयस्त्रिं-शत्सागरोपमाणि साधिकानि । अन्तरमुच्यते — कृष्णनीलकापोतलेश्यानामेकशः अंतरं जघन्येनांतर्मु-हूर्तः, उत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणि साधिकानि । तेजःपद्मशुक्ललेश्यानामेकशः, अंतरं जघन्येनांऽतर्मु-हूर्तः, उत्कर्षेणानंतः कालोऽसंख्येयाः पुद्गलपरिवर्ताः । भावो व्याख्यायते षडपि लेश्या औदयिकभावाः शरीरनामसोहनीयकर्मोदयापादितत्वात् । अल्पबहुत्वं वक्ष्यते—सर्वतः स्तोकाः शुक्लेश्याः पद्मलेश्या असं-ख्येयगुणाः [illegible]लेश्या [illegible]गुणाः कपोतलेश्या अनंतगुणाः नीललेश्या विशेषाधिकाः कृष्णलेश्या विशे-षाधिकाः । [illegible] न ज्ञायते के कल्पाः ? इत्यत्रोच्यते—

प्राग्ग्रैवेयकेभ्यः कल्पाः ॥२३॥

इदं न ज्ञायते कुत आरभ्य कल्पा भवंति इति सौधर्मादिग्रहणमनुवर्तते तेनायमर्थो लभ्यते सौधर्मादयः कल्पाः इति । यद्येवं तदनंतरमेवेदं वक्तव्यं ? अत उत्तरं पठति—

सौधर्मादनंतरं कल्पाभिधाने व्यवधानप्रसंगः ॥ १ ॥ यदि सौधर्मादनंतरं कल्पाभिधानं क्रियते व्यवधानं प्रसज्येत । कस्य ? स्थितिप्रभावादिसूत्रत्रयस्य । सति च व्यवधाने तेन विधीयमानोऽर्थः

१ नायं पाठो ग. पुस्तके ।

कल्पेष्वेव स्यात् अनंतरत्वाद् ग्रैवेयकादिषु न स्यात् व्यवहितत्वात् । इह पुनः पाठे सति स्थित्यादिविशेष-विधिरविशेषेण सिद्धो भवति । अथ के कल्पातीताः ?

कल्पातीतसिद्धिः परिशेषात् ॥ २ ॥ कल्पातीतानां सिद्धिर्भवति । कुतः ? परिशेषात् परिशिष्टा अमी ग्रैवेयकादयोऽनुत्तरांताः ।

भवनवास्याद्यतिप्रसंग इति चेत् उपर्युपरीत्यभिसंबंधात् ॥ ३ ॥ स्यादेतत् परिशिष्टा यदि कल्पातीताः भवनवास्यादीनामपि वैमानिकत्वमपि प्रसज्येत इति, किंकारणं ? उपर्युपरीत्यभिसंबंधात् । उपर्युपरि वैमानिका नाधस्तात् इति, तेन कल्पातीता अहमिंद्रा एव । कथं पुनस्तेषामहमिंद्रत्वं ? सामानिकादिविकल्पाभावात् ।

चतुर्णिकायोपदेशानुपपत्तिः षट्सप्तसंभवादिति चेन्न तत्रैवांतर्भावात् लौकांतिकवत् ॥४॥ स्यान्मतं चत्वारो देवनिकाया इत्युपदेशो नोपपद्यते इति । कुतः ? षट्सप्तसंभवात् । षण्णिकायाः संभवंति भवनपातालव्यंतरज्योतिष्ककल्पविमानाधिष्ठानात् । भवनवासिनो दशविधा उक्ताः । पातालवासिनो लवणोदादिसमुद्रावासाः सुस्थितप्रभासादयः । व्यंतरा अनावृतप्रियदर्शनादयः जंबूद्वीपाधिपतयः । ज्योतिष्काः पंचविधा व्याख्याताः । कल्पाः पटला द्वादश वर्णिताः । विमानानि ग्रैवेयकादीनि उपदिष्टानि । अथवा सप्त देवनिकायाः त एवाऽऽकाशोपपन्नैः सह, आकाशोपपन्नाश्च द्वादशविधाः पांशुतापि-लवणतापि-तपनतापि-भवनतापि-सोमकायिक-यमकायिक-वरुणकायिक-वैश्रवणकायिक-पितृकायिक-अनलकायिक-रिष्टक-अरिष्ट-संभवा इति तन्न किंकारणं ? तत्रैवांतर्भावात्, लौकांतिकवत् । यथा लौकांतिकानां कल्पवासिष्वंतर्भावात् न निकायांतरत्वं । तथा पातालवासिनां आकाशोपपन्नानां व्यंतरेष्वंतर्भावात्, कल्पवासिनां च वैमानिकत्वात् न निकायांतरत्वं । इति नास्ति चातुर्विध्यहानिः । आह य एते दृष्टांतत्वेनोपात्ताः लौकांतिकास्ते कस्मिन् कल्पे भवंतीत्यत्रोच्यते ।

ब्रह्मलोकालया लौकांतिकाः ॥ २४ ॥

एत्य तस्मिल्लीयंत इत्यालयः ॥ १ ॥ यत्र प्राणिन एत्य लीयंते स आलयो निवास इत्यर्थः; ब्रह्मलोक आलयो येषां ते ब्रह्मलोकालयाः ।

सर्वब्रह्मलोकदेवानां लौकांतिकत्वप्रसंग इति चेन्न लोकांतोपश्लेषात् ॥ २ ॥ स्यादेतद्ब्रह्मलोकालया इत्यविशेषाभिधानात्तेषां सर्वेषां लौकांतिकत्वं प्रसज्येत इति ? तन्न किंकारणं ? लोकांतोपश्लेषात् ब्रह्मलोकस्यांतो लोकांतः तस्मिन् भवाः लौकांतिकाः । अथवा जातिजरामरणाकीर्णो लोकः तस्यांतो लोकांतः तत्प्रयोजना लौकांतिकाः, ते हि परीतसंसाराः ततश्च्युता एकं गर्भवासं--अवाप्य परिनिर्वांति । तेषां सामान्येनोपदिष्टानां भेदप्रदर्शनार्थमिदमुच्यते—

सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधारिष्टाश्च ॥२५॥

क इमे सारस्वतादयः ?

पूर्वोत्तरादिषु दिक्षु यथाक्रमं सारस्वतादयः ॥ १ ॥ पूर्वोत्तरादिषु अष्टासु अपि दिक्षु यथाक्रममेते सारस्वतादयो देवगणा वेदितव्याः । तद्यथा अरुणसमुद्रभवः मूले संख्येययोजनविस्तारः तमस्कंधः, समुद्रवद्वलयाकारः अतितीव्रांधकारपरिणामः स ऊर्ध्वं क्रमवृद्ध्या गच्छन् मध्येऽल्पे च संख्येययोजनबाहुल्यः अरिष्टविमानस्याधोभागे समंततः कुक्कुटकुटीवदवस्थितः तस्योपरि तमोराजयोऽष्टावुत्पत्य अरिष्टेंद्रकविमानसंप्रणिधयः । तत्र चतसृष्वपि दिक्षु द्वंद्वं गताः तिर्यग्लोकांतात्, तदनंतरेषु सारस्वतादयो देवाः । तत्र पूर्वोत्तरकोणे सारस्वतविमानं, पूर्वस्यां दिशि आदित्यविमानं, पूर्वदक्षिणस्यां वन्हिविमानं, दक्षिणस्यामरुणविमानं,

१ ज्ञेया इति ग, पुस्तके पाठः

दक्षिणापरकोणे गर्दतोयविमानं, अपरस्यां तुषितविमानं, अपरोत्तरकोणेऽव्याबाधविमानं, उत्तरस्यामरिष्टविमानं।

चशब्दसमुच्चिताः तदंतरालवर्तिनः ॥२॥ तेषामतरालेषु चशब्दसमुच्चिताः द्वद्ववृत्त्या देवगणाः प्रत्येतव्याः । तद्यथा—

अग्न्याभसूर्याभचंद्राभसत्याभश्रेयस्करक्षेमंकरवृषभेष्टकामवरनिर्माणरजोदिगंतरक्षितात्मरक्षितसर्वरक्षितमरुद्वस्वश्वविश्वाख्याः ॥ ३ ॥

एते अग्न्याभादयः षोडश देवगणाः लौकांतिकभेदाः कथ्यंते। सारस्वतादित्यांतरे अग्न्याभसूर्याभाः, आदित्यवह्न्यंतरे चंद्राभसत्याभाः, वन्ह्यरुणांतराले श्रेयस्करक्षेमंकराः, अरुणगर्दतोयांतराले वृषभेष्टकामचराः[1], गर्दतोयतुषितमध्ये निर्माणरजोदिगंतरक्षिताः, तुषिताव्याबाधमध्ये आत्मरक्षितसर्वरक्षिताः, अव्याबाधारिष्टांतराले मरुद्वसवः, अरिष्टसारस्वतांतरे अश्वविश्वाः, तान्येतानि विमानानि तन्निवासिनां तद्योगात् तत्सारस्वताः सप्तशतसंख्याः, आदित्याश्च सप्तशतगणनाः, वह्नयः सप्तसहस्राणि नवोत्तराणि, तुषिताश्च तावंत एव, अव्याबाधा एकादशसहस्राणि एकादशानि, आरिष्टा अपि तावंत एव । चशब्दसमुच्चितानां संख्येत्युच्यते-अग्न्याभे देवाः सप्तसहस्राणि सप्ताधिकानि । सूर्याभे सुरा नवसहस्राणि नवाधिकानि । चंद्राभे सुराः एकादशसहस्राणि एकादशानि। सत्याभे विबुधाः त्रयोदशसहस्राणि त्रयोदशानि । श्रेयस्करे देवाः पंचदशसहस्राणि पंचदशाधिकानि । क्षेमंकरे अमराः सप्तदशसहस्राणि सप्तदशानि । वृषभेष्टे सुराः एकान्नविंशतिः सहस्राणि एकान्नविंशतिश्च । कामवरेऽमराः एकविंशतिःसहस्राणि एकविंशतिश्च । निर्माणरजसि देवाः त्रयोविंशतिःसहस्राणि त्रयोविंशतिश्च । दिगंतरक्षिते देवाः पंचविंशतिःसहस्राणि पंचविंशतिश्च । आत्मरक्षिते सुराः सप्तविंशतिःसहस्राणि सप्तविंशतिश्च । सर्वरक्षिते विबुधाः एकान्नत्रिंशत्सहस्राणि एकान्नत्रिंशच्च । मरुति देवाः एकत्रिंशत्सहस्राणि एकत्रिंशच्च। वसुनि सुराः त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्च । अश्वे सुराः पंचत्रिंशत्सहस्राणि पंचत्रिंशच्च । विश्वे देवाः सप्तत्रिंशत्सहस्राणि सप्तत्रिंशच्च त एते चतुर्विंशतिः लौकांतिकगणाः समुदिताः चत्वारिंशत्सहस्राणि अष्टसप्ततिश्च शतानि षडुत्तराणि । सर्वे ते स्वतन्त्राः हीनाधिकत्वाभावात्, विषयरतिविरहाद्देवर्षयः, तत इतरेषां देवानामर्चनीयाः चतुर्दशपूर्वधराः सततं ज्ञानभावनावहितमनसः संसारान्नित्यमुद्विग्नाः अनित्याशरणाद्यनुप्रेक्षासमाहितमानसाः अतिविशुद्धसम्यग्दर्शनाः तीर्थकरनिष्क्रमणप्रतिबोधनपराः । नामकर्मणोऽसंख्येयोत्तरोत्तरप्रकृतित्वात् संसारिणां जीवानां संज्ञाः शुभाशुभनामकर्मोदयापादिताः वेदितव्याः । एवमयं कार्मणशरीरप्रणालिकया आश्रवापेक्षयापादितसुखदुःखानां भव्याभव्यभेदाहितद्वैविध्यानां प्राणिनां संसारोऽनादिः; अपर्यवसानः अन्येषां मोहोपशमप्रध्वंसनं प्रत्यादृतानां अप्रतिपतितसम्यग्दर्शनानां परीतविषयः सप्ताष्टानि भवग्रहणानि उत्कर्षेण वर्तते । जघन्येन द्वित्राणि अनुबंध्याच्छिद्यते । प्रतिपतितसम्यक्त्वानां तु भाज्यं । आह--प्रतिपतितसम्यक्त्वेषु किमविशेष एव आहोस्वित् कश्चिदस्ति प्रतिविशेषः ? इत्यत्रोच्यते ॥

विजयादिषु द्विचरमाः ॥२६॥

विजयादिषु इति ।

आदिशब्दः प्रकारार्थः ॥ १ ॥ अयं आदिशब्दः प्रकारार्थो द्रष्टव्यः तेन विजयवैजयंतजयंतापराजितानुदिशविमानानामिष्टानां ग्रहणं सिद्धं भवति । कः पुनरत्र प्रकारार्थः ? अहमिंद्रत्वे सति सम्यग्दृष्ट्युपपादः । सर्वार्थसिद्धग्रहणप्रसंग इति चेन्न तेषां परमोत्कृष्टत्वात् । सर्वार्थसिद्ध इत्यन्वर्थनिर्देशात् एकचरमत्वसिद्धेश्च ।

द्विचरमत्वं मनुष्यदेहद्वयापेक्षं ॥ २ ॥ चरमशब्द उक्तार्थः द्वौ चरमौ देहौ येषां ते द्विचरमाः तेषां भावो द्विचरमत्वं । एतन्मनुष्यदेहद्वयापेक्षमवगंतव्यं । विजयादिभ्यः च्युताः अप्रतिपतितसम्यक्त्वा

---

१ कामवरा इति ग पुस्तके पाठः ।

मनुष्येषूत्पद्य संयममाराध्य पुनर्विजयादिषूत्पद्य च्युताः मनुष्यभवमवाप्य सिध्यंति इति द्विचरमदेहत्वं । इतरथा हि द्वौ मनुष्यभवौ, एको देवभवश्चेति त्रिचरमत्वं स्यात् न द्विचरमत्व । कुतः पुनः मनुष्यदेहस्य चरमत्वमिति चेदुच्यते —

मनुष्यदेहस्य चरमत्वं तेनैव मुक्तिपरिणामोपपत्तेः ॥ ३ ॥ यतो मनुष्यभवमवाप्य देवनारकतैर्यग्योना सिध्यंति न तेभ्य एवेति मनुष्यदेहस्य चरमत्वं ।

एकस्य चरमत्वमिति चेन्न औपचारिकत्वात् ॥ ४ ॥ स्यान्मतं एकस्य भवस्य चरमत्वं, अंतत्वात् न द्वयोस्ततो द्विचरमत्वमयुक्तं इति तन्न, किं कारण ? औपचारिकत्वात् येन देहेन साक्षान्मोक्षोऽवाप्यत स मुख्यश्चरमः, तस्य प्रत्यासन्नो मनुष्यभवः तत्प्रत्यासत्तेश्चरम इत्युपचर्यते । देवभवेन व्यवहितत्वात् प्रत्यासत्त्यभाव इति चेन्न 'येन नाव्यवधानं तेन व्यवहितेपि वचनप्राण्यादिति' ।

आर्षविरोध इति चेन्न प्रश्नविशेषापेक्षत्वात् ॥ ५ ॥ स्यान्मतं विजयादिषु द्विचरमत्वमार्षे विरोधि । कुतः, त्रिचरमत्वात् एव ह्यार्षे उक्तमंतरविधाने—अनुदिशानुत्तरविजयवैजयंतजयतापराजितविमानवासिनां, अंतरं जघन्येन वर्षपृथक्त्वं, उत्कर्षेण द्वे सागरोपमे सातिरेके इति । तस्यायमर्थः तेभ्यः च्युताः मनुष्येषूत्पद्य अष्टवर्षान् संयममाराध्य अंतर्मुहूर्तेन विजयादिषु भवमाप्नुवंति इति जघन्येन वर्षपृथक्त्वं । केचित्तेभ्यश्च्युताः मनुष्येषूत्पद्य संयममवाप्य सौधर्मैशानकल्पयोः जनित्वा पुनरपि मनुष्यभवमनुभूय विजयादिषु जायंते इति उत्कर्षेण द्वे सागरोपमे साधिके इति ततो मनुष्यभवत्रयोपपत्तेर्द्विचरममुक्तमिति तन्न, किं कारणं ? प्रश्नविशेषापेक्षत्वात् । एवं हि व्याख्याप्रज्ञप्तिदंडकेषूक्तं विजयादिषु देवा मनुष्यभवमास्कंदतः कियतीर्गत्यागतीः विजयादिषु कुर्वंति इति गौतमप्रश्ने भगवतोक्त जघन्येनैको भवः आगत्या उत्कर्षेण गत्यागतिभ्यां द्वौ भवौ, सर्वार्थसिद्धौ च्युताः मनुष्येषूत्पद्य तेनैव भवेन सिध्यंतीति न लौकांतिकवदेकभविका एवेति विजयादिषु द्विचरमत्वं नार्षविरोधि कल्पांतरोत्पत्त्यनपेक्षत्वात् प्रश्नस्येति । आह उक्तं भवति जीवस्य औदयिकेषु भविषु तैर्यग्योनिगतिरौदयिकी, स्थितौ चोक्त तिर्यग्योनिजानां चेति । आश्रवविधाने च वक्ष्यते माया तैर्यग्योनस्येति । तद्वक्तव्यं के तिर्यग्योनय इति अत्रोच्यते ।

औपपादिकमनुष्येभ्यः शेषास्तिर्यग्योनयः ।२७।

अयुक्तोऽयं निर्देशः औपपादिकमनुष्येभ्य इति, कुतः ? मनुष्यशब्दस्य अल्पाच्तरत्वात् पूर्वनिपातः प्राप्नोति ? अभ्यर्हितत्वान्नैष दोषः औपपादिकस्य पूर्वनिपातः । कथमभ्यर्हितत्व ? देवानामौपपादिकेष्वंतर्भावात् , देवाः स्थितिप्रभावादिभिरभ्यर्हिता इति व्याख्याताः ।

उक्तेभ्य औपपादिकमनुष्येभ्योऽन्ये शेषाः ॥ १ ॥ औपपादिका उक्ताः । देवनारकमनुष्य व्याख्याताः प्राङ् मानुषोत्तरान्मनुष्या इति । तेभ्योऽन्ये ये ते शेषाः तिर्यग्योनयः ।

सिद्धप्रसंग इति चेन्न सांसारिकप्रकरणात् ॥२॥ स्यान्मतं औपपादिकमनुष्येभ्योऽन्यत्वं सिद्धानामप्यस्ति इति तिर्यग्योनित्वप्रसंग इति तन्न, किं कारणं ? सांसारिकप्रकरणात् । संसारिणः प्रकृताः तेन तेभ्योन्ये संसारिण एव तिर्यग्योनयो न सिद्धाः । अथ केयं तिर्यग्योनिः ?

तिरोभावात्तैर्यग्योनिः ॥ ३ ॥ तिरोभावोन्यग्भावः उपवाह्यत्वमित्यर्थः ततः कर्मोदयापादितभावा तिर्यग्योनिरित्याख्यायते । तिरश्चि योनिर्येषां ते तिर्यग्योनयः ते च त्रसस्थावरादिविकल्पा व्याख्याताः ।

देवादिवत्तदाधारनिर्देश इति चेन्न सर्वलोकव्यापित्वात् ॥ ४ ॥ स्यान्मतं यथा देवाना मूर्ध्वलोकः, मनुष्याणां तिर्यग्लोकः, नारकाणामधोलोक आधारविशेष उक्तः तथा तिरश्चामपि आधारो निर्देष्टव्य इति तन्न, किं कारणं सर्वलोकव्यापित्वात् । सर्वलोकव्यापित्वं कथमेषामिति चेदुच्यते—

सूक्ष्मबादरभेदात् ॥ ५ ॥ तिर्यंचो द्विधा सूक्ष्मा बादराश्चेति । सूक्ष्मनामकर्मोदयापादितभावाः तत्र

सूक्ष्माः पृथिव्यप्तेजोवायुवनस्पतयः सर्वलोकव्यापिनः । बादराः पृथिव्यप्तेजोवायुवनस्पतयः विकलेंद्रियाः, पचेंद्रियाश्च क्वचिदेव वर्तंते न सर्वत्र ।

द्वितीयेऽध्याये तन्निर्देश इति चेन्न कृत्स्नलोकभावात् ॥६॥ स्यादेतद्द्वितीयेऽध्याये एषां तिरश्चां निर्देशः कर्तव्यः नोत्रेति ? तन्न किं कारणं ? कृत्स्नलोकभावात् अयमेव तन्निर्देशो युक्तः सर्वांल्लोकानुक्त्वा तदाधारनिर्देशः सुगम इति ।

शेषसंप्रतिपत्तेश्च ॥ ७ ॥ नारकादीन् सर्वानुक्त्वा तेभ्योऽन्ये शेषास्तिर्यंच इति शेषसंप्रतिपत्तिश्च भवति इति इहैव तन्निर्देशो युक्तः । स्थितिरिदानीं वक्तव्या सा नारकाणां मनुष्याणां तिरश्चां चोक्ता देवानामुच्यते । तत्र चादौ निर्दिष्टानां भवनवासिनां स्थितिप्रतिपादनार्थमाह—

स्थितिरसुरनागसुपर्णद्वीपशेषाणां सागरोपमत्रिपल्योपमार्धहीनमिता ॥२८॥

असुरादीनां सागरोपमादिभिरभिसंबंधो यथाक्रमं ॥ १ ॥ असुरादीनां सागरोपमादिभिर्यथाक्रममभिसंबंधो वेदितव्य इयं स्थितिरुत्कृष्टा जघन्याप्युत्तरत्र वक्ष्यते। तद्यथा असुराणां सागरोपमा स्थितिः, नागानां त्रीणि पल्योपमानि, सुपर्णानामर्धतृतीयानि द्वीपानां द्वे, शेषाणां षण्णां अध्यर्धपल्योपमं । आदिदेवनिकायस्थित्यभिधानानंतरं व्यंतरज्योतिष्कस्थितिवचने क्रमप्राप्ते सति तदुल्लंघ्य वैमानिकानां स्थितिरुच्यते कुतः ? तयोरुत्तरत्र लघुनोपायेन स्थितिवचनात् । तेषु च आदावुद्दिष्टयोः स्थितिविधानार्थमाह ।

सौधर्मैशानयोः सागरोपमेऽधिके ॥२९॥

द्विवचननिर्देशाद्द्वित्वमिति ॥१॥ सागरोपमे इति द्विवचननिर्देशाद् द्वे सागरोपमे इति गम्यते ।

अधिके इत्यधिकार आ सहस्रारात् ॥ २ ॥ अधिके इत्ययं अधिकारो द्रष्टव्यः । आ कुतः ? आ सहस्रारात् । तेन सौधर्मैशानयोर्देवानामुत्कृष्टा स्थितिः द्वे सागरोपमे सातिरेके प्रत्येतव्ये । उत्तरयोः स्थितिविशेषप्रतिपत्त्यर्थमाह ।

सानत्कुमारमाहेंद्रयोः सप्त ॥३०॥

अधिकारात्सागराधिकसंप्रत्ययः ॥ १ ॥ सागरग्रहणं, अधिकग्रहणं च अनुवर्तते तेनायमर्थो लभ्यते सानत्कुमारमाहेंद्रयोर्देवानामुत्कृष्टा स्थितिः सप्तसागरोपमाणि साधिकानि इति । ब्रह्मलोकादिष्वच्युतांतेषु स्थितिविशेषप्रतिपत्त्यर्थमाह ।

त्रिसप्तनवैकादशत्रयोदशपंचदशभिरधिकानि तु ॥ ३१ ॥

सप्तग्रहणस्य त्र्यादिभिरभिसंबंधः ॥ १ ॥ द्वयोर्द्वयोः सप्तग्रहणं प्रकृतं तस्येह निर्दिष्टैः त्र्यादिभिरभिसंबंधो द्रष्टव्यः । सप्तत्रिभिरधिकानि सप्तसप्तभिरधिकानीत्यादि ।

तुशब्दो विशेषणार्थः ॥ २ ॥ तुशब्दो विशेषणार्थो द्रष्टव्यः । किं विशिनष्टि ? अधिकशब्दोनुवर्तमानः चतुर्भिरिह संबध्यते नोत्तराभ्यामित्ययमर्थो विशेष्यते । तेनायमर्थो भवति ब्रह्मलोकब्रह्मोत्तरयोः दशसागरोपमाणि साधिकानि । लांतवकापिष्ठयोश्चतुर्दशसागरोपमाणि साधिकानि शुक्रमहाशुक्रयोः षोडशसागरोपमाणि साधिकानि शतारसहस्रारयोरष्टादशसागरोपमाणि साधिकानि । आनतप्राणतयोर्विंशतिः सागरोपमाणि । आरणाच्युतयोर्द्वाविंशतिः सागरोपमाणि उत्कृष्टा स्थितिरिति । ननु च तुशब्दोऽनर्थकः अधिक इत्यधिकारे आसहस्रारादित्युक्तत्वात् ? न, अतस्तत्सिद्धेः । अत ऊर्ध्वं स्थितिविशेषप्रतिपत्त्यर्थमाह ।

---

१ नाये ग. पुस्तके पाठः

आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च ॥ ३२ ॥

अधिकारादधिकसंबंधः ॥ १ ॥ अधिकग्रहणमनुवर्तते तेनेह संबंधो वेदितव्यः एकैकेनाऽधिकानीति । किमर्थं नवसु ग्रैवेयकेषु विजयादिष्विति पृथग् ग्रहणं ?

ग्रैवेयकेभ्यो विजयादीनां पृथग्ग्रहणमनुदिशसंग्रहार्थं ॥ २ ॥ ग्रैवेयकविजयादिष्वित्युच्यमाने अनुदिशविमानानामसंग्रहः स्यात् ततस्तत्संग्रहार्थं पृथग्ग्रहणं क्रियते ।

प्रत्येकमेकैकवृद्ध्यभिसंबंधार्थं नवग्रहणं ॥ ३ ॥ ग्रैवेयकेष्वित्युच्यमाने यथा विजयादिषु सर्वेषु एकमेव सागरोपममधिकं तथा सर्वेषु ग्रैवेयकेषु एकमेव सागरोपममधिकमिति प्रतीयते तस्मान्नवग्रहणं क्रियते । नवसु प्रत्येकमेकैकस्य सागरोपमस्य आधिक्यं यथा स्यादिति । अथ सर्वार्थसिद्धस्य पृथग्ग्रहणं किमर्थं ?

सर्वार्थसिद्धपृथग्ग्रहणं विकल्पनिवृत्त्यर्थं ॥ ४ ॥ यथाऽधस्ताज्जघन्योत्कर्षस्थितिविकल्पः तथा सर्वार्थसिद्धेर्माभूत इत्येवमर्थं पृथग्ग्रहणं क्रियते । तेनायमर्थो वेदितव्यः अधोग्रैवेयकेषु प्रथमे त्रयोविंशतिः सागरोपमाणि । द्वितीये चतुर्विंशतिः सागरोपमाणि । तृतीये पंचविंशतिः सागरोपमाणि । मध्यमग्रैवेयकेषु प्रथमे षड्विंशतिः सागरोपमाणि । द्वितीये सप्तविंशतिः सागरोपमाणि । तृतीये अष्टविंशतिः । उपरिमग्रैवेयकेषु प्रथमे एकान्नत्रिंशत् । द्वितीये त्रिंशत् । तृतीये एकत्रिंशत् । अनुदिशविमानेषु द्वात्रिंशत् । विजयादिषु त्रयस्त्रिंशत् । सागरोपमाणि उत्कृष्टा स्थितिः । सर्वार्थसिद्धस्त्रयस्त्रिंशदेवेति । अत्राह मनुष्यतिर्यग्योनिजानां परापरस्थिती व्याख्याते । देवानां किं-उत्कृष्टैव न वेत्युच्यते—

अपरा पल्योपममधिकं ॥ ३३ ॥

अपरा जघन्येत्यर्थः स्थितिरित्यनुवर्तते व्याख्यातपरिमाणपल्योपमं । केषां ? देवानामियं जघन्या स्थितिः । सौधर्मैशानयोर्देवानां कथं गम्यते ?

पारिशेष्यात्सौधर्मैशानयोरपरा स्थितिः ॥ १ ॥ भवनवास्यादीनां जघन्या स्थितिर्वक्ष्यते सानत्कुमारादीनां च परतः परतः पूर्वापूर्वानंतरेति ततः परिशेषात् सौधर्मैशानयोर्देवानां साधिकं पल्योपमं जघन्या स्थितिर्वेदितव्या । तत ऊर्ध्वं जघन्यस्थितिप्रतिपादनार्थमाह ।

परतः परतः पूर्वापूर्वानंतराः ॥ ३४ ॥

परस्मिन् देशे परतः तस्य वीप्सायां द्वित्वं पूर्वशब्दस्यापि । किमुक्तं भवति पूर्वा पूर्वा या स्थितिरुत्कृष्टा सा सा उपरि देवानां जघन्येत्येतदुक्तं भवति । किमविशेषेण ? नेत्याह ।

अधिकग्रहणानुवृत्तेः सातिरेकसंप्रत्ययः ॥ १ ॥ अधिकग्रहणमनुवर्तते ! क प्रकृतं । "अपरा पल्योपममधिकं" इत्यत्र सातिरेकसंप्रत्ययो भवति । सौधर्मैशानयोः परा स्थितिः द्वे सागरोपमे साधिके । सनत्कुमारमाहेंद्रयोः सातिरेके जघन्या स्थितिः । सानत्कुमारमाहेंद्रयोः परा स्थितिः सप्तसागरोपमाणि साधिकानि, तानि सातिरेकाणि ब्रह्मलोकब्रह्मोत्तरयोर्जघन्या स्थितिरित्यादि । आ कुतोऽयमधिकारः ?

आ विजयादिभ्योऽधिकारः ॥ २ ॥ आ विजयादिभ्योऽनुत्तरेभ्यः, अयमधिकारो वेदितव्यः । कथं गम्यते, सर्वार्थसिद्धस्य पृथग् ग्रहणात् इत्युक्तं पुरस्तात् ।

अनंतरेत्यवचनं पूर्वोक्तेरिति चेन्न व्यवहिते पूर्वशब्दप्रयोगात् ॥ ३ ॥ स्यान्मतं पूर्वेति वचनात् आनंतर्यप्रतीतिः अनंतरेति वचनमनर्थकमिति तन्न, किं कारणं ? व्यवहितेपि पूर्वशब्दप्रयोगात् । अयं हि पूर्वशब्दः व्यवहितेपि प्रयुज्यते तद्यथा पूर्वं मथुरायाः पाटलिपुत्रमिति । अतः सौधर्मैशानयोः या परा स्थितिः सा ब्रह्मलोकब्रह्मोत्तरलोकयोर्जघन्या स्थितिरित्येवमाद्यनिष्टं प्रतीयेत ततोऽनंतरमुच्यते । नारकाणामुत्कृष्टा स्थितिरुक्ता जघन्या सूत्रेऽनुक्ता तामप्राकृतामपि लघुनोपायेन प्रतिपादयितुमिच्छन्नाह—

नारकाणां च द्वितीयादिषु ॥३५॥

चशब्दः किमर्थः ?

चशब्दः प्रकृतसमुच्चयार्थः ॥१॥ शब्दाक्रियते प्रकृतसमुच्चयार्थः । किं प्रकृत ? परतः परतः पूर्वापूर्वाऽनंतरा अपरा स्थितिरिति । तेनायमर्थोलभ्यते रत्नप्रभायां नारकाणां परा स्थितिरेकं सागरोपं सा शर्कराप्रभायां जघन्या । शर्कराप्रभायामुत्कृष्टा स्थितिः त्रीणि सागरोपमाणि वालुकाप्रभायां जघन्येत्येवमादि तद्न्यासो व्याख्यातः पुरस्तात् । अथ प्रथमायां पृथिव्यां का जघन्या स्थितिः ? इत्यत आह ॥

दशवर्षसहस्राणि प्रथमायां ॥३६॥

अपरा स्थितिरित्यनुवर्तते । अथ भवनासिनां का जघन्या स्थितिरित्यत आह ।

भवनेषु च ॥३७॥

चशब्दः किमर्थः ? प्रकृतसमुच्चयार्थ इति, एतेन भवनवासिनामपरा स्थितिर्दशवर्षसहस्राणि इत्यभिसंबध्यते । व्यंतराणां तर्हि का जघन्या स्थितिरित्यत आह ॥

व्यंतराणां च ॥ ३८ ॥

च शब्दः प्रकृतसमुच्चयार्थ इत्येवं तेन व्यंतराणामपरा स्थितिः दशवर्षसहस्राणि इत्यवगम्यते ।

परा व्यतराणां प्रागभिधातव्येति चेन्न लाघवार्थत्वात्॥१॥ स्यादेतद्यथाऽन्येषां देवनिकायानां परा स्थितिः प्रागुक्ता तथा व्यंतराणामपि परा प्रागभिधातव्या इति ? तन्न । किं कारणं ? लाघवार्थत्वात् यदि परा स्थितिः प्रागुच्यते पुनः दशवर्षसहस्रग्रहणं क्रियते तथा सति गौरवं स्यात् । यद्येवं—अमीषां का परा स्थितिः ? इत्येतदाह ।

परा पल्योपममधिकं ॥ ३९ ॥

स्थित्यभिसंबंधात् स्त्रीलिंगनिर्देशः ॥ १ ॥ स्थितिरित्यनुवर्तते तेनाभिसंबंधात् परेति स्त्रीलिंगनिर्देशो द्रष्टव्यः । इदानीं ज्योतिष्काणां परा स्थितिर्वक्तव्येत्यत आह ।

ज्योतिष्काणां च ॥ ४० ॥

च शब्दः प्रकृतसमुच्चयार्थः इत्येव तेनैवमभिसंबध्यते ज्योतिष्काणां च परा स्थितिः पल्योपममधिकमिति । आह—अपरा ज्योतिष्काणां कियती स्थितिरित्यत आह—

तदष्टभागोऽपरा ॥ ४१ ॥

तस्य पल्योपमस्याष्टभागो ज्योतिष्काणामपरा स्थितिरित्यर्थः । अत्राह—ज्योतिष्काणां पल्योपममधिकं परा स्थिति इत्यविशेषाभिधानेन ज्ञायते चंद्रादीनां किं स्थितिविशेषः ? इत्यत्रोच्यते ।

चंद्राणां वर्षशतसहस्राधिकं ॥ १ ॥ चंद्राणां वर्षशतसहस्राधिकं पल्योपमं परा स्थितिः ।

सूर्याणां वर्षसहस्राधिकं ॥ २ ॥ वर्षसहस्राधिक पल्योपमं सूर्याणां परा स्थितिः ।

शुक्राणां शताधिकं ॥ ३ ॥ शुक्राणां वर्षशताधिकं पल्योपमं परा स्थितिः ।

बृहस्पतीनां पूर्णा ॥ ४ ॥ बृहस्पतीनां पूर्णपल्योपमं परा स्थितिः साधिकं ।

शेषाणामर्धं ॥ ५ ॥ शेषाणां ग्रहाणां बुधादीनां पल्योपमस्यार्धं परा स्थितिः ।

नक्षत्राणां च ॥ ६ ॥ नक्षत्राणां—अर्धपल्योपमं परा स्थितिः ।

तारकाणां चतुर्भागः ॥ ७ ॥ पल्योपमस्य चतुर्भागस्तारकाणां परा स्थितिः ।

---

१ पूर्णामिति ग. पुस्तके पाठः ।

तदष्टभागो जघन्योभयेषां ॥ ८ ॥ तस्य पल्योपमस्याष्टभागः जघन्या स्थितिः उभयेषां तारकाणां नक्षत्राणां च भवति ॥

शेषाणां चतुर्भागः ॥ ९ ॥ शेषाणां सूर्यादीनां पल्योपमचतुर्भागो जघन्या स्थितिर्वेदितव्या । अथ लौकांतिकदेवानां का स्थितिः ? इत्यत्रोच्यते ।

लौकांतिकानामष्टौ सागरोपमाणि सर्वेषां ॥ ४२ ॥

अष्टसागरोपमस्थितयो लौकांतिकाः ॥ १ ॥ एकैव लौकांतिकानां स्थितिः । का ? अष्टौ सागरोपमाणि । सर्वे ते शुक्ललेश्याः पंचहस्तोत्सेधशरीराः ॥

व्याख्यातो जीवः ॥ २ ॥ सम्यग्दर्शनस्य विषयप्रदर्शनमुखेनोपन्यस्तेषु जीवादिषु आद्यो जीव पदार्थो व्याख्यातः ।

स च एकोऽनेकात्मकः ॥ ३ ॥ स जीव एक. अनेकात्मको भवति । कुत एकस्याऽनेकात्मकत्वमिति चेत् अत्रोच्यते ।

अभावविलक्षणत्वात् ॥ ४ ॥ अभूतं नास्तीत्येकरूपोभावः न हि अभावः अभावात्मना भिद्यते तद्विसदृशस्तु नानारूपो भाव इतरथा हि तयोरविशेष एव स्यात् ।

स तु षोढा भिद्यते जायतेऽस्ति विपरिणमते वर्धते अपक्षयते विनश्यतीति ॥ ५ ॥ तत्र उभयनिमित्तवशादात्मलाभमापद्यमानो भावः, जायत इत्यस्य विषयः । यथा मनुष्यगतिनामकर्मोदयापेक्षया आत्मा मनुष्यादित्वेन जायत इत्युच्यते । तस्यायुरादिनिमित्तवशादवस्थानमस्तित्वं । सतोऽवस्थांतरावाप्तिर्विपरिणामः । अनिवृत्तपूर्वस्वभावस्य भावांतरेणाऽऽधिक्यं वृद्धिः । क्रमेण पूर्वभावैकदेशनिवृत्तिरपक्षयः । तत्पर्यायसामान्यविनिवृत्तिर्विनाशः । एवं प्रतिक्षणवृत्तिभेदादनंतरूपा जायंते इति नानात्मता भावस्य । अथवा सन् ज्ञेयद्रव्यामूर्तातिसूक्ष्मावगाहनासंख्येयप्रदेशाऽनादिनिधनचेतनत्वादिना । किं च-

अनेकवाग्विज्ञानविषयत्वात् ॥ ६ ॥ इह लोके एकोऽर्थोऽनेकशब्दवाच्यो भवति तथाभिधेयपरिणामे सति तेषां शब्दानां तत्र प्रयोगात् । प्रयोगो हि प्रतिपादनक्रिया तस्याः शब्दार्थावुभावपि साधकौ । शब्दस्तावद्व्यंजकत्वात्साधकः । अर्थोपि व्यंग्यत्वात् कर्मभावमापद्यमानं तत्समकालमेव स्वातन्त्र्य मनुभवति, तस्मिन् सति क्रियाप्रवृत्तेः, यथा तंडुला कर्मरूपापन्ना एव कर्तृतामास्कंदंति येनोच्यते कर्मकारकमिति, अतः तस्मिन् सति अनेकः शब्दः प्रयुज्यते यथा घटः पार्थिवः मार्तिकः संज्ञेयो नवो महान् इत्यादि । एवमात्मकानां च विज्ञानानामालंबनं भवति तैर्विना तस्याभावात् । सर्वे ते घटस्य आत्मानः तथाऽऽत्मन्यपि अनेकवाग्विज्ञानालबनदर्शनादेकस्यानेकाऽऽत्मकत्वमवसेयं । अपि च—

अनेकशक्तिप्रचितत्वात् ॥ ७ ॥ यथा घृतं स्नेहयति तर्पयति उपबृंहयतीति अनेकशक्ति । घटो वा जलधारणाहरणादिलक्षणयाऽनेकया शक्त्या प्रचितः । तथा आत्मनोऽपि द्रव्यक्षेत्रकालभावनिमित्तवशादनेकप्रकारप्राप्तियोग्यबहुशक्तियोगादनेकात्मकत्वं । इतश्च—

वस्त्वंतरसंबंधाविर्भूतानेकसंबंधिरूपत्वात् ॥ ८ ॥ यथैको घटः पूर्वपरांतरितदूरासन्ननवपुराणसमर्थासमर्थदेवदत्तकृतचैत्रस्वामिकत्वसंख्यापरिमाणपृथक्त्वसंयोगविभागादिभेदादनेकव्यपदेशभाग्भवति संबंधानामानंत्यात्तं तं संबंधिनमपेक्ष्य तस्य तस्य पर्यायस्य भावात् । अथवा-

पुद्गलानामानंत्यात्तत्तत्पुद्गलद्रव्यमपेक्ष्य एकपुद्गलस्थस्य तस्यैकस्यैव पर्यायस्याऽन्यत्वभावात् ॥ ९ ॥ *यथा प्रदेशिन्याः मध्यमाभेदात् यदन्यत्वं न तदेवानामिकाभेदात् । माभूत् मध्यमानामिकयोरेकत्वं* मध्यमाप्रदेशिन्यन्यत्वहेतुत्वेनाऽविशेषादिति । नचैतत्पराधिकमेवार्थसत्वं । यदि मध्यमासामर्थ्यात् प्रदेशिन्याः ह्रस्वत्व जायेत शशविषाणेपि स्याच्छक्रमुष्टौ वा । नापि स्वत एव परापेक्षाभावे तद्व्यक्त्यभावात् ।

तस्मात्तस्यानंतपरिणामस्य द्रव्यस्य तत्तत्सहकारिकारणं प्रतीत्य तत्तद्रूपं वक्ष्यते । न तत् स्वत एव नापि परकृतमेव । एवं जीवोपि कर्मनोकर्मविषयवस्तूपकरणसंबंधभेदाविर्भूतजीवस्थानगुणस्थानमार्गणास्थानविकल्पाऽनंतपर्यायरूपः प्रत्येतव्यः । इतश्च—

अन्यापेक्षाभिव्यंग्याऽनेकरूपोत्कर्षापकर्षपरिणतगुणसंबंधित्वात् ॥ १० ॥ यथा एको घट एकद्वित्रिचतुःसंख्येयाऽसंख्येयानंतावस्थोत्कर्षापकर्षात्मकरूपादिपरिणतिप्रतियोगिद्रव्यापेक्षासहकारिकारणाभिव्यंजनया आत्मीयानंतनीलनीलतरादिपरिणामः । तथा जीवोपि परद्रव्यसंबंधापेक्षाभिव्यक्ततीव्राद्यवस्थाविशेषक्रोधाद्यविभागपरिच्छेदाऽनंतरूपत्वादनेकः । इतश्च—

अतीतानागतवर्तमानकालसंबंधित्वात् ॥ ११ ॥ इह समुदायावयवप्रध्वंसविषयेणातीतेन कालेन, उत्पत्तिनिर्ज्ञानसंभावनविषयेण च अनागतेन कालेन, साधनप्रवृत्त्यविरामगोचरेण च वर्तमानेन कालेन संबंधात् मृदादिद्रव्यं तस्मिन् तस्मिन् कालेऽनेकभेदमापद्यमानं दृष्टं । वर्तमानमात्रत्वे पूर्वत्वात् अपरत्वाच्च । अवध्यभावे वर्तमानस्याप्यभावो वंध्यापुत्रयुवत्ववत् । तथा जीवस्यापि अनाद्यतीतकालसंबंधपरिणतैः अनागतानंतकालवशवर्तिभिः वर्तमानकालोद्भूतवृत्तिभिश्च पर्यायैरर्थव्यंजनभेदाद्द्वैविध्यमास्कंदद्भिः अभिसंबंधादनंतरूपता । इतश्च—

उत्पादव्ययध्रौव्ययुक्तत्वात् ॥ १२ ॥ उत्पादादीनामानंत्यं अनंतकाले एकस्मिंच काले । यथा घट एकस्मिन्नेव काले द्रव्यतः पार्थिवत्वेन उत्पद्यते न जलत्वेन । देशत इहत्यत्वेन न पाटलीपुत्रकत्वेन । कालतो वर्तमानकालतया नातीतानागताभ्यां । भावतो महत्त्वेन नाल्पत्वेन । एतेषां च एकैक उत्पादः सजातीयान्यपार्थिवानेकघटांतरगतेभ्यः सौवर्णादीपद्विजातीयघटांतरगतेभ्यो वा अत्यंतविजातीयपटाद्यनंतमूर्तामूर्तद्रव्यांतरापन्नेभ्यो वा उत्पादेभ्यो भिद्यमानः तावद्भेदमुपयाति अन्यथा तैरविशिष्टः स्यात् । तथा तदैवानुत्पद्यमानद्रव्यसंबंधकृतोर्ध्वाधस्तिर्यगंतरितानंतरितैकांतरादिदिग्भेदमहदल्पत्वादिगुणभेदरूपाद्युत्कर्षापकर्षानंतभेदत्रिलोकत्रिकालविषयसंबंधिवशाभिद्यमानरूपो वा उत्पादोऽनेको भवति । तथाऽनेकावयवात्मकस्कंधप्रदेशभेददृष्टविषमोत्पादनानारूपतया वा अनेक उत्पादः । उदकादिधारणाहरणप्रदानाविकरणभयहर्षशोकपरितापभेदजननादिस्वकार्यप्रसाधनेन वा अनेक उत्पादः । तदैव तावंत एव तत्प्रतिपक्षभूताः विनाशाः पूर्वेण विनष्टस्य उत्तरेणानुत्पादात् उभयविपक्षभूताः स्थितयोपि तदैव तावन्यः तदाधारभूताः, अनवस्थितस्य वंध्यापुत्रवदुत्पादविनाशसंभवात् । अभावप्रसंगाच्च । घट उत्पद्यत इति यदा वर्तमानकालता तदा अनभिनिर्वृत्तत्वात् पूर्वापरीभूतसाध्यमानभावाभिधानाच्चागत्वं । उत्पत्त्यनतरं तु विनाशेऽभ्युपगम्यमाने सत्त्वभूतावस्थाभिधायिकोत्पन्नशब्दवाच्यत्वाभावात्--उत्पादेप्यभावो विनाशेप्यभाव इति भावाभावात्तदाश्रयो व्यवहारो विरोधमुपगच्छेत् । बीजशक्त्यभावाच्च उत्पादविनाशशब्दवाच्यताभेपश्च तत उत्पद्यमानता उत्पन्नता विनश्यतेति तिस्रोऽवस्था अभ्युपगंतव्याः । तथा जीवस्याप्येकस्य द्रव्यार्थिकपर्यायार्थिकगोचरसामान्यविशेषानंतशक्त्यपेक्षार्पितस्थित्युत्पत्तिनिरोधानंतरूपत्वात् अनेकत्वं प्रत्येतव्यं । इतश्च—

अन्वयव्यतिरेकात्मकत्वाच्च ॥ १३ ॥ इह घट एकोप्यन्वयव्यतिरेकात्मतया अनेको दृष्टः सदचेतननवपुराणत्वादिभिः । तथा आत्मापि एकोऽन्वयव्यतिरेकात्मकतया अनेकः प्रत्येतव्यः । के पुनरन्वयाः बुद्ध्यभिधानानुवृत्तिलिंगेन अनुमीयमानाविच्छेदाः स्वात्मभूताऽस्तित्वाऽऽत्मत्वज्ञातृत्वद्रष्टृत्वकर्तृत्वभोक्तृत्वाऽमूर्तत्वाऽसंख्यातप्रदेशत्वावगाहनात्मसूक्ष्मत्वागुरुलघुत्वाहेतुकत्वाऽनादिसंबंधित्वोर्ध्वगतिस्वभावादयः । अथ के व्यतिरेकाः ? वाग्विज्ञानव्यावृत्तिलिंगसमधिगम्यपरस्परविलक्षणा उत्पत्तिस्थितिविपरिणामवृद्धिह्रासविनाशधर्माणः गतींद्रियकाययोगवेदकषायज्ञानसंयमदर्शनलेश्यासम्यक्त्वादयः ॥

तस्य शब्देनाभिधानं क्रमयौगपद्याभ्यां ॥ १४ ॥ तस्यैकस्य जीवस्यानेकात्मकस्य प्रत्यायने शब्दः प्रवर्तमानो द्वेधा व्यवतिष्ठते क्रमेण यौगपद्येन वा न तृतीयो वाक्यार्थोस्ति ॥

१ भंवाश्च पाठांतर ।

ते च कालादिभिर्भेदाभेदार्पणात् ॥१५॥ ते च क्रमयौगपद्ये कालादिभिः भेदाभेदार्पणाद्भवतः । यदा वक्ष्यमाणकालादिभिरस्तित्वादीनां धर्माणां भेदेन विवक्षा तदैकस्य शब्दस्यानेकार्थप्रत्यायनशक्त्यभावात् क्रमः । यदा तु तेषामेव धर्माणां कालादिभिरभेदेन वृत्तमात्मरूपमुच्यते तदैकत्वमापन्नस्य अनेकाशेषरूपस्य प्रतिपादनसंभवात् यौगपद्य ।

तत्र यदा यौगपद्यं तदा सकलादेशः ॥ १६ ॥ स एव प्रमाणमित्युच्यते । सकलादेशः प्रमाणाधीन इति वचनात् ॥

यदा तु क्रमः तदा विकलादेशः॥१७॥ स एव नय इति व्यपदिश्यते । विकलादेशो नयाधीन इति वचनात् । कथं सकलादेशः ?

एकगुणमुखेनाऽशेषवस्तुरूपसंग्रहात् सकलादेशः ॥ १८ ॥ यदा अभिन्नमेकं वस्तु एकगुणरूपेण उच्यते गुणिनां गुणरूपमंतरेण विशेषप्रतिपत्तेरसंभवात् । एको हि जीवोऽस्तित्वादिष्वेकस्य गुणरूपेणाऽभेदवृत्त्या अभेदोपचारेण वा निरंशः समस्तो वक्तुमिष्यते विभागनिमित्तस्य प्रतियोगिनो गुणांतरस्य तत्रानाश्रयाणात्, तदा सकलादेशः। कथमभेदवृत्तिः कथं वा अभेदोपचारः ? द्रव्यार्थत्वेनाश्रयणे तदव्यतिरेकादभेदवृत्तिः । पर्यायार्थत्वेनाश्रणे परस्परव्यतिरेकेपि एकत्वाध्यारोपात्ततश्चाऽभेदोपचारः ।

तत्राऽऽदेशवशात्सप्तभंगी प्रतिपदं ॥१९॥ तत्र तस्मिन् सकलादेश आदेशवशात् सप्तभंगी प्रतिपदं वेदितव्या। तद्यथा-स्यादस्त्येव जीव. १ स्यान्नास्त्येव जीवः २ स्यादवक्तव्य एव जीवः ३ स्यादस्ति चनास्ति च ४ स्यादस्तिचाऽवक्तव्यश्च ५ स्यान्नास्ति चावक्तव्यश्च ६ स्यादस्ति च नास्ति चावक्तव्यश्च ७ इत्यादि। उक्तं च-

पुच्छावसेण भंगा सत्तेव दु संभवंति जस्स जधा ।
सत्तूदितं पउच्चदि सामण्णाणं सदा णियदा ॥ १ ॥

इति । तत्र स्यादस्त्येव जीव इत्येतस्मिन् वाक्ये जीवशब्दो द्रव्यवचनः विशेष्यत्वात् । अस्तीति गुणवचनो विशेषणत्वात् । तयोस्सामान्यार्थाविच्छेदेन विशेषणविशेष्यसंबंधावद्योतनार्थं एवकारः । तेनेतरानिवृत्तिप्रसंगे तत्संभवप्रदर्शनार्थः स्याच्छब्दप्रयोगः, स च तिङंतप्रतिरूपको निपातः । तस्यानेकांतविधिविचारादिषु बहुष्वर्थेषु संभवत्सु इह विवक्षावशात् अनेकांतार्थो गृह्यते । यद्ययमनेकांतार्थः तेनैव सर्वस्योपादानात् इतरेषां पदानां आनर्थक्यं प्रसज्यते ! नैष दोषः समान्येनोपादानेपि विशेषार्थिनां विशेषोऽनुप्रयोक्तव्यः । वृक्षशब्दस्य सामान्यशब्दत्वात् धवादिविशेषप्रतिपादने धवाद्युपादानवत् । अथवा स्याच्छब्दोयमनेकांतार्थस्य द्योतकः । द्योतकश्च वाचकप्रयोगसन्निधिमंतरेणाऽभिप्रेतार्थावद्योतनाय नालमिति तद्द्योत्यधर्माधारत्वाभिधानायेतरपदप्रयोगः क्रियते । अथ केनोपात्तोऽनेकांतार्थोऽनेन द्योत्यते ? उक्तमेतदभेदवशात् अभेदोपचारेण वा प्रयुक्तशब्दवाच्यतामेवाऽऽस्कंदंति इतरे धर्मा इति । एवमितरेष्वपि वाक्येषु अर्थप्रकल्पनं प्रत्येतव्यं । यद्येवं स्यादस्त्येव जीव इत्यनेनैव सकलादेशेन जीवद्रव्यगतानां सर्वेषां धर्माणां संग्रहात् उत्तरेषां भंगाना मानर्थक्यमासजति ? नात्र दोषः गुणप्रधानव्यवस्थाविशेषप्रतिपादनार्थत्वात् सर्वेषां भंगानां प्रयोगोऽर्थवान् । तद्यथा—द्रव्यार्थिकस्य प्राधान्ये पर्यायगुणभावे च प्रथमः । पर्यायार्थिकस्य प्राधान्ये द्रव्यगुणभावे च द्वितीयः । तत्र प्राधान्यं शब्देन विवक्षितत्वाच्छब्दाधीनं शब्देनानुपात्तस्यार्थतो गम्यमानस्याऽप्राधान्यं । तृतीये तु युगपद्भावे उभयस्याप्राधान्यं शब्देनाभिधेयतयानुपात्तत्वात् । चतुर्थस्तूभयप्रधानः क्रमेण उभयस्यास्त्यादिशब्देन उपात्तत्वात् । तथोत्तरे च भंगाः वक्ष्यंते । तत्रास्तित्वैकांतवादिनः जीव एव अस्ति इत्यवधारणे अजीवनास्तित्वप्रसंगभयादिष्टतोवधारणविधिरस्त्येव जीव इति नियच्छंति तथाऽवधारणसामर्थ्यात् शब्दप्रापितादभिप्रायवशवर्तिनः सर्वथास्य जीवस्याऽस्तित्वं प्राप्नोति । सर्वेणाऽस्तित्वेन व्याप्त इति पुद्गलाद्यस्तित्वेनापि जीवस्यास्तित्वं प्राप्तं शब्देन तथा प्रापितत्वात्, शब्दप्रमाणकाश्च वयमर्थाधिगमे । स्यान्मतं-अस्तित्वसामान्येन व्याप्तिर्न चास्तित्वविशेषैः यथा-

ऽनित्यमेव कृतकमिति, अनित्यत्वस्याभावे कृतकत्वस्याप्यभाव एवेत्यवधारणात्। यत्कृतकं तत्सर्वमनित्यमिति, न हि सर्वप्रकारेणानित्यत्वेन सर्वप्रकारः कृतकः व्याप्यते किं तु अनित्यत्वसामान्येन, न त्वनित्यत्वव्यक्तया घटपटरथादिगतयेति। एवं तर्हि त्वयैवाभ्युगतं अवधारणानिष्फलत्वं सामान्याऽनित्यत्वेनाऽनित्यत्वं न विशेषाऽनित्यत्वेनेति। स्वगतेनापि विशेषेणानित्यं भवत्येवेति चेन्न स्वगतेनेति विशेषणात् परगतेन विशेषेणाऽनित्यत्वं न भवतीति आपद्यते अनवधारणं। किं वा वाक्यं प्रयोक्तव्यं-अनित्यं कृतकमिति। तथा चाऽनित्यस्याऽनवधृतत्वात् नित्यत्वप्रसंगोपि। एवं यद्यस्तित्वसामान्येनास्ति जीवः न तु पुद्गलादिगतयाऽस्तित्वव्यक्त्याऽतो न पुद्गलाद्यस्तित्वेन अस्तित्वं जीवस्येति ब्रुवता त्वयैवाभ्युपगतं सामान्यरूपं विशेषरूपं चेति प्रकारवदस्तित्वमिति। तथा सति सामान्यास्तित्वेनास्ति विशेषास्तित्वेन नास्तीति स्यान्नास्तीति प्राप्तमवधारणनिष्फलत्वं सर्वेण हि प्रकारेणाऽस्तित्वाभ्युपगमेनाऽस्तित्वनिरासेन अवधारणं फलवत् स्यात्। अनियमे तु अव्यावृत्तत्वात् पुद्गलाद्यस्तित्वेनापि प्राप्तिरित्यवश्यं; एकांतवादिनाऽवधारणमभ्युपगमनीयं। तथा च संति पूर्वोक्तो दोषः स्यात्। एतद्यदस्ति तत्स्वायत्तद्रव्यक्षेत्रकालभावेन भवति नेतरेण तस्याऽप्रस्तुतत्वात्। यथा घटो द्रव्यतः पार्थिवत्वेन क्षेत्रतं इहत्यतया कालतो वर्तमानकालसंबंधितया, भावतोरक्तत्वादिना, न परायत्तैर्द्रव्यादिभिस्तेषामप्रस्तुतत्वात्. इत्येव चेत् द्रव्यक्षेत्रकालभावांतरसंबंधितया नास्तीत्यतः स्यादस्ति स्यान्नास्तीति सिद्धं। नियमानभ्युपगमे तु स घटो न स्यादेव असामान्यत्वेन तु नियतद्रव्यक्षेत्रकालभावसंबंधित्वेनाऽभूतत्वात् शशविषाणवत्। अनियतद्रव्यादिरूपत्वे वा सर्वथाभावात् सामान्यमेव स्यात् नासौ घटः अनियतद्रव्यादिरूपत्वात् महासामान्यवत्। कथं यदि हि असौ द्रव्यतः पार्थिवत्वेन, अथोदकादित्वेनापि भवेत् ततोसौ घट एव न स्यात्। पृथिव्युदकदहनपवनादिषु वृत्तत्वात् द्रव्यत्ववत्। तथा यथेहत्यतयास्ति तथाविरोधिदिगंतानियतदेशस्थतयापि यदि स्यात्तथा चासौ घट एव न स्यात् विरोधिदिगंताऽनियतसर्वदेशस्थत्वात् आकाशवत्। तथा यथा वर्तमानघटकालतयास्ति तथाऽतीतशिवकाद्यनागतकपालादिकालतयापि स्यात् तथा चाऽसौ घट एव न स्यात् सर्वकालसंबंधित्वात् मृद्द्रव्यवत्। यथा चेह देशकालविशेषसंबंधित्वेनापि- अस्मत्प्रत्यक्षत्वं स्यात् उदकाद्यानयनादिसंव्यवहारपातित्वं वा। तथा यथा नवत्वेन तथा पुराणत्वेन सर्वरूपरसगंधस्पर्शसंख्यासंस्थानादित्वेन वा स्यात्। तथा चासौ घट एव न स्यात् सर्वथाभावित्वात् भवनवत्। यथा हि भवनं रूपरसौ गंधः स्पर्शश्च भवति पृथुः महान् ह्रस्वः पूर्णः रिक्तो वा भवतीति न कुतश्चित् वस्तुनो वस्तुधर्माद्वा व्यावर्तते तद्वन्न घटः, एवं घटोपि स्यात्। एवं जीवस्यापि मनुष्यत्वेनाऽर्यमाणस्य स्वद्रव्यादिरूपतयैवाऽस्तित्व नेतरथा। यदीतरथापि स्यात् मनुष्य एव न स्यात् नियतद्रव्यक्षेत्रकालभावसंबंधित्वेनाऽभूतत्वात्खरविषाणवत्। अनियतद्रव्यादिरूपत्वे वा सर्वथाभावात् सामान्यमेव स्यात् नासौ मनुष्यः अनियतद्रव्यादिरूपत्वात् माहासामान्यवत्। कथं यदि हि असौ यथा जीवद्रव्यत्वेनास्ति एवं पुद्गलादित्वेनापि स्यात् ततोऽसौ मनुष्य एव न स्यात्। पुद्गलादिष्वपि दृष्टत्वात् द्रव्यत्ववत्। तथा यथेहत्यतयास्ति तथाविरोधिदिगंतानियतदेशस्थतयापि यदि स्यात्तथा चासौ मनुष्य एव न स्यात् विरोधिदिगंतानियतसर्वदेशस्थत्वात् आकाशवत्। तथा यथा वर्तमानकालतयास्ति तथाऽतीतनारकाद्यनागतदेवादिकालतयापि स्यात् तथा च असौ मनुष्य एव न स्यात् सर्वकालसंबंधित्वात् जीवत्ववत्। यथा च इह देशकालविशेषसंबंधितया अस्मत्प्रत्यक्षत्व तथाऽतीतनागतकालान्यदेशसंबंधित्वेनापि अस्मत्प्रत्यक्षत्वं स्यात् यथा यौवनेन तथा वृद्धत्वेन अन्यद्रव्यगतरूपरसादिभिर्वा यदि स्यात् तथा च असौ मनुष्य एव न स्यात् सर्वथाभावित्वात् भवनवत्। तस्मात् स्यादस्ति स्यान्नास्ति च स्वपरसत्ताभावाभावोभयाधीनत्वात् जीवस्य। यदि परसत्ताया अभावं स जीवः स्वात्मनि नापेक्षते अतः स जीवो न स्यात् सन्मात्रं स्यात्। नासौ जीवः सत्त्वे सति विशेषरूपेण अनवस्थितत्वात् सामान्यवत्। तथा स्वपरसत्ताभावापेक्षायामपि जीवत्वे यदि स्वसत्तापरिणितिं नापेक्षते तथापि तस्य वस्तुत्वमेव न स्यात् जीवत्वं वा। सद्भावापरिणतत्वे वा पराभावमात्रत्वात् खपुष्पवत्। अतः पराभावोपि स्वसत्तापरिणत्यपेक्ष एव अस्तित्वस्यात्मवत्। यथास्तित्वस्यात्मा अस्तित्वस्या-

१ स्यादस्ति स्यान्नास्तीत्यधिकः पाठः ग, पुस्तके।

त्मनाऽस्ति नास्ति च नास्तित्वस्वात्मनेति, स्यादस्ति स्यान्नास्ति इतरथा हि वस्त्वभावः स्यात् । कथं अभावो हि निरपेक्षोऽत्यंतशुन्यं च वस्तु प्रतिपादयेत् अन्यत् अन्वयाप्रतिलंभात् । भावोपि वा अभावनिरपेक्षः सर्वरूपवस्तु प्रतिपादयेत् व्यतिरेकाप्रतिलंभात् । न सर्वथा सत्ता सर्वाभावरूपेण वा शक्यं भवितु किं हि वस्तु सर्वात्मकं सर्वाभावरूपं वा दृष्टमिति ? तद्धि वस्त्वेव न स्यात् । सर्वाभावरूपत्वात् खपुष्पवत् । वस्तुत्वं सर्वात्मकत्वान्नाशक्यं प्रतिपत्तुं, असाधारणात्वात् वस्तुत्वे वा वस्तुत्वे वा दर्शनात् श्रावणत्ववत् अभावता हि भावरूपत्ववैलक्ष्यणात् क्रियागुणव्यपदेशाभावात् अवतिष्ठते । भावतापि अभाववैलक्षण्यात् क्रियागुणव्यपदेशवत्त्वात् सिध्यतीति परस्परापेक्षे भावाभावरूपत्वेपि वाऽभावः स्वसद्भावं भावाभावं च अपेक्षमाणः सिध्यति । भावोपि स्वसद्भावं अभावाभावंच वाऽपेक्ष्य सिद्धिमुपयाति । यदि तु अभाव एकांतेनाऽस्ति इत्यभ्युपगम्येत ततः सर्वात्मनाऽस्तित्वात् स्वरूपसद्भावात्मनापि स्यात् तथाच भावाभावरूपसंकरादस्थितरूपत्वादुभयोरप्यभावः । अथ एकांतेन नास्ति इत्यभ्युपगम्येत ततोयं यथा भावात्मना नास्ति तथाऽभावात्मनापि न स्यात् । ततश्चाऽभावस्याऽभावात् भावस्याऽप्रतिपक्षत्वात् भावमात्रमेव न स्यात् तथा खपुष्पादयोपि भावा एव अभावाभावरूपत्वात् घटवत् इति सर्वाभावप्रसंगः । एवं भावास्तित्वैकांतेपि योज्यं । तस्माद्भावः स्यादस्ति स्यान्नास्ति तथा अभावोप्येवं । जीवोपि स्यादस्ति स्यान्नास्तीत्यवसेयं । एवं चात्मनि घटादिवस्तुसिद्धौ च भावाभावयोः परस्परापेक्षत्वात् । यदुच्यते अर्थात् प्रकरणाद्वा घटे अप्रसक्तायाः पटादिसत्तायाः किमिति निषेधः क्रियते ? इति तदयुक्तं किं तु घटे अर्थत्वात् अर्थसामान्यात् पटादिसर्वार्थप्रसंगः संभवत्येव । तत्र विशिष्टघटार्थत्वं अभ्युपगम्यमानं पटादिसत्तारूपस्यार्थसामर्थ्यात् प्रापितस्य अर्थतत्त्वस्य निरासेनैव आत्मानं शक्नोति लब्धु । इतरथा हि असौ घटार्थ एव न स्यात् पटाद्यर्थरूपेणाऽनिवृत्तत्वात् पटाद्यर्थस्वरूपवद्विपरीतो वा । यश्चास्य पटादिरूपेणाभावः सोपि घटधर्म एव तदधीनत्वात् भाववत् अतोसौ स्वपर्याय एव, परेण तु विशेष्यमाणत्वात् परपर्याय इत्युपचर्यते । स्वपरविशेषणायत्तं हि वस्तुस्वरूपप्रकाशनमिति । अथाऽस्त्येव जीव इत्यत्राऽस्तिशब्दवाच्यादर्थात् भिन्नस्वभावो जीवशब्दवाच्योऽर्थः स्यात् अभिन्नस्वभावो वा ? यदि अभिन्नस्वभावः ततो यत् सदर्थस्य रूपं जीवशब्दार्थस्यापि तदेव रूपमिति । ततोऽन्यधर्मानवकाशत्वादविशिष्टार्थता स्यात् ततश्च सामानाधिकरण्याऽभावात् विशेषणविशेष्यत्वाभावो घटकुटशब्दवत् अन्यतराप्रयोगश्च स्यात् । किं च सत्त्वस्य सर्वद्रव्यपर्यायविषयत्वात् तदभिन्नस्वभावस्य जीवस्यापि तादात्म्यमिति सर्वस्य तत्त्वस्याऽविशेष्यैकजीवत्वप्रसंगः । सत्स्वभावत्वाच्च जीवस्वरूपचैतन्यतद्विकल्पज्ञानादिक्रोधादिनारकत्वादि सर्वविशेषणत्वाभावत्वप्रसंगश्च स्यात् । जीवस्वभावत्वाद्वास्तित्वस्य आत्मनि पुद्गलादिषु च सत्प्रत्ययाभिधानहेतुत्वाभावो जीवत्ववत् । अथाऽयं दोषो माभूत इति अस्तिशब्दवाच्यात् अर्थात् भिन्नस्वभावो जीवशब्दार्थः प्रतिज्ञायेत । एवमपि स्वतो जीवस्याऽसद्रूपत्वप्रसंगः । ततश्च नास्ति जीवोऽस्तिशब्दवाच्यार्थविविक्तत्वात् खरविषाणवत् विपर्ययोवा ततश्च तदधीनत्वाच्च मोक्षादिव्यवहाराभावः । अस्तित्वस्य च जीवादर्थांतरत्ववत्, इतरेभ्योपि भिन्नत्वात् निराश्रयत्वादभाव एवेति तदाश्रयव्यवहाराभावः । किं च अस्तित्वाद्भिन्नस्वभावस्य जीवस्य कः स्वभावः इति वक्तव्यं यश्चास्य स्वभाव इत्युच्यते स सर्वो न स्यात् असत्स्वभावत्वात् खपुष्पवत् । तस्मात् स्याद्भिन्नार्थत्वं स्यादभिन्नार्थत्वं वाऽभ्युपगंतव्यं । पर्यायार्थादेशात् भवनजीवनभेदादस्तिजीवशब्दौ तद्व्यतिरेकेण तद्ग्रहणेनाग्रहणात् स्याद्भिन्नार्थौ द्रव्यार्थादेशात् तदव्यतिरेकात् तद्ग्रहणेन ग्रहणात् स्यादभिन्नार्थौ । तस्मात् स्यादस्ति स्यान्नास्तीति सिद्धं । इतश्च स्यादस्ति स्यान्नास्ति अर्थाभिधानप्रत्ययानां तथाप्रसिद्धेः । कश्चिदाह—जीवार्थो जीवशब्दो जीवप्रत्ययः इत्येतत्त्रितयं लोके विचारसिद्धं । तथाहि वर्णाश्रमिणः अस्तित्वमेवाश्रित्य तासु क्रियासु प्रवृत्ताः तस्मादस्त्येवेति । तमितरः प्रत्याह नास्त्येवैतत्त्रितयं-अर्थस्तावन्नास्त्यनुपब्धेः विज्ञानमेव तथा परिणतं स्वप्नवत् कल्पयति । प्रत्ययजीवोपि नास्त्येव विज्ञानस्य ज्ञेयरूपेणाऽनाख्येयत्वात् । स्वतस्तु विज्ञानं न जीवो नाप्यजीवः प्रकाशमात्रं केनचिदपि निरूपेण; अनिरूप्यत्वात् यद्यपि निरूप्येत स्वप्नज्ञानवत् असदाकारेणैव निरूप्येत । नास्ति ज्ञानं असदाकारत्वात् खरविषाणवत् । अभिधानमपि नास्ति । तद्धि पदरूपं वा स्यात् वाक्यरूपं वा तन्नास्त्येव वा युगपत्कालावयवत्वात् । यत्पुनरेतज्जी-

वशब्दग्रहणं तत्परिकल्पितैर्वर्णभागैरनुक्रमेणाऽऽहितशक्तिकासु बुद्धिषु शक्तिपरिपाकप्राप्तौ प्रत्यस्तमितसकल वर्णभागविषयविज्ञानं जीवशब्दत्वेनाऽध्यवसीयते नत्वभिधानजीवः कश्चिदस्ति तदपि विज्ञानं क्षणिकत्वात् प्रत्यर्थवशवर्तित्वाच्च । एकस्य पूर्वापरीभूतार्थप्रत्यवभासनासंभवान्नास्त्येवेति । यद्येवं वाच्यवाचकसंबंधोलोके रूढः प्रत्याख्यातः स्यात् ततश्च लोकविरोधः । तन्नास्तित्वे परीक्षाप्रयासश्च विफलः स्यात् इत्यभ्युपगंतव्यं जीवः स्यादस्ति स्यान्नास्तीति । अतः द्रव्यार्थिकः पर्यायार्थिकमात्मसात् कुर्वन् व्याप्रियते । पर्यायार्थिकोपि द्रव्यार्थिकमिति उभावपि इमौ सकलादेशौ तृतीयो विकल्पः उच्यते । द्वाभ्यां गुणाभ्यामेकस्यैवाऽभिन्नस्या-भेदरूपेण युगपद्वक्तुमिष्टत्वात् । तत्र यथा प्रथमद्वितीययोर्विकल्पयोरेकस्मिन् काले एकेन शब्देन एकस्यार्थस्य समस्तस्यैव एकेन गुणरूपेणाभिधानं क्रमादेव यदा द्वाभ्यां प्रतियोगिभ्यां गुणाभ्यामवधारणात्मकाभ्यां युगपदेकस्मिन् काले एकेन शब्देन एकस्यार्थस्य कृत्स्नस्यैवाभेदरूपेणाभिधित्सा तदा अवाच्यः तद्विधार्थस्य शब्दस्य वा भावात् तत्र युगपद्भावो गुणानां कालादिभिरभेदेन विवक्षितानां वृत्तिः नच तैरभेदोत्र संभवति । के पुनस्ते कालादयः ?

काल आत्मरूपमर्थसंबंधः उपकारो गुणिदेशः संसर्गः शब्दः ॥ २० ॥ इति तत्र येन कारणेन विरुद्धाः भवंति गुणास्तेषामेकस्मिन् काले क्वचिदेकवस्तुनिर्वृत्तिर्न दृष्टा अतस्तयोर्नास्ति वाचकः शब्दः तथावृत्त्यभावात् । अत एकस्मिन्नात्मनि सदसत्वे प्रविभक्ते असंसर्गात्मरूपे अनेकांतरूपे न स्तः । एककाले येनात्मा तथोच्येत ताभ्यां विविक्तं च परस्परत आत्मरूपं गुणानां नान्योन्यात्मनि वर्तते । यत उभाभ्यां युगपदभेदेनोच्यते । नच विरुद्धत्वात् । सदसत्वादीनां एकांतपक्षे गुणानामेकद्रव्याधारा वृत्तिरस्ति यतः अभिन्नाधारत्वेनाऽभेदो युगपद्भावः स्यात् । येन केनचित् शब्देन वा सदसत्व उच्येयातां । नच संबधतो-ऽभिन्नता गुणानां संभवति भिन्नत्वात् संबंधस्य । यथा छत्रदेवदत्तसंबंधोऽन्यः दंडदेवदत्तसंबंधात् कारणयोः संबंधिनोर्भिन्नत्वात् न तावेकेन संबंधेनाभिन्नौ । एवं सदसत्त्वयोरात्मना सह संबंधस्य भिन्नत्वात् न संबंधे-नापि युगपद्वृत्तिसंभवः यतः शब्देनोच्येत । समवाय इति चेन्न तेनापि भिन्नेन भवितव्यं भिन्नाभिधानप्रत्य-यहेतुत्वात् संयोगवत् । न च गुणाः उपकारेणाऽभिन्नाः यतो द्रव्यस्य गुणाधीन उपकारो नीलरक्ताद्युपरंजनं ते च स्वरूपतो भिन्नाः । यच्च तेषामात्मनि नीलरक्तत्वाद्यस्ति रूपं यावच्च नीलनीलतरादि तावता द्रव्यं रजयति अतस्तेषामुपकारोपि भिद्यत एव । एवं सदसत्वयोर्भिन्नत्वात् सत्त्वेनोपरक्त सदसत्त्वेनोपरक्तं असन्नोपकारसा-रूप्यं यतः तदभेदेन शब्दो वाचकः स्यात् । नचैकदेशे गुणिन उपकारः संभवति येनैकदेशोपकारेण सहभावो भवेत । नीलादेर्गुणस्य कृत्स्नस्य हि गुणोपकारकत्व द्रव्यस्य च पटादेः समस्तस्योपकार्यत्वं । गुण उपकारको गुणी उपकार्य इति । नचैकदेशो गुणगुणिनोः । अतः कृत्स्नयोः उपकार्योपकारकरूपसिद्धिर्न भवेदेव यतो देशतः सहभावात् कश्चिच्छब्दो वाचकः कल्प्येत । नचैकांतपक्षे गुणानां संसृष्टमनेकात्मक रूपमस्ति अवधृतैकांतरूपत्वात् सत्वासत्वादेर्गुणस्य । यथा शवलरूपव्यतिरिक्तौ परस्परविविक्तौ शुक्लकृष्णौ गुणौ असंसृष्टौ नैकस्मिन्नर्थे सहवर्तितु समर्थौ अवधृतरूपत्वात् । अतः ताभ्यां ससर्गाभावात् एकांतपक्षेन युग-पदभिधानमस्ति अर्थस्य तथा वर्तितु शक्त्यभावात् । तद्विविधस्य च अर्थसंबंधस्याऽभावात् । नचैकः शब्दो द्वयोर्गुणयोः सहवाचकोस्ति । यदि स्यात् सच्छब्दः स्वार्थवदसदपि सत्कुर्यात् नच तथा लोके संप्रत्ययोस्ति तयोर्विशेषशब्दत्वादेव मुक्तात् कालादियुगपद्भावासंभवात् । शब्दस्य च एकस्य उभयार्थवाचिनोऽनुपलब्धेः अवक्तव्य आत्मा । अथवा वस्तुनि मुख्यप्रवृत्त्या तुल्यबलयोः परस्पराभिधानप्रतिबंधे सति इष्टविपरीतनिर्गुण-त्वापत्तेः विवक्षितोभयगुणत्वेनाऽनभिधानात् अवक्तव्यः अयमपि सकलादेशः परस्परावधारितविविधरूपै-कात्मकाभ्यां गुणाभ्यां गुणविशेषणत्वेन युगपदुपक्षिप्ताभ्यां अविवक्षितांशभेदस्य वस्तुनः समस्तस्य एकेन गुणरूपेणाभेदवृत्त्या अभेदोपचारेण वा विधातुं प्रक्रांतत्वात् । स च अवक्तव्यशब्देन अन्यश्च षड्भिर्वचनैः पर्या-यांतरविवक्षया च वक्तव्यत्वात् स्यादवक्तव्यः । यदि सर्वथा अवक्तव्य इत्यपि वा वक्तव्यः स्यात् कुतो बंधमोक्षा-दिप्रक्रियाप्ररूपणाविधिः ? । ताभ्यामेव क्रमेणाभिधित्सायां तथैव वस्तुसकलस्वरूपसंग्रहात् चतुर्थोपि विकल्पः सकलादेशः अयमपि स्यादित्येवार्पयितव्यः सर्वथोभयात्मकत्वे परस्परविरोधात् उभयदोषप्रसंगाच्च, कथमेते निरू-

र्प्यते--सर्वसामान्येन तदभावेन च १ विशिष्टसामान्येन तदभावेन च २ विशिष्टसामान्येन तदभावसामान्येन च ३ विशिष्टसामान्येन तद्विशेषेण च ४ सामान्येन च विशिष्टसामान्येन च ५ द्रव्यसामान्येन गुणसामान्येन च ६ धर्मसमुदायेन तद्व्यतिरेकेण च ७ धर्मसामान्यसंबंधेन तदभावेन च ८ धर्मविशेषसंबंधेन तदभावेन च ९ तद्यथा सर्वसामान्येन तदभावेन इह द्विविधोऽर्थः श्रुतिगम्योऽर्थाधिगम्यश्च । तत्रानपेक्षितवृत्तिनिमित्तः श्रुतिमात्रप्रापितः श्रुतिगम्यः । अर्थप्रकरणसंभवाभिप्रायादिशब्दन्यायेन कल्पितोऽर्थाधिगम्यः । तत्र आत्मा अस्तीति सर्वप्रकारानाश्रयणादिच्छावशात् कल्पितेन सर्वसामान्येन वस्तुत्वेन अस्तीति प्रथमः । तत्प्रतिपक्षेणाऽभावसामान्येनाऽवस्तुत्वेन नास्त्यात्मा इति द्वितीयः । आभ्यामेव युगपदभेदविवक्षायां वाचकाभावान्नाभिधीयत इति तृतीयः । आभ्यामेव क्रमेणार्पिताभ्यामुभयरूपं वस्तु उच्यते इति चतुर्थः । विशिष्टसामान्येन तदभावेन च यथाश्रुतत्वात् श्रुत्युपात्तेन आत्मन्येवाभिसंबंधः ततश्चात्मत्वेनैव अस्त्यात्मा इति प्रथमः । यथाश्रुतप्रतियोगित्वात् अनात्मत्वेनैव नास्त्यात्मा इति द्वितीयः । युगपदुभयाभ्यां आत्मानात्मत्वसदसत्त्वाभ्यामवक्तव्यः । आभ्यामेव क्रमेणार्पिताभ्यामुभयरूपं वस्तूच्यते इति चतुर्थः । विशिष्टसामान्येन तदभावसामान्येन च यथाश्रुतत्वात् आत्मत्वेनैवास्तीति प्रथमः । अभ्युपगमविरोधभयात् वस्त्वंतरात्मना क्षित्युदकज्वलनघटपटगुणकर्मादिना सर्वेण प्रकारेण सामान्यतो नास्तीति द्वितीयः । आभ्यामेव युगपदात्मघटादिसदसत्त्वाभ्यामवक्तव्यः । क्रमेण तु वाच्यत्वात् चतुर्थः । विशिष्टसामान्येन तद्विशेषेण चात्मसामान्येनास्त्यात्मा । आत्मविशेषेण मनुष्यत्वेन नास्त्यात्मा । आत्मत्वमनुष्यत्वापेक्षाभ्यां सदसत्त्वाभ्यां एकत्वे युगपदवक्तव्यः । पर्यायेणाभिधेयत्वाच्चतुर्थः । सामान्येन विशिष्टसामान्येन चाविशेषरूपेण द्रव्यत्वेन अस्त्यात्मा । विशेषेण सामान्येन प्रतियोगिनाऽनात्मत्वेन नास्त्यात्मा । ताभ्यां तु द्रव्यत्वानात्मत्वसदसत्त्वाभ्यां युगपदवक्तव्यः । क्रमेण ताभ्यां वक्तव्यत्वात् चतुर्थः । द्रव्यसामान्येन गुणसामान्येन च वस्तुनस्तथा तथा संभवात् तां तां विवक्षामाश्रित्याविशेषरूपेण द्रव्यत्वेनास्त्यात्मा तत्प्रतियोगिना विशेषरूपेण गुणत्वेन नास्त्यात्मा । ताभ्यां तु द्रव्यत्वगुणत्वसदसत्त्वाभ्यां युगपदवक्तव्यः । क्रमेण तदुभयवाग्गोचरत्वाच्चतुर्थः । धर्मसमुदायेन तद्व्यतिरेकेण च त्रिकालगोचरानेकशक्तिज्ञानादिधर्मसमुदायरूपेणाऽऽस्त्यात्मा । तद्व्यतिरेकेण नास्त्यनुपलब्धेः । ताभ्यां युगपदवक्तव्यः । क्रमेण अभिधेयतामनुभवति इति चतुर्थः । धर्मसामान्यसंबंधेन तदभावेन च गुणरूपगतसामान्यसंबंधविवक्षायां यस्य कस्यचित् धर्मस्य आश्रयत्वेन अस्त्यात्मा । न तु कस्यचिदपि धर्मस्याश्रयो न भवतीति । धर्मसामान्यानाश्रत्वेन नास्त्यात्मा । आभ्यां युगपदवक्तव्यः । पर्यायेण तु तदुभयविशेष्यत्वात् चतुर्थः । धर्मविशेषसंबंधेन तदभावेन च वाऽनेकधर्मिणोऽन्यतमधर्मसंबंधेन तद्विपक्षेण चाविवक्षायां यथास्त्यात्मा । नित्यत्वेन निरवयवत्वेन चेतनत्वेन वा तेषामेवान्यतमधर्मप्रतिपक्षेण नास्त्यात्मा । युगपत्ताभ्यामवक्तव्यः । क्रमेण तदभिधानविषयत्वाच्चतुर्थः । पंचमो भंग उच्यते—त्रिभिः आत्माभिर्व्यंशः जीवस्यानेकद्रव्यात्मकस्याऽनेकपर्यायात्मकस्य च किंचिद्द्रव्यार्थविशेषं पर्यायार्थविशेषं वा आश्रित्यास्तीत्युच्यते । एक आत्मा तस्यैवाऽन्य आत्मा द्रव्यसामान्यं पर्यायसामान्यं तद्विशेषद्वयं वाऽगीकृत्य युगपदविभागाविवक्षायां वचनगोचरातीतः । यथा स्यादस्त्यात्मा द्रव्यत्वेन द्रव्यविशेषेण वा जीवत्वेन मनुष्यत्वादिना वा द्रव्यपर्यायसामान्यमुररीकृत्य वस्तुत्वमसत्त्वमवस्तुत्वासत्त्वं च युगपदभेदाविवक्षायामवाच्यः विशेषद्वयं वा मनुष्यत्वादि यतः सर्वेपि तस्यैकस्यैव ते आत्मनो विद्यंते तदैवेति । ततः स्यादस्ति चाऽवक्तव्यश्च जीवः । अयमपि सकलादेशः, अंशाभेदविवक्षायां एकांशमुखेन सकलसंग्रहात् । तथा षष्ठः त्रिभिः आत्मभिर्व्यंशः यतो वस्तुगतं नास्तित्वमवक्तव्यरूपानुविद्धं नांतरेणात्मभेदं शक्यं कल्पयितुं वस्तुनस्तथापि भावात् । तत्र नास्तित्वं पर्यायाश्रयं । स च पर्यायो युगपद्वृत्तः क्रमवृत्तो वा सहवृत्तो वा जीवस्य पर्यायः अविरोधात् । सहावस्थायी सहवृत्तेः गतींद्रियकाययोगवेदकषायज्ञानसंयमादिः । क्रमवर्ती तु क्रोधादिदेवादिबाल्यादिलक्षणः । तत्र गत्यादिव्यतिरिक्तः क्रोधादिक्रमवृत्तधर्मरूपनैरंतर्यमात्रादर्थांतरभूत एकः, अवस्थितः । द्रव्यार्थो जीवो नाम नास्ति किं तु त एव धर्मास्तथा सन्निविष्टा जीवव्यपदेशभाजः इति अस्यां कल्पनायां नास्तित्वं । यश्च वस्तुत्वेन सन्निति

१ अभिधातुरित्यपि पाठः ।

द्रव्यार्थांशः यश्च तत्प्रतियोगिना वस्तुत्वेनाऽसान्निति पर्यायांशः । ताभ्यां युगपदभेदविवक्षायां अवक्तव्य द्वितीयांशः। तस्मान्नास्ति चावक्तव्यश्चाऽऽत्मा। अयमपि सकलादेशः शेषवागगोचरस्वरूपसमूहस्याऽविनाभा तत्रैवांतर्भूतस्य स्याच्छब्देन द्योतित्वात् । तथा सप्तमो विकल्पः चतुर्भिरात्मभिः, त्र्यंशः द्रव्यार्थविशेष कं दाश्रित्याऽस्तित्वं पर्यायविशेषं च कंचिदाश्रित्य नास्तित्वमिति समुच्चितरूपं भवति । द्वयोरपि प्राधान्ये विवक्षितत्वात् । द्रव्यपर्यायविशेषेण च केनचिद्द्रव्यपर्यायसामान्येन केन चित् युगपदवक्तव्यः इति तृतीयांश ततः स्यादस्ति च नास्तिचाऽवक्तव्यश्च आत्मा । अयमपि सकलादेशः यत सर्वान् द्रव्यार्थान् द्रव्यमित्यभेद देकं द्रव्यार्थं मन्यते । सर्वान् पर्यायार्थांश्च पर्यायजात्यभेदादेकं पर्यायार्थं, अतो विवक्षितवस्तुजात्यभेदात्कृत्स्नं वस्तु एकद्रव्यार्थाभिन्नं एकपर्यायाभेदोपचरितं वा एकमिति सकलसंग्रहात् । अथ कथं विकलादेशः ?

निरंशस्यापि गुणभेदादंशकल्पना विकलादेशः ॥ २९ ॥ स्वेन तत्त्वेनाप्रविष्टभागस्यापि वस्तुनो विविक्तं गुणरूपं स्वरूपोपरंजकमपेक्ष्य प्रकल्पितमंशं कृत्वा अनेकात्मकैकत्वव्यवस्थायां नरसिंहसिंहत्ववत् समुदायात्मकमात्मरूपमभ्युपगम्य कालादिभिरन्योन्यविषयानुप्रवेशरहितांशकल्पनं विकलादेशः । नतु केवलसिंहे सिंहत्ववत् एकात्मकैकत्वपरिग्रहात् यथा वा पानकमनेकखण्डदाडिमकर्पूरादिरसानुविद्धमास्वाद्याऽनेकरसात्मकत्वं, अस्यावसायः पुनः स्वशक्तिविशेषादिदमप्यस्तीदमप्यस्तीति विशेषनिरूपणं क्रियते । तथा नैरात्म्यैकवस्त्वभ्युपगमपूर्वकं हेतुविशेषसामर्थ्यात् अर्पितसाध्यविशेषावधारणं विकलादेशः । कथं ? पुनरर्थस्याऽभिन्नस्य गुणो भेदकः ? दृष्टो हि अभिन्नस्याप्यर्थस्य गुणस्तत्त्वभेदं कल्पयन् । यथा पतत् भवान् पटुरासीत् पटुतर एष म इति गुणविविक्तरूपस्य द्रव्यस्याऽसंभवात् । गुणभेदेन गुणिनोपि भेदः ।

तत्रापि तथा सप्तभंगी ॥ १० ॥ तत्रापि विकलादेशे तथाऽऽदेशवशेन सप्तभंगी वेदितव्या । कथं ? गुणिभेदकेष्वंशेषु क्रमेण यौगपद्येन क्रमयौगपद्याभ्यां वा विवक्षावशात् विकलादेशा भवंति । तत्र प्रथमद्वितीययोरप्रचितः क्रमः, तृतीये यौगपद्यं, चतुर्थे प्रचितः क्रमः, पंचमे षष्ठे वा अप्रचितक्रमयौगपद्ये, सप्तमे प्रचितक्रमयौगपद्ये । तद्यथा सामान्यादिषु द्रव्यार्थादेशेषु केन चिदुपलभ्यमानत्वात् स्यादस्त्येवात्मेति प्रथमो विकलादेशः । अत्रेतरेषां वस्तुनि सतामपि कालादिभिर्भेदविवक्षातः शब्दवाच्यत्वेनांतर्भावाभावान्निरासाभावाच्च न विधिर्न प्रतिषेधः । एवं शेषभंगेष्वपि विवक्षितांशमात्रप्ररूपणायां इतरेष्वौदासीन्येन विकलादेशकल्पना योज्या । ननु च सामान्यार्थाविच्छेदेन विशेषणविशेष्यसंबंधावद्योतनार्थे एवकारे सति तदवधारणादितरेषां निवृत्तिः प्राप्नोति ? नैष दोषः अत्राप्यत एव स्याच्छब्दप्रयोगः कर्तव्यः स्यादस्त्येव जीवः इत्यादि । कोर्थः ? एवकारेणेतरनिवृत्तिप्रसंगे स्वात्मलोपात् सकलो लोपो मा विज्ञायीति वस्तुनि यथावस्थितं धर्मस्वरूपं तथैव द्योतयति । "स्याच्छब्दः विवक्षितार्थवागंगमिति" वचनात् । एवमादेशवशात् सप्तवचन प्रकारा भवंतीति त्रिविकल्पांतरप्रवृत्तिनिमित्ताभावात् । अय च मार्गः द्रव्यार्थिकपर्यायार्थिकनयद्वयाश्रयः । तौ च संग्रहाद्यात्मकौ । ते चार्थनयरूपेण शब्दनयरूपेण च प्रवृत्ताः । तत्र संग्रहव्यवहारर्जुसूत्रा अर्थनयाः । शेषाः शब्दनयाः । तत्र संग्रहः सत्त्वविषयः, सकलं वस्तुतत्त्वं सैति अंतर्भाव्यसंग्रहात् । व्यवहारोऽसत्त्वविषयः विविक्तसत्त्वाऽपरिग्रहादन्यापेक्षासत्त्वाप्रतिपत्तेः । ऋजुसूत्रो वर्तमानविषयः अतीतानागतयोः विनष्टानुत्पन्नत्वेन व्यवहाराभावात् । एते त्रयोऽर्थनयाः एकैकात्मकाः संयुक्ताश्च सप्तवाक्प्रकारान् जनयंति । तत्राद्यः संग्रहः एकः, द्वितीयो व्यवहार एकः, तृतीयः संग्रहव्यवहारौ विभक्तौ, चतुर्थः संग्रहव्यवहारौ समुच्चितौ, पंचमः संग्रहः संग्रहव्यहारौ चाविभक्तौ । षष्ठो व्यवहारः संग्रहव्यवहारौ चाविभक्तौ । सप्तमः संग्रहव्यवहारौ प्रचितौ चाविभक्तौ । एवं ऋजुसूत्रेपि योज्यः । व्यंजनपर्यायास्तु शब्दनयाः द्विविधं वचनं प्रकल्पयंति । अभेदेनाभिधानं भेदेन च यथा शब्दे पर्यायशब्दांतरप्रयोगेपि तस्यैवार्थस्याभिधानाभेदः । समभिरूढे वा प्रवृत्तिनिमित्तस्य च घटस्याभिन्नस्य सामान्येनाभिधानात् । एवंभूतेषु प्रवृत्तिनिमित्तस्य भिन्नस्यैकस्यैवार्थस्याभिधानात् । भेदेना

---

१ पर्याय जात्ये इत्य भेदात् पाठोऽयं ख० पुस्तके । २ सन्मात्रतत्त्वे इत्यर्थः ।

३ ग० पुस्तके विवक्षिताशब्दमात्रप्ररूपणायामिति पाठः ।

भिधानं अथवा, अन्यथा द्वैविध्यमेकस्मिन्नर्थेऽनेकशब्दप्रवृत्तिः प्रत्यर्थं वा शब्दविनिवेश इति । यथा शब्दे अनेकपर्यायशब्द एकः । समभिरूढे वा नैमित्तिकत्वात् शब्दस्यैकशब्दवाच्य एकः । एवंभूते वर्तमान निमित्तशब्द एकवाच्य एक. । अत्र चोद्यते कथमेते अस्तित्वनास्तित्वादयो धर्माः विरुद्धरूपाः एकस्मिन् वस्तुनि अविरोधमुपयांतीत्युच्यते —

विरोधाभावस्तल्लक्षणाभावात् ॥ ३२ ॥ नास्त्येषामादेशवशादर्यमाणानां विरोधः कुतः तल्लक्षणाभावात् । इह विरोधः कल्प्यमानः त्रिधा व्यवतिष्ठते वध्यघातकभावेन वा सहानवस्थात्मना वा प्रतिबध्य प्रतिबधकरूपेण वा । तत्र बध्यघातकभाव अहिनकुलाग्न्युदकादिविषयः, सत्वेकस्मिन् काले विद्यमानयोः सति संयोगे भवति संयोगस्यानेकाश्रयत्वात् द्वित्ववत् । नासंयुक्तमुकदमग्निं विध्यापयति सर्वत्राग्न्यभावप्रसंगात् तत. सति संयोगे बलीयसोत्तरकालमितरद्बाध्यते नचैवमस्तित्वनास्तित्वयोः क्षणमात्रमपि एकस्मिन् वृत्तिरस्ति इति भवताभ्युपगम्यते यतो बध्यघातकभावरूपो विरोधः तयोः कल्प्येत । अथैकस्मिन् वृत्तिरभ्युपगम्येत तत्तुल्यबलहेतुसाध्यत्वात् तयोरन्यतरस्य बलीयस्त्वाभावात् बध्यघातकत्वाभावः अतस्तल्लक्षणाभावात् नासौ विरोधः संभवति । नापि सहानवस्थानलक्षणो विरोधः तल्लक्षणाभावात् । स ह्ययुगपत्कालयोर्भवति यथा आम्रफले श्यामतापीतयोः । पीततोत्पद्यमाना पूर्वकालभाविनीं श्यामतां निरुणद्धि । न च तथा जीवस्यास्तित्वनास्तित्वे पूर्वोत्तरकालभाविनी । यदि स्यातां । अस्तित्वकाले नास्तित्वाभावात् जीवसत्तामात्रे सर्वं प्राप्नुवीत । नास्तित्वकाले वाऽस्तित्वाभावात्तदाश्रयो बंधमोक्षादिव्यवहारो विरोधमुपगच्छेत् । सर्वथैवासतः पुन आत्मलाभाभावात् । सर्वथा च सतः पुनरभावप्राप्त्यनुपपत्तेः नैतयोः सहानवस्थानं युज्यते । तथा जीवादिषु प्रतिबध्यप्रतिबंधकभावोपि न विरोधः संभवति । यथा सति फलवृंतसंयोगे प्रतिबंधकगौरवं पतनकर्म नारभते प्रतिबंधात् तदभावे तु पतनकर्म दृष्यते "संयोगाभावे गुरुत्वात् पतनमिति" वचनात् । नच तथास्तित्वं नास्तित्वस्य प्रयोजनं प्रतिबध्नाति तस्मिन्नेव काले परद्रव्यादिरूपेणानुपलब्धिबुद्ध्युत्पत्तिदर्शनात् । नास्तित्वं वा सदस्तित्वप्रयोजनं प्रतिबध्नाति तदैव स्वरूपाद्यपेक्षयोपलब्धिबुद्धिदर्शनात् । तस्मात् वाङ्मात्रमेव विरोधः । एवमर्पणाभेदादविरुद्धोऽनेकात्मको जीव इति स्थितमेतत्—

इतितत्त्वार्थवार्तिकव्याख्यानालंकारे चतुर्थोध्यायः ॥ ४ ॥

अथ पंचमोध्यायः

इदानीं सम्यग्दर्शनस्य विषयभावेनोपक्षिप्तेषु जीवादिषु अजीवपदार्थो विचारप्राप्तः तस्य भेदसंज्ञासंकीर्तनार्थमिदमुच्यते तत्पूर्वकत्वादितरस्येति —

अजीवकाया धर्माधर्माकाशपुद्गलाः ॥ १ ॥

अजीवकाया इति समानाधिकरणा वृत्तिः ॥ १ ॥ अजीवाश्च ते कायाश्च ते अजीवकाया इति सामानाधिकरणलक्षणा वृत्तिरियं वेदितव्या । कथं वृत्तिः विशेषणं विशेष्येणेति सति व्यभिचारे नीलोत्पलादिषु वृत्तिः ? इहाप्यस्ति व्यभिचारः । कायशब्दस्य जीवेष्वपि वृत्तेः, अजीवशब्दस्यापि काले । भिन्नाधिकरणवृत्तौ को दोषः ?

भिन्नाधिकरणत्वे हि अर्थांतरभावप्रसंगः ॥ २ ॥ यथा राज्ञः पुरुषः राजपुरुष इति अर्थांतरभावे भिन्नाधिकरणत्वं भवति । तथा अजीवानां कायः अजीवकायः इति भिन्नाधिकरणत्वे गृह्यमाणेऽर्थांतरभावः प्रसज्येत ।

दृष्टत्वात्सुवर्णांगुलीयकवदिति चेन्न तत्रान्यविशेषनिवृत्त्यर्थत्वात् ॥ ३ ॥ स्यान्मतं भिन्नाधिकरणत्वेपि नार्थांतरभावः, कुतः ? दृष्टत्वात् । कथं ? सुवर्णांगुलीयकवत् । यथा सुवर्णस्यांऽगुलीयकं

---

१ जैनेंद्रीयं सूत्रं । २ यथोत्तरभावे. पाठोऽयं ब, पुस्तके ।

सुवर्णांगुलीयकमिति भिन्नाधिकरणत्वेपि नार्थभेदः। तथा इहापि न दोष इति। तन्न किं कारणं? तत्रान्यविशेषनिवृत्त्यर्थत्वात् तत्र हि सुवर्णशब्दप्रयोगः रूप्यादेः प्रमाणांतरस्य च निवृत्त्यर्थं, सुवर्णस्येदमगुलीयकं न रूप्यादेर्न माषादेर्वेति, न तथेह अजीवस्य काया अजीवकाया इति विशेषणेन कदाचिदर्थांतरनिवृत्तिरस्ति ॥

अस्तु वाऽविरोधात् ॥४॥ अथवास्तु भिन्नाधिकरणा वृत्तिः। कुतः? अविरोधात्। यस्माज्जीवोपि कायः पंचास्तिकायोपदेशात्, अतस्तन्निवृत्त्यर्थोऽत्राऽजीवशब्दप्रयोगः। अजीवस्य कायो न जीवस्येति। किं च-

कथंचिद्भेदोपपत्तेः ॥ ५ ॥ केनचित्प्रकारेण संज्ञालक्षणप्रयोजनाद् भेद उपपद्यते यथा सुवर्णस्यांगुलीयकमित्यत्र सुवर्णं सामान्यं तद्विशेषोऽगुलीयकं तयोः सामान्यविशेषयोः संज्ञालक्षणादिभिः कथंचिन्नानात्वं। यदि सर्वथैकत्वं स्यात् सुवर्णसामान्यस्यांगुलीयकवत् कुंडलादिषु वृत्तिर्न स्यात्। सुवर्णसामान्यवद्वाऽगुलीयं तस्य कुंडलादिषु वृत्तिः स्यात्। तत एवान्यनिवृत्त्यर्थः प्रयोगो युक्तः, सुवर्णस्येदमगुलीयकं न रूप्यादेरिति। यदि सर्वथैकत्वं स्यात् व्यपदेश एव न स्यात्। तथा अजीवानां काया इत्यत्रापि कायशब्दः प्रदेशवाची। प्रदेशाश्च धर्मादीनां वक्ष्यन्ते, ते च तेभ्यः संज्ञालक्षणादिभिः कथंचिद्भिन्नाः। अन्यथा एकानेकत्वे धर्मादीनामेकत्ववत् प्रदेशानामप्येकत्वं स्यात्। प्रदेशानां बहुत्ववत् धर्मादीनां बहुत्वं प्रसज्येत, तत एव अन्यनिवृत्त्यर्थः प्रयोगो युक्तः, अजीवानां काया न जीवस्येति। यदि सर्वथैकत्वं स्यात् व्यपदेश एव न स्यात् ततो भेदोपपत्तेः युक्ता भिन्नाधिकरणा वृत्तिः। ननु चाभेदेपि लोके व्यपदेशो दृष्टः यथा शिलापुत्रकस्य शरीरं, राहोः शिर इति, न हि शिलापुत्रकादन्यच्छरीरमस्ति नापि राहोरन्यच्छिरः शिरोमात्रत्वादिति। तत्राप्यस्ति भेदः। कुतः? शक्तितः। योऽनेकक्रियानिष्पादनशक्तिभेदेन भिन्नरूपः शिलापुत्रकः तस्येदं शरीरं एकक्रियाविषयमिति शब्दप्रकल्पितात् बुद्धिभेदाद्वा कथंचित्पृथक्त्वमध्यवसेय कुतश्चेतदेव तदन्यनिवृत्त्यर्थं विशेषणं उपादीयते। शिलापुत्रकस्येदं शरीरं न मनुष्यादेः, राहोरिदं शिरः नान्यस्य इत्येकांतिकैकत्वे हि अन्यनिवृत्तिर्न स्यात्। यथा सुवर्णस्य सुवर्णं, घटस्य घट इति ॥

अजीव इत्यभावमात्रप्रसंग इति चेन्न भावांतरप्रतिपत्तेरनश्ववत् ॥ ६ ॥ स्यान्मतं न जीवोऽजीव इत्युक्तेऽभावमात्रं प्रसज्येत यथा न भावः अभाव इति तन्न। किं कारणं? भावांतरप्रतिपत्तेः। कथं? अनश्ववत्। यथा नायमश्वः अनश्व इत्युक्ते नाभावसंप्रत्ययः किंतु नञिव युक्तमन्यसदृशाधिकरणे तथाह्यर्थ इति अन्यस्मिन् भाव एव तुल्यधर्मैकशफादिलक्षणे गर्दभे संप्रत्ययो भवति। एवमिहापि नायं जीव इति प्रतिषेधात् नाभावसंप्रत्ययः, किं तु अन्यस्मिन् भाव अनुपयोगलक्षणे धर्मादौ प्रतिपत्तिर्भवति। सादृश्याभावात् अप्रतिपत्तिरिति चेन्न सत्त्वद्रव्यत्वादिभिः सादृश्योपपत्तेः। अथोक्ते यथा न भावः, अभावः इत्युक्ते अभावमात्रसंप्रत्यय इति तदप्ययुक्तं सत एव परस्परत्वादिभिः अभावशब्दगोचरत्वोपपत्तेः ॥

अभ्यंतरीकृतभेदार्थः कायशब्दः ॥ ७ ॥ इवार्थमभ्यंतरीकृत्य अत्र कायशब्दः प्रयुक्तः। काया इव काया इति। क उपमार्थः? यथौदारिकादिशरीरनामकर्मोदयवशात् पुद्गलैश्चीयंते कायाः। तथा धर्मादीनामनादिपारिणामिकप्रदेशचयनात्कायत्वं।

तद्ग्रहणं प्रदेशावयवबहुत्वज्ञापनार्थं ॥ ८ ॥ तस्य कायशब्दस्य ग्रहणं क्रियते। किमर्थं? प्रदेशावयवबहुत्वज्ञापनार्थं। मुख्यरूपेणाविद्यमानेपि श्रोतॄणां सुखावबोधार्थं प्रज्ञया द्रव्यपरमाण्ववगाहमात्रत्वेन प्रदिश्यंत इति प्रदेशाः, प्रदेशा एवावयवाः प्रदेशावयवाः तेषां बहुत्वस्य ज्ञापनार्थं ॥

नासंख्येयाः प्रदेशाः धर्माधर्मैकजीवानामिति शास्त्रप्रवृत्तेः ॥ ९ ॥ न तत्प्रयोजनं उपपद्यते कुतः? अन्यत एव तत्सिद्धेः। वक्ष्यते हि, असंख्येयाः प्रदेशाः धर्माधर्मैकजीवानां[1] इत्यत एवैषां प्रदेशबहुत्वं सिद्धं।

---

१ ग, पुस्तके यथाक्रममितिपाठः।

नार्थः कायग्रहणेन प्रदेशसंख्यावधारणार्थमिति चेन्नातोऽप्यनिश्चयात् ॥ १० ॥ स्यादेतत् 'असंख्येयाः प्रदेशाः धर्माधर्मैकजीवानां' इति अनेन प्रदेशसंख्यावधारणं क्रियते। कुतः ? त्रयाणां संभूयप्रदेशासंख्येयत्वप्रतिपत्तेः । ततः एकैकस्याऽसंख्येयप्रदेशख्यापनार्थं कायग्रहणमिति तन्न । किं कारणं? अतोऽप्यनिश्चयात् । कायग्रहणादपि नास्ति निश्चयः प्रदेशप्रचयमात्रप्रतिपत्तेः । कुतस्तर्हि तन्निश्चयः ?

लोकाकाशेऽवगाह इत्यादि वचनात् तन्निश्चयः ॥ ११ ॥ यदयं लोकाकाशेऽवगाह इत्युक्त्वा धर्माधर्मयोः कृत्स्न इत्यादि वक्ष्यते । तेन तस्य प्रदेशपरिमाणस्य निश्चयोभवति ।

अप्रदेशैकद्रव्यत्वप्रसंग इति चेन्न उक्तत्वात् ॥ १२ ॥ स्यादेतत् कायग्रहणात् ऋतेऽप्रदेशकद्रव्यता प्राप्नोति अतस्तन्निवृत्त्यर्थं कायग्रहणमिति ? तन्न किं कारणं? उक्तत्वात् । उक्तमेतत् 'असंख्येयाः प्रदेशाः धर्माधर्मैकजीवानां' इति वक्ष्यते ॥

आर्षानुवादार्थमिति चेन्न तदवस्थत्वात् ॥ १३ ॥ स्यादेतत् आर्षमेवं प्रवृत्तं पंचास्तिकाया इत्यतः तदनुवादार्थं कायग्रहणमिति तच्च न । कस्मात् ? तदवस्थत्वात् । असंख्येयाः प्रदेशाः इत्यनेनैवाऽर्षानुवादस्य कृतत्वात् ।

स्वभावापरित्यागार्थमिति चेन्न नित्यावस्थितवचनात् सिद्धेः ॥ १४ ॥ स्यान्मतं कायस्वभावापरित्यागार्थं कायग्रहणमिति तन्न। किं कारणं? नित्यावस्थितवचनात् सिद्धेः। वक्ष्यते हि "नित्यावस्थितान्यरूपाणीति" तत एव स्वभावापरित्यागः सिद्धः। तर्हि कायग्रहणं न कर्तव्यं? कर्तव्यं। किं च प्रयोजनं?

तन्निमित्तावसंख्येयप्रदेशावधारणासिद्धेः ॥ १५ ॥ तस्य कायशब्दस्य पंचस्वपि अस्तिकायेषु प्रदेशावयवबहुत्वार्थस्य सिद्धौ सत्यां उत्तरवचनमवधारणार्थं युज्यते । असंख्येयाः प्रदेशाः न संख्येयाः नाप्यनंताः इति विधिपूर्वकत्वादवधारणस्य ।

अद्धाप्रदेशप्रतिषेधार्थं च ॥ ॥ १६ ॥ अद्धा शब्दो निपातः कालवाची स वक्ष्यमाणलक्षणः तस्य प्रदेशप्रतिषेधार्थमिह कायग्रहणं क्रियते । यथाणोः प्रदेशमात्रत्वात् द्वितीयादयोऽस्य प्रदेशा न सतीत्यप्रदेशोऽणुः । तथा कालपरमाणुरपि एकप्रदेशत्वादप्रदेश इति ।

धर्मादयः संज्ञा सामायिक्यः ॥ १७ ॥ धर्मादयः संज्ञाः सामायिक्यो द्रष्टव्याः । आर्हते हि प्रवचनेऽनादिनिधनेऽर्हदादिभिः यथाकालं, अभिव्यक्तज्ञानदर्शनातिशयप्रकाशैरवद्योतितार्थसारे रूढा एताः संज्ञा ज्ञेया ॥

क्रियानिमित्ता वा ॥ १८ ॥ अथवा क्रियानिमित्ता एताः संज्ञा वेदितव्याः । कथमिति चेदुच्यते-

स्वयं क्रियापरिणामिनां साचिव्यावधानाद्धर्मः ॥ १९ ॥ स्वयं क्रियापरिणामिनां जीवपुद्गलानां यस्मात्साचिव्यं दधाति तस्माद्धर्म इत्याख्यायते ॥

तद्विपरीतोऽधर्मः ॥ २० ॥ तस्य विपरीतलक्षणः अधर्म इत्याम्नायते ॥

आकाशंतेऽस्मिन् द्रव्याणि स्वयं (वा) काशत इत्याकाशं ॥ २१ ॥ जीवादीनि द्रव्याणि स्वैः स्वैः पर्यायैः-अव्यतिरेकेण यस्मिन्नाकाशंते प्रकाशंते तदाकाशं। स्वयं चाऽऽत्मीयपर्यायमर्यादया आकाशत इत्याकाशं ॥

अवकाशदानाद्वा ॥ २२ ॥ अथवा इतरेषां द्रव्याणां अवकाशदानादाकाशमिति पृषोदरादिषु निपातितः शब्दः ।

---

१ प्रदेशसंख्येयाऽवधारणार्थमिति ख. पुस्तके पाठः ॥ २ प्रतिषेधार्थं च ख. पुस्तके पाठः ।

अलोकाकाशस्यावकाशदानाभावात्तदभाव इतिचेन्न तत्सामर्थ्याविरहात् ॥ २३ ॥
स्यान्मतं ? यद्यवकाशदानादाकाशमित्युच्यते अलोकाकाशे जीवाद्यवकाशदानाभावात् आकाशव्यपदेशो नोपपद्यते इति तन्न । किं कारणं ? तत्सामर्थ्याविरहात् । यथैष्यत्कालस्यातिदूरस्यापि वर्तमानप्राप्त्यर्हत्वात् तत्प्राप्त्यभावेपि भाविष्यद्व्यपदेशो भवति । एवमलोकाकाशस्यावगाहिद्रव्याभावेपि अवगाहनशक्तिर-विरुद्धा इत्यवकाशदानात् आकाशत्वं युज्यते । अथवा क्रियानिमित्तत्वेपि रूढिविशेषबललाभात् गो-शब्दवत् तदभावेपि प्रवर्तते ।

पूरणगलनान्वर्थसंज्ञत्वात्पुद्गलाः ॥ २४ ॥ यथा भासं करोति भास्कर इति भासनार्थमतर्नीय भास्करसंज्ञान्वर्था प्रवर्तते तथा भेदात् संघातात् भेदसंघाताभ्यां च पूर्यंते गलंते चेति पूरणगलनात्मिकां क्रियामंतर्भाव्य पुद्गलशब्दोन्वर्थः पृषोदरादिषु निपातितः । यथा शवशायनं श्मशानमिति–

परमाणुषु तदभावात् पुद्गलत्वाभाव इति चेन्न गुणापेक्षया तत्सिद्धेः ॥ २५ ॥
स्यान्मतं–अणूनां निरवयवत्वात् पूरणगलनक्रियाभावात् पुद्गलव्यपदेशाभावप्रसंग इति ? तन्न किं कारणं ? गुणापेक्षया तत्सिद्धेः । रूपरसगंधस्पर्शयुक्ता हि परमाणवः एकगुणरूपादिपरिणताः द्वित्रिचतुःसंख्येयासं-ख्येयानंतगुणत्वेन वर्धते । तथैव हानिमपि उपयांतीति गुणापेक्षया पूरणगलनक्रियोपपत्तेः परमाणुष्वपि पुद्गलत्वमविरुद्धं । अथवा गुण उपचारात् कल्पनं पूरणगलनयोः भावित्वात् भूतत्वाच्च शक्त्यपेक्षया परमाणुषु पुद्गलत्वोपचारः ।

पुंगिलनाद्वा ॥ २६ ॥ अथवा पुमांसो जीवाः तैः शरीराहारविषयकरणापकरणादिभावेन गिल्यंत इति पुद्गलाः । अण्वादिषु तदभावादपुद्गलत्वमिति चेत् उक्तोत्तरमेतत् ॥

बहुवचनं स्वातंत्र्यप्रतिपत्त्यर्थं ॥ २७ ॥ धर्माधर्माकाशपुद्गला इति बहुवचनं स्वातंत्र्यप्रतिपत्त्यर्थं द्रष्टव्यं । किं पुनः स्वातंत्र्यं धर्मादयो गत्याद्युपग्रहान् प्रति वर्तमानाः स्वयमेव तथा परिणमते न परप्रत्यया-धीना तेषां प्रवृत्तिः इत्येतदाविवक्षितं स्वातंत्र्यं । ननु च बाह्यद्रव्यादिनिमित्तवशात् पारिणामिनां परिणाम उपलभ्यते स च स्वातंत्र्ये सति विरुध्यत इति ? नैष दोषः बाह्यस्य निमित्तवशात्, न हि गत्यादिपरिणामिनो जीवपुद्गलाः गत्याद्युपग्रहे धर्मादीनां प्रेरकाः । ननु इतरेतरयोगलक्षणे द्वंद्वे न्यायप्राप्तं बहुवचनं तेन कथं स्वातंत्र्यं प्रतीयते ? समाहारे समुदायप्रदाने एकवचनेन सिद्धे बहुवचनं ज्ञापकं स्वातंत्र्यस्य । यथा हृत इत्यत्र एकवचनेन सिद्धे बहुवचनेन ज्ञापकं अनुक्तस्यापि हृत उत्पत्तिर्यथा स्यात् इति तेन सिद्धः । अंते भवः अंतिम यमेन प्रोक्तं याम्यं धर्मशास्त्रमित्यादि ॥

प्रशस्ताभिधानाद्धर्मग्रहणमादौ ॥२८॥ धर्मशब्दोऽयं लोके प्रशस्तार्थः ततोऽस्य ग्रहणमादौ क्रियते

तदनंतरमधर्मग्रहणं क्रियते कुतः लोकव्यवस्थाहेतुत्वात् ॥ २९ ॥ तदनंतरं अधर्मग्रहणं क्रियते । कुतः ? लोकव्यवस्थाहेतुत्वात् । पंचास्तिकायाः कालश्च लोकः अवतिष्ठते । पदार्थाः अनया आकृत्येत्यव-स्थाविविधसन्निवेशा वेत्रासनाद्याकारा इत्यर्थः । लोकस्य व्यवस्था तस्या हेतुत्वात् लोकव्यवस्थाहेतुत्वात् । असति हि अधर्मास्तिकाये गतिमतां द्रव्याणां गतिविषयानियमाभावात् । विष्वग्भावे सति लोकव्यवस्था विशिष्टा न स्यात् अतोऽस्य धर्मानंतरं ग्रहणं न्याय्यं ।

तत्प्रतिपक्षत्वाच्च ॥ ३० ॥ तस्य धर्मास्तिकायस्य प्रतिपक्षोऽधर्मास्तिकायः स्थितिकारणत्वात्[१] ततश्चानंतरं ग्रहणं क्रियते ।

तत्परिच्छेदत्वात्तदनंतरं आकाशग्रहणं ॥ ३१ ॥ ताभ्यां धर्माधर्माभ्यां आकाशं परिच्छिद्यते । यत्र धर्माधर्मौ तल्लोकाकाशं इतरदलोकाकाशमित्यतः तदनंतरं आकाशग्रहणं क्रियते ।

---

१ निमित्तत्वात् पाठोऽयं ग, पुस्तके

अमूर्तत्वसाधर्म्याच्च ॥ ३२ ॥ यथा धर्माधर्मावमूर्तौ रूपादिविरहादेवमाकाशमप्यमुर्तं । अत आनंतरमुक्तं ।

तदवगाहित्वात् तत्समीपे पुद्गलवचनं ॥ ३३ ॥ तदाकाशमवगाह्य पुद्गला वर्तंते इति तत्स-समीपे तेषां वचनं क्रियते ॥

आकाशग्रहणमादौ धर्मादीनामाधारत्वात् इति चेन्न लोकविनिवेशस्यानादित्वात् ३४ स्यान्मतं धर्मादीनां पंचानामपि द्रव्याणामाकाशं, आधारः साधारणः ततस्तस्य ग्रहणं सर्वेषामादौ न्याय्य-मिति तन्न, किं कारण ? लोकविनिवेशस्यानादित्वात् । नायं नियमोऽस्ति लोकविनिवेशे आकशमाधारः इत-राणि द्रव्याणि आधेयानि इति । किं तु लोकविनिवेशक्रम एवमयमनादिसिद्ध इति नाकाशमाधारः, आ-दिमतां हि कुंडवदरादीनां दृष्ट अधाराधेयभावः ।

आर्षविरोध इति चेन्न आदेशवचनात् ॥ ३५ ॥ स्यादेतत् यद्याधाराध्रेयभावो नेष्यते, युदुक्त मार्षे स्वप्रतिष्ठमाकाशं आकाशप्रतिष्ठं तनुवातवलय तनुवातवलयप्रतिष्ठं घनवातवलयं तत्प्रतिष्ठं घनोदधि-वलयं इत्यादि तद्विरोधः इति तन्न । किं कारणं ? आदेशवचनात् । यदि एकांतेनाधाराधेयभावो न स्यात् स्यादार्षविरोधः यदा तु स्यादाधाराधेयभाव इति स्यान्नाधाराधेयभाव इति आदेशवचनादिष्यते ततोनास्त्यार्ष-विरोधः । कथमिति च दुच्यते–आकाशादीनां द्रव्यार्थादेशात् स्यादाधाराधेयन्याभावो यतः पर्यायार्थिकगुण-भावे द्रव्यार्थिकप्रधान्यात् प्रतिनियतानादिपारिणामिकद्रव्यार्थेनाऽधिष्ठानानामाकाशादीनां षण्णामाधाराधेय-पर्यायाभावः । द्रव्यार्थिकगुणभावे च पर्यायार्थिकप्राधान्यात् षण्णामपि द्रव्याणां आदिमत्त्वोपपत्तेराधाराधे यभावो युज्यते । ततस्तदपेक्षया आधाराधेयभाव आर्षे प्रणीत इति नास्ति विरोधः । अथवा व्यवहारनयादे-शात् स्यादाधाराधेयता । यतोऽनादिपारिणामिकलोकविनिवेशेऽपि व्यवहार एवं प्रवृत्तः आकाशमाधारः अन्यानि द्रव्याणि आधेयानि इति । एवंभूतनयादेशात् स्यादनाधाराधेयता यतोऽनादिपारिणामिकलोक विनिवेशस्यैवंभूतत्वात् स्वात्मप्रतिष्ठान्येव सर्वद्रव्याणि इति । न नुव्यवहारनयापेक्षया आधाराधेयभावाभ्युपगमे ऽनवस्थाप्रसंगः घनोदधिवलयस्य घनवातवलयमाधारः घनवातवलयस्य तनुवातवलयं तनुवातवलस्य आकाशं आकाशस्याऽन्यत तस्यान्यत् तस्याप्यन्यत् इति ? नैषः दोषः आकाशस्य सर्वगतत्वात् अनंतत्वाच्च । यद्धि सर्वगत, अनंतं च तस्य सर्वत्र सान्निध्यात् तस्याप्यन्यत् तस्याप्यन्यत् इति व्यवहाराभावात् अनवस्था नास्ति । परिशेषादसर्वगतस्यांतवतः मूर्तिमतः सावयवस्यैंद्रियकस्य स्यादनवस्था । यदि सर्वगतत्वात् अस्यानव-स्था दृष्टा सोच्यते नैषोच्यते ततो विमुच्यतामनवस्थादोषकल्पना । तस्मान्निःप्रतिद्वंद्वः पूर्वोक्त एवास्तु क्रमहेतुः

कालोपसंख्यानमिति चेन्न वक्ष्यमाणलक्षणत्वात् ॥ ३६ ॥ स्यादेतत्कालोपि कश्चिदजीवप-दार्थोस्ति अतश्चास्ति यद्भाष्ये बहुकृत्वः षड्द्रव्याणि इत्युक्तं अतोस्योपसंख्यानं कर्तव्यमिति ? तन्न किं कारणं वक्ष्यमाणलक्षणत्वात् । वक्ष्यते हि तस्य लक्षणमुपरिष्टात्। अत्राह सर्वद्रव्यपर्यायेषु केवलस्य इत्येवमा-दिषु द्रव्याण्युक्तानि कानि तानीत्यत्रोच्यते–

द्रव्याणि ॥ १२ ॥

स्वपरप्रत्ययोत्पादविगमपर्यायैः द्रूयंते द्रवंति वा तानीति द्रव्याणि ॥ १ ॥ स्वश्च परश्च स्वपरौ प्रत्ययौ ययोः तौ स्वपरप्रत्ययौ । उत्पादश्च विगमश्चोत्पादविगमौ येषां ते स्वपरप्रत्ययोत्पादविगमाः । के पुनस्ते ? पर्यायाः । द्रव्यक्षेत्रकालभावलक्षणो बाह्यः प्रत्ययः परप्रत्ययः तस्मिन् सत्यपि स्वयमतत्परिणा-मोऽर्थो न पर्यायांतरं आस्कंदति इति ? तत्समर्थः स्वश्च प्रत्ययः । तावुभौ संभूयभावानां उत्पादविगमयोः हेतू भवतः नान्यतरापाये कुशूलस्थमाषपच्यमानोदकस्थघोटकमाषवत्, एवमुभयहेतुकोत्पादविगमैः तैस्तैः स्वपर्यायैः द्रूयंते गम्यंते द्रवंति गच्छंति तान् पर्यायानिति द्रव्याणीति व्यपदिश्यंते । भेदनयवशात् कर्तृकर्मणोर्भेदं कृत्वा निर्देशः क्रियते स्वजात्यपरित्यागेनावस्थितिरन्वयैरुपलब्धस्वरूपाणां तु मुहुर्मुहुरुत्पादा-

विगमवतां च भेदोपपत्तेः। यदा द्रव्याणां कर्म विवक्षा तदा न्यायप्राप्तः कर्मणि यः। यदा कर्तृविवक्षा तदा बहुलापेक्षया कर्तरि यः। अथवा उत्पादकविनश्वरनानापर्यायोत्पादविनाशाविच्छेदेपि सांततिकद्रव्यार्थादेशवशेन द्रवणात् गमनात् संप्रत्ययात् द्रव्याणि कुत एतत्? गत्यर्थानां ज्ञानार्थत्वात्।

द्रव्यार्थे वा निपातितो द्रव्यशब्दः ॥ २ ॥ अथवा द्रव्यं भव्य इत्यनेन निपातितो द्रव्यशब्दो वेदितव्यः। द्रु इव भवतीति द्रव्यं। क उपमार्थः? द्रु इति दारु नाम यथा अग्रंथि अचिन्ह दारु तक्षणे कल्प्यमानं तेन तेन अभिलपिताकारेणाऽऽविर्भवति। तथा द्रव्यमपि आत्मपरिणामगमनसामर्थ्ये पाषाणखननोदकवदविभक्तकर्तृकरणमुभयनिमित्तवशोपनीतात्मना तेन तेन पर्यायेण द्रु इव भवतीति द्रव्यमित्युपमीयते ॥

द्रव्यत्वादिति चेन्न तदभावात् ॥ ३ ॥ स्यान्मतं यथा दंडसंबंधात् दंडीत्यभिधानं प्रत्ययश्च देवदत्ते भवति तथा द्रव्यत्वं नाम सामान्यविशेषोऽस्ति पृथिव्यादिषु द्रव्यमिति प्रत्ययाभिधानानां प्रवृत्तिदर्शनात्। गुणकर्मभ्यो व्यावृत्त्युपलब्धेश्चानुमीयमानान्वयव्यतिरेकः तेन योगाद्द्रव्य न पर्यायद्रवणादिति। तन्न किं कारणं? तदभावात् यथा दंडसंबंधात् प्राक् देवदत्तो जात्यादिभिः सिद्धः। देवदत्तसंबंधाच्च प्राग्दंडो वृत्तत्वद्राघिमादिभिः प्रसिद्धः ततस्तयोः संबंधो युक्तः। नच तथा द्रव्यत्वयोगात् प्राक् द्रव्यमुपलभ्यते यद्युपलभ्येत संबंधकल्पनमर्थकं स्यात्। द्रव्यत्वमपि द्रव्यसंबंधात् प्राङ् नोपलब्धस्वरूप, अतः तयोरसतोर्न युक्तः संबंधः। अस्तित्वे चाभ्युपगम्यमाने पृथगनुपलभ्यमानशक्तिकयोः संबंधेपि न तच्छक्तिप्रादुर्भावोस्ति, यथा जात्यन्धयोः पृथगदर्शनशक्तिविरहात्, न योगेपि रूपालोकनशक्तिसंभवः। तथा द्रव्यद्रव्यत्वयोः-अपि द्रव्यप्रत्ययाभिधानोत्पसामर्थ्यात् तत्संबंधेपि न सामर्थ्यं। तत्र द्रव्यं तावत् प्राक् द्रव्यत्वसमवायात् द्रव्यात्मनैव नात्मनि द्रव्यप्रत्ययाभिधानयोरुत्पादकं। यदि स्यात्? द्रव्यत्वसंबंधस्य वैयर्थ्यं स्यात्। तथा द्रव्यत्वमपि प्राग्द्रव्यसमवायात् द्रव्यत्वात्मन्येव न द्रव्यत्वप्रत्ययाभिधाननिमित्तमस्ति। मा भूद्द्रव्यत्वस्य द्रव्येण समवायस्य वैयर्थ्यमिति अतस्तयोः पृथगनुपलभ्यमानसामर्थ्ययोः संबंधेपि न तत्सामर्थ्यमस्ति इत्यतः न द्रव्यत्वयोगाद्द्रव्यमिति। ननु च द्रव्यत्वसंबंधात् प्राक् द्रव्यव्यपदेशो नास्ति अस्ति तु तत् ततः सतो द्रव्यत्वस्य युक्तः संबंधः नैष दोषः। अस्ति परिहारः। कुतः? सतोऽसत्त्वात् नहि तद्द्रव्यं स्वतोस्ति सत्तायोगादेव सत्स्यात् सच नास्तीत्युक्तं। अथासतामपि संबंधः स्यात् खरविषाणादीनामपि स्यात्। किंच द्रव्यत्वं नाम सर्वगतः पदार्थः स यदि अतदात्मकेन संबध्यते गुणकर्मभिः खरविषाणादिभिश्च संबध्येत नचेष्यते संबंधः। अथ तदात्मकेनैव संबध्यते द्रव्यत्वसंबंधो व्यर्थः प्रागपि तदात्मकत्वात् ततः स्वतो द्रव्यसिद्धिः। आह समवायिकारणत्वाद्द्रव्यत्वेन द्रव्यमेव संबध्यते न गुणकर्माणि नापि खरविषाणादीनि द्रव्यत्वस्य हि द्रव्यमेव समवायिकारणमिष्टं नेतराणि इत्युच्यते-

न स्वतोऽसिद्धत्वात् ॥ ४ ॥ यदि द्रव्यत्वादन्यद्द्रव्यं स्वतःसिद्धं स्यात् अतस्तत्समवायिकारणमिति व्यपदेशार्हं स्यात् नच तत्स्वतःसिद्धं किंचिदस्ति अतः स्वतोऽसिद्धत्वात् न तत्समवायिकारणं अथ तत्स्वतोऽसिद्धमपि समवायि कारणं खरविषाणादिषु को मत्सरः। अथाऽसत्त्वान्न समवायिकारणं तानि तत्त्वसत्त्वाद्द्रव्यमपि द्रव्यत्वस्य न समवायिकारणं। किंच—

अतस्तत्सिद्धेः ॥ ५ ॥ यत एव द्रव्यत्वस्यासमवायिकारणं द्रव्यं न गुणकर्माणि अतस्तद्द्रव्यत्वं द्रव्य एव समवैति न गुणकर्मादिषु इति विवक्षितं ननु, अत एव द्रव्यात्मैव द्रव्यत्वं आभ्यंतरार्थोऽनादिपारिणामिकद्रव्यापरित्यागी न द्रव्याद्बहिरन्यः सामान्यविशेषाख्यः इति एतत्सिध्यति। आह विशेषोपलब्धिर्द्रव्यमेव समवायिकारणं द्रव्यत्वस्य। को विशेषः? आश्रयभावः यस्माद्द्रव्यमितरेषां पदार्थानामाधारः उच्यते-

न द्रव्यमाश्रयः स्वतोऽसिद्धत्वात् ॥ ६ ॥ लोके स्वतः सिद्धं आधेयानामाश्रयो भवति यथा घटो जलादीनां न तथा द्रव्यत्वात् पृथक् द्रव्यं स्वतःसिद्धमस्ति यदाधारो द्रव्यत्वस्येति व्यपदिश्येत। किंच—

---

१ द्रव्यत्वप्रत्ययाभिधानेत्यादि ग. पुस्तके पाठः

द्रव्याभिधानानुपपत्तिश्च ॥ ७ ॥ यस्य वादिना द्रव्यत्वयोगात् द्रव्यमित्यभिमतं तस्य द्रव्यमित्यभिधानं नोपपद्येत कथं? इति चेत् उच्यते इहाऽभेदेन वा व्यपदेशः स्यात् भेदेन वा? यदि अभेदेन व्यपदेशः, यथा यष्टिसहचरितः पुरुषो यष्टिरित्युच्यते तथा द्रव्यत्वसहचरितं द्रव्यत्वमिति व्यपदिश्यते न द्रव्यमिति। अथ मतं द्रव्यत्वस्य द्रव्यत्वमित्यभिधानमस्ति द्रव्यमिति च, तेन द्रव्यत्वेन द्रव्यमित्यभिधीयमानेन योगाद्रव्यमिति, तदिदमसिद्धमसिद्धेन साध्यते। द्रव्यत्वस्य द्रव्यमित्यभिधानं कुतः? स्वत एवेति चेत् द्रव्ये कोऽपरितोषः। अर्थांतरादिति चेत् तत्रापि स एव दोषः। द्रव्यत्वाभिधानप्रसंगश्च। कुतो ह्येतत् उभयशब्दवाच्यत्वे द्रव्यत्वस्य तद्योगात् द्रव्ये द्रव्यमित्यभिधानं भवति न द्रव्यत्वमिति। अथ भेदेन व्यपदेशः यथा यष्टिरस्यास्तीति यष्टिमानिति व्यदिश्यते, एवं द्रव्यत्वमस्यास्तीति द्रव्यत्ववद्द्रव्यमित्यभिधानं प्रसज्यते न द्रव्यमित्यभिधानं प्रसज्येत। अथ मतमेतत् यथा शुक्लगुणयोगात् शुक्लः पटः इति मत्वर्थीयस्य निवृत्तिः, एवमिहापि मत्वर्थीयस्याभाव इति विषम उपन्यासः। युज्यते तत्र मत्वर्थीयस्याभावः गुणवचनेभ्यो निवृत्तेरन्वाख्यातत्वात् अनन्वाख्याने वा उभयवचनाः शुक्लादय इति। व्याकरणाभ्युपगम्यमाने त्वयं तु द्रव्यत्वशब्दो न गुणवचनः तेनाऽस्मान्मतो निवृत्तिर्दुरुपपादा। किंच मत्वर्थस्यापि निवृत्तिर्नान्वाख्याता ततो द्रव्यमित्यभिधानं नोपपद्येत।

त्वोत्पत्त्यभावश्चोभयथा दोषात् ॥ ८ ॥ द्रव्यस्य भावो द्रव्यत्वमिति त्वस्य चोत्पत्तिर्न प्राप्नोति कुतः? उभयथा दोषात्। इदमिह संप्रधार्यं असौ भावः द्रव्यस्याऽऽत्मभूतो वा स्यात् अनात्मभूतो वा? यद्यात्मभूतः अनादिपारिणामिकद्रव्यस्य आत्मभवने त्वस्य विधानात्, नान्यद्द्रव्याद्द्रव्यत्वमिति संसर्गवादहानिः। अथ अर्थांतरभूतः? द्रव्यस्य भावो द्रव्यत्वमिति विग्रहो नोपपद्यते द्रव्यानात्मभूतत्वात् द्रव्यत्वस्य। न हि घटस्य भावः इति पटे वृत्तिरुपपद्यते। किं च द्रव्यस्य भावो द्रव्यत्वमिति यथान्यो भावः, तथा द्रव्यत्वस्यान्यो भावः स्याद्वा न वा? यदि नास्ति तस्य स्वभावाभावादभावः स्यात्। अथास्ति तस्मिन्नभिधेये त्वत्तोत्पत्तेः द्रव्यत्वत्वमिति प्राप्नोति तथा सति अनवस्था। अथ मतमेतत् यथा अवेर्मांसमिति विगृह्य अविकशब्दादुत्पत्तिर्भवति आविकमिति। तथा द्रव्यत्वस्य भाव इति विगृह्य द्रव्यशब्दादेव त्वोत्पत्तिर्भवतीति? नैतद्युक्तं अर्थांतरविषयत्वात्। युज्यते अवेर्मांसमविकस्य मांसमिति केवलो विग्रहभेदो नार्थभेद इति एकेन विग्रहः अपरस्मादुत्पत्तिरिति। इह तु द्रव्यद्रव्यत्वशब्दयोः पदार्थांतरविषयत्वात् विग्रहभेदे अर्थभेद इति नासौ न्यायः कल्पयितुं शक्यः।

एकस्यानेकत्र वृत्त्यभावो बहुत्वप्रसंगो वा ॥ ९ ॥ तद्द्रव्यत्वमेकमित्युभ्युपगम्यते तद्वादिभिः। तत्कथमेकं निरवयवं अनेकत्र पृथिव्यादौ वर्तितुमुत्सहते?। अथ वर्तेत? बहुत्वमेवास्य स्यात् अनेकत्र वृत्तेः। रूपादिवत्। आकाशवदेकं सत् अनेकमवगाहत इति चेत् न वैषम्यात्। युज्यते महापरिमाणं वियदवगाहते सकलमिति गुणानां तु द्रव्यपदार्थविषयत्वात् कथममहद्द्रव्यत्वं कृत्स्नं वेवेष्टि। एकत्वसंख्यागुणवदुपचारतो महत्त्वमस्येति चेत् तदिदमसिद्धेन साध्यते। सिद्धसाध्यव्यवस्थाश्रयो हि कथामार्गः। उपचरितस्य मुख्यकार्यसाधनाशक्तेः। अस्यापि च द्रव्यत्वेन एकमाकाशं प्रदेशभेदेन त्वनंतमितीष्टत्वात् दृष्टांताभावः॥

नीलद्रव्यवदिति चेन्न असिद्धत्वात् ॥ १० ॥ स्यान्मतं यथा नीलद्रव्यं एकमनेकशाटीपटकंबलसंबंधि दृष्टं तथैकं द्रव्यत्वमपि अनेकद्रव्यसंबंधीति? तन्न। किं कारणं? असिद्धत्वात्। नैतत् सिद्धं शाटीपटकंबलेषु एकमेव नीलद्रव्यमिति। यथा शाट्यादिभेदः तथा तद्व्यंजकस्य नीलद्रव्यस्यापि भेदोपपत्तेः। एकस्मिन्नपि पटे यन्मध्ये नीलद्रव्यं न तत्प्रांतयोः। यच्च प्रांतयोः न तन्मध्ये इति भेदोप्युपगंतव्यः किमुत भिन्नेषु द्रव्येषु। नीलत्ववदिति चेन्न तदपि साध्यसमं। अथ मतमेतत्—

दृष्टांताभावेपि एकत्वमस्य सिद्धं अग्निवदिति चेन्न प्रतिज्ञाहानेः ॥ ११ ॥ यथाग्नेरन्यस्मिन्नुष्णे दृष्टांते असत्यपि उष्णं। एवमसत्यपि एकस्मिन् अनेकसंबंधिनि दृष्टांते द्रव्यत्वस्य द्रव्येषु वृत्तिः सिध्यतीति तदपि नोपपद्यते प्रतिज्ञाहानेः। ननु दृष्टांतो नास्तीति प्रतिज्ञाय दृष्टांतं ब्रुवतः ते प्रतिज्ञा हीयते। किं च युक्त्यभावेपि यदि द्रव्यत्वमेकमनेकसंबंधीति मन्यते स्वत एव द्रव्यं द्रव्यत्वमिति कस्मान्न प्रतिपद्यते। समवायादिति चेन्न तस्य प्रत्युक्तत्वात्।

गुणसंद्रावो (संद्रावात्) द्रव्यमिति चेन्न एकांते दोषोपपत्तेः ॥१२॥ स्यादेतद् गुणसंद्रावो द्रव्यमित्येतल्लक्षणमनवद्यं। गुणः संद्रूयते प्राप्यते गुणान्वा संद्रवति प्राप्नोति इति द्रव्यमिति ? तन्न किं कारणं ? एकांते दोषोपपत्तेः। कथमिति चेदुच्यते-गुणेभ्यो द्रव्यं अन्यद्वा स्यात् अनन्यद्वा ? यद्यनन्यत् कर्तृ-कर्मभेदाभावात् निर्देशो नोपपद्यते। अपि च एकांतानन्यत्वे हि गुणा एव वा स्युः द्रव्यमेव वा। यदि गुणा एव, द्रव्याभावे तदविनाभाविनां गुणानामपि निराधारत्वादभावः स्यात्। अथ द्रव्यमेव एवमपि अलक्षणत्वात्खर-विषाणत्वकल्पना द्रव्यस्य स्यात्। अथान्यत्वं गृह्येत एवमप्येकांतेन स्वरूपशून्यत्वं स्यात् यस्मादभ्युपगम्योच्यते गुणैः संद्रूयते द्रव्यमिति लक्षणं नोपपद्यते गुणानां निष्क्रियत्वे द्रव्यं प्रत्याभिमुख्येन द्रवणाभावात्। दिक्का-लावाकाशं च क्रियावद्भ्यो वैधर्म्यात् निष्क्रियाणि। एतेन कर्माणि गुणाश्च व्याख्याताः। निःक्रिया इति वच-नात्। गुणान् संद्रवति इति च लक्षणं नोपपद्यते निःक्रियद्रव्याणां गुणान् प्रति द्रवणाभावात्। किं च—

स्वतोऽसिद्धत्वात् ॥ १३ ॥ यथावाद्रिपरिक्षेपादिलक्षणान् ग्रामादीन् स्वतःसिद्धान् देवदत्तः सिद्धः प्राप्नोति न तथा गुणाः स्वतः सिद्धा संति यान् प्राप्नुयाद् द्रव्यं। आह—

पाकजदर्शनात् तत्सिद्धिः ॥ १४ ॥ पार्थिवेषु परमाणुषु अग्निसंयोगात् औष्ण्यापेक्षात् श्यामा-द्युच्छेदेन रक्ताद्यारंभे च ननु प्राप्यते गुणैर्द्रव्यं। उच्यते—

ननु युतसिद्धत्वप्रसंगात् ॥ १५ ॥ यदि द्रव्यमवतिष्ठते रूपादयो विनश्यंति प्रादुर्भवंति ननु युतसिद्धा द्रव्यरूपादय इत्यासक्तं। अथाऽयुतसिद्धाः समवायसंबंधात् इति मतं ? ननु द्रव्यवत्तन्नित्यत्व-प्रसंगः। एवं सति अयुतसिद्धिर्भवति यदा रूपादयस्तदा द्रव्यं यदा द्रव्यं तदा रूपादय इति ? नन्वेवं सति यथा द्रव्यं नित्यं तथा रूपादयोपि नित्याः, यथा रूपादीनामनित्यत्वं तथा द्रव्यस्येति प्राप्तं तुल्य-वृत्तित्वं। किं च—

विरोधात् पंडितमूर्खवत् ॥ १६ ॥ यदि पंडितो न मूर्खः अथ मूर्खो न पंडितः तथा यदि समवायसंबंधात् द्रव्यादयुतसिद्धाः रूपादयः न विनक्ष्यंति न चोत्पत्स्यंते, अथ विनश्यंत्युत्पद्यंते च द्रव्यं नावतिष्ठत इति कुतस्त्योऽयं न्यायः। न तु गुणैर्द्रूयते गम्यते उपलभ्यते तदिति द्रव्यं ? कस्मात् अर्थांतरत्वात्। न हि घटेन पट उपलभ्यते अनन्वयत्वात्। अथोपलभ्यते द्रव्यगुणलक्षणभेदेन कल्पनाविरोधः। आह भेदे एव उपलभ्योपलंभकभावो दृष्टः अग्निधुमादिषु, नाऽभेदे स्वात्मनि वृत्तिविरोधात्। नह्यंगुल्यग्रमात्मानं स्पृशति इति ? उच्यते युज्यते अग्निधूमादिषु भिन्नेष्वेव लक्ष्यलक्षणभावः पृथक्सिद्धरूपत्वात् नच द्रव्यगुणानां पृथक् प्रसिद्धरूपता व्यतिरेकेण अनुपलब्धेः। यच्चोक्तं स्वात्मनि वृत्तिविरोध इति तदप्येकांतग्रहणात् सूक्तं न भवति। दृश्यते हि स्वात्मन्यपि वृत्तिः यथा प्रदीपः स्वात्मानं प्रकाशयति न तस्य स्वरूपप्रकाशने प्रदी-पांतरमपेक्षते। यद्यपेक्षेत पटादिवदप्रकाशकत्वमेवाऽस्य स्यात्। किं च तस्य तत्त्वस्योपदेष्टा स्वात्मानं वेत्ति वा नवा ? यदि न वेत्ति स्ववचनविरोधः आत्मन्यात्ममनसोः संयोगविशेषात् आत्मप्रत्यक्षमिति वचनात्।

असर्वज्ञत्वप्रसंगश्च ॥ १७ ॥ यद्यात्मानमेवासौ न वेत्ति कथं इतरान्विजानीयात् तत स्वपरविशेषान-भिज्ञत्वात् असर्वज्ञत्वं प्रसज्यते। अथ वेत्ति ननु स्वात्मनि वृत्तिविरोधात् द्रव्यात्मका एव पर्यायाः द्रव्यं लक्ष-यंतीति साधूक्तं। यो हि मन्यते गुणसमुदायमात्रं द्रव्यं नातोऽन्यत् किंचिदिति तस्यापि गुणसंद्रावो द्रव्यमिति तल्लक्षणं नोपपद्यते। कुतः ? कर्तृकर्मभावादेव। गुणसमुदायमात्रद्रव्यवादिनो हिवादिनः, न गुणाः पृथक् संति नापि समुदायः ततोऽन्योस्ति। येषां कुतश्चित् भेदात् कर्तृकर्मभावो भवेत्। ननुचाऽभेदेऽपि कर्तृकर्मभावो दृष्टः यथाऽऽत्मानं प्रदीपः प्रकाशयति इति तत्रापि कथंचित् भेदेन भवितव्यं, भासुरस्य रूपस्य द्रव्यस्य च स्यात् भेददर्शनात्। यदि सर्वथैवाऽभेदः स्यात् सर्वं द्रव्यं भासुररूपं स्यात् भासुरस्य च द्रव्यस्य सर्वदैव ताद्रूप्यं प्रसज्येत दृश्यते च माषादिभावः। नच समुदायकल्पना युज्यते गुणानां पृथक्स्वरूपानुपलब्धेः। दृश्यते माषादीनां पृथगुपलभ्यमानरूपाणां समुदायः। नापि गुणकल्पनोपपद्यते गुण्यते विशेष्यते यैरर्थास्ते गुणाः विशेषणानीत्यर्थः। न च गुणिनं विशेष्यं कंचिदंतरेण गुणानां गुणत्वं भवति। किंच समुदायो गुणेभ्यो-

---

१ स्वस्वरूपमित्यर्थः।

ऽन्यो वा स्यादनन्यो वाऽवक्तव्यो वा । अन्यत्वानन्यत्वयोर्हि विहिता: दोषाः। यद्यवक्तव्यः स्ववचनविरोधःप्रसज्यते यदि समुदायोऽस्ति नावक्तव्यः अवक्तव्यो न समुदायोस्ति सतःसंज्ञोपपत्तेः, अवक्तव्यस्य च सर्ववाग्गोचरात्यये निरात्मकत्वप्रसंगात् इति शिष्टेतरवचनवत् अन्यत्वोपपत्तेश्च । यदि वक्तव्यलक्षणगुणाः समुदायो न वक्तव्यलक्षणः, ननु च लक्षणभेदादन्यत्वं सिद्धं । किं च रूपादिपरमाणुसमुदायमात्रत्वे गुर्वादेः धर्मांतरस्याऽप्रादुर्भावात्, अणूनामतींद्रियस्वभावव्यतिक्रमाभावात् दृश्यमिदं भ्रांतिरूपं स्यात् । स एवमिति चेत् प्रत्यक्षानुमानयोः तदाभासयोश्च अविशेषप्रसंगः स्यात् । द्रव्यं भव्य इति अयमपि द्रव्यशब्दः एकांतवादिनां न संभवति स्वतोऽसिद्धस्य द्रव्यस्य भव्यार्थासंभवात् । संसर्गवादिनस्तावत् गुणकर्मसत्ताद्रव्यत्वादिसामान्यविशेषेभ्यो द्रव्यस्यात्यंतमन्यत्वे खरविषाणकल्पस्य स्वतोऽसिद्धत्वात् न भवनक्रियायाः कर्तृत्वं युज्यते । परतः सिद्धिरपि स्वतोऽसिद्धस्य न संभवति खरविषाणवत् । गुणसमुदायमात्रत्वेऽपि समुदायस्य संवृत्या कल्पितस्याऽसत्त्वात् गुणानां प्रत्येकं अनुपलब्धत्वात्तदव्यतिरेकाच्चाऽसत्त्वमिति भवनक्रियायाः कर्तृता दुरुपपादा । अनेकांतवादिनस्तु गुणसंद्रावो द्रव्यं, द्रव्यं भव्य इति चोपपद्यते । पर्यायिपर्याययोः कथंचिद्भेदोपपत्तेरित्युक्तं पुरस्तात् ।

धर्मादिसामानाधिकरण्याद्बहुवचनं ॥ १८ ॥ प्रकृताः धर्मादयो बहवः तत्सामानाधिकरण्याद्बहुवचनेन निर्देशः क्रियते ॥

धर्मादीन्येव द्रव्याणि नान्यानीति पुल्लिंगप्रसंग इति चेन्न आविष्टलिंगत्वात् ॥ १९ ॥ स्यादेतत् यदि तत्सामानाधिकरण्याद्बहुवचनं क्रियते तत एव पुल्लिंगमपि प्राप्नोति इति। ते हि अजीवकाया उक्ताः पुल्लिंगा इति ? तन्न किं कारणं ? आविष्टलिंगत्वात् । आविष्टोह्ययं द्रव्यशब्दः वचनादिवत् स्वलिंगं न जहाति । अनंतरत्वाच्चतुर्णामेव द्रव्यव्यपदेशप्रसंगे अन्योपादानार्थमिदमुच्यते—

जीवाश्च ॥ ३ ॥

जीवशब्दो व्याख्यातार्थः ॥

जीवत्वादिति चेन्न प्रतिषिद्धत्वात् ॥ १ ॥ स्यादेतत् जीवत्वं नाम सामान्यविशेषोस्ति तेन योगाज्जीवा इति ? तन्न किं कारणं ? प्रतिषिद्धत्वात् । द्रव्यत्ववदस्य प्रतिषेधो वेदितव्यः । किं च—

अनवस्थाप्रतिज्ञाहानिदोषप्रसंगात् ॥ २ ॥ यो जीवत्वसंयोगाज्जीव इति प्रत्ययाभिधाने कल्पयति स पृष्टव्यः--जीवत्वे केन योगात् प्रत्ययाभिधानवृत्तिरिति ? । तत्रापि अन्यत एवेति चेत् अनवस्थाप्रसंगः । अथाऽनवस्थादोषो माऽक्लृपत् इति जीवत्वे स्वत एव वृत्तिरभ्युपगम्यते ननु प्रतिज्ञाहानिस्तेऽर्थांतरसंसर्गात् सर्वत्र वृत्तिरिति, तद्वज्जीवे[1]ऽपि स्यात् । अथ मतमेतत् जीवत्वे प्रदीपवत् स्वत एव वृत्तिरिति जीवे कोऽपरितोषः । आह पदार्थांतरत्वादेव जीवजीवत्वयोः न जीवत्ववत् जीवे स्वतः प्रत्ययाभिधानसिद्धिः, यस्मात् न पदार्थांतरधर्मः पदार्थांतरे भवितुमर्हति पदार्थांतरत्वादेव अन्यथा पदार्थसंकरप्रसंगः, स च नास्त्यतो नानवस्थाप्रतिज्ञाहानिदोषौ स्त इति । उच्यते—

न पदार्थांतरत्वासिद्धेः ॥ ३ ॥ यदि जीवजीवत्वयोः पदार्थांतरत्वं अभविष्यत् अपि तर्हि धर्मसंकराभावोऽभविष्यत् ननु पदार्थांतरत्वमस्ति इत्युक्तं पुरस्तात् स्वतोऽसिद्धत्वात् । किं च प्रतिज्ञाहानिस्ते प्रसजति यदि पदार्थांतरधर्मः पदार्थांतरे न भवेत्, सत्तायाः सदिति प्रत्ययाभिधानहेतुत्वलक्षणो धर्मः द्रव्यगुणकर्मसु न स्यात् । अथ योगेपि सत्प्रत्ययाभिधानहेतुत्वं सत्ताया एवेति चेत् न संति द्रव्यगुणकर्माणि सत्प्रत्ययाभिधानहेतुत्वविरहात् खरविषाणवत् इत्यासक्तं । ततः सिद्धमेतत् जीवनक्रियोपलक्षितद्रव्यविशेषविषयाऽनादिपारिणामिकी जीवसंज्ञेति ॥

---

[1] जीवत्वेऽपि स्यादिति ग पुस्तके पाठः

द्रव्यलक्षणयोगाद्द्रव्याणीति चेन्न नियमार्थत्वात् ॥४॥ स्यान्मतं उत्पादव्ययध्रौव्ययुक्तं सदिति द्रव्यलक्षणं वक्ष्यते तेन योगात् धर्मादीनां द्रव्यत्वं सिद्धं नार्थोनेन द्रव्यसंख्यानेन इति ? तन्न। किं कारणं ? नियमार्थत्वात्। नियमार्थोऽयमारंभः धर्माऽधर्माऽऽकाशपुद्गला जीवाश्च वक्ष्यामाणलक्षणेन कालेन सह षडेव द्रव्याणीति। तेनान्यवादिपरिकल्पितानां दिगादीनां निवृत्तिः सिद्धा। कथमिति चेत् उच्यते-पृथिव्यप्तेजोवायुमनांसि पुद्गलद्रव्येंऽतर्भवंति रूपरसगंधस्पर्शवत्त्वात्। वायोर्मनसश्च रूपादियोगाभाव इति चेन्न रूपादिमत्त्वात्। वायुस्तावत् रूपादिमान् स्पर्शवत्त्वात् घटादिवत्। चक्षुरादिकरणग्राह्यत्वाभावात् रूपाद्यभाव इति चेन्न परमाण्वादिषु अतिप्रसंगात्। मनोपि द्विविधं द्रव्यमनो भावमनश्चेति। तत्र भावमनो ज्ञानं तस्य जीवगुणत्वादात्मन्यंतर्भावः। द्रव्यमनश्च रूपादियोगात् पुद्गलद्रव्यविकारः। तद्योगाभावोऽनुपलभ्यमानत्वात् इति चेत् परमाण्वादिषु विधर्मस्वपि वृत्तेः सशयहेतुत्वं। रूपादिमन्मनो ज्ञानोपयोगकरणत्वात् चक्षुरिंद्रियवत्। अमूर्तेपि शब्दे ज्ञानोपयोगकरणत्वदर्शनात् व्यभिचारी हेतुरिति चेन्न तस्य पौद्गलिकत्वात् मूर्तिमत्त्वोपपत्तेः। परमाण्वादीनामतींद्रियत्वेपि रूपादिमत्कार्यदर्शनात् रूपादिमत्त्वमनुमीयते न तथा वायूनां मनसां च रूपादिमत्कार्यं उपलभ्यते यतोऽवसीयते रूपादिमत्त्वमेषामिति चेन्न तेषामपि तदुपपत्तेः। सर्वेषां परमाणूनां सर्वरूपादिमत्कार्यत्वप्राप्तियोग्यताभ्युपगमात्। न च केचित् पार्थिवादिजातिविशेषयुक्ताः परमाणवः संति जातिसंकरेण आरंभदर्शनात्। दिशोप्याकाशेऽतर्भावः आदित्योदयाद्यपेक्षया आकाशप्रदेशपंक्तिषु इत इदमिति व्यवहारोपपत्तेः ॥

जीवा इति बहुवचनं वैविध्यख्यापनार्थं ॥ ५ ॥ जीवा इति बहुवचनं क्रियते वैविध्यख्यापनार्थं। विविधा हि जीवाः संसारिणो मुक्ताश्चेति। संसारिणोपि गतींद्रियादिचतुर्दशमार्गणास्थानविकल्पात् मिथ्यादृष्ट्यादिकचतुर्दशगुणस्थानभेदात् सूक्ष्मबादरादिचतुर्दशजीवस्थानविकल्पाच्च विविधाः। मुक्ताश्च एकद्वित्रिःचतुःसंख्येयासंख्येयानंतसमयसिद्धपर्यायभेदाश्रयात् मुक्तिहेतुशरीराकारानुभेदादपि स्वक्षेत्रपरक्षेत्रावगाहनादिभेदाच्च विविधाः।

एकयोग इति चेन्न जीवानामेव प्रसंगात् ॥ ६ ॥ स्यान्मतं एक एव योगः कर्तव्यः द्रव्याणि जीवा इत्येवं चशब्दाकरणात् लघ्विरिति तन्न किं कारणं जीवानामेव प्रसंगात्। तथा सति जीवा एव द्रव्याणि न धर्मादीनि इत्यनिष्टमासज्यते ॥

बहुवचनादिति चेन्न उक्तत्वात् ॥ ७ ॥ स्यादेतत् द्रव्याणीति बहुवचनात् धर्मादीनां जीवानां च द्रव्यसंज्ञा सिध्यतीति ? तन्न। किं कारणं ? उक्तत्वात्। उक्तमेतत् जीवा इति बहुवचनं वैविध्यख्यापनार्थं इति। तत्सामानाधिकरण्यात् द्रव्याणि इति बहुवचनं न्यायप्राप्तं इति न ततो धर्मादिगतिः ॥

अधिकारादिति चेन्न जीवावबद्धत्वात् ॥ ८ ॥ स्यादेतत् 'अजीवकायाः धर्माधर्माकाशपुद्गलाः' इत्यजीवाधिकारात् एकयोगेपि जीवाजीवयोर्द्रव्यसंज्ञा सेत्स्यति इति ? तन्न किं कारणं ? जीवावबद्धत्वात्। द्रव्यशब्दोऽयं जीवावबद्ध इति जीवानामेव द्रव्यसंज्ञा प्राप्नोति ॥

सत्यप्यधिकारे यत्नाभावाच्च ॥ ९ ॥ अनुवर्तमाना अपि विधयो नचानुवर्तनादेव भवंति किं तर्हि यत्नाद्भवतीति जीवानामेव द्रव्यसंज्ञा स्यात् अजीवानां न स्यात् यत्नाभावात्। ततः पृथक्योगग्रहणं न्याय्यं। एवं च कृत्वा च शब्दोप्यर्थवान् भवति। उक्तानां द्रव्याणां विशेषप्रतिपत्त्यर्थमाह—

नित्यावस्थितान्यरूपाणि ॥ ४ ॥

नित्यशब्दो ध्रौव्यवचनः ॥ १ ॥ अयं नित्यशब्दः ध्रौव्यवचनो वेदितव्यः। नेर्ध्रुवे त्योऽन्वाख्यातः किं पुनरिह नित्यत्वं ?

---

१ नात्र च इति ख. पुस्तके पाठः। २ इत्ययं च शब्द इत्यधिक पाठो ग. पुस्तके।

तद्भावाव्ययो नित्यत्वं ॥ २ ॥ येन भावेन उपलक्षितं द्रव्यं तस्य भावस्याऽव्ययो नित्यत्वमुच्यते । वक्ष्यते 'तद्भावाव्ययं नित्यमिति' । धर्मादीनि द्रव्याणि गतिहेतुत्वादिविशेषलक्षणद्रव्यार्थादेशात् अस्तित्वादिसामान्यलक्षणद्रव्यार्थादेशाच्च कदाचिदपि न व्ययंतीति नित्यानि ।

इयत्त्वानतिवृत्तेरवस्थितानि ॥ ३ ॥ धर्मादीनि षडपि द्रव्याणि कदाचिदपि षडिति इयत्त्वं नातिवर्तंते । ततोऽवस्थितानीत्युच्यंते । अथवा धर्माधर्मलोकाकाशैकजीवानां तुल्यासंख्येयप्रदेशत्वं । अलोकाकाशस्य पुद्गलानां चाऽनंतप्रदेशत्वं कालस्याप्येकप्रदेशत्वमित्येतदियत्त्वं, तस्यानतिवृत्तेः अवस्थितानीति व्यपदिश्यंते ।

गतार्थत्वात्तदवक्तव्यमिति चेन्न परिणामानेकत्वात् ॥ ४ ॥ स्यान्मतं नित्यवचनेनैव गतार्थत्वात् अवस्थितानीति न वक्तव्यं न हि नित्यत्वमतिक्रम्यावस्थितत्वमस्तीति ? तन्न किं कारणं ? परिणामानेकत्वात् । धर्मादीनामनेकगतिपरिणामोऽस्ति गतिस्थित्युपग्रहादिपर्यायोत्पादव्ययव्यवस्थितिलक्षणः,अतः किं ? अमुष्मिन् परिणामानेकत्वेपि न मूर्तिमत्त्वोपयोगपरिणामो भवति धर्माधर्मकालाकाशानां, नापि जीवानामचेतनत्वं पुद्गलानां च अमूर्तत्वं अवस्थितवचनात् ।

विरोधादयुक्तमिति चेन्न उभयनयसद्भावात् ॥ ५ ॥ स्यादेतत् परिणामानेकत्वं येषामिष्टमवस्थितत्वमिति एतद्विरुद्धमिति तन्न । किं कारणं ? उभयनयसद्भावात् । धर्मादीनां सर्वेषां द्रव्याणां द्रव्यार्थिकपर्यायार्थिकाऽन्यतरगुणप्रधानभावार्पणाभेदात् स्थित्युत्पत्तिनिरोधात्मकमविरुद्धमवस्थितविशेषणं, वा नित्यग्रहणमवस्थितविशेषण विज्ञायते । यथा गमनागमनाद्यनेकपर्यायसद्भावेप्यभीक्ष्णप्रजल्पनसद्भावात् नित्यप्रजल्पितो देवदत्त इत्युच्यते । तथोभयकारणवशोपनीतोत्पादनिरोधसंभवेपि अमूर्तत्वादिस्वभावं कदाचिदपि धर्माधर्मादीनि न जहतीति नित्यावस्थितानीत्युच्यते ।

क्रियावत्त्वनिवृत्त्यर्थमवस्थितवचनमिति चेन्न निःक्रियाणीत्याम्नातत्वात् ॥६॥ स्यादेतत् परिस्पंदात्मिकायाः क्रियायाः निवृत्त्यर्थमवस्थितवचनमिति ? तन्न । किं कारणं ? निष्क्रियाणीत्याम्नातत्वात् ।

अरूपग्रहणं द्रव्यस्वतत्त्वनिर्ज्ञानार्थं ॥ ७ ॥ अरूपग्रहणं क्रियते द्रव्यस्वतत्त्वनिर्ज्ञानार्थं । न विद्यते रूपं येषां तान्यरूपाणि । रूपव्युदासात्तदविनाभाविनां रसादीनामपि व्युदासो वेदितव्यः । अरूपाणि अमूर्तानीति यावत् ।

वृत्तौ पंचत्ववचनात् षड्द्रव्योपदेशव्याघात इति चेन्न अभिप्रायाऽपरिज्ञानात् ॥ ८ ॥ स्यान्मतं वृत्तावुक्तमवस्थितानि धर्मादीनि न हि कदाचित्पंचत्वं व्यभिचरंतीति ततः षड्द्रव्याणीत्युपदेशस्य व्याघात इति ? तन्न । किं कारणं ? अभिप्रायापरिज्ञानात् । अयमभिप्रायो वृत्तिकरणस्य—कालश्चेति पृथग् द्रव्यलक्षणं कालस्य वक्ष्यते तदनपेक्षादिकृतानि पंचैव द्रव्याणीति षड्द्रव्योपदेशाविरोधः । यथा सर्वेषां द्रव्याणां नित्यावस्थितानि इत्येतत् साधारणं लक्षणं तथा अरूपत्वमपि प्राप्तमतस्तदपवादार्थमाह—

रूपिणः पुद्गलाः ॥ ५ ॥

रूपशब्दस्याऽनेकार्थत्वे मूर्तिपर्यायग्रहणं शास्त्रसामर्थ्यात् ॥ १ ॥ रूपशब्दोऽनेकार्थः क्वचिद्द्रव्ये वर्तते गोरूपाणि गोद्रव्याणि इत्यर्थः । क्वचित् स्वभावे वर्तते चैतन्यं पुरुषस्य स्वरूपं स्वभाव इत्यर्थः । क्वचिदभ्यासे वर्तते दशरूपमध्ययनं कार्यं दशवारानभ्यासः कार्य इत्यर्थः । क्वचिच्छ्रुतौ वर्तते स्वरूपं शब्दस्य स्वा श्रुतिरित्यर्थः । क्वचिन्महाभूतेषु वर्तते रूप-चत्वारि महाभूतानि उपादाय रूपं चेति । क्वचित् गुणविशेषे वर्तते चक्षुर्ग्रहणयोग्यो योऽर्थस्तद्रूपमिति । क्वचिन्मूर्तिपर्यायवचनः रूपिद्रव्यं मूर्तिमद्द्रव्यमित्यर्थः तत्रेह मूर्तिपर्यायवचनो रूपशब्दो गृहीतव्यः । कुतः ? शास्त्रसामर्थ्यात् । अर्हत्प्रोक्ते हि गणधरावधारिते श्रुते शास्त्रेऽभिहितं रूपिद्रव्यं मूर्तिमद्द्रव्यमिति । तस्मात् रूपिणः पुद्गला मूर्तिमतः पुद्गला इत्यर्थः । का पुनः मूर्तिः ? रूपादिसंस्थानपरिणामो मूर्तिः । रूपमादिर्येषां त इमे रूपादयः के पुनस्ते ? रूपरसगंधस्प-

र्शाः । परिमंडलत्रिकोणचतुरस्रायतचतुरस्रादिराकृतिः संस्थानं । तै रूपादिभिः संस्थानैश्च परिणामो मूर्ति रित्याख्यायते ।

गुणविशेषवचनग्रहणं वा ॥ २ ॥ अथवा रूपमित्यनेन गुणविशेषो गृह्यते । चक्षुर्ग्रहणयोग्यः ।

रसाद्यग्रहणमिति चेन्न तदविनाभावात् तदंतर्भावसिद्धेः ॥ ३ ॥ स्यादेतत् गुणविशेषग्रहणे सति रसादीनामग्रहणं प्रसक्तमिति ? तन्न ? किं कारणं तदविनाभावात् तदंतर्भावसिद्धेः । रूपाविनाभाविनो हि रसादयो रूपग्रहणेन गृह्यंते ।

इनोनुत्पत्तिरभेदादिति चेन्न कथंचिद्व्यतिरेकसिद्धेः ॥ ४ ॥ स्यादाकूतं सति भेदे इन उत्पत्ति र्दृष्टा यथा दंडोस्यास्तीति दंडीति न च तथा रूपं द्रव्याद्भिन्नमस्ति तस्यैव रूपादिपर्यायपरिणामात् । तत इन उत्पत्ति र्नोपपद्यते रूपमेषामस्ति ते रूपिणः इति ? तन्न किं कारणं ? कथंचिद्व्यतिरेकसिद्धेः । यद्यपि पुद्गल द्रव्यादनन्यद्रूपं तत्परिणामात् द्रव्यार्थादेशाद् व्यतिरेकेणाऽनुपलब्धेः । तथापि पर्यायार्थिकनयविवक्षावि-जृंभिते रूपविनाशे पुद्गलावस्थानात् उत्पादानुत्पाद्यत्वादादिमदनादिमत्वात् अन्वयव्यतिरेकरूपवाग्विज्ञान वृत्तिहेतुत्वादित्येवमादिभिः हेतुभिः कथंचिद्व्यतिरेकः सिध्यतीति तदपेक्षः इनः प्रादुर्भावः सिद्धः । तेनैव व्यपदेशाच्च अनन्यत्वेपि लोके व्यपदेशो दृष्टः । आत्मवान् आत्मा सारवान् वृक्षः इति । नहि आत्मनोऽन्य आत्मास्ति । नापि वृक्षादन्यः सारः तथापि व्यपदेशो दृश्यते । एवमिह अनन्यत्वेपि व्यपदेशो वेदितव्यः ।

पुद्गला इति बहुवचनं भेदप्रतिपादनार्थं ॥ ५ ॥ पुद्गला इति बहुवचनं क्रियते । किं प्रयोजनं? भेदप्रतिपादनार्थं । भिन्ना हि पुद्गलाः परमाणुभेदात् स्कंधभेदाच्च । तद्विकल्पा उपरिष्टाद्वक्ष्यंते । अत्राह किं पुद्गलवद्धर्मादीन्यपि द्रव्याणि प्रत्येकं भिन्नानि ? इत्यत्रोच्यते ।

आ आकाशादेकद्रव्याणि ॥ ६ ॥

अभिविधावाङ् प्रयोगः ॥ १ ॥ अभिविधिरभिव्याप्तिः, तस्मिन्नर्थे अयमाङ् प्रयुज्यते तेनाऽऽकाशस्यापि एकद्रव्यत्वसंकीर्तनं भवति । यदि हि मर्यादायां गृह्यते आकाशांतर्भावो न स्यात् । सौत्रीमानुपूर्वीमाश्रित्य इदमुक्तं तेन धर्माधर्माकाशानि गृह्यंते ।

एकशब्दः संख्यावचनः ॥ २ ॥ अन्याऽसहायाद्यनेकार्थसंभवेप्ययमेकशब्दः संख्यावचनो दृष्टव्यः ।

तत्संबंधाद्द्रव्यस्यैकवचनप्रसंग इति चेन्न धर्माद्यपेक्षया बहुत्वसिद्धेः ॥ ३ ॥ स्यान्मतं यद्ययमेकशब्दः संख्यावचनः तेन समानाधिकरण्याद्द्रव्यशब्दस्याप्येकवचनमेव प्राप्नोतीति ? तन्न किं कारणं धर्माद्यपेक्षया बहुत्वसिद्धेः । धर्मादीनि बहूनि द्रव्याणि तदपेक्षया बहुवचनं युज्यते । एकस्यानेकार्थप्रत्यायनशक्तियोगात् ।

एकैकमित्यस्तु लघुत्वात् ॥ ४ ॥ अत्र कश्चिदाह आ आकाशादेकमित्येवतावदस्तु सूत्रं कुतः लघुत्वात् । कथं द्रव्यगतिः ? प्रसिद्धत्वाद्द्रव्यगतिः । धर्मादीनि षड्द्रव्याणि इति प्रसिद्धमिति द्रव्यगतिर्भवति तस्मादनर्थकं द्रव्यग्रहणमिति ।

न वा द्रव्यापेक्षयैकत्वख्यापनार्थत्वात् ॥ ५ ॥ न वानर्थकं । किं कारणं ? द्रव्यापेक्षया एकत्वख्यापनार्थत्वात् । एकैकमित्युक्ते न ज्ञायते किं द्रव्यतः क्षेत्रतः कालतः भावत इति ? अतोऽसंदेहार्थं द्रव्यग्रहणं क्रियते । तेनाऽयमर्थो गृह्यते—गतिस्थितिपरिणामिविविधजीवपुद्गलद्रव्यानेकपरिणामनिमित्तत्वेन सत्यपि भावतो बहुत्वे सति च प्रदेशभेदादसंख्येयक्षेत्रत्वे धर्मद्रव्यमधर्मद्रव्यं च द्रव्यत एकैकमेव, आवगाह्यनेकद्रव्यविविधावगाहननिमित्तत्वेन अनंतभावत्वेपि प्रदेशभेदात् सति चाऽनंतक्षेत्रत्वे द्रव्यतः एकमेवाकाशमिति न जीवपुद्गलवदेषां बहुत्वं । नापि धर्मादिवत् जीवपुद्गलानामेकद्रव्यत्वं । यदि हि स्यात् दृष्टस्य क्रियाकारकभेदस्य इष्ट-

स्य च संसारमोक्षक्रियाविस्तरस्य विरोधः स्यात् । आह कालद्रव्यं किं एकमनेकमिति उत्तरत्राऽस्य निर्णयो वक्ष्यते । अधिकृतानामेवैकद्रव्याणां विशेषप्रतिपत्त्यर्थमिदमुच्यते—

निःक्रियाणि च ॥ ७ ॥

उभयनिमित्तापेक्षः पर्यायविशेषो द्रव्यस्य देशांतरप्राप्तिहेतुः क्रिया ॥ १ ॥ अभ्यंतरं क्रियापरिणामशक्तियुक्तं द्रव्यं, बाह्यं च नोदनाभिघाताद्यपेक्ष्योत्पद्यमानः पर्यायविशेषः, द्रव्यस्य देशांतरप्राप्तिहेतुः क्रियेत्युपदिश्यते । उभयनिमित्त इति विशेषणं द्रव्यस्वभावनिवृत्त्यर्थं । यदि हि द्रव्यस्वभावः स्यात् क्रियापरिणामिनो द्रव्यस्याऽनुपरतक्रियत्वप्रसंगः । द्रव्यस्य पर्यायविशेष इति विशेषणं अर्थांतरभावनिवृत्त्यर्थं । यदि हि क्रिया द्रव्यादर्थांतरभूता स्यात् द्रव्यनिश्चलत्वप्रसंगः । देशांतरप्राप्तिहेतुरिति विशेषणं ज्ञानादिरूपादिनिवृत्त्यर्थं ।

तस्याः प्रादिवृत्त्याऽन्यपदार्थगतिः ॥ २ ॥ तस्या क्रियायाः प्रादिवृत्त्या अन्यपदार्थगतिर्भवति निःक्रांतानि क्रियायाः निःक्रियाणीति ।

निःक्रियत्वादुत्पादाभाव इति चेन्न अन्यथोपपत्तेः ॥३॥ स्यादेतद्धर्मादीनि द्रव्याणि यदि निःक्रियाणि ततस्तेषां उत्पादो न भवेत् क्रियापूर्वको हि घटादीनामुत्पादो दृष्टः । उत्पादाभावाच्च व्ययाभाव इति सर्वद्रव्याणां उत्पादादित्रितयरूपकल्पनाव्याघात इति ? तन्न । किं कारणं ? अन्यथोपपत्तेः । क्रियानिमित्तोत्पादाभावेपि एषां धर्मादीनामन्यथोत्पादः कल्प्यते । तद्यथा द्विविध उत्पादः स्वनिमित्तः परप्रत्ययश्च । स्वनिमित्तस्तावत् अनंतानामगुरुलघुगुणानामागमप्रामाण्यादभ्युपगम्यमानानां षट्स्थानपतितया वृद्ध्या हान्या च वर्तमानानां स्वभावादेषामुत्पादो व्ययश्च । परप्रत्ययोपि अश्वादिगतिस्थित्यवगाहनहेतुत्वात् । क्षणे क्षणे तेषां भेदात् तद्धेतुत्वमपि भिन्नमिति परप्रत्ययापेक्षः उत्पादो विनाशश्च व्यवह्रियते ।

निःक्रियत्वात् गतिस्थित्यवगाहनाक्रियाहेतुत्वाभाव इति चेन्न बलाधानमात्रत्वादिंद्रियवत् ॥ ४ ॥ स्यादेतद्यद्येतानि निःक्रियाणि गतिस्थित्यवगाहनाक्रियाहेतुत्वं एषां नोपपद्यते ? क्रियावंति हि जलादीनि मत्स्यादीनां गत्यादिनिमित्तानि दृष्टानि इति ? तन्न किं कारणं ? बलाधानमात्रत्वात् । इंद्रियवत् । यथा दिदृक्षोश्चक्षुरिंद्रियं रूपोपलब्धौ बलाधानमात्रमिष्टं न तु चक्षुषः तत्सामर्थ्यं इंद्रियांतरोपयुक्तस्य तदभावात् । यथा वाऽऽयुःसंक्षयात् आत्मनि शरीरान्निःक्रांते सदपींद्रियं रूपाद्युपलब्धौ समर्थं न भवति ततो ज्ञायते आत्मन एवैतत्सामर्थ्यं इंद्रियाणां तु बलाधानमात्रत्वमिति । तथा स्वयमेव गतिस्थित्यवगाहनपर्यायपरिणामिनां जीवपुद्गलानां धर्माधर्माकाशद्रव्याणि गत्यादिनिर्वृत्तौ बलाधानमात्रत्वेन विवक्षितानि न तु स्वयं क्रियापरिणामीनि । कुतः पुनरेतदेवमिति चेदुच्यते—द्रव्यसामर्थ्यात् । यथा—आकाशमगच्छत्सर्वद्रव्यैः संबद्धं न चास्य सामर्थ्यमन्यस्यास्ति । तथा च निःक्रियत्वेप्येषां गत्यादिक्रियानिर्वृत्तिं प्रति बलाधानमात्रत्वमसाधारणमवसेयं ।

चशब्दोऽभिहितसंबंधार्थः ॥ ५ ॥ चशब्दः क्रियते अभिहितानामेकद्रव्याणां संबंधार्थः । अतो धर्माऽधर्माकाशानां निःक्रियत्वनियमाज्जीवपुद्गलानां स्वतः परतश्च क्रियापरिणामित्वं सिद्धं । अत्र कश्चिदाह आत्मा सर्वगतत्वान्निःक्रियः क्रियाहेतुगुणसमवायात् परत्र क्रियाहेतुरिति तत्प्रतिविधानार्थमाह—

द्रव्यस्य क्रियापरिणामिनोऽर्थांतरे तत्परिणापसामर्थ्यं वायुवत् ॥६॥ यथा वायुः स्वयं क्रियापरिणतत्वात् वनस्पतौ क्रियानिमित्तं । तथात्मनः क्रियापर्यायस्वभावस्य वीर्यांतरायज्ञानावरणक्षयक्षयोपशमांगोपांगनामलाभावष्टंभे सति विहायोगतिनामोदयापादितशक्तिविशेषे च सति व्रज्यामनुतिष्ठतः हस्तादिषु क्रियोत्पत्तिर्युक्ता न तु निःक्रियस्यात्मनः परत्र क्रियाहेतुत्वं युक्तं । तत्र यदुक्तं आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्मेत्येतदपाकीर्णं । कथमिति चेदुच्यते —

अतत्परिणामस्य तदभावो व्योमवत् ॥ ७ ॥ यथा व्योम्नो निःक्रियस्य घटादिषु सत्यपि संयोगे न क्रियाहेतुत्वं । तथाऽऽत्मनो निःक्रियस्य सत्यपि संयोगे हस्तादिषु न क्रियाहेतुत्वं युक्तं । किं च—

उभयोः निःक्रियत्वात् ॥ ८ ॥ यथोभयोर्जात्यंधयोः संबंधेन दर्शनशक्तिप्रादुर्भावोऽस्ति । तथाऽऽत्मसंयोगप्रयत्नयोः निःक्रियत्वात् क्रियाहेतुत्वमयुक्तं । कथं निःक्रियत्वमिति चेदुच्यते—दिक्कालावाकाशं च क्रियावद्द्रव्यो वैधर्म्यात् निःक्रियाणि । एतेन कर्माणि गुणाश्च व्याख्याताः । निःक्रिया इति वचनात् ।

संयोगप्रयत्नयोः गुणत्वात् निःक्रियत्वं अग्निसंयोगवदिति चेन्नास्मदिष्टसिद्धेः ॥ ९ ॥ स्यान्मतं यथा अग्निसंयोगः उष्णापेक्षः परत्र घटादौ पाकजान् रूपादीनारभते नात्माधारेऽग्नौ । तथाऽऽत्मसंयोगप्रयत्नयोरदृष्टापेक्षयोः हस्तादौ क्रियाहेतुत्वं युक्तं नात्मनीति ? तन्न किं कारणं अस्मदिष्टसिद्धेः । यथाग्निसंयोगो रूपादिमद्द्रव्यगुणः परत्र घटादौ रूपादिमति रूपाद्यंतरोत्पत्तिहेतुर्भवति । तथाऽऽत्मसंयोगप्रयत्नावपि परत्र हस्तादौ क्रियामारभमाणौ क्रियावद्द्रव्यगुणाविति क्रियावत्त्वमात्मनोऽस्मदिष्टं सिद्धं ।

तत्सामर्थ्याभावाच्च ॥१०॥ य उक्तोऽग्निसंयोगो दृष्टांतः न तस्य तत्सामर्थ्यमस्ति । कुतः ? अनुष्णाशीतस्याऽप्रेरकस्यानुपघातिनोऽप्रातस्य संयोगस्य रूपाद्युच्छेदोत्पत्त्योर्हेतुत्वासंभवात् । तस्मात् असौ–असिद्धो दृष्टांतो दार्ष्टांतिकार्थसिद्धये नालं ।

गुरुत्ववदिति चेन्न तुल्यत्वात् ॥ ११ ॥ स्यादेतद्यथा निःक्रियं गुरुत्वं लोष्ठे वर्तमानं तृणादौ क्रियाहेतुः । तथाऽऽत्मसंयोगप्रयत्नौ निःक्रियावपि संतौ हस्तादौ क्रियाहेतू इति ? तन्न । किं कारणं ? तुल्यत्वात् । अग्निसंयोगेन तुल्यमेतत् यथा क्रियापरिणामिनो लोष्ठस्य गुणो गुरुत्वं परत्र क्रियाहेतुः । तथाऽऽत्मसंयोगप्रयत्नावपि क्रियापरिणामिद्रव्यगुणाविति क्रियावत्वमात्मनः सिद्धं । किं च निःक्रियस्य गुरुत्वस्याऽस्पर्शकस्याऽप्रेरकस्यानुपघातिनोऽन्यत्र क्रियाहेतुत्वं नोपपद्यते इति दृष्टांतोऽसिद्धः ।

द्रव्यमेव तथापरिणतं क्रियाहेतुरिति धर्मास्तिकायवदिति चेन्न वैषम्यात् ॥१२॥ स्यान्मतं यथा धर्मास्तिकायः निःक्रियः जीवपुद्गलानां गतिहेतुः तथाऽऽत्मसंयोगादिः निःक्रियोपि परत्र क्रियाहेतुरिति ? तन्न । किं कारणं ? वैषम्यात् । युज्यते धर्मास्तिकायस्य पुद्गलगतिं प्रत्यप्रेरकत्वं, निःक्रियस्यापि बलाधानमात्रत्वदर्शनात् । आत्मगुणस्तु अपरत्र क्रियारंभे प्रेरको हेतुरिष्यते तद्वादिभिर्नच निःक्रियद्रव्यगुणः प्रेरको भवितुमर्हति इति वैषम्यं । किं च धर्मास्तिकायाख्यं द्रव्यमाश्रयकारणं भवतु न तु निःक्रियात्मद्रव्यगुणस्य ततो व्यतिरेकेणाऽनुपलभ्यमानस्य क्रियया आश्रयकारणत्वं युक्तं अर्थांतरभावे च सत्त्वमिति वैषम्यं । किं च—

शरीरे क्रियाभावो जीवस्य निःक्रियत्वात् आकाशप्रदेशवत् ॥ १३ ॥ यथाऽऽकाशप्रदेशो निःक्रियः शरीरे क्रियारंभहेतुर्न भवति तथात्मा तद्गुणश्च निःक्रियत्वात् क्रियाहेतुर्न भवेत् । किं च एकांतेनाऽमूर्तस्य निःक्रियस्य शरीरेण सह संबंधाभावात् परस्परोपकारो नोपपद्यते आकाशवदेव ।

शरीरवियोगे निःक्रियत्वप्रसंग इति चेन्न अभ्युपगमात् ॥१४॥ स्यान्मतं यस्य कार्मणशरीरसंबंधे सति तत्प्रणालिकापादिता क्रिया आत्मनोभिप्रेता तस्याष्टविधकर्मसंक्षये शरीरवियोगात् अशरीरस्यात्मनो निःक्रियत्वं प्रसक्तमिति ? तन्न किं कारणं ? अभ्युपगमात् कारणाभावात् कार्याभाव इति कर्मनोकर्मनिमित्ता या क्रिया सा तदभावे नास्तीति निःक्रियत्वं मुक्तस्याभ्युपगम्यतेऽस्माभिः । अथवा परनिमित्तक्रियानिवृत्तावपि स्वाभाविकी मुक्तस्योर्ध्वगतिरभ्युपगम्यते प्रदीपवत् । अथवा स्याच्छरीरवियोगे मुक्तस्य निःक्रियत्वं यद्यनंतवीर्यज्ञानदर्शनाचिंत्यसुखानुभवनादयः क्रिया अभ्युपगम्येरन् । अभ्युपगम्यंते तु तस्मादयमदोषः शरीरवियोगादात्मनो निःक्रियत्वप्रसंग इति ।

वक्ष्यमाणत्वाच्च पूर्वप्रयोगादिभिः ॥१५॥ वक्ष्यते चोत्तरत्र मुक्तानां क्रिया । कथं ? पूर्वप्रयोगादिभिः ।

पुद्गलानामपि द्विविधा क्रिया विस्रसा प्रयोगनिमित्ता च ॥१६॥ पुद्गलानां द्विविधा क्रिया वक्ष्यते सा द्वितया भवति विस्रसा प्रयोगनिमित्ता चेति ।

साऽनन्या स्वात्मविशेषभावात् ॥ १७ ॥ सा क्रिया तद्धेतोरनन्या वेदितव्या । कुतः ? स्वात्म-

विशेषभावात् । यथाग्नेर्नान्यदौष्ण्यं स्वात्मविशेषभावात् । यद्यन्यत्स्यात् ? अग्नेरभावप्रसंगःस्यात् अलक्षणत्वात् । तथा क्रियापि क्रियावतो नान्या स्वात्मविशेषभावात् । यद्यन्या स्यात् ? द्रव्यस्यास्पंदत्वं स्यात् क्रियायाश्चाऽभावः, तस्मादनन्या क्रिया ।

अर्थांतरत्वेपि योगाद्व्यपदेशो दंडदंडिवदिति चेन्न स्वतोऽसिद्धत्वात् ॥ १८ ॥ अर्थांतरत्वेपि क्रियायाः तद्योगाद्द्रव्यस्य क्रियावद्व्यपदेशः दंडदंडिवदिति च यदि मतं तदपि नोपपद्यते । कुतः ? स्वतोऽसिद्धत्वात् । युज्यते स्वतःसिद्धेन दंडेन योगात् देवदत्तस्य दंडिव्यपदेशः । नच तथा क्रिया स्वतः सिद्धा व्यतिरेकेणानुपलब्धेः । तस्मात्तद्व्यपदेशो न युक्तः ।

समवायादिति चेन्नाऽविशेषप्रसंगात् ॥ १९ ॥ स्यान्मतं सत्यमेतत् न दंडदंडिवद्योगः, स्वतःसिद्ध्यभावात् । कथं तर्हि समवायो नामाऽयुतसिद्धिलक्षणः संबंधोस्ति तेनैकत्वमिव नीतस्य द्रव्यस्य क्रियावद्व्यपदेशो भवतीति ? तन्न । किं कारणं ? अविशेषप्रसंगात् । अयुतसिद्धिलक्षणश्चेत्संबंधः क्रियाक्रियावतोरिष्टः, यद्द्रव्यं सैव क्रिया या च क्रिया तदेव द्रव्यमित्यविशेषः प्राप्नोति तथा सति पदार्थांतरकल्पनाव्याघातः । पदार्थांतरत्वं चेदभ्युपगम्यते न नामाऽयुतसिद्धिलक्षणः संबंधः ।

अनन्यत्वे द्वयोरैकात्म्यमिति चेन्न कथंचिद्व्यतिरेकसिद्धेः ॥ २० ॥ स्यादेतद्यदि क्रियाक्रियावतोरनन्यत्वमभ्युपगम्यते तयोरैकात्म्यं प्रसज्यते दृष्टा च नानात्मता-द्रव्यमवस्थितं, क्रिया क्षणिकात्मिका, द्रव्यमकारणं, क्रिया कारणवतीति । यद्यैकात्म्यं स्यात् द्रव्यस्यावस्थानवत् अकारणत्ववत् क्रियाया अप्यवस्थानमकारणत्वं च स्यात् विपर्ययो वेति ? तन्न । किं कारणं ? कथंचिद्व्यतिरेकसिद्धेः । अत एवाऽस्माभिः कथंचिदन्यत्वमवसीयते ऐकात्म्यं मा व्यज्ञायीति ।

क्रियावत्त्वे सत्यनित्यत्वमिति चेन्न व्यभिचारात् ॥२१॥ स्यादेतत् यदि क्रियावत्त्वमभ्युपगम्यते जीवस्यानित्यत्वं प्राप्नोति । दृष्टा हि क्रियावतां प्रदीपादीनामनित्यतेति ? तन्न । किं कारणं ? व्यभिचारात् । महदहंकारादीनां परमाण्वादीनां च क्रियावतामपि नित्यत्वदर्शनात् व्यभिचारी हेतुः । अथ सर्वानित्यत्ववादी आत्मानित्यत्वे हेतुं ब्रूयात् असिद्धो हेतुः "सर्वे प्रत्ययजाश्चैव सर्वे चैव निरीहकाः" इति क्रियावत्त्वनिन्हवात् । किं च—

अभ्युपगमात् ॥ २२ ॥ अभ्युपगम्यतेऽस्माभिः क्रियावतां जीवादीनां पर्यायार्थिकनयादेशात् अनित्यत्वं ततो न बाधाकरोऽयं हेतुः ॥

असिद्धेश्च ॥ २३ ॥ नेदं क्रियावत्त्वमस्मान् प्रति सिद्धं द्रव्यार्थिकनयादेशात् निष्क्रियत्वोपपत्तेः । एतेन प्रदीपादिदृष्टांतासिद्धिश्च योज्या । किं च—

अनुत्पादव्ययोत्पादव्ययदर्शनात् ॥ २४ ॥ पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात् सर्वे भावा अनुत्पादव्ययदर्शनात् निष्क्रिया नित्याश्च । द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्यात् सर्वे भावा उत्पादव्ययदर्शनात् सक्रिया अनित्याश्चेति ।

अनेकांतोपपत्तेः ॥२५॥ एकांतवादिविहिता दोषा नानेकांतवादे अवकाशं लभंते । अजीवकाया इत्यत्र कायग्रहणे प्रदेशास्तित्वमात्रत्वं निर्ज्ञातं नत्वियत्तावधारिता प्रदेशानां, अतस्तन्निर्धारणार्थमिदमुच्यते—

असंख्येयाः प्रदेशा धर्माऽधर्मैकजीवानां ॥ ८ ॥

संख्याविशेषातीतत्वादसंख्येयाः ॥ १ ॥ संख्यानं संख्या गणनेत्यर्थः । स्वलक्षणेन परस्परतो विशेष्यत इति विशेषः । संख्यायाः संख्यैव वा विशेषः संख्याविशेषः तामतिक्रांता ये तेऽसंख्येयाः न केनचित् संख्यातुं शक्यंत इति यावत् ।

तदनुपलब्धेरसर्वज्ञत्वप्रसंग इति चेन्न तेनात्मनाऽवसितत्वात् ॥ २ ॥ स्यान्मतं यदि ते न

केन चिदपि संख्यातुं शक्यंते, प्राप्तं तर्हि तदनुपलब्धेरसर्वज्ञत्वमिति ? तन्न। किं कारणं ? तेनात्मनावसितत्वात् यथानंतमनंतात्मनोपलभमानस्य न सर्वज्ञत्वं हीयते तथाऽसंख्येयमसंख्येयात्मनाऽवबुध्यमानस्य नास्ति सर्वज्ञत्वहानिः । न हि अन्यथावस्थितमर्थमन्यथा वेत्ति सर्वज्ञोयथार्थज्ञत्वात् । अर्थस्य चाधिगमे त्रिविधं मानं व्याख्यातं संख्येयमसंख्येयमनंतमिति तत्रेहाऽजघन्योत्कृष्टासंख्येयं परिगृह्यते ।

प्रदिश्यंते इति प्रदेशाः ॥ ३ ॥ कथं प्रदिश्यंत ? परमाण्ववस्थानपरिच्छेदात् । वक्ष्यमाणलक्षणो-द्रव्यपरमाणुः स यावति क्षेत्रेऽवतिष्ठते स प्रदेश इति व्यवह्रियते । ते धर्माधर्मैकजीवाः तुल्याऽसंख्येयप्रदेशाः । तत्र धर्माधर्मौ निःक्रिया व्याप्य स्थिताः । जीवस्तावत प्रदेशोपि संहरणविसर्पणस्वभावत्वात् कर्मनिर्वर्तितं शरीरं अणु वृहद्वाधितिष्ठंस्तावदवगाह्य वर्तते । यदा तु लोकपूरणं भवति तदा मंदरस्याधश्चित्रवज्रपटलयोर्मध्ये जीवस्याष्टौ मध्यप्रदेशाः व्यवतिष्ठंते इतरे प्रदेशाः ऊर्ध्वमधस्तिर्यक् च कृत्स्नं लोकाकाशमश्नुते ।

एकद्रव्यस्य प्रदेशकल्पनोपचारतः इति चेन्न मुख्यक्षेत्रविभागात् ॥ ४ ॥ स्यान्मतमेकद्रव्य-स्य प्रदेशकल्पना उपचारतः स्यात् । उपचारश्च मिथ्योक्तिर्न तत्त्वपरीक्षायामधिक्रियते प्रयोजनाभावात् । न हि मृगतृष्णिकया मृगार्थामिकया जलकृत्यं क्रियते इति ? तन्न किं कारणं ? मुख्यक्षेत्रविभागात् ? मुख्य एव क्षेत्रविभागः अन्यो हि घटावगाह्यः आकाशप्रदेशः इतरावगाह्यश्चान्य इति । यदि अन्यत्वं न स्यात् व्याप्तित्वं व्याहन्यते ॥

निरवयवत्वानुपपत्तिरिति चेन्न द्रव्यविभागाभावात् ॥ ५ ॥ स्यादेतत् यदि मुख्य एव वि-भागोऽभ्युपगम्यते निरवयवत्वं तर्हि नोपपद्यते इति ? तन्न किं कारणं ? द्रव्यविभागाभावात् । यथा घटो द्रव्यतो विभागवान् सावयवः नच तथैषां द्रव्यविभागोस्तीति निरवयवत्वं प्रयुज्यते ॥

भेद्यत्वादात्मनामेकग्रहणं ॥ ६ ॥ भेद्या आत्मानो बहवः इत्यर्थः तत एकग्रहणं क्रियते नाना-जीवापेक्षया हि अनंतप्रदेशत्वं स्यात् ॥

कथंचित्प्रदेशभेदोपपत्तेः संबंधनिर्देशः ॥७॥ एकश्चासौ जीवश्च एकजीवः धर्मश्चाऽधर्मश्चैकजी-वश्च धर्माधर्मैकजीवाः तेषां धर्माधर्मैकजीवानां प्रदेशा इति संबंधनिर्देशः क्रियते । कुतः? कथंचित्प्रदेशभेदोपपत्तेः।

असंख्येयप्रदेशा इत्यस्तु लघुत्वात् इति चेन्नोत्तरार्थत्वात् भेदकरणस्य ॥ ८ ॥ स्यान्मत-मसंख्येयप्रदेशाः धर्माधर्मैकजीवाः इत्यस्तु सूत्रं, कुतः ? लघुत्वादिति ? तन्न किं कारणं ? उत्तरार्थं । द्रव्य-प्रधाने हि निर्देशे सति प्रदेशानामुपसर्जनत्वात् उत्तरत्राभिसंबंधो न स्यात् । ततः प्रतिसूत्रं प्रदेशग्रहणे क्रियमाणे गौरवं स्यात् । कश्चिदाह—

प्रदेशकल्पना निरवयवत्वादौपचारिकी सिंहवत् ॥ ९ ॥ धर्मादीनां या प्रदेशकल्पना सा औपचारिकी । कुतः ? निरवयवत्वात् । कथं ? सिंहवत् । यथा विशिष्टपंचेंद्रियतिर्यङ्नामकर्मोदया-पादितविशेषे क्रौर्यशौर्यादिगुणप्रकर्षाधिष्ठाने खरनखोग्रदंष्ट्राभासुरकेसरकपिलनयनतारकावयवविशिष्टे केसरिणि सिंहशब्दोऽध्यवसितः माणवके अतद्गुणे भक्त्याऽध्यारोप्यते । तथा पुद्गलेषु मुख्यः प्रदेशशब्दः धर्मादिषु भक्त्योपचर्यते इति ।

नवा प्रत्ययाभेदात् ॥ १० ॥ नवा औपचारिकी, कुतः ? प्रत्ययाभेदात्। इह मुख्यप्रत्ययात् सिंह विशेषात् अध्यवसानरूपात् माणवके सिंह इति गौणप्रत्ययोऽध्यारोपरूपो भिन्न उपलभ्यते । नच तथा पुद्गलेषु धर्मादिषु च प्रदेशप्रत्ययो भिन्नोऽस्ति उभयत्रावगाहभेदतुल्यत्वात् इतश्च—

उभयत्र सोपपदत्वात् ॥११॥ सिंहत्वात् सिंहशब्दो निरुपपदो मुख्यं गमयति सोपपदो गौणं, सिंहो माणवक इति, न तथा प्रदेशशब्दविशेषोऽस्ति पुद्गलेषु धर्मादिषु च, सोपपदत्वात् , घटस्य प्रदेशाः धर्मादीनां प्रदेशाः इति ततो नास्त्यत्र विशेषः । इतश्च हेत्वपेक्षाभावात् सिंहे प्रसिद्धः क्रौर्यादिधर्मः तदेकदेशसादृश्यं माणवके गौणव्यवहारस्य हेतुरस्ति । न तथा पुद्गलेषु प्रसिद्धं हेतुमवेक्ष्य धर्मादिषु प्रदेशोपचारः क्रियते तेषामपि स्वाधीनप्रदेशत्वात् तस्मादुपचारकल्पना न युक्ता ।

स्वतोवधारणाभावात् नांजसा इति चेन्नाऽत्यंतपरोक्षत्वात् ॥ १२ ॥ स्यान्मतं यदि घटादिवत् धर्मादीनां, आंजसाः प्रदेशा भवेयुर्ननु घटादिवदेव स्वतः प्रदिश्येरन् । घटादीनां हि प्रदेशा ग्रीवादयः आंजसाः स्वत एव प्रदिश्यंते न द्रव्यांतरतः, नत्वेवं धर्मादीनां प्रदेशाः स्वतः प्रदिश्यंते परमाण्ववगाहपरिच्छेद्यत्वात् अतो न मुख्या इति ? तन्न । किं कारणं ? अत्यंतपरोक्षत्वात् । युज्यते घटादीनां प्रत्यक्षत्वात् स्वत एव प्रदेशावधारणं। अत्यंतपरोक्षास्तु धर्मादयः तत एषां मुख्या अपि प्रदेशाः न शक्याः स्वात्मन्येवावधारयितुं न गौणप्रदेशत्वात् ।

अर्हदागमप्रामाण्यात् ॥ १३ ॥ युगपत् सकलपदार्थत्वावभासनज्ञानातिशयेनार्हता आविष्कृतं आगमः गणधरैरनुस्मृतवचनरचनः श्रुताख्यः, तच्छिष्यप्रशिष्यप्रज्ञावीचिपरंपरासमुपनीतोऽस्ति । तस्य प्रामाण्याद्धमादीनां क्षेत्रप्रदेशाः मुख्याः इत्येतदभ्युपगंतव्यं । तद्यथा एकैकस्मिन्नात्मप्रदेशेऽनंतानंता ज्ञानावरणादिकर्मप्रदेशाः अवतिष्ठंते । एकैकस्मिन् कर्मप्रदेशे अनंतानंता औदारिकादिशरीरप्रदेशाः । एकैकस्मिन् शरीरप्रदेशे अनंतानंता वैस्रसोपचयप्रदेशाः क्लिन्नगुडरेण्वाद्युपचयवदवतिष्ठते। तथा धर्मादिप्रदेशेष्वपि। किं च-

स्थितास्थितवचनात् ॥ १४ ॥ भावांतरपरिणामे सुखदुःखानुभवने क्रोधादिपरिणामे वा जीवप्रदेशानां उद्भवनिधनपरिस्पंदस्याप्रवृत्तिः स्थितिः । प्रवृत्तिरस्थितिरित्युच्यते । तत्र सर्वकालं जीवाष्टमध्यमप्रदेशाः निरपवादाः सर्वजीवानां स्थिता एव । केवलिनामपि अयोगीनां सिद्धानां च सर्वे प्रदेशाः स्थिता एव । व्यायामदुःखपरितापोद्रेकपरिणतानां जीवानां यथोक्ताष्टमध्यप्रदेशवर्जितानां इतरे प्रदेशाः अवस्थिता एव । शेषाणां प्राणिनां स्थिताश्चाऽस्थिताश्चेति वचनान्मुख्या एव प्रदेशाः । किं च—

इंद्रियपरिणामवचनात् ॥ १५ ॥ इह वीर्यांतरायमतिश्रुतज्ञानावरणक्षयोपशमांगोपांगनामलाभोपष्टंभात् उत्सेधांगुलस्यासंख्येयभागप्रमितानां विशुद्धानां आत्मप्रदेशानां चक्षुरादींद्रियपर्यायपरिणाम उक्तः प्रतिविशिष्टप्रदेशत्वात परस्परस्थानासंक्रमेण साक्षाच्च दृश्यंत तस्मान्मुख्या एवाऽऽत्मप्रदेशाः । किं च—

द्रव्याणां प्रतिनियतप्रदेशावस्थानात् ॥ १६ ॥ इहान्येषु आकाशप्रदेशेषु पाटलिपुत्रं स्थितं अन्येषु च मथुरा अतो नानाऽऽकाशप्रदेशाः । यस्यैकांतेनाऽप्रदेशमाकाशं तस्य यद्देशपाटलीपुत्रं तद्देशभाविन्येव मथुरापि स्यात् । किं च—

उभयदोषप्रसंगात् ॥ १७ ॥ संसारस्य पिंडस्य कर्णशष्कुल्यंतरे अदृष्टविशेषसंस्कृतमाकाशं श्रोत्रमिति यदाख्यायते तत्कृत्स्नं वाऽऽकाशं स्यान्न वा ? यदि कृत्स्नं ननूर्ध्वमधस्तिर्यगवस्थितस्पर्शवद्द्रव्याभिघातोत्पन्नाः सर्वे शब्दाः सदा सर्वैः जीवैरुपलभ्या इत्यासक्त । अथैष दोषो मा प्रापत् इति प्रतिनियताकाशप्रदेशाः श्रोत्रमितीष्यते । नन्वाकाशप्रदेशानां बहुत्वात् यत्प्रतिज्ञातं न सत्याकाशप्रदेशा मुख्या इति तद्धीनं । अथवा परमाणुराकाशेन कृत्स्नेन वा संयुज्यते न वा ? यदि कृत्स्नेन नन्वेवमणुमात्रमाकाशमाकाशमात्रोवाऽणु प्राप्नोति अथ एकप्रदेशेन संयुज्यते ननु निरपवादमेतत् सिद्धं मुख्या एवाऽऽकाशप्रदेशाः इति । किं च—

कर्माभावप्रसंगात् ॥ १८ ॥ इहोत्पन्नकर्मसु आश्रयं आश्रयांतराद्वियोज्य आश्रयांतरेण संयोजयति इति एषः कर्मणः स्वभावः सत्येवं प्रदेशत्वमाकाशस्य सिद्धं । इतरथा हि कर्माभावप्रसंगः प्रदेशांतरसंक्रमाभावात् । किं च—

एकानेकप्रदेशत्वं प्रत्यनेकांतात् पुरुषवत् ॥ १९ ॥ यथा पुरुसामान्यपौरुषेयशरीरद्रव्यार्थादेशात् स्यादेकत्वं । तस्यैव शिरःपृष्ठोरूदरपाणिपादांगुलिपर्वाद्यंगोपांगपर्यायार्थादेशात् स्यादनेकत्वं । अथवा पुरुषद्रव्यार्थादेशात्स्यादेकत्वं। स्वजात्यपरित्यागेन पावकलावकादिपर्यायार्थादेशात् स्यादनेकत्वं। पितृभागिनेयभ्रातृव्यमातुलादिपर्यायार्थादेशात् वा स्यादनेकत्वं । पंचेंद्रियारोग्यमेधाविपटुदुःकुशलशीलत्वादिपर्यायार्थादेशाद्वा स्यादनेकत्वं । तथा धर्माधर्माकाशजीवानां आत्मीयद्रव्यार्थादेशात् स्यादेकप्रदेशत्वं प्रतिनियतप्रदेशपर्यायार्थादेशात् स्यान्नानात्वं इत्यनेकांतः ।

संसारिणश्च व्यवहारतः सावयवत्वात् ॥२०॥ व्यवहाराद्व्यवहारतः व्यवहारनयार्पणादित्यर्थः कः पुनर्व्यवहारः, अनादिकर्मविबंधनबद्धत्वं। अतस्तदावेशात् तदनुविधायित्वे सति सावयवत्वोपपत्तेः संसारिणो जीवस्य प्रदेशत्वं। शुद्धनयादेशात्तूपयोगस्वभावस्याऽऽत्मनोऽप्रदेशत्वं। अथाकाशस्य कति प्रदेशाः? इत्यत आह–

आकाशस्याऽनंताः ॥ ९ ॥

अनंता इत्यन्यपदार्थनिर्देशः ॥ १ ॥ अंतोवसानमित्यर्थः अविद्यमानोऽन्तो येषां त इमेऽनंताः। अन्यपदार्थनिर्देशोऽयं। के पुनस्ते? प्रदेशाः। कुतः? प्रत्यासत्तेस्तदासिसंबंधोपपत्तेः।

असंख्येयानंतयोरविशेष इतिचेन्नोक्तत्वात् ॥ २ ॥ स्यान्मतं असंख्येयानंतयोर्नास्ति विशेषः। कुतः। द्रव्येयत्तापरिच्छेदाभावतुल्यत्वादिति तन्न। किं कारणं? उक्तत्वात्। उक्तोनयोर्भेदः नृस्थिती परावरे इत्यत्र।

अनंतत्वादपरिज्ञानमिति चेन्नातिशयज्ञानदृष्टत्वात् ॥३॥ स्यादेतत् सर्वज्ञेनानंतं परिच्छिन्नं वा अपरिच्छिन्नं वा? यदि परिच्छिन्नं उपलब्धावसानत्वात् अनंतत्वमस्य हीयते। अथापरिच्छिन्नं तत्स्वरूपानवबोधात् असर्वज्ञत्वं स्यादिति? तन्न। किं कारणं? अतिशयज्ञानदृष्टत्वात्। यत्तत्केवलिनां ज्ञानं क्षायिकं अतिशयवत् अनंतानंतपरिमाणं तेन तदनंतमवबुध्यते साक्षात्। तदुपदेशादितरैरनुमानेनेति न सर्वज्ञत्वहानिः। नच तेन परिच्छिन्नमित्यर्थः सांतं अनंतेनाऽनंतमिति ज्ञातत्वात्। किं च––

सर्वेषामविप्रतिपत्तेः ॥ ४ ॥ नात्र सर्वे प्रवादिनो विप्रतिपद्यंते। केचित्तावदाहुः अनंता लोकधातवः इति। अपरे मन्यंते दिक्कालात्माकाशानां सर्वगतत्वात् अनंतत्वमिति। इतरे ब्रुवते प्रकृतिपुरुषयोरनंतत्वं सर्वगतत्वादिति नचैतेषामनंतत्वादपरिज्ञानं, नापि परिज्ञानत्वमात्रादेव तेषामंततत्व। तस्मात् नैतद्युक्तं अनंतत्वादपरिज्ञानमिति।

सर्वज्ञाभावप्रसंगाच्च ॥ ५ ॥ यस्यार्थानामानंत्यमपरिज्ञानकारणं तस्य सर्वज्ञाभावः प्रसजति। अनंतो हि ज्ञेयः तस्यानंत्यादेव नच कश्चित् परिच्छेत्तास्तीति, अथांतवत्त्वं स्यात् संसारो मोक्षश्च नोपपद्यते। कथमिति चेदुच्यते–जीवाश्चेत्सांताः सर्वेषां हि मोक्षप्राप्तौ संसारोच्छेदः प्राप्नोति। तद्भयान्मुक्तानां पुनरावृत्त्यभ्युपगमे स मोक्ष एव न स्यात् अनात्यंतिकत्वात् एकैकस्मिन्नपि जीवे कर्मादिभावेन व्यवस्थिताः पुद्गला अनंतास्तेषां अंतवत्त्वे सति कर्मनोकर्मविषयविकल्पाभावात् संसाराभावः तदभावान्मोक्षश्च न स्यात्। तथातीतानागतकालयोरंतवत्त्वे प्राक् पश्चाच्च कालव्यवहाराभावः स्यात्। नचासौ युक्तः? असतः प्रादुर्भावाभावात् सतश्चात्यंतविनाशानुपपत्तेरिति। तथाकाशस्यांतवत्त्वाभ्युपगमे ततो बहिर्घनत्वप्रसंगः। नास्ति चेद्घनत्वमाकाशेनापि भवितव्यमित्यनंतवत्त्वाभावः। उक्तममूर्तानां प्रदेशपरिमाणमिदानीं मूर्तानां पुद्गलानां प्रदेशपरिमाणं निर्ज्ञातव्यमित्यत आह––

संख्येयासंख्येयाश्च पुद्गलानां ॥ १० ॥

चशब्दोऽनंतसमुच्चयार्थः ॥ १ ॥ अनंताः पुद्गलास्तेषां समुच्चयार्थश्चशब्दः क्रियते। संख्येयासंख्येयाः अनंताश्चेति। के पुनस्ते? प्रदेशाः इत्यनुवर्तते कस्यचित्पुद्गलद्रव्यस्य द्व्यणुकादेः संख्येयाः प्रदेशाः कस्य चिदसंख्येयाः अनंताश्च।

अनंतानंतोपसंख्यानमिति चेन्नाऽनंतसामान्यात् ॥ २ ॥ स्यादेतदनंतानंतप्रदेशाश्च पुद्गलाः संति तदुपसंग्रहार्थं उपसंख्यानं कर्तव्यमिति? तन्न। किं कारणं? अनंतसामान्यात्। अनंतप्रमाणं त्रिविधमुक्तं परीतानंतं युक्तानंतं अनंतानंतं चेति। तत्सर्वमनंतसामान्येंतर्भावात् अनंतग्रहणेन गृह्यत इति नोपसंख्यातव्यं।

अधिकरणविरोधादानंत्याभाव इति चेन्न सूक्ष्मपरिणामावगाहनसामर्थ्यात् ॥ ३ ॥ स्यान्मतं असंख्यातप्रदेशो लोकः, अनंतप्रदेशस्य च स्कंधस्याधिकरणमिति विरोधः ततो नानंत्यमिति? तन्न। किं कारणं? सूक्ष्मपरिणामावगाहनसामर्थ्यात्। परमाण्वादयो हि सूक्ष्मभावेन परिणताः एकैकस्मि-

न्याकाशप्रदेशे अनंतानंता अवतिष्ठंते । अवगाहनसामर्थ्यमप्येषामव्याहतमस्ति येन एकैकस्मिन्नपि प्रदेशेऽनंताऽनंतानां अवस्थानं न विरुध्यते । किं च—

अनेकांतात् ॥ ४ ॥ नायमेकांतः ? अल्पाऽधिकरणे महद्द्रव्यं नावतिष्ठते इति । कुतः ।

प्रचयविशेषात् संघातविशेषः ॥५॥ संघातविशेषः इत्यर्थः पुद्गलानां हि प्रचयविशेषात्। अल्पक्षेत्रे बहूनामवस्थानं दृष्टं । कथं ? संहतविसर्पितचंपकादिगंधादिवत् । यथाल्पे कुड्मलावस्थे चंपके सूक्ष्मप्रचयपरिणामात् संहताश्चंपकपुष्पगंधावयवाः तद्व्यापिनो बहवोऽवतिष्ठमाना दृष्टाः । तस्मिन्नेव विसर्पिते स्थूलप्रचय परिणामाद्विनिर्गताश्चंपकगंधावयवाः सर्वदिग्व्यापिनो दृष्टाः । यथा बिल्वे करीषपटले दारुपिंडे च प्रचयविशेषावगाढाः संतः पुद्गलाः अग्निना दह्यमानाः प्रचयविशेषेण धूमभावेन दिङ्मंडलव्यापिनो दृष्टाः । तथाल्पेपि लोकाकाशेऽनंतानंतानां च जीवपुद्गलानामवस्थानमिति नास्ति विरोधः । पुद्गलानामित्यविशेषवचनात् परिमाणोरपि प्रदेशबंधप्रसंगे तत्प्रतिषेधार्थमाह—

नाणोः ॥ ११ ॥

अणोः प्रदेशाः न संतीनि वाक्यशेषः । कुतो न संतीति चेदुच्यते—

प्रदेशमात्रत्वात् ॥ १ ॥ यथाकाशप्रदेशस्यैकप्रदेशभेदाभावात् अप्रदेशवत्त्वं । एवमणोरपि प्रदेशमात्रत्वात् प्रदेशभेदाभावः । किं च—

ततोऽल्पपरिमाणाभावात् ॥ २ ॥ न हि अणोरल्पीयान् अस्ति यतोऽस्य प्रदेशाः भिद्येरन्। अतः स्वयमेवाद्यंतपरिमाणत्वादप्रदेशोऽणुः । किं च —

अन्वर्थसंज्ञत्वात् ॥ ३ ॥ यथा प्रदीपनात् प्रदीप इत्यन्वर्थसंज्ञा तथाऽणुरितीयमप्यन्वर्थसंज्ञा अणुत्वात्सूक्ष्मत्वात् अणुरिति। यदि ह्यणोरपि प्रदेशाः स्युः ? अणुत्वमस्य न स्यात् प्रदेशप्रचयरूपत्वात् तत्प्रदेशानामेवाणुत्वं प्रसज्येत ।

अप्रदेशत्वादभावः खरविषाणवदिति चेन्नोक्तत्वात् ॥ ४ ॥ स्यादेतत् यथा खरविषाणमप्रदेशत्वान्नास्ति तथाणुरपि भवेत् इति ? तन्न। किं कारणं ? उक्तत्वात् । उक्तमेतत् प्रदेशमात्रोऽणुः, न खरविषाणवदप्रदेश इति ॥

आदिमध्यांतव्यपदेशाभावादिति चेन्न विज्ञानवत् ॥ ५ ॥ स्यान्मतं आदिमध्यांतव्यपदेशः परमाणोः स्याद्वा न वा ? यद्यस्ति प्रदेशवत्त्वं प्राप्नोति । अथ नास्ति खरविषाणवदस्याभावः स्यादिति ? तन्न किं कारणं ? विज्ञानवत् । यथा विज्ञानमादिमध्यांतव्यपदेशाभावेप्यस्ति तथाणुरपि इति । उत्तरत्र च तस्यास्तित्वं वक्ष्यते । एषामवधृतप्रदेशानां धर्मादीनामाधारप्रतिपत्त्यर्थमाह---

लोकाकाशेऽवगाहः ॥ १२ ॥

अनंतरत्वात्पुद्गलानामवगाहप्रसंग इति चेन्न समुदायापेक्षत्वात् ॥ १ ॥ स्यादेतदनंतराः पुद्गलाः ततस्तेषामेव लोकाकाशेऽवगाहः इत्ययमर्थ आसक्त इति ! तन्न किं कारणं ? समुदायापेक्षत्वात् । धर्मादीनि द्रव्याणि समुदितान्यत्रापेक्ष्यंते तत्रानंतरमिदव्यवहितमिति विवेको नास्ति ततः सर्वद्रव्याणामाधारगतिः सिद्धा भवति ॥

आकाशस्यापि अन्याधारकल्पनेति चेन्न स्वप्रतिष्ठत्वात् ॥ २ ॥ स्यान्मतं यथा धर्मादीनां लोकाकाशमाधारः तथाऽऽकाशस्याप्यन्येनाधारेण भवितव्यमिति तन्न। किं कारणं ? स्वप्रतिष्ठत्वात् । स्वस्मिन् प्रतिष्ठाऽस्येति स्वप्रतिष्ठमाकाशं । स्वात्मैवास्याधेय आधारश्चेत्यर्थः । कुतः ?

ततोऽधिकप्रमाणद्रव्यांतराधाराभावात् ॥ ३ ॥ न हि आकाशादधिकप्रमाणं द्रव्यांतरमस्ति यत्राकाशमाधेयं स्यात् ततः सर्वतो विरहितांतस्याधिकरणांतरस्याऽभावात् स्वप्रतिष्ठमवसेयं ।

तथाचानवस्थानिवृत्तिः ॥४॥ एवं च कृत्वाऽनवस्थादोषनिवृत्तिर्भवति । यतः स्वप्रतिष्ठमाकाशं न तस्यान्यदधिकरणं द्रव्यांतरमस्ति । अन्याधिकरणत्वे हि तस्याप्यन्यत् तस्याप्यन्यत् तस्याप्यन्यदित्य-नवस्था प्रसज्यते। किं च—

परमार्थतयात्मवृत्तित्वात् ॥ ५ ॥ एवंभूतनयादेशात् सर्वद्रव्याणि परमार्थतयाऽऽत्मप्रतिष्ठानी त्याधाराधेयाभावः ? कुतोऽनवस्था ।

अन्योन्याधारताव्याघात इति चेन्न व्यवहारतस्तत्सिद्धेः ॥६॥ स्यान्मतं यदि सर्वाणि द्रव्याणि परमार्थतया स्वात्मप्रतिष्ठानि ननु यदुक्तं वायोराकाशमधिकरणं, उदकस्य वायुः पृथिव्या उदकं, सर्वजीवानां पृथिवी, अजीवा जीवाधाराः, जीवाश्चाऽजीवाधाराः, कर्मणामधिकरणं जीवाः, जीवानां कर्माणि, धर्माधर्मकाला आकाशाधिकरणा इत्येतस्याऽन्योन्याधारतया व्याघात इति ? तन्न किं कारणं व्यवहारतः तत्सिद्धेः । सर्वमिदमुक्तं अन्योन्याधारत्वं व्यवहारनयवक्तव्यवललाभादेशात्सिध्यति । व्यावहारिकमेतत् आकाशे वातादीनामवगाह इत्याधारांतरकल्पनायामनवास्थाप्रसंग इति । परमार्थतस्तु आकाशवत् वातादीन्यपि स्वात्माधिष्ठानानि तत्कथमिति चेदुच्यते ।

क्रियाविष्टकर्तृकर्माधारवत् ॥ ७ ॥ क्रिया द्विविधा कर्तृसमवायिनी कर्मसमवायिनी चेति । तत्र कर्तृसमवायिनी आस्ते गच्छतीति । कर्मसमवायिनी ओदनं पचति कुशूलं भिनत्तीति । तदाविष्टस्य कर्तुः कर्मणश्चाधार आसनादिः स्थाल्यादिश्च । तत्र व्यवहारनयवशात् क्रियायाः द्रव्यमधिकरणं तदाविष्टस्य द्रव्यस्य द्रव्यांतरं । परमार्थस्तु एवंभूतनयवशात् क्रिया क्रियात्मन्येव । द्रव्यमपि स्वात्मन्येव । तथा लोकाकाशेऽवगाहो धर्मादीनामिति व्यवहारनयादेशादुक्तं । परमार्थतस्तु सर्वद्रव्याणि स्वात्माधिकरणानि ।

आकाशधर्मादीनामाधाराधेयत्वात् कुंडवदरवत् प्रसंग इति चेन्नाऽयुतसिद्धेपि तद्दर्शनात् शरीरे हस्तवत् ॥ ८ ॥ स्यादेतत् यथा कुंडे वदराणि इत्याधारः कुंडं, आधेयानि वदराणीति पूर्वा-परकालत्वं । युतसिद्धिश्च तेषां तथाधारत्वात् पूर्वमाकाशं पश्चाद्धर्मादीन्याधेयत्वादिति युतसिद्धिरतोनादित्वव्याघात इति ? तन्न । किं कारणं ? अयुतसिद्धेपि तद्दर्शनात् । कथं ? शरीरे हस्तवत् । यथा हस्तशरीरयोर्युगपत् उत्पत्तौ पूर्वापरत्वेऽसति अयुतसिद्धस्य हस्तस्य शरीरमाधारः । तथाकाशधर्मादीनामनादिपारिणामिक यौगपद्यसिद्धावसति पूर्वापरीभावे भवत्याधाराधेयत्वं । किं च---

अनेकांतात् ॥ ९ ॥ नैतदैकांतिकं युतसिद्धस्यैवाधाराधेयत्वं नायुतसिद्धस्येति । स्तंभसारादिषु कुंडवदरादिषु च दर्शनात् । तस्मादनेकांतान्नायमुपालंभः । अथ लोकाकाश इत्युच्यते को लोको नाम ?

यत्र पुण्यपापफललोकनं स लोकः ॥१०॥ पुण्यपापयोः कर्मणोः फलं सुखदुःखलक्षणं यत्रा-लोक्यते स लोकः क पुनरसौ ? आत्मा ।

लोकतीति वा लोकः ॥ ११ ॥ लोकति पश्यत्युपलभते अर्थानिति लोकः ।

इतरद्रव्यालोकप्रसंग इति चेन्न रूढौ क्रियाया व्युत्पत्तिमात्रनिमित्वात् ॥ १२ ॥ स्यादेतत् द्विधाप्युक्तेन क्रमेण जीवस्यैव लोकत्वं प्राप्तं इतरेषां द्रव्याणां अलोकत्वं ततश्च षड्द्रव्यसमूहो लोक इत्यार्षविरोधः इति ? तन्न किं कारणं ? रूढौ क्रियाया व्युत्पत्तिमात्रनिमित्तत्वात् । यथा गच्छतीति गौरिति व्युत्पत्तौ स्थितादीनां न गोत्वनिवृत्तिः । तथा लोकनाल्लोक इति व्युत्पत्तावपि धर्मादीनामपि न लोकत्वं हीयते ॥

लोक्यत इति वा लोकः ॥ १३ ॥ सर्वज्ञेनाऽनंताऽप्रतिहतकेवलदर्शनेन लोक्यते यः स लोकः । तेन धर्मादीनामपि लोकत्वं सिद्धं ॥

आत्मनो लोकत्वप्रसंग इति चेन्न स्वात्मलोकनात् ॥ १४ ॥ यो लोकते आत्मा तस्य लोकत्वं

प्राप्नोति लोक्यत्वाभावादिति तन्न किं स्वात्मलोकनात्। योसौ सर्वज्ञः बाह्यं लोकमानः स आत्मानमपि लोकते इति लोकत्वमस्य सिद्धं । इतरथा हि तस्य सर्वदर्शित्वाभावः आत्मानवलोकनात्। आत्मानमनवलोकमानस्य बाह्यलोकनासंभवश्च घटादिवत्। यथा घटादिरात्मानमपश्यन्नपरान्न पश्यति ।

अलोकस्यापि लोकत्वप्रसंग इति चेन्नोक्तत्वात् ॥ १५ ॥ स्यान्मतं यदि लोक्यत इति लोकः, अलोकस्यापि लोकत्वं प्राप्नोति सर्वदर्शिना लोक्यत्वात् । अथालोकं न लोकते सर्वदर्शित्वमस्य हीयते नचैतदृष्टं तस्माल्लोकप्रसग इति ? तन्न किं कारण उक्तत्वात् रूढिविशेषबललाभात् विशेषे वृत्तिरिति।

उभयविशेषणभावाद्वा ॥ १६ ॥ अथवा उभयविशेषणमिहोपादीयते । यत्रस्थेन सर्वज्ञेन लोक्यते यः स लोक इति नचाऽलोकस्थेनाऽलोको लोक्यते ततो नालोकस्य लोकत्वप्रसंगः ॥

तस्याऽऽकाशं लोकाकाशं जलाशयवत् ॥ १७ ॥ यथा जलस्य आशयस्थानं जलाशय इत्युच्यते । तथा लोकस्याकाशं लोकाकाशमिति स्थानापेक्षः संबंधोवसेयः । धर्माधर्मपुद्गलकालजीवा यत्र लोक्यंते स लोक इत्यधिकरणसाधनो घञ् । किं पुनरधिकरणं ? आकाशं । लोक एवाकाशं लोकाकाशमिति समानाधिकरणलक्षणा वृत्तिः तस्मिन्नवस्थानं धर्मादीनां द्रव्याणामतः आकाशं परप्रत्ययवशात् द्वेधा विभज्यते लोकाकाशमलोकाकाशं चेति । लोकाकाशं धर्माधर्मतुल्याऽसंख्येयप्रदेशं । बहिःसमंतादनंतमलोकाकाशं । तत्रावध्रियमाणानामवस्थानभेदसंभवात् विशेषप्रतिपत्त्यर्थमाह—

धर्माधर्मयोः कृत्स्ने ॥ १३ ॥

निरवशेषव्याप्तिप्रदेशनार्थं कृत्स्नवचनं ॥ १ ॥ यथाऽगारैकदेशे घटस्यावस्थानं न तथा धर्माधर्मयोः लोकाकाशेऽवगाहः । किं तर्हि ? तिलेषु तैलवदिति निरवशेषव्याप्तिप्रदेशनार्थं कृत्स्नवचनं क्रियते । धर्माधर्मौ हि लोकाकाशमशेषं नैरंतर्येण व्याप्य स्थितौ । कथमेषां परस्परप्रदेशाविरोधः ?

अमूर्तित्वात्त्रयाणां परस्परप्रदेशाविरोधः ॥२॥ मूर्तिमंतोपि केचित् जलभस्मसिकतादयः एकत्र अविरोधेनाऽवतिष्ठंते किमुताऽमूर्तानि धर्माधर्माकाशानि । तस्मादमूर्तित्वादेषां परस्पराविरोधो वेदितव्यः ।

अनादिसंबंधपरिणामाच्च ॥ ३ ॥ भेदसंघातपरिणामपूर्वकादिमत्संबंधानां स्थविष्ठानां स्कंधानां केषां चित् प्रदेशविरोधः स्यात् न तु धर्मादीनां तद्वत् आदिमान् संबंधः । पारिणामिकाऽनादिसंबंधात्तेषां, ततश्च अन्योन्यप्रदेशाविरोधः सिद्धः । ततो विपरीतानां मूर्तिमतां अप्रदेशसंख्येयाऽनंतप्रदेशानां पुद्गलानामवगाहनविशेषप्रतिपत्त्यर्थमाह—

एकप्रदेशादिषु भाज्यः पुद्गलानां ॥ १४ ॥

एकप्रदेशादिष्वित्यवयवेन विग्रहः समुदायो वृत्त्यर्थः ॥१॥ एकश्चासौ प्रदेशश्चैकप्रदेशः एकप्रदेश आदिर्येषां त इमे एकप्रदेशादयः । के पुनस्ते ? प्रदेशाः । कुतः ? एतत्तुल्यजातीयत्वात् उपलक्ष्योपलक्षणयोः सोमशर्मादिवत् । प्रदेशग्रहणानुवृत्तेर्वा तेष्वेकप्रदेशादिषु इति विग्रहः समुदायो वृत्त्यर्थः सर्वादिवत् । तेनैकप्रदेश उपलक्षणभूतोप्यंतर्भवति । भाज्यो विकल्पो भजनीयो भाज्यः पृथक् कर्तव्यः विकल्पे भाज्य इत्यनर्थांतरं । कःपुनरसौ ? अवगाह इत्यनुवर्तते । तद्यथा— एकस्य परमाणोरेकत्रैव आकाशप्रदेशेऽवगाहः द्वयोरेकत्रोभयत्र च बद्धयोरबद्धयोश्च, त्रयाणामेकत्र द्वयोस्त्रिषु च बद्धानामबद्धानां च । एवं संख्येयासंख्येयाऽनंतप्रदेशानां स्कंधानामेकसंख्येयासंख्येयप्रदेशेषु लोकाकाशे अवस्थानं प्रत्येतव्यं ।

एकप्रदेशेनैकस्यावस्थानमयुक्तमिति चेन्नोक्तत्वात् ॥ २ ॥ स्यान्मतं भवतु तावद्धर्मादीनां एकप्रदेशेऽवस्थानं अमूर्तिस्वभावत्वात् । मूर्तिमतां पुद्गलानां एकप्रदेशेऽवस्थानमयुक्त भवति । युक्तं चेत् प्रदेशस्य विभागवत्त्वं प्रसक्तं अवगाहिनां चैकत्वमिति ? तन्न । किं कारणं ? उक्तत्वात् । उक्तमेतत् प्रचयविशेषादिति चैकत्रावस्थानमिति । किं च—

एकापवरकेऽनेकप्रकाशावस्थानदर्शनादविरोधः ॥ ३ ॥ यथैकस्मिन्नपवरके बहवः प्रकाशाः वर्तंते नच क्षेत्रविभागः । नापि एकक्षेत्रावगाहित्वात् तेषां प्रकाशनामेकत्वं तथैकस्मिन् प्रदेश अनंता अपि संबद्धाः सूक्ष्मपरिणामात् असकरेण व्यवतिष्ठत इति नास्ति विरोधः । किंच—

द्रव्यस्वभावस्याऽचोदनार्हत्वात् ॥ ४ ॥ द्रव्याणां हि स्वभावाः प्रतिनियताः संति न ते चोदनार्हाः । एवं भवतु मैव भूदिति । यथाऽग्न्यादीनां दहनादयः तृणादीनां च दाह्यत्वादयस्तथा मूर्तिमत्त्वेपि अवगाहनस्वभावत्वादेकस्मिन्नपि प्रदेशे बहूनां स्कंधानामवरोधो न विरोधाय कल्प्यते । किं च—

आर्षोक्तत्वात् सूक्ष्मनिगोतावस्थानवत् ॥ ५ ॥ सर्वज्ञज्ञानद्योतितार्थसारं गणधरानुस्मृतवचनरचनं शिष्यप्रतिशिष्यप्रबंधानुपरमादव्युच्छिन्नसंतानं आर्षमवितथमस्ति—

ओगाढगाढणिचिदो पोग्गलकाएहि सव्वदो लोगो सुहुमे हि बादरेहिं अणंताणंतेहि विविहे हि ॥ १ ॥

इत्येवमादि । अतस्तत्प्रामाण्यादपि उक्तोवगाहोऽत्रसेयः । यथैकनिगोतजीवशरीरेऽनंता निगोतजीवाः तिष्ठंति । साधारणाऽऽहारप्राणापानजीवितमरणत्वात् साधारणा इत्यन्वर्थसंज्ञा इत्येतदागमप्रामाण्यादवसीयते तथैव भेदमपीति । अथ जीवानामवगाहः कथमित्यत इदमुच्यते—

असंख्येयभागादिषु जीवानां ॥ १५ ॥

असंख्येयभागादिष्विति चोक्तं । किमुक्तं ?

अवयवेन विग्रहः समुदायो वृत्त्यर्थ इति ॥ १ ॥ असंख्येयानां भागानामेको भागोसंख्येयभागः असंख्येयभाग आदिर्येषां ते असंख्येयभागादयः । असंख्येयभागादिषु संख्येयभागादिषु किं भाव्यः ? अवगाह इत्यनुवर्तते । अत्राह कस्याऽसंख्येयभागादिष्विति ?

लोकाकाशप्रकरणात्तदभिसंबंधः ॥ २ ॥ लोकाकाश इत्यनुवर्तते अतस्तदभिसंबंधोत्र वेदितव्यः । ननु च असावधिकरणनिर्देशः संबंधनिर्देशे नचेहार्थः ।

अर्थवशाद्विभक्तिपरिणामः ॥ ३ ॥ यथोच्चानि देवदत्तस्य गृहाणि आमंत्रयस्वैनं देवदत्तमिति । गम्यते । एवमसंख्येयभागादिषु इत्यनेनाभिसंबंधात् लोकाकाश इत्येष निर्देशः । लोकाकाशस्येत्यर्थवशात् विभक्तिः परिणम्यते । तद्यथा—लोकस्य प्रदेशाः असंख्येयाः भागाः कृताः तत्रैकस्मिन्नसंख्येयभागे एको जीवोऽवतिष्ठते । तथा द्वित्रिचतुरादिष्वपि असंख्येयभागेषु आ सर्वलोकादवगाहः प्रत्येतव्यः । नानाजीवानां तु सर्वलोक एव ।

असंख्येयत्वाविशेषादवगाहाविशेष इति चेन्नाऽसंख्येयस्याऽसंख्येयविकल्पत्वात् ॥ ४ ॥ स्यान्मतं एकस्मिन्नप्यसंख्येयभागे प्रदेशा असंख्येयाः द्वित्रिचतुरादिष्वपि असंख्येया एव ततो नास्ति जीवानामवगाहविशेष इति ? तन्न । किं कारणं ? असंख्येयस्यासंख्येयाविकल्पत्वात् । अजघन्योत्कृष्टासंख्येयस्य हि असंख्येया विकल्पाः । अतोऽवगाहविकल्पो जीवानां सिद्धः ।

प्रमाणविरोधादवगाहायुक्तिरिति चेन्न जीवद्वैविध्यात् ॥ ५ ॥ स्यादेतत् यदैकस्मिन् लोकस्यासंख्येयभागे एको जीवोऽवतिष्ठते द्रव्यप्रमाणेनाऽनंतानंतो जीवराशिः लोकाकाशे प्रमाणविरोधात् न स्थातुमर्हति इति ? तन्न । किं कारणं ? जीवद्वैविध्यात् । जीवाः बादराः सूक्ष्माश्च इति तत्र बादराः सप्रतिघातशरीराः सूक्ष्माः जीवाः सूक्ष्मपरिणामादेव सशरीरत्वेपि परस्परेण बादरैश्च न प्रतिहन्यंत इत्यप्रतिघातशरीराः । ततो यत्रैकसूक्ष्मनिगोतजीवस्तिष्ठति तत्रानंतानंताः साधारणशरीराः वसंति । बादराणां च मनुष्यादीनां शरीरेषु संस्वेदजसंमूर्छनजादीनां जीवानां प्रतिशरीरं बहूनामवस्थानमिति नास्त्यवगाहविरोधः । यदि बादरा एव जीवा अभविष्यन्नपि तर्हि अवगाहाविरोधोऽजनिष्यत् ।

कथं सशरीरस्यात्मनोऽप्रतिघातत्वमिति च दृष्टत्वात् ॥ ६ ॥ दृश्यते हि वालाग्रकोटिमात्रछिद्ररहिते घनबहलायसभित्तितले वज्रमयकपाटे बहिः समंतात् वज्रलेपलिप्ते अपवरके देवदत्तस्य मृतस्य मूर्ति-

मज्ञानावरणादिकर्मतैजसकार्मणशरीरसंबंधित्वेपि गृहमभित्त्वैव निर्गमनं । तथा सूक्ष्मनिगोतानां अप्यप्रतिघातित्वं वेदितव्यं । अत्राह—लोकाकाशतुल्यप्रदेशः एको जीव इत्युक्तं तस्य कथं लोकस्यासंख्येयभागादिषु वृत्तिः ? ननु सर्वलोकव्याप्त्यैव भवितव्यमित्यत्रोच्यते—

प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् ॥ १६ ॥

कार्मणशरीरवशात् उपात्तसूक्ष्मबादरशरीरानुवर्तनं प्रदेशसंहारविसर्पः ॥ १ ॥ अमूर्तस्वभावस्याप्यात्मनः अनादिसंबंधं प्रत्येकत्वात् कथंचिन्मूर्ततां बिभ्रतः, लोकाकाशतुल्यप्रदेशस्यापि कार्मणशरीरवशात् उपात्तसूक्ष्मशरीरमधितिष्ठतः, शुष्कचर्मवत् संकोचनं प्रदेशसंहारः । बादरशरीरमधितिष्ठतो जले तैलवत् विसर्पणं विसर्पः ।

ताभ्यामसंख्येयभागादिषु वृत्तिः प्रदीपवत् ॥ २ ॥ यथा निरावरणव्योमप्रदेशावधृतप्रकाशपरिमाणः प्रदीपः शरावमल्लिकापवरकाद्यावरणवशात् तत्परिमाणप्रकाश उपलभ्यते । तथा ताभ्यां प्रदेशसंहारविसर्पाभ्यां असंख्येयभागादिषु परिच्छिन्ना वृत्तिरात्मनोऽवगंतव्या ।

तद्वदनित्यत्वप्रसंग इतिचेन्नेष्टत्वात् ॥ ३ ॥ स्यादेतत् परिसंहारविसर्पणस्वभाव आत्मा प्रदीपादिवदेवास्यानित्यत्वं प्रसजतीति ? तन्न । किं कारणं ? इष्टत्वात् । इष्टमेव तदात्मनः कार्मणशरीरापादितप्रदेशसंहारविसर्पपर्यायादेशादनित्यत्वं । अथवा इष्टत्वादिष्टमेवैतत्, प्रदीपादेः संकोचविकाशस्वभावत्वेपि रूपिद्रव्यसामान्यादेशान्नित्यत्वं तथात्मनोपीति न बाधाकरो दृष्टांतः ।

सावयवत्वाद्विशरणप्रसंग इति चेन्न अमूर्तस्वभावापरित्यागात् ॥ ४ ॥ स्यान्मतं प्रदीपादिवत् यदि प्रदेशसंहारविसर्पवानात्मा अतः संसारिणः घटादिवत् छेदभेदादिभिः प्रदेशविशरणप्रसंगः ततश्च शून्यता प्राप्नोति इति ? तन्न । किं करणं ? अमूर्तस्वभावापरित्यागात् । बंधं प्रत्येकत्वे सत्यपि लक्षणभेदादन्यत्वमापद्यमानः नामूर्तस्वभावं जहातीति घटादिवत् न प्रदेशविशरणमस्ति किंच—

अनेकांतात् ॥ ५ ॥ यो ह्येकांतेन संहारविसर्पवानेवात्मा सावयवश्चेति ब्रूयात् तं प्रत्ययमुपालंभो घटामुपेयात् । यस्य त्वनादिपारिणामिकचैतन्यजीवद्रव्योपयोगादिद्रव्यार्थादेशात् स्यान्न प्रदेशसंहारविसर्पवान् । द्रव्यार्थादेशाच्च स्यान्निरवयवः । प्रतिनियतसूक्ष्मबादरशरीरापेक्षनिर्माणनामोदयपर्यायार्थादेशात् स्यात् प्रदेशसंहारविसर्पवान् । अनादिकर्मबंधपर्यायार्थादेशाच्च स्यात् सावयवः तं प्रत्यनुपालंभः । किं च—

तत्प्रदेशानामकारणपूर्वकत्वादणुवत् ॥ ६ ॥ यस्यावयवाः कारणपूर्वका भवंति तस्यावयवविशरणं भवति । अवयूयंते विश्लिष्यंते इत्यवयवाः । यथा पटादेरनेकतंत्वादिसंघातकारणत्वात् तंत्वादिविश्लेषे विशरणं भवति न तथात्मनः अन्यद्रव्यसंघातपूर्वकाः प्रदेशाः । कुतः ? तत्प्रदेशानां अकारणपूर्वकत्वात् । यथाणोः प्रदेशः नान्यद्द्रव्यसंघातपूर्वकः ततो नासाववयवविश्लेषपूर्वकमनित्यत्वमास्कंदति किंतु संघातेनाऽनित्यः । तथात्मप्रदेशानामपि नान्यद्रव्यपूर्वकत्वमतः प्रदेशवत्त्वात् आत्मा सावयवोपि नावयवविश्लेषादनित्यः । किं तु गत्यादिपर्यायादेशादनित्यः ।

तत एव प्रतिप्रदेशं गुणविशेषाभावो घटवत् ॥७॥ कुत एव ? प्रदेशानामकारणपूर्वकत्वादेव । यथा घटस्य प्रदेशाः अन्यद्रव्यसंघातपूर्वका इति तेषु प्रतिप्रदेशं रूपादिगुणविशेषो दृष्टः, न तथात्मप्रदेशा अन्यद्रव्यसंघातपूर्वकाः इति न तेषु प्रतिप्रदेशं सुखादिगुणविशेषो भवति । यदि हि अन्यद्रव्यसंघातपूर्वकाः स्युः आत्मनः प्रदेशाः तेषु घटवत् सुखादिविशेषवृत्तिः स्यात् ततश्चात्मनो बहुत्वं प्रसज्येत । तथाणोः निरवयव एकजातीयो गुणः शुक्लादिरेककाले भवति एक एव न भिन्नजातीयस्तथात्मनि निरवयवे एकजातीयगुणः सुखादिरेककाले भवति एक एव । अत्र कश्चिदाह—वर्षातपाभ्यां किं व्योम्नश्चर्मण्यस्ति तयोः फलं, चर्मोप-

---

१ तथाणोः पाठोयं ख. पुस्तके । २ चर्मणश्च ख. पुस्तके पाठः ।

भवेत् सोऽनित्यः खलुत्यश्चेदसत्फलमित्यत्रोच्यते—पिष्टपेषणमेतदमूर्तत्वं प्रति नित्यानित्यत्वं च प्रत्यनैकांतिकत्वात् उपलंभाभाव इति ।

पुद्गलवदेकप्रदेशादिषु वृत्तिप्रसंग इति चेन्न शरीरप्रमाणानुविधानात् ॥ ८ ॥ स्यान्मत प्रदेशसंहारविसर्पणाभ्यामेव पुद्गलवदेकप्रदशादिषु जीवस्य वृत्तिः प्राप्नोतीति ? तन्न। किं कारणं ? शरीरप्रमाणानुविधानात्। कार्मणशरीरवशादुपात्तं महदल्पं वा शरीरमधितिष्ठति संसारी जीव इत्युक्तं, नचैकप्रदेशादिकं शरीरमस्ति जघन्येनांऽगुलस्याऽसंख्येयभागप्रमाणत्वात् । अतो नास्यैकप्रदेशादिषु वृत्तिरस्ति ।

मुक्तानामेतत्प्रसंग इति चेन्न देशोनांत्यविग्रहप्रमाणावस्थानात् ॥ ९ ॥ स्यादेतत् यदि शरीरप्रमाणानुनिधानात् आत्मनो नैकप्रदेशादिषु वृत्तिः मुक्तानां तर्हि तदभावात्तत्प्रसंग इति ? तन्न। किं कारणं ? देशोनांत्यविग्रहप्रमाणावस्थानात् । येन शरीरेण मुक्तिमवाप्तवान् जीवस्तत्प्रमाणमेव देशोनमवलंव्यावतिष्ठति, न ततो वृद्धिर्नापि हानिः पुनः प्रदेशसंहारविसर्पकारणाभावात् । अत्राह-

न धर्मादीनां नानात्वं कुतः देशसंस्थानकालदर्शनस्पर्शनावगाहनाद्यभेदात् ॥ १० ॥ देशस्तावदेषामभिन्नः, यस्मिन् देशे धर्मोवास्थितः तस्मिन्नेवेतरेषामवस्थानात् । संस्थानमप्यभिन्नं यदेव धर्मस्य संस्थानमाकारः तदेवेतरेषां । कालश्चाभिन्नास्त्रिषु कालेषु धर्मादीनां तुल्यवृत्तित्वात् । दर्शनमप्यविशिष्टं येषु यत्रैको धर्मः प्रत्यक्षज्ञानिभिर्दृष्टः तत्रैवेतरेषामपि दर्शनमप्यविशिष्टं । धर्मादीनि द्रव्याणि सर्वात्मनाऽन्योन्यं स्पृशंतीत्यवगाहनं चाऽभिन्नमेषां सर्वगतत्वात् तथा अरूपत्वद्रव्यत्वज्ञेयत्वादिभिरप्यविशेषोऽवसेयः । अत्रोच्यते—

नातस्तत्सिद्धेः ॥ ११ ॥ यत एव धर्मादीनां देशादिभिः अविशेषस्त्वया चोद्यते अत एव नानात्वसिद्धिः, यतो नासति नानात्वेऽविशेषसिद्धिः । नह्येकस्याविशेषोस्ति । किं च यथा रूपरसादीनां तुल्यदेशाधिष्ठानत्वे नैकत्वं तथा धर्मादीनामपि नानात्वमिति । आह रूपादीनां तुल्यदेशत्वेपि चाक्षुषत्वादिविशिष्टलक्षणोपेतत्वात् नानात्वं युक्तं न तथा धर्मादीनां विशेषकरं किंचिल्लक्षणमुक्तं । स्यादेतत् यदि न लक्षभेदः अस्ति तु भिन्नलक्षणं । किं पुनस्तत् ? इत्यत उत्तरं पठति ।

गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकारः ॥ १७ ॥

अथवा अणुस्कंधभेदात् पुद्गलानां, असंख्येयप्रदेशत्वाच्च आत्मनां अवगहिनां एक प्रदेशादिषु पुद्गलानां असंख्येयभागादिषु च जीवानां अवस्थानं युक्तमुक्तं । तुल्ये पुनः असंख्येयप्रदेशत्वे कृत्स्नलोकव्यापित्वमेव धर्माधर्मयोः न पुनरसंख्येयभागादिवृत्तिरिति, एवं तत्कथमनुपादिष्टहेतुकमवसातुं शक्यमित्यत्र ब्रूमः-अत्रसंशयमसंशयं । यथा मत्स्यगमनस्य जलमुपग्रहकारणमिति नासति जले मत्स्यगमनं भवति । तथा जीवपुद्गलानां प्रयोगविस्रसा परिणामानिमित्ताहितप्रकारां गतिस्थितिलक्षणां क्रियां स्वत एवाऽऽरभमाणानां सर्वत्र भावात् तदुपग्रहकारणाभ्यामपि धर्माधर्माभ्यां सर्वगताभ्यां भवितव्यं नासतोस्तयोर्गतिस्थितिवृत्तिरिति ह्यौपित्वदर्शनार्थं इदमुच्यते—

द्रव्यस्य देशांतरप्राप्तिहेतुः परिणामो गतिः ॥ १ ॥ द्रव्यस्य बाह्याभ्यंतरहेतुसन्निधाने सति परिणममानस्य देशांतरप्राप्तिहेतुः परिणामो गतिरित्युच्यते ।

तद्विपरीता स्थितिः ॥ २ ॥ द्रव्यस्य स्वदेशादप्रच्यवनहेतुर्गतिनिवृत्तिरूपा स्थितिरवगंतव्या ।

उपग्रहोनुग्रहः ॥ ३ ॥ द्रव्याणां शक्त्यंतराविर्भावे च कारणभावोऽनुग्रह उपग्रह इत्याख्यायते ॥

गतिस्थित्युपग्रहावित्यनेकविग्रहसंभवादर्थानिश्चयः ॥ ४ ॥ विग्रहपूर्वको हि लोके वृत्तिपदस्यार्थनिश्चयो भवति गतिस्थित्युपग्रहौ इत्यत्र तु अनेकविग्रहसंभवात् नास्त्यर्थनिश्चयः । तद्यथा—गतिश्च

---

१ अमूर्तमूर्तत्वमिति ख पुस्तके पाठः । २ तुल्यदेशाधिष्ठानत्वेन न नैकत्वं, इति पाठांतरं । ३ कृत्स्नेति ख. पुस्तके पाठः ।

स्थितिश्च गतिस्थिती गतिस्थिती उपग्रहौ ययोस्तौगतिस्थित्युपग्रहौ । गतिस्थित्योरुपग्रहौ गतिस्थित्युपग्रहौ । गतिस्थिती एव वा उपग्रहौ गतिस्थित्युपग्रहौ इति ? नैष दोषः ।

अन्यपदार्थवृत्तिभावो गतिस्थित्युपग्रहौ धर्माधर्माविल्यवचनात् ॥ ५ ॥ नात्राऽन्यपदार्था वृत्तिः संभवति । कुतः ? गतिस्थित्युपग्रहौ धर्माधर्मावित्यवचनात् ।

न षष्ठीवृत्तिर्द्विवचनानिर्देशात् ॥ ६ ॥ नेयं षष्ठी वृत्तिः गतिस्थित्योरुपग्रहौ गतिस्थित्युपग्रहाविति । कुतः ? द्विवचननिर्देशात् । यदि हि अत्र षष्ठीवृत्तिः स्यात् उत्तरपदार्थस्य भावस्यैकस्य प्राधान्यात् लब्धर्थ एकवचननिर्देशः क्रियते । भेदेन च प्रयोजनाभावात् ।

परिशेषात् समानाधिकरणा वृत्तिः ॥ ८ ॥ परिशेषात् समानाधिकरणलक्षणा वृत्तिर्वेदितव्या गतिस्थिती एव उपग्रहौ गतिस्थित्युपग्रहाविति ।

तथा च द्वित्वोपपत्तिः ॥ ८ ॥ एवं च कृत्वा द्वित्वमुपपन्नं भवति । गतिस्थित्योर्भेदात् तत्सा मानाधिकरण्यात् भेदसिद्धेः । कथं सामानाधिकरण्यं ? कर्मसाधनत्वात् उपगृह्येते इत्युपग्रहौ गतिस्थिती इति ।

धर्माधर्मयोरिति कर्तृनिर्देशः ॥ ९ ॥ धर्माधर्मयोरित्ययं कर्तृनिर्देशो द्रष्टव्यः कथं ? कर्तरि षष्ठीविधानात् । कां क्रियामपेक्ष्य कर्तृत्वं विविक्षित ? उपकार इत्युच्यते–उपकरोतिक्रियायाः कर्तृत्वं उपकार इति । किं साधनोयं शब्दः ? भावसाधनः ।

उपकार इति भावसाधनश्चेत् पूर्वेण सामानाधिकरण्यानुपपत्तिरर्थांतरवृत्तेः ॥ १० ॥ यद्युपकरणमुपकार इति भावसाधनशब्दः, गतिस्थित्युपग्रहावित्यनेन सामानाधिकरण्यं नोपपद्यते कुतः ? अर्थांतरवृत्तेः । धर्माधर्मयोरुपकारो गतिस्थित्युपग्रहाविति । कुतः ? अर्थांतरवृत्तेः । उपकारो हि धर्माधर्मयोर्वर्तते कर्तृस्थक्रियत्वात् । करोते; उपगृह्यमाणे तु गतिस्थिती जीवपुद्गलेष्विति । एवं तर्हि कर्मसाधनः ।

कर्मसाधनश्चेद्वचनभेदानुपपत्तिः ॥ ११ ॥ यदि कर्मसाधनः वचनभेदो नोपपद्यते सामानाधिकरण्यात् द्विवचनं प्राप्नोति ॥

नवा सामान्योपादानात् ॥ १२ ॥ नैष दोषः किं कारणं ? सामान्योपादानात् । यथा साधोः कार्यं ततःश्रुते इति प्राक्सामान्यमपेक्ष्य लब्धैकवचनः कार्यशब्दः पश्चाद्विशेषसन्निधानेपि नोपात्तं वचनं जहाति । तदिहापि उपकारशब्दः उपात्तांतरैकवचनो भिन्नवचनपदांतरापेक्षायामपि न वचनांतरसंक्रमं करोति ।

षष्ठीवृत्तिर्वा भावसाधनत्वोपपत्तेः ॥ १३ ॥ अथवा गतिस्थित्योरुपग्रहौ गतिस्थित्युपग्रहाविति षष्ठी वृत्तिरियं । कुतः ? भावसाधनत्वोपपत्तेः उपग्रहणमुपग्रह इति भावसाधनोयं शब्दः । तथा उपकारशब्दश्च भावसाधन उपकरणमुपकारः इति । ननु चोक्तं भावस्यैकत्वात् द्विवचननिर्देशो नोपपद्यते इति नैष दोषः–

यथासंख्यप्रतिपत्त्यर्थो द्विवचनप्रयोगः ॥ १४ ॥ धर्माधर्मौ द्वौ गतिस्थित्युपग्रहौ द्वौ तयोः सामान्येन यथासंख्यं स्यात् इति द्विवचनप्रयोगः क्रियते । एकवचने हि सति यथा भूमिरेकैवाश्वादीनां गतिस्थित्योरुपग्रहे वर्तते । तथा धर्म एक एव जीवपुद्गलानां गतिस्थित्योरुपग्रहं कुर्यात् । तथाऽधर्मोपि इत्ययमर्थो गम्येत । अन्यतरस्य वैयर्थ्यमिति चेन्नानेकसहायकारणदर्शनात् । तेनैतदुक्तं भवति जीवपुद्गलानां स्वयमेव गतिपरिणामिनां तदुपग्रहकारणत्वेनानुमीयमानो धर्मास्तिकायः । तथा जीवपुद्गलानां स्वयमेव 'स्थितिपरिणामिनां तदुपग्रहकारणत्वेनानुमीयमानोऽधर्मास्तिकाय'' इति सर्वत्र च तत्प्रयोजनदर्शनात् सर्वगतौ चैताविति ।

उपग्रहावचनमुपकारेण कृतत्वात् ॥ १५ ॥ उपग्रहवचनमनर्थकं । कुतः ? उपकारेण कृतत्वात् । उपग्रह उपकार इत्यनर्थांतरं । तेन गतिस्थिती धर्माधर्मयोरुपकार इत्यस्तु लघुत्वात् ।

तयोः कर्तृत्वप्रसंग इति चेन्नोपकारवचनात् यष्ट्यादिवत् ॥ १६ ॥ स्यादेतत् गतिस्थित्योः

---

१ तयामेवेति ख. पुस्तके पाठः ।

धर्माधर्मौ कर्तारौ इत्ययमर्थः प्रसक्त इति । तन्न किं कारणं ? उपकारवचनात् । उपकारो बलाधानं अवलंबनं इत्यनर्थांतरं तेन धर्माधर्मयोः गतिस्थितिनिर्वर्तने प्रधानकर्तृत्वमपोदितं भवति । यथांधस्येतरस्य वा स्वजंघाबलाद्गच्छतः यष्ट्याद्युपकारकं भवति न तु प्रेरकं तथा जीवपुद्गलानां स्वशक्त्यैव गच्छतां तिष्ठतां च धर्माधर्मौ उपकारकौ न प्रेरकौ इत्युक्तं भवति ।

गतिस्थिती धर्माधर्मकृते इत्यनुपदेशश्च ॥ १७ ॥ यदि धर्माधर्मौ गतिस्थित्योः प्रधानकर्तारौ स्यातां गतिस्थिती धर्माधर्मकृते इत्युच्यते नन्वेवमुक्तं ततश्च मन्यामहे न प्रधानकर्तारौ इति ।

नवा यथासंख्यनिवृत्त्यर्थत्वात् ॥ १८ ॥ नवैष दोषः । किं कारणं ? यथासंख्यनिवृत्त्यर्थत्वात् । गतिस्थिती धर्माधर्मयोरुपकार इत्युच्यमाने आत्मनां गतिपरिणामोपकारो धर्मस्य न पुद्गलानां, स्थितिपरिणामोपकार इतरस्य नात्मनामिति यथासंख्यं प्रतीयेत तन्निवृत्त्यर्थमुपग्रहवचनं क्रियते ॥

व्याख्यानादिष्टसंप्रत्यय इति चेन्न प्रतिपत्तेर्गौरवात् ॥ १९ ॥ स्यादेतत् सर्वसंदेहेष्विदमुपतिष्ठते 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति' तत इष्टस्य संप्रत्ययो भवतीति ? तन्न । किं कारणं प्रतिपत्तेर्गौरवात् । व्याख्यानादिष्टसंप्रत्यये क्रियमाणे बुद्धिखेदो माभूत् इत्युपग्रहवचनं कृतं ।

सौखर्यादाकाशस्योपग्रह इति चेन्न धर्माधर्मकालात्मपुद्गलाधिकरणत्वात् नगरांतर्गतवेश्मवत् ॥ २० ॥ स्यादेतत् आकाशं सर्वगतमस्ति तच्च सौखर्यगुणोपेतमतः तस्यैव गतिस्थित्युपग्रहो युक्तः, किमन्याभ्यां वृथा कल्पिताभ्यां धर्माधर्माभ्यामिति ? तन्न । किं कारणं ? धर्माधर्मकालात्मपुद्गलाधिकरणत्वात् नभसः, कथं ? नगरांतर्गतवेश्मवत् । यथा नगरांतर्गतानां वेश्मनां नगरमधिकरणं तथा धर्मादीनां पंचानां आकाशमधिकरणं नचान्यस्य धर्मोऽन्यस्य भवितुमर्हति यदि स्यादग्नेजोगुणा द्रवदहनादयः पृथिव्या एव कल्प्यतां । किं च—

आकाशास्तित्वेऽनुगृहीतृद्रव्यसंबंधेन सामर्थ्याविर्भाववदर्शनात् अनुमिषभ्रज्यावत् ॥ २१ ॥ यथा अनुमिषस्य भ्रज्या जलोपग्रहाद्भवति, जलाभावे च भुवि न भवति, सत्यप्याकाशे यद्याकाशोपग्रहात् मीनस्य गतिर्भवेत् भुवि अपि भवेत् । तथा गतिस्थितिपरिणामिनां आत्मपुद्गलानां धर्माधर्मोपग्रहात् गतिस्थिती भवतो नाकाशोपग्रहात् गतिस्थिती स्यातां अलोकाकाशेऽपि भवेतां । अतश्च लोकालोकविभागाभावः स्यात् । लोकव्यतिरिक्तेन चाऽलोकेन भवितव्य नञ्पदोपहितस्यार्थवत्त्वदर्शनात् अब्राह्मणाभिधानवत् ।

स्वबाह्यकारणभावाभावयोस्तद्भावाभाववदर्शनात् तदभाव इति चेन्न साधारणकारणत्वादाकाशवत् ॥ २२ ॥ स्यान्मतं इह गतिमतां स्थितिमतां च द्रव्याणां प्रतिनियतस्वबाह्यकारणसन्निधाने सति नियतगतिस्थित्योर्भावो दृष्टः यथा मत्स्यादीनां जलादिसद्भावे । तदभावेचाभावो दृष्टः । तेषामेव जलाद्यभावे धर्माधर्मयोः सतोरपि गतिस्थित्यभावः तस्मात्तदाधाने गतिस्थिती इति धर्माधर्मयोरभावः इति ? तन्न । किं कारणं ? साधारणकारणत्वात् आकाशवत् । यथा सत्यपि भूम्यादावधिकरणं सर्वेषां साधारणामधिकरणमाकाशमिष्यते तथा मत्स्यादीनां सत्स्वपि जलादिषु कारणेषु सर्वेषां गतिस्थित्योः साधारणकारणकौ धर्माधर्मावभ्युपगंतव्यौ ।

आकाशमेव पर्याप्तमिति चेन्न सर्वतंत्रविरोधात् ॥ २३ ॥ स्यादेतदाकाशमेव विभुत्वात् सर्वद्रव्याणां गतिस्थित्योः साधारणकारणत्वेन पर्याप्तमिति ? तन्न । किं कारणं ? सर्वतंत्रविरोधात् । आकाशमेव पर्याप्तं नान्यदिति नियच्छतः सर्वतंत्रविरोधो भवति । तद्यथा—केचित्तावदाहुः[२]—आकाशकालदिगात्मानः सर्वगताः प्रतिनियतस्वलक्षणाः इति । तत्र हि दिङ्निमित्तो यो व्यवहारः इत इदमिति, कालनिमित्तश्च परोऽपरोयमिति[१] नासावाकाशादतेस्ति इत्याकाशस्यैवादः सामर्थ्यं न दिक्कालयोरिति दिक्कालाभावः प्रसक्तः ।

१ परोऽयमवरोयं ग. पुस्तके । २ नैयायिकाः ।

तथा च सर्वात्मनां चैकत्वप्रसंगः, यदि व्यापित्वादाकाशस्यैव गतिस्थित्युपग्रहः कल्प्यते ननु यत्प्रत्यर्थनियतबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारगुणोपपत्तेर्व्यवस्थातः शास्त्रसामर्थ्याच्च नाना आत्मान इति व्यवस्थितं तद्विरुध्यते । अपर आहुः—त्रयो गुणाः सत्त्वरजस्तमोभिधानाः प्रसादलाघवशोषतापावरणसादनादिभिन्नस्वभावा इति । यदि व्यापित्वादाकाशस्यैव गतिः स्थितिरित्युपग्रहाविष्टौ ननु सत्त्वस्य व्यापित्वात् शोषतापादयो रजोधर्माः सादनावरणादयश्च तमोधर्माः सत्त्वस्यैवेषितव्याः । तथेतरयोरपि प्रतिपक्षधर्मा इति संकरप्रसंगः । तथा सर्वक्षेत्रज्ञानां चैकत्वप्रसंगः चैतन्यस्वरूपाविशेषात् आदानभोगाविशेषाच्च । अन्ये मन्यंते-रूपणानुभवननिमित्तग्रहणसंस्कृताभिसंस्करणालंबनप्रज्ञप्तिस्वभावलक्षणा रूपवेदनासंज्ञासंस्कारविज्ञानाभिधानाः पंचस्कंधाः इति । तत्र यद्येकस्यैव सर्वधर्माः कल्प्यंते नासति विज्ञानेऽनुभवनादयः संभवंतीत्यनुभवादयो विज्ञानस्यैव कल्पेरन् । तथा सति शेषस्कंधनिवृत्तौ स्वनिवृत्तिरपि स्यात्, नचैतत् सर्वमिष्टं, तस्मादभ्युपगम्यतामाकाशस्य विभुत्वेपि न धर्माधर्मयोः प्रयोजनं नास्तीति सिद्धौ धर्माधर्मास्तिकायौ ।

उभयानुग्रहात् परस्परप्रतिबंध इति चेन्न स्वतः परिणामसामर्थ्यस्याऽनुग्रहाकांक्षित्वात् कुंटनयनयष्टिप्रदीपवत् ॥ २४ ॥ स्यान्मतं यथा तुल्यबलाभ्यां शकुंताभ्यामाकृष्यमाणो मांसपिंडः यावत्क्षेत्रमेकेनाऽऽकृष्यते तावदितरेण अपकृष्यतेति नाभ्योत्कर्षापकर्षगतिविधिः संभवति । तथा जगद्व्यापित्वात् धर्माधर्मयोर्यदा धर्मोपग्रहात् आत्मपुद्गलानां गतिस्तदैवाधर्मोपग्रहात् स्थितिरिति गतेः प्रतिबंधः । यथा वाऽधर्मानुग्रहात्स्थितिस्तदैव धर्मानुग्रहाद्गतिरिति स्थितेः प्रतिबंधः एवं तयोः न गतिर्न स्थितिरित्युभयाभावः इति ? तन्न । किं कारणं ? स्वतः परिणामसामर्थ्यस्य अनुग्रहाकांक्षित्वात् । कथं ? कुंटनयनयष्टिप्रदीपवत् । यथा कुंटस्य गतिपरिणामसमर्थस्य यष्टिरुपग्राहिका नतु सा तस्य गतेः कर्त्री, यद्यसमर्थस्यापि कर्त्री भवेत् मूर्छितसुप्तादीनामपि यष्टिसंबंधाद्गतिः स्यात् । यथा वा नयनस्य स्वतो दर्शनसमर्थस्य प्रदीप उपग्राहकः न तु प्रदीपो नेत्रस्य दर्शनशक्तेः कर्ता । यद्यसमर्थस्यापि कर्ता स्यात् मूर्छितसुप्तजात्यंधानामपि दर्शनं कुर्यात् । तथात्मपुद्गलानामपि स्वयमेव गतिस्थितिपरिणामिनां धर्माधर्मावुपग्राहकौ गतिस्थित्योर्न कर्तारौ । यदि कर्तारौ स्यातां स्याद्गतस्थितिविरोधः । अतोऽनुग्राहकत्वान्नास्ति दोषः । किं च—

क्वचिदुपग्राहकाभावेपि गतिस्थितिदर्शनात् पतत्त्रिवत् ॥ २५ ॥ यथा पतत्त्रिणः प्रकृष्टगतिस्थितिक्रियापरिणामसामर्थ्यात् जलतुल्यवाहोपग्राहकाभावेपि धर्माधर्मद्रव्यसद्भावात् गतिस्थिती दृष्टे तथेतरेषामपि द्रव्याणां धर्माधर्मोपष्टंभात् गतिस्थितिसिद्धिरिति तदुपपत्तिः ।

तत्राप्याकाशं निमित्तमिति चेदुक्तं ॥ २६ ॥ यदि तत्रापि पतत्र्यादिषु आकाशमुपग्राहकमस्तीति कल्प्यते । उक्तमेतन्नाकाशं गतिस्थित्युपग्रहकारणं अवगाहनलक्षणत्वात्तस्येति ॥

अनेकांताच्च समग्रविकलेंद्रियवत् ॥ २७ ॥ यथा नायमेकांतः सर्वश्चक्षुष्मान् बाह्यप्रकाशोपग्रहात् रूपं गृह्णातीति, यस्मात् द्वीपिमार्जारादयः स्वजातिविशेषोपात्तनयनबलादेव विनापि बाह्यप्रदीपाद्युपग्रहात् रूपग्रहणसमर्थाः । मनुष्यादयस्तु तथादर्शनशक्त्यभावात् प्रदीपाद्युपग्रहमपेक्ष्यंत इत्यनेकांतः । यथा वा नायमेकांतः सर्व एव गतिमंतो यष्ट्याद्युपग्रहात् गतिमारभंते नवेति यस्मात् समग्रपंचेंद्रियो बाह्ययष्ट्याद्युपग्रहात् विनापि धर्मोपग्रहाद्गतिमारभते नैव चक्षुर्विकलः स तु समविषमादिभूप्रदेशादर्शनात् तद्विशेषाविष्करणसमर्थो यष्टिमवष्टभ्य गतिमारभते इत्यनेकांतः । तथा नायमेकांतः सर्वेषां आत्मपुद्गलानां सर्वे बाह्योपग्रहहेतवः संतीति । किंतु केषांचित् पतत्त्रिप्रभृतीनां धर्माधर्माविव अपरेषां जलादयोपीत्यनेकांतः ।

अनुपलब्धेरभाव इति चेन्न स्वतीर्थकराद्यभावप्रसंगात ॥ २८ ॥ स्यान्मतं नच धर्माधर्मौ स्तः अनुपलब्धेः खरविषाणवत् । सतां हि यष्ट्यादीनां उपलब्धिरस्ति तदुपकारश्च निम्नोन्नतादिभूप्रदेशे भेददर्शनं दृष्टं नच तथा धर्माधर्मौ वा लभ्येते नापि तदुपकार इत्यसत्त्वमिति ? तन्न । किं कारणं ? स्वतीर्थकराद्यभावप्रसंगात् खरविषाणवत् । यथा खरविषाणं अनुपलब्धेरसत् तथा स्वतीर्थकरपुण्यापुण्यपरलोकादीनामप्यसत्त्वमाक्षिप्तं, नचाऽसत्त्वमिष्टं ततो हेतोर्व्यभिचारः । किं च—

---

१ सांख्याः । २ बौद्धाः ।

अनुपलब्ध्यसिद्धेः ॥ २९ ॥ भगवदर्हत्सर्वज्ञप्रत्यक्षज्ञानगोचरत्वात् तत्प्रणतिपरमागमप्रमाणगम्यत्वात् तदनुसारिस्वकार्यदर्शनाद्यनुमानाविषयत्वाच्च धर्माधर्मयोरुपलब्धेरनुपलब्धिलक्षणो न हेतुरस्मत्प्रसिद्धः। नच हेतुः स्वयमसिद्धः साध्यमर्थं साधयितुं अलं।

अत एव विवादात् ॥ ३० ॥ यत एव यष्ट्यादिवत् न प्रत्यक्षौ धर्माधर्मावत एव विवादः, किमनुपलब्धेः खरविषाणवदभावोऽनयोरुत एवाऽऽकाशमूलोदकादिवत् अभाव इति। न हि यत एव विवादः तत एव निर्णयो भवितुमर्हति। किं च–

कार्यस्यानेकोपकरणसाध्यत्वात् तत्सिद्धेः ॥ ३१ ॥ इह लोके कार्यमनेकोपकरणसाध्यं दृष्टं यथा मृत्पिंडो घटकार्यपरिणामप्राप्तिं प्रति गृहीताभ्यंतरसामर्थ्यः बाह्यकुलालदंडचक्रसूत्रोदककालाकाशाद्यनेकोपकरणापेक्षः घटपर्यायेणाऽऽविर्भवति। नैक एव मृत्पिंडः कुलालादिबाह्यसाधनसन्निधानेन विना घटात्मनाविर्भवितुं समर्थः। तथा पतत्त्रिप्रभृतिद्रव्यं गतिस्थितिपरिणामप्राप्तिं प्रत्यभिमुखं नांतरेण बाह्यानेककारणसान्निधिं गतिं स्थितिं वा प्राप्तुमलमिति तदुपग्रहकारणधर्माधर्मास्तिकायसिद्धिः। ततः किं ? अनुमानविरोधो वेदितव्यः।

संसर्ग एव हेतुरिति चेन्न कारणनियमाभावप्रसंगात् ॥ ३२ ॥ स्यान्मतं नानेककारणसाध्यं कार्यं किं तर्हि ? संसर्ग एव हेतुः कार्यात्मलाभस्य, विविक्तानां तंत्वादीनां कार्यारंभसामर्थ्याभावात् इति ? तन्न किं कारणं ? कारणनियमाभावप्रसंगात् यस्मात्तस्माच्चित्कारणसंसर्गात् पटनिष्पत्तिरस्तु नोचेदेवं प्रतिविशिष्टतंत्वादिकारण (नियमाभावप्रसंगात्) विषयसंसर्गापेक्षत्वादनेककारणत्वसिद्धिः। किं च–

एकस्य कारणस्य संसर्गाभावात् ॥ ३३ ॥ अनेककारणसाध्यत्वात् संसर्गस्य। संसर्गकारणत्वप्रतिज्ञाहानिरपि च संसर्गकारणानां संयोगविशेषः संयोगिनां बहुत्वादनेकः। तस्मात् साध्यत्वात् कार्यस्य अनेककारणत्वसिद्धिः। किं च–

स्वसमयविरोधात् ॥ ३४ ॥ नच वयमेवंपक्षाः यन्नोपलभ्यते प्रत्यक्षेण तन्नास्तीति। यस्य तु वादिन एषोभिप्रायस्तस्य स्वसमयविरोधः। तद्यथा–सर्वे हि वादिनः प्रत्यक्षाप्रत्यक्षार्थवादिनः। केचित्तावदाहुः–प्रत्येकं रूपपरमाणवोऽतींद्रियास्तत्समुदायोऽनेकपरमाणुक इंद्रियग्राह्यो नाम चित्तचैतसिकविकल्पमतींद्रियमिति। अपर आहुः—व्यक्तस्य पृथिव्यादेः प्रधानपरिणामस्य प्रत्यक्षत्वं, सत्त्वादीनां गुणानां परमात्मनां चाऽप्रत्यक्षमिति। अन्ये तु मन्यंते—महदनेकद्रव्यत्वात् रूपाच्चोपलब्धिरित्येवमादिनाऽनेकपरमाणुसमुदयभावेन निष्पन्नाः पृथिव्यादयस्तद्विषयाश्च रूपादयस्तत्समवायिनः सख्यापरिमाणपृथक्त्वसंयोगविभागादयश्च प्रत्यक्षाः, अण्वाकाशादयोऽप्रत्यक्षा इति। यष्ट्यादिवदनुपलब्धेः धर्माधर्मयोरभावः प्रतिज्ञायेत ? ननु विज्ञानादीनां सत्त्वादीना अण्वादीनां चाऽप्रत्यक्षत्वादभावः स्यादिति स्वसमयविरोधः। अथैषा कार्यदर्शनात् अस्तित्वमनुमीयते धर्माधर्मयोः को मत्सरः। किं च–

त्वदीयजीवितमरणादिवत्तत्सिद्धिः ॥ ३५ ॥ यथा त्वदीयजीवितमरणसुखदुःखादीनां मनुष्यमात्राप्रत्यक्षाणां अतिशयज्ञानिभिरुपलभ्यमानस्वरूपाणां आस्तित्वं। तथा तावर्कानप्रमाणगोचरातीतयोरपि परमर्षिसर्वज्ञदृष्टयोः धर्माधर्मयोरस्तित्वमिति को विरोधः। किं च—

ज्ञानादिवदिति चेन्न उक्तत्वात् ॥ ३६ ॥ स्यादेतत् ज्ञानादीनामात्मपरिणामानां च दैर्ध्यादीनां[१] निर्वृत्तिः परस्पराश्रया न धर्माधर्मास्तिकायस्थानीयद्रव्यांतराश्रयात्। तथा जीवपुद्गलेषु गतिस्थितिपरिणामा अपि अन्योन्याश्रया इति धर्माधर्माभाव इति ? तन्न। किं कारणमुक्तत्वात्। उक्तमेतत् पतत्त्रिप्रभृतीनां गतिस्थितिकारणेन साधारणेन बाह्येन भवितव्यमिति। किंच—ज्ञानादिदैर्ध्यादिविकाराणामपि निर्वृत्तेः कालो हेतुः बाह्योस्तीत्यभ्युपगमादसमस्तसमाधिः।

---

१ द्रव्यादीनां पाठोयं ख. पुस्तके।

अदृष्टहेतुके गतिस्थिती इति चेन्न पुद्गलेष्वभावात् ॥ ३७ ॥ स्यान्मतमदृष्टो नामाऽऽत्मगुणोस्ति यद्धेतुकः सुखदुःखविपाकः तत्साधनसान्निधानं च । एवं च कृत्वोक्तं अग्नेरुर्ध्वज्वलनं, वायोश्च तिर्यग्गमनं अणुमनसोश्चाद्यं कर्मेत्येतान्यदृष्टकारितानि उपसर्पणमपसर्पणमसितपीतसंयोगाः कार्यांतरसंयोगाश्चेति अदृष्टकारितानि इत्यादि तद्धेतुके गतिस्थिती इति ? तन्न । किं कारणं ? पुद्गलेष्वभावात् । अचेतनत्वात् पुद्गलानां पुण्यापुण्यकारणाभावात् तत्कृतगतिस्थित्यभावदोषः ।

यस्योपकारस्तादर्थ्यात् क्रियाप्रवृत्तिरिति चेन्नाऽन्यधर्मस्यान्यत्र क्रियारंभे सामर्थ्याभावात् ३८ स्यादेतत् यस्य घटादय उपकरिष्यंति तस्य पुंसोऽदृष्टाद् घटादिकगतिस्थिती भवत इति ? तन्न । किं कारण अन्यधर्मस्याऽन्यत्र क्रियारंभे सामर्थ्याभावात् । न हि स्वाश्रये क्रियामनारभमाणः अन्यत्र क्रियाहेतुरस्तीत्युक्तं पुरस्तात् । किं च—

पुण्यापुण्यात्ययेपि गतिस्थितिदर्शनात् ॥ ३९ ॥ विनिर्मुक्तपुण्यापुण्यबंधानां सिद्धानां गतिस्थिती इष्येते ततो नादृष्टहेतुके गतिस्थिती ॥

अमूर्तत्वाद्गतिस्थितिनिमित्तत्वानुपपत्तिरिति चेन्न दृष्टांताभावात् ॥ ४० ॥ स्यान्मतं रूपादिगुणविरहितत्वात् अमूर्तौ धर्माधर्मावभ्युपगम्येते । ततस्तयोर्गतिस्थितिहेतुत्वं नोपपद्यते इति ? तन्न । किं कारण ? दृष्टांताभावात् । न हि दृष्टांतोस्ति येनामूर्तत्वात् गतिस्थितिहेतुत्वं निवर्तेत । किं च—

आकाशप्रधानविज्ञानादिवत्तत्सिद्धेः ॥ ४१ ॥ यथाकाशममूर्तमपि सर्वपदार्थानामवगाहनप्रयोजनमुपपादयति । यथा वा प्रधानममूर्तमपि पुरुषार्थप्रवृत्त्या महदादिविकारमापद्यमानं पुरुषस्योपकरोति । यथा वा विज्ञानममूर्तमपि सन्नामरूपोत्पत्तौ निमित्तं 'विज्ञानप्रत्ययं नामरूपमिति वचनात् । यथा वाऽपूर्वाख्यो धर्मः क्रियया अभिव्यक्तः सन्नमूर्तोपि पुरुषस्योपकारी वर्तते । तथा धर्माधर्मयोरपि गतिस्थित्युपग्रहोऽवसेयः । अत्राह—यद्यतींद्रिययोर्धर्माधर्मयोरुपकारसंबंधेनास्तित्वमवध्रियते तदनंतरमुद्दिष्टस्य नभसोऽतींद्रियस्याधिगमे क उपकारक इत्यत्रोच्यते—

आकाशस्यावगाहः ॥ १८ ॥

आकाशशब्दो व्याख्यातार्थः ॥

अवगाहशब्दो भावसाधनः ॥ १ ॥ अवगाहनमवगाह इति भावसाधनोऽवगाहशब्दो वेदितव्यः अवगाहोऽनुप्रवेश इत्यर्थः ।

धर्माधर्मयोरवगाहं प्रति कर्तृत्वादनादिसंबंधनिवृत्तिरिति चेन्नौपचारिकत्वात् व्याप्तिसद्भावात् ॥ २ ॥ स्यान्मतं यथा जलमवगाहते हंस इति न जलहंसयोरनादिस्संबंधः । तथाकाशं धर्माधर्मावगाहेते इत्युभ्युपगमात् अनादिस्संबंधो निवर्तत इति ? तन्न । किं कारणं ? औपचारिकत्वात् । औपचारिकोऽयमवगाहः । कुतः क्रियाभावात् । कुतस्तर्हि उपचारः ? व्याप्तिसद्भावात् । यथा गमनाभावेपि सर्वगतमाकाशमित्युच्यते व्याप्तिसद्भावात् । तथा मुख्यावगाहक्रियाभावेपि लोकाकाशेपि सर्वत्र व्याप्तिदर्शनात् व्यवह्रियते धर्माधर्मयोर्लोकाकाशेऽवगाह इति ।

अयुतसिद्धानामाधाराधेयत्वानुपपत्तिरिति चेन्न तत्रापि दर्शनात् पाणिलेखावत् ॥ ३ ॥ स्यादेतत् युतसिद्धानां लोके दृष्ट आधाराधेयभावः यथा कुंडबदरादीनां । अयुतसिद्धाश्चेते आकाशधर्माधर्माः अप्राप्तिपूर्वकाः प्राप्त्यभावात् तत आधाराधेयभावो नोपपद्यत इति ? तन्न । किं कारणं ? तत्रापि दर्शनात् यथा युतसिद्ध्यभावे पाणौ लेखेति आधाराधेयभावो दृष्टः तथा लोकाकाशे धर्माधर्मावित्याधेयाधारभावःसिद्धः ।

दृष्टत्वादीश्वरैश्वर्यवत् ॥ ४ ॥ यथेश्वरस्यैश्वर्यस्य वाऽयुतसिद्धेपि ईश्वरे ऐश्वर्यमिति व्यवहारो दृष्टस्तथा लोकाकाशे धर्माधर्माविति व्यपदेशो युक्तः ।

अनेकांताच्च तत्सिद्धिः ॥ ५ ॥ नायमेकांतः अनादिसंबंधौ धर्माधर्मौ अयुतसिद्धौ वेति। किं तर्हि ? स्यादनादिसंबंधौ स्यान्नाऽनादिसबंधौ स्यादयुतसिद्धौ स्यान्नाऽयुतसिद्धावित्यादि । तद्यथा—पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात् व्ययोदयाभावात् स्यादनादिसंबंधौ अयुतसिद्धौ च । द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्यात् पर्यायाणां व्ययोत्पादसद्भावात् स्यान्नाऽनादिसंबंधौ नायुतसिद्धौ चेत्यादि योज्यं । ततः किं ? कथंचित् अवगाहः आधाराधेयभावश्च सिद्धो भवति ॥

जीवपुद्गलानां मुख्योवगाहः क्रियापरिणामात् ॥ ६ ॥ जीवानां पुद्गलानां च मुख्योवगाहो वेदितव्यः। कुतः ? क्रियापरिणामात्। यथा हंसो जलमवगाहते इति मुख्यो व्यपदेशः तथा जीवपुद्गला आकाशमगाहते क्रियापरिणामात इति मुख्यो व्यपदेशोऽवसेयः ।

आकाशस्यावकाशदानसामर्थ्यात् परस्पर प्रतिघाताभाव इति चेन्न स्थूलानामन्योन्य प्रतिघातात् ॥ ७ ॥ स्यान्मतं यद्यवकाशदानसमर्थमाकाशं तस्य च सर्वत्र सन्निधानात् मूर्तानां परस्परप्रतिघातो न स्यात् । दृश्यते च बज्रादिभिर्लोष्टादीनां भित्त्यादिभिश्च गवादीनां ततोऽस्याऽवकाशदानसामर्थ्यं हीयत इति ? तन्न। किं कारण ? स्थूलानामन्योन्यप्रतिघातात् । स्थूला हि परस्परतः प्रतिहन्यंते न सूक्ष्मास्तेषामन्योन्यप्रदेशशक्तियोगात् न तस्य तावता अवकाशदानसामर्थ्यं हीयते ।

असाधारणलक्षणत्वानुपपत्तेरिति चेन्न सर्वावगाहविशेषलक्षणोपपत्तेः ॥८॥ स्यादेतत् यदि सूक्ष्मभावात् इतरेपि पदार्था: अन्योन्यावकाशदानं कुर्वंति नाकाशस्य इदं असाधारणलक्षणं । असाधारणे हि लक्षणेऽस्तित्वमनुमीयतेऽतस्तदभावादाकाशाभाव इति ? तन्न । किं कारण ? सर्वावगाहविशेषोपपत्तेः। यथा भूम्यादिषु अश्वादिगतिस्थित्युपग्रहरूपेणासाधारणलक्षणेनानुमीयेते धर्माधर्मौ । तथा सर्वद्रव्यावगाहनविशेषलक्षणोपपत्तेराकाशस्यास्तित्वमनुमीयते ॥

अलोकाकाशे तदभावादभाव इति चेन्न स्वभावापरित्यागात् ॥ ९ ॥ स्यान्मतं यद्यवकाशदानलक्षणमाकाशं अलोकाकाशेऽवगाहिनामभावात् तल्लक्षणाभावात् लक्ष्यानवधारणप्रसंग, इति ? तन्न किं कारण ? स्वभावापरित्यागात् । यथा हंसस्यावगाहकस्याभावेप्यवगाह्यत्वं जलस्य न हीयते । तथा अवगाहित्वाभावेपि नाऽलोकाकाशस्य अवकाशदानसामर्थ्यहानिः ॥

अजातत्वादभाव इति चेन्नासिद्धेः ॥ १० ॥ स्यादेतत् नास्त्याकाशमजातत्वात् खरविषाणवत् इति? तन्न । किं कारणं ? असिद्धेः।द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्यात् स्वप्रत्ययागुरुलघुगुणवृद्धिहानिविकल्पापेक्षया अवगाहकजीवपुद्गलपरप्रत्ययावगाहभेदाविवक्षया च आकाशस्य जातत्वोपपत्तेः हेतोरसिद्धिः । अथवा व्ययोत्पादौ आकाशस्य दृश्येते यथा चरमसमयस्याऽसर्वज्ञस्य सर्वज्ञत्वेनोत्पादस्तथोपलब्धेः । असर्वज्ञत्वे न व्ययस्तथानुपलब्धेः । एवं चरमसमयस्यासर्वज्ञस्य साक्षादनुपलभ्यमाकाशं सर्वज्ञत्वोपपत्तौ उपलभ्यत इति उपलभ्यत्वेनोत्पन्नमनुपलभ्यत्वेन च विनिष्टं । यदि तेनाऽविनष्टमनुत्पन्नं च स्यात सर्वज्ञत्वमेवास्य न स्यात । अतो व्ययोत्पाददर्शनात् असिद्धो हेतुः । बुद्धिशब्दलक्षणस्य खरविषाणस्य स्वकारणसन्निधाने सति जन्यत्वात् अस्तित्वाच्च साध्यसाधनधर्मासिद्धता दृष्टांतस्य, खरो मृतः गौर्जातः स एव इत्येकजीवविवक्षायां खरव्यपदेशभाजो जीवस्य गोजातिसंक्रमे विषाणोपलब्धेः । अथ खरविषाणस्यापि जात्यस्तित्वसद्भावात् उभयधर्मासिद्धता । निरन्वयविनश्वरत्वे तु स्मृत्यभावात् लोकसंव्यवहारलोपः स्यात् ।

अनावृत्तिराकाशमिति चेन्न नामवत् तत् सिद्धेः ॥ ११ ॥ स्यादेतत् नाकाशं नाम किं-

चिद्वस्त्वस्ति आवरणाभावमात्रं हि तत् इति ? तन्न किं कारणं, नामवत्तत्सिद्धेः । यथा नामवचनादि अमूर्तत्वात् अनावृत्यपि सदस्तीत्यभ्युपगम्यते । तथा आकाशमपि वस्तुभूतमित्यवसेयं ।

शब्दलिंगत्वादिति चेन्न पौद्गलिकत्वात् ॥ १२ ॥ स्यान्मतं नावगाहेन आकाशमनुमीयते कुतस्तर्हि ? शब्दलिंगत्वात् । शब्दो ह्याकाशगुणः वाताभिघातबाह्यनिमित्तवशात् सर्वत्र उत्पद्यमानः इंद्रियप्रत्यक्षः अन्यद्रव्यासंभवी गुणिनमाकाशं सर्वगतं गमयति ।

गुणानामाधारपरतन्त्रत्वादिति तन्न किंकारणं पौद्गलिकत्वात् ॥ १३ ॥ पुद्गलद्रव्यविकारो हि शब्दः, नाकाशगुणः तस्योपरिष्टात् युक्तिर्वक्ष्यते ।

प्रधानविकार आकाशमिति चेन्न तत्परिणामाभावात् आत्मवत् ॥ १४ ॥ स्यान्मतं प्रधानं नाम सत्त्वरजस्तमसां साम्यरूपमस्ति प्रसवस्वभावकं । तद्विकारा महदादयस्तद्विकारविशेषः कश्चित् आकाशमिति तन्न । किंकारण ? तत्परिणामाभावात् आत्मवत् । यथा परमात्मनां नित्यत्वात् निःक्रियत्वात् अनंतत्वाद्यविशेषात् आविर्भावतिरोभावात् परिणामाभावः । तथा प्रधानस्यापि नित्यत्वनिष्क्रियत्वानंतत्वाद्यविशेषान्नस्यात्तत्परिणामः तदभावात् प्रधानविकाराकाशकल्पनाव्याघातः । किं च-यथा घटस्य प्रधानविकारस्याऽनित्यत्वं मूर्तित्वमसर्वगतत्वं च । तथा आकाशस्य स्यात् । विपर्ययो वा । उपकारप्रकरणाभिसंबंधेनेदमुच्यते-

शरीरवाङ्मनःप्राणापानाः पुद्गलानां ॥ १९ ॥

शरीरे सत्युत्तरेषां प्रवृत्तिदर्शनात् आदौ तद्वचनं ॥ १ ॥ सति शरीरेऽधिष्ठानभूते उत्तरेषां वागादीनां आधेयानां प्रवृत्तिरिति कृत्वा शरीरं प्रधानमतस्तस्यादौ ग्रहणं क्रियते ।

तदनंतरं वागुपादानं पुरुषहितावाप्तिमूलत्वात् ॥ २ ॥ तदनतरं वागुपादानं क्रियते । कुतः? पुरुषहितावाप्तिमूलत्वात् । पुरुषस्य हि वाक् हिते प्रवर्तिका श्रोत्रेंद्रियद्वारेण ।

अन्येंद्रियोपसंख्यानमिति चेन्न शब्दस्येष्टसमुच्चयार्थत्वात् ॥ ३ ॥ स्यान्मतं चक्षुरादीन्यपींद्रियाणि पुरुषस्योपकारकाणि संति, तेषामुपसंख्यानं कर्तव्यमिति ? तन्न । किं कारणं ? चशब्दस्येष्टसमुच्चयार्थत्वात् । उत्तरसूत्रे वक्ष्यते चशब्दः, स इष्टसमुच्चयार्थो भवति ।

आत्मप्रदेशाश्चक्षुराद्यग्रहणमिति चेन्न द्रव्येंद्रियस्य पौद्गलिकत्वात् ॥ ४ ॥ स्यादेतत् उत्सेधांगुलासंख्येयभागप्रमिता आत्मप्रदेशा ज्ञानावरणवीर्यांतरायक्षयोपशमनिमित्ताश्चक्षुरादिव्यपदेशभाजो न पौद्गलिका इत्यनुपसंख्यानमिति ? तन्न । किं कारणं ? द्रव्येंद्रियस्य पौद्गलिकत्वात् । अंगोपांगनामलाभनिमित्ता हि द्रव्येंद्रियपरिणामाः पौद्गलिकाः आत्मन उपकारे वर्तंते ।

मनोगृहणप्रसंगाच्च ॥ ५ ॥ यदि ज्ञानावरणवीर्यांतरायक्षयोपशमनिमित्तत्वाच्चक्षुराद्यग्रहणं न्याय्यं मन्यते मनसोप्यग्रहणं प्राप्नोति मनोपि हि नो इंद्रियावरणक्षयोपशमापेक्षं ?

अनवस्थितत्वात् मनोगृहणमिति चेन्नाऽनवस्थानेपि तन्निमित्तत्वात् ॥ ६ ॥ स्यान्मतं यथा चक्षुरादिव्यपदेशभाज आत्मप्रदेशा अवस्थिता. नियतदेशत्वात् न तथा मनोवस्थितमस्ति । अत एव तदानिंद्रियमित्युच्यते ततोऽस्य न पृथग्ग्रहणमिति तन्न । किं कारणं ? अनवस्थानेपि तन्निमित्वात् । यत्र यत्र प्रणिधानं तत्र तत्र आत्मप्रदेशा अगुंलासंख्येयभागप्रमिता मनोव्यपदेशभाजः ।

वाग्गृहणप्रसंगाच्च ॥ ७ ॥ यदि आत्मपरिणामाच्चक्षुराद्यग्रहणं कल्प्यते वाचोप्यग्रहणं, वागपि ज्ञानावरणवीर्यांतरायक्षयोपमोपष्टंभजनितवृत्तिः ।

बहिर्विनिःसृतानामात्मपरिणामाभावाद्ग्रहणमिति चेन्नोक्तत्वात् ॥ ८ ॥ स्यादेतद्बहिर्विनिः

---

१ आत्मनामिति ग. पुस्तके पाठः । २. नियतदेशत्वात् ग. पुस्तके पाठोयं ।

सृता वाक्पुद्गला आत्मपरिणामा न भवंति तदर्थं पृथग्ग्रहणं इति ? तन्न। किं कारणं। उक्तत्वात्। उक्तमेतदुत्पत-द्भिरेवाऽस्माभिश्चक्षुरादीनि द्रव्येंद्रियाणि पौद्गलिकानीति। तस्मात् सूक्तं चशब्दस्येष्टसमुच्चयार्थत्वादिति।

ततो मनोग्रहणं तद्वतस्तात्सिद्धेः ॥९॥ ततः पश्चात् मनोग्रहणं क्रियते। कुतः ? तद्वतस्तात्सिद्धेः। यस्यात्मनः शरीरमस्ति वाग्निवर्तनसामर्थ्यं च, तस्य हि तद्भवतीति।

अंते प्राणापानोपादनं सर्वसंसारिकार्यत्वात् ॥ १० ॥ अंते तु प्राणापानोपादानं क्रियते। कुतः ? सर्वसंसारिकार्यत्वात्। सर्वेषां हि संसारिणां जीवानां प्राणापानलक्षणं कार्यमस्ति।

पुद्गलद्रव्यलक्षणार्थमिति चेन्न वक्ष्यमाणत्वात् ॥ ११ ॥ स्यान्मतं शरीरवाङ्मनःप्राणापानग्रहणमिदं पुद्गलद्रव्यस्य लक्षणार्थं नोपकारप्रतिपादनार्थमिति ? तन्न। किं कारणं ? वक्ष्यमाणत्वात्। वक्ष्यते हि उत्तरत्र पुद्गललक्षणं व्यापि, इदं तु आत्मोपकारकत्वादुपग्रहप्रकरणे उच्यते।

प्रत्यक्षत्वादनुपदेशः इति चेन्न केषांचिदप्रत्यक्षत्वात् ॥१२॥ स्यादेतत् धर्मादीनां गत्युपग्रहादिप्रयोजनमुक्तं युक्तं तेषां अप्रत्यक्षाणामधिगमहेतुत्वात्। शरीराद्युपग्रहाभिधानं तु पुद्गलानामयुक्तं प्रत्यक्षत्वात्। यो हि ब्रूयात् पुरस्तात् आदित्य उदेति पश्चादस्तं गच्छति, मधुरो गुडः, कटुकं शृंगिबेरमिति किं तेन कृतं स्यादिति ? तन्न। किं कारणं ? केषांचित् प्रत्यक्षत्वात्, औदारिकवैक्रियिकाहारकतैजसकार्मणशरीराणि सौक्ष्म्यादप्रत्यक्षाणि, तदुदयापादितवृत्त्युपचयशरीराणि कानि चित् प्रत्यक्षाणि च। मनोऽप्रत्यक्षमेव। वाक्प्राणापानाः केचित् प्रत्यक्षाः, केचिदप्रत्यक्षाः, इंद्रियगोचरातीतत्वात्-अतः पुद्गलोपकारस्फुटीकरणार्थः शरीराद्युपदेशः क्रियते।

शरीराण्युक्तानि ॥ १३ ॥ शरीराण्यौदारिकादीनि व्याख्यातानि पौद्गलिकानि।

कार्मणमपौद्गलिकमिति चेन्न तद्विपाकस्य मूर्तिमत्संबंधनिमित्तत्वात् ॥ १४ ॥ स्यादेतत् कार्मणं पौद्गलिकं न भवति। कुतः ? अनाकारत्वात्। आकारवतां हि औदारिकादीनां पौद्गलिकत्वं युक्तं कार्मणं तु अनाकारमिति ? तन्न। किं कारणं ? तद्विपाकस्य मूर्तिमत्संबधनिमित्तत्वात्। यथा व्रीह्यादीनामुदकादिद्रव्यसंबंधप्रापितपाकानां पौद्गलिकत्वं दृष्टं तथा कार्मणमपि गुडकंटकादिमूर्तिमद्द्रव्योपनिपाते सति विपच्यमानत्वात् पौद्गलिकमित्यवसेयं। न हि अमूर्तं किंचिन्मूर्तिमत्संबंधे सति विपच्यमानं दृष्टमिति।

वाग् द्विधा अपि पौद्गलिकी तन्निमित्तत्वात् ॥ १५ ॥ द्विधा वाक् भाववाक् द्रव्यवागिति सोभयी पौद्गलिकी, कुतस्तन्निमित्तत्वात् पुद्गलकार्यत्वादित्यर्थः। भाववाक् तावद्वीर्यांतरायमतिश्रुतज्ञानावरणक्षयोपशमांगोपांगनामलाभनिमित्तत्वात् पौद्गलिकी, तदभावे तद्वृत्त्यभावात्। तत्सामर्थ्योपेतेन क्रियावतात्मना प्रेर्यमाणाः पुद्गला वाक्त्वेन विपरिणमंत इति द्रव्यवागपि पौद्गलिकी श्रोत्रेंद्रियविषयत्वात्। पुनः कुतो न गृह्यते ? इति चेदुच्यते—

पुनरग्रहणं तडिद्द्रव्यवदसंहरत्वात् ॥ १६ ॥ यथा तडिद्द्रव्यं चक्षुषोपलब्धं विष्वग्विशीर्णत्वात् पुनर्न दृश्यते तथा श्रोत्रेण उपलब्धा वाक् विष्वग्विशीर्णा पुनर्न श्रूयते। अथ कथं चक्षुरादिभिरसौ न गृह्यते ?

चक्षुरादिग्रहणाभावो घ्राणग्राह्यरसाद्यनुपलब्धिवत् ॥ १७ ॥ यथा घ्राणग्राह्ये गंधद्रव्ये तदविनाभाविनः संतोपि रसादयो नोपलभ्यंते। तथा श्रोत्रेंद्रियविषयोपि शेषेंद्रियैर्न गृह्यते सूक्ष्मत्वात्।

अमूर्तिरिति चेन्न मूर्तिग्रहणप्रेरणावरोधदर्शनात् ॥१८॥ स्यादेतत् अमूर्तः शब्दः अमूर्तगुणत्वादिति ? तन्न। किं कारणं ? मूर्तिमद्ग्रहणप्रेरणावरोधदर्शनात्। मूर्तिमता इंद्रियेण शब्दो गृह्यते नचामूर्तः कश्चिदिंद्रियग्राह्योस्ति। प्रेर्यते च मूर्तिमता पवनेन अर्कतूलराशिवत् दिगंतरस्थेन ग्राह्यत्वात्, नचाऽमूर्तस्य मूर्तिमता प्रेरणं प्रयुज्यते। अवरुध्यते च शब्दः नलबिलादिभिः कुल्याजलवत्, नचाऽमूर्तं किंचिन्मूर्तिमता-

१ मलक्षेण पाठोयं ख. पुस्तके।

ऽवरुध्यमानं दृष्टमिति । अत्राह—नैते हेतवः यत्तावदुच्यते इंद्रियग्राह्यत्वादिति श्रोत्रमाकाशमयममूर्तस्य ग्राहकमिति को विरोधः । यश्चोच्यते प्रेरणादिनासौ प्रेर्यते गुणस्य गमनाभावात् । देशांतरस्थेन कथं गृह्यते इति चेत् संयोगाद्विभागात् शब्दाच्च शब्दनिष्पत्तिरिति शब्दांतरारंभात् ग्रहणं । वेगवद्द्रव्याभिघातात् तदनारंभेऽग्रहणं न प्रेरणमिति । योप्युच्यतेऽवरोधादिति स्पर्शवद्द्रव्यादिभिघातादेव दिगंतरे शब्दांतरानारंभात् एकदिक्कारंभे सति अवरोध इव लक्ष्यते न तु मुख्योऽस्तीत्यत्रोच्यते— नैते दोषाः । श्रोत्रं तावदाकाशमयं इति नोपपद्यते आकाशस्यामूर्तस्य कार्यांतरारंभशक्तिविरहात् । अदृष्टवशादिति चेच्चिंत्यमेतत्-किमसावदृष्ट आकाशं सस्करोति उतात्मानमाहोस्वित् शरीरैकदेशमिति ? न तावदाकाशे सस्कारो युज्यते अमूर्तित्वात् अन्यगुणत्वादसंबंधाच्च । आत्मन्यपि शरीरादत्यंतमन्यत्वेन कल्पिते नित्ये निरवयवे संस्काराधानंन युज्यते तदुपार्जनफलादानाऽसंभवात् । नापि शरीरैकदशे युज्यते अन्यगुणत्वात् अनभिसंबंधाच्च । किं च मूर्तिमत्संबंधजनितविपत्संपत्तिदर्शनात् श्रोत्रं मूर्तमेवेत्यवसेयं यदप्युच्यते--स्पर्शवद्द्रव्याभिघातात् शब्दांतरानारंभ इति खात्पातिता नो रत्नवृष्टिः । स्पर्शवद्द्रव्याभिघातादेव मूर्तित्वमस्य सिद्धं । न हि अमूर्तः कश्चित् मूर्तिमता विहन्यते । तत एव च मुख्यावरोधः सिद्धः स्पर्शवदनभिघाताभ्युपगमात् ।

अभिभवादिदर्शनाच्च मूर्तः शब्दः इत्यवगंतव्यं ॥१९॥ यथा तारकादयो भास्करप्रभाभिवान्मूर्तिमंतः । तथा सिंहगजभेर्यादिशब्दैर्बृहद्भिः शकुनिरुतादयोऽभिभूयंते । तथा कंसादिषु पतिताः ध्वन्यंतरारंभे हेतवो भवंति । गिरिगह्वरादिषु च प्रतिहताः प्रतिश्रुद्भावमास्कंदंति । अत्राह—अमूर्तेरप्यभिभवादृश्यते यथा विज्ञानस्य सुरादिभिः मूर्तिमद्भिस्ततो नायं निश्चयहेतुः ? इत्युच्यते । नाय व्यभिचारः विज्ञानस्य क्षायोपशमिकस्य पौद्गलित्वाभ्युपगमात् । इतरथा हि आकाशवन्नाभिभूयेत ।

मनश्च द्वितयं पौद्गलिकं तन्मयत्वात् ॥ २० ॥ द्विप्रकारं मनो भावमनो द्रव्यमनश्चेति तदुभयमपि पौद्गलिकं । कुतः ? तन्मयत्वात् । भावमनस्तावत् लब्ध्युपयोगलक्षणं पुद्गलावलंबनत्वात् पौद्गलिकं । द्रव्यमनश्च ज्ञानावरणवीर्यांतरायक्षयोपशमलाभप्रत्ययाः गुणदोषविचारस्मरणादिप्राणिधानाभिमुखस्याऽऽत्मनोऽनुग्राहकाः पुद्गलाः वीर्यविशेषावर्जनसमर्थाः मनस्त्वेन परिणता इति कृत्वा पौद्गलिकं नाकाशमयं ।

अर्थांतरमिति चेन्न अनेकांतात् इंद्रियवत् ॥ २१ ॥ स्यादेतत् अर्थांतरं आत्मनो मन इति ? तन्न । किं कारणं ? अनेकांतात् इंद्रियवत् । यथा वीर्यांतरायज्ञानावरणक्षयोपशमापेक्षस्य आत्मन एवेंद्रियपरिणामादेशात्स्यादनन्यदिंद्रियं, इंद्रियानिवृत्तावपि आत्मनोऽवस्थानात् । स्यादन्यत् तथाऽऽत्मन एव तत्क्षयोपशमापेक्षस्य मनःपरिणामादेशात् स्यादनन्यत् मनोनिवृत्तावात्मनोऽवस्थानात् स्यादन्यत् ।

अवस्थायीति चेन्न अनंतरसमयप्रच्युतेः ॥ २२ ॥ स्यादेतत् अवस्थायि मनः, न तस्य निवृत्तिरिति ? तन्न । किं कारणं ? अनंतरसमयप्रच्युतेः । मनस्त्वेन हि परिणताः पुद्गलाः गुणदोषविचारस्मरणादि कार्यं कृत्वा तदनंतरसमय एव मनस्त्वात् प्रच्यवते ।

आदेशवचनाच्च ॥ २३ ॥ नायमेकांतः अवस्थाय्येव मन इति । कुतः ? आदेशवचनात् । द्रव्यार्थादेशान्मनः स्यादवस्थायि, पर्यायादेशात् स्यादनवस्थायि ।

एकद्रव्यमिति चेन्नाऽसामर्थ्यात् ॥ २४ ॥ स्यादेतत् एकद्रव्यं मनः प्रत्यात्मं वर्तते इति, उक्तं च "प्रयत्नायौगपद्यात् ज्ञानायौगपद्याच्चैकं मनः" इति ? तन्न । किं कारणमसामर्थ्यात् । कथमसामर्थ्यं ? परमाणुमात्रत्वात् । परमाणुमात्रं हि मनः तदात्मनेंद्रियेण च युक्तं सत् स्वप्रयोजनं प्रति व्याप्रियते इत्यभिमतं । तत्रेदं विचार्यते तदात्मेंद्रियाभ्यां सर्वात्मना वा संबध्येत तदेकदेशेन वा ? यदि सर्वात्मना तयोरात्मेंद्रिययोरर्थांतरभावात् व्यतिरिक्तयोरन्यतरेण सर्वात्मना संबंधः स्यात्, अणोः मनसः नोभाभ्यां युगपद्विरोधात् । अथान्येन देशेनाऽऽत्मना संबध्यते अन्यदेशेनेंद्रियेणैवं सति प्रदेशवत्त्वं मनसः प्रसक्तं तच्चानिष्टमणुमात्रत्वात् मनसः । किंच यद्यात्मा मनसा सर्वात्मना संबध्यते मनसोऽणुत्वात् आत्मनोऽप्यणुत्वं, आत्मनो विभुत्वात् मनसो वा

विभुत्वं प्रसज्यते। अथैकदेशेनाऽऽत्मा मनसा संयुज्यते ननु प्रदेशवत्त्वमात्मनः प्रसक्तं। ततश्चतुष्टयत्रयद्वयसन्निकर्षजज्ञानसुखदुःखादीनां प्रदेशवृत्तित्वात् आत्मनः कश्चित् प्रदेशो ज्ञानादियुक्तः कश्चित् प्रदेशो ज्ञानादिविरहित इति। यत्र ज्ञानादिविरहितस्तत्रात्मलिंगाभावात् तदभाव इति सर्वगतत्वाभावः स्यात्। तथेंद्रियेण मनो यदि सर्वात्मना संयुज्यते इंद्रियस्याणुमात्रत्वान्नाणुत्वं। अथैकदेशेन मन इंद्रियेण संयुज्यते न तर्हि अणु तत्। किं च गुणगुणिनोरन्यात्वानित्यत्वाच्च मनसः संयोगविभागपरिणामाभावात् नास्यात्मना नचेंद्रियैः संयोगविभागौ स्तः। अथ संयोगविभागाभ्यां मनः परिणमते न तर्हि नित्यत्वं। न च गुणगुणिनोरन्यत्वं। अचेतनत्वाच्च मनसः अनेनैव इंद्रियेणाऽनेनैव चात्मना संयोक्तव्यं नेंद्रियांतरैरिति विशेषज्ञानाभावात्। प्रतिनियतात्मेंद्रियसंयोगाभावः कर्मवदिति चेन्न। पौरुषेयपरिणामानुरंजितत्वात् कर्मणः स्याच्चैतन्यं, पुद्गलद्रव्यादेशाच्च स्यादचेतनत्वमिति विषमो दृष्टांतः। सौक्ष्म्याच्च मनसश्चक्षुरादीनां रूपादिग्रहणयोग्यत्वाभावः अणुना मनसा चक्षुरादेः कृत्स्नस्याऽनधिष्ठितत्वात्। यावान् देशश्चक्षुरादीनामणुना मनसाधिष्ठितस्तावता एव रूपादिग्रहणसामर्थ्यं भवेत्। न कृत्स्नस्य, दृष्टं च कृत्स्नग्रहणं तस्मात् नाणु।

आशु संचारीति चेन्न अचेतनत्वात् ॥२५॥ स्यान्मतं अणुमात्रमपि सन्मनः आशु संचारित्वात् कृत्स्नग्रहणहेतुः इति? तन्न किं कारणमचेतनत्वात्। न हि अचेतनस्य मनसः बुद्धिपूर्विका सर्वत्र व्यापृतिर्युक्ता।

अदृष्टवशादिति चेन्न क्रियापरिणामाभावात् ॥ २६ ॥ स्यादेतत् पुरुषेण प्रेर्यमाणमलातचक्रमाशु संचरणात् सर्वत्रोपलभ्यते, तथाऽदृष्टवशान्मनसो भ्रमणमिति? तन्न। किं कारणं? क्रियापरिणामाभावात्। क्रियावता हि पुरुषेण प्रेर्यमाण मलातचक्रं सर्वत्रोपलभ्यते इत्येतद्युक्तं, अदृष्टः पुनरात्मगुणः स्वयमक्रियोऽन्यत्र क्रियाहेतुरित्येतदयुक्तमित्युक्तं पुरस्तात्।

अनादिसंबंधमिति चेन्न संयोगित्वात् ॥२७॥ स्यादेतत् अनादिसंबंधं मनः स्वभावत एवेति तन्न। किं कारणं? संयोगित्वात्। अप्राप्तिपूर्विका हि प्राप्तिः संयोगः इत्यणुमनोवादिनाभ्युपगम्यते इति मनोद्रव्यस्याऽऽत्मनाऽनादिसंबंधः। क्षायोपशमिकत्वाच्च नार्हतस्य आत्मनाऽनादिसंबंधं मन इति सिद्धमस्ति।

तत्परित्यागविरोधाच्च ॥ २८ ॥ यदि अनादिसंबंधं मनो भवेत् अतोऽस्य परित्यागविरोधः स्यात्। अस्ति च परित्यागः अतो नानादिसबंधं मनः।

कर्मवदिति चेन्न अनेकांतात् ॥ २९ ॥ स्यादेतत् यथा जीवकर्मणोरनादिसंबधेपि कर्मपरित्यागाविरोधः तथा मनसोपीति? तन्न। किं कारणं अनेकांतात्। नायमेकांतः जीवकर्मणोरनादिसंबंध इति, किं तर्हि? कर्मसंबंधसंतत्यपेक्षया स्यादनादिसंबंधः, मिथ्यादर्शनादिप्रत्ययापादितसबंधभेदापेक्षया स्यादादिमान्, अतोऽस्य तत्प्रत्यनीकभावनाप्रकर्षसन्निधौ परित्याग इति नास्ति विरोधः।

इंद्रियसहकारिवेदनावगमादिति चेन्न चेतनास्वभावत्वात् ॥३०॥ स्यादेतदिंद्रियाणां सहकारिकारणं मनः। कुतः? चक्षुरादिभिरिष्टानिष्टरूपरसादिविषयोपलब्धौ तत्सान्निधाने सुखदुःखवेदनावगमात् आत्मैव नान्योस्य व्यापारोस्ति इति? तन्न। किं कारणं? चेतनास्वभावत्वात्। निष्टप्तायःपिंडवत् इंद्रियपरिणामात् इंद्रियमनश्चेतनास्वाभाव्यात् इंद्रियाण्येव वेदनावगमं कुर्वंति। अतश्चैतदेवं यदि मनोऽतरेण इंद्रियाणां वेदनावगमो न स्यात् एकेंद्रियविकलेंद्रियाणामसंज्ञिपंचेंद्रियाणां च वेदनागमो न स्यात्।

पृथगुपकारानुपलंभात् तदभाव इति चेन्न गुणदोषविचारादिदर्शनात् ॥ ३१ ॥ स्यान्मतं नास्ति मनः पृथगुपकारानुपलंभात् इति? तन्न। किं कारणं? गुणदोषविचारादिदर्शनात् मनसः। मन उपलब्धिमता आत्मना मनस्त्वेन परिणमिता पुद्गलाः तिमिरांधकारादिबाह्याभ्यंतरेंद्रियप्रतिघातहेतुसान्निधानेपि गुणदोषविचारस्मरणादिव्यापारे साचिव्यमनुभवंति अतोस्त्यतंःकरणं मनः।

विज्ञानमिति चेन्न तत्सामर्थ्याभावात् ॥ ३२ ॥ स्यान्मतं न मनो नामाऽन्यदस्ति किं तर्हि विज्ञानमेव किंचिन्मनः इति व्यपदिश्यते। उक्तं च-

षण्णामनंतरातीतं विज्ञानं यद्धि तन्मनः ।

इति तन्न किं कारणं ? तत्सामर्थ्याभावात् । वर्तमानमेव विज्ञानं बाह्यमर्थं नावबोद्धुमलं किमंग पुनरतीतं । वर्तमानं तावद्विज्ञानं क्षणिकं पूर्वोत्तरविज्ञानसंबंधनिरुत्सुकं कथं गुणदोषविचारस्मरणादिव्यापारे साचिव्यं कुर्यात् अनुस्मरणं हीदं स्वयमनुभूतस्यार्थस्य दृष्ट नानुभूतस्य । न च क्षणिकैकांते तत्संभवति । एकसंतानपतितत्वात् तदुपपत्तिरिति चेन्न तदवस्तुत्वात् तदतीतमत्यंतमसत् कथमिव गुणदोषविचारस्मरणादौ सहायी भवेत् । आलयविज्ञानं बीजशक्तिरूपं सदवस्थितमालबनं भवतीतिचेत्, तस्य एकस्य कालांतरावस्थायित्वाभ्युपगमे क्षणिकप्रतिज्ञाहानिः । चेत्तदालंबनाभावः ।

प्रधानविकार इति चेन्न अचेतनत्वात् ॥३३॥ स्यादेतत् न पौद्गलिकं मनः । किं तर्हि ? प्रधानविकारः, प्रधानस्य महदहंकारादिभावेन परिणामिनः कश्चिद्विकारविशेषो मनः इत्याख्यायते इति ? तन्न । किं कारणं ? अचेतनत्वात् । प्रधानमचेतनं तद्विकाराश्च तदात्मका इति घटवदचेतनस्य तस्य गुणदोषविचारणादिव्यापारे साचिव्याभावः । किं च मनः कारणं विचारादेः कर्ता पुरुषः प्रधानं वा स्यात् ? न तावात् पुरुषः निर्गुणत्वात् । सात्त्विका हि गुणदोषविचारादयो न च प्रधानं तस्याऽचेतत्वात् । न हि लोके किंचिदचेतनं—गुणदोषविचारादेः कर्तृ दृष्टं । किं च —

तदव्यतिरेकात्तदभावः ॥ ३४ ॥ प्रधानत्वात् सत्त्वरजस्तमसां साम्यावस्थानरूपात् महदहंकारादयः परिणामाः वैषम्यरूपाः व्यतिरिक्ता वा स्युरव्यतिरिक्ता वा । यदि व्यतिरिक्ताः कार्यकारणैकत्वैकांतप्रतिज्ञाहानिः । अथाव्यतिरिक्ता प्रधानमेव न परिणामा नाम केचन संतीति मनसो निवृत्तिः ।

कोष्ठ्यो वायुरुच्छ्वासलक्षणः प्राणः ॥ ३५ ॥ वीर्यांतरायज्ञानावरणक्षयोपशमांगोपांगनामोदयापेक्षिणाऽऽत्मना उदस्यमानः कोष्ठ्यो वायुरुच्छ्वासलक्षणः प्राण इत्युच्यते ।

बाह्यो वायुरभ्यंतरीक्रियमाणोऽपानः ॥ ३६ ॥ तेनैवाऽऽत्मना बाह्यो वायुरभ्यंतरीक्रियमाणो 'निःश्वासलक्षणोऽपान इत्याख्यायते । एतावप्यात्मानुग्राहिणौ जीवितहेतुत्वात् ।

तन्मूर्तिमत्त्वं प्रतिघातादिदर्शनात् ॥ ३७ ॥ तयोः प्राणापानयोः तेषां वाङ्मनःप्राणापानानां वा मूर्तिमत्त्वमवगंतव्यं । कुतः ? प्रतिघातादिदर्शनात् । प्रतिभयहेतुभिरशनिशब्दादिभिर्मनसः प्रतिघातो दृश्यते, सुरादिभिश्चाऽभिभवः । हस्तपुटादिभिरास्यसंवरणात् प्राणापानयोः प्रतिघात उपलभ्यते, श्लेष्मणा चाभिभवः नचाऽमूर्तस्य मूर्तिमद्भिरविघातादयः स्युः ।

अत आत्मास्तित्वसिद्धिः प्राणापानादिकर्मणः तत्कार्यत्वात् ॥ ३८ ॥ अत आत्मनोस्तित्वं प्रासिधत् । कुतः प्राणापानादिकर्मणः तत्कार्यत्वात् । यथा यंत्रप्रतिमाचेष्टितं प्रयोक्तुरास्तित्वं गमयति । तथा प्राणापानादिकर्मापि क्रियावंतमात्मानं साधयति । असति तस्मिन्नप्रवृत्ते । नाकस्मात् नियमदर्शनात् । न विज्ञानादि कृतं, तेषाममूर्तत्त्वे प्रेरणशक्तिविरहात् । न रूपस्कंधकृतं तस्याचेतनत्वात् । सर्वेषां निरीहकत्वात् कर्माभाव इति चेन्न देशांतरप्राप्त्यभावप्रसंगात् । वायुधातुविशेषात् देशांतरे प्रादुर्भावः क्रियेत्युपचर्यते न मुख्या क्रियास्ति । 'भूतिर्येषां क्रिया सैवेति' वचनात् इति चेन्न वायुधातुविशेषासामर्थ्यात् । वायुधातुरपि निःक्रियः स कथमिव देशांतरप्रादुर्भूतिहेतुः स्यात् । क्षणिकत्वाभ्युपगमादनवस्थितानां कर्माभावः इति चेन्न असिद्धत्वात् अयुक्तेश्च ।

प्राण्यंगत्वाद्द्वंद्वैकवद्भावप्रसंग इति चेन्नांऽगांगिद्वंद्वे तदभावात् ॥ ३९ ॥ स्यान्मतं शरीरं च वाक्च मनश्च प्राणश्चाऽपानश्च शरीरवाङ्मनःप्राणापाना इति द्वंद्वे कृते एकवद्भावः प्राप्नोति । कुतः ? प्राण्यंगत्वात् इति ? तन्न । किं कारणं ? अंगांगिद्वंद्वे तदभावात् । प्राण्यंगानामेव यो द्वंद्वः तस्यैकवद्भावः उक्तः अंगमवयव एकदेश इत्यनर्थांतरं, शरीरमत्रांगि चास्तीत्येकवद्भावो न भवति । अथवा वागादीनि नांगानि दंतादिवदनवस्थितत्वात् । अथवा द्वंद्वैकवद्भावः सर्वः समाहारविषयः समाहारश्चैकप्राणिविषयाणां युक्तः, नानाप्राणिस्थाश्चैते विवक्षिताः ततो नास्त्येकवद्भावः ।

पुद्गलशब्दो निर्दिष्टार्थः ॥ ४० ॥ पुद्गलशब्दस्यार्थो निर्दिष्टः पुंगिलनात् पूरणगलनाद्वा पुद्गलाः।

उपग्रहप्रकरणात्कर्तरि षष्ठी ॥ ४१ ॥ उपग्रहशब्दः प्रकृतः स च कर्मसाधनः तेन कर्तुरनुक्तत्वात् पुद्गलानामिति कर्तरि षष्ठी द्रष्टव्या। तेन शरीरादिपरिणामैरात्मनां पुद्गलाः उपग्रहीतार इत्युक्तं भवति। ते चात्मानः सक्रियाः कर्ममलीमसाः संतः शरीरादिकृतमुपकारं तद्बंधपूर्वकं अनुभवंतीत्यतदुक्तं। एकांतनिःक्रियत्वे अत्यतशुद्धत्वे च शरीरादिभिः बधाभावात् तत्कृतोपकाराभावः तत्क्रियाहेतुत्वाभावश्चेति संसाराभावः तदभावात् कुतो मोक्षः ?। यथा चैतच्चतुष्टयं गमनव्याहरणचिंतनप्राणनादिभावेन परिणामविशेषाहितमनुग्राहकं पौद्गलिकत्वात् तथाऽयमपि तत्कृत एवोपकार। इति प्रदर्शयन्नाह—

सुखदुःखजीवितमरणोपग्रहाश्च ॥ २० ॥

बाह्यप्रत्ययवशात् सद्वेद्योदयादात्मनः प्रसादः सुखं ॥ १ ॥ यदात्मस्थं सद्वेद्यं कर्म द्रव्यादिबाह्यप्रत्ययवशात् परिपाकमुपयाति तदात्मनः प्रसादः प्रीतिरूपः सुखमित्याख्यायते।

तथाऽसद्वेद्योदयात् आत्मपरिणामो यः संक्लेशप्रायः स दुःखमिति ॥२॥ तथा तेन प्रकारेण बाह्यप्रत्ययवशेनेत्यर्थः। असद्वेद्योदयादात्मपरिणामो यः संक्लेशप्रायः स दुःखमिति कथ्यते।

भवस्थितिनिमित्तायुर्द्रव्यसंबंधिनो जीवस्य प्राणापानलक्षणक्रियाविशेषाव्युपरमो जीवितं ॥ ३ ॥ भवधारणकारणमायुराख्यं कर्म तदुदयापादितं भवस्थितिं आदधानस्य जीवस्य पूर्वोक्तस्य प्राणापानलक्षणस्य क्रियाविशेषाविच्छेदो जीवितमिति प्रत्येतव्यं।

तदुच्छेदो मरणं ॥ ४ ॥ तस्य जीवितोच्छेदो जीवस्य मरणं इत्यवसेयं।

सुखग्रहणमादौ तदर्थत्वात्परिस्पंदस्य ॥ ५ ॥ सर्वेषां प्राणिनां परिस्पंदः सुखप्राप्त्यर्थः ततोऽस्य ग्रहणमादौ क्रियते।

तदनंतरं दुःखवचनं तत्प्रतिपक्षत्वात् ॥ ६ ॥ सुखस्य हि प्रतिपक्षभूतं दुःखं अप्रीतिहेतुत्वात् ततोस्य वचनं तदनंतरं क्रियते।

जीविनस्तदुभयदर्शनात् तदनंतरं जीवितग्रहणं ॥ ७ ॥ यतः तदुभयं सुखदुःखं जीविनो भवति ततः तदनंतरं जीवितग्रहणं क्रियते।

अंते प्राप्यत्वान्मरणस्यांते वचनं ॥ ८ ॥ आयुःक्षयनिमित्तं मरणमंते प्राणिभिरवाप्यत इति तदुपादानं अंते क्रियते। सुखं च दुखं च जीवितं च मरणं च सुखदुःखजीवितमरणानि तान्येवोपग्रहः सुखदुःखजीवितमरणोपग्रहः। केषां ? पुद्गलानामिति प्रकृतं अभिसंबध्यते।

प्रकृतत्वादुपगृहावचनमिति चेन्न स्वोपगृहदर्शनार्थत्वात् ॥ ९ ॥ स्यान्मतं प्रकृतमुपग्रहवचनमस्ति तेन शरीरवाङ्मनःप्राणापानैः सुखदुःखजीवितमरणैश्च पुद्गलाः जीवान् उपगृह्णंति इत्यस्मिन्नर्थे प्रतिपादिते पुनरुपग्रहवचनमनर्थकमिति ? तन्न ? किं कारणं, स्वोपगृहप्रदर्शनार्थत्वात्। यथा धर्माधर्माकाशानि परेषामेवोपग्रहं कुर्वंति न तथा पुद्गलाः, स्वोपग्रहश्चैषामस्तीति प्रदर्शनार्थं पुनरुपग्रहवचनं क्रियते। तद्यथा- कंसादीनां भस्मादीनि जलादीनां कतकादीनि अयःप्रभृतीनामुदकादीनि उपकारं कुर्वंति।

मरणमात्मोपग्रहो नेति चेन्न निर्विण्णस्य तत्प्रियत्वात् ॥ १० ॥ स्यादेतत् मरणमात्मोपग्रहो नोपपद्यते। कुतः ? अनिष्टत्वात्। न हि कस्यचित् मरणमीप्सितमिति ? तन्न। किं कारण ? निर्विण्णस्य तत्प्रियत्वात्। व्याधिपीडाशोकादिभिर्जीवितान्निवृत्तादरस्य निर्विण्णस्य हि जनस्य मरणं प्रियं लोके दृश्यते।

प्रयोजनप्रतिपादनार्थत्वात् च दुःखवत् ॥ ११ ॥ यथा दुःखमनिष्टमपि जीवानां पुद्गलैः प्रतिपाद्यं प्रयोजनमिति गृह्यते तथा मरणमपीति नास्ति दोषः।

लघ्वर्थमेकसूत्रीकरणमिति चेन्नाऽऽशंकानिवृत्त्यर्थत्वात् ॥ १२ ॥ स्यान्मतं शरीरवाङ्मनःप्राणापानाः सुखदुःखजीवितममरणोपग्रहाश्च पुद्गलानामित्येकमेव सूत्रं कर्तव्यं लघ्वर्थमिति ? तन्न । किं कारणं ? आशंकानिवृत्त्यर्थत्वात् । शरीरवाङ्मनःप्राणापाना हेतवश्चत्वारः सुखदुःखजीवितमरणानि च फलानि चत्वारि तेषां यथासंख्यमनिष्टमाशंक्य तन्निवृत्त्यर्थं नानायोगकरणं । उत्तरसूत्रं सुखादिसंबंधनार्थं च ।

तदनुपपत्तिर्नित्यानित्यपक्षयोर्विकारावस्थानाभावात् ॥ १३ ॥ तेषां सुखादीनां अनुपपत्तिः क ? नित्यपक्षेऽनित्यपक्षे च । कुतः ? विकारावस्थानाभावात् । तद्यथा—नित्यपक्षे तावत् । आत्मनां पूर्वपरकालतुल्यत्वात् परिणामांतरसंक्रांतिलक्षणस्य विकारस्याभावात् सुखादिककल्पनमयुक्तं । अनित्यपक्षे चावस्थानाभावत् सुखादिसंबंधोऽनुपपन्नः । अवस्थितस्य हि इष्टानिष्टशब्दस्पर्शादिसान्निपाते सति सुखादिप्रभवः स्यात् स चाकस्मान्न भवति । किं तर्हि ? कुशलाकुशलभावनापूर्वकः । कुशलाकुशलभावना च स्मृत्यभिसंबंधिचेष्टाभिनिर्वृत्तिलक्षणा । स्मृत्यादयश्चानवस्थितस्य न संभवंतीत्यतो नित्यानित्यात्मकस्य आत्मनः सुखादिनिरूपणं निरवद्यं । आह अजीवद्रव्यचतुष्टयस्य यथा परानुग्रहः सांततिकः किमेवमात्मनामप्युतान्यो विधिरस्तीत्यत्रोच्यते—

परस्परोपग्रहो जीवानां ॥ २१ ॥

कर्मव्यतिहारविषयः परस्परशब्दः ॥ १ ॥ कर्मव्यतिहारः क्रियाव्यतिहार इत्यर्थः तद्विषयोयं परस्परशब्दः ।

परस्परस्योपग्रहः परस्परोपग्रहः ॥ १ ॥ कः पुनरसौ ? स्वामिभृत्यादिभावेन वृत्तिः परस्परोपग्रहः । स्वामी भृत्य आचार्यः शिष्य इत्येवमादिभावेन वृत्तिः परस्परोपग्रह इत्युच्यते । स्वामी तावत् वित्तत्यागादिना भृत्यादीनामुपग्रहे वर्तते । भृत्याश्च हितप्रतिपादनेन आहितप्रतिषेधेन वा । आचार्य उभयलोकफलप्रदोपदेशदर्शनेन तदुपदेशविहिताक्रियानुष्ठापनेन च शिष्याणां अनुगृहे वर्तते । शिष्या अपि तदनुकूलवृत्त्या ।

प्रकृतत्वादुपग्रहावचनमिति चेन्नानंतरचतुष्टयप्रतिनिर्देशार्थत्वात् ॥ २ ॥ स्यादेतत् प्रकृतमुपग्रहवचनमस्ति तदभिसंबंधात् पुनरुपग्रहवचनं अनर्थकमिति ? तन्न । किं कारणं ? अनंतरचतुष्टयप्रतिनिर्देशार्थत्वात् । नापूर्वः कश्चित् परस्परोपग्रहो जीवानामस्ति, अनंतरसूत्रे निर्दिष्टः सुखादिचतुष्टयोपग्रह एवेति प्रदर्शनार्थं पुनरुपग्रहवचनं ।

स्त्रीपुंसरतिवदनियमप्रदर्शनार्थं च ॥ ३ ॥ यथा स्त्रीपुंसौ यौगपद्येन रतिक्रियां परस्परस्योपकुरुतः न तथा सुखाद्युपग्रहे नियम इति प्रदर्शनार्थं च पुनरुपग्रहवचनं क्रियते । जीवो हि कश्चित् स्वस्य सुखं कुर्वन् परस्यैकस्य सुखं करोति कश्चिद्द्वयोः कश्चिद्बहूनां । कश्चिद्दुःखमात्मनः कुर्वन् परस्यैकस्य द्वयोः बहूनां वा करोति । कदाचिद्द्वौ बहवो वाऽऽत्मानः सुखं दुःखं वा कुर्वंतः परस्यैकस्य द्वयोर्बहूनां वा सुखं दुःखं मुत्पादयंति । एवमितरत्रापि योज्यं । आह—यदि अवश्यं सतोपकारिणा भवितव्यं संश्च कालोऽभिमतः स किमुपकारः ? इत्यत्रोच्यते तस्य खलु वक्ष्यमाणस्वतत्त्वस्याऽमूर्तेः —

वर्तनापरिणामक्रिया परत्वापरत्वे च कालस्य ॥२२॥

अथवा यथा धर्मादीनामस्तित्वस्याऽऽविर्भावक उपकार उक्तो गत्यादिः तथा कालस्यापि प्रतिनियत उपकारोस्तित्वसंसूचकोस्ति उत नास्ति ? अस्त्युपकारः । यद्येवं स उच्यतां इत्यत आह वर्तनादनीति ।

करणाधिकरणयोर्वर्त्तनेति चेद्युटि सति ङीप्रसंगः ॥१॥ स्यादेतत् वर्ततेऽनया अस्यां चेति विगृह्य वर्तनाशब्दो निःपाद्यत इत्येवं सति परत्वाद्युटि सति टित्त्वात् ङी प्राप्नोति कथं तर्हि सिद्धिः ?

णिजंताद्युचि वर्तना ॥ २ ॥ स्त्रीलिंगे कर्मणि भावे वा णिजंताद्युचि सति वर्तनेति भवति । वर्त्यते वर्तनमात्रं वा वर्तनेति ॥

अनुदात्तेत्त्वात्ताच्छीलिको वा ॥ ३ ॥ अथवा वृत्तिरयमनुदात्तेत्ततस्ताच्छीलिको युच् वर्तनशीला वर्तनेति । का पुनर्वर्तना ।

प्रतिद्रव्यपर्यायमंतर्नीतैकसमया स्वसत्तानुभूतिर्वर्तना ॥ ४ ॥ द्रव्यस्य पर्यायो द्रव्यपर्यायः द्रव्यपर्यायं प्रति प्रतिद्रव्यपर्यायं। अंतर्नीत एकः समयोऽनया साऽतर्नीतैकसमया, पुनरसौ स्वसत्तानुभूतिः, उत्पादव्ययध्रौव्यैक्यवृत्तिः सत्ता न ततोन्या काचिदस्ति स्वसत्ताप्रतिनियता असाधारणीत्यर्थः बुद्ध्यभिधानानुप्रवृत्तिलिंगनानुमीयमाना सादृश्योपचारादेकापि सती जीवाजीवतद्भेदप्रभेदैः संबंधमापद्यमाना विशिष्टशक्तिभिरवसंबध्यते। तस्या अनुभूतिः स्वसत्तानुभूतिर्वतनेत्युच्यते एकस्मिन्नविभागिनि समये धर्मादीनि द्रव्याणि षडपि स्वपर्यायैरादिमदनादिमद्भिरुत्पादव्ययध्रौव्यविकल्पैर्वर्तंत इति कृत्वा तद्विषया वर्तना ।

सानुमानिकी व्यावहारिकदर्शनात् पाकवत् ॥ ५ ॥ यथा व्यावहारिकस्य पाकस्य तंदुलविक्लेदनलक्षणस्यौदनपरिणामस्य दर्शनादनुमीयते-अस्ति प्रथमसमयादारम्य सूक्ष्मपाकाभिनिर्वृत्तिः प्रतिसमयमिति । यदि हि प्रथमसमयेऽग्न्युदकसन्निधाने कश्चित् पाकविशेषो न स्यात् । एवं द्वितीये तृतीये च न स्यात् इति पाकाभाव एव स्यात् । तथा सर्वेषामपि द्रव्याणां स्वपर्यायाभिनिर्वृत्तौ प्रतिसमयं दुरधिगमा निःपत्तिरभ्युपगंतव्या ।

तल्लक्षणः कालः ॥ ६ ॥ सा वर्तना लक्षणं यस्य स काल इत्यवसेयः । समयादीनां क्रियाविशेषाणां समयादिनिर्वृत्त्यानां च पर्यायाणां पाकादीनां स्वात्मसद्भावानुभवनेन स्वत एव वर्तमानानां निर्वृत्तेर्बहिरंगो हेतुः समय पाक इत्येवमादिस्वसंज्ञारूढिसद्भावे काल इत्ययं व्यवहारो कस्मान्न भवतीति तद्व्यवहारहेतुनाऽन्येन भवितव्यमित्यनुमेयः ।

आदित्यगतेरिति चेन्न तद्गतावपि तत्सद्भावात् ॥ ७ ॥ स्यादेतत् आदित्यगतिनिमित्ता द्रव्याणां वर्तनेति ? तन्न। किं कारणं ? तद्गतावपि तत्सद्भावात्। सवितुरपि क्रियायां भूतादिव्यवहारविषयभूतायां क्रियेत्येवं रूढायां वर्तनादर्शनात् तद्धेतुनान्येन कालेन भवितव्यं ।

आकाशप्रदेशनिमित्तेति चेन्न तां प्रत्यधिकरणभावाद्भाजनवत् ॥ ८ ॥ स्यादेतत् आकाशप्रदेशनिमित्ता वर्तना नान्यस्तद्धेतुः कालोस्तीति ? तन्न किं कारणं तां प्रत्यधिकरणभावात् भाजनवत् । यथा भाजनं तंदुलानामधिकरणं नतु तदेव पचति तेजसो हि स व्यापारस्तथाकाशमप्यादित्यगत्यादिवर्तनायामधिकरणं न तु तदेव निर्वर्तयति कालस्य हि स व्यापारः ।

सत्तात इति चेन्न तस्या अप्यनुग्रहात् ॥ ९ ॥ स्यान्मतं सत्तानाम सर्वपदार्थानां साधारण्यस्ति तद्धेतुका वर्तनेति तन्न। किं कारण ? तस्या अप्यनुग्रहात् कालानुगृहीतवर्तना हि सत्तेति ततोप्यन्येन कालेन भवितव्यं ।

द्रव्यस्य स्वजात्यपरित्यागेन प्रयोगविस्रसालक्षणो विकारः परिणामः ॥ १० ॥ द्रव्यस्य चेतनस्येतरस्य वा द्रव्यार्थिकनयस्य अविवक्षातो न्यग्भूतानां स्वां द्रव्यजातिं अजहतः पर्यायार्थिकनयार्पणात् प्राधान्यं बिभ्रता केन चित् पर्यायेण प्रादुर्भावः पूर्वपर्यायनिवृत्तिपूर्वको विकारः प्रयोगविस्रसालक्षणः परिणाम इति प्रतिपत्तव्यः । तत्र प्रयोगः पुद्गलविकारस्तदनपेक्षा विक्रिया विस्रसा । तत्र परिणामो द्विविधः अनादिरादिमांश्च । अनादिर्लोकसंस्थानमंदराकारादिः । आदिमान् प्रयोगजो वैस्रसिकश्च । तत्र चेतनस्य द्रव्यस्यौपशमिकादिर्भावः कर्मोपशमाद्यपेक्षोऽपौरुषेयत्वात् वैस्रसिक इत्युच्यते । ज्ञानशीलभावनादिलक्षणः आचार्यादिपुरुषप्रयोगनिमित्तत्वात् प्रयोगजः । अचेतनस्य च मृदादेः घटसंस्थानादिपरिणामः कुलालादिपुरुषप्रयोगनिमित्तत्वात् प्रयोगजः । इंद्रधनुरादिनानापरिणामो वैस्रसिकः । तथा धर्मादेरपि परिणामो योज्यः ।

परिणामाभावः सत्त्वासत्त्वयोर्दोषोपपत्तेरिति चेन्न पक्षांतरत्वात् ॥ ११ ॥ स्यान्मतं नास्ति परिणामः कुतः सत्त्वासत्त्वयोः दोषोपपत्तेः। बीजमंकुरे स्याद्वा न वा ? यदि सदंकुरे बीजमंकुराभावो बीजवत् ।

अथासत् न बीजमंकुरत्वेन परिणतं अंकुरे तत्स्वभावाभावात् अतः परिणामाभावः इति ? तन्न । किं कारणं ? पक्षांतरत्वात् । यथा सत्पक्षदोषो नाऽसत्पक्षं स्पृशति पक्षांतरत्वात् । असत्पक्षदोषोपि सत्पक्षं तत एव । तथा सदसदेकांतपक्षदोषावप्यनेकांतपक्षं न स्पृशतः पक्षांतरत्वादेव, इतरथा हि पक्षसंकरप्रसंगः । उभयदोषप्रसंग इति चेन्न जात्यंतरत्वान्नरसिंहरूपवत् । शालिबीजादिद्रव्यादेशात् अंकुरे स्याद्बीजमस्ति यद्यन्वयोच्छेदः स्यात्फलविशेषाभावः प्रसज्येत । शालिबीजादिपर्यायार्थादेशात् स्यादंकुरे नास्ति बीजं यद्यविपरिणामः स्यात् अन्यथा वृत्तिदर्शनमयुक्तं स्यात् ।

प्रतिषेधाभावाच्च ॥ १२ ॥ इदमस्ति, त्वं प्रष्टव्यः ? परिणामः सन्वा प्रतिषिध्येताऽसन्वेति उभयथा च प्रतिषेधाभावः ? यदि सन् सत्त्वादेव न प्रतिषिध्येत । अथ सन्नपि प्रतिषिध्यते । ननु परिणामप्रतिषेधोपि सत्त्वात् प्रतिषिध्यत इति प्रतिषेधाभावः । तदभावादप्रतिषिद्धः परिणामः । अथ प्रतिषेधः सत्त्वादप्रतिषिद्धः ननु परिणामोपि सत्त्वात् अप्रतिषिद्धः । अथाऽसन् परिणामः ? असत्त्वादेव खरविषाणवत् न प्रतिषिध्यते इति प्रतिषेधाभावः । अथवा यस्य परिणामो नास्ति स वक्तृत्वेनापरिणतः वाच्यास्याप्यर्थस्याभिधेयत्वेनापरिणामः अभिधानस्य च वाचकत्वेनापरिणाम इति वक्तृवाच्यवचनानामभावात् प्रतिषेधाभावः, तदभावादप्रतिषिद्धः परिणामः स्थितः ।

अन्यानन्यत्वदोषादिति चेन्नोक्तत्वात् ॥ १३ ॥ स्यान्मतं नास्ति परिणामः कुतः ? अन्यानन्यत्वयोर्दोषात् । बीजादंकुरोऽन्यो वा स्यात् अनन्यो वा ? यदि अन्यो बीजादंकुरः ? न तर्हि बीजपरिणामोऽकुरः । अथानन्यो बीजादंकुरः न तर्हि अंकुरोस्ति बीजादनन्यत्वात् । उक्तं च—स्याच्चेद्बीजं परिणतं नान्यो बीजात्स सोऽकुरः तच्च नैवं यदि ह्यन्यो न तस्मात्तेन सोऽकुरः १ तन्न । किं कारणं ? उक्तत्वात् । उक्तमेतत् पक्षांतरत्वात् दोषाभाव इति । स्याद्बीजादंकुरोन्यः स्यादनन्यः । यस्मात् प्रागंकुरोत्पादात् बीजेऽकुरपर्यायो नासीत् पश्चाच्च जातः तस्मात् बीजादंकुरः पर्यायार्थादेशात् स्यादन्यः । यस्माच्च शालिबीजजातिविशिष्टोऽन्योंऽकुरोऽसंस्तस्माच्छालिबीजजात्यात्मकद्रव्यार्थादेशात् बीजादंकुरः स्यादनन्यः ।

स न च व्यवस्थिताव्यवस्थितदोषादिति चेन्नानेकांतात् ॥ १४ ॥ स्यान्मतं बीजेऽकुरत्वेन परिणतेऽकुरे बीजं व्यवस्थितं वा स्यादव्यवस्थितं वा ? यदि व्यवस्थितं ? बीजस्य व्यवस्थानात् विरोधात् अंकुराभावः । अथाव्यवस्थितं न तर्हि बीजमंकुरत्वेन परिणतं तस्मादुभयत्र दोषान्नास्ति परिणाम इति ? तन्न । किं कारणं ? अनेकांतात् । यथा मनुष्यायुर्नामकर्मोदयादंगोपांगपर्यायानास्कंदन् निष्टप्तायःपिंडवत् अंगुल्युपांगपरिणामात् अंगुलिरात्मा अतो वीर्यांतरायक्षयोपशमापेक्षोंगुल्यात्मा संकोचनप्रसारणपर्यायावास्कदन् अनादिपारणामिकचैतन्यद्रव्यार्थादेशात् स्यात् सन्, पौद्गलिकपरिवृत्तावस्थितांगुल्युपांगपर्यायार्थादेशात् न स्यात् सन्, अत एव स्यादनन्यः स्यादवस्थितः । संकोचनप्रसारणपर्यायार्थादेशात्स्यादसन् अत एव स्यादन्यः स्यादनवस्थितः । तथैकेंद्रियवननामायुरुदयाविष्कृतः आत्मैव बीजपर्यायमास्कंदन् निष्टप्तायःपिंडवत् बीजपरिणामात् बीजव्यपदेशभाक् । अतः किं ? अनादिपारिणामिकचैतन्यद्रव्यार्थादेशात् स्यात् सत्, ततः पौद्गलिकशालिजात्येकेंद्रियरूपरसस्पर्शशब्दपर्यायार्थादेशाच्च स्यात् सत्, तत एव स्यादनन्यः स्यादनवस्थितः । पौद्गलिकशालिबीजपर्यायार्थादेशात्, स्यादसन् अत एव स्यादन्यः स्यादनवस्थितः । इत्येवमनेकांताश्रयणादेकांतपक्षदोषानुषंगाभावः ।

वृद्ध्यभावप्रसंग इति चेन्नान्यहेतुत्वात् ॥ १५ ॥ स्यादेतत् नास्ति परिणामः । कुतः ? वृद्ध्यभावप्रसंगात् । यदि बीजमंकुरत्वेन परिणमेत बीजमात्रः स एवांकुरः स्यात् । पयःपरिणामदधिवत् । ततो वृद्ध्यभावः । उक्तं च—

> किंचान्यद्यदि तद्बीजं गच्छेदंकुरतामिह ।
> विवृद्धिरंकुरस्य स्यात् कथं बीजादपुष्कलात् ॥ १ ॥

भौमोदकरससंबंधाद्वृद्धिरितिचेन्न परिणामाभावप्रसंगात् । उक्तं च—

अथेष्टं तै रसैर्भौमैरौदकैश्च विवर्धते ।
नन्वेवं सति बीजस्य परिणामो न युज्यते ।। १ ।।

भौमोदकरसद्रव्यांतरसंचयात् वृद्धिरिति चेन्न द्रव्यांतरसंयोगेपि वृद्ध्यभावात् । यदि भौमोदकरसद्रव्यांतराणि संयोगवृद्ध्या वर्तंते ननु वृद्ध्यभावः जतुसंयोगे काष्ठवृद्ध्यभाववत् । उक्तं च —

आलिप्तं जतुना काष्ठं यथा स्थूलत्वमृच्छति ।
तनु काष्ठं तथैवास्ते जतु चात्र विवर्धते ।। १ ।।
तथैवं यदि तद्बीजमास्ते येनात्मना स्थितं ।
रसाश्च वृद्धिं कुर्वंति बीजं तत्र करोति किं ।। २ ।।

इति ? तन्न । किं कारणं ? अन्यहेतुत्वात् । बीजमात्रः अंकुरोभवेत् इति ब्रुवता त्वयैवाभ्युगतः परिणामः । यस्तु भवता दोष उपन्यस्तः वृद्ध्यभावप्रसंग इति नासौ युक्तः । कुतः ? अन्यहेतुत्वात् । यथा मनुष्यायुर्नामोदयाभ्यां जातो बालः बाह्यसावित्र्यकिरणादिसंबंधापेक्षस्तन्यनवनीताद्याहारमनुभवन् अभ्यंतरवीर्यांतरायक्षयोपशमाविर्भाविताहारजरणसामर्थ्यकायाग्निवलापेक्षः उपयुक्ताहाररसादिपरिणामान्निर्माणनामकर्मोदयापेक्षो वर्धते । तथा वनस्पतिविशेषायुर्नामोदयापेक्षो बीजाधिष्ठानो बीजोऽकुरो जातः भौमोदकरसाहारं तप्तायःपिंडवत् आत्मसात्कुर्वन् बाह्यसावित्रकिरणसंतापाभ्यंतरवीर्यांतरायक्षयोपशमाविर्भावितांकुरकायाग्निबलात् भौमोदकरसान् जरयन् स्वानुरूपनिर्माणकर्मोदयापेक्षो वर्धते । अयं तु वृद्ध्यभावदोषः एकांतवादिनामेव भवति । नित्यत्वैकांते तावद्विपरिणामाभावात् वृद्ध्यभावः । क्षणिकैकांतवादेपि प्रतीत्य समुत्पादाभ्युपगमात् तावतोधिगमे तावत एवोपगमात् वृद्ध्यभावः । किं च सर्वेषां क्षणिकत्वात् अंकुरस्य तत्कारणाभिमतानां च भौमोदकरसादीनां युगपद्वाविनाशः स्यात् पौर्वापर्येण वा ? यदि युगपत् ? नास्ति तत्कृता वृद्धिः, न हि वृद्धिहेतवो विनश्यंतोऽन्यस्य विनश्यतोर्थस्य वृद्धिं कुर्वंतो दृष्टाः । अथ पौर्वापर्येण ? विनष्टस्यांकुरस्य भौमादयः किं कुर्वंति विनष्टा वा किं कुर्युः । अनेकांतवादिनां तु अंकुरो भौमादयश्च द्रव्यार्थादेशात् स्यान्नित्याः पर्यायादेशाच्च स्यात्क्षणिका इति वृद्ध्युपपत्तिः ।

क्षणिकत्वे प्रबंधभेदाभ्युपगमात् वृद्धिरिति चेन्न तदभावात् ।। १६ ।। स्यान्मतं भावानां क्षणिकत्वेपि वृद्धिर्युज्यते कुतः प्रबंधभेदाभ्युपगमात् । त्रिविधो हि प्रबंधः सभागरूपः क्रमापेक्षः अनियतश्चेति तत्र प्रदीपात् प्रदीपकश्च प्रबुध्यते स्रोतसः स्रोत एवेति सादृश्यात् सभागरूपः प्रबंधः । स संततिपरिणामक्रमोपलंभात् बालकुमारबीजांकुराद्यविच्छेदः क्रमापेक्षः । कृतत्वासानेकवर्णप्रबंधानियमो मेघेंद्रधनुरादिष्वनियतः ततोऽस्ति वृद्धिरिति ? तन्न । किं कारणं ? तदभावात् । इदमिह संप्रधार्यं सतोर्वा प्रबंधः स्यात् सदसतोरसतोर्वा ? न तावदसतोः प्रबंधः वंध्यासुताकाशकुसुमयोः । नापि सदसतोः खरखरविषाणयोः । परिशेषात् सतोरेव । क्षणिकवादे तु पूर्वोत्तरस्कंधयोर्नैकस्मिन् क्षणेस्तित्वमिति प्रबंधाभावः । अस्तित्वे च क्षणिकप्रतिज्ञाहानिः । आह क्षणिकत्वेपि तुलांतनामोन्नामवत् युगपदुत्पादविनाशभावात् अर्थप्रबंध इत्यस्ति वृद्धिरिति, उच्यते । यदि युगपदुत्पादविनाशयोः वृत्तिः ? कार्यकारणभावाभावः सव्येतरगोविषाणवत् ।

ध्रौव्यैकांते परिणामाभावोऽनेकदोषप्रसंगात् ।। १७ ।। ध्रौव्यैकांते य उक्तः परिणाम "व्यवस्थितस्य द्रव्यस्य धर्मांतरानिवृत्तौ धर्मांतरोपजनने च परिणामः, अवस्थितस्य हि ध्रौव्यादिलक्षणस्य द्रव्यस्य क्षीरधर्ममात्रनिवृत्तौ दधिधर्ममात्रोत्पत्तौ परिणाम इति" स नोपपद्यते । कुतः ? अनेकदोषप्रसंगात् । न हि तस्य द्रव्यमवस्थितमस्ति यस्य परिणामो भवेत् । अथास्ति समुदायव्यतिरिक्तं द्रव्यं ननु गुणसमुदायमात्रद्रव्यप्रतिज्ञाहानिः । किं च ।

उभयदोषप्रसंगात् ।। १८ ।। इहमिह मीमांस्यं—यन्निवर्तते यच्चोत्पद्यते यच्च व्यवतिष्ठते तदे-

१ पूर्वाभावसात्मभावापत्तिरिति पाठांतरं । २ भावापत्तिरित्यपि पाठः ।

तन्नितयं गुणसमुदायमात्रं वा स्यात् ततोऽन्यद्वेति ? यदि गुणसमुदायमात्रं ननु स एवासौ प्राक् पश्चाच्च गुणसमुदयः कोत्र कस्य वा परिणामः ? अन्येन नाम निवृत्तेन अन्येनावस्थितेनाऽन्येन वोत्पन्नेन भवितव्यमिति न्याय्यं। अथान्यदिति गृह्यते एवमपि गुणसमुदायमात्रप्रतिज्ञाहानिः किं च—ध्रौव्यैकांतविरोधः एकश्चेद्धर्मो निवर्तते एकश्चेदुत्पद्यतेऽनित्यताप्राप्तेरिति। किंच—समुदायः गुणेभ्यो वा अन्यो वा स्यादनन्यो वा ? यद्यनन्यः ? गुणा एवेति समुदायकल्पनाव्याघातः, तदभावाच्च तदविनाभाविनां गुणानामप्यभावः। अथान्यः समुदायः ? पुनरत्र प्रतिज्ञाविरोधः परस्पराविनाभाविनोः स्वरूपशून्यत्वं च स्यात्। कुतः परिणामकल्पना ? । यच्चोक्तं पूर्वभावस्यान्यभावाप्तिः परिणाम इति तदयुक्तं। कस्मात् ? उभयदोषप्रसंगात् शब्दादीनां सुखादिसमन्वयभावानुपपत्तिः शब्दादिभावानिवृत्तिर्वेति, यदि पूर्वभावस्य अन्यभावापत्तिः परिणामः ? सुखदुःखमोहानां शब्दादिभावापत्तेः शब्दादिषु सुखादिसमन्वयभावानुपपत्तिः। किं कारणं ? पूर्वभावस्यान्यभावापत्तिः परिणामः इति प्रतिज्ञानात्। अथ पूर्वभावस्य नान्यभावापत्तिः सुखादिसमन्वयात् कथं तर्हि पूर्वभावस्यान्यभावापत्तिः परिणामः ? । तथैव सुखाद्यवस्थानात् शब्दादिभावानुपपत्तिः प्रसजति, सा चानिष्टा, तस्मात् न पूर्वभावस्यान्यभावापत्तिः परिणामः। किं च ।

अभावस्यापरिणामात् ॥ १९ ॥ यद्येनात्मना नास्ति न तस्य तद्भावापत्तिः विद्यते। यथा अभावस्य अभावात्मनाऽभावान्न तस्याभावापत्तिः। एवं गुणानां स्थूलत्वेन अभावात् तद्भावापत्तिरयुक्ता। अथास्ति तद्भावस्ततः परिणामानुपपत्तिः तद्भावात् येनात्मना यद्विद्यते तस्य न पुनस्तद्भावापत्तिः, नह्यभाव अभावात्मकत्वात्पुनरभावो भवति। एवमेकांते कारणस्योभयथा परिणामानुपपत्तेः अनेकांत आश्रयणीयः। पर्यायार्थादेशात् स्यादन्यभावापत्तिः। द्रव्यादेशात् स्यान्नान्यभावापत्तिः परिणाम इति। तथा द्रव्यार्थादेशात् स्यादवस्थितस्य द्रव्यस्य परिणामः पर्यायार्थादेशात् स्यादनवस्थितस्येति। अथ का क्रियेत्यत्रोच्यते—

क्रिया परिस्पंदात्मिका द्विविधा ॥ २० ॥ द्रव्यस्य द्वितयनिमित्तवशात् उत्पद्यमाना परिस्पंदात्मिका क्रियेत्यवसीयते। सा द्विविधा पूर्ववत् प्रयोगविस्रसानिमित्ता। प्रायोगिकी शकटादीनां। विस्रसानिमित्ता मेघादीनां।

स्थित्यग्रहणमिति चेन्न परिणामावरोधात् ॥२१॥ स्यादेतत् यदि परिस्पंदात्मिका क्रिया इत्युच्यते स्थितेरग्रहणं प्राप्नोति गतिनिवृत्तिर्हि स्थितिरिति ? तन्न। किं कारणं ? परिणामावरोधात्। स्थितिर्हि परिणामेऽन्तर्भवति।

परिणामग्रहणमेकमेवास्तु इति चेन्न भावद्वैविध्यख्यापनार्थत्वात् ॥ २२ ॥ स्यान्मतं यथा स्थितिः परिणामेऽन्तर्भवति तथा क्रियापि तत्रैवावरुध्यते इति परिणामग्रहणमेवैकमस्तु इति ? तन्न। किं कारणं ? भावद्वैविध्यख्यापनार्थत्वात्। द्रव्यस्य हि भावो द्विविधः परिस्पंदात्मकः अपरिस्पंदात्मकश्च। तत्र परिस्पंदात्मकः क्रियेत्याख्यायते, इतरः परिणामः, इत्येतन् ख्यापनार्थं पृथग् ग्रहणं।

क्षेत्रप्रशंसाकालनिमित्तात् परत्वापरत्वानवधारणमिति चेन्न कालोपकारप्रकरणात् ॥२३॥ स्यान्मतं क्षेत्रप्रशंसाकालनिमित्ते परत्वापरत्वे। तत्र क्षेत्रनिमित्ते—परत्वापरत्वे तावदाकाशप्रदेशाल्पबहुत्वापेक्षे। एकस्यां दिशि बहूनाकाशप्रदेशानतीत्य स्थितः परः। ततः अल्पानतीत्य स्थितोऽपरः। प्रशंसाकृते अहिंसादिप्रशस्तगुणयोगात् परो धर्मः तद्विपरीतोऽधर्मोऽपरः इति। कालहेतुके शतवर्षः परः, षोडशवर्षोऽपर अतोऽर्थभेदात् परत्वापरत्वयोरनवधरणमिति ? तन्न। किं कारणं ? कालोपकारप्रकरणात्। कालकृतेऽत्र परत्वापरत्वे गृह्यते दूरासन्नदेशावस्थायिनोः कुमारस्थविरयोः तपस्विचांडालयोः सन्निकृष्टदेशे चांडाले पर इति व्यवहारो दृश्यते। विप्रकृष्टे च तपस्विनि अपर इति ते एते परत्वापरत्वे कालकृते इह गृह्यते।

वर्तनाद्युपकारलिंगः कालः ॥ २४ ॥ उक्ता वर्तनादयः उपकारा यस्याऽर्थस्य लिंगं स काल इत्यनुमीयते। तथा चोक्तं "येन मूर्तानामुपचयाश्चापचयाश्च लक्ष्यंते स काल इति"।

वर्तनाग्रहणमेवास्त्विति चेन्न कालद्वैविध्यप्रदर्शनार्थत्वात् प्रपंचस्य ॥२५॥ स्यान्मतं वर्तनाग्रहणमेवास्तु कालास्तित्वख्यापनं तद्विकल्पत्वात् परिणामादीनामिति ? तन्न। किं कारणं ? कालद्वैविध्यप्रदर्शनार्थत्वात् प्रपंचस्य। द्विविधः कालः परमार्थकालःव्यवहाररूपश्चेति। तत्र परमार्थकालः वर्तनालिंगः गत्यादीनां धर्मादिवत् वर्तनायाः उपकारकः। स किंस्वरूप इति चेत् उच्यते—यावंतो लोकाकाशे प्रदेशास्तावंतः कालाणवः परस्परं प्रत्यबंधाः एकैकस्मिन्नाकाशप्रदेशे एकैकवृत्त्या लोकव्यापिनः मुख्योपचारकप्रदेशकल्पनाभावान्निरवयवाः। मुख्यप्रदेशकल्पना हि धर्माधर्मजीवाकाशेषु पुद्गलेषु च व्यणुकादिषु स्कंधेषु। परमाणुषूपचारप्रदेशकल्पना, प्रचयशक्तियोगात्। उभयथा च कालाणूना प्रदेशकल्पनाभावात्, धर्मास्तिकायादिवत् कायत्वाभावः। अत एव विनाशहेतुत्वाभावात् नित्याः। परप्रत्ययोत्पादविनाशसद्भावादानित्याः। सूचीसूत्रमार्गाकाशच्छिद्रवत् परिच्छिन्नमूर्तत्वेपि रूपादियोगाभावात् अमूर्ताः। निष्क्रियाश्च प्रदेशांतरसंक्रमाभावात्। व्यवहारकालः परिणामादिलक्ष्यः, कालवर्तनया लब्धकालव्यपदेशः, कुतश्चित् परिच्छिन्नः, अपरिच्छिन्नस्य परिच्छेदहेतुः।

कालत्रैविध्यसिद्धिः परस्परापेक्षत्वात् ॥ २६ ॥ भूतो वर्तमानो भविष्यन्निति त्रिविधः कालः सिद्धः। कुतः ? परस्परापेक्षत्वात्। यथा वृक्षपंक्तिमनुसरंतो देवदत्तस्य एकैकतरुं प्रति प्राप्तः प्राप्नुवत् प्राप्स्यन् व्यपदेशस्तथा तान्कालाणूननुसरतां द्रव्याणां क्रमेण वर्तनापर्यायमनुभवतां भूतवर्तमानभविष्यद्व्यवहारसद्भावः। तत्र परमार्थकाले भूतादिव्यवहारो गौणः। व्यवहारकाले मुख्यः। परस्परापेक्षश्चासौ यद्द्रव्याक्रियापरिणतं कालपरमाणुं प्राप्नोति तद्द्रव्यं तेन कालेन वर्तमानसमयस्थितिसंबंधवर्तनया वर्तमानकालः, कालाणुरपि वर्तयंस्तद्द्रव्यमनतिक्रांतसंबंधं वर्तनाख्यो भवति. तदेव कालवशात् अनुभूतवर्तनासंबंधं भूतं, कालाणुरपि भूतः, तदेव वर्त्स्यत् स्थितिसंबंधवर्तनापेक्षं भविष्यदिति व्यपदिश्यते, कालाणुश्च भविष्यन्निति। एवं सवितुरनुसमयगतिप्रचयापेक्षया आवलिकोच्छ्वासप्राणस्तोकलवनालिकामुहूर्ताऽहोरात्रपक्षमासर्त्वयनादिस वितृगतिपरिवर्तनकालवर्तनया व्यवहारकालो मनुष्यक्षेत्रे संभवति इत्युच्यते तत्र ज्योतिषां गतिपरिणामात्। न बहिः निवृत्तगतिव्यापारत्वात् ज्योतिषां। मनुष्यक्षेत्रसमुत्थेन ज्योतिर्गतिसमयावलिकादिना परिच्छिन्नेन क्रियाकलापेन कालवर्तनया कालाख्येन ऊर्ध्वमधस्तिर्यक् प्राणिनां संख्येयासंख्येयानंतानंतकालगणनाप्रभेदेन कर्मभवकायस्थितिपरिच्छेदः सर्वत्र जघन्यमध्यमोत्कृष्टावस्थः क्रियते।

क्रियामात्रमेव कालस्तव्द्यतिरेकेणानुपलब्धिरिति चेन्न तदभावे कालाभिधानलोपप्रसंगात् ॥ २७ ॥ स्यान्मतं क्रियामात्रमेव कालः कुतस्तव्द्यतिरेकेणानुपलब्धेः। सर्वोयं कालव्यवहारः क्रियाकृतः क्रिया हि क्रियांतरं परिच्छिन्ना अन्यक्रियापरिच्छेदे वर्तमाना कालाख्या भवति। योपि समयो नाम विद्भिरुच्यते स परमाणुपरिवर्तनक्रियासमय एव कालसामान्यसामानाधिकरण्यात्, न समयपरिमाणपरिच्छेदकोन्यः। ततः सूक्ष्मतरः कश्चिदस्ति कालः, तत्समयक्रियाकलाप आवलिका, तत्प्रचय उच्छ्वास इत्यादि समयक्रियाकलापपरिच्छिन्ना आवलिका उच्छ्वासपरिच्छेदे वर्तमाना कालाख्या। एवमुत्तरत्रापि योज्यं। लोकेपि तथैव गोदोहेधनपाकादिरन्योन्यपरिच्छेदे वर्तमानः कालाख्यः इति क्रियैव काल इति ? तन्न। किं कारणं तदभावे कालाभिधानलोपप्रसंगात्।? क्रियाकृत एवायं व्यवहारः सर्वं उच्छ्वास मात्रेण कृतं मुहूर्तेन कृतमिति। किं तु समय उच्छ्वासो निश्वासो मुहूर्तः इति स्वसंज्ञाभिर्निरूढानां काल इत्यभिधानमकस्मान्न भवति। यथा देवदत्तसंज्ञया निरूढे पिंडे दंड्यभिधानमकस्मान्न भवतीति दंडसंबंधसिद्धिः। तथा कालसिद्धिरपि। इतरथा कालव्यवहाराभावप्रसंगः स्यात्।

वर्तमानाभावप्रसंगाच्च ॥ २८ ॥ यस्य क्रियामात्रमेव कालो नान्यः कश्चिदस्ति वर्तनालक्षणः तस्य वर्तमानकालाभावः प्रसक्तः। कथं? उच्यते-पट इति यः प्रक्षिप्तस्तंतुः सोतिक्रांतः यः प्रक्षेप्स्यते सोऽनागतः न च तयोरंतरे काचिदन्यानतिक्रांतयानागतिवंत्यः क्रियास्ते वर्तमानत्वेन परिगृह्यंते। वर्तमानापेक्षे च पुनरतीतानागताविष्यंते तदभावे तयोरप्यभावः स्यात्। यदुक्तं आरंभादिरपवर्गांतः क्रियाकलापो वर्तमान

इति आरंभाय प्रभृता यस्मिन् काले भवति कर्तारः कार्यस्यानिष्ठातः तन्मध्यमकालमिच्छंतीति तदप्ययुक्तं । कुतः ? अभ्युपगमविरोधात् । पूर्वं क्रियाकाल इत्युक्तं पश्चात् क्रियासमूह इति । क्षणिकानां क्रियावयवानां समूहाभावाच्च । यस्य पुनरन्योन्यलक्षणः कालः तस्य प्रथमसमयक्रियावर्तनया आरंभमुपादाय द्वितीयादिसमयक्रियाविशेषाणां द्रव्यार्थतयावस्थानमनुभवतां समुदायमुपचर्य तत्समूहसाध्यघटादेरापरिसमाप्तेर्वर्तते घटादिक्रियेति वर्तमानकालसिद्धिः कल्प्यते । यदि व्यतिरेकेणानुलब्धेः कालो नास्तीत्युच्यते ? ननु क्रियायाः क्रियासमूहस्य वाभावः । कारकाणां हि प्रवृत्तिविशेषः क्रिया न तेभ्यः प्रवृत्तिर्व्यतिरिक्ता उपलभ्यते । यथा सर्पात्मलाभ एव कौटिल्यं न तु तत्तस्माद्व्यतिरिक्तमुपलभ्यते एवं क्रियाणीति । तथा क्रियावयवेभ्यो व्यतिरिक्तो न तत्समूह उपलभ्यते तदात्मकत्वात् अतस्तयोरभावप्रसंगः स्यात् । किं च क्रिया क्रियांतरस्य परिच्छेदिका कालव्यपदेशभागित्यनुपपन्नमनवस्थानात् । स्थितो हि लोके प्रस्थादिः परिमाणविशेषः व्रीह्यादेरवस्थितस्य परिच्छेदको दृष्टः । नच तथा क्रियावस्थिता, स्थितिलक्षणमात्रावलंबनाभ्युपगमात् । न हि स्वयमनवस्थितः कश्चिदनवस्थितस्य परिच्छेदको दृष्टः । प्रदीपपरिस्पंदवत् इतिचेत् यथा प्रदीपोऽनवस्थितः परिस्पंदस्यानवस्थितस्यैव परिच्छेदे वर्तते तथा क्रियापीति एतच्चायुक्तं असिद्धत्वात् प्रदीपपरिस्पंदश्च क्षणिक इति नास्माभिरभ्युपगम्यते स्वकार्यस्य प्रकाशवादेरनेकक्षणसाध्यत्वात् । समूहस्य परिच्छेदकभावादिति चेन्न क्षणिकानां समूहाभावात् । शब्दवदिति चेन्न । यथा क्षणिकानां वर्णध्वनीनां समुदायः पदवाक्यरूपः तथा क्रियावयवानामित्येतदप्यसांप्रतं असिद्धत्वादेव । न हि वर्णध्वनयः क्षणिकाः, देशांतरस्थश्रोतृविषयभावापत्तिदर्शनात् । शब्दांतरारंभात् तत्प्रतिसिद्धिरिति चेन्न क्षणिकस्यारंभशक्तिविरहात् । यस्मिन् क्षणे स्वयमात्मलाभमापद्यते न तदान्यमुत्पादयति असत्त्वात् । उत्तरक्षणं च नारभते उत्पत्त्यनंतरापवर्तित्वात् । आसन्नसदवस्थाको हि क्षण उत्पत्तिकाल इति व्यपदिश्यते । उत्तरकालमस्य सत्त्वं ? इत्युत्पत्तिव्यवहार एव न स्यात् । पूर्वविज्ञानाहितसंस्कारबीजाधारभूतायां बुद्धौ समुदायकल्पनेति चेन्न तस्या अपि तादात्म्यात् । यस्य तु द्रव्यार्थादेशात् स्यान्नित्या बुद्धिरपि तस्य वस्तुनि बुद्धौ च क्रियावयवसमूहस्य शक्तिव्यक्तिस्वरूपेण व्यवस्थितस्य कालवर्तनया प्रतिलब्धकालव्यपदेशस्य परिच्छिन्नस्यान्यपरिच्छेदे वृत्तिरुपपद्यते इति व्यवहारकालसिद्धिः । तत्प्रसिद्धौ च मुख्यकालसिद्धिः इत्युक्तं । अथ किमर्थं परत्वापरत्वयोः पृथग्ग्रहणं वर्तनापरिणामक्रियापरत्वापरत्वानीत्येवं वक्तव्यं ?

परत्वापरत्वयोः पृथग्ग्रहणं परस्परापेक्षत्वात् ॥ २९ ॥ परत्वापरत्वे पृथग्गृह्येते । कुतः ? परस्परापेक्षत्वात् । परत्वं व्यपेक्ष्यापरत्वं भवति । अपरत्वं व्यपेक्ष्य परत्वमिति । अथ किमर्थं वर्तनाग्रहणमादौ क्रियते ?

वर्तनाग्रहणमादौ अभ्यर्हितत्वात् ॥ ३० ॥ वर्तनाग्रहणमादौ क्रियते कुतः ? अभ्यर्हितत्वात् । कथमभ्यर्हितत्वं ? वर्तनापूर्वकत्वात् परमार्थकालप्रतिपत्तेः । तन्निमित्तत्वात् व्यवहारकाललिंगस्याप्राधान्यं । अत्राह उक्तं भवता शरीरादीनि पुद्गलानामुपकार इति तंत्रांतरीयाजीवं ? परिभाषंते तत्कथमित्यत्रोच्यते—

स्पर्शरसगंधवर्णवंतः पुद्गलाः ॥ २३ ॥

स्पर्शग्रहणमादौ विषयबलदर्शनात् ॥ १ ॥ स्पर्शग्रहणमादौ क्रियते । कुतः ? विषयबलदर्शनात् । सर्वेषु हि विषयेषु स्पर्शस्य बलं दृश्यते । स्पष्टग्राहिष्विंद्रियेषु स्पर्शस्यादौ ग्रहणव्यक्तिः, सर्वसंसारिजीवग्रहणयोग्यत्वाच्च ।

रसप्रसंग इति चेन्न स्पर्शे सति तद्भावात् ॥ २ ॥ स्यान्मतं यदि विषयबलात् आदौ स्पर्शोऽधीतः ननु विषयबलत्वात् आदौ रस एवाध्येयः । स्पर्शसुखनिरुत्सुकेष्वपि रसव्यापारदर्शनात् इति ? तन्न । किं कारणं ! स्पर्शे सति तद्भावात् तत्रापि सति स्पर्शे रसव्यापार इति स्पर्शग्रहणमेवादौ ज्यायः । तत एवानंतरं रसवचनं स्पर्शग्रहणानंतरभावित्वात् रसग्रहणस्य । तदनंतरं तद्ग्रहणं क्रियते ।

वायौ तदभावात् व्यभिचार इति चेन्न तत्राप्यभ्युपगमात् ॥ ३ ॥ स्यादेतत् वायुः स्पर्शवान् इति तदनंतरं रसग्रहणाभावात् व्यभिचार इति ? तन्न किं कारणं तत्राभ्युपगमात्। रूपादयो हि स्पर्शाविनाभाविनः घटादिष्विव वायावप्यभ्युपगम्यंते। स्पर्शवत्त्वं सतां रूपादीनामपि,ग्रहणं कस्मान्न ? इति चेत् स्थूलविषयग्राहित्वाच्चक्षुरादीनां घ्राणेंद्रियविषयवत्। वायौ सतामपि रूपादीनामग्रहण।

रूपात् प्राग् गंधवचनं अचाक्षुषत्वात् ॥ ४ ॥ रूपात् प्राक् गंधवचनं क्रियते। किं कारणं ? अचाक्षुषत्वात् ॥

अंते वर्णग्रहणं स्थौल्ये सति तदुपलब्धेः ॥ ५ ॥ सर्वेषां अंते वर्णग्रहणं क्रियते। कुतः ? स्थौल्ये सति तदुपलब्धेः ॥

नित्ययोगे मतुविधानं ॥ ६ ॥ स्पर्शश्च रसश्च गंधश्च वर्णश्च स्पर्शरसगंधवर्णास्ते येषां संति ते स्पर्शरसगंधवर्णवंतः इति नित्ययोगे मतुविधानं द्रष्टव्यं। यथा क्षीरिणो न्यग्रोधा इति क्षीरेण नित्ययोगात् मत्वर्थीयविधानं। तथा अनादिपारिणामिकस्पर्शादिगुणसामान्यनित्ययोगे मतुरिति स्पर्शादीनामनंतपर्यायत्वेपि मौलभेदप्रसिद्धयर्थमितः क्रियते।

मृदुकठिनगुरुलघुशीतोष्णस्निग्धरूक्षस्पर्शभेदाः ॥ ७ ॥ एते मृद्वादयोऽष्टौ स्पर्शस्य मूलभेदा द्रष्टव्याः।

तिक्तकटुकाम्लमधुरकषाया रसप्रकाराः ॥ ८ ॥ तिक्तादयः पंच रसप्रकाराः वेदितव्याः।

गंधः सुरभिरसुरभिश्चः ॥ ९ ॥ गंधो द्विविधः सुरभिरसुरभिश्चेति।

वर्णाः पंचधा नीलपीतशुक्लकृष्णलोहितभेदात् ॥ १० ॥ नीलादिभिः पंचभिः प्रकारैः वर्णा भिद्यंते एषां च स्पर्शनादीनामेकैकस्य एकद्वित्रिचतुःसंख्येयासंख्येयानंतगुणपरिणामोवसेयः। सकलरूपादिद्रव्यधर्मनिर्देशात् अवशिष्टविशेषप्रतिपत्त्यर्थमाह—

शब्दबंधसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवंतश्च ॥२४॥

शब्दादीनामभिहितनिर्वचनानां परिप्राप्तद्वंद्वानां मतुना अभिसंबंधः ॥ १ ॥ शब्दादीनां निर्वचनेन प्रतिलब्धार्थानां परस्परापेक्षायां सत्यां द्वंद्वं कृत्वा मतुना संबंधो योजयितव्यः। तद्यथा—शपत्यर्थमाह्वयति प्रत्याययति शप्यते येन शपनमात्रं वा शब्दः। बध्नाति बध्यतेऽसौ बध्यतेऽनेन बंधनमात्रं वा बंधः। लिंगेन आत्मानं सूचयति सूच्यतेऽसौ सूच्यतेऽनेन सूचनमात्रं वा सूक्ष्मः, सूक्ष्मस्य भावः कर्म वा सौक्ष्म्यं। स्थूलयते परिबृंहयति स्थूल्यतेऽसौ स्थूल्यतेऽनेन स्थूलनमात्रं वा स्थूलः। स्थूलस्य भावः कर्म वा स्थौल्यं। संतिष्ठते संस्थीयतेऽनेनेति संस्थितिर्वा संस्थानं। भिनत्ति भिद्यते भेदमात्रं वा भेदः। पूर्वोपात्ताशुभकर्मोदयात् ताम्यति आत्मा तम्यतेऽनेन तमनमात्रं वा तमः। पृथिव्यादिघनपरिणाम्युपश्लेषात् देहादिप्रकाशावरणतुल्याकारेण छिद्यते छिनत्त्यात्मानमिति वा छाया। असद्वेद्योदयात् आतपत्यात्मानं आतप्यतेऽनेन आतपनमात्रं वा आतपः। निरावरणमुद्योतयति उद्योत्यतेऽनेन उद्योतनमात्रं वा उद्योतः। शब्दश्च बंधश्च सौक्ष्म्यं च स्थौल्यं च संस्थानं च भेदश्च तमश्च छाया च आतपश्च उद्योतश्च शब्दबंधसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योताः ते येषां संति ते शब्दबंधसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवंतश्च।

शब्दो द्वेधा भाषालक्षणविपरीतत्वात् ॥ २ ॥ शब्दो द्वेधा अवतिष्ठते। कुतः ? भाषालक्षणविपरीतत्वात् भाषालक्षणो विपरीतश्चेति।

भाषात्मक उभयथा अक्षरीकृतेतरविकल्पात् ॥ ३ ॥ तत्र भाषात्मकः शब्दः उभयथा

कल्प्यते कुतः अक्षरीकृतेतरविकल्पात् । अक्षरीकृतः शास्त्राभिव्यंजकः संस्कृतविपरीतभेदात् आर्यम्लेच्छव्यवहारहेतुः । अवर्णात्मको द्वींद्रियादीनामतिशयज्ञानस्वरूपप्रतिपादनहेतुश्च । स एव सर्वः प्रायोगिकः ।

अभाषात्मको द्वेधा प्रयोगविस्रसानिमित्तत्वात् ॥ ४ ॥ अभाषात्मकः शब्दो द्वेधा विभज्यते । कुतः ? प्रयोगविस्रसानिमित्तत्वात् ।

तत्र वैस्रसिको बलाहकादिप्रभवः ॥ ५ ॥

प्रयोगश्चतुर्धा ततविततघनसौषिरभेदात् ॥ ६ ॥ प्रयोगजः शब्दः चतुर्धा भिद्यते । कुतः ? ततविततघनसौषिरभेदात् । तत्र चर्मततनात्ततः पुष्करभेरीदर्दुरादिप्रभवः । विततः तंत्रीकृतो वीणासुघोषादिसमुद्भवः । घनस्तालघंटालालनाद्यभिघातजः । सौषिरो वंशशखादिनिमित्तः । स शब्दः आकाशगुण. इति केषांचित् दर्शनं तदयुक्तं इत्युक्तं पुरस्तात् । अपरे मन्यंते ध्वनयः क्षणिकाः क्रमजन्मानः स्वरूपप्रतिपादनादेवोपलक्षणशक्तिकाः नार्थांतरमवबोधयितुमलं । यदि समर्थाः स्युः पदेभ्य इव पदार्थेषु प्रतिवर्णं वर्णार्थेषु प्रत्ययः स्यात् । एकेन चार्थे कृते वर्णांतरोपादानमनर्थकं स्यात् । नापि क्रमजन्मनां सहभावः संघातोस्ति योऽर्थेन युज्यते । अतस्तेभ्योऽर्थप्रतिपादने समर्थः शब्दात्मा अमूर्तो नित्योऽतींद्रियो निरवयवो निःक्रियो ध्वनिभिः अभिव्यंग्य इति अभ्युपगंतव्यः ? इत्येतच्चानुपपन्नं । कुतः ? व्यंग्यव्यंजकभावानुपपत्तेः । व्यग्यस्तावत् शब्दात्मा स्वेन स्वरूपेणावस्थितो वा व्यज्येत अनवस्थितो वा । यदि स्वरूपेणावस्थितो व्यज्येत तत्रापि द्वैतं भवति । ध्वनिसान्निधेः प्राक् पश्चाच्चानुपलब्धेः । सौक्ष्म्यं वा हेतुः स्यात् प्रतिबंधकं वा किंचित् । यदि सौक्ष्म्यान्नोपलभ्येत सर्वकालमस्याग्रहणमेव स्यात् आकाशादिवत् । अथ ध्वनिसान्निधाने स्थौल्यमस्य स्यात् । विकारप्राप्तेः नित्यत्वं हीयते । न हि किंचित् प्रतिबंधकमस्ति घटोपलब्धौ तमोवत् । प्रभाभावस्तमो न वस्त्वंतरमिति चेन्न अतिशयवत्त्वात् । (सपक्षत्वाच्च) सम्पन्नवत्त्वाच्च नीलादिवर्णवत् । स्वरूपेणानवस्थितश्चेत् नासौ व्यंग्यः कार्यं स्यात् ध्वनिसान्निधाने स्वरूपप्राप्तेस्तत एवैषां ध्वनीनां व्यंजकत्वमयुक्तं । किंच— आद्यो वर्णध्वनिः शब्दात्मा सकलस्य वा व्यंजकः स्यात् एकदेशस्य वा ? यदि सकलस्य इतरेषां ध्वनीनां आनर्थक्यं स्यात् । अथैकदेशस्य निरवयवत्वमस्य हीयते । किं च स ध्वनिर्व्यंजकः स्फोटस्य वा उपकारं कुर्यात् श्रोत्रस्य उभयस्य वा ? न तावत् पृथिवीगंधस्य जलसेचकवत् स्फोटस्य उपग्रहे वर्तते, तस्य नित्यत्वात् विकारप्राप्त्यनभ्युपगमात् । नचामूर्तस्याभिव्यंग्यस्य विक्रियोपपद्यते । नापि चक्षुर्गोंजनवत् श्रोत्रस्योपकारे वर्तते बधिरस्य गुणांतरोत्पादनशक्त्यभावात् । युज्यते नेत्रस्यांजनमुपकारकमिति तिमिरादिदोषहननदर्शनात् न तथोपहतश्रवणस्य ध्वनिकृतमुपकारकं किंचिदप्युपलभामहे । अथ कर्णेंद्रियस्य उपग्रहे वर्तते न तत्रार्थाविबोधनात् उपग्रहोऽन्योस्ति तदभ्युपगमेनैव कृतत्वात् स्फोटककल्पना अनर्थिका । नाप्युभयस्योपग्रहोपि युक्तः प्रत्येकमयुक्तत्वादेव । किं च ते ध्वनयः न स्फोटाभिव्यक्तिहेतवो भवंति उत्पत्तिक्षणादूर्ध्वमनवस्थानात् उत्पत्तिक्षणे वासत्वात् । अथ क्षणिका अपि संतः अभिव्यक्तिहेतवः कश्चेदानीं भवतो मत्सरः ? अर्थप्रत्यायने तदभ्युपगमे च स्फोटकल्पना व्यर्था ।

प्रदीपवदिति चेन्न तस्यासिद्धत्वात् ॥ ७ ॥ नोत्पत्त्यनंतरापवर्गी प्रदीप आत्मलाभे देशांतरसंबंधनिमित्तक्रियापरिणामाविप्रकृष्टदेशस्थघटादिप्रकाशनदर्शनात् ।

कर्मवदिति चेत् असिद्धत्वादेव ॥ ८ ॥ कर्मव्यक्तयः क्षणिकाः संत्यः कर्मत्वं जातिमभिव्यंजयंतीत्यसिद्धमस्मान् प्रति द्रव्यगुणकर्मविषयसामान्यविशेषस्यार्थांतरभूतस्यानभ्युपगमात् । कर्मणोपि द्रव्यात् अपृथग्भूतस्य द्रव्यार्थावस्थानाभ्युपगमात् । किं च अभिव्यंजकाभिव्यंग्यवैधर्म्यात् यथा मूर्तः क्रियावान् प्रदीपोभिव्यंजकः तद्व्यंग्याश्च घटादयः क्रियावंतो मूर्तिमंतो दृष्टः । नच तथा ध्वनेर्मूर्तिः क्रियावांश्च तद्व्यंग्यः स्फोटोपि न तद्धर्मः ततोऽभिव्यक्त्यभावः । किं च स्फोटः ध्वनेरन्यो वा स्यात् अनन्यो वा ? यद्यनन्यः तादात्म्यं प्राप्नोति व्यंग्यत्वाभावश्च भेदाभावात् । अथान्यः तस्य श्रोत्रोपलभ्यत्वाभावः । किं च व्यंग्यत्वे सति अनित्यत्वं स्यात् स्फोटस्य घटादिवत् विज्ञानेन व्यंग्यत्वात् । आकाशादेर्व्यभिचार इति चेन्न मूर्तिमता व्यंग्य-

त्वादिति विशेष्यवचनात्। किं च यस्य व्यंग्यत्वं तस्य कार्यत्वमपि दृष्टं यथा घटादेः न तथा स्फोटस्य कार्यत्वमस्ति। नित्यत्वाभ्युपगमादिति व्यंग्यत्वाभावः।

महदादिवदिति चेन्न साध्यसमत्वात् ॥ ९ ॥ यथा महदादि व्यंग्यमेव न कार्यं तथा स्फोटोपीति तन्न साध्यसमत्वात्। यथेदं स्फोटमव्यंग्यत्वं साध्यं तथा महदादेरपीति। किंच दृष्टांताभावात्। नचामूर्तः कश्चिन्नित्यो निरवयवो मूर्तिमताऽनित्यत्वेन सावयवेन व्यंग्यो दृष्टः तदभावात् साध्यसिद्ध्यभावः तस्मात् ध्वनिरूप एव शब्दो द्विशक्तिरभ्युपगंतव्यः। स च पुद्गलद्रव्यार्थादेशात्ततोऽनन्यत्वात् स्यान्नित्यः। श्रोत्रोपलभ्यपर्यायसामान्यास्थित्यपेक्षया कालांतरस्थायिप्रतिसमयस्थितिभेदापेक्षया क्षणिक इति च जैनेश्वरदर्शनमनवद्य ॥

बंधोपि द्विधा विस्रसाप्रयोगभेदात् ॥१०॥ बंधोऽपि द्वैविध्यमश्नुते। कुतः ? विस्रसाप्रयोगभेदात्। वैस्रसिकः प्रायोगिकश्चेति।

आद्यो द्वेधा आदिमदनादिविकल्पात् ॥ ११ ॥ आद्यो वैस्रसिको बंधो द्विधा भिद्यते। कुतः ? आदिमदनादिविकल्पात्। तत्रादिमान् स्निग्धरूक्षगुणनिमित्तविद्युदुल्काजलधाराग्नींद्रधनुरादिविषयः। अनादिरपि वैस्रसिकबंधो धर्माधर्माकाशानामेकशः त्रैविध्यान्नवविधः। धर्मास्तिकायबंधः धर्मास्तिकायदेशबंधः धर्मास्तिकायप्रदेशबंधः। अधर्मास्तिकायबंधः अधर्मास्तिकायदेशबंधः। अधर्मास्तिकायप्रदेशबंधः। आकाशास्तिकायबंधः आकाशास्तिकायदेशबंध आकाशास्तिकायप्रदेशबंधश्चेति। कृत्स्नो धर्मास्तिकायः तदर्धं देशः, अर्धार्धं प्रदेशः, एवमधर्माकाशयोरपि। कालाणूनामपि सततं परस्पराविश्लेषाभावात् अनादिः। एकजीवप्रदेशानां च संहरणविसर्पणस्वभावत्वेपि परस्परावियोगाभावात् अनादिर्बंधः। धर्माधर्मकालाकाशानां परस्परावियोगाभावात् अनादिर्बंधः। नानाजीवानामपि सामान्यापेक्षया इतरद्रव्यैः सह बंधः, अनादिः। पुद्गलद्रव्येष्वपि महास्कंधादीनां सामान्यादनादिर्बंधः। एवं सर्वद्रव्यविषयबंधे सति पुद्गलप्रकरणात् तद्विषयो बंधः परिगृह्यते।

विस्रसा विधिविपर्यये निपातः ॥ १२ ॥ पौरुषेयपरिणामापेक्षाविधिः तद्विपर्यये विस्रसाशब्दो निपातो दृष्टव्यः। विस्रसा प्रयोजना वैस्रसिको बंधः।

प्रयोगः पुरुषकायवाङ्मनःसंयोगलक्षणः ॥ १३ ॥ पुरुषस्य कायवाङ्मनःसंयोगः प्रयोग इत्युच्यते। प्रयोगप्रयोजनो बंधः प्रायोगिकः स द्वेधा अजीवविषयो जीवाजीवविषयश्चेति। तत्राजीवविषयो जतुकाष्ठादिलक्षणः। जीवाजीवविषयः कर्मनोकर्मबंधः। कर्मबंधो ज्ञानावरणादिरष्टधा वक्ष्यमाणः। नोकर्मबंधः औदारिकादिविषयः। स पुनः पंचविधः आलपनाऽऽलेपनसंश्लेषशरीरशरीरिभेदात्। रथशकटादीनां लोहरज्जुवरत्रादिभिरालपनादाकर्षणात् बंधः आलपनबंधः। अनेकार्थत्वात् धातूनां लपिः आकर्षणक्रियो-ज्ञेयः[1]। कुड्यप्रासादादीनां मृत्पिंडेष्टकादिभिः प्रलेपदानेन अन्योन्यालेपनात् अर्पणात् आलेपनबंधः। धातूनामनेकार्थत्वात् आङ्पूर्वस्य लिङः अर्पणाक्रियस्य ग्रहणं। जतुकाष्ठादि संश्लेषबंधः। शरीरबंधः पंचधा औदारिकवैक्रियिकाहारकतैजसकार्मणशरीरनोकर्मबंधभेदात्। स प्रत्येकं चतुश्चतुर्द्विरेकभंगभेदात् पंचदशधा। तत्रौदारिकशरीरनोकर्मप्रदेशानामौदारिकशरीरनोकर्मप्रदेशैरन्योन्यानुप्रवेशात् औदारिकौदारिकशरीरनोकर्मबंधः प्रथमः। औदारिकतैजसशरीरनोकर्मप्रदेशानां अन्योन्यानुप्रवेशः औदारिकतैजसशरीरनोकर्मबंधो द्वितीयः। औदारिककार्मणशरीरनोकर्मप्रदेशानामन्योन्यानुप्रवेशः औदारिककार्मणशरीरनोकर्मबंधस्तृतीयः। औदारिकतैजसकार्मणशरीरनोकर्मप्रदेशानामन्योन्यानुप्रवेशः औदारिकतैजसकार्मणशरीरनोकर्मबंधश्चतुर्थः। अनेन विधिना वैक्रियिकवैक्रियिकशरीरनोकर्मबंधः वैक्रियिकतैजसशरीरनोकर्मबंधः वैक्रियिककार्मणशरीरनोकर्मबंधः। वैक्रियिक तैजसकार्मणशरीर नोकर्मबंधः। आहारकाहारकशरीरनोकर्मबंधः आहारक तैजसशरीरनोकर्मबंधः आहारककार्मणशरीरनोकर्मबंधः आहारकतैजसकार्मणशरीरनोकर्मबंधः। तैजसतैजसशरीरनो-

१ आकर्षणक्रियापेक्षः पाठोऽयं ग. पुस्तके।

कर्मबंधः तैजसकार्मणशरीरनोकर्मबंधः । कार्मणकार्मणशरीरनोकर्मबंधश्चेति. योज्यः । शरीरिबंधो द्वेधा अनादिरादिमांश्च । अष्टजीवमध्यप्रदेशानामुपर्यधश्चतुर्णां रुचकवदवस्थितानां सर्वकालमन्योन्यापरित्यागात् अनादिसंबंधः । इतरेषां प्रदेशानां कर्मनिमित्तसहरणविसर्पणस्वभावत्वादादिमान् । अथवा यथा क्रोधप रिणत आत्मैव क्रोधः तथा तप्तायःपिंडवत् शरीरेण सह बधं प्रत्यात्मनः एकत्वादात्मैव शरीरमिति व्यप- देशात् पूर्वोक्ताः पचदश विकल्पाः शरीरविषयत्वेन योज्याः । औदारिकादिशरीरभेदार्पणात् प्रागुक्ता विक- ल्पाः । अत्राह—कर्मनोकर्मणोः कः प्रतिविशेष इत्युच्यते—आत्मपरिणामेन योगभावलक्षणेन क्रियत इति कर्म तदात्मनां स्वतंत्रीकरणे मूलकारणं । तदुदयापादितः पुद्गलपरिणामः आत्मनः सुखदुःखबलाधान- हेतुः, औदारिकशरीरादिः ईषत्कर्म नोकर्मेत्युच्यते । किं च स्थितिभेदाद्भेदः कर्मणां स्थितिरुत्तरत्र वक्ष्यते । नोकर्मणां स्थितिरुच्यते । औदारिकवैक्रियिकशरीरयोः स्वायुःप्रमाणस्थितिर्निषेकः । तत्रौदारिकशरीरस्य त्रिपल्योपमा स्थितिः । यस्मादेकसमयादारभ्य आ त्रिपल्योपमसमाप्तेरवस्थानं । वैक्रियिकशरीरस्य त्रय- स्त्रिंशत्सागरोपमा स्थितिः, यस्मादेकसमयनिषेकादारभ्य त्रयस्त्रिंशत्सागरोपमांत्यसमयादवस्थानं । आहा- रकशरीरस्य अंतर्मुहूर्तपरिणामा स्थितिः । तैजसशरीरस्य षट्षष्टिसागरोपमा स्थितिः । कार्मणशरीरस्य कर्मस्थितिः, ज्ञानावरणाद्यनेककर्मस्थितिसंभवेऽप्यार्षमार्गेव कर्मस्थितिर्माह्या । औदारिकवैक्रियिकतैजसका- र्मणशरीरकर्मणामेकैकस्य विंशतिसागरोपमकोटीकोट्यः स्थितिः । आहारकशरीरकर्मणोऽन्तःकोटीकोट्यः स्थितिः ॥

सौक्ष्म्यं द्विविधं अंत्यमापेक्षिकं च ॥ १४ ॥ सौक्ष्म्यं द्विविधं वेदितव्यं । कुतः ? अंत्यमापेक्षिकं चेति । तत्रांऽत्यं परमाणूनां । आपेक्षिकं बिल्वामलकबदरादीनां ।

तथा स्थौल्यं ॥ १५ ॥ तेनैव प्रकारेणांत्यं आपेक्षिकं चेति द्विविधं स्थौल्यमवगंतव्यं । तत्रांत्य जगव्द्यापिनि महास्कंधे । आपेक्षिकं बदरामलकबिल्वतालादिषु ।

संस्थानं द्वेधेत्थंलक्षणं अनित्थंलक्षणं च ॥ १६ ॥ संस्थानमाकृतिर्द्वेधा भिद्यते इत्थंल- क्षणमनित्थं लक्षणं चेति ।

वृत्तत्र्यस्रचतुरस्रायतपरिमंडलादित्थमतोन्यदनित्थं ॥ १७ ॥ वृत्तं त्र्यस्रं चतुरस्रमायतं परि- मंडलमित्येवमादि संस्थानमित्थंलक्षणं । अतोऽन्यन्मेघादीनां संस्थानं अनेकविधं, इत्थमिदमिति निरूपणा- भावात् अनित्थंलक्षणं ।

भेदः षोढोत्करचूर्णखंडचूर्णिकाप्रतराणुचटनविकल्पात् ॥ १८ ॥ भेदः षोढा भिद्यते । कुतः ? उत्करादिविकल्पात् । तत्रोत्करः—काष्ठादीनां करपत्रादिभिरुत्करणं । चूर्णो—यवगोधूमादीनां सक्तुकणि- कादिः । खंडो—घटादीनां कपालशर्करादिः । चूर्णिका—माषमुद्गादीनां । प्रतरोऽभ्रपटलादीनां । अणु- चटनं तप्तायःपिंडादिष्वयोघनादिभिरभिहन्यमानेषु स्फुलिंगनिर्गमः ।

तमो दृष्टिप्रतिबंधकारणं ॥ १९ ॥ दृष्टेः प्रतिबंधकं वस्तु तम इति व्यपदिश्यते । यदपहरन् प्रदीपः प्रकाशको भवति ॥

छाया प्रकाशावरणनिमित्ता ॥ २० ॥ प्रकाशावरण शरीरादि यस्या निमित्तं भवति सा छाया

सा द्वेधा तद्वर्णादिविकारप्रतिबिंबमात्रग्रहणविकल्पात् ॥ २१ ॥ सा छाया द्वेधा व्यवतिष्ठते । कुतः ? तद्वर्णादिविकारात् प्रतिबिंबमात्रग्रहणाच्च । आदर्शतलादिषु प्रसन्नद्रव्येषु मुखादिच्छाया तद्वर्णादिपरिणता उपलभ्यते । इतरत्र प्रतिबिंबमात्रमेव । अत्राह—विपरीतग्रहणं कुतः ? प्राङ्मुखस्य प्रत्यङ्मुखा छाया दृश्यते ? इति प्रसन्नद्रव्यपरिणामविशेषाद्भवति । अत्र चोद्यते नादर्शतलादिच्छायासद्भावः, किं तर्हि ? नयननिर्गतेन रश्मिना घनद्रव्यात् प्रतिहतनिवृत्तेन स्वमुखस्यैव ग्रहणं इति तदयुक्तं विपर्यासग्रहणाभावप्रसंगात् । कुड्यादिषु अतिप्रसंगात् ग्रहणशक्त्यभावाच्च । विपर्यासग्रहणाभावप्रसंगस्तावत् यदि प्रतिनिवृत्तेन नयन

रश्मिना स्वशरीरस्यैव ग्रहणं प्राङ्मुखस्य प्राङ्मुखमेव ग्रहणं स्यात् । विपर्यासहेत्वभावात् कुड्यादिषु चातिप्रसंगः स्यात् । नयनरश्मेः प्रतिघातस्य तत्रापि सद्भावात् । नाप्यसौ नयनरश्मिः शरीरान्निष्क्रांतः मनसाऽनधिष्ठितो ग्रहीतुं शक्नोति ॥

आतपः उष्णप्रकाशलक्षणः ॥ २२ ॥ आतप आदित्यादिनिमित्त उष्णप्रकाशलक्षणः पुद्गलपरिणामः

उद्योतश्चंद्रमणिखद्योतादिविषयः ॥ २३ ॥ चंद्रमणिखद्योतादीनां प्रकाश उद्योत उच्यते ।

क्रियोपसंख्यानं पुद्गलपरिणामादिति चेन्न धर्माधर्माकाशानां क्रियया प्रतिषेधसंबंधेनोक्तत्वात् ॥ २४ ॥ स्यादेतत् क्रिया उपसंख्यातव्या । कुतः ? पुद्गलपरिणामात् इति ? तन्न किं कारणं ? धर्माधर्माकाशानां क्रियाप्रतिषेधे सबंधेनोक्तत्वात् ।

कालस्यापि क्रियावत्त्वप्रसंग इति चेन्न पूर्वत्रानभिधानात् ॥२५॥ स्यान्मतं यदि धर्माधर्माकाशाना क्रियापरिणामप्रतिषेधात् सामर्थ्यात् पुद्गलानां क्रियावत्त्वमनुमीयते । ननु कालस्यापि क्रियावत्त्वं प्रसज्यत इति ? तन्न । किं कारणं ? पूर्वत्र अनभिधानात् " अजीवकाया धर्माधर्माकाशपुद्गला " इत्यत्र । तत्र हि पाठे 'आ आकाशादेकद्रव्याणि निःक्रियाणि' इत्यतः कालस्य बहिर्भावात् न पुद्गलवत् क्रियावत्त्वं भवेत् । अथवा पूर्वत्रानभिधानात् । क ? द्रव्याणि जीवाः कालश्चेति । यदि कालस्य क्रियावत्त्वमिष्टं भवेत् तत्र पठ्येत तथा सति जीवाश्चेति चशब्दाकरणात् लघुसूत्रं स्यात् । पुनः कालश्च इत्यवचनाच्च । अनंतसमयार्थं पुनः कालश्च इति कर्तव्यमिति चेन्न आकाशस्यानंताः कालस्य चेति सिद्धत्वात् । एवं लघीयसा न्यायेन सिद्धे यद्‌तत्र निर्देशे कालश्चेति वचनं तेन ज्ञायते नास्ति कालस्य क्रियावत्त्वमिति । तच्च निःक्रियत्वं परिस्पंदात्मिकां क्रियां प्रत्ययसेयं, नचास्त्यादिक्रियां प्रति । तस्मादनादिपारिणामिकास्त्यादिक्रियाद्रव्यार्थादेशात् स्यात् क्रियावान् कालः । देशांतरप्रापणसमर्थपरिस्पंदक्रियाविशेषपरिणामाभावादेशाच्च स्यान्निःक्रियः ।

सा दशप्रकारा प्रयोगबंधाभावच्छेदाभिघातावगाहनगुरुलघुसंचारसंयोगस्वभावनिमित्तभेदात् ॥ २६ ॥ सैषा क्रिया दशप्रकारा वेदितव्या । कुतः प्रयोगादिनिमित्तभेदात् । तद्यथा— इष्वेरंडबीजमृदंगशब्दजतुगोलकनौद्रव्यपाषाणालाबुसुराजलदमारुतादीनां इषुचक्रकणयादीनां प्रयोगगतिः । एरंडतिंदुकबीजानां बंधाभावगतिः । मृदंगभेरीशंखादिशब्दपुद्गलानां छिन्नानां गतिः छेदगतिः । जतुगोलककंदुदारुपिंडादीनां अभिघातगतिः । नौद्रव्यपोतकादीनां अवगाहनगतिः । पाषाणायःस्फालानां गुरुगति । अलाबुद्रुतार्कतूलादीनां लघुगतिः । सुरासौवीरकादीनां संचारगतिः । जलधरमुशलादीनां वायुवाजिहस्त्यादीनां संयोगगतिः । मारुतपावकपरमाणुसिद्धज्योतिष्कादीनां स्वभावगतिः । वायोः केवलस्य तिर्यग्गतिः । भस्त्रादियोगादनियता गतिः । अग्नेरूर्ध्वगतिः । कारणवशाद्दिगंतरगतिः । परमाणोरनियता । सिध्यतामूर्ध्वगतिरेव । ज्योतिषां नित्यभ्रमणं नृलोके ।

मत्वर्थीयप्रयोगादन्यत्वं शब्दादीनां दंडवदिति चेन्न अनेकांतात् ॥ २७ ॥ स्यान्मतं यथाऽन्यत्वे सत्वे सति संबंधे मत्वर्थीयो दृश्यते । दंडी देवदत्त इति तथा अत्रापि मत्वर्थीयदर्शनात् शब्दादीनां अन्यत्वं तद्वद्भ्योऽनुमीयत इति ? तन्न । किं कारण ? अनेकांतात् । अनन्यत्वेपि लोके मत्वर्थीयो दृश्यते सारवांस्तंभः आत्मवान् पुरुषः इति । कथंचित् अन्यत्वोपपत्तेश्च । शब्दादीनां पुद्गलेभ्यः भेदार्थादेशात् स्यादन्यत्वं । शब्दादिपरिणामे च तप्तायःपिंडवत् तादात्म्यादेशात् स्यादनन्यत्वं । अत्राह-यदि स्पर्शादयश्च शब्दादयश्च पुद्गलपरिणामाः किमर्थमेषां पृथग्ग्रहणं ननु एक एव योगः कर्तव्यः ? इत्यत्रोच्यते ।

पृथग्ग्रहणं केषांचिदुभयपर्यायज्ञापनार्थं ॥ २८ ॥ स्पर्शादयः परमाणूनां स्कंधानां च भवंति शब्दादयस्तु स्कंधानामेव व्यक्तिरूपेण भवंति सौक्ष्म्यवर्ज्या, इत्येतस्य विशेषस्य प्रतिपत्त्यर्थं पृथग्योगकरणं । सौक्ष्म्यं तु अंत्यमणुष्वेव आपेक्षिकं स्कंधेषु । यद्येवं सौक्ष्म्यग्रहणं पूर्वसूत्र एव कर्तव्यं ? इह कारणं स्थौल्यप्रतिपक्षप्रतिपत्त्यर्थं ।

स्पर्शादीनामेकजातीयपरिणामख्यापनार्थं च ॥ २९ ॥ स्पर्शादीनां गुणानामेकजातीय इत्येतस्यार्थस्य ख्यापनार्थं च क्रियते पृथक् ग्रहणं । तद्यथा—स्पर्श एको गुणः काठिन्यलक्षणः स्वजात्यपरित्यागेन पूर्वोत्तरस्वगतिभेदानिरोधोपजननसंतत्या वर्तनात्, द्वित्रिचतुःसंख्येयासंख्येयानंतगुणकाठिनस्पर्शपर्यायैरेव परिणमते न मृदुगुरुलघ्वादिस्पर्शैः । एवं मृद्वादयोपि योज्याः । रसश्च तिक्त एक एव गुणः रसजातिमजहत् पूर्ववन्नाशोत्पादावनुभवन् द्वित्रिचतुःसंख्येयासंख्येयानंतगुणतिक्तरसैरेव परिणमते न कटुकादिरसैः । एवं कटुकादयो वेदितव्याः । गंधश्च सुरभिरेको गुणः स्वजातिमजहत्पूर्ववद्द्व्यादिगुणसुरभिगंधपर्यायैरेव परिणमते नासुरभिगंधैः । एवमसुरभिगंधो वाच्यः । वर्णश्च शुक्ल एको गुणः स्वजात्यपरित्यागेन पूर्ववद्द्व्यादिशुक्लवर्णैरेव परिणमते न नीलादिभिः । एवं नीलादयोपि च नेतव्याः । अथ यदा काठिनस्पर्शो मृदुस्पर्शेन, गुरुर्लघुना, स्निग्धो रूक्षेण, शीत उष्णेन, परिणमते । तिक्तश्च कटुकादिभिः सुरभिश्चेतरेण, शुक्लश्च कृष्णादिभिः, इतरे चेतरैः, संयोगे च गुणांतरैस्तदा कथं ? । तत्रापि काठिनस्पर्शजातिमजहत् मृदुस्पर्शेनैव विनाशोत्पादौ अनुभवन् परिणमते नेतरैरेवमितरत्रापि योज्यं ।

नोदनाभिघाताद्युपसंख्यानमिति चेन्न चशब्दस्येष्टसमुच्चयार्थत्वात् ॥ ३० ॥ स्यान्मतं नोदनाभिघातादयः पुद्गलपरिणामाः सति तेषामत्रोपसंख्यानं कर्तव्यमिति ? तन्न किं कारणं ? चशब्दस्येष्टसमुच्चयार्थत्वात् । ये पुद्गलपरिणामा आगमे इष्टाः तेषामिह चशब्देन समुच्चयः क्रियते । अत्राह—यदेवमर्थं पृथग्योगकरणमुच्यतां तस्य स्पर्शादिपरिणामाः पुद्गलाः के वा तदुभयभाजः ? इत्यत्रोच्यते—

अणवः स्कंधाश्च ॥ २५ ॥

प्रदेशमात्रभाविस्पर्शादिपर्यायप्रसवसामर्थ्येनाण्यंते शब्द्यंते इत्यणवः ॥ १ ॥ प्रदेशमात्रभाविभिः स्पर्शादिभिः गुणैस्सततं परिणमंत इत्येवं अण्यंते शब्द्यंते ये ते अणवः । सौक्ष्म्यादात्मादयः आत्ममध्याः आत्मांताश्च । उक्तंच—

> अंतादि अंतमज्झं अंतंते णेव इंदिए गेज्झं ।
> जं दव्वं अविभागी तं परमाणुं विजाणीहि ॥ १ ॥

स्थौल्याद्ग्रहणनिक्षेपणादिव्यापारास्कंदनात् स्कंधाः ॥ २ ॥ स्थौल्यभावेन ग्रहणनिक्षेपणादिव्यापारास्कंदनात् स्कंधा इति संज्ञायंते रूढा क्रिया क्वचित् सति उपलक्षणत्वेनाश्रिता इति ग्रहणादिव्यापारायोग्येष्वपि द्व्यणुकादिषु स्कंधाख्या वर्तते ।

उभयत्र जात्यपेक्षं बहुवचनं ॥ ३ ॥ अनंतभेदा अपि पुद्गला अणुजात्या स्कंधजात्या वा द्वैविध्यमापद्यमानाः सर्वे गृह्यंत इति तज्जात्याधारानंतभेदसंसूचनार्थं बहुवचनं क्रियते ।

अणुस्कंधा इत्यस्तु लघुत्वादिति चेन्न उभयसूत्रसंबंधार्थत्वात् भेदकरणस्य ॥ ४ ॥ स्यान्मतं अणवः स्कंधा इति करणं युक्तं लघुत्वादिति ? तन्न । किं कारणं ? उभयसूत्रसंबंधार्थत्वात् भेदकरणस्य । स्पर्शरसगंधवर्णवंतोऽणवः शब्दबंधसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायातपोद्योतवंतश्च स्कंधा इति । वृत्तौ पुनः सत्यां समुदायस्यार्थवत्त्वात् । अवयवार्थाभावात् भेदेनाभिसंबंधः कर्तुं न शक्यः ।

कारणमेव तदंत्यमित्यसमीक्षिताभिधानं कथंचित् कार्यत्वात् ॥ ५ ॥ कारणमेव तदंत्यमिति केचित् कथयंति परमाणुः, तदसमीक्षिताभिधानं । कुतः ? कथंचित् कार्यत्वात् । परमाणुर्हि केनाचित् प्रकारेण कार्यः "भेदादणुः" इति वक्ष्यमाणत्वात् ।

अविरोध इति चेन्नैवशब्देनाऽवधारणात् ॥ ६ ॥ स्यादेतत् कथंचित् कार्यत्वोपपत्तौ कारणस्य अप्रतिषेधात् अविरोध इति ? तन्न । किं कारणं ? एवशब्देनावधारणात् । यत एवकारणं ततोऽन्यत्रावधारणमिति कारणमेव परमाणुर्न कार्यमिति कार्यत्वनिषेधात् ।

नित्य इति चायुक्तं स्नेहादिभावेनानित्यत्वात् ॥ ७ ॥ नित्यः परमाणुः इति एतच्च वचनं अयुक्तं । कुतः ? स्नेहादिभावेन अनित्यत्वात् । स्नेहादयो हि गुणाः परमाणौ प्रादुर्भवंति च ततस्तत्पूर्वकमस्यानित्यत्वमिति ।

अनादिपरमाण्ववस्थमिति चेन्न तत्कार्याभावात् ॥ ८ ॥ स्यान्मतं अनाद्यणुत्वावस्थः परमाणुरस्ति स द्व्यणुकादिकार्यहेतुत्वात् कारणमेव न कार्यं, न हि असौ भेदादुत्पद्यत इति ? तन्न । किं कारणं ? तत्कार्याभावात् । न हि तस्यानादिपारिणामिका एव वस्थस्य ? कार्यमस्ति तत्स्वभावाविनिवृत्तेः सति च कार्ये तद्भेदादणुरिति कार्यत्वसिद्धिः । ततः कार्यस्याभावात् कारणमिति व्यपदेशश्च नोपपद्यते । नहि असति पुत्रेऽस्ति पितृव्यव्यपदेशः इति ।

छायादि तत्कार्यमिति चेन्न स्कंधनिमित्तत्वात् ॥९॥ यदि छायादिकार्यमनादिपरमाणोरिति कल्प्यते तदपि नोपपद्यते। कुतः ? स्कंधनिमित्तत्वात् । अनंतनंतप्रदेशस्कंधारब्धच्छायादि नानादिपरमाणुकार्यं ।

प्रतिज्ञामात्रमिति चेन्न चाक्षुषत्वात् ॥ १० ॥ अथ मतं प्रतिज्ञामात्रमेतत् स्कंधकार्यं छायादि नाणुकार्यमिति तच्चायुक्तं । कुतः ? चाक्षुषत्वात् । चाक्षुषं हि छाया यदि, अचाक्षुषमणुकार्यं न भवतुमर्हति । न चानादिपरमाणुर्नाम कश्चिदस्ति भेदादणुरिति वचनात् ।

नित्यवचनं तदर्थमिति चेन्न तस्यापि स्नेहादिविपरिणामाभ्युपगमात् ॥ ११ ॥ स्यान्मतं नित्यवचनमनादिपरमाण्वर्थमिति तन्न । किं कारणं ? तस्यापि स्नेहादिविपरिणामाभ्युपगमात् । न हि निःष्परिणामः कश्चिदर्थोऽस्ति । नयापेक्षमिति चेद्युक्तं । अथ मतं कारणमेव तदंत्यं नित्य इति वचनं नयापेक्षं द्व्यणुकादिवत् संघातकार्याभावात् कारणमेव । द्रव्यार्थतया व्ययोदयाभावात् नित्यः, इत्येवं सति युक्तं हेतुविशेषसामर्थ्यार्पणं अवधारणाविरोधात् । द्रव्यार्थतयावस्थानाच्च ।

एकरसवर्णगंधोऽणुः निरवयवत्वात् ॥ १२ ॥ एकरसः एकगंधश्च परमाणुर्वेदितव्यः । कुतः ? निरवयवत्वात् । सावयवानां हि मातुलिंगादीनां अनेकरसत्वं दृश्यते । अनेकवर्णत्वं च मयूरादीनां, अनेकगंधत्वं चानुलेपनादीनां च । निरवयवश्चाणुरत एकरसवर्णगंधः ॥

द्विस्पर्शो विरोधाभावात् ॥ १३ ॥ द्विस्पर्शोऽणुरवगंतव्यः । कुतः ? विरोधाभावात् । कौ पुनः द्वौ स्पर्शौ शीतोष्णस्पर्शयोरन्यतरः स्निग्धरूक्षयोरन्यतरश्च । एकप्रदेशत्वात् विरोधिनोः युगपदनवस्थानं । गुरुलघुमृदुकठिनस्पर्शानां परमाणुष्वभावः स्कंधविषयत्वात् । कथं पुनः तेषां अणूनामत्यंतपरोक्षाणां अस्तित्वमवसीयत इति चेदुच्यते—

तदस्तित्वं कार्यलिंगत्वात् ॥ १४ ॥ तेषामणूनामस्तित्वं कार्यलिंगत्वादवगंतव्यं । कार्यलिंगं हि कारणं नाऽसत्सु परमाणुषु शरीरेंद्रियमहाभूतादिलक्षणस्य कार्यस्य प्रादुर्भाव इति ।

अनेकांतः कारणत्वादिविकल्पः ॥ १५ ॥ अणोःकारणत्वादिविकल्पोऽनेकांतो योज्यः । स्यात्कारणं स्यात्कार्यमित्यादि । द्व्यणुकादिकार्यप्रादुर्भावनिमित्तत्वात् स्यात्कारणमणुः । भेदादुपजायत इति स्यात्कार्यं । स्निग्धरूक्षत्वादिकार्यगुणाधिकरणाद्वा ततः पुनर्भेदाभावात् स्यादंत्यः । प्रदेशभेदाभावेपि पुनरपि गुणभेदसद्भावात् स्यान्नांत्यः । सूक्ष्मपरिणामसद्भाववशात् स्यात्सूक्ष्मः । स्थूलकार्यप्रभवयोगित्वात् स्यात्स्थूलः । द्रव्यताऽपरित्यागात् स्यान्नित्यः । बंधभेदपर्यायादेशात् गुणांतरसंक्रांतिदर्शनाच्च स्यादनित्यः । निष्प्रदेशत्वपर्यायार्पणात् स्यादेकरसगंधो द्विस्पर्शश्च । अनेकप्रदेशस्कंधपरिणामशक्तियोगात् स्यादनेकरसादिः । कार्यलिंगेनानुमीयमानसद्भावादेशात् स्यात्कार्यलिंगः । प्रत्यक्षज्ञानगोचरत्वपर्यायादेशात् स्यान्न कार्यलिंगः । उक्तं च—

> **कारणमेव तदंत्यः सूक्ष्मो नित्यश्च भवति परमाणुः ।**
> **एकरसगंधवर्णो द्विस्पर्शः कार्यलिंगश्च ॥ १ ॥**

के पुनः स्कंधाः ?

परिप्राप्तबंधपरिणामाः स्कंधाः ॥ १६ ॥ बंधो वक्ष्यते तं परिप्राप्ताः येऽणवः ते स्कंधाः इति व्यपदेशमर्हंति । ते त्रिविधाः-स्कंधाः स्कंधदेशाः स्कंधप्रदेशाश्चेति । अनंतानंतपरमाणुबंधविशेषः स्कंधः । तदर्धं देशः । अर्धार्धं प्रदेशः । तद्भेदाः पृथिव्यप्तेजोवायवः स्पर्शादिशब्दादिपर्यायाः । पृथिवी तावत् घटादि लक्षणा स्पर्शादिशब्दाद्यात्मिका सिद्धा । अंभोपि तद्विकारत्वात् तदात्मकं साक्षात् गंधोपलब्धेश्च । तत्संयोगिनां पार्थिवद्रव्याणां गंधः तद्गुण इवोपलभ्यत इति चेन्न साध्यत्वात् तद्वियोगकालादर्शनात् तदविनाभावाच्च तद्गुणा एवेति निश्चयः कर्तव्यः । गंधवदंभः रसवत्वात् आम्रफलवत् । तथा तेजोपि स्पर्शादिस्वभावकं तद्वत्कार्यत्वात् घटवत् । स्पर्शादिमतां हि काष्ठादीनां कार्यं तेजः । किं च तत्परिणामात् । उपयुक्तस्य हि आहारस्य स्पर्शादिगुणस्य वातपित्तश्लेष्मविपरिणामः । पित्तं च जठराग्निः । तस्मात् स्पर्शादिमत्तेजः । तथा स्पर्शादिशब्दादिपरिणामो वायुः स्पर्शवत्त्वात् घटादिवत् । किं च—तत्परिणामात् । उपयुक्तस्य स्पर्शादिगुणस्य वातपित्तश्लेष्मविपरिणामः । वातश्च प्राणादिः । ततो वायुरपि स्पर्शादिमान् इत्यवसेयः । एतेन अन्ये च चतुस्त्रिद्वि एकगुणाः पृथिव्यादयः पार्थिवादिजातिभिन्नाः इति तद्दर्शनं प्रत्युक्तं । आह किमेषां अणुस्कंधलक्षणः परिणामोनादिः ? उत आदिमान् ? इत्युच्यते—स खल्वुत्पत्तिमत्त्वादादिमान् प्रतिज्ञायते । यद्येवमभिधीयतां कस्मान्निमित्तादुत्पद्यंत इति । तत्र स्कंधानां तावदुत्पत्तिहेतुप्रतिपादनार्थमिदमुच्यते—

भेदसंघातेभ्य उत्पद्यंते ॥ २६ ॥

संहतानां द्वितयनिमित्तवशात् विदारणं भेदः ॥ १ ॥ बाह्याभ्यंतरविपरिणामकारणसंनिधाने सति संहतानां स्कंधानां विदारणनानात्वं भेद इत्युच्यते ॥

विविक्तानां एकीभावः संघातः ॥ २ ॥ पृथग्भूताना एकत्वापत्तिः संघात । इति कथ्यते ॥

द्वित्वाद्विवचनप्रसंग इति चेन्न बहुवचनस्यार्थविशेषज्ञापनार्थत्वात् ॥३॥ स्यादेतत् भेदसंघातयोर्द्वित्वात् द्विवचनेन भवितव्यमिति ? किं कारणं ? बहुवचनस्यार्थविशेषज्ञापनार्थत्वात् । अतो-भेदेन संघातः भेदसंघातः इत्यस्याप्यवबोधः कृतो भवति ।

उत्पूर्वः पदिर्जात्यर्थः ॥ ४ ॥ उत्पूर्व. पदिर्जात्यर्थो द्रष्टव्यः उत्पद्यंते जायंत इति यावत् ।

तदपेक्षो हेतुनिर्देशः ॥ ५ ॥ भेदसंघातेभ्य इत्ययं हेतुनिर्देशः तदपेक्षो वेदितव्यः । निमित्तकारणहेतुषु सर्वासां प्रदर्शनात् इति भेदसंघातेभ्यः कारणेभ्यः उत्पद्यंते इति हेत्वर्थगतेः । तद्यथा—द्वयोः परमाण्वोः संघाताद्विप्रदेशस्कंध उत्पद्यते । द्विप्रदेशस्य अणोश्च त्रयाणां वाऽणूनां संघातात्त्रिप्रदेशः । द्वयोः द्विप्रदेशयोः त्रिप्रदेशयोः त्रिप्रदेशस्याणोश्चतुर्णां वाऽणूनां संघाताच्चतुःप्रदेशः । एवं संख्येयानां असंख्येयानामनंतानां च संघातात्तावत्प्रदेशः । एषामेव भेदात् द्विप्रदेशपर्यंतात् स्कंधा उत्पद्यंते । एवं भेदसंघाताभ्यां एकसमयिकाभ्यां द्विप्रदेशादयः स्कंधा उत्पद्यते । अन्यतो भेदेन अन्यस्य संघातेनेत्येवमुक्तानामणुस्कंधानामविशेषेण भेदादिहेतुकोत्पत्तिप्रसंगे विशेषप्रतिपत्त्यर्थमिदमुच्यते—

भेदादणुः ॥ २७ ॥

सामर्थ्यादवधारणप्रतीतेरेवकारावचनं अब्भक्ष्यवत् ॥१॥ यथा च कश्चित् अपो न भक्षयति इत्यब्भक्षणसिद्धेः अब्भक्षणवचनात् अप एव भक्षयतीत्यवधारणं गम्यते । एवं भेदसंघातेभ्य उत्पद्यते इत्यनेनैवाणोर्भेदादुत्पत्तौ सिद्धायां पुनर्वचनमवधारणार्थं भवति—भेदादेवाणुः न संघातात् नापि भेदसंघाताभ्यामिति । अत्राह संघातादेव स्कंधानामात्मलाभसिद्धेर्भेदसंघातग्रहणमनर्थकमिति तद्ग्रहणप्रयोजनप्रतिपादनार्थमिदमुच्यते—

भेदसंघाताभ्यां चाक्षुषः ॥ २८ ॥

अनंतानंतपरमाणुसमुदयनिष्पाद्योपि कश्चिच्चाक्षुषः कश्चिच्चाऽचाक्षुषः । तत्र योऽचाक्षुषः स कथं

चाक्षुषो भवतीति चेदुच्यते --भेदसंघाताभ्यां चाक्षुषः न भेदादिति । कात्रोपपत्तिरिति चेद्भमः- सूक्ष्मपरिणामस्य स्कंधस्य भेदसौक्ष्म्यापरित्यागात् अचाक्षुषत्वमेव । सूक्ष्मपरिणतः पुनरपरः सत्यपि तद्भेदेऽन्यसंघातांतरसंयोगात् सौक्ष्म्यपरिणामोपरमे स्थौल्योत्पत्तौ चाक्षुषो भवति । अत्राह -- गतिस्थित्यवगाहनवर्तनाशरीरादिपरस्परोपकाराद्यनुमितास्तित्वं धर्मादि पुरस्ताद्द्रव्यमित्याख्यातं तत्कथं ? सद्द्रव्यलक्षण, धर्मादिद्रव्यमित्यवध्रियते सत्वात् यत्सतद्द्रव्यं । यद्येवं प्राप्तमिदं सतः किं लक्षण । इत्युच्यते यदिंद्रियग्राह्यमतींद्रियमपि बाह्याध्यात्मिक निमित्तापेक्षं, उत्पादव्ययध्रौव्ययुक्त सद्वेदितव्यमिति वाक्यशेषः । अथवा धर्मादि सत्त्वात् द्रव्यमित्यवधृतं । तस्मात् अभिधीयतां किं तत्सत इति ? तत इदमुपादिक्षत --

उत्पादव्ययध्रौव्ययुक्तं सत् ॥ २९ ॥

अथवा यद्युपकारसद्भावात् धर्मादिद्रव्यं सद्विवक्षित तदा नोपकरोति तदा तदसत्त्वप्रसंग इत्युच्यते--असत्यपि उपकारविशेषे यस्मात् सामान्ये द्रव्यलक्षणत्रये सन्निहिते उत्पादव्ययध्रौव्ययुक्तं सत्तद्द्रव्यं भविष्यतीत्यर्थः ।

स्वजात्यपरित्यागेन भावांतरावाप्तिरुत्पादः ॥ १ ॥ चेतनस्य अचेतनस्य वा द्रव्यस्य स्वजातिमजहतः निमित्तवशात् भावांतरावाप्तिरुत्पादनमुत्पाद इत्युच्यते । मृत्पिंडस्य घटपर्यायवत् ।

तथा पूर्वभावविगमो व्ययः ॥ २ ॥ तेन प्रकारेण तथा स्वजात्यपरित्यागेन इत्यर्थः पूर्वभावविगमो व्ययनं व्यय इति कथ्यते । यथा घटोत्पत्तौ पिंडाकृतेः ।

ध्रुवे स्थैर्यकर्मणोध्रुवतीति ध्रुवः ॥ ३ ॥ अनादिपारिणामिकस्वभावत्वेन व्ययोदयभावात् ध्रुवं स्थिरीभवति इति ध्रुवः, ध्रुवस्य भावः कर्म वा ध्रौव्यं । यथा पिंडघटाद्यवस्थासु मृदाद्यन्वयात् ।

अन्येनान्यसंयोगे दंडिवदिति चेन्न अंतर्नीतसत्ताक्रियस्य युजेराश्रितत्वात् ॥ ४ ॥ स्यान्मतं उत्पादश्च व्ययश्च ध्रौव्यं च उत्पादव्ययध्रौव्याणि । उत्पादव्ययध्रौव्यैर्युक्तं उत्पादव्ययध्रौव्ययुक्तमिति निर्देशो नोपपद्यते । कुतः ? अन्येनान्यस्य योगात् दंडिवदिति ? तन्न । किं कारणं ? अंतर्नीतसत्ताक्रियस्य युजेराश्रितत्वात् । कथं पुनः युजेः सत्ताक्रियत्वं इति चेदुच्यते--सर्वे धातवो भाववचनाः भावश्च सत्ता क्रिया इत्यनर्थांतरं । तामेव सर्वे शब्दाः स्वार्थोपनिधानेनावच्छिद्यावच्छिद्य विषयीकुर्वंति । उत्पादव्ययध्रौव्ययुक्तं सदिति यावत् तावदुत्पादव्ययध्रौव्ययुक्तमिति । सर्वधातूनां सत्तार्थत्वे एधादीनां वृद्ध्यादिप्रातिनियतार्थत्वाभाव इति चेन्न सत्तार्थत्वे सत्येधादीना वृद्ध्याद्यर्थप्रवृत्तेर्नासतां खरविषाणादीनां वृद्ध्यादिरर्थोस्ति ।

उत्पादव्ययध्रौव्यवदिति न्याय्यमिति चेन्न उपालंभपरिहारतुल्यत्वात् ॥ ५ ॥ स्यादेतत् यद्यंतर्नीतसत्ता क्रिया युजिः परिगृह्यते उत्पादव्ययध्रौव्यवदित्येतदेव न्याय्यमिति ? तन्न । किं कारणं ? उपालंभपरिहारतुल्यत्वात् । यथा गोभ्योऽन्यत्वे देवदत्तस्य गोमानिति व्यपदेशो भवति न तथा उत्पादव्ययध्रौव्येभ्योऽन्यद्द्रव्यमिति मत्वर्थीयो नोपपद्यते इति उपालंभो न निवर्तते । अनन्यत्वेपि लोके मत्वर्थीयो दृश्यते--आत्मवान् आत्मा, सारवान् स्तंभः इति परिहारश्च तुल्यः ।

समाधिवचनत्वाद्वा ॥ ६ ॥ अथवा समाधिवचनोयं युजिः परिगृह्यते । युक्तः समाहित इत्यर्थः । समाधानं च तात्पर्यं तादात्म्यमिति यावत् । उत्पादव्ययध्रौव्ययुक्तमुत्पादव्ययध्रौव्यात्मकमित्यर्थः ।

कथंचिदन्यत्वोपपत्तेर्वा ॥ ७ ॥ यथा वा पर्यायेभ्यः पर्यायिणः कथंचिदन्यथाऽन्यत्वोपपत्तेः । योगवचन एव वा युक्तशब्दो न्याय्यः । यदि हि सर्वथा अनन्यत्वं स्यात् उभयाभावप्रसंगः स्यात् ।

सच्छब्दस्य प्रशंसाद्यनेकार्थसंभवे विवक्षातोऽस्तित्वसंप्रत्ययः ॥ ८ ॥ सच्छब्दः प्रशंसादिषु दृष्टप्रयोगः । प्रशंसायां तावत्-सत्पुरुषः प्रशस्तः पुरुष इत्यर्थः । क्वचिदादरे--सत्करोति आदरं करोतीत्यर्थः । क्वचिदस्तित्वे--सद्भूतमयमाह विद्यमानमाहेत्यर्थः । क्वचित् प्रज्ञायमाने--प्रव्राजितः सन्

कथमनृतं ब्रूयात् प्रव्रजित इति प्रज्ञायमान इत्यर्थः । तत्रेह विवक्षातः अस्तित्ववचनो वेदितव्यः ।

व्ययोत्पादाव्यतिरेकाद्द्रव्यस्य ध्रौव्यानुत्पत्तिरिति चेन्नाभिहितानवबोधात् ॥ ९ ॥ स्यादेतत् व्ययोत्पादाभ्यामव्यतिरेकात् द्रव्यस्य व्ययोत्पादात्मकत्वात् ध्रुवत्वं नोपपद्यते इति ? तन्न । किं कारणं अभिहितानवबोधात् । द्रव्यार्थावस्थानात् ध्रौव्यमभिहितं व्ययोत्पादाभ्यां व्यतिरेकात् । यदि च व्ययोत्पादाभ्यामव्यतिरेकात् ध्रौव्यमभिहितं स्यात् तदव्यतिरेकात् अध्रौव्यं भवेत् । यदि वा व्ययोत्पादाभ्यां व्यतिरेकात् द्रव्यं ध्रुवं द्रव्यादपि व्यतिरेकात् व्ययोत्पादयोर्ध्रौव्यं प्रसज्येत । अथवाऽभिहितानवबोधात् नैकांतेन व्ययोदयाभ्यामव्यतिरेको द्रव्यस्याभिहितः । यदि स्यात् तदत्यतव्यतिरेकात् तद्भावापत्तेर्ध्रौव्याभावः स्यात् । यतस्तु केनचित् प्रकारेण व्ययोत्पादाभ्यां व्यतिरेकः केनचिदव्यतिरेकः । व्ययोत्पादकाले द्रव्यार्थावस्थानात् स्याद्व्यतिरेकः । द्रव्यजात्यपरित्यागात् स्यादव्यतिरेकः । तत एकांतपक्षोपालभाभावः एकांतव्यतिरेके हि द्रव्यं प्रत्याख्याय अन्यत्र व्ययोदयावुपालभ्येयातां । ऐकांतिकाव्यतिरेके च एकलक्षणत्वात् अन्यतराभावेऽवशिष्टस्याप्यभावः स्यात् ।

स्ववचनविरोधाच्च ॥ १० ॥ यदि व्ययोत्पादाव्यतिरेकान्न द्रव्यस्य ध्रौव्यं यस्तेन स्वपक्षसिद्धये हेतुर्व्यपदिश्यते स साधकत्वादव्यतिरिक्त इति पक्षस्यापि साधकः स्यात् । परपक्षस्य वा यो दूषक इति ततोऽव्यतिरेकात् स्वपक्षस्यापि दूषक इति वचनविरोधः ततश्च न युक्तमुक्तं व्ययोत्पादाव्यतिरेकात् ध्रौव्यानुपपत्तिरिति ।

उत्पादादीनां द्रव्यस्य चोभयथा लक्ष्यलक्षणभावानुपपत्तिरिति चेन्न अन्यत्वानन्यत्वं प्रत्यनेकांतोपपत्तेः ॥ ११ ॥ स्यान्मतं उत्पादव्ययध्रौव्याणि द्रव्यादर्थांतरभूतानि वा स्युः अनर्थांतरभूतानि वा ? यद्यर्थांतरभावः कल्प्येत तानिव सत्त्वानि ततोऽन्यत्वात् द्रव्यत्वाभावः स्यात् तदभावे च निराधारत्वात् उत्पादादीनामभावः इति लक्ष्यलक्षणभावो नोपपद्यत । नहि असतां वंध्यापुत्राकाशकुसुमादीनां लक्ष्यलक्षणभावोऽस्ति । अथानर्थांतरत्वमिष्येत । लक्ष्यमेव लक्षणमिति दृष्टविरोधः स्यात् इति ? तन्न । किं कारणं ? अन्यत्वानन्यत्वं प्रत्यनेकांतोपपत्तेः । पर्यायिणः पर्यायाणां च स्यादन्यत्वं स्यादनन्यत्वं । यथैकस्य मनुष्यस्य जातिकुलरूपादिभिः अविशिष्टस्य अनेकसंबंधांतराविर्भूतपितृपुत्रभ्रातृभागिनेयादयो धर्माः परस्परतोविशिष्टा उपलभ्यंते न तेषां भेदात्तस्य भेदः । नापि तस्याभेदात्तेषामभेदः । ततः पितृत्वादि शक्त्यपेक्षया नानामनुष्यत्वापेक्षया न पृथक् । तथा द्रव्यस्यापि बाह्याभ्यंतरहेतुविशेषापादिताः पर्यायाः कथंचिद्भिन्नाः द्रव्यार्पणात् कथंचिदभिन्नाः इति नासत्त्व न लक्ष्यलक्षणभावाभावः । तस्मादुत्पादादित्रयैक्यवृत्तिः सत्ता तद्युक्तं द्रव्यमित्यवसेय । अत्राह—द्रव्यस्यात्मभूतोऽन्वयो धर्मः तथा पर्यायोऽप्यात्मभूतो द्रव्यस्येति तन्निवृत्तिवद्द्रव्यनिवृत्तिकल्पनायामुच्छेदप्रसंग इत्यत्र ब्रूमहे स्यादेतदेवं यदि क्रमेण पिंडघटकपालादिवद्रूपिद्रव्याजीवानुपयोगत्वादिलक्षणः परिणामः कादाचित्कः स्यात् । यतः सत्यपि व्ययोत्पादवत्त्वे पर्यायाणां—

तद्भावाव्ययं नित्यं ॥ ३० ॥

किं अध्यवस्यामः ? द्रव्यमिति वाक्यशेषः तद्भाव इत्युच्यते । कस्तद्भावः ?

प्रत्यभिज्ञानहेतुना तद्भावः ॥ १ ॥ तदेवेदमिति स्मरणं प्रत्यभिज्ञानं तदकस्मान्न भवति इति योऽस्य हेतुः स तद्भावः भवनं भावः तस्य भावस्तद्भावः । येनात्मना प्राग्दृष्टं वस्तु तेनैवात्मना पुनरपि भावात् तदेवेदमिति प्रत्यभिज्ञायते । यद्यत्यंतविरोधाभिनवप्रादुर्भावमात्रमेव, स्मरणानुपपत्तेः तदधीनलोकसंव्यवहारो विरुध्यते । ततः तद्भावेनाव्ययं नित्यमिति निश्चीयते ।

विरोध इति चेद्धर्मांतराश्रयणात् ॥ २ ॥ स्यान्मतं यदेव न व्येति उत्पद्यमान एव नोपपद्यते इति विरोधः, ततो न युक्तमिति तन्न । किं कारणं धर्मांतराश्रयणात् यदि येन रूपेण व्ययोदयकल्पना तेनैव रूपेण नित्यता प्रतिज्ञायेत स्याद्विरोधः । जनकत्वापेक्षयैव पितापुत्रव्यपदेशवत् । ननु धर्मांतरसंश्रयणात् पुनरपि मिथ्यादर्शनाकुलितचेता निरूपितमपि त्रितयात्मकत्वमप्रतिपद्यमान आह—

यन्वेति उत्पद्यते च तत्सानित्यं चेत्यतिसाहसमेतत् दुरुपपादत्वात् कथं श्रद्धीयत इत्यत्रोच्यते-श्रद्धेहि व्ययोत्पादवत्सु पर्यायेषु अव्यभिचारिणि सन्नित्यत्वे स्त इति । कुतः ? यस्माद्द्रव्यार्थिकपर्यायार्थिकनयसंभवे अन्यतरविवक्षावशात् यथोक्ते उभे अपि—

अर्पितानर्पितसिद्धेः ॥ ३१ ॥

धर्मांतरविवक्षाप्रापितप्राधान्यमर्पितं ॥ १ ॥ अनेकात्मकस्य वस्तुनः प्रयोजनवशात् यस्य कस्यचिद्धर्मस्य विवक्षायां प्रापितप्राधान्यं अर्थरूपमर्पितमुपनीतमिति यावत् ।

तद्विपरीतमनर्पितं ॥ २ ॥ प्रयोजनाभावात् सतोप्यविवक्षा भवति इत्युपसर्जनीभूतमनर्पितमित्युच्यते अर्पितं चानर्पितं च अर्पितानर्पिते ताभ्यां सिद्धे सन्नित्यत्वे अर्पितानर्पिताभ्यां सिद्धे सन्नित्यत्वे अर्पितानर्पितसिद्धिः । तद्यथा—मृत्पिंडः रूपिद्रव्यमित्यर्पितः स्यान्नित्यः तदर्थापरित्यागात् । अनेकधर्मपरिणामिनोऽर्थस्य धर्मांतरविवक्षाव्यापारात् रूपिद्रव्यात्मनानर्पणात् मृत्पिंड इत्येवमर्पितं पुद्गलद्रव्यं स्यादानित्यं तस्य पर्यायस्याध्रुवत्वात् । तत्र यदि द्रव्यार्थिकनयविषयमात्रपरिग्रहः स्यात् व्यवहारलोपः तदात्मकवस्त्वभावात् । यदि पर्यायार्थिकनयगोचरमात्राभ्युपगमः स्यात् लोकयात्रा न सिध्यति तथाविधस्य वस्तुनोऽसद्भावात् तावेकत्रोपसंहृतौ लोकयात्रासमर्थौ भवेतः । तदुभयात्मकस्य वस्तुनः प्रसिद्धेः । इत्येवमर्पितानर्पितव्यवहारासिद्धे सान्नित्यत्वे । आह—

सतोऽनेकनयव्यवहारतंत्रत्वात् उपपन्ना भेदसंघातेभ्यः सतां स्कंधात्मनोत्पत्तिः । इदं तु संदिग्धं किं संघातः संयोगादेव व्यणुकादिलक्षणो भवति ? उत कश्चिद्विशेषोऽवध्रियते ? इत्युच्यते--सति संयोगे बंधादेकत्वपरिणामकात संघातो निष्पद्यते । यद्येवमिदमुच्यतां कुतो न खलु पुद्गलजात्यपरित्यागे संयोगे च भवति केषांचित् बंधोऽन्येषां नेति इत्युच्यते--यस्मात्तेषां पुद्गलात्माविशेषेपि अनंतपर्यायाणां परस्परविलक्षणपरिणामाहितसामर्थ्याद्बंधः प्रतीतः—

स्निग्धरूक्षत्वाद्बंधः ॥ ३२ ॥

स्नेहपर्यायाविर्भावात् स्निह्यते स्मेति स्निग्धः ॥ १ ॥ बाह्याभ्यंतरकारणवशात् स्नेहपर्यायाविर्भावात् स्निह्यते स्मेति स्निग्धः ।

रूक्षणाद्रूक्षः ॥ २ ॥ द्वितयनिमित्तवशात् रूक्षणात् रूक्ष इति व्यपदिश्यते । स्निग्धश्च रूक्षश्च स्निग्धरूक्षौ तयोर्भावः स्निग्धरूक्षत्व । स्निग्धत्वं चिक्कणत्वलक्षणः पर्यायः । तद्विपरीतः परिणामो रूक्षत्वं । स्निग्धरूक्षत्वादिति हेतुर्निर्देशः । तत्कृतो बंधो द्व्यणुकादिपरिणामः । द्वयोः स्निग्धरूक्षयोरण्वोः परस्पराश्लेषलक्षणे बंधे सति द्व्यणुकः स्कंधो भवति । एवं सख्येयासंख्येयानंतप्रदेशस्कंधो योज्यः ।

एकगुणादिसंख्येयासंख्येयानंतविकल्पः स्नेहः ॥ ३ ॥ अविभागपरिच्छेदैकगुणः स्नेहः स्नेहः प्रथमः । एवं द्वित्रिचतुःसंख्येयाऽसंख्येयानंतगुणः स्नेहविकल्पः । एवंगुणा परमाणवः संति ।

तथा रूक्षः ॥ ४ ॥ यथा स्नेह उक्तस्तथा रूक्षोऽपि संख्येयासंख्येयानंतविकल्पो वेदितव्यः । एवंगुणाः परमाणवः संति ।

तोयाजागोमहिष्युष्ट्रीक्षीरघृतेषु पांशुकणिकाशर्करादिषु च प्रकर्षाप्रकर्षदर्शनात्तदनुमानं ॥ ५ ॥ यथा तोयादजाक्षीरघृते प्रकृष्टस्नेहे ततः प्रकृष्टस्नेहे गोक्षीरघृते ततश्चाधिकस्नेहे महिषीक्षीरघृते ततोप्युत्कृष्टस्नेहे उष्ट्रीक्षीरघृते । पांशुभ्यः प्रकृष्टरूक्षगुणाः तुषकणिकादयः ततो विप्रकृष्टरूक्षाः शर्कराः तथा परमाणुष्वपि प्रकर्षाप्रकर्षवृत्त्या स्निग्धरूक्षगुणाः संतीत्यनुमानं क्रियते । **स्निग्धरूक्षगुणनिमित्ते बंधे अविशेषेण प्रसक्ते अनिष्टगुणनिवृत्त्यर्थमाह—**

न जघन्यगुणानां ॥ ३३ ॥

शाखादित्वाद्देहांगत्वाद्वा जघन्यशब्दसिद्धिः ॥ १ ॥ जघन्यमिव जघन्यमिति शाखादित्वात् सिध्यति । क उपमार्थः ? यथा शरीरावयवेषु जघनं निकृष्टं । तथाऽन्योपि निकृष्टो जघन्य इत्युच्यते । अथवा देहांगत्वात्सिद्धिः । जघने भवः, जघन्य इव जघन्यः । यथा जघनं भवे, निकृष्टस्तथान्योऽपि निकृष्टो जघन्य इति व्यपदिश्यते ।

गुणशब्दस्यानेकार्थत्वे विवक्षावशाद्भागग्रहणं ॥ २ ॥ गुणशब्दोऽनेकस्मिन्नर्थे दृष्टप्रयोगः । कश्चिद्रूपादिषु वर्तते रूपादयो गुणा इति । क्वचिद्भागे वर्तते द्विगुणाः यवा इति । क्वचिदुपकारे गुणज्ञः साधु उपकारज्ञ इति यावत । क्वचिद्द्रव्ये वर्तते–गुणवानयं प्रदेश इत्युच्यते यस्मिन् गावः शस्यानि च निष्पद्यंते। क्वचित्समेष्ववयवेषु द्विगुणा रज्जुरिति । क्वचिदुपसर्जने गुणभूता वयमस्मिन्ग्रामे उपसर्जनभूता इत्यर्थः । तत्रेह भागे वर्तमानः परिगृह्यते । जघन्यो गुणो येषां ते जघन्यगुणास्तेषां जघन्यगुणानां नास्ति बंधः । एतदुक्तं भवति एकगुणस्निग्धस्य एकगुणस्निग्धेन द्वितीयादिसंख्येयासंख्येयानंतगुणस्निग्धेन वा नास्ति बंधः । तस्यैवैकगुणस्निग्धस्य एकगुणरूक्षेण द्व्यादिसंख्येयासंख्येयानंतगुणरूक्षेण वा नास्ति बंधः । तथा एकगुणरूक्षस्यापि योज्यमिति । एतौ जघन्यगुणस्निग्धरूक्षौ वर्जयित्वा अन्येषां स्निग्धरूक्षाणां परस्परेण संबंधो भवतीति अविशेषेण प्रसंगे तत्रापि प्रतिषेधज्ञापनार्थमाह—

गुणसाम्ये सदृशानां ॥ ३४ ॥

सदृशग्रहणं तुल्यजातीयसंप्रत्ययार्थम् ॥१॥ स्निग्धजात्या रूक्षजात्या च तुल्यानां संप्रत्ययः कथं स्यादिति सदृशग्रहणं क्रियते ।

गुणसाम्यग्रहणं तुल्यभागसंग्रहार्थम् ॥ २ ॥ तुल्यभागा येषां तेषां ग्रहणार्थं गुणसाम्यग्रहणं क्रियते ।

सदृशग्रहणमनर्थकं गुणसाम्यवचनादिति चेन्न समानगुणकारयोः स्निग्धरूक्षयोः प्रतिषेधप्रसंगात् ॥ ३ ॥ स्यादेतत्सदृशग्रहणमनर्थकं । कुतः ? गुणसाम्यवचनात्सिद्धेरिति चेन्न, किं कारणं ? समानगुणकारयोः स्निग्धरूक्षयोः प्रतिषेधप्रसंगात् । सदृशग्रहणे ह्यसति द्विगुणस्निग्धानां द्विगुणरूक्षैः त्रिगुणस्निग्धानां त्रिगुणरूक्षैर्गुणकारसाम्याद्बंधः प्रतिषिध्येत । सदृशग्रहणे पुनः सति द्विगुणस्निग्धानां द्विगुणस्निग्धैर्द्विगुणरूक्षाणां द्विगुणरूक्षैरित्येवमादिसंबंधः कृतो भवति ।

नचेष्टत्वात् ॥ ४ ॥ न वा एतत्प्रयोजनमस्ति किं कारणं ? इष्टत्वात् । इष्यते द्विगुणस्निग्धानामपि द्विगुणरूक्षैर्बंधप्रतिषेधः । किमर्थं तर्हि सदृशग्रहणं ?

गुणवैषम्यबंधप्रतिपत्त्यर्थं ॥ ५ ॥ गुणवैषम्ये सदृशानां बंधो भवतीत्येतस्यार्थस्य प्रतिपत्त्यर्थं सदृशग्रहणं क्रियते । अतो विषमगुणानां तुल्यजातीयानां चाविशेषेण प्रसक्ताविष्टार्थसंप्रत्ययार्थमिदमुच्यते—

द्व्यधिकादिगुणानां तु ॥ ३५ ॥

द्व्यधिकश्चतुर्गुणः द्वाभ्यां गुणाभ्यामधिको द्व्यधिकः । कः पुनरसौ ? चतुर्गुणः ? ।

आदिशब्दस्य प्रकारार्थत्वात्पंचगुणादिसंप्रत्ययः ॥१॥ द्व्यधिकादीत्ययमादिशब्दः प्रकारार्थः । कः पुनरसौ प्रकारः ? द्वाभ्यामधिकता । तेन पंचगुणादिसंप्रत्ययो भवति । अवयवेन विग्रहः समुदायो वृत्त्यर्थ इति चतुर्गुणस्यापि ग्रहणं भवति । तेन द्व्यधिकादिगुणानां तुल्यजातीयानामतुल्यजातीयानां च बंध उक्तो भवति, नेतरेषां । तद्यथा–द्विगुणस्निग्धस्य परमाणोः एकगुणस्निग्धेन द्विगुणस्निग्धेन त्रिगुणस्निग्धेन वा नास्ति बंधः । चतुर्गुणस्निग्धेन पुनरस्ति बंधः । तस्यैव पुनर्द्विगुणस्निग्धस्य षट्सप्ताष्टनवदशसंख्येयासं-

षयेवानंतगुणस्निग्धेन बंधो न विद्यते । एवं त्रिगुणस्निग्धस्य पंचगुणस्निग्धेन बंधोऽस्ति, शेषैः पूर्वोत्तरैर्न भवति । चतुर्गुणस्निग्धस्य षड्गुणस्निग्धेनास्ति बंधः, शेषैः पूर्वोत्तरैर्नास्ति । एवं शेषेष्वपि योज्यं । तथा द्विगुणरूक्षस्य एकद्वित्रिगुणरूक्षैर्नास्ति बंधः । चतुर्गुणरूक्षेण त्वस्ति बंधः, तस्यैव द्विगुणरूक्षस्य पंचगुणरूक्षादिभिरुत्तरैर्नास्ति बंधः । एवं त्रिगुणरूक्षादीनामपि द्विगुणाधिकैर्बंधो योज्यः । एवं भिन्नजातीयेष्वपि द्विगुणस्निग्धस्य एकद्वित्रिगुणरूक्षैर्नास्ति बंधः । चतुर्गुणरूक्षेण त्वस्ति बंधः । उत्तरैः पंचगुणरूक्षादिभिर्नास्ति एवं त्रिगुणस्निग्धादीनां पंचगुणरूक्षादिभिरस्ति । शेषैः पूर्वोत्तरैर्नास्ति बंध इति योज्यः ।

उक्तं च— णिद्धस्स णिद्धेण दुराहिएण लुक्खस्स लुक्खेण दुराहिएण ।
णिद्धस्स लुक्खेणउवेदि बंधो जहण्णवज्जो विसमे समे वा ॥ १ ॥

एवमुक्तेन विधिना बंधे सत्यणूनां द्व्यणुकाद्यनंतानंतप्रदेशावसानस्कन्धोत्पत्तिर्वेदितव्या ।

तुशब्दो व्यावृत्तिविशेषप्रतिपत्त्यर्थः ॥ २ ॥ तुशब्दः क्रियमाणः प्रतिषेधं व्यावर्तयति–बंधं च विशेषयति । अत्राह किमर्थं संयोगजातीयपुद्गलानां बंधो नाम धर्मः कल्प्यते, न प्राप्त्यात्मकत्वादनेनैव सर्वसामूहिकव्यवहारसिद्धिरित्युच्यते–संयोगेऽपि सति प्राप्तिमात्रेण कृतार्थत्वात् परस्परानुप्रवेशनिरूसकौ स्निग्धरूक्षगुणौ स्कन्धौ परमाणूनां संयोगमात्रत्वात् पारिणामिकौ न स्यातां, शुक्लकृष्णतन्तुसंयोगावस्थानवत्ततोऽयमारंभः ।

बंधेऽधिको पारिणामिकौ च ॥ ३६ ॥

प्रकृतत्वाद्गुणसंप्रत्ययः ॥ १ ॥ प्रकृतं गुणग्रहणं तदभिसंबंधाद्गुणसंप्रत्ययो भवतीत्यधिकगुणाविति ।

भावांतरापादानं परिणामकत्वं क्लिन्नगुडवत् ॥ २ ॥ यथा क्लिन्नगुडो हि मधुररसः पतितानां रेण्वादीनां स्वगुणापादानात्परिणामकः । तथाऽन्योऽपि अधिकगुणः अल्पीयसः परिणामक इति कृत्वा द्विगुणादिस्निग्धरूक्षस्य चतुर्गुणादिस्निग्धरूक्षपरिणामको भवतीति, ततः पूर्वावस्थाप्रच्यवपूर्वकं तार्तीयिकमवस्थांतरं प्रादुर्भवतीत्येकस्कंधत्वमुपपद्यते, इतरथा हि शुक्लकृष्णतंतुवत्संयोगे सत्यप्यपरिणामकत्वात् सर्वविविक्तरूपेणैवावतिष्ठते, दृश्यते हि श्लेषे सति वर्णरसगंधस्पर्शानामवस्थांतरभावः शुक्लपीतादिसंयोगे शुकपत्रवर्णादिप्रादुर्भाववत् ।

समाधिकावित्यपरेषां पाठः ॥ ३ ॥ बंधे समाधिकौ परिणामिकावित्यपरे सूत्रं पठंति, द्विगुणस्निग्धस्य द्विगुणरूक्षोपि परिणामक इति ।

तदनुपपत्तिरार्षविरोधात् ॥ ४ ॥ सः पाठो नोपपद्यते, कुतः ? आर्षविरोधात् । एवं ह्युक्तमार्षे वर्गणायां बंधविधाने नोआगमद्रव्यबंधविकल्पे सादिवैस्रसिकबंधनिर्देशः प्रोक्तः । विषमरूक्षतायां च बंधः । समस्निग्धतायां समरूक्षतायां च भेदः इति तदनुसारेण च सूत्रमुक्तं । गुणसाम्ये सदृशानामित्यतः समगुणानां बंधप्रतिषेधाद्बन्धे समः परिणामक इत्यार्षविरोधिवचो न विद्वद्ग्राह्यं ।

विषमे समे वास्ति बंधः इति वचनाद्विरोध इति चेन्नार्षाज्ञानात् ॥ ५ ॥ स्यान्मतं जघन्यवर्ज्यो विषमे समे वास्ति इति वचनात्समगुणस्यापि बंध इत्यभ्युपगमान्नास्ति विरोध इति चेन्न किं कारणं ? आर्षाज्ञानात् । नायमस्यार्थः समगुणस्य बन्ध इति कस्तर्हि ? समस्तुल्यजातीयः । विषमोऽतुल्यजातीयः । समस्य चतुर्गुणस्निग्धस्य षड्गुणस्निग्धेनास्ति बंधः । विषमस्य चतुर्गुणरूक्षस्य षड्गुणस्निग्धेनास्तिबंधः इत्ययमार्षस्तत्रैतस्य किमर्थोऽयमारम्भ इत्युच्यते पौद्गलिकं कर्मात्मस्थानंतानंतप्रदेशं कायवाङ्मनोयोगनिमित्तविस्रसोपचितानंतप्रदेशस्निग्धरूक्षपरिणतं बन्धमायातमात्मनः ज्ञानावरणादिभावेन त्रिंशत्सागरोपमकोटिकोट्यध्यवस्थानभाक् तत्परिणामकापादितपरिणामाद्गुडादिवत् विश्वग्भवतीति । अत्राह–उक्तं भवता द्रव्याणि जीवाजीवाश्चेति तत्र किमुद्देशत एव द्रव्याणां प्रसिद्धिराहोस्विल्लक्षणतोऽपीत्यत्रोच्यते–लक्षणतोऽपि प्रसिद्धिः । तत्कथमिति चेदुच्यते–

गुणपर्ययवद्द्रव्यं ॥ ३७ ॥

गुणाश्च पर्यायाश्च गुणपर्यायास्ते यस्य संतीति तद्गुणपर्यायवदिति मतुर्नोपपद्यते अनर्थांतरभावात् । अर्थांतरभावेऽभावप्रसंग इत उत्तरं पठति—

अनन्यत्वेऽपि लोके सुवर्णांगुलीयकवद्व्यपदेशदर्शनान्मत्वर्थीयसिद्धेः ॥ १ ॥ अनन्यत्वेऽपि लोके व्यपदेशो दृश्यते, यथा सुवर्णस्यांगुलीयकमिति । तथा लक्षणतः कथंचिद्भेदोपपत्तेः गुणपर्यायेभ्योऽनन्यत्वे कथंचिद्भेदसिद्धेः मत्वर्थीयमुपपद्यते ।

गुणाभावादयुक्तिरिति चेन्नार्हत्प्रवचनहृदयादिषु गुणोपदेशात् ॥ २ ॥ गुणा इति संज्ञा तंत्रांतराणां, आर्हतानां तु द्रव्यं पर्यायश्चेति द्वितयमेव तत्त्वं अतश्च द्वितयमेव तदुद्वयोपदेशात् । द्रव्यार्थिकः पर्यायार्थिक इति द्वावेव मूलनयौ यदि गुणोऽपि कश्चित्स्यात्, तद्विषयेण मूलनयेन तृतीयेन भवितव्यं । न चास्त्यसाविल्यतो गुणाभावात्, गुणपर्यायवदिति निर्देशो न युज्यते ? तन्न किं कारणं ? अर्हत्प्रवचनहृदयादिषु गुणोपदेशात् । उक्तं हि अर्हत् प्रवचने "द्रव्याश्रया निर्गुणा गुणा" इति । अन्यत्र चोक्तं—

> गुण इति दव्वविधाणं दव्ववियारोयपज्जयो भणिदो ।
> तेहि अणूणं दव्वं अजुदवसिद्धं हवदि णिच्चं ॥ १ ॥ इति

यदि गुणोऽपि विद्यते ननु चोक्त–तद्विषयस्तृतीयो मूलनयः प्राप्नोति ? नैषः दोषः द्रव्यस्य द्वावात्मानौ सामान्यं विशेषश्चेति । तत्र सामान्यमुत्सर्गोऽन्वयः गुण इत्यनर्थांतरं । विशेषो भेदः पर्याय इति पर्यायशब्दः । तत्र सामान्यविषयो नयो द्रव्यार्थिकः । विशेषविषयः पर्यायार्थिकः । तदुभयं समुदितमयुतसिद्धरूपं द्रव्यमित्युच्यते । न तद्विषयस्तृतीयो नयो भवितुमर्हति, विकलादेशत्वान्नयानां । तत्समुदायोऽपि प्रमाणगोचरः सकलादेशत्वात्प्रमाणस्य । गुणा एव पर्याया इति वा निर्देशः । अथवा उत्पादव्ययध्रौव्याणि न पर्यायाः । न तेभ्योऽन्ये गुणाः सन्ति ततो गुणा एव पर्यायाः इति सति सामानाधिकरण्ये मतौ सति गुणपर्यायवदिति निर्देशो युज्यते ।

विशेषणानुपपत्तिरर्थाभेदादिति चेन्न मतांतरनिवृत्त्यर्थत्वात् ॥ ३ ॥ स्यादेतद्यदि गुणा एव पर्याया विशेषणमनर्थकं, कुतः ? अर्थाभेदात्ततो गुणवदिति वा पर्यायवदिति वा वक्तव्यमिति तन्न किं कारणं ? मतांतरनिवृत्त्यर्थत्वात् । मतान्तरं हि द्रव्यादन्ये गुणाः परिकल्पिताः, न ते संति ? अर्थांतरभावे सत्यनुपलब्धिप्रसङ्गात् । अतो द्रव्यस्य परिणमनं परिवर्तनं पर्यायः । तद्भेदा एव गुणाः न भिन्नजातीया इति मतांतरनिवृत्त्यर्थत्वात् विशेषणमर्थवत् । उक्तानां द्रव्याणां लक्षणनिर्देशात्तद्विषय एव द्रव्यव्यवसायप्रसक्ते, अनुक्तद्रव्यसंसूचनार्थमिदमाह—

कालश्च ॥ ३८ ॥

यथोक्तद्रव्यलक्षणोपेतत्वाद्द्रव्यं ॥ १ ॥ यथोक्तं द्रव्यलक्षणं उत्पादव्ययध्रौव्ययुक्तं सत्, गुणपर्ययवद्द्रव्यमिति च तेन लक्षणेनोपेतत्वात् कालश्च द्रव्यमित्यवगम्यते । कथं लक्षणोपेतत्वमित्युच्यते ।

आकाशादिवत्तत्सिद्धिः ॥ २ ॥ यथाकाशादीनां लक्षणं तथा कालस्यापि सिध्यति । ध्रौव्यं तावत्कालस्य स्वप्रत्ययं स्वभावव्यवस्थानात् । व्ययोदयौ परप्रत्ययौ अगुरुलघुगुणवृद्धिहान्यपेक्षया स्वप्रत्ययौ च । तथा गुणा अपि कालस्य साधारणासाधारणरूपाः संति । तत्रासाधारणः वर्तनाहेतुत्वं साधारणाश्चाचेतनत्वामूर्तत्वसूक्ष्मत्वागुरुलघुत्वादयः । पर्यायाश्च व्ययोत्पादलक्षणा योज्याः । तस्यास्तित्वलिङ्ग सन्निवेशक्रमश्च व्याख्यातः ।

आह द्रव्यत्वे सति किमसौ कालः आकाशवदेक उत संख्येयोऽसंख्येयोऽनंतो वेति ? अत्रोच्यते—

सोऽनंतसमयः ॥ ३९ ॥

व्यवहारकालप्रमाणावधारणार्थं वचनम् ॥ १ ॥ मुख्याः परमार्थकालाणवः । धर्मास्तिकाय-

प्रदेशतुल्याः संख्येया व्याख्याताः। इदं तु वचनं व्यवहारकालप्रमाणावधारणार्थं क्रियते सांप्रतिकस्यैकसमयिकत्वेप्यतीतानागताश्च समया अंतातीता इति कृत्वा अनंता व्यपदिश्यंते।

मुख्यस्यैव वानंतपर्यायवर्तनाहेतुत्वात् ॥ २ ॥ अथवा मुख्यस्यैव कालस्य प्रमाणावधारणार्थमुच्यते। अनंतपर्यायवर्तनाहेतुत्वादेकोऽपि कालाणुरनंत इत्युपचर्यते। समयः पुनः परमनिरुद्धकालांशः तत्प्रचयविशेष आवलिकादिराख्यातः।

आह–गुणपर्यायवद्द्रव्यमित्युक्तं तत्र के गुणाः इत्यत्रोच्यते–

द्रव्याश्रया निर्गुणा गुणाः ॥ ४० ॥

आश्रयशब्दोऽधिकरणसाधनः कर्मसाधनो वा ॥ १ ॥ अयमाश्रय शब्दः अधिकरणसाधनः, गुणा यत्राश्रयन्ते स आश्रय इति पुल्लिंग निर्देशः। अथवा कर्मसाधनः गुणैराश्रियत इत्याश्रयः। द्रव्यशब्द उक्तार्थः द्रव्यमाश्रयो येषां ते द्रव्याश्रयाः।

निर्गुण इति विशेषणं द्व्यणुकादिनिवृत्त्यर्थं ॥ २ ॥ द्रव्याश्रया गुणा इत्युच्यमाने व्द्यणुकादिष्वपि गुणसंप्रत्ययः स्यात्, कारणद्रव्याश्रयाणि कार्यद्रव्याणीति ततस्तन्निवृत्त्यर्थं निर्गुणा इति विशेषणमुपादीयते। द्व्यणुकादीनां हि रूपादयो गुणाः सन्तीति तन्निवृत्तिः कृता भवति।

पर्यायाणां गुणत्वप्रसंग इति चेन्न द्रव्याश्रया इति विशेषणात्तन्निवृत्तेः ॥ ३ ॥ स्यान्मत यदि गुणा द्रव्याश्रया इत्येतत्तावल्लक्षणं गुणानां पर्यायाणामपि [illegible] तदुभयगर्भानि गुणत्व प्राप्नोतीति, तन्न किं कारण ? द्रव्याश्रया इति विशेषणात्तन्निवृत्तेः। न [illegible] इति विशेषणं तदाश्रयत्वप्रतिपत्त्यर्थं तदंतरेणापि सिध्यति कुत ? सामर्थ्यतः निराश्रयगुणा[illegible]। [illegible]श्रयांतराभावाच्च, ततस्तदनर्थकं पर्यायनिवृत्त्यर्थं भवति। किं शब्दाधिक्यादर्थाधिक्यमिति पर्यायनिवृत्तिर्गृह्यते ? न। इत्याह

नित्यर्थे वा निवृत्तिविधानात् ॥ ४ ॥ इति मत्वर्थेऽन्यपदार्थे वृत्तिर्मत्वर्थश्च नित्ययोगे विद्यत इति नित्ययोगोऽत्र वेदितव्यः। नित्यं द्रव्यमाश्रित्य ये वर्तन्ते ते गुणा इति। पर्यायाः पुनः कादाचित्का इति न तेषां ग्रहणं। तेनान्वयिनो धर्मा गुणा इत्युक्तं भवति तद्यथा जीवस्यास्तित्वादयः, ज्ञानदर्शनादयश्च। पुद्गलस्याचेतनत्वादयः रूपादयश्चेति। पर्यायाः पुनः घटज्ञानादयः कपालादिविकाराश्च। आहात्रोक्तः परिणामशब्दः असकृत्त तु तस्यार्थो वर्णितः तस्मादुच्यतां कः परिणामः ? इति–

तद्भावः परिणामः ॥ ४१ ॥

अथवा गुणा द्रव्यादर्थांतरभूता इति केषांचिद्दर्शनं, तत्किं भवतः सम्मतं ? नेत्याह—यद्यपि कथंचिद्व्यपदेशादिभेदहेत्वपेक्षया द्रव्यादन्ये तथापि तद्व्यतिरेकात्तत्परिणामाच्चानन्ये। यद्येव स उच्यतां कः परिणाम इति ?। तन्निश्चयार्थमिदमुच्यते, तद्भावः परिणामः।

धर्मादीनां येनात्मना भवनं सः तद्भावः परिणामः ॥ १ ॥ धर्मादीनि द्रव्याणि येनात्मना भवंति स तद्भावः तत्त्वं परिणाम इत्याख्यायते।

तत्स्वरूपं व्याख्यातं ॥ २ ॥ तस्य परिणामस्य स्वरूपं व्याख्यातं। क ? वर्तनापरिणामक्रिया इत्यत्र।

स द्विधाऽनादिरादिमांश्च ॥ ३ ॥ स एष परिणामो द्विधा भिद्यते। अनादिरादिमांश्चेति।

तत्रानादिर्धर्मादीनां गत्युपग्रहादिः। न ह्येतदस्ति धर्मादीनि द्रव्याणि प्राक्, पश्चाद्गत्युपग्रहादिः। प्राग्वा गत्युपग्रहादिः पश्चाद्धर्मादीनि इति, किं तर्हि ? अनादिरेषां संबंधः। आदिमांश्च बाह्यप्रत्ययापादितोत्पादः। अत्रान्ये धर्माधर्मकालाकाशेषु अनादिःपरिणामः आदिमान् जीवपुद्गलेषु इति वदन्ति तदयुक्तं। कुतः ? सर्वद्रव्याणामनाद्यात्मकत्ववत्त्वं, अन्यथा नित्याभावप्रसंगात्। कथं तर्हि मान्यं ?

नयद्वयवशात्सर्वत्र तदुभयसिद्धिः ॥ ४ ॥ द्रव्यार्थिकपर्यायार्थिकनयद्वयाविवक्षावशात्, सर्वेषु धर्मादिद्रव्येषु स उभयः परिणामोऽवसेयः । अयं तु विशेषः धर्मादिषु चतुर्षु द्रव्येष्वत्यंतपरोक्षेष्वनादिरादिमांश्च परिणामः आगमगम्यः जीवपुद्गलेषु कथंचित्प्रत्यक्षगम्योपि ।

इति तत्त्वार्थवार्तिके व्याख्यानालंकारे पंचमोध्यायः ॥

अथ षष्ठोऽध्यायः ।

आह—अजीवपदार्थो व्याख्यात इदानीं तदनंतरोद्देशभागास्रवपदार्थो व्याख्येय इति ततस्तत्प्रसिद्ध्यर्थमिदमुच्यते—

कायवाङ्मनःकर्मयोगः ॥ १ ॥

कायादीनामितरेतरयोगलक्षणो द्वंद्वः ॥ १ ॥ कायश्च वाक्च मनश्च कायवाङ्मनांसि इतीतरेतरयोगे द्वंद्वः ।

वाङ्मनसः प्रसंग इति चेन्न बहुषु तदभावात् ॥ २ ॥ स्यादेतद्वाङ्मनसमिति प्राप्नोतीति तन्न किं कारणं ? बहुषु तदभावात् । द्वयोः हि सविधिर्मात बहुषु न भवति । कायवाङ्मनसां कर्म कायवाङ्मनःकर्मेति । कृतमिक 'स' इति सत्वं, कायादयः शब्दा व्याख्यातार्थाः ।

कर्मशब्दस्यानेकार्थत्वे क्रियावाचिनो ग्रहणमिहान्यस्यासंभवात् ॥ ३ ॥ कर्मशब्दोऽनेकार्थः क्वचित्कर्तुरीप्सिततमेत्र वर्तते यथा घटं करोतीति । क्वचित्पुण्यापुण्यवचनः यथा कुशलाकुशलं कर्मेति । क्वचिच्च क्रियावचनः यथा उत्क्षेपणमवक्षेपणमाकुंचनं प्रसारणं गमनमिति कर्माणीति । तत्रेह क्रियावचिनो ग्रहणं । कुतः ? अन्यस्यासंभवात् । तत्कथमिति चेदुच्यते—

न कर्तुरीप्सिततमस्येतरस्योभयस्य च विवक्षासंभवात् ॥४॥ कर्तुः क्रियया आप्तुमिष्टतमं कर्म तत्त्रिविधं निर्वर्त्य-विकार्य-प्राप्यं चेति त्रितयमपि कर्तुरन्यत् । तत्र यदि कायादीनां कर्मत्वं कर्मान्यद्वाच्यं, नचातो ऽन्यत्सूत्रगृहीतमस्ति । अथ कर्मत्वं कायादीनां कर्ताऽन्यो वाच्यः । न चासौ सगृहीतोऽस्ति । अथ युगपत्कर्तृत्वं चेष्टितं तच्चासंभवात् असत् । तस्मात्कर्तुरीप्सिततमं नेह परिगृहीत ।

नापि पुण्यापुण्यलक्षणमुत्तरसूत्रस्य सामर्थ्यात् ॥ ५ ॥ नापीह पुण्यापुण्यलक्षणं कर्म गृह्यते कुतः ? उत्तरसूत्रसामर्थ्यात् । यदि पुण्यापुण्यलक्षणमिह गृह्येत, स आस्रवः शुभः पुण्यस्येत्युत्तरसूत्रारंभोऽनर्थकः स्यात् ।

कर्तुरीप्सिततमं वात्मनः कर्तृत्वात् ॥ ६ ॥ अथवा सामर्थ्यं सन्निहित इहात्मा कर्ता तस्य कर्तुरीप्सिततमत्वात्पारिभाषिकं कर्म गृह्यते ।

कर्त्रादिसाधनेष्विच्छातो विशेषोऽध्यवसेयः ॥ ७ ॥ कर्मशब्दस्य कर्त्रादिषु साधनेषु संभवात् स्वेच्छातो विशेषोऽध्यवसेयः ।

वीर्यान्तरायज्ञानावरणक्षयोपशमापेक्षेणात्मनात्मपरिणामः पुद्गलेन स्वपरिणामः व्यत्ययेन च निश्चयव्यवहारनयापेक्षया क्रियत इति कर्मकरणप्रशंसाविवक्षायां कर्तृधर्माध्यारोपे सति स परिणामः । कुशलमकुशलं च द्रव्यभावरूपं करोतीति कर्म । आत्मनः प्राधान्यविवक्षायां कर्तृत्वे सति परिणामस्य करणत्वोपपत्तेः । बहुलापेक्षया क्रियतेऽनेन कर्मेत्यपि भवति । साध्यसाधनभावानभिसायां स्वरूपावस्थिततत्त्वकथनात् कृतिः कर्मेत्यपि भवति । एवं शेषकारकोपपत्तिश्च योज्याः ।

योगशब्दस्यापि तथैव ॥ ८ ॥ तेनैव प्रकारेण योगशब्दस्यापि कर्त्रादिसाधनसंभवो योज्यः ।

त्रैविध्यानुपपत्तिरात्मपरिणामाविशेषादिति चेन्न पर्यायविवक्षाव्यापाराद्रूपादिवत् ॥ ९॥ स्यान्मतं योगस्य त्रैविध्यं नोपपद्यते कुतः ? आत्मपरिणामाविशेषात्। आत्मा हि निरवयवद्रव्यं तत्परिणामो योगः सोऽविशिष्ट इति तन्न, किं कारणं पर्यायविवक्षाव्यापाराद्रूपादिवत्। यथा घटस्यैकत्वमजहतश्चक्षुरादि करणसंबंधवशाद्रूपादिपरिणामभेदः। तथात्मनः एकत्वेऽपि पर्यायभेदात् योगस्य भेदो ज्ञेयः।

चक्षुरादिग्रहणनिमित्तत्त्वाद्रूपाध्यवसायस्येति चेन्नात्माभेदेऽपि कायादीनां पूर्वकृतकर्मोपादितसामर्थ्योपलंभात् ॥ १० ॥ स्यादेतदुच्यते घटस्य रूपादिभेदाध्यवसायः। कुतः ? चक्षुरादिग्रहणनिमित्तत्वात्। ग्रहणभेदाद्धि लोके ग्राह्यभेदो दृष्ट. न तथात्मन इति, तन्न किं कारणं ? आत्माभेदेऽपि कायादीनां पूर्वकृतकर्मोपादितसामर्थ्योपलभात्। तद्यथा पुद्गलविपाकिनः शरीरनामकर्मण उदयापादिते कायवाङ्मनोवर्गणान्यतमालंबने सति वीर्यान्तरायमत्यक्षराद्यावरणक्षयोपशमापादिताभ्यंतरवाग्लब्धिसान्निध्ये वाक्परिणामाभिमुख्यस्यात्मनः प्रदेशपरिस्पंदो वाग्योगः। अभ्यन्तरवीर्यांतरायनोइंद्रियावरणक्षयोपशमात्मकमन उपलब्धिसन्निधाने पूर्वोक्तबाह्यनिमित्तालंबने च सति मनःपरिणामाभिमुखस्यात्मनः प्रदेशपरिस्पंदो मनोयोगः। वीर्यांतरायक्षयोपशमसद्भावे च औदारिकादिसप्तविधकायवर्गणान्यतमालंबनापेक्षात्मप्रदेशपरिस्पंदः काययोगः यदि क्षयोपशमलब्धिरभ्यन्तरहेतुः क्षये कथं ? क्षयेऽपि हि सयोगकेवलिनः त्रिविधो योग इष्यते। अथ क्षयनिमित्तोऽपि योगः कल्प्यते अयोगकेवलिनां सिद्धानां च योगः प्राप्नोति ? नैष दोषः क्रियापरिणामिनः आत्मनस्त्रिविधवर्गणालंबनापेक्षः प्रदेशपरिस्पन्दः। सयोगकेवलिनो योगविधिर्विद्यते, तदालंबनाभावात् उत्तरेषां योगविधिर्नास्ति।

अनेकांताच्च लावकादिवत् ॥ ११ ॥ यथा देवदत्तस्य जातिकुलरूपसंज्ञालक्षणसम्बंधाद्यविशेषादेकत्वमजहतः बाह्योपकरणसंबंधोपनीतभेदलावकपावकादिपर्यायानास्कन्दतः स्यादेकत्वं स्यादनेकत्वमित्यनेकान्तस्तथा प्रतिनियतक्षायोपशमिक-शरीरादिपर्यायार्थादेशात्स्यात्त्रैविध्यं योगस्य, अनादिपारिणामिकात्मद्रव्यार्थादेशात्स्यादैकविध्यमित्यनेकांतः। ततो नायमुपालंभः।

ध्यानं योग इति चेन्न तस्य वक्ष्यमाणत्वात् ॥ १२ ॥ स्यादेतद्ध्यानं योगशब्दार्थः न कायवाङ्मनस्कर्मेति तन्न किंकारण ? तस्य वक्ष्यमाणत्वात्। युज समाधिवचनस्य योगः। समाधिः ध्यानमित्यनर्थान्तरं स तु वक्ष्यते। इहास्रवप्रतिपादनार्थत्वात् त्रिविधः क्रियायोग इत्युच्यते।

समुदाये योगव्यपदेशप्रसङ्ग इतिचेन्न प्रत्येकं वाक्यपरिसमाप्तेः ॥ १३ ॥ स्यान्मतं यथा गर्गाः शतं दण्ड्यतामिति अर्थिनश्च राजानो हिरण्येन भवंति न प्रत्येकं दण्डयन्ति। कुतः ? समुदाये वाक्यपरिसमाप्तेः, तथा कायवाङ्मनस्कर्मसमुदाये योगव्यपदेशः प्रसक्त इति चेन्न किंकारणं ? प्रत्येकं वाक्यपरिसमाप्तेः। यथा देवदत्तजिनदत्तगुरुदत्ता भोज्यंतामिति भुजिः प्रत्येकं परिसमाप्यते। तथा योगव्यपदेशोपि प्रत्येकं त्रिषु कर्मसु वेदितव्यः।

अत्राहाभ्युपेमः आहितत्रैविध्याः क्रिया योग इति प्रकृत इदानीं निर्दिश्यतां किंलक्षण आस्रव इत्यत्रोच्यते. योयं योगशब्दाभिधेयः संसारिणः पुरुषस्य प्रयोगस्त्रिविधः—

स आस्रवः ॥ २ ॥

कायवाङ्मनस्कर्मास्रव इत्यस्तु लघुत्वादिति चेन्न योगाप्रत्याख्यानात् ॥ १ ॥ स्यान्मतं कायवाङ्मनस्कर्मास्रव इत्यस्तु सूत्रं, कुतः लघुत्वादिति तन्न किं कारणं ? योगाप्रत्याख्यानात्। योगशब्दो हि आगमे प्रसिद्धः, तस्यार्थो प्रत्याख्यातः स्यात्।

कायवाङ्मनस्कर्मयोग आस्रव इति चेन्न सर्वयोगास्रवप्रसंगात् ॥ २ ॥ अथ मतमेतत्कायवाङ्मनस्कर्म योग आस्रव इत्येकयोगः कर्तव्यस्तथा सति तच्छब्दस्यावचनात्, योगविभागस्य चाकरणात् निर्देशश्च लघुर्भवति, योगशब्दार्थश्चाप्रत्याख्यातो भवति इति। तन्न किं कारणं ? सर्वयोगास्रवप्रं-

सङ्गात् । केवलिसमुद्धातकाले हि दण्डकपाटप्रतरलोकपूर्णयोगस्याप्यास्रवत्व प्रसज्येत । अस्त्वास्रवत्वं को दोषः ? सूक्ष्मयोगत्वं तत्रेष्यंत तन्निमित्तश्च बन्धोऽल्पः, तद्विपरीतता प्राप्नोति । अपि च वर्गणालम्बन निमित्तो योग आस्रवः इष्यते, नच दण्डादियोगस्तदालम्बनहेतुकः, तस्मादस्यास्रवत्वं नेष्यते । यद्येवं दण्डादिव्यापारकाले नास्रवत्वादबधकत्वं प्राप्नोति इष्यते च बधः ? नैष दोषः । न दण्डादियोगनिमित्तो बंधः किं तर्हि ? कायवर्गणानिमित्तः आत्मप्रदेशपरिस्पन्दोऽस्ति तन्निमित्तस्तत्र बधः ।

एकयोगेऽपि तत्प्रयोजनकारणात्तदप्रसङ्ग इति चेन्न योगविभागकरणसामर्थ्यात्तत्प्रतीतेः ॥ ३ ॥ यथा केवलिनः सत्स्वपीन्द्रियेषु तदव्यापारात्, इन्द्रियजकर्मबन्धाभावः तथा दण्डादियोगे सत्यपि तत्पूर्वकबन्धाभावात् आस्रवत्वमस्य । योगविभागवदेकयोगेऽपि व्यावर्तत इति तन्न किं कारणं ? योगविभागकरणसामर्थ्यात्तत्प्रतीतेः । सति हि योगविभाग उद्दिष्टयोगः स आस्रवो भवति नान्य इत्ययमर्थोऽवगंतुं शक्यते तेनान्योऽपि योगोऽस्तीति सूच्यते । एकयोगे पुनः सति तस्यार्थस्याप्रतीतेः सर्वस्य योगस्यास्रवत्वं प्रसज्यत एव । अथास्रवाभिधानं कुतो भवति ?

तत्प्रणालिकया कर्मास्रवणादास्रवाभिधानम् ॥ ४ ॥ सलिलवाह्यद्वारं तदास्रवणकारणत्वात् आस्रव इत्याख्यायते । तथा योगप्रणालिकया आत्मनः कर्म आस्रव इति व्यपदेशमर्हति ।

कषायविक्लिन्नस्य तदुपश्लेष आर्द्रवस्त्ररेणुवत् ॥ ५ ॥ यथार्द्रवासः समान्ताद्वातानीत रेणुमुपादत्ते, तथा कषायतार्द्र आत्मा योगानीतं कर्म सर्वप्रदेशैर्गृह्णाति । यथा वानिष्टप्तायःपिण्डोऽम्भसि प्रक्षिप्त अम्भः समन्तादात्मसात्करोति । तथा सकषायो जीवो योगानीतं कर्म समन्तादादत्ते ।

आह कर्म द्विविधं पुण्यं पापं चेति तस्य किमविशेषेण योगः आस्रवणहेतुराहोस्विदस्ति कश्चित्प्रति विशेष इत्यत्रोच्यते-

शुभः पुण्यस्याऽशुभः पापस्य ॥ ३ ॥

प्राणातिपातानृतभाषणवधचिंतनादिरशुभः ॥ १ ॥ प्राणातिपातादत्तादानमैथुनप्रयोगादिरशुभः काययोगः । अनृतभाषणपुरुषासत्यवचनादिरशुभो वाग्योगः । वधचिंतनेर्ष्यासूयादिरशुभो मनोयोगः ।

ततोऽनंतविकल्पादन्यः शुभः ॥ २ ॥ तस्मादनंतविकल्पादशुभयोगादन्यः शुभयोग इत्युच्यते । तद्यथा अहिंसाऽस्तेयब्रह्मचर्यादिः शुभकाययोगः । सत्यहितमितभिषणादिः शुभो वाग्योगः । अर्हदादिभक्तितपोरुचिश्रुतविनयादिः शुभोमनोयोगः । आहाऽसख्येयलोकत्वादध्यवसायावस्थानानां कथमनंतविकल्पत्वं ? इत्युच्यते । अनंतानंतपुद्गलप्रदेशप्रचितज्ञानावरणवीर्यांतरायदेशसर्वघातिद्विविधस्पर्धकक्षयोपशमादेशायोगत्रयस्यानंत्यं । अनंतानंतप्रदेशकर्माधानकारणत्वाद्वा, अनंतानंतमानाजीवविषयभेदाद्वानंतः । कथं योगस्य शुभाशुभत्वम् ? ।

शुभाशुभपरिणामनिर्वृत्तत्वाच्छुभाशुभव्यपदेशः ॥ ३ ॥ शुभपरिणामनिर्वृत्तो योगः शुभः । अशुभपरिणामनिर्वृत्तश्चाशुभः इति कथ्यते । न शुभाशुभकर्मकारणत्वेन । यद्येवमुच्यते शुभयोग एव न स्यात् शुभयोगस्यापि ज्ञानावरणादिबंधहेतुत्वाभ्युपगमात् ।

पुनात्यात्मानं पूयतेऽनेनेति वा पुण्यं ॥ ४ ॥ कर्मणः स्वातंत्र्यविवक्षायां पुनात्यात्मानं प्रीणयतीति पुण्यं । पारतंत्र्यविवक्षायां करणत्वोपपत्तेः पूयतेऽनेनेति वा पुण्यं तत्सद्वेद्याद्युत्तरत्र वक्ष्यते ।

तत्प्रतिद्वंद्विरूपं पापं ॥ ५ ॥ तस्य पुण्यस्य प्रतिद्वंद्विरूपं पापमिति विज्ञायते । पाति रक्षत्यात्मानं यस्माच्छुभपरिणामादिति पापाभिधानं तदसद्वेद्याद्युतरत्र वक्ष्यते ।

उभयमपि पारतंत्र्यहेतुत्वादविशिष्टमिति चेन्नेष्टानिष्टनिमित्तभेदात्तत्सिद्धेः ॥ ६ ॥ स्यान्मतं यथा निगलस्य कनकमयस्यास्य स्वतंत्रीकरणं फलं तुल्यमित्यविशेषः । तथा पुण्यं पापं चात्मनः

पारतंत्र्यनिमित्तमविशिष्टमिति नात्र संकल्पभेदो युक्त इति तन्न, किं कारणं ? इष्टानिष्टनिमित्तभेदात्तत्सिद्धेः। यदिष्टगतिजातिशरीरेंद्रियविषयादिनिर्वर्तकं तत्पुण्यं । अनिष्टगतिजातिशरीरेंद्रियविषयादिनिर्वर्तकं यत्तत्पापमित्यनयोरयं भेदः । तत्र शुभो योगः पुण्यस्यास्रवः । अशुभः पापस्य ।

शुभपरिणामस्य घातिकर्मनिमित्तत्वात्तदनिर्देश इति चेन्नेतरपुण्यपापापेक्षत्वात् ॥ ७ ॥ स्यादेतच्छुभः पुण्यस्येत्यनिर्देशः अगमको निर्देशः अनिर्देशः कुतः ? घातिकर्मबंधस्य शुभपरिणामहेतुत्वादिति तन्न किं कारणं ? इतरपुण्यपापापेक्षत्वात्। अघातिकर्मसु पुण्यं पापं चापेक्ष्येदमुच्यते कुतः ? घातिकर्मबंधस्य स्वविषये निमित्तत्वात् । अथवा नैवमवधारणं क्रियते शुभः पुण्यस्यैवेति कथं तर्हि ? शुभ एव पुण्यस्येति तेनाशुभः पापस्यापि हेतुरित्यविरोधः । यद्येव शुभः पापस्यापि भवति अशुभः पुण्यस्यापि भवतीत्यभ्युपगमः कर्तव्यः, सर्वोत्कृष्टस्थितीनां उत्कृष्टसंक्लेशहेतुकत्वात् । उक्तं च-

सव्वट्ठिदीण मुक्कस्स गोदु उक्कस्स संकिलेसेण ।
विपरीदे दु जघण्णो आयुगतिगवज्जसेसाण ॥ इति

ततः सूत्रद्वयमनर्थकमिति । नानर्थकं अनुभागबंधं प्रत्येतदुक्तं । अनुभागबंधो हि प्रधानभूतः तन्निमित्तत्वात्सुखदुःखविपाकस्य । तत्रोत्कृष्टविशुद्धपरिणामनिमित्तः सर्वशुभप्रकृतीनामुत्कृष्टानुभागबंधः । उत्कृष्टसंक्लेशपरिणामनिमित्तः सर्वाशुभप्रकृतीनामुत्कृष्टानुभागबंधः । उत्कृष्टः शुभपरिणामः । अशुभजघन्यानुभागबंधहेतुत्वेऽपि भूयसः शुभस्य हेतुरिति शुभः पुण्यस्येत्युच्यते । यथाल्पापकारहेतुरपि बहूपकारसद्भावादुपकार इत्युच्यते । एवमशुभः पापस्येत्यपि । उक्तंच-

शुभपयडीण विसोधिए तिव्वमसुहाणसंकिलेसेण ।
विपरीदे दु जघण्णो अणुभागो सव्वपयडीणं ॥ इति

आह किमयमास्रवः सर्वसंसारिसमानफलारम्भहेतुराहोस्वित्कश्चिदस्ति विशेष इत्यत्रोच्यते-

सकषायाकषाययोः सांपरायिकेर्यापथयोः ॥ ४ ॥

आस्रवस्योभयस्वामिकत्वाद्द्वयीप्रसिद्धिः ॥ १ ॥ उभौ-आस्रवस्य स्वामिनौ सकषायोऽकषायश्चेति । तस्यास्रवस्यान्येऽपि स्वामिनोद्वैविध्यकल्पनया द्वयीप्रसिद्धिरित्यसेया । कोऽत्र कषायः ?

कषत्यात्मानमिति कषायः ॥ २ ॥ क्रोधादिपरिणामः कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः ।

कषायवद्वाश्लेषहेतुत्वात् ॥ ३ ॥ अथवा यथा कषायो नैयग्रोधादिः श्लेषहेतुस्तथा क्रोधादिरप्यात्मनः कर्मश्लेषहेतुत्वात्कषाय इत्युच्यते । सह कषायेण वर्तते इति सकषायः । न विद्यते कषायोऽस्येत्यकषायः । सकषायश्चाकषायश्च सकषायाकषायौ तयोः सकषायाकषाययोः ।

समन्तात्पराभव आत्मनः संपरायः ॥ ४ ॥ कर्मभिः समन्तादात्मनः पराभवोऽभिभवः संपराय इत्युच्यते ॥

तत्प्रयोजनं सांपरायिकं ॥५॥ तत्प्रयोजनं कर्म सांपरायिकमित्युच्यते यथा ऐंद्रमहिकमिति ।

ईरणमीर्या योगगतिः ॥ ६ ॥ ईरेर्गत्यर्थाद्भावे ण्यः । ईरणमीर्या योगगतिरिति यावत् । तद्द्वारकमीर्यापथं । सा ईर्याद्वारं पन्था यस्य तदीर्यापथं कर्म। सांपरायिकं च ईर्यापथं च सांपरायिकेर्यापथे तयोः सांपरायिकेर्यापथयोः यथा सख्यमभिसंबंधो भवति। सकषायस्यात्मनः सांपरायिकस्य कर्मण आस्रवो भवति। अकषायस्य ईर्यापथस्येति। तद्यथा—सांपरायः कषाय इत्यर्थः। मिथ्यादृष्ट्यादीनां सूक्ष्मसांपरायांतानां कषायोदयेऽपि तच्छीलपरिणामानां योगवशादानीतं कर्म भावेनोपश्लिष्यमाणं आर्द्रचर्माश्रितरेणुवत् स्थितिमापद्यमानं संपरायिकमित्युच्यते । उपशांतक्षीणकषाययोः योगिनश्च योगवशादुपात्तकर्मकषायाभावाद्बंधाभावे शुष्ककुड्यपतितलोष्ठवत् अनन्तरसमयवर्तमानमीर्यापथमित्युच्यते ।

अजाद्यदित्युभयत्र पूर्वनिपातप्रसंग इति चेन्नातिबहुवक्तव्यतया तयोरभ्यर्हितत्वात् ॥ ७ ॥ स्यादेतदकषायशब्दस्येर्यापथशब्दस्य चाजाद्यदिति पूर्वनिपातः प्राप्नोति ? तन्न किं कारणं ? अतिबहुवक्तव्यतया तयोरभ्यर्हितत्वात् सकषायशब्दस्य सांपरायिकशब्दस्य चाभ्यर्हितत्वमिति पूर्वनिपातो भवति । यदि सांपरायिकास्रवो बहुवक्तव्यः तस्य के भेदाः ? इत्यत्रोच्यते

॥ इंद्रियकषायाव्रतक्रियाः पंचचतुःपंचपंचविंशतिसंख्याः पूर्वस्य भेदाः ॥५॥

इंद्रियादय उक्तलक्षणा द्वंद्वविषयाः ॥ १ ॥ इंद्रियादीनामुक्तलक्षणानां द्वंद्वो वेदितव्यः । इंद्रियाणि च कषायाश्च अव्रतानि च क्रियाश्च इंद्रियकषायाव्रतक्रिया इति स चायं द्वंद्व इतरेतरयोग लक्षण इति बहुवचनं भवति ।

पंचादीनां संख्याशब्दानां संख्यया वृत्तिः ॥२॥ पंचादीनां संख्याशब्दाना संख्याशब्देन सह वृत्तिर्दृष्टव्या पंचाधिका विंशतिः पंचविंशतिः । पंच च चत्वारश्च पंच च पंचविंशतिश्च पंचचतुःपंचपंचविंशतिः सा संख्या येषां ते पंचचतुःपंचपंचविंशतिसंख्याः ।

पूर्वशब्दो व्यवस्थावचनः ॥३॥ अयं पूर्वशब्दो व्यवस्थावचनः अतीतसूत्रे यः प्राङ् निर्दिष्टस्तस्येति ;

भिद्यंते इति भेदाः ॥ ४ ॥ परस्परतो भिद्यंते विशिष्यंते इति भेदाः प्रकारा इत्यर्थः ।

यथासंख्यमभिसंबंधो व्याख्यानतः ॥ ५ ॥ यथासंख्यमभिसंबंधोऽत्र दृष्टव्यः । कुतः ? व्याख्यानतः । पंचेंद्रियाणि चत्वारः कषायाः, पंचाव्रतानि पंचविंशति क्रिया इति ।

इंद्रियादीनामात्मनोऽनन्यत्वान्यत्वं प्रत्यनेकांतः ॥ ६ ॥ इंद्रियादीनामात्मनः अनन्यत्वान्यत्वं प्रत्यनेकांतो वेदितव्यः । तद्यथा — अनादिपारिणामिकचैतन्यद्रव्यार्थादेशादिंद्रियादीनां भेदाभावादनन्यत्वं । कर्मोदयक्षयोपशमनिमित्तपर्यायार्थादेशाद्भेदोपपत्तेः स्यादन्यत्वम् । इंद्रियादिनिवृत्तौ द्रव्यावस्थानाच्च स्यादन्यत्वं तत एव पर्यायभेदात्पंचादिसंख्यानिर्देश उपपन्नो भवति । तत्र पंचेंद्रियाणि स्पर्शादीन्युक्तानि । क्रोधादयः कषायाः अनंतानुबन्ध्यादिविकल्पाः वक्ष्यंते । हिंसादीन्यव्रतानि प्रमत्तयोगात्प्राणव्यपरोपणं हिंसेत्येवमादिलक्षणानि वक्ष्यंते । पंचविंशतिः क्रिया उच्यंते —

सम्यक्त्वमिथ्यात्वप्रयोगसमादानेर्यापथक्रियाः पंच ॥ ७ ॥ तत्र चैत्यगुरुप्रवचनपूजादिलक्षणा सम्यक्त्ववर्धिनी क्रिया सम्यक्त्वक्रिया । अन्यदेवतास्तवनादिरूपा मिथ्यात्वहेतुका प्रवृत्तिर्मिथ्यात्वक्रियाः । गमनागमनप्रवर्तनं कायादिभिः प्रयोगक्रिया । वीर्यांतरायज्ञानावरणक्षयोपशमे सति अंगोपांगोपष्टंभादात्मनः कायवाङ्मनोयोगनिर्वृत्तिसमर्थपुद्गलग्रहणं वा संयतस्य सतः अविरतिं प्रत्याभिमुख्यं समादानक्रिया । ईर्यापथकर्मनिमित्ता ईर्यापथक्रिया । एताः पंचक्रियाः ॥

प्रदोषकायाधिकरणपरितापप्राणातिपातक्रियाः पंच ॥ ८ ॥ क्रोधावेशात्प्रादोषिकी क्रिया सा क्रोधस्वभावेति क्रोधग्रहणेनैव गृहीते पौनरुक्त्यमिति चेन्न । क्रोधनिमित्तत्वात् । क्रोधो हि प्रदोषहेतुः, अतः कार्यकारणभेदादपौनरुक्त्यं । निमित्तनैमित्तिकभेदाच्च । इष्टदारवित्तहरणादिनिमित्तादिनापि पिशुनस्वभावत एव क्रुध्यति । तथा दृष्टिविषादयश्च । उक्तंच —

> अणिमित्तमेव कोई कम्मस्सव संगदो कसायाण ॥
>
> उदयं उवेदि जीवो भंदइव महग्गहं पव्वे ॥

तथा मृगलोहिततीव्रलोलजिह्वहरिशार्दूलवृकैर्निसर्गहिंस्रैः भुजगैश्च सर्वैर्जातरोषैः समरूपाण्यसतां विचेष्टितानि इत्यनिमित्तः क्रोधः निमित्तवान्प्रदोषः । प्रदुष्टस्य सतोऽभ्युद्यमः कायिकी क्रिया । हिंसोपकरणदानादाधिकरणकी क्रिया । दुःखोत्पत्तितंत्रत्वात्पारितापिकी क्रिया । आयुरिंद्रियबलप्राणानां वियोगकरणात्प्राणातिपातिकी क्रिया एताः पंचक्रियाः ।

दर्शनस्पर्शनप्रत्ययसमंतानुपातनाभोगक्रियाःपंच॥९॥ रागार्द्रीकृतत्वात्प्रमादिनः रमणीयरूपावलोकनाभिप्रायो दर्शनक्रिया। प्रमादवशात्स्पृष्टव्यसचेतनानुबंधः स्पर्शनाक्रिया। ननु इंद्रियग्रहणादेव सिद्धिर्दर्शनग्रहणमनर्थकमिति नैष दोषः। पूर्वत्रेंद्रियविज्ञानग्रहणं। इह तत्पूर्वपरिस्पंदग्रहणं। अपूर्वाधिकरणोत्पादनात्प्रात्ययिकी क्रिया। स्त्रीपुरुषपशुसंपातिदेशेंऽतर्मलोत्सर्गकरणं समान्तानुपातक्रिया। अप्रमृष्टादृष्टभूमौ कायादिनिक्षेपोऽनाभोगक्रिया। एताः पंचक्रियाः।

स्वहस्तनिसर्गविदारणाज्ञाव्यापादनानाकांक्षाक्रियाः पंच ॥ १० ॥ या परेण निर्वर्त्यां क्रियां स्वयं करोति सा स्वहस्तक्रिया। पापादानादिप्रवृत्तिविशेषाभ्यनुज्ञानं निसर्गक्रिया। आलस्याद्वा प्रशस्तक्रियाणामकरणं पराचरितसावद्यादिप्रकाशनं विदारणक्रिया। यथोक्तामाज्ञामावश्यकादिषु चारित्रमोहोदयात्कर्तुमशक्नुवतोऽन्यथाप्ररूपणादाज्ञाव्यापादिका क्रिया। शाठ्यालस्याभ्यां प्रवचनोपदिष्टविधिकर्तव्यतानादरोऽनाकांक्षा क्रिया। ता एताः पंचक्रियाः।

आरंभपरिग्रहमायामिथ्यादर्शनाप्रत्याख्यानाक्रियाः पंच ॥ ११ ॥ छेदनभेदनविस्रंसनादिक्रियापरत्वं, अन्येन वारंभे क्रियमाणे प्रहर्ष आरंभक्रिया। परिग्रहाविनाशार्था पारिग्राहिकी क्रिया। ज्ञानदर्शनादिषु निकृतिर्वंचनं मायाक्रिया। अन्यं मिथ्यादर्शनक्रियाकरणकारणाविष्टं प्रशंसादिभिर्दृढयति यथा साधु करोषीति सा मिथ्यादर्शनक्रिया। संयमघातिकर्मोदयवशादनिवृत्तिरप्रत्याख्यानक्रिया।

इंद्रियकषायाव्रतानां क्रियास्वभावानतिवृत्तेः क्रियावचनेनैव गतत्वात्प्रपंचमात्रप्रसंग इति चेन्नानेकांतात् ॥ १२ ॥ स्यान्मतं इंद्रियकषायाव्रतान्यपि क्रियास्वभावानि ततस्तेषां क्रियाग्रहणेन ग्रहणादनर्थकमुपादानं, सति चोपादाने प्रपंचमात्रत्वं प्राप्नोतीति तन्न किं कारणं ?—अनेकांतात्। नायमेकांतः इंद्रियकषायाव्रतानि क्रियास्वभावान्येवेति, कुतः ? नामस्थापनाद्रव्येंद्रियकषायाव्रतेषु परिस्पंदाभावात्। यतो नामेंद्रियादौ न क्रियास्ति नाममात्रत्वात्। स्थापनायां च न मुख्या क्रियास्ति तदेवेदमिति वाग्बुद्धिप्रवृत्तिमात्रनिमित्तत्वात्। द्रव्ये च प्रत्युत्पन्नेंद्रियकषायाव्रतक्रियापरिणामे अनागतेंद्रियकषायाव्रतक्रियापरिणामाभिमुखे वा सांप्रतिकेंद्रियकषायाव्रतानामभावात् परिस्पंदात्मिका क्रियास्ति। अथवा नायमेकांतः, इंद्रियकषायाव्रतानि क्रियास्वभावान्येवेति कुतः ? आदेशवचनात्। द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्यतः इंद्रियकषायाव्रतानां स्यात् क्रियास्वभावाऽनतिवृत्तिः। पर्यायार्थिकगुणभावे द्रव्यार्थिकप्राधान्यात्स्यात्क्रियास्वभावातिवृत्तिरिति। किं च—

शुभेतरास्रवपरिणामाभिमुखत्वात् इंद्रियकषायाव्रतानां द्रव्यास्रवत्वात् ॥१३॥ शुभेतरास्रवपरिणामाभिमुखत्वादिंद्रियकषायाव्रतानां द्रव्यास्रवत्वं, भावास्रवः कर्मादानं तच्च पंचविंशतिक्रियाभिरास्रवति कर्मेत्येतदर्थमिंद्रियकषायाव्रतवचनम्।

नवा प्रतिज्ञानविरोधात् ॥१४॥ नवा एतत्प्रयोजनमस्ति। किं कारणं ? प्रतिज्ञातविरोधात्। यत्प्रतिज्ञातं कायवाङ्मनस्कर्मयोग आस्रव इति तद्विरुध्यते। द्रव्यास्रव इत्यभ्युपगमात्। कार्यकारणक्रियाकलापविषये ज्ञापनार्थं वा। निमित्तनैमित्तकविशेषज्ञापनार्थं (तर्हि) पृथगिंद्रियादिग्रहणं क्रियते तत्स्पृशत्यादयः कुप्यत्यादयः हिनस्त्यादयश्च क्रिया आस्रव इमाः पुनस्तत्प्रभवाः पंचविंशतिक्रियाः सत्स्वेतेषु त्रिषु प्रात्येषु परिणामेषु भवंति—यथा मूर्छा कारणं परिग्रहः कार्यं तस्मिन्सति पारिग्राहिकी क्रिया। न्यासरक्षणविनाशसंस्करादिलक्षणा। तथा क्रोधः कारणं प्रदोषश्च कार्यं तस्मिन् सति प्रादोषिकी क्रिया। मानः कारणं कार्यमप्रणतिः तस्यां सत्यामपूर्वाधिकरणोत्पादनत्वात्प्रात्ययिकी क्रिया। माया कारणं कार्यं कुटिलक्रिया तस्यां सत्यां ज्ञानदर्शनचरित्रेषु मायाप्रवृत्तिःक्रिया। प्राणातिपातः कारणं कार्यं प्राणातिपातिकी क्रिया। मृषावादादत्तादानाब्रह्मचर्याणि कारणं कार्यमसंयमोदयादाज्ञाव्यापादिकी क्रिया एवमितरत्रापि योज्यं।

इंद्रियग्रहणमेवास्त्विति चेन्न तदभावेप्यास्रवसद्भावात् ॥ १५ ॥ स्यादेतदिंद्रियग्रहणमेवास्तु कुतः लघुत्वात् इंद्रियैर्हि उपलभ्य विचार्य च कषायाव्रतक्रियासु प्रवर्तते प्रजाः। अतः इंद्रियवचनेनैव गतत्वात् कषायाव्रतक्रियासु कषायाव्रतक्रियाणामग्रहणमस्त्विति ? तन्न किं कारणं तदभावेप्यास्रवसद्भावात् यदि हींद्रियग्रहणमेव स्यात् प्रमत्तस्यैव उक्तःस्यान् नाप्रमत्तस्य । प्रमत्तो हि चक्षुरादिभिः, रूपादिविषयासेवनं प्रत्यादत्तः रूपादीन् सेवमानो वा अनंतानुबंध्यप्रत्याख्यानक्रोधमानमायालोभहिंसादिकरणकषायाद्येकपरिणतः हिंसादीन् कुर्वन्नकुर्वन्न वा सातत्येनाविरतः प्रमत्तः कर्मादत्ते। अप्रमत्तस्तु पंचदशप्रमादातीतोपि योगकषायनिमित्तमास्रवमश्नुते । एकद्वित्रिचतुरिंद्रियसंज्ञिपंचेंद्रियेषु च यथासंभवं चक्षुरादींद्रियमनोविचाराभावेपि क्रोधादिहिंसापूर्वककर्मादानं दृश्यते तस्मात् सर्वग्रहणं क्रियते ।

कषायाणां सांपरायिकभावेपि पर्याप्तत्वात् अग्रहणमिति चेन्न सन्मात्रेपि तत्प्रसंगात्॥१६॥ स्यान्मतं नारक्तद्विष्टो रूपाधीनत्वात् चक्षुरादिभिरुपलभते वाऽरक्तद्विष्टो जीवान् हिनस्ति मृषावादादिषु वा वर्तते अतः कषायग्रहणेनैव सांपरायिकास्रवस्य पर्याप्तत्वात् इंद्रियाव्रतक्रियाणां अग्रहणमस्तु इति ? तन्न किं कारणं ? सन्मात्रेपि तत्प्रसंगात् । उपशांतकषायस्य कषायसन्मात्रावस्थानचक्षुरादिभीरूपादिग्रहणात् रागद्वेषहिंसाद्यात्मलाभप्रसंगः । किं च चक्षुरादिभिः रूपादिग्रहणं वीतरागत्वात् अन्यथा यस्य चक्षुरादिभी रूपादिग्रहणमात्रत्वात् रक्तद्विष्टत्वं तस्य वीतरागत्वाभावः । तस्मात् कषायग्रहणमात्रमयुक्तं ।

अव्रतवचनमेवेति चेन्न तत्प्रवृत्तिनिमित्तनिर्देशार्थत्वात् ॥१७॥ स्यादेतत् अव्रतवचन[illegible] युक्तं तत्रैवेंद्रियकषायक्रियापरिणामांतर्भावादिति ? तन्न किं कारणं ? तत्प्रवृत्तिनिमित्तनिर्देशार्थत्वात् । [illegible] हि अव्रतस्येंद्रियपरिणामाः प्रवृत्तिनिमित्तानि भवंति ततस्तद्ग्रहणं न्याय्यं । आह योगत्रयस्य एका[illegible]रिंशत्प्रभेदाः सर्वात्मकार्यत्वात् संसारिणां सर्वेषां साधारणाः तत[illegible]त्वानुभवं प्रत्यविशेष इति ? अत्रोच्यते नैतदेवं यस्मात् सत्यपि प्रत्यात्मसंभवे तेषां परिणामेभ्यः, अनंतविकल्पेभ्यः, विशेषोभ्यनुज्ञायते। कथमिति चेदुच्यते-

तीव्रमंदज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः ॥ ६ ॥

अतिप्रवृद्धक्रोधादिवशात् तीव्रनात्तीव्रः ॥ १ ॥ बाह्याभ्यंतरहेतूदीरणवशादुद्रिक्तः परिणामः तीव्रनात् स्थूलभावात् तीव्र इत्युच्यते ।

तद्विपरीतो मंदः ॥ २ ॥ अनुदीरणप्रत्ययसान्निधानात् उत्पद्यमानोनुद्रिक्तः परिणामो मदनात् मंद इत्युच्यते ।

ज्ञातमात्रं ज्ञात्वा वा प्रवृत्तेर्ज्ञातं ॥ ३ ॥ हिनस्मि इत्यसति परिणामे प्राणव्यपरोपणे ज्ञानमात्रं मया व्यापादित इति ज्ञातं । वा अयं प्राणी हंतव्यः इति ज्ञात्वा प्रवृत्तेः ज्ञातमित्युच्यते ।

मदात्प्रमादाद्वाऽनवबुध्यप्रवृत्तिरज्ञातं ॥ ४ ॥ सुरादिपरिणामकृतात् करणव्यामोहकरात् मदाद्वा प्रणिधानविरहलक्षणात् प्रमादाद्वा प्रव्यादिष्वनवबुध्य प्रवृत्तिरज्ञातमिति व्यवसीयते ।

अधिक्रियतेस्मिन्नर्था इत्यधिकरणं ॥ ५ ॥ अर्थाः प्रयोजनानि पुरुषाणां यत्राधिक्रियंते प्रस्तूयते तदधिकरणं द्रव्यमित्यर्थः ।

द्रव्यस्यात्मसामर्थ्यं वीर्यं ॥ ६ ॥ द्रव्यस्य शक्तिविशेषः सामर्थ्यं वीर्यमिति निश्चीयते ।

भावशब्दस्य प्रत्येकं परिसमाप्तिर्भुजिवत् ॥ ७ ॥ यथा देवदत्तजिनदत्तगुरुदत्ता भोज्यंतामिति भुजिः प्रत्येकं परिसमाप्यते तथायं भावशब्दः प्रत्येकं तीव्रादिभिरभिसंबध्यते । तीव्रभावः मंदभावः ज्ञातभावः अज्ञातभाव इति ।

युगपदसंभवात् भावशब्दस्यायुक्तं विशेषणमिति चेन्न बुद्धिविशेषव्यापारात् ॥ ८ ॥ स्यान्मतं भावो नाम द्रव्यस्य अहेयः परिणामः तस्यैकत्वात् सदात्मख्यापनं युगपत्तीव्रादिविशेषणं चानुपपन्नं

यथा गोत्वमेकं न खंडमुंडादीनां गोद्रव्याणां विशेषकं गोप्रत्ययाभिधानहेतुत्वात् तथा भावः सत्प्रत्ययाभिधानहेतुत्वात् न तीव्रादीनां विशेषक इति ? तन्न किं कारणं? बुद्धिविशेषव्यापारात्, बौद्धोयं व्यापारः तीव्रादिपरिणामानां विशेषकः। कथं ?-

भावद्वैविध्यात् ॥ ९ ॥ द्विविधो हि नोद्रव्याणां भावः परिस्पंदरूपः इतरश्च । तत्रापरिस्पंदो द्रव्याणां अस्तित्वभावोनादिः । परिस्पंदरूपस्तु व्ययोत्पादात्मकः आदिमान् । तत्र योऽपरिस्पंदः स सामान्यमात्रगतोभावः नासौ तीव्रादीनां विशेषकः । यस्तु कायादिक्रियालक्षणो भावः स कायादिमत्त्वस्य युगपत्तीव्रादीनां च विशेषकः कायवाङ्मनस्कर्मयोगाधिकारात् सोऽयं विशेषः बौद्धाद्व्यापारात् विभाव्यते । अथवा भाववचनात् आत्मनोऽव्यतिरेकात् तीव्रादीनामपि भावसिद्धिः । किं च—

भावभूयस्त्वात् ॥१०॥ असंख्येयलोकपरिणामा हि भावाः एकैकस्मिन्नपि कषायादिपरिणामे ततो भावबहुत्वोपपत्तेः युगपदसंभवात् एकस्य भावस्य, अयुक्तः संबंधः इत्यवबोध्यते, योपि त्वन्मत्याऽयं भावः एकः तथापि बौद्धाद् व्यापारात्संबंधः ।

वीर्यस्यात्मपरिणामत्वात् पृथग्ग्रहणमिति चेन्न तद्विशेषवतो व्यपरोपणादिष्वास्रवफलभेदज्ञापनार्थत्वात् ॥११॥ स्यान्मतं पृथग् वीर्यग्रहणमनर्थकं । कुतः ? आत्मपरिणामत्वात्, जीवाधिकरणस्य हि परिणामो वीर्यमधिकरणग्रहणेनैव गृह्यत इति ? तन्न किं कारणं ? तद्विशेषवतो व्यपरोपणादिष्वास्रवादिज्ञापनार्थत्वात् । वीर्यवतो हि आत्मनः तीव्रतीव्रतरादिपरिणामविशेषो ज्ञायते ।

तथा च तीव्रादिग्रहणसिद्धिः ॥१२॥ तेन प्रकारेण तथा आस्रवफलभेदज्ञापनेनेत्यर्थः । तीव्रादीनां पृथग्ग्रहणं सिद्धं भवति । इतरथा हि जीवाधिकरणस्वरूपत्वात् तीव्रादीनां पृथग्ग्रहणमनर्थकं स्यात् ।

तन्निमित्तत्वाच्छरीराद्यानंत्यसिद्धिः ॥१३॥ कार्यभेदेनावश्यं कारणभेदपूर्वेण भवितव्यं । उक्ताश्चानंता आस्रवभेदा अनुभागविकल्पात् ततः तत्कार्यमात्मनः शरीराद्यानंत्यं सिध्यति । कार्यानंत्यं च कारणानंत्यस्यानुमानं । अत्राह अधिकरणमुक्तं तत्स्वरूपमनिर्ज्ञातमतस्तदुच्यतामिति तत्र भेदप्रतिपादनद्वारेण अधिकरणस्वरूपनिर्ज्ञानार्थमिदमुच्यते—

अधिकरणं जीवाजीवाः ॥ ७ ॥

उक्तलक्षणा जीवाजीवाः ॥१॥ जीवानामजीवानां च लक्षणं व्याख्यातं पुनर्वचनमिदानीं किमर्थं ?

पुनर्वचनमधिकरणविशेषज्ञापनार्थं ॥ २ ॥ पुनर्वचनं क्रियते अधिकरणविशेषज्ञापनार्थं । जीवानामधिकरणं इत्यर्थविशेषो ज्ञापयितव्य इति । कः पुनरसौ हिंसाद्युपकरणभावः ।

द्विवचनप्रसंग इति चेन्न पर्यायाणामधिकरणत्वात् ॥ ३ ॥ स्यादेतत्तन्मूलपदार्थयोर्द्वित्वात् जीवश्चाजीवश्च जीवाजीवाविति द्विवचनं प्राप्नोतीति ? तन्न किं कारणं ? पर्यायाणामधिकारत्वात् । न जीवाजीवसामान्यमधिकरणत्वं बिभर्ति किं तर्हि पर्यायाः येन केनचित् पर्यायेण विशिष्टं द्रव्यं अधिकरणमित्याख्यायते ततो बहुवचनं न्यायप्राप्तं ।

जीवाजीवाधिकरणमित्यस्तु लघुत्वादिति चेन्न वृत्तिद्वयेप्यभिप्रेतार्थगत्यभवात् ॥ ४ ॥ स्यादेतत् जीवाजीवाधिकरणमित्येतत्सूत्रमस्तु कुतः ? लघुत्वादिति तन्न किं कारणं ? वृत्तिद्वयेप्यभिप्रेतार्थगत्यभावात् । अत्र द्वितयी वृत्तिः स्यात् जीवाजीवावेवाधिकरणं जीवाजीवयोर्वाधिकरणं जीवाजीवाधिकरणमिति न तावत्सामानाधिकरण्यलक्षणा वृत्तिरुपपद्यते जीवाजीवत्वविशेषणाविशिष्टाधिकरणमात्रप्रतिपत्तेः आस्रवविशेषज्ञापनाभावात् अभिप्रेतार्थगत्यभावः । नापि भिन्नाधिकरणा वृत्तिः युज्यते तयोराधारमात्रप्रतिपत्तेः अभिप्रेतास्रवविशेषार्थगत्यभाव इति । न च तयोरधिकरणं व्यतिरिक्तमुपलभ्यते तस्मादस्तु तयोराद्य एव पाठः । अथ जीवाजीवाधिकरणं कस्य ? आस्रवः प्रकृतः तस्येत्यभिसंबध्यते । स तर्हि तथा निर्देशः कर्तव्यः ? न कर्तव्यः अर्थ-

वशाद्विभक्तिपरिणामोपपत्तेरास्रवस्येत्यभिसंबंधः । यथोच्चानि देवदत्तस्य गृहाणि आमंत्रयस्वैनं देवदत्तमिति अर्थवशाद्विभक्तिपरिणामो भवति । एवमिहाप्यधिकरणं जीवाजीवौ कस्य ? आस्रवस्येत्यभिसंबंधोऽर्थवशाद्वेदितव्यः । तदुभयमधिकरणं दशप्रकारं विषलवणक्षारमधुकाम्लस्नेहाग्निदुःप्रयुक्तकायवाङ्मनोयोगभेदात् । किमेतावानेव भेदः आहोस्वित् कश्चिदन्योऽप्यस्ति । अस्तीत्याह–यद्येवं आद्यस्यैव तावद्भेदः कथ्यतामित्यत्रोच्यते–

आद्यं संरंभसमारंभारंभयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः ॥ ८ ॥

आद्यग्रहणं सामर्थ्यात् सिद्धेरिति चेन्न विस्पष्टार्थत्वात् ॥ १ ॥ स्यान्मत आद्यग्रहणमनर्थकं कुतः सामर्थ्यात् सिद्धेः । किं पुनः सामर्थ्यं ? वक्ष्यमाणानंतरसूत्रे परवचनं तेनाद्यमिदं विज्ञायत इति तन्न किं कारणं ? विस्पष्टार्थत्वात् । आनुमानिके हि सति संप्रत्यये प्रतिपत्तेर्गौरवं स्यात् ।

प्रयत्नावेशः संरंभः ॥ २ ॥ प्राणव्यपरोपणादिषु प्रमादवतः प्रयत्नावेशः संरंभ इत्युच्यते ।

साधनसमभ्यासीकरणं समारंभः ॥ ३ ॥ साध्यायाः क्रियायाः साधनानां समभ्यासीकरणं समाहारः समारंभ इत्याख्यायते ।

प्रक्रमः आरंभः ॥ ४ ॥ प्रक्रमस्यादिकर्मणि प्रवृत्तेः आदौ क्रमः प्रक्रमः आरंभ इति विज्ञायते[१] । आङ आदिकर्मणो द्योतनत्वात् ।

तत्त्वकथनात् सर्वे भावसाधनाः ॥ ५ ॥ संरंभणं संरंभः, समारंभणं समारंभः, आरंभणमारंभः, इति ।

व्याख्यातार्थो योगशब्दः ॥ ६ ॥ योगशब्दस्यार्थो व्याख्यातः कायवाङ्मनस्कर्मयोग इति ।

कृतवचनं स्वातंत्र्यप्रतिपत्त्यर्थं ॥ ७ ॥ स्वातंत्र्यविशिष्टेनात्मना यत्प्रादुर्भावितं तत्कृतमित्युच्यते ।

कारिताभिधानं परप्रयोगापेक्षं ॥ ८ ॥ परस्य प्रयोगमपेक्ष्य सिद्धिमापद्यमानं कारितमिति कथ्यते ।

अनुमतशब्दः प्रयोजकस्य मानसपरिणामप्रदर्शनार्थः ॥ ९ ॥ यथा मौनव्रतिकश्चक्षुष्मान् पश्यन् क्रियमाणस्य कार्यस्याप्रतिषेधात् अभ्युपगमात् अनुमंता । तथा कारयिता प्रयोक्तृत्वात् तत्समर्थाचरणावहितमनःपरिणामः अनुमतेत्यवगम्यते ।

अभिहितलक्षणाः कषायाः ॥१०॥ कषायाणां लक्षणमभिहितं कषन्त्यात्मानं, अतः कषाया इति ।

विशिष्यते विशिष्टिर्वा विशेषः ॥ ११ ॥ विशिष्यतेऽर्थोऽर्थांतरादिति विशेषः । अथवा विशिष्टिर्वा विशेषः ।

तस्य प्रत्येकमभिसंबंधः ॥ १२ ॥ स विशेषशब्दः प्रत्येकमभिसंबध्यते—संरंभविशेषः समारंभविशेष इत्यादि ।

विशेषैरिति निर्देशानुपपत्तिः क्रियापदाभावात् ॥ १३ ॥ यथा देवदत्तेन भुक्तं पाणिना कृतमिति क्रियाप्रयोगे सति कर्तृकरणनिर्देश उपपद्यते न तथेह क्रियापदमस्तीति विशेषैरिति निर्देशो नोपपद्यते ?

न वा वाक्यशेषापेक्ष्यत्वात् ॥१४॥ नैष दोषः । किं कारणं ? वाक्यशेषापेक्ष्यत्वात्, क्रियापदमत्रोपस्क्रियते । संरंभसमारंभारंभयोगकृतकारितानुमतकषायविशेषैर्भिद्यते इति । अप्रयुक्तक्रियापेक्षा हि कारकविवक्षा दृश्यते शंकुलया खंडः प्रविशपिंडीमिति यथा ।

---

१ आरंभ इत्यत्राङ्शब्द आदिकर्मार्थद्योतकः ।

अधिकृताभिसंबंधाद्वा ॥ १५ ॥ अथवाधिकृतो भेदशब्दः पूर्वस्य भेदा इत्यतः स इहाभिसंबध्यत इति तदपेक्षः कारकनिर्देशो वेदितव्य.।

त्रिस्त्रिस्त्रिचतुरिति सुजंतानां यथाक्रममभिसंबंधः ॥ १६ ॥ एते त्रयस्त्रिशब्दाश्चतुःशब्दश्च संरंभादिभिः यथाक्रममभिसंबध्यते सुजंताः संरंभसमारंभारंभास्त्रयः योगास्त्रयः कृतकारितानुमतास्त्रयः कषायाश्चत्वार इत्येतेषां गणनाभ्यावृत्तिः सुचा द्योत्यते।

एकश इति वीप्सार्थनिर्देशः ॥ १७ ॥ एकशब्दः वीप्सार्थद्योतनः 'संख्यैकाद्वीप्सायां' इति शस् एकमेकं त्र्यादीन् भेदान्नयेदित्यर्थः।

संरंभादित्रयस्यादौ वचनं वस्तुत्वात् ॥ १८ ॥ संरंभादित्रयमिद वस्तु वस्तुतद्भेदहेतुत्वात् इतरेषां, अतोस्यादौ वचनं क्रियते।

योगादीनामानुपूर्व्यवचनं पूर्वापरविशेषणत्वात् ॥ १९ ॥ योगादीनामानुपूर्व्यवचनं क्रियते कुतः? पूर्वापरविशेषणत्वात्। तस्मात् क्रोधादिचतुष्टयकृतकारितानुमतभेदात् कायादियोगानां संरंभसमारंभारंभाः विशेष्याः प्रत्येकं षट्त्रिंशद्विकल्पाः। तत्र संरंभस्तावत् क्रोधकृतकायसंरंभः मानकृतकायसंरंभः मायाकृतकायसंरंभः लोभकृतकायसंरंभः। क्रोधकारितकायसंरंभः मानकारितकायसंरंभः मायाकारितकायसंरंभः लोभकारितकायसंरंभः। क्रोधानुमतकायसंरंभः मानानुमतकायसंरंभः मायानुमतकायसंरंभः लोभानुमतकायसंरंभश्चेति द्वादशधा संरंभः। क्रोधकृतकायसमारंभः मानकृतकायसमारंभः मायाकृतकायसमारंभः लोभकृतकायसमारंभः। क्रोधकारितकायसमारंभः मानकारितकायसमारंभः मायाकारितकायसमारंभः लोभकारितकायसमारंभः। क्रोधानुमतकायसमारंभः मानानुमतकायसमारंभः मायानुमतकायसमारंभः लोभानुमतकायसमारंभश्चेत्येवं समारंभोपि द्वादशधा। क्रोधकृतकायारंभः मानकृतकायारंभः मायाकृतकायारंभः लोभकृतकायारंभः। क्रोधकारितकायारंभः मानकारितकायारंभः मायाकारितकायारंभः लोभकारितकायारंभः। क्रोधानुमतकायारंभः मानानुमतकायारंभः मायानुमतकायारंभः लोभानुमतकायारंभश्चेत्येवमारंभोपि द्वादशधा एते संपिंडिताः कायविकल्पाः षट्त्रिंशत्। उक्तं च—

> संरंभो द्वादशधा क्रोधादिकृतादिकायसंयोगात्।
> आरंभसमारंभौ तथैव भेदास्तु षट्त्रिंशत् ॥ १ ॥ इति।

तथा वाग्मानसयोरपि प्रत्येकं षट्त्रिंशत्। त एते संपिंडिताः जीवाधिकरणास्रवभेदाः अष्टोत्तरशतसंख्या भवंति।

चशब्दः क्रोधादिविशेषोपसंग्रहार्थः ॥ २० ॥ चशब्दः क्रियते क्रोधादीनां विशेषाणां उपसंग्रहार्थं। तेनानंतानुबंध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनषोडशकषायभेदात् द्वात्रिंशदुत्तरचतुःशतगणना विकल्पा वेदितव्याः। कथमेषां, आस्रवत्वमिति चेदुच्यते—

संरंभादीनां क्रोधाद्याविष्टपुरुषकर्तृकाणां तदनुरंजनाधिकरणभावो नीलीपटवत् ॥२१॥ यथा नील्या प्रक्षिप्तः पटः नील्यनुरंजनान्नीलो भवति तथा संरंभादिक्रियाणामनंतानुबंध्यादिकषायाविष्टानामनुरंजनाज्जीवाधिकरणत्वं सिद्धं। निरूपितविकल्पाद्याद्यधिकरणाद्विलक्षणस्य सांपरायिकनिमित्तविरुद्धदोषस्य भेदप्रतिपत्त्यर्थमिदमुच्यते—

निर्वर्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः परं ॥ ९ ॥

निर्वर्तनादीनां कर्मसाधनं भावो वा ॥ १ ॥ एते निर्वर्तनादयः शब्दाः कर्मसाधना वेदितव्याः निर्वर्त्यते इति निर्वर्तना। निक्षिप्यत इति निक्षेपः। संयुज्यतेऽसौ संयोगः। निसृज्यतेसौ निसर्ग इति। अथवा भावसाधनाः निर्वर्तनं निर्वर्तना, निक्षिप्तिर्निक्षेपः, संयुक्तिःसंयोगः, निसृष्टिर्निसर्ग इति।

सामानाधिकरण्येन वैयधिकरण्येन वाऽधिकरणसंबंधः ॥ १ ॥ अधिकरणशब्दोऽनुवर्तते तस्येह सामानाधिकरण्येन वैयधिकरण्येन वाभिसंबंधो द्रष्टव्यः। यदा कर्मसाधना एते शब्दास्तदा सामानाधिकरण्येन संबंधः। निर्वर्तनैव अधिकरणमित्यादि। यदा तु भावसाधनास्तदा वैयधिकरण्येन निर्वतनानिक्षेपसंयोगनिसर्गलक्षणा भावाः परमधिकरणं विशिष्यन्तीति अध्याह्रियमाणक्रियापदापेक्षया कर्मनिर्देशः। निर्वर्तना निष्पादना, निक्षेपः स्थापना, संयोगो मिश्रभावः, निसर्ग प्रवर्तनं।

द्विचतुर्द्वित्रिभेदा इति द्वंद्वपूर्वोऽन्यपदार्थनिर्देशः ॥ ३ ॥ द्वौ च चत्वारश्च द्वौ च त्रयश्च द्विचतुर्द्वित्रयः ते भेदाः एषां ते द्विचतुर्द्वित्रिभेदाः इति द्वंद्वगर्भोन्यपदार्थः प्रत्येतव्यः।

परवचनमनर्थकं पूर्वत्राद्यवचनात् ॥ ४ ॥ परवचनमनर्थकं कुतः ? पूर्वत्राद्यवचनात्।

अस्मिन् सति पूर्वत्राद्यवचनं अनर्थकं अर्थापत्तिसिद्धेः ॥ ५ ॥ अस्मिन् परवचने सति पूर्वसूत्रे आद्यवचनमनर्थकं। कुतः ? अर्थापत्तिसिद्धेः।

अर्थापत्तिरनैकांतिकीति चेन्न प्रयासमात्रत्वात् ॥ ६ ॥ स्यादेतत् अर्थापत्तिरनैकांतिकी दृष्टा यथा हि असति मेघे वृष्टिर्नास्तीत्युक्ते अर्थादापन्नं सति मेघे वृष्टिरस्तीति। सत्यपि मेघे कदाचिद्वृष्टिर्नास्तीत्यर्थापत्तिरनैकांतिकीति ? तन्न किं कारणं ? प्रयासमात्रत्वात्। प्रयासमात्रमेतत् अर्थापत्तिरनैकांतिकीति। अहिंसाधर्म इत्युक्ते अर्थापत्त्या हिंसाधर्म इति न सिध्यति ? सिध्यत्येव। असति मेघे च वृष्टिरित्युक्ते सति मेघे च वृष्टिरित्युक्ते सति मेघे वृष्टिरस्त्यत्रापि सत्येव मेघे इति नास्ति दोषः।

असंबंधार्थत्वादिति चेन्न निवर्त्याभावात् ॥ ७ ॥ स्यादेतत् असति परशब्दे असंबंधार्थमिदं स्यात् नतः संबंधार्थं परशब्दोपादानमिति ? तन्न किं कारणं ? निवर्त्याभावात्। किमन्यन्निवर्त्यमस्ति येनेदमसंबद्धः स्यात् ? ननु शरीरादिकं जीवाधिकरणं निवर्त्यमस्ति न तस्य संबंधत्वादाद्यजीवाधिकरण शरीरादिविशिष्टमिति। ततः परिशेषात् अजीवाधिकरणमेवेदमिति व्यर्थं परवचनं एतेन प्रकृष्टवाचित्वं प्रत्युक्तं। केन ? निवर्त्याभावात् इत्यनेन न हि निकृष्टं जीवाधिकरणं यत्प्रकृष्टेन जीवाधिकरणेन निवर्त्येत।

इष्टवाचित्वमिति चेन्नात एव ॥ ८ ॥ स्यादेतत् इष्टवाचिपरशब्द इति यथा परं धाम गत इति इष्टं धाम गत इति ? तन्न किं कारणं ? अत एव। कुत एव निवर्त्याभावात् इत्येव विमनिष्टं। यस्मिन् सति निवर्त्यं इष्टवाचिपरशब्दोऽर्थवान् स्यात्।

नचाऽन्यार्थत्वात् ॥ ९ ॥ नचानर्थकः कुतः अन्यार्थत्वात् परशब्दोऽयमन्यार्थः शरीरादिभ्योऽन्यत् निर्वर्तनादीत्यर्थं निर्वर्तनादीनामप्यात्मपरिणामसद्भावाज्जीवाधिकरणविकल्पाविति विज्ञायेत। अथवा उक्तमेतत् विस्पष्टार्थत्वादिति ॥

इष्टार्थसंप्रत्ययाद्वा ॥ १० ॥ अथवा इष्टार्थः, तेन परशब्देन संप्रत्याय्यते। कः पुनरिष्टार्थ इति चेदुच्यते--

निर्वर्तनाधिकरणं द्विविधं मूलोत्तरभेदात् ॥ ११ ॥ अजीवाधिकरणं निर्वर्तनालक्षणं द्वेधा व्यवतिष्ठते। कुतः ? मूलोत्तरभेदात्। मूलगुणनिर्वर्तनाधिकरणं उत्तरगुणनिर्वर्तनाधिकरणं चेति। तत्र मूलं पंचविधानि शरीराणि वाङ्मनःप्राणापानाश्च। उत्तरं काष्ठपुस्तचित्रकर्मादि।

निक्षेपश्चतुर्धाऽप्रत्यवेक्षादुःप्रमार्जनसहसानाभोगभेदात् ॥ १२ ॥ निक्षेपश्चतुर्धा भिद्यते कुतः। अप्रत्यवेक्षितदुःप्रमार्जनसहसानाभोगभेदात् अप्रत्यवेक्षितनिक्षेपाधिकरणं दुःप्रमृष्टनिक्षेपाधिकरणं सहसा निक्षेपाधिकरणं अनाभोगनिक्षेपाधिकरणं चेति।

संयोगो द्विधा भक्तपानोपकरणभेदात् ॥ १३ ॥ संयोगो द्विधा विभज्यते। कुतः ? भक्तपानोपकरणभेदात्। भक्तपानसंयोगाधिकरणमुपकरणसंयोगाधिकरणं चेति ॥

निसर्गस्त्रिधा कायादिभेदात् ॥ १४ ॥ निसर्गस्त्रिधा कल्प्यते कुतः ? कायादिभेदात्। कायनिसर्गाधिकरणं वाङ्निसर्गाधिकरणं मनोनिसर्गाधिकरणं चेति । आह—आहितत्रैविध्यानंतपर्यायः काय वाङ्मनसां परिणामः आस्रवशब्दाभिलाप्यः किमसौ सकलसांपरायिकार्जनहेतुरैकध्येन प्रणिधीयमानः ? नेत्युच्यते कश्चित् कस्याचित् कुतश्चित् कायिकादिव्यापारविशेषे सति यस्मान्नियमेनैव—

तत्प्रदोषनिह्नवमात्सर्यांतरायासादनोपघाता ज्ञानदर्शनावरणयोः ॥ १० ॥

ज्ञानकीर्तनानंतरमनभिव्याहरतोंतः पैशून्यं प्रदोषः ॥ १ ॥ मत्यादिज्ञानपंचकस्य मोक्षप्रापणं प्रति मूलसाधनस्य कीर्तने कृते कस्य चित् अनभिव्याहारः अंतःपैशून्यपरिणामो यो भवति स प्रदोष इति कथ्यते ।

पराभिसंधानतो ज्ञानव्यपलापो निह्नवः ॥ २ ॥ यत्किंचित् परनिमित्तमभिसंधाय नास्ति न वेद्मीत्यादिज्ञानस्य व्यपलपनं वचनं निन्हव इत्युच्यते ॥

यावद्यथावद्देयज्ञानाप्रदानं मात्सर्यं ॥ ३ ॥ कुतश्चित् कारणात् आत्मना भावितज्ञानं दानार्हमपि योग्याय यतो न दीयते तन्मात्सर्यं ॥

ज्ञानव्यवच्छेदकरणं अंतरायः ॥ ४ ॥ कलुषेणात्मना ज्ञानस्य व्यवच्छेदकरणमंतराय इति भण्यते ।

वाक्कायाभ्यां ज्ञानवर्जनमासादनं ॥ ५ ॥ कायेन वाचा च परप्रकाशज्ञानस्य वर्जनमासादन वेदितव्यं ।

प्रशस्तज्ञानदूषणमुपघातः ॥ ६ ॥ स्वमतेः कलुषभावाद्युक्तस्याप्ययुक्तमत्प्रतीतेः दोषोद्भावनं दूषणमुपघात इति विज्ञायते ॥

आसादनमेवेति चेन्न सतोविनयाद्यनुष्ठानात् ॥ ७ ॥ स्यादेतत् एवं सति उपघात आसादनमेव प्राप्नोति ? तन्न किं कारणं ? सतो विनयाद्यनुष्ठानात । सतो हि ज्ञानस्य विनयप्रकाशनादिगुणकीर्तनानुष्ठानमासादनं । उपघातस्तु ज्ञानमज्ञानमेवेति ज्ञाननाशाभिप्राय इत्ययमनयोर्भेदः । तदित्यनेन किं प्रतिनिर्दिश्यते ?

तदिति ज्ञानदर्शनप्रतिनिर्देशः ॥ ८ ॥ तदित्यनेन ज्ञानदर्शने प्रतिनिर्दिश्येते तयोः प्रदोषनिह्नवमात्सर्यांतरायासादनोपघाताः तत्प्रदोषनिह्नवमात्सर्यांतरायासादनोपघाता इति । कथं पुनरप्रकृतयोरसंशब्दितयोस्तदित्यनेन परामर्शः स्यात् ?—

सामर्थ्यात्तदभिसंबंधः ॥ ९ ॥ सामर्थ्यात्तयोर्ज्ञानदर्शनयोः अभिसंबंधो भवति । किंसामर्थ्यात् ज्ञानदर्शनावरणयोरास्रव इति वचनसामर्थ्यात्तत्प्रदोषादय इति संबंधः क्रियते । अथ ज्ञानदर्शनवत्सु तत्साधनेषु च का प्रतिपत्तिस्तदासादनप्रदोषादयश्च तत्प्रदोषादिग्रहणेनैव गृह्यते तन्निमित्तत्वात् ।

तुल्यास्रवत्वादेकत्वमिति चेन्न वचनविरोधात् ॥ १० ॥ स्यान्मतं तुल्यास्रवत्वादनयोरेकत्वं प्राप्नोति । तुल्यकारणानां हि लोके एकत्वं दृष्टमिति ? तन्न किं कारणं ? वचनविरोधात् । यदि तुल्यास्रवत्वात ज्ञानदर्शनावरणयोरेकत्वं ननु कटादिसंयोगविभागतुल्यहेतुत्वात् वचनसाधकदूषकत्वाविशेषे यत्रोपदिष्टस्तत्रासाधकत्वाद्वचनविरोधः । अथ तुल्यत्वेपि वचनं स्वपक्षस्य साधकं, परपक्षस्य दूषकमेवेति न साधकदूषकधर्मयोरेकत्वमिति मत ननु युक्तं तुल्यहेतुत्वादेकत्वमिति । तद्धि न

दृष्टागमव्याघातात् ॥ ११ ॥ दृष्टागमव्याघाताच्च नैतदुक्तं यस्य तुल्यहेतुकानां एकत्वं तस्य मृत्पिंडादितुल्यहेतुकानां घटशरावादीनां नानात्वं व्याहन्यत इति दृष्टव्याघातः । प्रधानतुल्यनिमित्तानां महदहंकारादीनामविद्यातुल्यप्रत्ययानां पुण्यापुण्यानेञ्ज्यसंस्कारादीनां चतुष्टयसन्निकर्षाविशिष्टकारणरूपादिज्ञानसुखदुःखादीनां चैकत्वमित्यागमव्याघातः ।

आवरणाभावे साहचर्यात् ॥ १२ ॥ आवरणात्यंतसक्षये केवलिनि युगपत् केवलज्ञानदर्शनयोः साहचर्यं, भास्करे प्रतापप्रकाशसाहचर्यवत् । ततश्चानयोस्तुल्यास्रवत्वं युक्तं ।

इतरत्र क्रमवृत्तिर्जलसमवेताग्निप्रतापप्रदीपप्रकाशवत् ॥ १३ ॥ इतरस्मिन् सावरणे ज्ञानदर्शनयोः क्रमेण वृत्तिः, यथा जलसमवायिनोऽग्नेः प्रताप एव न प्रकाशः । प्रदीपस्य च प्रकाश एव न प्रतापः । तथा छद्मस्थस्य च यदा ज्ञानोपयोगः न तदा दर्शनोपयोगः ।

अतीतानागतयोर्दर्शनाभावस्तल्लक्षणाभावादिति चेन्न निरावरणत्वात् ॥ १४ ॥ स्यान्मतं नास्त्यतीतेऽनागते च दर्शनं, कुतः ? तल्लक्षणाभावात् । अस्पृष्टे विषये च ज्ञानमुत्पद्यते स्पृष्टे विषये च दर्शनं न ह्यतीतानागतयोः विनष्टानुत्पन्नत्वे सत्यसत्त्वात् स्पृष्टत्वविषयत्वे स्त इति । तत्र ज्ञानमेव दर्शनमिति केवलिनोऽतीतानागतदर्शित्वमयुक्तं ? तन्न किं कारणं ? निरावरणत्वात् । यथा भास्करस्य निरस्तघनपटलावरणस्य यत्र प्रकाशस्तत्र प्रतापः यत्र च प्रतापस्तत्र प्रकाशः । तथा निरावरणस्य केवलिभास्करस्याऽचिंत्यमाहात्म्यविभूतिविशेषस्य यत्र ज्ञानं तत्रावश्यं दर्शनं यत्र च दर्शनं तत्र च ज्ञानं । किं च—

तद्वद्वृत्तेः ॥ १५ ॥ यथा हि असद्भूतमनुपदिष्टं च जानाति तथा पश्यति किमत्र भवतो हीयते । किं च—

विकल्पात् ॥ १६ ॥ यथा ह्यस्पृष्टे विषये च सावरणस्योपदेशाभावे न ज्ञानमस्ति केवलिनोपि किं तद्भवति । तथा सावरणस्य विषये स्पृष्टे च दर्शनप्रवृत्तेः न केवलिनस्तद्भावप्याति इति सिद्धं केवलिनस्त्रिकालगोचरं दर्शनं । भवतु तावन्निरावरणत्वात् केवलिनोऽतीतानागतयोर्दर्शनप्रवृत्तिरवधिज्ञानिनः सावरणस्य कथं दर्शनमित्यत्रोच्यते—

करणनिरपेक्षक्षयोपशमशक्तिविशेषयोगादवधिज्ञानिनः ॥ १७ ॥ यद्यप्यवधिज्ञानिन आवरणमस्ति तथाप्यवधिदर्शनावरणक्षयोपशमविशेषस्य करणनिरपेक्षत्वात् केवलदर्शनवत् अनुपदेशपूर्वकप्रवृत्तेः अतीतानागतयोरस्पृष्टाविषयत्वेपि अवधिदर्शनं प्रवर्तते ।

मनःपर्ययदर्शनमप्यस्त्विति चेन्न कारणाभावात् ॥ १८ ॥ यथावधिज्ञानं दर्शनपूर्वकं तथा मनःपर्ययज्ञानेनापि दर्शनपुरस्सरेण भवितव्यमिति चेन्न किंकारणं ? कारणाभावात् । न मनःपर्ययदर्शनावरणमस्ति दर्शनावरणचतुष्टयोपदेशात् । तदभावात् तत्क्षयोपशमाभावे तन्निमित्तमनःपर्ययदर्शनोपयोगाभावः । किं च—

परकीयमनःप्रणालिकया तदधिगमात् ॥ १९ ॥ मनःपर्ययज्ञानं स्वविषयेऽवधिज्ञानवत् न स्वमुखेन वर्तते । कथं तर्हि ? परकीयमनःप्रणालिकया । ततो यथा मनोऽतीतानागतानर्थांश्चिंतयति न तु पश्यति तथा मनःपर्ययज्ञान्यपि भूतभविष्यंतौ वेत्ति न पश्यति । वर्तमानमपि मनोविषयं विशेषाकारेणैव प्रतिपद्यते ततः सामान्यपूर्वकवृत्त्यभावान्मनःपर्ययदर्शनाभावः । अलमतिप्रसंगिन्या कथया प्रकृतं प्रस्तूयते ।

भिन्नास्रवत्वं वा प्रदोषादीनां विषयभेदाद्भेदसिद्धेः ॥ २० ॥ अथवा भिन्नास्रवत्वं ज्ञानत्वं ज्ञानदर्शनावरणयोर्वेदितव्यं । कुतः प्रदोषादीनां विषयभेदाद्भेदसिद्धेः । ज्ञानविषया हि प्रदोषादयो ज्ञानावरणस्यास्रवाः । दर्शनविषयाश्च दर्शनावरणस्येति । अपि चाचार्योपाध्यायप्रत्यनीकत्वाकालाध्ययनश्रद्धाभावाभ्यासालस्यानादरार्थश्रवणतीर्थोपरोधबहुश्रुतगर्वमिथ्योपदेशबहुश्रुतावमानस्वपक्षपरिग्रहपंडितत्वस्वपक्षपरित्यागाबद्धप्रलापोत्सूत्रवादसाध्यपूर्वकज्ञानाधिगमशास्त्रविक्रयप्राणातिपातादयः ज्ञानावरणस्यास्रवाः । दर्शनमात्सर्यांतरायनेत्रोत्पाटनेंद्रियप्रत्यनीकत्वदृष्टिगौरवायतस्वापितादिवाशयनालस्यनास्तिक्यपरिग्रहसम्यग्दृष्टिसंदूषणकुतीर्थप्रशंसाप्राणव्यपरोपणयतिजनजुगुप्सादयो दर्शनावरणस्यास्रवाः इत्यस्ति आस्रवभेदः । यथा अनयोः कर्मप्रकृत्योरास्रवभेदस्तथा—

दुःखशोकतापाक्रंदनवधपरिदेवनान्यात्मपरोभयस्थानान्यसद्वेद्यस्य ११

पीडालक्षणः परिणामो दुःखं ॥ १ ॥ विरोधिद्रव्योपनिपाताभिलषितवियोगानिष्टनिष्ठुरश्रवणादिबाह्यसाधनापेक्षादसद्वेद्योदयादुत्पद्यमानः पीडालक्षणः परिणामो दुःखमित्याख्यायते ।

अनुग्राहकसंबंधविच्छेदे वैक्लव्यविशेषः शोकः ॥ २ ॥ अनुग्राहकस्य बांधवादेः संबंधविच्छेदे तद्गताशयस्य चिंताखेदलक्षणः परिणामो वैक्लव्यविशेषो मोहकर्मविशेष शोकोदयापेक्षः शोक इत्युच्यते ।

परिवादादिनिमित्तादाविलांतःकरणस्य तीव्रानुशयस्तापः ॥ ३ ॥ परिवादः परिभवः परुषवचनश्रवणादिनिमित्तापेक्षया कलुषांतःकरणस्य तीव्रानुशयः परिणामः ताप इत्यभिधीयते ।

परितापजाश्रुपातप्रचुरविलापाद्यभिव्यक्तं क्रंदनमाक्रंदनं ॥ ४ ॥ परितापनिमित्तेनाश्रुपातप्रचुरविलापेनांगविकारादिना चाभिव्यक्तं क्रंदनमाक्रंदनं प्रत्येतव्यं ।

आयुरिंद्रियबलप्राणवियोगकरणं बधः ॥५॥ भवधारणकारणस्यायुषः रूपादिग्रहणनिमित्तानां इंद्रियाणां कायादिवर्गणालंबनबलस्योच्छ्वासलक्षणस्य च प्राणस्य परस्परवियोगकरणं बध इत्यवधार्यते ।

संक्लेशप्रवणं स्वपरानुग्रहाभिलाषविषयमनुकंपाप्रायं परिदेवनं ॥ ६ ॥ संक्लेशपरिणामालंबनं स्वपरानुग्रहाभिलाषविषय अनुकंपाप्रचुर परिदेवनमिति परिभाष्यते ।

दुःखजातीयत्वात् सर्वेषां पृथगवचनमिति चेन्न कतिपयविशेषसंबंधेन तज्जात्याख्यानात् ॥ ७ ॥ स्यान्मत शोकादयो हि सर्वे दुःखजातीयाः, ततो दुःखग्रहणादेव सिद्धेः पृथगेषां वचनमनर्थकमिति ? तन्न किं कारण ? कतिपयविशेषसबंधेन तज्जात्याख्यानात् यथा गौरित्युक्ते अनिर्ज्ञातविशेषे तत्प्रतिपादननार्थं खंडमुंडशुक्लकृष्णाद्युपादानं क्रियते । तथा दुःखविषयाख्यानमसंख्येयलोकभेदसंभवात् दुःखमित्युक्ते विशेषानिर्ज्ञानात् कतिपयविशेषनिदर्शनेन, तद्विवेकप्रतिपत्तिः कथं स्यादिति शोकाद्युपादान क्रियते । एते खल्वपि विधयः सुपरिग्रहीता भवंति । येषां लक्षणं प्रपंचयिष्यति ।

कथंचिदन्यत्वोपपत्तेश्च ॥ ८ ॥ यथा मृत्पिंडघटकपालादीनां मूर्तिमद्रूपद्रव्यार्थादेशात् स्यादनन्यत्वं । प्रतिनियतसंस्थानादिपर्यायादेशात् स्यादन्यत्वं । तथा दुःखशोकतापाक्रंदनवधपरिदेवनानामपीति सामान्यादेशात् स्याद्दुःखपरिणामादनन्यत्व, प्रत्यर्थनियतहेतुभेदाहितविशेषदुःखशोकतापाक्रंदनवधपरिदेवनपर्यायादेशात् स्यादन्यत्वं ।

दुःखादीनां कर्त्रादिसाधनभावः पर्यायिपर्याययोर्भेदाभेदविवक्षोपपत्तेः ॥ ९ ॥ दुःखादीनां शब्दानां कर्त्रादिसाधनत्वमवसेय । कुतः ? पर्यायिपर्याययोर्भेदाभेदविवक्षोपपत्तेः । यदा पर्यायिपर्याययोरभेदविवक्षा तदा तप्तायःपिंडवत्तत्परिणामादात्मैव दुःखयतीति दुःखमिति कर्तृसाधनत्वं । यदा पर्यायिपर्याययो र्भेदविवक्षा तदा दुःखयत्यनेनास्मिन्निति वा दुःखमिति करणादिसाधनत्वं वस्तुस्वरूपमात्रकथनात् । दुःखनं दुःखमिति भावसाधनत्व वा । एवं शोकादिष्वपि योज्यं ।

तदेकांतावधारणेऽनुपपन्नं अन्यतरैकांतसंग्रहात् ॥ १० ॥ कर्त्रादिसाधनत्वं दुःखादीनामेकांतावधारणेनुपपन्नं । कुतः ? अन्यतरैकांतसंग्रहात् । पर्यायमात्रत्वे तावदसत्यात्मनि विज्ञानादीनां करणादिसाधनत्वमयुक्तं कर्तुरभावात् । स्वातंत्र्यशक्तिविशिष्टार्थापेक्षाणि हि शेषकारकाणि तदभावादभावमास्कंदेयुः । कर्तृसाधनत्वमपि वा युक्तं करणादिसाध्यव्यपेक्षाभावात् । न च तेषां विज्ञानादीनां परस्परं प्रति साचिव्यमस्ति युगपदुपजायमानत्वात् सव्येतरगोविषाणवत् । नाप्यतीतानागतानां वर्तमानं प्रति सहायभावोस्ति असत्वाद्वंध्यापुत्रवत् ।

क्षणिकत्वाच्च पूर्वानुभूतस्मरणाभावात् शोकादिपरिणामाभावः ॥ ११ ॥ पूर्वानुभूतं हि अर्थं विनष्टं चिंतयतः शोकादयो भवंति । नच क्षणिकवादे स्मरणमस्ति तदभावाच्छोकाद्य-

भावः । संतानादिति चेन्न तदभावादित्युक्तत्वात् । भावसाधनत्वमपि नोपपत्तिक्षमं भाववंतमंतरेण भावस्य वृत्त्यभावात् । द्रव्यमात्रत्वे च क्रियागुणविरहात् पुरुषस्य निर्गुणत्वं निःक्रियत्वं वा दधानस्य सुखदुःखादिपरिणामप्राप्तिं प्रति कर्तृत्वाभावः । तदभावात् करणादीनामप्यभावः । अथ कर्त्रादिसाधनभावः कल्प्यते न तर्हि निर्गुणत्वं निष्क्रियत्वं चात्मनोऽवतिष्ठते । तथाऽचेतनस्यापि दुःखादिपरिणामं प्रति कर्तृत्वाभावोऽनुपपन्नः । दुःखादीनां घटादिष्वचेतनेष्वदर्शनात् । यद्यचेतनस्यापि दुःखादयोऽभ्युपगम्येरन् चेतनाचेतनयोरविशेषः स्यात् । निःक्रियत्वेऽप्यधर्मनिमित्ताः पुरुषस्य दुःखादय इति चेन्न निःक्रियस्य धर्माधर्मोपार्जनविध्यभावात् तत्फलानुभवनाभावाच्च ।

तान्यात्मपरोभयस्थानि क्रोधाद्यावेशात् ॥ ११ ॥ तानि दुःखादीनि क्रोधाद्यावेशात् आत्मपरोभयस्थानि भवंति । तद्यथा— यदा क्रोधाद्याविष्ट आत्मा स्वस्मिन् दुःखादीन्युत्पादयति तदात्मस्थानि भवंति । यदा पुनरीश्वरः कषायवशात् परस्य दुःखादीनि जनयति तदा परस्थानि भवंति । यदा तूत्तमर्णादयः अधमर्णादिनिरोधे वर्तमानाः तर्जनितानि क्षुत्पिपासादीनि चाप्नुवंति तदोभयस्थानि ।

विद्यादीनामवगमनाद्यर्थत्वादनिर्देश इति चेन्न विदेश्चेतनार्थस्य ग्रहणात् ॥ १२ ॥ स्यान्मतं इमे चत्वारो विदयः विदति विदते विद्यते अवगमनलाभविचारसद्भावार्था एतेषां कस्यचिदपि संग्रहेऽभिप्रेतस्यार्थस्यागतेरनिर्देश इति तन्न किं कारणं ? विदेश्चेतनार्थस्य ग्रहणात् । विदेः चुरादिण्यंतस्य चेतनार्थस्येदं वेद्यमिति ।

तदसद्वेद्यमप्रशस्तत्वात् ॥ १३ ॥ तद्वेद्यमसदिति विशेष्यते । कुतः ? अप्रशस्तत्वात् । अनिष्टफलप्रादुर्भावकरणत्वादप्रशस्तमित्याख्यायते ।

दुःखाभिधानमादौ प्रधानत्वात् ॥ १४ ॥ दुःखग्रहणमादौ क्रियते । कुतः ? प्रधानत्वात् । कुतः पुनरस्य प्राधान्यं ? तद्विकल्पत्वात् । इतरेषां किमेतावत एव विकल्पाः ? नेत्याह—

शोकादिग्रहणस्य विकल्पोपलक्षणत्वादन्यसंग्रहः ॥ १५ ॥ इमे शोकादयः दुःखविकल्पा दुःखविकल्पानामुपलक्षणार्थमुपादीयंते ततोऽन्येषामपि संग्रहो भवति । के पुनस्ते ? अशुभप्रयोगपरपरिवादपैशुन्यानुकंपाभावपरपरितापनांगोपांगच्छेदनभेदनताडनत्रासनतर्जनभर्त्सनतक्षणविशंसनबंधनरोधनमर्दनदमनवाहनविहेडनह्रेपणकायरौक्ष्यपरनिंदात्मप्रशंसासंक्लेशप्रादुर्भावनायुर्वहमानतानिर्दयत्वसत्त्वव्यपरोपणमहारंभपरिग्रहविश्रंभोपघातवक्रशीलतापापकर्मजीवित्वानर्थदंडविषमिश्रणशरजालपाशवागुरापंजरयंत्रोपायसर्जनबलाभियोगशस्त्रप्रधानपापमिश्रभावाः । ते दुःखादयः आत्मपरोभयस्था असद्वेद्यस्यास्रवा वेदितव्याः ।

स्वतीर्थकरोपदेशविरोधादयुक्तिरिति चेन्न सर्वथा प्रश्नविनिवृत्तेः ॥ १६ ॥ स्यादेतत् यदि दुःखाधिकरणमसद्वेद्यहेतुः । ननु नाग्न्यानशनादितपःकरणं दुःखहेतुरिति तदनुष्ठानोपदेशनं स्वतीर्थकरस्य विरुद्धं तदविरोधे च दुःखादीनामसद्वेद्यास्रवस्यायुक्तिरिति ? तन्न किं कारणं ? सर्वथा प्रश्नविनिवृत्तेः न तावदार्हतस्य प्रश्न उपपद्यते स्वतीर्थकरोपदेशव्याघातप्रसंगात् । यस्य क्षणिकवादः तस्यापि न युज्यते । सर्वदुःखशून्यानात्मकत्वाभ्युपगमे हिंसादिवत् दानादेरप्यकुशलत्वं दुःखहेतुतुल्यत्वादिति । तथेतरेषामपि हिंसादीनां दुःखहेतुत्वेन पापास्रवहेतुत्वाभ्युपगच्छतां यमनियमपरिपालनविविधवेषानुष्ठानदुश्चरोपवासब्रह्मचर्यादीनां दुःखहेतुत्वात् तदनुष्ठानविरोधप्रसंगान्नोपपद्यते प्रश्नः । किं च—

द्वेषासंभवात् ॥ १७ ॥ यथानिष्टद्रव्यसंपर्काद्द्वेषोत्पत्तौ दुःखोत्पत्तिः न तथा बाह्याभ्यंतरतपःप्रवृत्तौ धर्मध्यानपरिणतस्य यतेरनशनकेशलुंचनादिकरणकारणापादितकायक्लेशेऽस्ति द्वेषसंभवः । तस्मान्नासद्वेद्यबंधोऽस्ति । क्रोधाद्यावेशे हि सति स्वपरोभयदुःखादीनां पापास्रवहेतुत्वमिष्टं न केवलानां । किं च—

आहितप्रसादत्वात् ॥ १८ ॥ यथा यतिरहिंसादिकरणकारणोद्यतत्वादाहितप्रसादः तथायमुपवासादिकरणकारणेष्वाहितप्रसादः अनशनादितपः करोतीति दुःखाद्यभावः । किं च—

प्रायश्चित्तोपदेशात् ॥ १९ ॥ कादाचित्कान्यकारणाविर्भूतक्रोधादिपरिणामे च सति तदुत्सिसृक्षार्थं प्रायश्चित्तविधानं क्रियते ततः कथमिव यतेः-अनशनादितपश्चरणे क्रोधादिपरिणामो भवेत् ?। किं च-

अनुग्रहबुद्ध्या तद्व्यापाराद्गंडपाटनवत् ॥ २० ॥ यथा भिषक् करुणार्दीकृतचेताः संयतस्योपरि अनुग्रहबुद्ध्या गंडं पाटयंस्तत्र क्रोधाद्यभावात् नापुण्यं बध्नाति। तथा अनादिसांसारिकजातिजरामरणवेदनाजिघांसं प्रत्यागूर्णो यतिः तदुपाये प्रवर्तमानः स्वपरस्थदुःखहेतुत्वे सत्यपि क्रोधाद्यभावात् पापस्याबंधकः। किं च—

मनोरत्या सौख्याभिधानात् ॥ २१ ॥ यथा दुःखाभिभूतानामपि संसारिणां यत्र मनोरतिस्तत्र सौख्यं तथानशनादिकरणस्य यतेर्मनोरतिसौख्यसान्निध्यात् अदोषः। उक्तं च—

पुरे वने वा स्वजने जने वा प्रसादशृंगे द्रुमकोटरे वा।
प्रियांगनांऽकेऽथ शिलातले वा मनोरतिं सौख्यमुदाहरंति ॥ १ ॥

इति। यद्यसद्वेद्यस्यामी प्रयोगाः यथा द्वितीयस्य क आस्रव इत्युच्यते-

भूतव्रत्यनुकंपादानसरागसंयमादियोगः क्षांतिः शौचमिति सद्वेद्यस्य ॥ १२ ॥

आयुर्नामकर्मोदयवशाद्भवनाद्भूतानि ॥ १ ॥ तासु तासु योनिष्वायुर्नामकर्मोदयवशाद्भवनाद्भूतानि सर्वे प्राणिन इत्यर्थः।

व्रताभिसंबंधिनो व्रतिनः ॥ २ ॥ व्रतानि वक्ष्यंते अहिंसादीनि तदभिसंबंधिनो ये ते व्रतिनः। ते द्वेधा आरंभं प्रति निवृत्तोत्सुक्याः संयताः गृहिणश्च संयतासंयताः।

अनुकंपनमनुकंपा ॥ ३ ॥ अनुग्रहार्दीकृतचेतसः परपीडामात्मस्थामिव कुर्वतोऽनुकंपनमनुकंपा। भूतानि च व्रतिनश्च भूतव्रतिनः भूतव्रतिष्वनुकंपा भूतव्रत्यनुकंपा। 'साधनं कृता बहुलमिति' वृत्तिः। यथा गलचोपक इति। मयूरव्यंसकादित्वाच्च।

स्वस्य परानुग्रहबुद्ध्याऽतिसर्जनं दानं ॥ ४ ॥ आत्मीयस्य वस्तुनः परानुग्रहबुद्ध्या अतिसर्जनं दानमिति कथ्यते।

संपरायनिवारणप्रवणोऽक्षीणाशयः सरागः ॥ ५ ॥ पूर्वोपात्तकर्मोदयवशादक्षीणाशयः सन् संपरायनिवारणं प्रत्यागूर्णमनाः सराग इत्युच्यते।

प्राणींद्रियेष्वशुभप्रवृत्तेर्विरतिः संयमः ॥ ६ ॥ प्राणेष्वेकेंद्रियादिषु चक्षुरादिष्विंद्रियेषु चाऽशुभप्रवृत्तेर्विरतिः संयम इति निश्चीयते। सरागस्य संयमः सरागसंयमः। सरागो वा संयमः सरागसंयमः।

आदिशब्देन संयमासंयमाऽकामनिर्जराबालतपोनुरोधः ॥ ७ ॥ संयमासंयमः अकामनिर्जरा बालतप इत्येतेषामादिशब्देनानुरोधः क्रियते। तत्र संयमासंयम अनात्यंतिकी विरतिः। विषयानर्थनिवृत्तिं चात्माभिप्रायेणाकुर्वतः पारतंत्र्याद्भोगनिरोधोऽकामनिर्जरा यथार्थप्रतिपत्त्यभावादज्ञानिनो बाला मिथ्यादृष्ट्यादयस्तेषां तपः बालतपः अग्निप्रवेशकारीषसादनादिप्रतीतं।

निरवद्यक्रियाविशेषानुष्ठानं योगः ॥ ८ ॥ निरवद्यस्य क्रियाविशेषस्यानुष्ठानं स योगः समाधिः। सम्यक् प्रणिधानमित्यर्थः। दंडभावनिवृत्त्यर्थं च तस्य ग्रहणं क्रियते। भूतव्रत्यनुकंपादानं च सरागसंयमादयश्च भूतव्रत्यनुकंपादानसरागसंयमादयस्तेषां योगः भूतव्रत्यनुकंपादानसरागसंयमादियोगः।

---

१ जैनेंद्रमहावृत्तिरित्यर्थः।

धर्मप्रणिधानात्क्रोधादिनिवृत्तिः क्षांतिः ॥ ९ ॥ क्रोधादेः कषायस्य शुभपरिणामभावनापूर्विका निवृत्तिः क्षांतिरित्युच्यते । ननु क्षमूषिति षित्वात् अङि क्षमेति भवितव्यं सत्यमेवमेतत् यदि भूवादिषु पठितस्य ग्रहणं स्यात् । इदं दिवादिपठितस्य क्षमूष् सहने इत्यस्य रूपं ।

लोभप्रकाराणामुपरमः शौचं ॥ १० ॥ लोभप्रकारेभ्यः उपरतः शुचिरित्युच्यते तस्य भावः कर्म वा शौच । के पुनर्लोभप्रकाराः ? स्वद्रव्यात्यागपरद्रव्यापहरणसान्यासिकानिन्हवादयः । इति करणं प्रकारार्थहेत्वेवं प्रकारादिव्यवच्छेदादिषु दृष्टप्रयोग इति शब्दः । तत्रेह प्रकारार्थो गृह्यते एवंप्रकाराः सद्वेद्यस्यास्रवा इति ।

वृत्तिप्रसंगो लघुत्वादिति चेन्नान्योपसंग्रहार्थत्वात् ॥ ११ ॥ स्यान्मतं वृत्तिरत्र न्याय्या संयमादियोगक्षांतिशौचानीति । कुतः ? लघुत्वादिति ? तन्न किं कारणं ? अन्योपसंग्रहार्थत्वात् ।

इति करणानर्थक्यमिति चेन्नोभयग्रहणस्य व्यक्त्यर्थत्वात् ॥ १२ ॥ स्यादेतत् यद्यवृत्तिकरणमन्योपसंग्रहार्थमिति शब्दोपादानस्यापि तदेव प्रयोजनमिति तस्यानर्थक्यमिति तन्न किं कारणं ? उभयग्रहणस्य व्यक्त्यर्थत्वात् । व्यक्त्यर्थमुभयं गृह्यते । के पुनस्ते गृह्यमाणाः अर्हत्पूजाकरणपरतापतावालवृद्धतपस्विवैयावृत्त्योद्योगार्जवविनयप्रधानतादयः ।

व्रतिग्रहणमनर्थकमिति चेन्न प्राधान्यख्यापनार्थत्वात् ॥ १३ ॥ स्यान्मतं भूतग्रहणादेव सिद्धं व्रतिग्रहणमनर्थकं सामान्यनिर्देशस्य सर्वविशेषव्यापित्वाविरोधादिति ? तन्न किं कारणं ? प्राधान्यख्यापनार्थत्वात् । भूतेषु यानुकंपा तस्या व्रतिष्वनुकंपा प्रधानभूतेत्ययमर्थः ख्याप्यते ।

नित्यानित्यात्मकत्वेऽनुकंपादिसिद्धिर्नान्यथा ॥ १४ ॥ द्रव्यत्वाद्यन्वयादेशान्नित्यतामजहतः नैमित्तिकपरिणाममुखेनानित्यतामस्कंदतः जीवस्यानुकंपादयः परिणामविशेषा युज्यंते नान्यथा । यदि नित्यत्वमेव स्यात् विक्रियाभावात् अनुकंपादिपरिणत्यभावः तदभ्युपगमे च नित्यताव्याघातः । क्षणिकैकांतेपि पूर्वोत्तरावग्राहकैकविज्ञानाभावात् अनुकंपादिप्रत्ययः । संस्कारादिति चेन्न तस्याप्यनित्यत्वात् । ज्ञानाज्ञानभाववानुपपत्तेः । आह उक्ताः सदसत्प्रकारस्य वेदनीयस्योपादानहेतवः । अथ अनंतरस्यानंतप्रवाहसंसारास्पदकारणस्य मोहस्यात्मलाभे को हेतुरित्यत्रोच्यते–

केवलिश्रुतसंघधर्मदेवावर्णवादो दर्शनमोहस्य ॥ १३ ॥

करणक्रमव्यवधानातिवर्तिज्ञानोपेताः केवलिनः ॥ १ ॥ करणं चक्षुरादि, कालभेदेन वृत्तिः क्रमः, कुड्यादिनांऽतर्धानं व्यवधानं एतान्यतीत्य वर्तते । ज्ञानावरणस्यात्यंतसंक्षये आविर्भूतमात्मनः स्वाभाविकं ज्ञानं तद्वंतः अर्हंतो भगवंतः केवलिन इति व्यपदिश्यते ।

तदुपदिष्टं बुद्ध्यतिशयर्द्धियुक्तगणधरावधारितं श्रुतं ॥ २ ॥ तैर्व्यपगतरागद्वेषमोहैरुपदिष्टं बुद्ध्यतिशयर्द्धियुक्तैः गणधरैरवधारितं श्रुतमित्युच्यते तद्भिरतरैर्व्याख्यातं ।

रत्नत्रयोपेतः श्रवणगणः संघः ॥ ३ ॥ सम्यग्दर्शनादिरत्नत्रयभावनापराणां चतुर्विधानां श्रवणानां गणः संघ इति कथ्यते ।

एकस्यासंघत्वमिति चेन्नानेकव्रतगुणसंहननादेकस्यापि संघत्वसिद्धेः ॥ ४ ॥ स्यादेतत् संघो गणो वृंदमित्यनर्थांतरं तस्य कथमेकस्मिन् वृत्तिरिति ? तन्न किं कारणं अनेकव्रतगुणसंहननादेकस्यापि संघत्वसिद्धेः उक्तं च–

> संघो गुणसंघादो कम्माणविमोखदो हवदि संघो ।
> दंसणणाणचरित्ते संघादिंतो हवदि संघो ॥ १ ॥

अहिंसादिलक्षणो धर्मः ॥ ५ ॥ तस्मिन् जिनप्रवचने निर्दिष्टोऽहिंसादिलक्षणो धर्म इत्युच्यते ।

देवशब्दो व्याख्यातार्थः ॥ ६ ॥ देवाश्चतुर्णिकाया इत्यत्र देवशब्दो व्याख्यातार्थः ।

अंतःकलुषदोषादसद्भूतमलोद्भावनमवर्णवादः ॥ ७ ॥ गुणवत्सु महत्सु स्वमतिकलुषदोषात् असद्भूतमलोद्भावनमवर्णवाद इति वर्ण्यते । केवलिश्रुतसंघधर्मदेवानामवर्णवादः केवलिश्रुतसंघधर्मदेवावर्णवादः ।

पिंडाभ्यवहारजीवनादिवचनं केवलिषु ॥ ८ ॥ पिंडाभ्यवहारजीविनः कंबलदशानिर्हरणाः अलाबूपात्तपरिग्रहाः कालभेदवृत्तज्ञानदर्शनाः केवलिन इत्यादिवचनं केवलिष्ववर्णवादः ।

मांसभक्षणानवद्याभिधानं श्रुते ॥ ९ ॥ मांसमत्स्यभक्षणं मधुसुरापानं वेदनार्दितमैथुनोपसेवा-रात्रिभोजनमित्येवमाद्यनवद्यमित्यनुज्ञानं श्रुतेऽवर्णवादः ।

शूद्रत्वाशुचित्वाद्याविभावनं संघे ॥ १० ॥ एते श्रवणाः शूद्राः अस्नानमलदिग्धांगाः अशुचयो दिगम्बराः निरपत्रपा इहैवेति दुःखमनुभवंति परलोके कुतश्च सुखिन इत्यादिवचनं संघेऽवर्णवादः ।

निर्गुणत्वाद्यभिधानं धर्मे ॥ ११ ॥ जिनोपदिष्टो दशविकल्पो धर्मः निर्गुणः तदुपसेविनो ये ते चासुरा भवंति । इत्येवमाद्यभिधानं धर्मावर्णवादः ।

सुरामांसोपसेवाद्याघोषणं देवावर्णवादः ॥ १२ ॥ सुरां मांसं चोपसेवंते देवाः अहल्यादिष्वासक्तचेतसः इत्याद्याघोषणं देवावर्णवादः ॥

दर्शनं मोहयति मोहनं वा दर्शनमोहः ॥ १३ ॥ दर्शनमुक्तलक्षणं तत्त्वार्थश्रद्धानमित्यत्र, दर्शनं मोहयतीति दर्शनमोहः दर्शनस्य मोहनं वा दर्शनमोहः तस्य दर्शनमोहस्यैते आस्रवा वेदितव्याः । आह यदेते दर्शनमोहस्यापादकाः परिणामा निश्चीयंते । क इदानीमनंतरोद्दिष्टस्य चारित्रमोहस्यास्रव इत्यत्रोच्यते-

कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य ॥ १४ ॥

द्रव्यादिनिमित्तवशात् कर्मपरिपाक उदयः ॥ १ ॥ प्रागुपात्तस्य कर्मणः द्रव्यादिनिमित्तवशात् फलप्राप्तिः परिपाक उदय इति निश्चीयते । कषायो निरुक्तः । कषायस्य उदयः कषायोदयः तस्मात् कषायोदयात् ।

तीव्रपरिणामशब्दावुक्तार्थौ ॥ २ ॥ तीव्रमंद इत्यत्र तीव्रशब्दो व्याख्यातार्थः तद्भावः परिणामः इत्यत्र परिणामशब्दो वर्णितार्थः ।

चारित्रं मोहयति मोहनं वा चारित्रमोहः ॥ ३ ॥ चारित्रमुक्तलक्षणं तन्मोहयति मोहनं वा तस्य चारित्रमोह इति निर्दिश्यते तस्य चारित्रमोहस्य कषायोदयनिमित्तः तीव्रपरिणामो यः स आस्रव इति वेदितव्यः । स किंस्वरूपः ? इति चेदुच्यते-जगदनुग्रहतंत्रशीलव्रतभावितात्मतपस्विजनगर्हणधर्मविध्वंसनतदंतरायकरणशीलगुणदेशसंयतविरतिप्रच्यावनमधुमद्यमांसविरतचित्तभ्रमापादानवृत्तसंदूषणसंक्लिष्टलिंगव्रतधारणस्वपरकषायोत्पादनादिलक्षणः कषायवेदनीयस्यास्रवः । उत्प्रहासदीनाभिहासित्वकंदर्पोपहसनबहुप्रलापोपहासशीलता हास्यवेदनीयस्य । विचित्रपरक्रीडनपरौचित्यावर्जनबहुविधपीडाभावदेशाद्यनौत्सुक्यप्रीतिसंजननादिः रतिवेदनीयस्य । परारतिप्रादुर्भावनरतिविनाशनपापशीलसंसर्गताकुशलक्रियाप्रोत्साहनादिः, अरतिवेदनीयस्य । स्वशोकामोदशोचनपरदुःखाविष्करणशोकप्लुताभिनंदनादिः शोकवेदनीयस्य । स्वयं भयपरिणामपरभयोत्पादननिर्दयत्वत्रासनादिर्भयवेदनीयस्य । सद्धर्मापन्नचतुर्वर्णविशिष्टवर्गकुलक्रियाचारप्रवणजुगुप्सापरिवादशीलत्वादिर्जुगुप्सावेदनीयस्य । प्रकृष्टक्रोधपरिणामातिमानितेर्ष्याव्यापारालीकाभिधायितातिसंधानपरत्वप्रवृद्धरागपरांगनागमनादरवामलोचनाभावाभिष्वंगतादिः स्त्रीवेदस्य । स्तोकक्रोधजैह्मनिवृत्त्यानुत्सिक्तत्वालोभत्वांगनासमवायाल्परागत्वस्वदारसंतोषेर्ष्याविशेषोपरमस्नानगंधमाल्याभरणानादरादिः पुंवेदनीय-

स्य । प्रचुरक्रोधमानमायालोभपरिणामगुह्येंद्रियव्यपरोपणस्त्रीपुमानंगव्यसनित्वशीलव्रतगुणधारिप्रव्रज्याश्रितप्रथमपरांगनावस्कंदनरागतीव्रानाचारादिर्नपुंसकवेदनीयस्य । आह—मोहनीयस्यानेकविकल्पस्यास्रवभेदो निर्दिष्टः । इदानीं आयुश्चतुष्टयस्यास्रवभेदो वक्तव्य इति । तत्राद्यस्य नियतकालपरिपाकस्यायुषः कारणप्रदर्शनार्थमिदमुच्यते—

बह्वारंभपरिग्रहत्वं नारकस्यायुषः ॥ १५ ॥

संख्यावैपुल्यवाचिनो बहुशब्दस्य ग्रहणमविशेषात्॥१॥ अयं बहुशब्दः अस्त्येव संख्यापदं एकः, द्वौ बहव इति । अस्ति वैपुल्यवाची बहुरोदनो बहुसूप इति । तस्य द्विप्रकारस्यापि ग्रहणमिह न विरुध्यते । कुतः विशेषात् ।

आरंभो हैंस्रं कर्म ॥ २ ॥ हिंसनशीलाः हिंस्राः तेषां कर्म हैंस्रं आरंभ इत्युच्यते । बहव आरंभाः बह्वारंभाः बहुर्वा आरंभो बह्वारंभः ।

ममेदमिति संकल्पः परिग्रहः ॥ ३ ॥ ममेदं वस्तु अहमस्य स्वामीत्यात्मात्मीयाभिमानः संकल्पः परिग्रह इत्युच्यते । बह्वारंभाः परिग्रहा यस्य स बह्वारंभपरिग्रहः तस्य भावः बह्वारंभपरिग्रहत्वं नारकस्यायुषः आस्रवो भवति । एतदुक्तं भवति—परिग्रहप्रणिधानप्रयुक्ताः तीव्रतरपरिणामा हिंसापरा बहुशो विज्ञप्राश्चानुमताः भाविताश्च तत्कृतकर्मात्मसात् करणात् तमाय पिंडवत् अहितक्रोधाद्यर्थी नारकस्यायुषः आस्रव इति संक्षेपः । तद्विस्तरस्तु मिथ्यादर्शनश्लिष्टाचारतोत्कृष्टमानताशैलभेदसदृशरोषतीव्रलोभानुरागानुकंपादीनतापरपरितापांतःप्रणिधानबधबंधनाभिनिवेशप्राणभूतजीवसत्त्वास्रोपघातपरिणामप्राणबधात्मकानृतवचनशीलत्वपरस्वहरणानिभृताभिष्वंगपरिणाममैथुनोपसेवनातिरतिमहारंभपर्शाकेन्द्रियताकामभोगाभिलापप्रवृद्धता नैःशील्यपापनिमित्ताहाराभिप्रायस्थिरवैरनृशंसमर्माक्षितक्रंदनकारिता निरनुग्रहत्वाभाव्यपातिसमयभेदतीर्थकरासादनकृष्णलेश्याभिजातरौद्रध्यानमरणकालत्वादिलक्षणो विज्ञेयः । आह उक्तो नारकस्यायुष आस्रवः तैर्यग्योनस्येदानीं वक्तव्य इत्यत्रोच्यते—

माया तैर्यग्योनस्य ॥ १६ ॥

चारित्रमोहोदयात् कुटिलभावो माया ॥ १ ॥ चारित्रमोहकर्मोदयाविर्भूत आत्मनः कुटिलस्वभावः मायेति व्यपदिश्यते । सा माया निकृतिस्तैर्यग्योनस्यायुष आस्रव इति संक्षेपः । प्रपंचस्तु—मिथ्यात्वोपष्टंभाधर्मदेशनानल्पारंभपरिग्रहनिकृतिकूटकर्मावनिभेदसदृशरोषनिःशीलताशब्दलिंगवंचनातिसंधानप्रियताभेदकरणानर्थोद्भावनवर्णगंधरसस्पर्शान्यत्वापादनजातिकुलशीलसंदूषणाविसंवादनाभिसंधिमिथ्याजीवित्वसद्गुणव्यपलापासद्गुणख्यापननीलकपोतलेश्यापरिणामार्तध्यानमरणकालतादिलक्षणः प्रत्येतव्यः । आह—व्याख्यातस्तैर्यग्योनस्यायुष आस्रवः । इदानीं मानुषस्यायुषः को हेतुरित्यत्रोच्यते—

अल्पारंभपरिग्रहत्वं मानुषस्य ॥ १७ ॥

नारकायुरास्रवविपरीतो मानुषस्य ॥ १ ॥ नारकायुरास्रवो व्याख्यातः तद्विपरीतो मानुषस्यास्रव इति संक्षेपः व्यासस्तु—मिथ्यादर्शनालिंगितमतिविनीतस्वभावताप्रकृतिभद्रतामार्दवार्जवसमाचारसुखप्रज्ञापनीयतावालुकाराजिसदृशरोषप्रगुणव्यवहारप्रायताऽल्पारंभपरिग्रहसंतोषाभिरतिप्राण्युपघातविरमणप्रदोषकर्मनिवृत्तिस्वागताभिभाषणामौखर्यप्रकृतिमधुरतालोकयात्रानुग्रहौदासीन्यानुसूयाल्पसंक्लेशतागुरुदेवतातिथिपूजासंविभागशीलताकपोतपीतलेश्योपश्लेषधर्मध्यानमरणकालतादिलक्षणः । किमेतावानेवायुषो मानुषस्यास्रव ? इत्युच्यते—

स्वभावमार्दवं च ॥ १८ ॥

उपदेशानपेक्षं स्वभावमार्दवं ॥१॥ मृदोर्भावः कर्म वा मार्दवं । स्वभावेन मार्दवं स्वभावमार्दवं च ।

उपदेशानपेक्षमित्यर्थः। ननु पूर्वत्र व्याख्यातमिदं पुनर्ग्रहणमनर्थकं सूत्रेनुपात्तमिति कृत्वा पुनरिदमुच्यते—

एकयोगीकरणमिति चेन्नोत्तरापेक्षत्वात् ॥ १ ॥ स्यान्मतं एको योगः कर्तव्यः-अल्पारंभपरिग्रहत्वं स्वभावमार्दवं मानुषस्येति? तन्न किं कारणं? उत्तरापेक्षत्वात्। दैवस्यायुषः कथमयमास्रवः स्यादिति पृथक्करणं। किमेतदेव द्वितीयं मानुषस्यास्रवः? नेत्युच्यते—

निःशीलव्रतत्वं च सर्वेषां ॥ १९ ॥

च शब्दोधिकृतसमुच्चयार्थः ॥ १ ॥ अल्पारंभपरिग्रहत्वं मानुषस्यायुः निःशीलव्रतत्वं वेत्यधिकृतसमुच्चयार्थश्चशब्दः क्रियते। शीलानि च व्रतानि च शीलव्रतानि निःक्रांतः शीलव्रतेभ्यः निःशीलव्रतः तस्य भावः निःशीलव्रतत्वं।

सर्वेषां ग्रहणं सकलास्रवप्रतिपत्त्यर्थं ॥ २ ॥ सकलस्यायुषः आस्रवप्रतिपत्तिः कथं स्यादिति सर्वेषामित्युच्यते।

देवायुषोपि प्रसंग इति चेन्नातिक्रांतापेक्षत्वात् ॥ ३ ॥ यदि सर्वेषां ग्रहणं सकलसंग्रहार्थं क्रियते देवायुषोप्ययमास्रवः प्रसक्तः? नैष दोषः अतिक्रांतापेक्षत्वात् अतिक्रांतानामायुषां सर्वेषामास्रव इत्यपेक्ष्यते।

पृथक्करणात् सिद्धेरानर्थक्यमिति चेन्न भोगभूमिजार्थत्वात् ॥ ३ ॥ स्यादेतत् पृथक्करणादेवातिक्रांतायुस्त्रयापेक्षा सिध्यति यदि मानुषायुरास्रव एवैषः स्यात् तत्रैव क्रियेत ततः सर्वेषां ग्रहणमनर्थकमिति तन्न किं कारणं? भोगभूमिजार्थत्वात्। भोगभूमिजापेक्षया निःशीलव्रतत्वं दैवस्यायुष आस्रव इत्येतस्य प्रदर्शनार्थं सर्वेषामित्युच्यते। आह—त्रयाणामास्रवविधिरुक्तः। इदानीं दैवस्यायुषो विधिः क्रियतामित्यत्रोच्यते—

सरागसंयमसंयमासंयमाकामनिर्जराबालतपांसि दैवस्य ॥२०॥

व्याख्याताः सरागसंयमादयः ॥ १ ॥ शुभपरिणामाः सरागसंयमादयः व्याख्याताः ते दैवस्यायुष आस्रव हेतवो भवंतीति संक्षेपः। विस्तरस्तु कल्याणमित्रसंबंधायतनोपसेवासद्धर्मश्रवणागौरवदर्शनानवद्यप्रोषधोपवासतपोभावनादिषु अनभिगतजीवाजीवा बालतपसः अनुपलब्धतत्त्वस्वभावाज्ञानकृतसंयमासंक्लेशभावविशेषात् केचिद्भवनव्यंतरादिषु सहस्रारपर्यंतेषु मनुष्यतिर्यक्ष्वपि च। आकामनिर्जराक्षुत्तृष्णानिरोधब्रह्मचर्यभूशय्यामलधारणपरितापादिभिः परिखेदितमूर्तयः नारकाः निरोधकबंधनबद्धाः दीर्घकालरोगिणः असंक्लिष्टाः तरुगिरिशिखरपातिनः अनशनज्वलनजलप्रवेशनविषभक्षणधर्मबुद्धयः व्यंतरमानुषतिर्यक्षु। निःशीलव्रताः सानुकंपहृदयाः जलराजितुल्यरोषाः भोगभूमिसमुत्पन्नाश्च व्यंतरादिषु जन्म प्रतिपद्यंते। इत्युक्तो दैवस्यायुष आस्रवोऽयं आस्रवः। किमेतावानेव देवायुरास्रवविधिराहोस्विदन्योप्यस्तीत्यत्रोच्यते—

सम्यक्त्वं च ॥ २१ ॥

किं? दैवस्यायुष आस्रव इत्यनुवर्तते।

उक्तं सम्यक्त्वलक्षणं ॥ १ ॥

अविशेषाभिधानेपि सौधर्मादिविशेषगतिः पृथक्करणात् ॥ २ ॥ सम्यक्त्वं दैवस्यायुष आस्रव इत्यविशेषाभिधानेपि सौधर्मादिविशेषगतिर्भवति। कुतः? पृथक्करणात् यद्यविशेषगतिरेवेष्टा स्यात् पृथक्करणमनर्थकं स्यात् पूर्वसूत्रे एवोच्यते। यद्येवं पूर्वसूत्रे उक्त आस्रवविधिः अविशेषेण प्रसक्तः तेन सरागसंयमसंयमासंयमावपि भवनावास्याद्यायुष आस्रवौ प्रसक्तौ?

नातस्तत्सिद्धेः ॥ ३ ॥ नैष दोषः । कुतः ? अतस्तत्सिद्धेः । यत एव सम्यक्त्वं सौधर्मादिष्विति नियम्यते तत एव तयोरपि नियमसिद्धिः । नासति सम्यक्त्वे सरागसंयमसंयमासंयमव्यपदेश इति । आह– आयुषोनंतरं यन्निर्दिष्टं नाम तस्य क आस्रव इत्यत्रोच्यते—तत्र तद्विविधमशुभं शुभं चेति । तत्राशुभनामा-स्रवप्रतिपत्त्यर्थमारभ्यते—

योगवक्रता विसंवादनं चाऽशुभस्य नाम्नः ॥ २२ ॥

कायवाङ्मनसां कौटिल्येन वृत्तिर्योगवक्रता ॥ १ ॥ कायवाङ्मनांसि व्याख्यातानि तेषां कुटिलता योगवक्रता इत्युच्यते । अनार्जवं प्रणिधानमिति यावत् ।

विसंवादनमन्यथाप्रवर्तनं ॥ २ ॥ अन्येन प्रकारेण प्रवर्तनं प्रतिपादनं विसंवादनमिति विज्ञायते ।

योगवक्रतैवेति चेत्सत्यमात्मांतरेपि तद्भावप्रयोजकत्वात् पृथग्वचनं ॥३॥ स्यादेतत् अन्यथा-प्रवर्तनं विसंवादनं तदेव योगवक्रतापीति पृथग्ग्रहणमनर्थकमिति ? सत्यमेवमेतत् किंतु आत्मांतरेपि तद्भाव प्रयोजकत्वात् पृथग्वचनं । सम्यगभ्युदयनिःश्रेयसार्थासु क्रियासु प्रवर्तमानमन्यं कायवाङ्मनोभिर्विसंवाद-यति–मैवं कार्षीरेवं कुर्विति कुटिकतया प्रवर्तनं विसंवादनं । आत्मगता योगवक्रता, इत्ययमनयोर्भेदः ।

चशब्दोनुक्तसमुच्चयार्थः ॥ ४ ॥ चशब्दः क्रियते अनुक्तस्यास्रवस्य समुच्चयार्थः । कः पुनरसौ ? मिथ्यादर्शनपिशुनतास्थिरचित्तस्वभावताकूटमानतुलाकरणसुवर्णमणिरत्नाद्यनुकृतिकुटिलसाक्षित्वांगोपांगच्या-वनवर्णगंधरसस्पर्शान्यथाभावनयंत्रपंजरक्रियाद्रव्यांतरविषयसंबंधनिकृतिभूयिष्ठतापरनिंदात्मप्रशंसानृतवचन-परद्रव्यादानमहारंभपरिग्रहोज्ज्वलवेषरूपमदपरुषासत्यप्रलापाक्रोशमौखर्यसौभाग्योपयोगवशीकरणप्रयोगपरकुतू-हलोत्पादनालंकारादरचैत्यप्रदेशगंधमाल्यधूपादिमोषणविलंबनोपहासेष्टकापाकदवाग्निप्रयोगप्रतिमायतनप्रतिश्र-यारामोद्यानविनाशतीव्रक्रोधमानमायालोभपापकर्मोपजीवनादिलक्षणः । स एष सर्वोऽशुभस्य नाम्नः ।

आह—अथ शुभनामकर्मणः क आस्रव इत्युच्यते—

तद्विपरीतं शुभस्य ॥ २३ ॥

ऋजुयोगोऽविसंवादनं च ॥ १ ॥ तद्विपरीतं कायवाङ्मनसां ऋजुत्वमविसंवादनं च तद्विपरीत-मित्युच्यते । चशब्देन धार्मिकदर्शनसंभ्रमसद्भावोपनयनसंसरणभीरुताप्रमादवर्जनासंभेदचारिततादयो यथो-क्ताऽशुभविपरीताः परिणामाः शुभनाम्न आस्रवाः प्रत्येतव्याः । आह–किमेतावानेव शुभनामास्रवविधिः । उत काश्चिदस्ति प्रतिविशेषः ? इत्युच्यते—यदिदं तीर्थकरनामकर्म अनंतानुपमप्रभावमचिंत्यविभूतिवि-शेषकारणं त्रैलोक्यविजयकरं तस्यास्रवविधिविशेषोस्तीति । यद्येवमुच्यतां तस्यास्रव इत्यत इदमारभ्यते —

दर्शनविशुद्धिर्विनयसंपन्नता शीलव्रतेष्वनतिचारोऽभीक्ष्णज्ञानोपयोग-संवेगौ शक्तितस्त्यागतपसी साधुसमाधिर्वैयावृत्त्यकरणमर्हदा-चार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना प्रवचनवत्सलत्वमिति तीर्थकरत्वस्य ॥ २४ ॥

जिनोपदिष्टे निर्ग्रन्थे मोक्षवर्त्मनि रुचिः निःशंकितत्वाद्यष्टांगा दर्शनविशुद्धिः ॥ १ ॥ जिनेन भगवताऽर्हता परमेष्ठिनोपदिष्टे निर्ग्रन्थलक्षणे मोक्षवर्त्मनि रुचिर्दर्शनविशुद्धिः । तस्या अष्टावंगानि– निःशंकितत्वं, निःकांक्षता, विचिकित्साविरहः, अमूढदृष्टिता, उपबृंहणं, स्थितिकरणं, वात्सल्यं, प्रभावनं-चेति । तत्रेहलोकपरलोकव्याधिमरणासंयमारक्षणाकास्मिकसप्तविधभयाविनिर्मुक्तता—अर्हदुपदिष्टे वा प्रवचने किमिदं स्याद्वा नवेति शंकानिरासो निःशंकितत्वं । उभयलोकविषयोपभोगाकांक्षानिवृत्तिः कुदृष्ट्यंतराकांक्षा-

निरासो वा निःकांक्षता । शरीराद्यशुचिस्वभावमवगम्य शुचीति मिथ्यासंकल्पापनयः, अर्हत्प्रवचने वा इद-मयुक्तं घोरं कष्टं न चेदिदं सर्वमुपपन्नमित्यशुभभावनाविरहः निर्विचिकित्सता । बहुविधेषु दुर्नयदर्शनवर्त्मसु तत्त्ववदाभासमानेषु युक्त्यभावं परीक्षाचक्षुषा व्यवसाय्य विरहितमोहता अमूढदृष्टिता । उत्तमक्षमादिभाव-नयात्मनो धर्मपरिवृद्धिकरणमुपबृंहणं । कषायोदयादिषु धर्मपरिभ्रंशकारणेषु उपस्थितेष्वात्मनो धर्मप्रच्यवनं परिपालनं स्थितीकरणं । जिनप्रणीतधर्मामृते नित्यानुरागता वात्सल्यं । सम्यग्दर्शनज्ञानचारित्ररत्नत्रयप्रभा-वेनात्मनः प्रकाशनं प्रभावनं ।

ज्ञानादिषु तद्वत्सु चादरः कषायनिवृत्तिर्वा विनयसंपन्नता ॥ २ ॥ सम्यग्ज्ञानादिषु मो-क्षसाधनेषु तत्साधनेषु गुर्वादिषु च स्वयोग्यवृत्त्या सत्कार आदरः कषायनिवृत्तिर्वा विनयसंपन्नता ।

चारित्रविकल्पेषु शीलव्रतेषु निरवद्या वृत्तिः शीलव्रतेष्वनतिचारः ॥ ३ ॥ अहिंसादिषु व्रतेषु तत्परिपालनार्थेषु च क्रोधवर्जनादिषु शीलेषु निरवद्या वृत्तिः कायवाङ्मनसां शीलव्रतेष्वनतिचार इति कथ्यते ।

ज्ञानभावनायां नित्ययुक्तता ज्ञानोपयोगः ॥ ४ ॥ मत्यादिविकल्पं ज्ञानं जीवादिपदार्थस्वतत्त्वविषयं प्रत्यक्षपरोक्षलक्षणं अज्ञाननिवृत्त्यव्यवहितफलं हिताहितानुभयप्राप्तिपरिहारोपेक्षाव्यवहितफलं यत्तस्य भावनायां नित्ययुक्तता ज्ञानोपयोगः ।

संसारदुःखान्नित्यभीरुता संवेगः ॥ ५ ॥ शारीरं मानसं च बहुविकल्पं प्रियविप्रयोगाप्रिय-संयोगेप्सितालाभादिजनितं संसारदुःखं यदतिकष्टं ततो नित्यभीरुता संवेगः ।

परप्रीतिकरणातिसर्जनं त्यागः ॥ ६ ॥ आहारो दत्तः पात्राय तस्मिन्नहनि तत्प्रीतिहेतुर्भवति, अभयदानमुपपादितमेकभवव्यसननोदनकरं । सम्यग्ज्ञानदानं पुनः अनेकभवशतसहस्रदुःखोत्तरणकारणमत एतत्त्रिविधं यथाविधिप्रतिपद्यमानं त्यागव्यपदेशभाग्भवति ।

अनिगूहितवीर्यस्य मार्गाविरोधिकायक्लेशस्तपः ॥ ७ ॥ शरीरमिदं दुःखकारणमनित्यमशुचि, नास्य यथेष्टभोगविधिना परिपोषो युक्तः, अशुच्यपीदं गुणरत्नसंचयोपकारीति विचिन्त्य विनिवृत्तविषयसुखा-भिष्वङ्गस्य स्वकार्यं प्रत्येतद्दृद्भृतकमिव नियुञ्जानस्य यथाशक्तिमार्गाविरोधि कायक्लेशानुष्ठानं तप इति निश्चीयते

मुनिगणतपःसंधारणं समाधिः भांडागाराग्निप्रशमनवत् ॥ ८ ॥ यथा भांडागारे दहने समु-त्थिते तत्प्रशमनमनुष्ठीयते बहूपकारत्वात् तथानेकव्रतशीलसमृद्धस्य मुनिगणस्य तपसः कुतश्चित् प्रत्यूहे समुत्थिते तत्संधारणं समाधिरिति समाख्यायते ।

गुणवद्दुःखोपनिपाते निरवद्येन विधिना तदपहरणं वैयावृत्त्यं ॥ ९ ॥ गुणवतः साधु-जनस्य दुःखे सन्निहिते निरवद्येन विधिना तदपहरणं बहूपकारं वैयावृत्त्यमिति व्याख्यायते ।

अर्हदाचार्येषु बहुश्रुतेषु प्रवचने च भावविशुद्धियुक्तोनुरागो भक्तिः ॥ १० ॥ अर्हदाचा-र्येषु केवलश्रुतज्ञानादिदिव्यनयनेषु परहितकरप्रवृत्तेषु स्वपरसमयविस्तरनिश्चयज्ञेषु च बहुश्रुतेषु प्रवचने च श्रुतदेवतासन्निधिगुणयोगदुरासदे मोक्षपदभवनारोहणसुरचितसोपानभूते भावविशुद्धियुक्तोनुरागः, भक्तिः, त्रिविधा कल्प्यते ।

षण्णामावश्यकक्रियाणां यथाकालं प्रवर्तनमावश्यकापरिहाणिः ॥ ११ ॥ षडावश्यकक्रि-याः–सामायिकं चतुर्विंशतिस्तवः वंदना प्रतिक्रमणं प्रत्याख्यानं कायोत्सर्गश्चेति । तत्र सामायिकं सर्वसावद्य-योगनिवृत्तिलक्षणं चित्तस्यैकत्वेन ज्ञाने प्रणिधानं । चतुर्विंशतिस्तवः तीर्थकरगुणानुकीर्तनं, वंदना त्रि-शुद्धिः द्व्यासना चतुःशिरोवनतिः, द्वादशावर्तना । अतीतदोषनिवर्तनं प्रतिक्रमणं, अनागतदोषापोहनं प्रत्याख्यानं, परिमितकालविषया शरीरे ममत्वनिवृत्तिः कायोत्सर्गः । इत्येतासां षण्णामावश्यकक्रियाणां यथा कालप्रवर्तनं अनौत्सुक्यं आवश्यकापरिहाणिरिति परिभाष्यते ।

ज्ञानतपोजिनपूजाविधिना धर्मप्रकाशनं मार्गप्रभावनं ॥ १२ ॥ ज्ञानरविप्रभया परसमयखद्योततिरस्कारिण्या, सत्तपसा महोपवासादिलक्षणेन सुरपतिविष्टरप्रकंपनाहेतुना, जिनपूजया वा भव्यजनकमलखंडप्रबोधनप्रभाकरप्रभया, सद्धर्मप्रकाशनं मार्गप्रभावनमिति संभाव्यते ।

वत्से धेनुवत्सधर्मणि स्नेहः प्रवचनवत्सलत्वं ॥ १३ ॥ यथा धेनुर्वत्सेऽकृत्रिमस्नेहमुत्पादयति तथा सधर्माणमवलोक्य तद्गतस्नेहार्द्रीकृतचित्तता प्रवचनवत्सलत्वमित्युच्यते । यः सधर्मणि स्नेहः स एव प्रवचनस्नेह इति । तान्येतानि षोडशकारणानि सम्यग्भाव्यमानानि व्यस्तानि समस्तानि च तीर्थकरनामकर्मास्रवकारणानि प्रत्येतव्यानि । आह —नामानंतरनिर्देशभाजो गोत्रस्यापादाने किं निबंधनमिति प्रतिविधीयते—तद्द्वैविध्ये सति आद्यस्य तावत्—

परात्मनिंदाप्रशंसे सदसद्गुणच्छादनोद्भावने च नीचैर्गोत्रस्य ॥२५॥

दोषोद्भावनेच्छा निंदा ॥ १ ॥ तथ्यस्य वाऽतथ्यस्य वा दोषस्योद्भावनं प्रतीच्छा मनःपरिणामावक्षेपो निंदेत्युच्यते ॥

गुणोद्भावनाभिप्रायः प्रशंसा ॥ २ ॥ सद्भूतस्यासद्भूतस्य वा गुणस्योद्भावनं प्रत्यभिप्रायः प्रशंसेत्युपदिश्यते । परश्च आत्मा च परात्मानौ निंदा च प्रशंसा च निंदाप्रशंसे परात्मनोर्निंदाप्रशंसे परात्मनिंदाप्रशंसे यथासंख्यमभिसंबंधः । परनिंदा आत्मप्रशंसेति यावत् ।

अनुद्भूतवृत्तिताच्छादनं ॥ ३ ॥ प्रतिबंधकहेतुसंनिधाने सति अनुद्भूतवृत्तिताविर्भावाच्छादनमित्यवसीयते ॥

प्रतिबंधकाभावे प्रकाशितवृत्तितोद्भावनं ॥४॥ प्रतिबंधकस्य हेतोरभावे प्रकाशितवृत्तिता उद्भावनमिति व्यपदेशमर्हति सश्चासश्च सदसंतौ तौ च तौ गुणौ च सदसद्गुणौ, छादनं चोद्भावनं च छादनोद्भावने सदसद्गुणयोः छादनोद्भावने सदसद्गुणच्छादनोद्भावने, अत्रापि यथासंख्यमभिसंबंधः । सद्गुणच्छादनमसद्गुणोद्भावनमिति ।

गूयते तदिति गोत्रं ॥ ५ ॥ गूयते शब्द्यते तदिति गोत्रं उणादिकेन त्रदा निष्पत्तिः ।

नीचैरित्यधिकरणप्रधानः शब्दः ॥ ६ ॥ नीचैरित्ययं शब्दः अधिकरणप्रधानो द्रष्टव्यः नीचैः स्थाने येनात्मा क्रियते तन्नीचैर्गोत्रं तस्यास्रवकारणान्येतानि परनिंदादीनि । तत्प्रपंच उच्यते—जातिकुलबलरूपश्रुताज्ञैश्वर्यतपोमदपरावज्ञानोत्प्रहसनपरपरिवादशीलताधार्मिकजननिंदात्मोत्कर्षोऽन्ययशोविलोपासत्कीर्त्युत्पादनगुरुपरिभवनतदुद्घट्टनदोषख्यापनविहेडनस्थानावमानभर्त्सनगुणावसादनांजलिस्तुत्यनभिवादनाभ्युत्थानाकरणतीर्थकराधिक्षेपादिः । आहोपपादितः नीचैर्गोत्रस्यास्रवः, इदानीमुच्चैर्गोत्रस्यास्रवविधिः क इति ? अत्रोच्यते—

तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥ २६ ॥

नीचैर्गोत्रास्रवप्रतिनिर्देशनार्थस्तच्छब्दः ॥ १ ॥ प्रत्यासत्तेस्तदित्यनेन नीचैर्गोत्रास्रवः प्रतिनिर्दिश्यते ।

विपर्ययोऽन्यथावृत्तिः ॥ २ ॥ अन्येन प्रकारेण वृत्तिर्विपर्यय इति व्यपदिश्यते तस्य विपर्ययः तद्विपर्ययः । कः पुनरसौ—आत्मनिंदा परप्रशंसे सद्गुणोद्भावनमसद्गुणच्छादनं च ।

गुरुष्ववनतिर्नीचैर्वृत्तिः ॥ ३ ॥ गुणोत्कृष्टेषु विनयेन अवनतिर्नीचैर्वृत्तिरित्याख्यायते ।

अनहंकारतानुत्सेकः ॥ ४ ॥ विज्ञानादिभिरुत्कृष्टस्यापि सतः तत्कृतमदविरहोऽनहंकारतानुत्सेक इत्युच्यते । तान्येतानि उत्तरस्योच्चैर्गोत्रस्यास्रवकारणानि भवंति । प्रपंचस्तु विव्रियते—जातिकुलरूपबलवीर्य

परिज्ञानैश्वर्यतपोविशेषवतः आत्मोत्कर्षाप्रणिधानं परावज्ञानौद्धत्यनिंदासूयोपहासपरपरिवादनिवृत्तिः विनिहतमानता धर्म्यजनपूजाऽभ्युत्थानांजलिप्रणतिवंदना--ऐदंयुगीनान्यपुरुषदुर्लभगुणस्याप्यनुत्सिक्तता। अहंकारात्यये नीचैर्वृत्तिता भस्मावृतस्यैव हुतभुजः स्वमाहात्म्याप्रकाशनं धर्मसाधनेषु परमसंभ्रम इत्यादि । आहोक्तः सप्तविधकर्म प्रत्यास्रवविकल्पः । इदानीमष्टमस्य कर्मणोंतरायस्यास्रवविधिः कः ? इत्यत्रोच्यते-

विघ्नकरणमंतरायस्य ॥ २७ ॥

दानादिविहननं विघ्नः ॥ १ ॥ दानादीन्युक्तानि दानलाभभोगोपभोगवीर्याणि चेत्यत्र तेषां विहननं विघ्न इत्युच्यते।

यत्यर्थे कविधानं ॥ २ ॥ "स्थास्नापाव्यधिहनेर्युध्यर्थमिति" कविधिः। विघ्नस्य करणं विघ्नकरणमंतरायस्यास्रव इति संक्षेपः। तद्विस्तारस्तु विव्रियते—ज्ञानप्रतिषेधसत्कारोपघातदानलाभभोगोपभोगवीर्यस्नानानुलेपनगंधमाल्याच्छादनविभूषणशयनासनभक्ष्यभोज्यपेयलेह्यपरिभोगविघ्नकरणविभवसमृद्धिविस्मयद्रव्यापरित्यागद्रव्यासंप्रयोगसमर्थनाप्रमदावर्णवाददेवतानिवेद्यानिवेद्यग्रहणनिरवद्योपकरणपरित्यागपरवीर्यापहरणधर्मव्यवच्छेदनकुशलाचरणतपस्विगुरुचैत्यपूजाव्याघातप्रव्रजितकृपणदीनानाथवस्तुपात्रप्रतिश्रयप्रतिषेधक्रियापर - निरोधबंधनगुह्यांगछेदनकर्णनासिकौष्ठकर्तनप्राणिवधादिः । अत्र चोद्यते सूत्रेनुपात्तः सर्वास्रवप्रपंचः कथमेवं गंतुं शक्यते ? इत्यत्रोच्यते —

इतिकरणानुवृत्तेः सर्वत्रानुक्तसंग्रहः ॥ ३ ॥ इति करणोनुवर्तते । क प्रकृतः ? क्षांतिशौचमिति सद्वेद्यस्येत्यतः तेनानुक्तार्थसंग्रहः सर्वत्र वेदितव्यः । प्रकारार्थो हि इतिकरण इति।

स्वोपात्तकर्मवशादात्मनो विकारः शौंडातुरवत् ॥ ४ ॥ एवमुक्तेनास्रवविधिनोपात्तं कर्माष्टविधं ज्ञानावरणादिसंज्ञकं वक्ष्यमाणं मूलोत्तरप्रकृतिभेदं यन्निमित्त आत्मा संसारविकारमनुपरतमनुभवति । यथा शौंडः स्वरुचिविशेषान्मदमोहविभ्रमकरीं मदिरां पीत्वा तत्परिपाकवशात् अनेकविकारमास्कंदति । यथा वा आतुर अपथ्यभोजनकृतं वातादिविकारमवाप्नोति ।

अनपदिष्टहेतुकत्वादास्रवानियम इतिचेन्न स्वभावाभिव्यंजकत्वाच्छास्त्रस्य ॥ ५ ॥ स्यान्मतं य उक्त आस्रवनियमो ज्ञानावरणादीनां तत्प्रदोषनिह्नवादिः स नोपपद्यते कुतः अनपदिष्टहेतुत्वात्। नात्र हेतुरपदिष्टः येनास्रवनियमं प्रतिपद्येमहि । यच्च नाम सहेतुकं तद्विदुषां प्राह्यमिति ? तन्न किं कारणं ? स्वभावाभिव्यंजकत्वात् शास्त्रस्य । यथा प्रदीपो घटादीनां स्वभावमभिव्यनक्ति तथा शास्त्रमपि सतामेवार्थानां प्रकाशकं, तत्रायं परिणाम इदं वीर्यं द्रव्यावर्जनसमर्थं इति स्वभावव्याख्यानादुपालंभाभावः ।

तत्सिद्धिरतिशयज्ञानदृष्टत्वात् ॥ ६ ॥ तस्य शास्त्रस्य सतामर्थानामाभिव्यंजकत्वं दृष्टं कुतः अतिशयज्ञानदृष्टत्वात् । भगवतामर्हतामतिशयवज्ज्ञानं युगपत्सर्वार्थावभासनसमर्थं प्रत्यक्षं तेन दृष्टं यच्छास्त्रं तदर्थोपदेशकं, अतस्तत्प्रामाण्यात् ज्ञानावरणाद्यास्रवनियमप्रसिद्धिः ।

सर्वाविसंवादाच्चोपालंभनिवृत्तिः ॥ ७ ॥ तत्र प्रवादिनो न विसंवदंते-पृथिव्यादीनां द्रव्याणां कठिनद्रवोष्णचलनादिस्वभावानां रूपादीनां च गुणानां चाक्षुषत्वादिप्रतिनियतस्वभावादीनां चोत्क्षेपणादीनां च संयोगविभागनिरपेक्षकारणत्वादिस्वभावानामभ्युपगमात् । तथा सत्त्वरजस्तमसां गुणानां प्रकाशप्रवृत्तिनियमस्वभावानामभ्युपेतत्वात् । तथा अविद्यानां संस्कारादिप्रतिनियतकारणस्वभावानामिष्टत्वात् ततो नायमुपालंभः आस्रवनियमाभाव इति ।

तत्प्रदोषादीनां सर्वास्रवत्वान्नियमाभाव इतिचेन्न अनुभागविशेषनियमोपपत्तेः ॥ ८ ॥ स्यादेतत् यत्प्रदोषनिह्नवादयः ज्ञानावरणादीनामास्रवाः प्रतिनियता उक्ताः, ते सर्वेषां कर्मणां आस्रवा भवंति । ज्ञानावरणे बध्यमाने युगपदितरेषामपि बंध इष्यते आगमे, तस्मादास्रवनियमाभाव इति ? तन्न

किं कारणं ? अनुभागविशेषनियमोपपत्तेः । यद्यपि तत्प्रदोषादिभिः ज्ञानावरणादीनां सर्वासां प्रकृतीनां प्रदेशादिबंधनियमो नास्ति तथापि अनुभागविशेषनियमहेतुत्वेन तत्प्रदोषनिह्नवादयः प्रविभज्यंते ।

इति तत्त्वार्थवार्तिके व्याख्यानालंकारे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

अथ सप्तमोऽध्यायः ।

आस्रवपदार्थो व्याख्याप्रतिज्ञयोक्तोऽष्टोत्तरशतभेदसंख्यो बहुविचारः स द्वेधा पुण्यपापलक्षणसांपरायिकनिमित्तत्वात् । तत्र पुण्यास्रवो व्याख्येयः प्रधानत्वात् तत्पूर्वकत्वात् मोक्षस्य । यद्येवमुच्यतां कैस्ते क्रियाविशेषाः प्रारभ्यमाणास्तस्यास्रवा भवंतीत्यत्रेत्युच्यते व्रतिभिः तत्रानिर्धारिते यत्राविशेषलक्षणत्वात् (?) व्रतस्य तत्प्रसिद्ध्यर्थमिदमुच्यते । अथवा 'कायवाङ्मनस्कर्म योगः स आस्रव शुभः पुण्यस्येति' सामान्येनोक्तः तद्विशेषप्रतिपत्त्यर्थमिदमुच्यते । अथवा उक्तमेतत् सद्वेद्यास्रवविधाने भूतव्रत्यनुकंपेति तत्र न ज्ञायते किं व्रतं ? कोव्रतीति तन्निर्धारणार्थमिदमुच्यते—

हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतं ॥ १ ॥

हिंसादयो निर्देक्ष्यमाणलक्षणाः ॥ १ ॥ प्रमत्तयोगात् प्राणव्यपरोपणं हिंसेत्येवमादिभिः सूत्रैः हिंसादीनां लक्षणं निर्देक्ष्यते ।

विरमणं विरतिः ॥ २ ॥ चारित्रमोहोपशमक्षयक्षयोपशमनिमित्तौपशमिकादिचारित्राविर्भावात् विरमणं विरतिः ।

व्रतमभिसंधिकृतो नियमः ॥ ३ ॥ बुद्धिपूर्वकपरिणामोभिसंधिः इदमेवेत्थमेव वा कर्तव्यमित्यन्यनिवृत्तिः नियमः । अभिसंधिना कृतः अभिसंधिकृतः सर्वत्र व्रतव्यपदेशभाग्भवति ।

हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्य इत्यपादाननिर्देशः ॥ ४ ॥ हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्य इत्यपादाननिर्देशो द्रष्टव्यः ।

ध्रुवत्वाभावात्तदनुपपत्तिरिति चेन्न बुद्ध्यपाये ध्रुवत्वविवक्षोपपत्तेः ॥ ५ ॥ स्यान्मतं नात्रापादानत्वमुपपद्यते कुतः ध्रुवत्वाभावात् ध्रुवत्वेन हि प्रसिद्धोर्थः अपादानसंज्ञो भवति यथा ग्रामादागच्छतीति इति, न तथा हिंसादयः परिणामा ध्रुवाः कारणत्वात्, तदपायेऽपादानाप्रतीतेः । अथ हिंसादिपरिणत आत्मैव हिंसादिव्यपदेशभागिति द्रव्यार्थादेशात् ध्रुवत्वं कल्प्यते । एवमपि ततो विरतिर्नोपपद्यते नित्यत्वात्तस्मादपादानत्वमयुक्तमिति ? तन्न, किं कारणं ? बुद्ध्यपाये ध्रुवत्वविवक्षोपपत्तेः । यथा धर्माद्विरमतीत्यत्र य एष मनुष्यः संभिन्नबुद्धिः स पश्यति दुष्करो धर्मः फलं चास्य श्रद्धामात्रगम्यमिति स बुद्ध्या संप्राप्य निवर्तते । एवमिहापि य एष मनुष्यः प्रेक्षापूर्वकारी स पश्यति य एते हिंसादयः परिणामाः पापहेतवः पापकर्मणि च प्रवर्तमानमिहैव राजानो दंडयंति परत्र च बहुविधं दुःखमवाप्नोतीति स बुद्ध्या संप्राप्य निवर्तते ततो बुद्ध्या ध्रुवत्वविवक्षोपपत्तेः अपादानत्वं युक्तं ।

अहिंसायाः प्रधानत्वादादौ तद्वचनमितरेषां तत्परिपालनार्थत्वात् ॥ ६ ॥ अहिंसा सर्वेषु व्रतेषु प्रधानमतस्तद्वचनमादौ क्रियते । कुतः पुनः प्राधान्यं ? इतरेषां तत्परिपालनार्थत्वात् । इतराणि हि सत्यादीनि व्रतानि सस्यवृत्तिपरिक्षेपवत् अहिंसापरिपालनार्थानि ।

विरतिशब्दः प्रत्येकं परिसमाप्यते ॥ ७ ॥ हिंसाया विरतिः, अनृताद्विरतिः, स्तेयाद्विरतिः, अब्रह्मणो विरतिः, परिग्रहाद्विरतिः । यद्येवं—

विषयभेदाद्विरतिभेदे बहुत्वप्रसंगः ॥ ८ ॥ यथा गुडतिलौदनादीनां पक्तव्यानां भेदात् पाको

भिद्यते । द्वौ पाकौ त्रयः पाका इति । एवं वक्तव्यहिंसादिभेदात्त्यागस्यापि भेदोपपत्तेः विरतेर्बहुत्वं प्राप्नोति इति ?

न वा तद्विषयविरमणसामान्योपादानात् ॥ ९ ॥ नवा एष दोषः किं कारणं। तद्विषयविरमणसामान्योपादानात्। नात्र विषयभेदाद्भेदो विवक्षितः। यथा गुडतिलौदनादीना पाक इति सामान्ये विवक्षिते एकवचनं तथा विरमणसामान्यस्य विवक्षितत्वादेकवचनं न्याय्यं तत एव सर्वसावद्यनिवृत्तिलक्षणसामायिकापेक्षया एकं व्रतं, भेदपरतंत्रच्छेदोपस्थापनापेक्षया पंचविध व्रतं, अत्र कश्चिदाह—

हिंसादिभ्यो निवृत्तिवचनमनर्थकं संवरेंतर्भावात् ॥ १० ॥ हिंसादिभ्यो निवृत्तिर्व्रतमिति आस्रवप्रकरणे विधानमिदमनर्थकं कुतः संवरेंतर्भावात ।

प्रतिज्ञामात्रमिति चेन्न धर्माभ्यंतरत्वात् ॥ ११ ॥ स्यान्मतं प्रतिज्ञामात्रमेतत् संवरेंतर्भाव इति ? तन्न किं कारण? धर्माभ्यंतरत्वात्। दशविधो हि धर्मो वक्ष्यते तत्र संयमे भावकायविनयेर्यापथभैक्ष्यशयनासनप्रतिष्ठापनवाक्याष्टविधविशुद्धिलक्षणे अहिंसादीनामंतर्भावः ।

सत्यादिषु च तत्प्रपंचार्थ उपन्यास इति चेन्न तत्रैवाकरणात् ॥ १२ ॥ स्यादेतत् तस्य संयमस्यायं प्रपंचो यथा स्यादित्यहिंसादीनां उपन्यास इति ? तन्न किं कारणं ? तत्रैवाकरणात् । यदि तस्यैवायं प्रपंचः तत्रैव क्रियेत प्रकरणोत्कर्षकरणे प्रयोजनाभावात् ।

न संवरो व्रतानि परिस्पंददर्शनात् ॥ १३ ॥ व्रतानि संवरव्यपदेशं नार्हंति कुतः परिस्पंददर्शनात्। परिस्पंदो हि दृश्यते अनृतादत्तादानपरित्यागे सत्यवचनदत्तादानक्रियाप्रतीतेः ।

गुप्त्यादिसंवरपरिकर्मत्वाच्च ॥ १४ ॥ गुप्त्यादिलक्षणः संवरो वक्ष्यते तस्येदं परिकर्म व्रतानि, कृतव्रतपरिकर्मा हि साधुः सुखेन संवरं करोतीति ततश्च पृथक्त्वमवसेय ॥

रात्रिभोजनविरत्युपसंख्यानमितिचेन्न भावनांतर्भावात् ॥ १५ ॥ स्यान्मतमिह रात्रिभोजनविरत्युपसंख्यानं कर्तव्यं तदपि षष्ठमणुव्रतमिति ? तन्न किंकारण ? भावनांतर्भावात् । भावनासु हि अंतर्भवति रात्रिभोजनविरमणं ॥

अनिर्देशादितिचेन्न आलोकितपानभोजनवचनात् ॥ १६ ॥ अथ मतमेतत् भावनासु निर्देशाभावादयुक्तमिति ? तन्न किं कारणं ? आलोकितपानभोजनवचनात् । वक्ष्यते ह्यहिंसाव्रतपरिपालनायालोकितपानभोजनभावना कार्या इति ।

प्रदीपादिसंभवे सति रात्रावपि तत्प्रसंग इतिचेन्नानेकारंभदोषात् ॥ १७ ॥ स्यान्मतं यथालोकनार्थं दिवाभोजनं, प्रदीपचंद्रादिप्रकाशाभिव्यक्तं रात्रौ भोजनं कार्यमिति ? तन्न किं कारणं अनेकारंभदोषात् । अग्न्यादिसमारंभकरणलक्षणो हि दोषः स्यात् ।

परकृतप्रदीपादिसंभवे तदभाव इतिचेन्न चंक्रमणाद्यसंभवात् ॥ १८ ॥ स्यादेतत् परकृतप्रदीपादिसंभवे नारंभदोषः इति तन्न किं कारणं चंक्रमणाद्यसंभवात् । ज्ञानादित्यस्वेंद्रियप्रकाशपरीक्षितमार्गेण युगमात्रपूर्वापेक्षी देशकाल पर्येक्ष्य यतिः भिक्षां शुद्धामुपादीयतेत्याचारोपदेशः, नचायं विधिः रात्रौ भवतीति चंक्रमणाद्यसंभवः ।

दिवानीतस्य रात्रौ भोजनप्रसंग इतिचेन्नोक्तोत्तरत्वात् ॥ १९ ॥ स्यान्मतं दिवा ग्राम पर्यट्य केनचिद्भाजनेन भोजनाद्यानीय रात्रावुपयोगः प्रसक्त इति ? तन्न किं कारणं उक्तोत्तरत्वात् । उक्तोत्तरमेतत् प्रदीपादिसमारंभ इति, नेद संयमसाधनमानीय भोक्तव्यमिति । नापि निस्संगस्य पाणिपात्रपुटाहारिणः आनयनं संभवति । भाजनांतरसंग्रहे अनेकावद्यदर्शनादतिदीनचरितप्रसंगाद्दचिरादेव निवृत्तिपरिणामासंभवाच्च । भाजनेनानीतस्य परीक्ष्य भोजन संभवतीतिचेन्न योनिप्राभृतज्ञस्य संयोगविभागगुणदोषविचारस्य तदानीमेवोपपत्तेरानीतस्य पुनर्दोषदर्शनात् विसर्जनेऽनेकदोषोपपत्तेश्च ।

स्फुटार्थाभिव्यक्तेश्च दिवाभोजनं युक्तं ॥ २० ॥ यथा रविप्रकाशस्य स्फुटार्थाभिव्यंजकत्वा-द्भूमिदेशदातृजनचंक्रमणाद्यन्नपानादिपतितमिलरच्च स्पष्टमुपलभ्यते । न तथा चंद्रादिप्रकाशानामस्फुटार्थाभि-व्यंजकत्वात् । स्फुटा भूम्यांद्युपलब्धिरस्तीति दिवाभोजनमेव युक्तं तदेतदविशेषचोदितं । पंचतयविषयव्र-ताभिधानं विरत्याश्रयविवक्षाद्वयसंभवादभिधेयात्मभूतधर्मोपादानादभिधानानां व्यक्तिव्यपदेशद्वैविध्यमनु-भवतीत्याह —

देशसर्वतोणुमहती ॥ २ ॥

कुतश्चिद्दिश्यते इति देशः ॥ १ ॥ कुतश्चिदवयवान् दिश्यत इति देशः प्रदेशः । एकदेश इत्यर्थः ।

सरत्यशेषानवयवानिति सर्वः ॥ २ ॥ सरति गच्छति अशेषानवयवानिति सर्व इत्युच्यते । देशश्च सर्वश्च देशसर्वौ देशसर्वाभ्यां देशसर्वतः । विरतिरित्यनुवर्तते । हिंसादेर्देशतो विरतिरणुव्रतं । सर्वतो विरतिर्महाव्रतं । अणु च महच्च अणुमहती इति व्रतापेक्षया नपुंसकलिंगनिर्देशः ।

आह न हिनस्मि नानृतं वदामि नादत्तमाददे नांगनां स्पृशामि न परिग्रहमुपाददे इति एषोऽभि-संधिः । योऽत्राऽसमर्थभावनापरः कथं यथाप्रतिज्ञातार्थाभिधानभाक् स्यात् इत्यत्रोच्यते—यस्माद्विहितेनेमाः भावयितव्याः परमार्थदित्सया ।

तत्स्थैर्यार्थं भावनाः पंच पंच ॥ ३ ॥

भावनाशब्दः कर्मसाधनः ॥ १ ॥ अयं भावनाशब्दः कर्मसाधनो द्रष्टव्यः । वीर्यांतरायक्षयोप-शमचारित्रमोहोपशमक्षयोपशमांगोपांगनामलाभापेक्षेणाऽऽत्मना भाव्यंत ता इति भावनाः ।

पंच पंचेत्यत्र वीप्सायां शस्प्रसंग इतिचेन्न कारकाधिकारात् ॥ २ ॥ स्यादेतत् पंचपंचे-त्यस्मिन् निर्देशे वीप्साविविक्षिते वीप्सायां शसा भवितव्यं पंचश इति तथा सति लघुश्च निर्देशो भव-तीति ? तन्न किं कारणं ? कारकाधिकारात् । कारकादिति तत्र वर्तते नचाऽत्र कारकत्वमस्ति इति शसा न भवितव्यं ॥

क्रियाध्याहारात् कारकत्वमितिचेन्न विकल्पाधिकारात् ॥ ३ ॥ स्यादेतत् पंच पंच भाव-येत इत्येवमपि क्रियापदाध्याहारे कारकत्वोपपत्तौ शसा भवितव्यमिति तन्न किं कारण विकल्पाधिका-रात् । वेत्यनुवर्तते तेनात्र शसा (?) [शस्] न भवति । ननु लघुत्वात् शसा निर्देशः कर्तव्य. ? प्रति-पत्ते गौरवं माभूत् इति द्वित्वमेव कृतं, वाक्याध्याहारे हि क्रियमाणे प्रतिपत्तिगौरवं स्यात् इति । तस्य पंचविधस्य व्रतस्य स्थैर्यार्थं एकैकस्य पंच पंच भावना वेदितव्याः ।

यद्येवमाद्यस्य अहिंसाव्रतस्य का इत्युच्यते—

वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकित-पानभोजनानि पंच ॥ ४ ॥

वाग्गुप्तिर्मनोगुप्तिरीर्यासमितिरादाननिक्षेपणसमितिरालोकितपानभोजनमित्येताः पंच अहिंसाव्रतस्य भावना. ॥

अथ द्वितीयस्य व्रतस्य काः ?

क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनुवीचिभाषणं च पंच ॥ ५ ॥

क्रोधप्रत्याख्यानं लोभप्रत्याख्यानं भीरुत्वप्रत्याख्यानं हास्यप्रत्याख्यानं अनुवीचिभाषणं चेत्येताः पंच भावनाः सत्यव्रतस्य ज्ञेयाः । अनुवीचिभाषणं अनुलोमभाषणमित्यर्थः । ननु अप्रशस्यक्रियस्यापि वचसो-ऽनुवीचिभाषणमापन्नं ? नैष दोषः पुण्याश्रवस्य प्रकृतत्वात् अप्रशस्ताक्रियानुवीचिभाषणस्यानधिकारः । विचार्य भाषणमनुवीचिभाषणमिति वा । इदानीं तृतीयस्य व्रतस्य भावना वक्तव्याः—

शून्यागारविमोचितावासपरोपरोधाकरणभैक्ष्यशुद्धिसद्धर्माविसंवादाः पंच ॥ ६ ॥

शून्यागारेषु गिरिगुहातरुकोटरादिष्वावासः । परकीयेषु च मोचितेष्वावासः । परेषां उपरोधाकरणं । आचारशास्त्रमार्गेण भैक्ष्यशुद्धिर्वा । ममेदं तवेदमितिसद्धर्मभिः—अविसंवाद इत्येताः पंच अदत्तादानविरमणव्रतस्य भावनाः प्रत्येतव्याः । अथेदानीं ब्रह्मचर्यस्य भावनाः कथ्यते—

स्त्रीरागकथाश्रवणतन्मनोहरांगनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः पंचः ॥ ७ ॥

स्त्रीरागकथाश्रवणवर्जनं तन्मनोहरांगनिरीक्षणाविरहः पूर्वरतानुस्मरणपरित्यागः वृष्येष्टरसानुभवननिरासः स्वशरीरसंस्कारत्यागश्चेति चतुर्थव्रतस्य भावनाः पंच विज्ञेयाः । अतः परं पंचमव्रतस्य भावनाः निर्देष्टव्याः—

मनोज्ञामनोज्ञेंद्रियविषयरागद्वेषवर्जनानि पंच ॥ ८ ॥

पंचानामिंद्रियाणां स्पर्शादीनामिष्टानिष्टेषु विषयेषु उपनिपतितेषु रागद्वेषवर्जनानि पंचाऽस्य आकिंचन्यस्य व्रतस्य भावनाः प्रत्येतव्याः । किंचान्यद्यथामीषां व्रतानां दृढिमार्थं भावनाः प्रतीयंते तद्विपक्षिद्धिरिति भावनोपदेशः तथा तदर्थं तद्विरोधिष्वपीत्याह—

हिंसादिष्विहामुत्रापायावद्यदर्शनं ॥ ९ ॥

अभ्युदयनिःश्रेयसार्थानां नाशकोपायो भयं वा ॥ १ ॥ अभ्युदयनिःश्रेयसार्थानां क्रियासाधनानां नाशकोऽनर्थ अपाय इत्युच्यते । अथवा ऐहलौकिकादिसप्तविध भयमपाय इति कथ्यते ।

अवद्यं गर्ह्यं ॥ २ ॥ गर्ह्यमवद्यमिति यावत् । अपायश्च अवद्यं च अपायावद्ये । अपायावद्ययोर्दर्शनं अपायावद्यदर्शनं भावयितव्यं । क्व ? इहामुत्र च । केषु ? हिंसादिषु । कथमितिचेदुच्यते—हिंसायां तावत् हिंस्रो हि नित्योद्वेजनीयः सततानुबद्धवैरश्च । इहैव च वधबंधपरिक्लेशादीन् प्रतिलभते । प्रेत्य चाशुभां गतिं गर्हितश्च भवति इति हिंसायां व्युपरमः श्रेयान् । तथा अनृतवादी अश्रद्धेयो न भवति इहैव च जिह्वाछेदादीन् प्रतिलभते । मिथ्याभ्याख्यानदुःखितेभ्यश्च बद्धवैरेभ्यो बहूनि व्यसनानि अवाप्नोति । प्रेत्य चाशुभां गतिं गर्हितश्च भवति इति अनृतवचनात् व्युपरमः श्रेयान् । तथा स्तेनः परद्रव्याहरणासक्तमतिः सर्वस्योद्वेजनीयो भवति । इहैवाभिघाततवधबंधहस्तपादकर्णनासोत्तरोष्ठछेदनसर्वस्वहरणादीन् प्रतिलभते । प्रेत्य चाशुभां गतिं गर्हितश्च भवतीति स्तेयात् व्युपरमः श्रेयान् । तथा अब्रह्मचारी मदविभ्रमोद्भ्रांतचित्तः वनगज इव वनितावचितो विवशो वधबंधपरिक्लेशादीन् अनुभवति । मोहाभिभूतत्वाच्च कार्यानभिज्ञो न किंचिदपि कुशलमाचरति । परांगनालिंगनासंगकृतरतिश्च इहैव वैरानुबंधिनः लिंगछेदनवधबंधसर्वस्वहरणादीन् अपायान् आप्नोति । प्रेत्य चाऽशुभां गतिमश्नुते गर्हितश्च भवतीति । अतो विरतिरात्महिता । तथा परिग्रहवान् शकुनिरिव गृहीतमांसखंडः अन्येषां तदर्थिनां पतत्त्रिणां, इहैव तस्करादीनामभिभवनीयो भवति । तदर्जनरक्षणप्रक्षयकृतांश्च दोषान् बहूनवाप्नोति । नचास्य तृप्तिर्भवतीधनैरिवाग्नेः । लाभाभिभूतत्वाच्च कार्याकार्यानपेक्षो भवति प्रेत्य चाऽशुभां गतिमास्कंदति । लुब्धोयमिति गर्हितश्च भवति इति तद्विरमणं श्रेयः । एवं हिंसादिष्वपायावद्यदर्शनं भावनीय । हिंसादिषु भावनांतरप्रतिपादनार्थमिदमुच्यते—

दुःखमेव वा ॥ १० ॥

अत्र चोद्यते दुःखमसद्वेद्योदयकृतः परितापः हिंसादयः क्रियाविशेषाः । कथं दुःखमेव हिंसादयः ? इत्यत्रोच्यते—

दुःखमेवेति कारणे कार्योपचारोऽन्नप्राणवत् ॥ १ ॥ यथान्नं वै प्राणाः इति प्राणकारणे अन्ने प्राणोपचारः तथा दुःखकारणेषु हिंसादिषु दुःखमेव इत्युपचारो वेदितव्यः।

कार्यकारणे वा धनप्राणवत् ॥ २ ॥ अथवा यथा द्रविणकारणमन्नपानं, अन्नपानकारणाः प्राणाः इति प्राणकारणे द्रविणे प्राणोपचारः। उक्तंच—

यदेतद्द्रविणं नाम प्राणा ह्येते बहिश्चराः
स तस्य हरते प्राणान् यो यस्य हरते धनं ॥ १ ॥ इति

तथा हिंसादयोऽसद्वेद्यकारणं, असद्वेद्यकर्म दुःखकारणमिति दुःखकारणकारणेषु हिंसादिषु दुःखमेवेत्युपचारः।

तत्परत्र भावनमात्मसाक्षिकं ॥ ३ ॥ तदेतद्दुःखमेवेति भावनं परत्रात्मसाक्षिकं अवगतव्यं। तद्यथा—ममाऽप्रियं यथा वधपरिपीडनं तथा सर्वसत्वानां। यथा मम मिथ्याख्यापनकटुकपरुषादीनि वचांसि शृण्वतः अतितीव्रदुःखमनुभूतपूर्वमुत्पद्यते एव सर्वजीवानां। यथा च ममेष्टद्रव्यवियोगे व्यसनमपूर्वमुपजायते एव सर्वभूतानां। यथा च मम कांताजनपरिभवे परकृते सति मानसपीडातितीव्रा जायते तथेतरेषां। यथा च मम परिग्रहेषु अप्राप्तेषु प्राप्तविनष्टेषु कांक्षारक्षाशोकोद्भवंदुःखं तथा सर्वप्राणिनामिति हिंसादिभ्यो व्युपरमः परमः, हितः।

स्पर्शकृतं सुखमिति चेन्न वेदनाप्रतीकारत्वात् ॥ ४ ॥ स्यादेतत् न सर्वं दुःखमेव किं तर्हि स्पर्शकृतं सुखमप्यस्ति वरांगनामृदुसुभगगात्रसंश्लेषणात् रतिसुखमुपजायत इति? तन्न। किं कारणं? वेदनाप्रतीकारत्वात्। यथा त्वङ्मांसरुधिरकलुषभावोदीर्णया कंड्वा बाध्यमानः नखमुखमकलशर्करादिभिः छिन्नगात्रो रुधिरार्द्रोनुपरतकंडूयो दुःखमपि तत्सुखमिति मन्यते। तथा मैथुनोपसेवी मोहादसुखमपि सुखमिति मन्यते। दुःखयोनित्वाच्च दुःखमेवेति भावनीयं। यथैते क्रियाविशेषाः तात्पर्येण भाव्यमानाः व्रतपूर्णतां जनयंति तथामूनि तादर्थ्यानि ऐहिकप्रयोजनविनिवृत्तौत्सुक्येन अवहितचेतसाऽजस्रं भाव्यमानानि व्रतसंपदमापादयंतीत्याह—

मैत्रीप्रमोदकारुण्यमाध्यस्थानि च सत्वगुणाधिकक्लिश्यमानाविनयेषु॥११॥

परेषां दुःखानुत्पत्त्यभिलाषा मैत्री ॥ १ ॥ स्वकायवाङ्मनोभिः कृतकारितानुमतविशेषणैः परेषां दुःखानुत्पत्तौ, अभिलाषः मित्रस्य भावः कर्म वा मैत्री।

वदनप्रसादादिभिरभिव्यज्यमानांतर्भक्तिरागः प्रमोदः ॥ २ ॥ वदनप्रसादेन नयनप्रह्लादनेन रोमांचोद्भवेन स्तुत्यभीक्ष्णसंज्ञाकीर्तनादिभिश्च अभिव्यज्यमानांतर्भक्तिरागः प्रकर्षेण मोदः प्रमोद इत्युच्यते।

दीनानुग्रहभावः कारुण्यं ॥ ३ ॥ शारीरमानसदुःखाभ्यार्दितानां दीनानां प्राणिनां अनुग्रहात्मकः परिणामः करुणस्य भावः कर्म वा कारुण्यमिति कथ्यते।

रागद्वेषपूर्वकपक्षपाताभावो माध्यस्थं ॥ ४ ॥ रागद्वेषाच्च कस्य चित् पक्षे पतनं पक्षपातः तदभावात् मध्ये तिष्ठतीति मध्यस्थस्तस्य भावः कर्म वा माध्यस्थं।

अनादिकर्मबंधवशात् सीदंतीति सत्वाः ॥ ५ ॥ अनादिनाष्टविधकर्मसंतानेन तीव्रदुःखयोनिषु चतसृषु गतिषु सीदंतीति सत्वाः।

सम्यग्ज्ञानादिभिः प्रकृष्टा गुणाधिकाः ॥६॥ सम्यग्ज्ञानदर्शनादयो गुणास्तैः प्रकृष्टा गुणाधिका इति विज्ञायंते।

असद्वेद्योदयापादितक्लेशाः क्लिश्यमानाः ॥ ७ ॥ असद्वेद्योदयापादितशरीरमानसदुःखसंतापात् क्लिश्यंत इति क्लिश्यमानाः ।

तत्त्वार्थश्रवणग्रहणाभ्याससंपादितगुणा अविनेयाः ॥ ८ ॥ तत्त्वार्थोपदेशश्रवणग्रहणाभ्यां विनीयंते पात्रीक्रियंत इति विनेयाः । न विनेया अविनेयाः । एतेषु सत्वादिषु मैत्र्यादीनि यथाक्रमं भावयितव्यानि । तद्यथा क्षमयामि सर्वजीवान्, क्षाम्यामि सर्वजीवेभ्यः, प्रीतिर्मे सर्वसत्वैः, वैरं मे न केनचित् इति मैत्री सत्त्वेषु भावयितव्या । सम्यग्ज्ञानचारित्राधिकेषु वंदनास्तुतिवैयावृत्त्यकरणादिभिः प्रमोदो भावनीयः । मोहाभिभूतेषु मतिश्रुताज्ञानविभंगपरिगतेषु विषयतर्षाग्निना दह्यमानमानसेषु हिताहितविपरीतप्रवृत्तिषु विविधदुःखाभिभूतेषु दीनकृपणानाथबालवृद्धेषु क्लिश्यमानेषु कारुण्यं भाव्यं। अविनेयेषु ग्रहणधारणविज्ञानोहापोहवियुक्तेषु महामोहाभिभूतेषु दुष्टव्युद्ग्राहितेषु च माध्यस्थं भावनीयं। न हि तत्र वक्तुर्हितोपदेशस्य फलवत्त्वं भवतीत्येवं भावयतः परिपूर्णानि अहिंसादीनि व्रतानि भवंति । किमेतावानेव अभिनवाकुशलकर्मादाननिवृत्तिपरेण महाव्रतधारिणा क्रियाकलापः प्रणिधातव्यो नेत्याह—

जगत्कायस्वभावौ वा संवेगवैराग्यार्थं ॥ १२ ॥

जगत्कायशब्दावुक्तार्थौ ॥ १ ॥ जगच्छब्दः कायशब्दश्च उक्तार्थौ द्रष्टव्यौ ।

स्वेनात्मना भवनं स्वभावः ॥ २ ॥ स्वेनात्मना असाधारणेन धर्मेण भवनं स्वभाव इत्युच्यते जगच्च कायश्च जगत्कायौ, जगत्काययोः स्वभावौ जगत्कायस्वभावौ

संसाराद् भीरुता संवेगः ॥ ३ ॥ संसाराद् विविधवेदनाकराद् भीरुता संवेजनं संवेग इत्युच्यते ।

रागकारणभावात् विषयेभ्यो विरंजनं विरागः ॥ ४ ॥ चारित्रमोहोदयाभावे तस्योपशमात् क्षयात् क्षयोपशमाद्वा शब्दादिभ्यो विरजनं विराग इति व्यवसीयते । विरागस्य भावः कर्म वा वैराग्यं। संवेगश्च वैराग्यं च संवेगवैराग्ये संवेगवैराग्याभ्यां संवेगवैराग्यार्थं जगत्कायस्वभावौ भावयितव्यौ । तद्यथा—जगत्स्वभावस्तावत् आदिमदनादिमत्परिणामद्रव्यसमुदायरूपः तालवृक्षसंस्थानः अनादिनिधनः । अत्र जीवाः चतसृषु गतिषु नानाविधदुःखं भोजं भोजं परिभ्रमंति नचात्र किंचिन्नियतमस्ति । जलबुद्बुदोपमं जीवितं विद्युन्मेघादिविकारचपला भोगसंपदः इत्येवमादि । कायस्वभावश्च अनित्यता दुःखहेतुत्वं निःसारता अशुचित्वमित्येवमादिः । एवं भावयतः संवेगः संजायते । ततः आरंभपरिग्रहदोषदर्शनाद्विरतिः धर्मे बहुमानो धार्मिकेषु च धर्मश्रवणे धार्मिकदर्शने च मनःप्रसादः । उत्तरोत्तरगुणप्रतिपत्तौ च श्रद्धेति वैराग्यं च भवति शरीरभोगोपभोगसंसारनिर्वेदलक्षणं । एवं भावनोपेतः सम्यग्व्रतानि परिपालयति । ता एताः सर्वा व्रतभावनाः सर्वेषु पदार्थेषु सर्वथा नित्येषु सत्सु विक्रियाभावात् नोपपद्यंते, विक्रियाभ्युपगमे च नित्यताप्रतिज्ञाहानिः । सर्वथैवानित्येषु चाऽनेकक्षणवृत्त्येकवस्त्वभावात् अनेकार्थविषयैकविज्ञानाभावाच्च स्मरणानुपपत्तेर्भावनाभावः, अनेकांतवादिनः पुनः द्रव्यार्थिकनयादेशात् नित्यतामवलंबमानस्य उभयनिमित्तवशात् उत्पत्तिनिरोधौ प्रत्यासमुत्पादयानस्य स्मरणोपपत्तेः विक्रियोपपत्तेश्च भावनासिद्धिः । अत्राह उक्तं भवता हिंसादिनिवृत्तिर्व्रतमिति तत्र न जानीमः के हिंसादयः क्रियाविशेषा इति ?

अत्रोच्यते युगपदशक्यत्वात् तल्लक्षणनिर्देशस्य क्रमप्रसंगे यासावादौ चोदिता सैव तावत्—

प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा ॥ १३ ॥

अनवगृहीतप्रचारविशेषः प्रमत्तः ॥ १ ॥ इंद्रियाणां प्रचारविशेषं अनवधार्य प्रवर्तते यः स प्रमत्तः ।

अभ्यंतरीकृतेवार्थो वा ॥ २ ॥ अथवा अभ्यंतरीकृतेवार्थः प्रमत्त इत्युच्यते। कः पुनरिवार्थः ? यथा सुरापः प्रवृद्धमदत्वात् कार्याकार्यवाच्याद्यनभिज्ञस्तथा जीवस्थानयोन्याश्रयविशेषानविद्वान् कषायोदयाविष्टः हिंसाकारणेषु स्थितः अहिंसायां सामान्येन यतत इति प्रमत्तः ।

पंचदशप्रमादपरिणतो वा ॥ ३ ॥ अथवा चतसृभिः विकथाभिः कषायचतुष्टयेन पंचभिरिंद्रियैः निद्राप्रणयाभ्यां च परिणतो यः स प्रमत्त इति कथ्यते।

योगशब्दः संबंधपर्यायवचनः ॥ ४ ॥ अयं योगशब्दः संबंधपर्यायवचनो द्रष्टव्यः। योजनं योगः संबंध इति यावत्। यद्येवं भावप्रधानो निर्देशः कर्तव्यः प्रमत्तत्वयोगात् इति, द्रव्यप्रधाने हि सति संबंधाप्रतीतेः ? नैष दोषः आत्मपरिणाम एव कर्तृत्वेन निर्दिश्यते प्रमाद्यतिस्म इति प्रमत्तः परिणामः। तेन ग [प्रमत्तयोगादिति।

कायवाङ्मनस्कर्म वा ॥ ५ ॥ अथवा कायवाङ्मनस्कर्मयोग इत्युच्यते। प्रमत्तस्य योग प्रमत्तयोगः तस्मात्प्रमत्तयोगात् इति हेतुनिर्देशः। प्रमत्तयोगाद्धेतोः प्राणव्यपरोपणं हिंसेति।

व्यपरोपणं वियोगकरणं ॥६॥ वियोगकरणं व्यपरोपणमित्युच्यते। प्राणा उक्ताःतेषां व्यपरोपणं। प्राणव्यपरोपणं

प्राणग्रहणं तत्पूर्वकत्वात् प्राणिव्यपरोपणस्य ॥ ७ ॥ प्राणग्रहणं क्रियते तत्पूर्वकत्वात् प्राणिव्यपरोपणस्य। प्राणवियोगपूर्वको हि प्राणिवियोगः, स्वतः प्राणिनो निरवयवत्वाद्वियोगाभावात्।

अन्यत्वादधर्माभावः इति चेन्न दुःखोत्पादकत्वात् ॥ ८ ॥ स्यान्मतं प्राणेभ्योऽन्य आत्मा अतः प्राणवियोगेन आत्मनः किंचिद्भवतीत्यधर्माभावः स्यात् इति ? तन्न किं कारणं ? तद्दुःखोत्पादकत्वात्। प्राणव्यपरोपणे हि सति तत्संबंधिनो जीवस्य दुःखमुत्पद्यत इत्यधर्मसिद्धः

शरीरिणोऽन्यत्वात् दुःखाभाव इति चेन्न पुत्रकलत्रादिवियोगे तापदर्शनात् ॥ ९ ॥ स्यादेतदन्यः शरीरी प्राणेभ्यः अतस्तत्पूर्वकदुःखमस्य न युज्यते इति ? तन्न किं कारण ? पुत्रकलत्रादिवियोगे तापदर्शनात् अन्यत्वेऽपि सति पुत्रकलत्रादिवियोगे तापो दृश्यते।

बंधं प्रत्येकत्वाच्च ॥ १० ॥ यद्यपि शरीरिशरीरयोः लक्षणभेदान्नानात्व तथापि बंध प्रत्येकत्वात् तद्वियोगपूर्वकदुःखोपपत्तेरधर्मसिद्ध इत्यनुपालंभः।

एकांतवादिनां तदनुपपत्तिर्बंधाभावात् ॥ ११ ॥ ये निःक्रियत्वनित्यत्वशुद्धत्वसर्वगतत्वादिभिः एकांतेन आत्मानं कल्पयंति तेषां शरीरेण सह बंधाभावात् दुःखादीनामनुपपत्तिर्भवति।

उभयविशेषणोपादानमन्यतराभावे हिंसाभावज्ञापनार्थं ॥ १२ ॥ प्रमत्तयोगात्प्राणव्यपरोपणमित्येतदुभयं विशेषणमुपादीयते। किमर्थं ? अन्यतराभावे हिंसाभावज्ञापनार्थं यदा प्रमत्तयोगो नास्ति केवलं प्राणव्यपरोपणमेव न तदा हिंसा। उक्तंच—"वियोजयति चासुभिर्नच वधेन संयुज्यते"

उच्चालदम्मि पादे इरियासमिदस्स णिग्गमट्ठाणे
आवादेज्ज कुलिंगो मरेज्ज तज्जोगमासेज्ज ॥ १ ॥
णहि तस्स तण्णिमित्तो बंधो सुहमोवि देसिदो समये।
मुच्छा परिग्गहोत्तिय अज्झप्प पमाणदो भणिदो ॥ २ ॥ इति।

ननु च प्राणव्यपरोपणाभावेपि प्रमत्तयोगमात्रादेव हिंसेष्यते। उक्तं च—

मरदुव जियदुव जीवो अयदाचारस्स णिच्छिदा हिंसा।
पयदस्स णत्थि बंधो हिंसामेत्तेण समिदस्स ॥ १ ॥ इति।

नैष दोषः तत्रापि प्राणव्यपरोपणमस्ति भावलक्षणं। तथा चोक्तं—

स्वयमेवात्मनात्मानं हिनस्त्यात्मा प्रमादवान्।
पूर्वं प्राण्यंतराणां तु पश्चात्स्याद्वा न वा वधः ॥ १ ॥

इत्येवं कृत्वा यैरुपालंभः क्रियते—

" जले जंतुः स्थले जंतुराकाशे जंतुरेव च ।
जंतुमालाकुले लोके कथं भिक्षुरहिंसकः ॥ इति ।"

सोत्रावकाशं न लभते। भिक्षोर्ज्ञानध्यानपरायणस्य प्रमत्तयोगाभावात्। किंच स्थूलसूक्ष्मजीवाभ्युपगमात्।

सूक्ष्मा न प्रतिपीड्यंते प्राणिनः स्थूलमूर्तयः ।
ये शक्यास्ते विवर्ज्यंते का हिंसा संयतात्मनः ॥ १ ॥

अत्र कश्चिदाह—साधूक्तं भवता प्राणव्यपरोपणं हिंसेति । प्राणानां परस्परतो वियोगो हिंसा न कश्चित् प्राणी विद्यते इति । अत उत्तरं पठति ।

प्राण्यभावे प्राणाभावः कर्तुरभावात् ॥ १३ ॥ यदि प्राणी न स्यात प्राणानामभावः । कुतः? कर्तुरभावात्। इह कुशलाकुशलात्मककर्मपूर्वकाः प्राणाः तच्च कर्मासति कर्तरि न भवतीति प्राणाभावः स्यात् अतः प्राणसद्भाव एव प्राणिनोऽस्तित्वं गमयति। सदशादिकरणसद्भावेऽयस्कारससिद्धिवत । किंचासति प्राणिनि रूपणानुभवनोपलंभननिमित्तग्रहणसंस्करणभिन्नलक्षणाः रूपवेदनासंज्ञाविज्ञानसंस्काराः विविक्तशक्तित्वात् परस्परोपकारप्रतिनिवृत्तौत्सुक्याः क्षणिकत्वात स्वप्रयोजन प्रत्यप्यसमर्थाः हिंसानिवृत्तिहेतवो न भवंति । स्मृत्यभिसंधिक्रियाचिंतानां व्यधिकरणत्वेदेकाधिकरणेप्यनुपपत्तेः । एकेनापि विकल्पे प्राणातिपातानभ्युपगमात् । अपि च उत्पत्त्यनंतर विनाशाभ्युपगमे विरोधस्याहेतुकत्वात् प्राणातिपातलक्षणस्य विनाशस्य हिंसको हेतुर्न भवति इति तत्फलानभिसबंधः । अथाहिंतोरपि तत्फलमिष्यते । अहिंसको नाम न कश्चिदस्ति भिन्नसंतानोत्पत्तिहेतुर्हिंसक इति चेन्नाऽसत उत्पत्तेर्हेत्वभावात् । अथासत उत्पत्तेर्हेतुरिष्यते सतो विनाशे हेतुः स्यादिति को विरोधः । आह—अभिहितलक्षणापहिंसानंतरोद्दिष्टं अनृतं किं-लक्षण मित्यत्रोच्यते—

असदविधानमनृतं ॥ १४ ॥

असदिति नञासत्प्रतिषेधाच्छून्यार्थसंप्रत्ययप्रसंगः ॥ १ ॥ न सदसदिति नञासत्प्रतिषेधः क्रियते तेन शून्यार्थसप्रत्ययः प्रसज्यते तेन नास्ति न किंचिदित्येवमादिरेवानृत स्यात् यदसत सदिति ब्रूयात् न तदनृतं स्यात् ।

न वा सच्छब्दस्य प्रशंसार्थवाचित्वात् ॥ २ ॥ न वैष दोषः किं कारणं सच्छब्दस्य प्रशंसार्थवाचित्वात् । न सदसत् अप्रशस्तमिति यावत् ।

अभिधानशब्दः करणादिसाधनः ॥ ३ ॥ अयमभिधानशब्दः करणादिषु साधनेषु द्रष्टव्यः । अभिधीयते अनेन अभिधा वा अभिधानमिति । असतोर्थस्याभिधानं असदभिधानं ।

ऋतं सत्यार्थे ॥ ४ ॥ ऋतमित्येतत् पदं सत्यार्थे द्रष्टव्यं सत्सु साधु सत्यं प्रत्यवायकारणानिष्पादकत्वात । न ऋतमनृतं ।

मिथ्यानृतमित्यस्तु लघुत्वात् इति चेन्न विपरीतार्थमात्रसंप्रत्ययप्रसंगात् ॥ ५ ॥ स्यान्मतं मिथ्यानृतमित्येतत् सूत्रमस्तु । कुतः ? लघुत्वात् । सूत्रं हि नाम यल्लघु गमकं च तत् कर्तव्य मिति ? तन्न । किं कारण ? विपरीतार्थमात्रसंप्रत्ययप्रसगात् । अयं हि मिथ्याशब्दः विपरीतार्थे वर्तते । तेन भूतनिह्नवे अभूतोद्भावने च यदभिधानं तदेवानृत स्यात् नास्ति आत्मा नास्ति परलोक इति शामाकतंडुलमात्र आत्मा अंगुष्ठपर्वमात्रः सर्वगतो निःष्क्रियः इति च ।

यत्तु विद्यमानार्थविषयं परप्राणिपीडाकरणं तन्न स्यात् । असदिति पुनरुच्यमाने अप्रशस्तार्थे यत् तत्सर्वमनृतमुक्तं भवति । तेन विपरीतार्थस्य प्राणिपीडाकरस्य चानृतत्वमुपपन्नं भवति । अथाऽनृतानंतर उद्दिष्टं यत्स्तेय तस्य किं लक्षणं ? इत्यत आह—

अदत्तादानं स्तेयं ॥ १५ ॥

आदानं ग्रहणं अदत्तस्याऽऽदानं अदत्तादान स्तेयमित्युच्यते ॥

सर्वमदत्तमाददानस्याऽकुशलकल्पनायां कर्मादेयमात्मसात्कुर्वतः स्तेयप्रसंगः ॥ १ ॥ यद्यविशेषेण अदत्तस्य आदानं स्तेयमित्युच्यते कर्माष्टविधं अन्येनाऽदत्तमाददानस्य स्तेय प्राप्नोतीति । एतेन नोकर्मापि चोदितं भवति ।

न दानादानयोर्यत्रैव प्रवृत्तिनिवृत्ती तत्रैवोपपत्तेः ॥ २ ॥ नैष दोषः येषु मणिमुक्ताहिरण्यादिषु दानादानयोः प्रवृत्तिनिवृत्तिसंभवः तेष्वेव स्तेयस्योपपत्तेः, तेन कर्मणि नास्ति प्रसंगः ।

इच्छामात्रमिति चेन्न अदत्तादानग्रहणात् ॥ ३ ॥ स्यादेतत् इच्छामात्रमिद यस्य दानादानसंभवस्तस्य ग्रहणमिति ? तन्न किं कारणं ? अदत्तादानग्रहणात् । यस्य हि दानादाने संभवतः तस्य ग्रहणमकुशलं यदि हि कर्मादानमपि स्तेयं स्यात् अदत्तादानमित्येतत् विशेषणमयुक्त स्यात्, प्रसक्तस्यादत्तमिति प्रतिषेधोपपत्तेः ।

कर्मापि हि किमर्थं कस्मैचिन्न दीयत इति चेन्न हस्तादिकरणग्रहणविसर्गासंभवात् सूक्ष्मत्वात् ॥४॥ अथ मतमेतत् किमर्थं कर्म न कस्मै चिद्दीयत इति गृह्यते ननु लोकवादः प्रसिद्धः -आरामविहारादिपादपानां फल अन्यस्मै जलसेकेन दीयते इति ? तन्न । किं कारण ? हस्तादिकरणविसर्गासंभवात् । यथा वस्त्रपात्रादि हस्तादिकरणैरादीयते अन्यस्मै च दीयते न तथा कर्म हस्तादिभिरादीयते अन्यस्मै च दीयते । कुतः ? सूक्ष्मत्वात् । सूक्ष्म हि कर्म हस्तादिग्रहणविसर्गयोग्यं न भवति । कथं तर्हि तदादीयते ?

शरीराहारविषयपरिणामतस्तद्बंधः ॥ ५ ॥ स्वपरकीयेषु शरीरेषु आहारेषु शब्दादिविषयेषु च रागद्वेषरूपात्तीव्रादिविकल्पात् परिणामात् तस्य कर्मबंधो भवति ततः स्वपरिणामवशीकृतत्वाच्च नान्यस्मै दीयते । यद्येवं नित्यकर्मबंधः प्राप्नोति ? नैष दोषः ।

आस्रवनिरोधे सति संवृतत्वाद्बंधाभावः ॥ ६ ॥ आस्रवनिरोधो वक्ष्यते गुप्त्यादिलक्षणः तस्मिन् सति संवृतत्वात् नास्ति बंधः इति नित्यबंधाभावः । अतो यत्रैवैहलौकिकोपकारविशेषादानाभिप्रायस्तत्रैव अदत्तादानप्रक्लृप्तिः ।

शब्दादिविषयरथ्याद्वाराद्यदत्तादानात्स्तेयप्रसंग इतिचेन्न अप्रमत्तत्वात् ॥ ७ ॥ स्यादेतत् शब्दादिविषयरथ्याद्वारादीन्यदत्तानि आददानस्य भिक्षोः स्तेयं प्राप्नोतीति ? तन्न किं कारण ? अप्रमत्तत्वात् । यत्नवतो ह्यप्रमत्तस्य ज्ञानिनः शास्त्रदृष्ट्या शब्दादिविषयरथ्याद्वाराद्यादानेपि विरतस्यास्तेयप्रसिद्धेः, सामान्यतो मुक्तत्वात् दत्तमेव वा तत्सर्वं । तथा हि अय पिहितद्वारादीन् न प्रविशति ।

वंदनादिनिमित्तधर्मादानात् स्तेयप्रसंग इतिचेन्न उक्तत्वात् ॥ ८ ॥ स्यान्मतं वंदनाक्रियासंबंधेन धर्मोपचये सति प्रशस्तं स्तेयं प्राप्नोति ? तन्न किं कारण । उक्तत्वात् । उक्तमेतत् दानादानसंभवो यत्र तत्र स्तेयप्रसंग इति ।

प्रमत्ताधिकाराच्चान्यत्राऽप्रसंगः ॥ ९ ॥ प्रमत्तयोगात् प्राणव्यपरोपणं हिंसेत्यतः प्रमत्तयोगग्रहणं अनुवर्तते । तेन प्रमत्तस्य स्तेयं वंदनादिषु योगत्रयेणाऽऽभिमुख्यादात्मनः प्रमत्तत्वं नास्ति । अतः सत्यपि धर्मादानेऽस्य न स्तेयं परिशेषात् प्रमत्तस्य सत्यसति च परकीयद्रव्यादाने त्रिधापि तदादानाद्यर्थोद्यतत्वात् स्तेयं तदपि प्राणिपीडाकारणत्वात् पापास्रव इत्युच्यते । अत्राह व्याख्यात हिंसादित्रयलक्षणं । अथाऽब्रह्म किंलक्षणमित्यत्रोच्यते—

मैथुनमब्रह्म ॥ १६ ॥

मैथुनमिति । किमिदं ? मिथुनस्य भावो मैथुनं ।

मिथुनस्य भाव इति चेन्न द्रव्यद्वयभवनमात्रप्रसंगात् ॥ १ ॥ यदि मिथुनस्य भावो मैथुनमित्युच्यते नैतद्युक्तं। कुतः ? द्रव्यद्वयभवनमात्रप्रसंगात्। एवं सति औदासीन्यावस्थितनिवृत्तरागस्त्रीपुंसभवनेपि मैथुनप्रसंगः।

मिथुनस्य कर्मेति चेन्न पुरुषद्वयनिर्वर्त्यक्रियाविशेषप्रसंगात् ॥ २ ॥ यदि मिथुनस्य कर्म मैथुनमित्युच्यते नैतदुपपन्नं कुतः ? पुरुषद्वयनिर्वर्त्यक्रियाविशेषप्रसंगात् द्वयोः पुरुषयोः निर्वर्त्यं यद्भारोद्वहनादि कर्म तत्रापि प्रसंगः स्यात्।

स्त्रीपुंसयोः कर्म इति चेन्न पच्यादिक्रियाप्रसंगात् ॥ ३ ॥ स्यान्मतं न सर्वमिथुनमिह परिगृह्यते अनिष्टप्रसंगात् ततः स्त्रीपुंसमिथुनविषयकर्मसंग्रह इति ? तन्न किं कारणं ? पच्यादिक्रियाप्रसंगात्। ततश्च स्त्रीप्रव्रजितयोर्नमस्काराद्यासेवने मैथुनप्रसंगदोषः। अत उत्तरं पठति—

स्त्रीपुंसयोः परस्परगात्रोपश्लेषे रागपरिणामो मैथुनं ॥ ४ ॥ चारित्रमोहोदये सति स्त्रीपुंसयोः परस्परगात्रोपश्लेषे सति सुखमुपलिप्समानयोः रागपरिणामो यः स मैथुनव्यपदेशभाक्। ननु नायं शब्दार्थः सत्यमेवमेतत् तथापि प्रसिद्धिवशात् अर्थाध्यवसाय इतीष्टार्थो गृह्यते।

नवैकस्मिन्नप्रसंगात् ॥ ५ ॥ नवैतद्युक्तं कुतः ? एकस्मिन्नप्रसंगात्। हस्तपादपुद्गलसंघट्टनादिभिरब्रह्म सेवमाने एकस्मिन्नपि मैथुनमिष्यते, तन्न सिध्यति।

उपचारादिति चेन्न मुख्यफलाभावप्रसंगात् ॥ ६ ॥ स्यादेतत् यथा स्त्रीपुंसयोः चारित्रमोहोदये वेदनापीडितयोः कर्म मैथुनं तथैकस्यापि चारित्रमोहोदयोद्रिक्तरागस्य हस्तादिसंघट्टनेऽस्ति मैथुनमिति ? तन्न मुख्यफलाभावप्रसंगात्। यन्मुख्यं मैथुने कर्मास्रवफलं तदत्र न प्रसज्येत। मुख्यसिंहगतक्रौर्यशौर्यादेर्माणवकेऽप्रवृत्तिवत्। दृश्यते च मुख्यमतो नोपचारः।

नवास्य स्पर्शवद्द्रव्यसंयोगरसाविशेषाभिधानात् ॥ ७ ॥ यथा स्त्रीपुंसयोरन्योन्यं संयोगे परस्परकृतस्पर्शाभिमानात् सुखं। तथैकस्यापि हस्तादिसंघट्टनात् स्पर्शाभिमानस्तुल्यस्ततस्मान्मुख्य एव तत्रापि मैथुनशब्दलाभः रागद्वेषमोहाविष्टत्वात्। किंच—

एकस्य द्वितीयोपपत्तौ मैथुनत्वसिद्धेः ॥ ८ ॥ यथैकस्यापि पिशाचवशीकृतत्वात् सद्वितीयत्वं तथैकस्य चारित्रमोहोदयाविष्कृतकामपिशाचवशीकृतत्वात् सद्वितीयत्वसिद्धेः मैथुनव्यवहारसिद्धिः।

प्रसिद्धवशाद्वार्थविशेषप्रतीतेः पूर्वोक्तानां चाऽनवद्यत्वं ॥ ९ ॥ अथ मैथुनशब्दः लोके शास्त्रे च स्त्रीपुरुषसंयोगजरतिविशेषे प्रसिद्धः। लोके तावद्गोपालादयोपि स्त्रीपुंसगतकर्म मैथुनमित्याचक्षते। शास्त्रेपि अश्ववृषभयोर्मैथुनेच्छायां इत्येवमादौ तदेव कर्माख्यायते ततः प्रसिद्धिवशात् अर्थविशेषप्रतीतेः पूर्वोक्तानां च पक्षाणां अनवद्यत्वमवसेयं। तद्यथा—यत्तावदुक्तं मिथुनस्य भाव इति चेन्न द्रव्यद्वयभवनमात्रप्रसंगादिति तदसत् अभ्यंतरपरिणामाभावे बाह्यहेतोरफलत्वात् यथा कंकडुकचणकादीनां अभ्यंतरपाककारणविक्रवाभावात् बाह्योदकाग्निसंबंधस्याफलत्वं तथाभ्यंतरचारित्रमोहोदयापादितस्त्रैणपौंस्नात्मकरतिपरिणामाभावात् बाह्यद्रव्यद्वयभवनेपि न मैथुनं। यच्चोक्तं—मिथुनस्य कर्मेति चेन्न पुरुषद्वयनिर्वर्त्यक्रियाविशेषप्रसंगात् इति तन्न वार्तं, कुतः कदाचित् पुरुषद्वयेपि दर्शनात्। चारित्रमोहोदयाविष्टानां हि पुरुषाणां तादृशेषु पुरुषेषु मैथुनं दृश्यते। उक्तंच—

> पुरुषाः पुरुषेष्वेव यदानिष्टप्रयोजनाः।
> अत्यारूढस्य तत्सर्वं रागस्यैव विचेष्टितं ॥ १ ॥

इति। यदप्युक्तं स्त्रीपुंसयोः कर्मेति चेन्न पच्यादिक्रियाप्रसंगात् इति तदसांप्रतं-कुतः तद्विषयस्यैव ग्रहणात् तयोरेव यत्कर्म तदिह गृह्यते पच्यादिकर्म पुनः अन्येनापि क्रियते। अपि च प्रमत्तयोगादित्यनुवर्तते

ततः चारित्रमोहोदयात् प्रमत्तस्य मिथुनस्य कर्म मैथुनमित्युक्तं नमस्काराद्युपयुक्तस्य चाऽप्रमत्तत्वात् चारित्र मोहोदयाभावात् सत्यपि वदनादिमिथुनकर्मणि न मैथुनं ।

अहिंसादिगुणबृंहणाद्ब्रह्म ॥ १० ॥ अहिंसादयो गुणाः यस्मिन् परिपाल्यमाने बृंहंति वृद्धिमुपयंति तद्ब्रह्मेत्युच्यते । न ब्रह्म अब्रह्म किं तन्मैथुनं । तत्र हिंसादयो दोषाः पुष्यंति । यः स्यान्मैथुनसेवन प्रवणः स्थाष्णूश्चरिष्णून् प्राणिनो हिनस्ति मृषावादमाचष्टे अदत्तमादत्ते सचेतनमितरं च परिग्रहं गृह्णाति । अत्राह उक्तं भवता हिंसादिचतुष्टयस्य विशेषलक्षणमिदानीमिदमुच्यतां परिग्रहस्य किं लक्षणमित्यत्रोच्यते ।

मूर्च्छा परिग्रहः ॥ १७ ॥

मूर्छेत्युच्यते । केयं मूर्छा ?

बाह्याभ्यंतरोपधिसंरक्षणादिव्यापृतिर्मूर्छा ॥ १ ॥ बाह्यानां गोमहिषमणिमुक्तादीनां चेतनाचेतनानां अभ्यंतराणां च रागादीनामुपधीनां सरक्षणार्जनसंस्कारादिलक्षणव्यापृतिः मूर्छेति कथ्यते ।

वातपित्तश्लेष्मविकारप्रसंग इतिचेन्न विशेषितत्वात् ॥ २ ॥ स्यान्मतं वातपित्तश्लेष्मणामन्यतमस्य दोषस्य प्रकोपात् उपजायमानो विकारो मूर्छेति ? तन्न किं कारणं विशेषितत्वात् । मूर्छेयं मोहसामान्ये वर्तमानः बाह्याभ्यंतरोपधिसंरक्षणादिविषयः परिगृहीत इति विशेषितत्वात् इष्टार्थसंप्रत्ययो भवति । सामान्यचोदनाश्च विशेषेष्ववतिष्ठन्त इति ।

बाह्यस्याप्रसंग इति चेन्नाध्यात्मिकप्रधानत्वात् ॥ ३ ॥ स्यादेतत् मूर्छेत्यनेन आध्यात्मिकः परिग्रहः परिगृह्यते । तेन बाह्यस्य परिग्रहत्वं न प्राप्नोतीति ? तन्न किं कारणं ? आध्यात्मिकप्रधानत्वात् ममेति संकल्पः आध्यात्मिकः परिग्रहः स प्रधानभूत इति तस्योपादानं क्रियते तस्मिन् सग्रहीते तत्कारणस्याप्यनुषंगेण प्रतीतेः । अथ यदा बाह्यः प्राधान्येन इष्यते कथं तस्य संग्रहः मूर्छाकारणत्वात् बाह्यस्य मूर्छाव्यपदेशः । यथान्नं वै प्राणा इति प्राणकारणे अन्ने प्राणोपचारः । तथा मूर्छाकारणत्वात् बाह्यपरिग्रहो मूर्छेति व्यवह्रियते ।

ज्ञानदर्शनचारित्रेषु संगः परिग्रहः इति चेन्न प्रमत्तयोगाधिकारात् ॥ ४ ॥ स्यान्मतं यथाध्यात्मिकेपि रागादावात्मपरिणामे संगः परिग्रह इत्युच्यते । ज्ञानदर्शनचारित्रेष्वपि संगः परिग्रहः प्राप्नोतीति ? तन्न किं कारणं ? प्रमत्तयोगाधिकारात् । ततः ज्ञानदर्शनचारित्रवतो प्रमत्तस्य मोहाभावात् न मूर्छास्ति इति निःपरिग्रहत्वं सिद्धं । किंच तेषां ज्ञानादीनां अहेयत्वात् आत्मस्वभावानतिवृत्तेरपरिग्रहत्वं । रागादयः पुनः कर्मोदयतन्त्रा इत्यनात्मस्वभावत्वाद्धेयाः ततस्तेषु संकल्पः परिग्रह इति युज्यते ।

तन्मूलाः सर्वदोषानुषंगाः ॥ ५ ॥ स परिग्रहो मूलमेषां ते तन्मूलाः । के पुनस्ते सर्वदोषानुषंगाः ममेदमिति हि सति संकल्पे रक्षणादयः सजायन्ते । तत्र च हिंसावश्य भाविनी तदर्थमनृतं जल्पति चौर्यं चाचरति मैथुने च कर्मणि प्रतियतते तत्प्रभवा. नरकादिषु दुःखप्रकाराः । इहापि अनुपरतव्यसनमहार्णवावगाहनं । एवममूभिर्भावनाभिः स्थिरीकृतचेतसोपायावद्यदर्शिनो विरक्तस्य सर्वसंसारिक्रियाकलापा दुःखबुद्ध्या निरुत्सुकीकृतविषयकुतूहलस्य मैत्रीप्रमोदकारुण्यमाध्यस्थ्यप्रणिधानापादितसौहार्द्रस्य जन्ममरणपरिखेदितमतेरवलोकितशरीरस्वभावस्य मोक्षं प्रत्यवहितस्य यस्य संति व्रतानि स भवति—

निःशल्यो व्रती ॥ १८ ॥

अनेकधा प्राणिगणशरणाच्छल्यं ॥ १ ॥ विविधवेदनाशलाकाभिः प्राणिगणं शृणाति हिनस्ति इति शल्यं ।

आबाधकत्वादुपचारासिद्धिः ॥ २ ॥ यथा शरीरानुप्रवेशादिप्रहरणं शरीरिणो बाधाकरं शल्यं तथा कर्मोदयविकारोपि शारीरमानसबाधाहेतुत्वात् शल्यमिव शल्यमित्युपचर्यते ।

तत्त्रिविधं मायानिदानमिथ्यादर्शनभेदात् ॥ ३ ॥ तदेतच्छल्यं त्रिविधं वेदितव्यं कुतः मायानिदानमिथ्यादर्शनभेदात्, माया निकृतिर्वंचनेत्यनर्थांतरं । विषयभोगाकांक्षा निदानं, मिथ्यादर्शनमतत्त्वश्रद्धानं । एतस्मात्त्रिविधाच्छल्यान्निःक्रांतो निःशल्यो व्रतीत्युच्यते । अत्र कश्चिदाह—

विरोधाद्विशेषणानुपपत्तिः ॥ ४ ॥ निःशल्यत्वं व्रतित्वमित्येतदुभयं विरुद्धं ततो न निःशल्यत्वाद्व्रती भवितुमर्हति न हि दंडसंबंधाच्छत्री स्यात्, तस्मात् व्रताभिसंबंधादेव व्रतीति वक्तव्यं । शल्याभावाच्च निःशल्य इति ।

आनर्थक्यं वाऽन्यतरेण गतार्थत्वात् ॥ ५ ॥ यदि व्रतित्वान्निःशल्यस्तस्मात् व्रतीत्येतावद्वाच्यं, न निःशल्य इति । यदि च निःशल्यत्वात् व्रती तस्मान्निःशल्य इत्येतावद्वाच्यं ?

न व्रतीति विकल्पः इति चेन्न फलविशेषाभावात् ॥ ६ ॥ स्यादेतत् विकल्पोत्र गृह्यते निःशल्यो वा व्रती वा इति ततो न विशेषणविशेष्यसंबंधाभावो दोष इति ? तन्न किं कारणं ? फलविशेषाभावात् फलविशेषवतां हि लोके विकल्पो दृष्टः । यथा देवदत्त घृतेन वा सूपेन वा दध्ना वा भोजयेत् इति । न तथेह फलविशेषोस्ति निःशल्यो वा व्रती वेति उभयविशेषणविशिष्टस्यैकस्येष्टत्वात् ।

नवांगांगिभावस्य विवक्षितत्वात् ॥ ७ ॥ न वा एष दोषः किं कारणं ? अंगांगिभावस्य विवक्षितत्वात् न हिंसाद्युपरतिमात्रव्रतसंबंधात् व्रती भवति अंतरेण शल्याभावं, सति शल्यापगमे व्रतसंबंधात् व्रतीति विवक्षितो यथा बहुक्षीरघृतो गोमानिति व्यपदिश्यते, बहुक्षीरघृताभावात् सतीष्वपि गोषु न गोमान् तथा सशल्यत्वात् सत्स्वपि व्रतेषु न व्रती यस्तु निःशल्यः स व्रती । तत्रैतत् स्यात् कथमेतदेवं भविष्यतीत्युच्यते—

प्रधानानुविधानात् अप्रधानस्य ॥ ८ ॥ यथा तीक्ष्णेन परशुना छिनत्तीति तीक्ष्णगुणविशिष्टपरशुरप्रधानभूतः छेत्तुः प्रधानस्योपकारे प्रवर्तते तथा निःशल्यत्वगुणविशिष्टानि व्रतानि गुणभूतानि तद्व्रतः प्रधानस्य विशेषकाणि । आह—किमेष व्रती व्यपगतशल्यत्रयो हिंसाद्यभावात् यथोक्तक्रियासमूहविजृंभितपरिणामः परिग्रहे निरपेक्षः । सर्व एव अगारसंबंधं प्रति निवृत्तौत्सुक्यः प्रतिज्ञायते उत विरतोपि कश्चित् गृहीति निश्चीयत इति । अत्रोच्यते—असीपामेव हिंसादीनां विरतिविशेषस्य भेदात् अविकृतो व्रती द्वेधा—

अगार्यनगारश्च ॥ १९ ॥

प्रतिश्रयार्थिभिरंगनादगारं ॥ १ ॥ प्रतिश्रयार्थिभिः जनैरंग्यते गम्यते तदित्यगारं वेश्म इत्यर्थः । अगारमस्यास्तीत्यगारी न विद्यते अगारमस्येत्यनगारः ।

अनियमप्रसंग इति चेन्न भावागारस्य विवक्षितत्वात् ॥ २ ॥ स्यान्मतं शून्यागारदेवकुलावासस्य मुनेरगारित्वं प्राप्तं अनिवृत्तविषयतृष्णस्य कुतश्चित्कारणात् विमुच्यागारं वने वसतः अनगारत्वं चेत्यनियमप्रसंग इति ? तन्न किं कारणं ? भावागारस्य विवक्षितत्वात् । चारित्रमोहोदये सति अगारसंबंधं प्रत्यनिवृत्तपरिणामः अगारमित्युच्यते स यस्यास्त्यसौ वने वसन्नपि अगारीति व्यपदेशं, अर्हति । तदभावादनगार इति च भवति ।

व्रतिकारणसाकल्यात् गृहस्थस्याव्रतित्वमिति चेन्न नैगमसंग्रहव्यवहारव्यापारात् नगरावासवत् ॥ ३ ॥ यथा गृहापवरकादिनगरैकदेशे निवास्यपि नगरावास इति शब्द्यते । तथा असकलव्रतोपि नैगमसंग्रहव्यवहारनयविवक्षापेक्षया व्रतीति व्यपदिश्यते ।

राजवद्वा ॥ ४ ॥ यथा द्वात्रिंशज्जनपदसहस्राधिपतिः सार्वभौमो राजेति । एकजनपदपतिः तदर्धेश्वरो वा न राजा न भवति भवत्येव । तथाष्टादशशीलसहस्रचतुरशीतिगुणशतसहस्रधरत्वादनगारः संपूर्णव्रत इति संयतासंयतोणुव्रतधरत्वात् न व्रतीति न भवति भवत्येव । अत्राह हिंसादीनामन्यतमस्मात् यः प्रतिनिवृत्तः स खल्वगारी व्रती नैवं, किं तर्हि पंचतय्या अपि विरतेर्वैकल्येन विवक्षित इत्युच्यते—

अणुव्रतोऽगारी ॥ २० ॥

अणुशब्दः सूक्ष्मवचनो द्रष्टव्यः । अणूनि व्रतानि, अस्य सोऽणुव्रतः । कथमणुत्वमिति चेत् उच्यते—सर्वसावद्यनिवृत्त्यसंभवात् । कुतस्तर्हि असौ निवृत्तः ?

द्वींद्रियादिव्यपरोपणान्निवृत्तः ॥ १ ॥ द्वींद्रियादीनां जंगमानां प्राणिनां व्यपरोपणात् त्रिधा निवृत्तः अगारीत्याद्यमणुव्रतं ।

स्नेहद्वेषमोहावेशात् असत्याभिधानवर्जनप्रवणः ॥ २ ॥ स्नेहस्य द्वेषस्य मोहस्य चोद्रेकात् यदसत्याभिधानं ततो निवृत्तादरो गृहीति द्वितीयमणुव्रतं ।

अन्यपीडाकरात् पार्थिवभयाद्युत्पादितनिमित्तादप्यदत्तात् प्रतिनिवृत्तः ॥ ३ ॥ अन्यपीडाकरं पार्थिवभयादिवशादवश्यं परित्यक्तमपि यददत्तं ततः प्रतिनिवृत्तादरः श्रावक इति तृतीयमणुव्रतं ।

उपात्तानुपात्तान्यांगनासंगाद्विरतरतिः ॥ ४ ॥ उपात्ताया अनुपात्तायाश्च अन्यांगनायाः संगाद्विरतरतिः, विरताविरत इति चतुर्थमणुव्रतं ।

परिच्छिन्नधनधान्यक्षेत्रावधिर्गृही ॥ ५ ॥ धनधान्यक्षेत्रादीनां इच्छावशात् कृतपरिच्छेदः गृहीति पंचममणुव्रतं । आह स्थवीयसि विरतिमभ्युपगतस्य श्रावकस्य किमेतावानेव विशेषः आहोस्विदस्ति कश्चिदन्योऽपीत्यत्रोच्यते—

दिग्देशानार्थदंडविरतिसामायिकप्रोषधोपवासोपभोगपरिभोगपरिमाणातिथिसंविभागव्रतसंपन्नश्च ॥ २१ ॥

आकाशप्रदेशश्रेणी दिक् ॥ १ ॥ आकाशस्य प्रदेशाः परमाणुपरिच्छेदात्प्रविभक्ताः श्रेणीकृता दिग्व्यपदेशमर्हंति ।

आदित्यादिगतिविभेदवस्तद्भेदः ॥ २ ॥ आदित्यादिगत्योदयास्तमयपरिच्छिन्नया विभक्तस्तद्भेदः । प्राची दिक् दक्षिणा प्रतीची उत्तरा, ऊर्ध्वमधो विदिक्चेति[1] ।

ग्रामादीनां अवधृतपरिमाणः प्रदेशो देशः ॥ ३ ॥ ग्रामनगरगृहापवरकादीनामवधृतपरिमाणानां प्रदेशो देश इत्युच्यते ।

उपकारात्यये पापादाननिमित्तमनर्थदंडः ॥ ४ ॥ असत्युपकारे पापादानहेतुः अनर्थदंड इति व्यवह्रियते । विरमणं विरतिः निवृत्तिरिति यावत् । दिग्देशानर्थदंडेभ्यो विरतिः दिग्देशानर्थदंडविरतिः । साधनं कृतेति वृत्तिः । विरतिशब्दः प्रत्येकं परिसमाप्यते—दिग्विरतिः देशविरतिरनर्थदंडविरतिरिति ।

विरत्यग्रहणमधिकारादिति चेन्नोपसर्जनानाभिसंबंधात् ॥ ५ ॥ स्यादेतत् हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतं, इत्यतः विरतिग्रहणमनुवर्तते, ततः पुनरिह विरतिग्रहणमनर्थकमिति ? तन्न । किं कारणं ? उपसर्जनानभिसंबंधात् । तदनुवर्तमानं विरतिग्रहणं दिग्देशानर्थदंडग्रहणेन उपसर्जनेन नाभिसंबध्यते ततः पुनर्विरतिग्रहणं क्रियते ।

एकत्वेन गमनं समयः ॥ ६ ॥ संमेकीभावे वर्तते तद्यथा संगतं घृतं संगतं तैलं इत्युक्ते एकीभूतमिति गम्यते एकत्वेन गमनं समयः । प्रतिनियतकायवाङ्मनस्कर्मपर्यायार्थं प्रतिनिवृत्तत्वादात्मनो द्रव्यार्थेनैकत्वगमनमित्यर्थः । समय एव सामायिकं, समयः प्रयोजनं अस्येति वा सामायिकं ।

उपेत्य तस्मिन् वसंतींद्रियाणि इत्युपवासः ॥ ७ ॥ शब्दादिग्रहणं प्रति निवृत्तौत्सुक्यानि पंच

---

१ विदिक्चेति म. पुस्तके पाठः ।

पांद्रियाणि उपेत्य तस्मिन् वसंतीत्युपवासः । अशनपानभक्ष्यलेह्यलक्षणचतुर्विधाहारपरित्याग इत्यर्थः । प्रोषधशब्दः पर्वपर्यायवाची । प्रोषधे उपवासः प्रोषधोपवासः । साधनं कृतेनिवृत्तिः, संज्ञायामिति वा ।

उपेत्य भुज्यते इत्युपभोगः ॥ ८ ॥ उपेत्यात्मसात् कृत्य भुज्यते अनुभूयत इत्युपभोगः । अशनपानगंधमाल्यादिः ।

परित्यज्य भुज्यत इति परिभोगः ॥ ९ ॥ सकृद्भुक्त्वा परित्यज्य पुनरपि भुज्यते इति परिभोग इत्युच्यते । आच्छादनप्रावरणालंकारशयनासनगृहयानवाहनादिः । उपभोगश्च परिभोगश्च उपभोगपरिभोगौ उपभोगपरिभोगयोः परिमाणं, उपभोगपरिभोगपरिमाणं ।

संयममविनाशयन्नततीत्यतिथिः ॥ १० ॥ चारित्रलाभबलोपेतत्वात् संयममविनाशयन् अततीत्यतिथिः । अथवा नास्य तिथिरस्ति इत्यतिथिः । अनियतकालागमनं, इत्यर्थः । संविभजनं संविभागः, अतिथये संविभागः अतिथिसंविभागः । अश्वघासादिवद्वृत्तिः ।

व्रतगृहणमनर्थकमिति चेदुक्तं ॥ ११ ॥ व्रतमित्यनुवर्तते पुनर्व्रतग्रहणमनर्थकमितिचेदुक्तं किमुक्तं ? उपसर्जनानभिसंबंधादिति ।

व्रतसंपन्नशब्दः प्रत्येकमभिसंबध्यते ॥१२॥ दिग्विरतिव्रतसंपन्नः देशविरतिव्रतसंपन्न इत्यादि । अथ किमर्था दिङ्निवृत्तिः ?

दुष्परिहारक्षुद्रजंतुप्रायत्वाद्दिग्निवृत्तिः ॥ १३ ॥ दुष्परिहारैः क्षुद्रजंतुभिराकुला दिश अतस्तन्निवृत्तिः कर्तव्या ।

तत्परिमाणं च योजनादिभिरभिज्ञानवद्भिः ॥ १४ ॥ तासां परिमाणं योजनादिभिः पर्वतादिप्रसिद्धाभिज्ञानैः कर्तव्यं ।

अगमनेपि प्राणिवधाभ्यनुज्ञानमिति चेन्न निवृत्त्यर्थत्वात् ॥ १५ ॥ स्यान्मतं दिक्परिमाणकरणात् अगमनेपि तदन्तरावस्थितप्राणिगणवधाभ्यनुज्ञानं प्रसक्तं अन्यथा वा दिक्परिमाणमनर्थकं इति तन्न । किं कारणं ? निवृत्त्यर्थत्वात् । कार्त्स्न्येन निवृत्तिं कर्तुं अशक्नुवतः शक्त्या प्राणिवधविरतिं प्रत्यागूर्णस्यात्र प्राणयात्रा भवतु वा मा वा भूत । सत्यपि प्रयोजनभूयस्त्वे परिमितात् दिगवधेर्बहिर्नास्कन्त्स्यामिति प्रणिधानान्न दोषः ।

तृष्णाप्राकाम्यनिरोधतंत्रत्वाच्च ॥ १६ ॥ प्रवृद्धेच्छस्य आत्मनस्तस्यां दिशि विना यत्नात् मणिरत्नादिलाभोस्तीत्येवं अन्येन प्रोत्साहितस्यापि मणिरत्नादिसंप्राप्तितृष्णाप्राकाम्यनिरोधः कथं तन्निरतो भवेदिति दिग्विरतिः श्रेयसी ।

ततो वहिर्महाव्रतप्रसिद्धिः ॥ १७ ॥ अहिंसाद्यणुव्रतधारिणोप्यस्य परिमितादिगवधेर्वहिर्मनोवाक्काययोगैः कृतकारितानुमतविकल्पैः हिंसादिसर्वसावद्यनिवृत्तिरिति महाव्रतत्वमवसेयं ।

तथैव देशनिवृत्तिः ॥ १८ ॥ यथा दिङ्निवृत्तिः कृता तथैव देशनिवृत्तिः कार्या । मदीयस्य गृहांतरस्य तडाकस्य वा मध्यं मुक्त्वा देशांतरं नास्कन्त्स्यामि इति तन्निवृत्तौ पूर्ववत् प्रयोजनं वेदितव्यं । महाव्रतत्वं च वहिर्व्यवस्थाप्यं । अयमनयोर्विशेषः–दिग्विरतिः सार्वकालिकी देशविरतिर्यथाशक्तिकालनियमेनेति ।

अनर्थदंडः पंचधा अपध्यानपापोपदेशप्रमादाचरितहिंसाप्रदानाशुभश्रुतिभेदात् ॥१९॥ अनर्थदंडः पञ्चधा भिद्यते कुतः ? अपध्यानपापोपदेशप्रमादाचरितहिंसाप्रदानाशुभश्रुतिभेदात् ।

कथं परेषां जयपराजयवधांगछेदस्वहरणादि कथं स्यादिति मनसा चिंतनमपध्यानं॥२०॥

क्लेशतिर्यग्वणिज्यावधकारंभकादिषु पापसंयुतं वचनं पापोपदेशः ॥ २१ ॥ तद्यथा अस्मिन् देशे दासा दास्यः सुलभास्तानमु देशं नीत्वा विक्रये कृते महानर्थलाभो भवतीति क्लेशवाणिज्या । गोमहिष्यादीन् अमुत्र गृहीत्वा अन्यत्र देशे व्यवहारे कृते भूरिवित्तलाभ इति तिर्यग्वाणिज्या । वागुरिकसौकरिकशाकुनिकादिभ्यो मृगवराहशकुंतप्रभृतयोऽमुस्मिन् देशे संतीति वचनं वधकोपदेशः । आरंभकेभ्यः कृषीवलादिभ्यः क्षित्युदकज्वलनपवनवनस्पत्यारंभोऽनेनोपायेन कर्तव्यः इत्याख्यानमारंभकोपदेशः । इत्येवं प्रकारं पापसंयुक्तं वचनं पापोपदेशः ।

प्रयोजनमंतरेणापि वृक्षादिच्छेदनभूमिकुट्टनसलिलसेचनाद्यवद्यकर्म प्रमादाचरितमिति कथ्यते ॥ २२ ॥

विषशस्त्राग्निरज्जुकशादंडादिहिंसोपकरणप्रदानं हिंसाप्रदानमित्युच्यते ॥ २३ ॥

हिंसारागादिप्रवर्धितदुष्टकथाश्रवणशिक्षणव्यापृतिरशुभश्रुतिरित्याख्यायते ॥ २४ ॥ एतस्मादनर्थदंडाद्विरतिः कार्या ।

मध्येऽनर्थदंडग्रहणं पूर्वोत्तरातिरेकानर्थक्यज्ञापनार्थं ॥ २५ ॥ पूर्वयोः दिग्देशयोरुत्तरयोश्चोपभोगपरिभोगयोरवधृतपरिमाणयोरनर्थकं चंक्रमणादिविषयोपसेवनं च निष्प्रयोजनं न कर्म कर्तव्यमित्यतिरेकनिवृत्तिज्ञापनार्थं मध्येऽनर्थदंडवचनं क्रियते ।

सामायिके नियतदेशकाले महाव्रतत्वं पूर्ववत् ॥ २६ ॥ इयति देशे, एतावति काले इत्यवधारिते सामायिके स्थितस्य महाव्रतत्वं पूर्ववद्वेदितव्यं, अणुस्थूलकृतहिंसादिनिवृत्तेः ।

संयमप्रसंग इति चेन्न तद्घातिकर्मोदयात् ॥ २७ ॥ स्यान्मतं सामायिके सर्वसावद्यनिवृत्तिलक्षणे स्थितस्य तस्य संयमः प्राप्नोतीति ? तन्न । किं कारणं ? तद्घातिकर्मोदयात् । तस्य हि संयमघातिकर्मोदयोऽस्तीति न संयतत्वं ।

महाव्रतत्वाभाव इति चेन्नोपचारात् राजकुले सर्वगतचैत्रवत् ॥ २८ ॥ यद्यभ्यंतरसंयमघातिकर्मोदयोऽस्ति तद्वृत्तेनावश्य अनिवृत्तपरिणामेन भावतव्यं ततश्च महाव्रतत्वमस्य नोपपद्यत इति मतं ? तन्न । किं कारणं ? उपचारात् । राजकुले सर्वगतचैत्रवत् । यथा पौरजनपदकोष्ठागारादिषु बाह्येषु व्यापारेषु सर्वेषु व्यापृतः स्नानानुलेपनशयनान्तःपुरादिव्यापारेषु अभ्यंतरेषु केषुचिन् व्यापृतिमननुगच्छन्नपि राजकुले सर्वगतश्चैत्र इत्युपचर्यते । तथा हिंसादिषु बाह्येषु सर्वेषु अनाश्रवणः अभ्यंतरसंयमघातिकर्मोदयापादितमंदाविरतिपरिणामे सत्यपि महाव्रत इत्युपचर्यते । एवं च कृत्वा अभव्यस्यापि निर्ग्रंथलिंगधारिणः एकादशांगाध्यायिनः महाव्रतपरिपालनादसंयतभावस्यापि उपरिग्रैवेयकविमानवासितोपपन्ना भवति ।

स्नानगंधमाल्यादिविरहितोऽवकाशे शुचावुपवसेत् ॥ २९ ॥ स्वशरीरसंस्कारसंस्करणस्नानगंधमाल्याभरणादिभिर्विरहितः शुचौ अवकाशे साधुनिवासे चैत्यालये स्वप्रोषधोपवासगृहे वा धर्मकथाश्रवणश्रावणचिंतनावहितांतःकरणः सन्नुपवसेत् निरारंभः श्रावकः ।

भोगसंख्यानं पंचविधं त्रसघातप्रमादबहुवधानिष्टानुपसेव्यविषयभेदात् ॥ ३० ॥ भोगपरिसंख्यानं पंचविधं प्रत्येतव्यं । कुतः ? त्रसघातप्रमादबहुवधानिष्टानुपसेव्यविषयभेदात् । तत्र मधुमांसं सदा परिहर्तव्यं त्रसघातं प्रति निवृत्तचेतसा । मद्यमुपसेव्यमानं कार्याकार्यविवेकसंमोहकरमिति तद्वर्जनं प्रमादविरहायानुष्ठेयं । केतक्यर्जुनपुष्पादीनि बहुजंतुयोनिस्थानानि शृंगबेरमूलकार्द्रहरिद्रानिंबकुसुमादीन्यनंतकायव्यपदेशार्हाणि, एतेषामुपसेवने बहुघातोल्पफलमिति तत्परिहारः श्रेयान् । यानवाहनाभरणादिषु एतावदेवेष्टमतोन्यदनिष्टमित्यनिष्टान्निवर्तनं कर्तव्यं । न हि असत्यभिसंधिनियमे व्रत-

मिति इष्टानामपि चित्रवस्त्रविकृतवेषाभरणादीनामनुपसेव्यानां परित्यागः कार्यः, यावज्जीवं। अथ न शक्तिरस्ति कालपरिच्छेदेन वस्तुपरिमाणेन च शक्त्यनुरूपं निवर्तनं कार्यं।

अतिथिसंविभागश्चतुर्विधो भिक्षोपकरणौषधप्रतिश्रयभेदात् ॥ ११ ॥ अतिथिसंविभागश्चतुर्धा भिद्यते कुतः भिक्षोपकरणौषधप्रतिश्रयभेदात्। मोक्षार्थमभ्युद्यतायातिथये संयमपरायणाय शुद्धाय शुद्धचेतसा निरवद्या भिक्षा देया। धर्मोपकरणानि च सम्यग्दर्शनज्ञानचारित्रोपबृंहणानि दातव्यानि। औषधं प्रायोग्यमुपयोजनीयं। प्रतिश्रयश्च परमधर्मश्रद्धया प्रतिपादयितव्य इति। चशब्दो वक्ष्यमाणगृहस्थधर्मसमुच्चयार्थः। कः पुनरसौ ?

मारणांतिकीं सल्लेखनां जोषिता ॥ २२ ॥

स्वायुरिंद्रियबलसंक्षयो मरणं ॥ १ ॥ स्वपरिणामोपात्तस्यायुषः इंद्रियाणां बलानां च कारणवशात् संक्षयो मरणमिति मन्यंते मनीषिणः।

अंतग्रहणं तद्भवमरणप्रतिपत्त्यर्थं ॥ २ ॥ मरणं द्विविधं नित्यमरणं तद्भवमरणं चेति। तत्र नित्यमरणं समये समये स्वायुरादीनां निवृत्तिः। तद्भवमरणं भवांतरप्राप्त्यनंतरोपश्लिष्टं पूर्वभवविगमनं। तत्रांतग्रहणं क्रियते तद्भवमरणपरिग्रहार्थं। मरणमंतो मरणांतः मरणांतः प्रयोजनमस्या इति मारणांतिकी।

सम्यक्कायकषायलेखना सल्लेखना ॥ ३ ॥ लिखेर्ण्यंतस्य लेखना तनूकरणमिति यावत्। कायस्य बाह्यस्य अभ्यंतराणां च कषायाणां तत्कारणहापनया क्रमेण सम्यक् लेखना। तां मारणांतिकीं सल्लेखनां जोषिता। सेविता गृहीत्यभिसंबंधः।

सेविताग्रहणं विस्पष्टार्थमिति चेन्नार्थविशेषोपपत्तेः ॥ ४ ॥ स्यान्मतं इह सेवितेत्येव विस्पष्टार्थं वक्तव्यमिति तन्न। किं कारणं ? अर्थविशेषोपपत्तेः। न केवलमिह सेवनं गृह्यते किं तर्हि ? प्रीत्यर्थोपि। जुषि प्रीतिसेवनयोरिति यस्मात्। असत्यां प्रीतौ बलान्न सल्लेखना कार्यते सत्यां हि प्रीतौ स्वयमेव करोति।

सल्लेखनाया जोषितेति प्राप्नोतीति चेन्न तृनः प्रयोगात् ॥ ५ ॥ स्यान्मतं यथा कटस्य कर्तेति विभक्तिनिर्देशः तथा सल्लेखनाया जोषितेति प्राप्नोतीति ? तन्न किं कारणं ? तृनः प्रयोगात्।

आत्मवधकत्वप्रसंग इतिचेन्नाऽप्रमत्तत्वात् ॥ ६ ॥ स्यान्मतं सल्लेखनामास्थितस्य स्वाभिसंधिपूर्वकायुर्विनिवृत्तिरात्मवधः प्राप्नोतीति ? तन्न किं कारण ? अप्रमत्तत्वात्। प्रमत्तयोगाद्धि प्राणव्यपरोपणं हिंसेत्युक्त नचास्य प्रमादयोगोस्ति कुतः।

रागाद्यभावात् ॥ ७ ॥ रागद्वेषमोहाविष्टस्य हि विषशस्त्राद्युत्तरकारणप्रयोगवशात् आत्मानं घ्नतः स्वघातो भवति। न तथा सल्लेखनां प्रतिपन्नस्य रागादयः संति ततो नात्मवधदोषसंस्पर्शः। उक्तंच—

रागादीणमणुप्पा अहिंसकत्तेति देसिदं समये।
तेसिं चेदुप्पत्ती हिंसेति जिणेहि णिद्दिट्ठा ॥ १ ॥

किंच—

मरणस्यानिष्टत्वात् ॥ ८ ॥ यथा वणिजः विविधपण्यदानादानसंचयपरस्य गृहविनाशोऽनिष्टः तद्विनाशकारणे चोपस्थिते यथाशक्ति परिहरति दुष्परिहरे च पण्याविनाशो यथा भवति तथा यतते। एवं गृहस्थोपि व्रतशीलपुण्यसंचयप्रवर्तमानस्तदाश्रयस्य शरीरस्य न पातमभिवांछति तदुपप्लवकारणे चोपस्थिते स्वगुणाविरोधेन परिहरति, दुष्परिहरे च यथा स्वगुणाविनाशो न भवति तथा प्रयतति कथमात्मवधो भवेत्। किंच —

उभयानभिसंधानात् ॥ ९ ॥ यथा तपस्थः शीतोष्णजसुखदुःखानभिसंधानात् नाभिसंहितसुखदुःखसंबंधेपि सुखदुःखकृतरागद्वेषाभावात् न सुखदुःखकृतकर्मबंधभाक् । तथार्हत्प्रणीतां सल्लेखनां कुर्वन् जीवितमरणानभिसंधानात् अनभिसंहितात्मीयमरणसंबंधे रागद्वेषाभावात् नात्मवधकः । किंच—

स्वसमयविरोधात् ॥ १० ॥ यथा क्षणिकवादिनः, अक्षणिकाः सर्वे भावाः इति ब्रुवतः स्वसमयविरोधस्तथा यदा सत्वश्च भवति सत्वसंज्ञा च भवति वधकश्च भवति वधचित्तं चास्योत्पन्नं भवति इत्येतां चतुर्विधां चेतनां प्राप्य हिंसा जायत इति ब्रुवतोऽसत्यात्मवधकत्वाचित्ते सल्लेखनां कुर्वत आत्मवधकत्वं जायत इत्याचक्षाणस्यासंचेतितकर्मबंधाभावात् समयविरोधः । अथ स्वसमयविरोधो माभूदिति चतुर्विधैव चेतनया कर्म बिद्यंत इतीष्टं । ननु सल्लेखनायां आत्मवधकचित्ताभावात् आत्माहिंसकत्वं सिद्धं । अथवा यथा सदा मौनव्रतिकस्य मौनव्रतिकोस्मीति वचनं स्ववचसा विरुध्यते । तथा सर्वानात्मकवादिनः आत्माभावादात्मनो वधकत्वमाचक्षाणस्य सर्वात्मकार्यसत्ववचनविरोधः । अथ स्वसमयविरोधो माक्लृपदिति सर्वात्मकमिष्टं । नन्वात्माभावात् आत्मवधाभावः । योपि ब्रूयात् निःक्रिय आत्मेति तस्य पुनः साधनतः सेवितां सल्लेखनामातिष्ठमानस्यात्मवधकत्वं भवतीत्यभिलषतः आत्मनोनिःक्रियत्वे प्रतिज्ञाहानिः । निःक्रियत्वाभ्युपगमे चात्मवधप्राप्त्युपालंभनाभावः । आह—

कदा अनेन सल्लेखनायां प्रयतितव्यमित्यत्रोच्यते—

जरारोगेंद्रियहानिभिरावश्यकपरिक्षये ॥ ११ ॥ जरसा शरीरदूषिण्या यदा प्रहतजंघाबलवीर्यो भवति रोगैश्च वातादिविकारजनितैरभिद्रुतः प्रक्षीणेंद्रियबलश्च भवति तदा आवश्यकपरिक्षयमपेक्षमाणः स्मृतिमान् प्रासुकाशनपानकोपवाससेवनादिना क्रमेण प्रक्षीयमाणशरीरबलः आमरणाद्भावनानुप्रेक्षासमाधिबहुलः शास्त्रोक्तेन विधिना सल्लेखनां जोषिता उत्तमार्थस्याराधको भवति ।

एकयोगकरणं न्याय्यमिति चेन्न कदाचित्कस्यचित्तां प्रत्याभिमुख्यज्ञापनार्थत्वात् ॥ १२ ॥ स्यादेतत् पूर्वसूत्रेण इह एक एव योगः कर्तव्यः, लघ्वर्थ इति ? तन्न किं कारणं ? कदाचित् कस्यचित् तां प्रत्याभिमुख्यज्ञापनार्थत्वात् । सप्तनयशीलवतः कदाचित् कस्यचिदेव गृहिणः सल्लेखनाभिमुख्यं न सर्वस्येति । किंच—

वेश्मापरित्यागिनस्तदुपदेशात् ॥ १३ ॥ वेश्मापरित्यागिनः दिग्विरत्यादिसप्तनयशीलोपदेशः । वेश्मपरित्यागेन तु श्रावकत्वेनैव गृहिणः सल्लेखनेत्येवमर्थो भेदेनोपदेशः ।

अविशेषाभिधिप्रतिपादनार्थत्वाद्वा ॥ १४ ॥ अयं सल्लेखनाविधिः, न श्रावकस्यैव दिग्विरत्यादिशीलवतः ? किं तर्हि संयतस्यापीति अविशेषज्ञापनार्थत्वाद्वा पृथगुपदेशः कृतः । अत्राह उक्तं भवता निःशल्यो व्रतीति तत्र चोक्तानि शल्यानि मायानिदानमिथ्यादर्शनसंज्ञकानि ततः सम्यग्दृष्टिना व्रतिना भवितव्यं । तत्सम्यग्दर्शनं किं निरपवादमुत सापवादमित्युच्यते । कस्यचिन्मोहनीयावस्थाविशेषात् कदाचिदिमे भवंत्यपवादाः—

शंकाकांक्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतीचाराः ॥ २३ ॥

निःशंकितत्वादयो व्याख्याताः दर्शनविशुद्धिरित्यत्र । तत्प्रतिपक्षभूताः शंकादयो वेदितव्याः । अथ प्रशंसासंस्तवयोः को विशेषः ?

वाङ्मानसविषयभेदात् प्रशंसासंस्तवभेदः ॥ १ ॥ मनसा मिथ्यादृष्टिज्ञानचारित्रगुणोद्भावनं प्रशंसा । भूताभूतगुणोद्भावनवचनं संस्तव इत्ययमनयोर्भेदः ।

प्रकरणादगार्यवधारणमिति चेन्न सम्यग्दृष्टिग्रहणस्य उभयार्थत्वात् ॥ २ ॥ स्यान्मतं अगारिव्रतशीलप्रकरणमिदमतः तस्यैव सम्यग्दृष्टेः शंकादयोतिचाराः प्रसक्ता नानगारस्येति ? तन्न । किं कारणं ? सम्यग्दृष्टिग्रहणस्योभयार्थत्वात् । पुनः सम्यग्दृष्टिग्रहणमेवमर्थं सम्यग्दर्शनसामान्यस्येमेतिचारा इति । यद्येवमर्थं सम्यग्दृष्टिग्रहणं नार्थोनेन, अगारिग्रहणं निवृत्तमित्याद्ध्येयं ? नैवं शंक्यं उत्तरत्राऽगारिग्रहणानुवर्तनस्येष्टत्वात् ।

दर्शनमोहोदयादतिचरणमतीचारः ॥ ३ ॥ दर्शनमोहोदयात्तत्त्वार्थश्रद्धानादतिचरणमतीचारः अतिक्रम इत्यनर्थांतरं । एते शंकादयः पंच सम्यग्दर्शनस्यातिचाराः ।

अष्टांगत्वात् सम्यग्दर्शनस्यातिक्रमणात्तावत्तमेवेति चेन्नात्रैवांतर्भावात् ॥ ४ ॥ स्यादेतत् सम्यग्दर्शनमष्टागं निःशंकितत्वादिलक्षणं उक्तं तस्यातिचारैरपि तावद्भिरेव भवितव्यमित्यष्टावतिचारा उपदेष्टव्याः ? इति तन्न किं कारणं ? अत्रैवांतर्भावात् । व्रतशीलानां पच पंचातिचारान् विवक्षुणा आचार्येण प्रशंसासंस्तवयोरितरेतरानंतर्भाव्यसम्यग्दृष्टेरपि पंच वातिचारा उक्ता इति न दोषः ।

आह—सम्यग्दर्शनस्याद्यस्य व्रतशीलपत्रांचितजिनधर्मकमलकर्णिकाकारस्यागार्यनगारयोः साधारणाः शंकादयोतिचारा व्याख्याताः । इदानीं व्रतशीलानां अतिचारगणना कर्त्तव्येति । तत्र व्रतशीलातिक्रमेयत्ताख्यापनार्थमिदमुच्यते—

व्रतशीलेषु पंच पंच यथाक्रमं ॥ २४ ॥

व्रतानि अहिंसादीनि । शीलानि दिग्विरत्यादीनि । व्रतानि च शीलानि च व्रतशीलानि । तेषु व्रतशीलेषु ।

व्रतग्रहणमेवास्त्विति चेन्न शीलविशेषद्योतनार्थत्वात् ॥ १ ॥ स्यान्मतं व्रतग्रहणमेवास्तु दिग्विरत्यादीनि अपि व्रतान्येव अतश्चैतदेवं यदाह 'अतिथिसंविभागव्रतसंपन्नश्चेति' ? तन्न किं कारणं ? शीलविशेषद्योतनार्थत्वात् । अभिसंधिपूर्वको नियमो व्रतमिति कृत्वा दिग्विरत्यादीन्यपि व्रतानि भवंति । किंतु व्रतपरिरक्षणं शीलमित्यस्य विशेषस्य द्योतनार्थं शीलग्रहणं तेन दिग्विरत्यादीनि शीलग्रहणेन गृह्यंते ।

सामर्थ्याद्गृहिव्रतसंप्रत्ययः ॥ २ ॥ यद्यपि इदं सूत्रमविशेषेणोक्तं तथापि सामर्थ्याद्गृहिव्रत ग्रहणमवसेयं । किं सामर्थ्यं ? वक्ष्यमाणवधवधच्छेदादिवचनं । ते हि बंधवधच्छेदादयो गृहस्थस्यैव नानगारस्येति ।

पंच पंचेति वीप्सायां द्वित्वं ॥ ३ ॥ पंच पंचेत्येतत् वीप्सायां द्वित्वमवसेयं ततोनवयवाभिधानं वीप्सार्थमिति अनवयवेन व्रतशीलानि पंचसंख्यया व्याप्यंते । ननु च लघ्वर्थं पंचश इति शसा निर्देशः कर्तव्यः ? सत्यमेवमेतत् व्यक्त्यर्थं वाक्येन निर्देशः क्रियते ।

यथाक्रमवचनं वक्ष्यमाणातिचारक्रमसंबंधनार्थं ॥ ४ ॥ वक्ष्यमाणा अतिचारा अहिंसादिभिः क्रमेणाभिसंबध्यंतामित्येवमर्थं यथाक्रमवचनं क्रियते । यो यः क्रमो यथाक्रमं क्रमानतिवृत्त्येत्यर्थः ।

आह यद्येवं तस्मादुच्यतां तावदाद्यस्य प्राणव्यपरोपणनिवृत्तलक्षणस्याणुव्रतस्य केतिचाराः ? येभ्यो निवृत्तौ निरपवादो भवतीत्यत्रोच्यते—

बंधवधच्छेदातिभारारोपणान्नपाननिरोधाः ॥ २५ ॥

अभिमतदेशगतिनिरोधहेतुर्बंधः ॥ १ ॥ अभिमतदेशगमनं प्रत्युत्सुकस्य तत्प्रतिबंधहेतुः कालादिषु रज्ज्वादिभिः, व्यतिषंगो बंध इत्युच्यते ॥

प्राणिपीडाहेतुर्वधः ॥ २ ॥ दंडकशावेत्रादिभिराभिघातः प्राणिनां वध इति गृह्यते तेन प्राणिव्यपरोपणं, ततः प्रागेवास्य विनिवृत्तत्वात् ।

छेदोंगापनयनं ॥ ३ ॥ कर्णनासिकादीनां अवयवानां अपनयनं छेद इति कथ्यते ।

न्याय्यभारादतिरिक्तभारवाहनमतिभारारोपणं ॥ ४ ॥ न्याय्यादनपेताद्भारादतिरिक्तस्य भारस्य वाहनमतिलोभाद्गवादीनामतिभारारोपणमिति गण्यते ।

क्षुत्पिपासाबाधनमन्नपाननिरोधः ॥ ५ ॥ तेषामेव गवादीनां कुतश्चित् कारणात् क्षुत्पिपासाबाधोत्पादनमन्नपाननिरोध इत्याख्यायते । एते पंच अहिंसाणुव्रतस्यातिचाराः ।

मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्यासापहार-साकारमंत्रभेदाः ॥ २६ ॥

मिथ्यान्यप्रवर्तनमतिसंधापनं वा मिथ्योपदेशः ॥ १ ॥ अभ्युदयनिःश्रेयसार्थेषु क्रियाविशेषेषु अन्यस्यान्यथा प्रवर्तनमतिसंधापनं वा मिथ्योपदेश इत्युच्यते ।

संवृतस्य प्रकाशनं रहोभ्याख्यानं ॥ २ ॥ स्त्रीपुंसाभ्यां एकांतेनुष्ठितस्य क्रियाविशेषस्य प्रकाशनं यत् रहोभ्याख्यानं तद्वेदितव्यं ।

परप्रयोगादन्यानुक्तपद्धतिकर्म कूटलेखक्रिया ॥ ३ ॥ अन्येनानुक्तं किंचित् परप्रयोगवशात् एवं तेनोक्तं अनुष्ठितमिति वचननिमित्तं लेखन कूटलेखक्रिया ।

हिरण्यादिनिक्षेपेऽल्पसंख्यानुज्ञावचनं न्यासापहारः ॥ ४ ॥ हिरण्यादेर्द्रव्यस्य निक्षेप्तुर्विस्मृतसंख्यस्याल्पशः संख्यानमाददानस्यैवमित्यनुज्ञावचनं न्यासापहार इत्याख्यायते ।

अर्थादिभिः परगुह्यप्रकाशनं साकारमंत्रभेदः ॥ ५ ॥ अर्थप्रकरणांगविकारभ्रूक्षेपादिभिः पराकूतमुपलभ्य तदाविष्करणमसूयादिनिमित्तं यत्तत्साकारमंत्रभेद इति कथ्यते । त एते सत्यव्रतस्य पंचातिक्रमाः ।

स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानो-न्मानप्रतिरूपकव्यवहाराः ॥२७॥

मोषकस्य त्रिधा प्रयोजनं स्तेनप्रयोगः ॥ १ ॥ मुष्णतं स्वयमेव वा प्रयुंक्ते अन्येन वा प्रयोजयति प्रयुक्तमनुमन्यते वा यतः स स्तेनप्रयोगो वेदितव्यः ।

चोरानीतग्रहणं तदाहृतादानं ॥ २ ॥ अप्रयुक्तेनाननुमतेन चौरेणानीतस्य ग्रहणं तदाहृतादानं प्रत्येतव्यं । तत्र को दोषः ? परपीडाराजभयादयः प्रतीताः । एतेन विरुद्धराज्यातिक्रमादयो व्याख्याताः ।

उचितादन्यथादानग्रहणमतिक्रमः ॥ ३ ॥ उचितान्न्यायादन्येन प्रकारेण दानग्रहणमतिक्रम इत्युच्यते । विरुद्धं राज्यं विरुद्धराज्यं विरुद्धराज्येऽतिक्रमः विरुद्धराज्यातिक्रमः । तत्राल्पमूल्यलभ्यानि महार्घाणि द्रव्याणीति प्रयत्नः ।

कूटप्रस्थतुलादिभिःक्रयविक्रयप्रयोगो हीनाधिकमानोन्मानः ॥ ४ ॥ प्रस्थादि मानं तुलाद्युन्मानं । एतेन न्यूनेनान्यस्मै देयं अधिकेनात्मनो ग्राह्यमित्येवमादिकूटप्रयोगः हीनाधिकमानोन्मानमित्याख्यायते ।

कृत्रिमहिरण्यादिकरणं प्रतिरूपकव्यवहारः ॥ ५ ॥ कृत्रिमैः हिरण्यादिभिः वंचनापूर्वको व्यवहारः प्रतिरूपकव्यवहार इति व्यपदिश्यते । त एते पंच अदत्तादानविरतेरतीचाराः ।

परविवाहकरणेत्वरिकापरिगृहीतापरिगृहीतागमनानंगक्रीडाकामतीव्राभिनिवेशाः ॥ २८ ॥

सद्वेद्यचारित्रमोहोदयाद्विवहनं विवाहः ॥ १ ॥ सद्वेद्यस्य चारित्रमोहस्य चोदयात् विवहनं कन्यावरणं विवाह इत्याख्यायते। परस्य विवाहः परविवाहः परविवाहस्य करणं परविवाहकरणं।

अयनशीलेत्वरी ॥ २ ॥ ज्ञानावरणक्षयोपशमापादितकलागुणज्ञतया चारित्रमोहस्त्रीवेदोदयप्रकर्षादंगोपांगनामोदयावष्टंभाच्च परपुरुषानेति गच्छतीत्येवंशीला इत्वरी। ततः कुत्सायां कः। इत्वरिका। अपरिगृहीता च परिगृहीता च अपरिगृहीतापरिगृहीते। या गणिकात्वेन पुंश्चलित्वेन वा परपुरुषगमनशीला अस्वामिका अपरिगृहीता। या पुनः एकपुरुषभर्तृका सा परिगृहीता। इत्वरिके च ते अपरिगृहीतापरिगृहीते च इत्वरिकापरिगृहीतापरिगृहीते तयोर्गमनं इत्वरिकापरिगृहीतापरिगृहीतागमनं।

अनंगेषु क्रीडा अनंगक्रीडा ॥ ३ ॥ अंगं प्रजननं योनिश्च ततोन्यत्र क्रीडा अनंगक्रीडा। अनेकविधप्रजननविकारेण जघनादन्यत्र चांगे रतिरित्यर्थः।

कामस्य प्रवृद्धः परिणामः कामतीव्राभिनिवेशः ॥ ४ ॥ कामस्य प्रवृद्धः परिणामः अनुपरतवृत्त्यादिः कामतीव्राभिनिवेश इत्युच्यते। एते पंच स्वदारसंतोषव्रतस्यातिचाराः।

दीक्षितातिबालातैर्यग्योन्यादीनामनुपसंग्रह इति चेन्न कामतीव्राभिनिवेशग्रहणात् सिद्धेः ॥ ५ ॥ स्यान्मत दीक्षिता अतिबाला तैर्यग्योनीत्येवमादीनां अनुपसंग्रह इति ? तन्न किं कारणं? कामतीव्राभिनिवेशग्रहणात् सिद्धेः। दीक्षितादिषु हि परिहर्तव्यासु वृत्तिःकामतीव्राभिनिवेशाद्भवति। उक्तोत्र दोषः राजभयलोकापवादादिः।

क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यप्रमाणातिक्रमाः ॥२९॥

क्षेत्रवास्त्वादीनां द्वयोर्द्वयोर्द्वंद्वः प्राक् कुप्यात् ॥ १ ॥ क्षेत्रवास्त्वादीनां द्वयोर्द्वयोः द्वंद्वो भवति। किं-अविशेषेणेत्याह-प्राक्कुप्यात्। क्षेत्रं च वास्तु च क्षेत्रवास्तु, हिरण्यं च सुवर्णं च हिरण्यसुवर्णं, धनं च धान्यं च धनधान्यं, दासी च दासश्च दासीदासं। क्षेत्रवास्तु च हिरण्यसुवर्णं च धनधान्यं च दासीदासं च कुप्यं च क्षेत्रवास्तुहिरण्यसुवर्णधनधान्यदासीदासकुप्यानि। दासीदासमिति गवाश्वादिषु निपातनात् एकशेषभावः। क्षेत्रं सस्याधिकरण, वास्तु आगारं, हिरण्यं रूपादिव्यवहारतंत्रं, सुवर्णं प्रतीतं, धनं गवादि, धान्यं व्रीह्यादि दासीदास भृत्यस्त्रीपुंसवर्गः कुप्यं क्षौमकार्पासकौशेयचंदनादि।

तीव्रलोभाभिनिवेशादतिरेकाः प्रमाणातिक्रमाः ॥ २ ॥ एतावानेव परिग्रहो मम नातोन्य इति परिच्छिन्नात् क्षेत्रवास्त्वादिविषयादतिरेकाः, अतिलोभवशात् प्रमाणातिक्रमा इति प्रत्याख्यायते। त एते पंच परिग्रहविरमणस्यातिक्रमा उक्ता व्रतानामतिचाराः। शीलानामतिचारा वक्ष्यते। तद्यथा—

ऊर्ध्वाधस्तिर्यग्व्यतिक्रमक्षेत्रवृद्धिस्मृत्यंतराधानानि ॥ ३० ॥

परिमितादिग्वधिव्यतिलंघनमतिक्रमः ॥ १ ॥ परिमितस्य दिगवधेरतिलंघनमतिक्रम इत्युच्यते

स समासतस्त्रिविधः—ऊर्ध्वातिक्रमः अधोतिक्रमः तिर्यगतिक्रमश्चेति ॥ २ ॥

तत्र पर्वताद्यारोहणादूर्ध्वातिक्रमः ॥ ३ ॥ पर्वततरुभूम्यादीनामारोहणादूर्ध्वातिक्रमो भवति।

कूपावतरणादेरधोतिवृत्तिः ॥ ४ ॥ कूपावतरणादेः, अधो दिगवधेरतिवृत्तिर्वेदितव्या।

बिलप्रवेशादिस्तिर्यगतीचारः ॥ ५ ॥ भूमिबिलगिरिदरीप्रवेशादिस्तिर्यगतीचारो द्रष्टव्यः।

अभिगृहीताया दिशो लोभावेशादाधिक्याभिसंधिः क्षेत्रवृद्धिः ॥६॥ प्राग् दिशं योजनादिभिः परिच्छिद्य पुनर्लोभवशात्ततोऽधिकाकांक्षणं क्षेत्रवृद्धिरित्यध्यवसीयते ।

इच्छापरिमाणेऽतर्भावात् पौनरुक्त्यमिति चेन्न तस्यान्याधिकरणत्वात् ॥ ७ ॥ स्यादेतत् इच्छापरिमाणे पंचमेऽणुव्रते अस्यांतर्भावात् पुनर्ग्रहणं पुनरुक्तमिति ? तन्न । किं कारणं ? तस्यान्याधिकरणत्वात्, इच्छापरिमाणं क्षेत्रवास्त्वादिविषयं इदं पुनः दिग्विरमणमन्यार्थं अस्यां दिशि लाभे जीवितमलाभे च मरणमतोऽन्यत्र लाभेपि न गमनमिति, न तु दिशि क्षेत्रादिष्विव परिग्रहबुद्ध्यात्मसात्करणात् परिमाणकरणमस्ति, ततोऽर्थविशेषोऽस्यावसेयः ।

तदतिक्रमः प्रमादमोहव्यासंगादिभिः ॥ ८ ॥ तस्यैतस्य दिक्परिमाणस्यातिक्रमः प्रमादात्, मोहाद् व्यासंगाद्वा भवतीत्यवसेयः ।

अननुस्मरणं स्मृत्यंतराधानं ॥ ९ ॥ अनुस्मरणं परामर्शनं प्रत्यवेक्षणमित्यनर्थांतरं । इदमिदं मया योजनादिभिरभिज्ञानं कृतमिति तदभावः स्मृत्यंतराधानं । त एते पंच दिग्विरमणस्यातिक्रमाः ।

आनयनप्रेष्यप्रयोगशब्दरूपानुपातपुद्गलक्षेपाः ॥ ३१ ॥

अन्यमानयेत्याज्ञापनमानयनं ॥ १ ॥ आत्मना संकल्पिते देशे स्थितस्य प्रयोजनवशात् यत्किंचिदानयेत्याज्ञापनं आनयनमित्याख्यायते ।

एवं कुर्विति विनियोगः प्रेष्यप्रयोगः ॥ २ ॥ परिच्छिन्नदेशाद्बहिः स्वयमगत्वा अन्यमप्यनानीय प्रेष्यप्रयोगेणैवाभिप्रेतव्यापारसाधनं प्रेष्यप्रयोगः ।

अभ्युत्कासिकादिकरणं शब्दानुपातः ॥ ३ ॥ व्यापारकरान् पुरुषान् उद्दिश्याभ्युत्कासिकादिकरणं शब्दानुपात इति शब्द्यते ।

स्वविग्रहप्ररूपणं रूपानुपातः ॥ ४ ॥ मम रूपं निरीक्ष्य व्यापारमचिरान्निष्पादयंति इति स्वविग्रहप्ररूपणं रूपानुपात इति निर्णीयते ।

लोष्टादिनिपातः पुद्गलक्षेपः ॥ ५ ॥ कर्मकरान् पुरुषानुद्दिश्य लोष्टपाषाणनिपातः पुद्गलक्षेप इति कथ्यते । त एते देशविरमणस्य पंचातिक्रमाः ।

कथं पुनरतिक्रम इत्युच्यते—

स्वयमनाक्रामन्नन्येनाक्रामयतीत्यतिक्रमः ॥ ६ ॥ यस्मात् स्वयमनतिक्रमन् अन्येनातिक्रमयति ततोऽतिक्रम इति व्यपदिश्यते । यदि हि स्वयमतिक्रमेत, व्रतलोप एवास्य स्यात् ।

कंदर्पकौत्कुच्यमौखर्यासमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि ॥ ३२ ॥

रागोद्रेकात् प्रहासमिश्रोऽशिष्टवाक्प्रयोगः कंदर्पः ॥ १ ॥ चारित्रमोहोदयापादितात् रागोद्रेकात् प्रहाससंयुक्तो योऽशिष्टवाक्प्रयोगः स कंदर्प इति निर्णीयते ।

तदेवोभयं परत्र दुष्टकायकर्मयुक्तं कौत्कुच्यं ॥ २ ॥ रागस्य समावेशाद्धास्यवचनं अशिष्टवचनं इत्येतदुभयं परत्र दुष्टेन कायकर्मणा युक्तं कौत्कुच्यमित्युच्यते ।

धार्ष्ट्यप्रायमबद्धबहुप्रलापित्वं मौखर्यं ॥ ३ ॥ अशालीनतया यत्किंचनानर्थकं बहुप्रलपनं मौखर्यमिति प्रत्येतव्यं ।

असमीक्ष्य प्रयोजनमाधिक्येन करणमधिकरणं ॥ ४ ॥ अधिरुपभावे वर्तते, करोतिश्चापूर्व-प्रादुर्भावे, प्रयोजनमसमीक्ष्य आधिक्येन प्रवर्तनमधिकरणं ।

तत्त्रेधा कायवाङ्मनोविषयभेदात् ॥ ५ ॥ तदधिकरणं त्रेधा व्यवतिष्ठते। कुतः ? कायवाङ्मनो-विषयभेदात् । तत्र मानसं परानर्थककाव्यादिचिंतनं, वाग्गतं निष्प्रयोजनकथाख्यानं परपीडाप्रधानं यत्-किंचनवक्तृत्वं, कायिकं च प्रयोजनमंतरेण गच्छंस्तिष्ठन्नासीनो वा सचित्तेतरपत्रपुष्पफलच्छेदनभेदनकुट्टन-क्षेपणादीनि कुर्यात् । अग्निविषक्षारादिप्रदानं चारभत्येवमादि तत्सर्वमसमीक्ष्याधिकरणं ।

यावतार्थेनोपभोगपरिभोगौ सोऽर्थस्ततोन्यस्याधिक्यमानर्थक्यं ॥ ६ ॥ यस्य यावतार्थेन उप-भोगपरिभोगौ प्रकल्प्येते तस्य तावानर्थ इत्युच्यते ततोन्यस्याधिक्यमानर्थक्यं भवति ।

उपभोगपरिभोगव्रतेऽन्तर्भावात् पौनरुक्त्यप्रसंग इति चेन्न तदर्थानवधारणात् ॥ ७ ॥ स्यादेतत् उपभोगपरिभोगव्रतेऽनर्भवतीति पौनरुक्त्यमासज्यत इति ? तन्न, किं कारणं ? तदर्थानवधारणात् । इच्छावशात् उपभोगपरिभोगपरिमाणावग्रहः सावद्यप्रत्याख्यानं चेति तदुक्तं । इह पुनः कल्प्यस्यैव आधिक्यमित्यतिक्रम इत्युच्यते । नन्वेवमपि तद्व्रतातिचारांतर्भावात् इदं वचनमनर्थकं ? नानर्थकं सचित्ता-द्यतिक्रमवचनात् । असमीक्ष्याधिकरणमित्यत्र 'सुप्सुपेति वृत्तिः । मयूरव्यंसकादित्वाद्वा । त एते पचानर्थ-दंडविरतेरतीचाराः ।

योगदुःप्रणिधानानादरस्मृत्यनुपस्थानानि ॥ ३३ ॥

योगशब्दो व्याख्यातार्थः ॥ १ ॥ अयं योगशब्दो व्याख्यातार्थो द्रष्टव्यः । क ? कायवाङ्म-नष्कर्मयोग इत्यत्र ।

दुष्टु प्रणिधानमन्यथा वा दुःप्रणिधानं ॥ २ ॥ प्रणिधानं प्रयोगः परिणाम इत्यनर्थांतरं । दुष्टु पापं प्रणिधानं दुःप्रणिधानं अन्यथा वा प्रणिधानं दुःप्रणिधानं । तत्र क्रोधादिपरिणामवशात् दुष्टु प्रणि-धानं शरीरावयवानां अनिभृतमवस्थानं, वर्णसंस्काराभावार्थागमकत्वचापलादि वाग्गतं, मनसोऽनर्पितत्व च, इत्यन्यथा प्रणिधान ।

अनादरोनुत्साहः ॥ ३ ॥ इतिकर्तव्यं प्रत्यसाकल्यात् यथाकथंचित् प्रवृत्तिरनुत्साहः अना-दर इत्युच्यते ।

अनैकाग्र्यं स्मृत्यनुपस्थानं ॥ ४ ॥ अनैकाग्र्यमसमाहितमनस्कता स्मृत्यनुपस्थानमित्याख्यायते ।

मनो दुःप्रणिधानं तदिति चेन्न तत्रान्यचिंतनात् ॥ ५ ॥ स्यादेतत् स्मृत्यनुपस्थानं तन्मनो-दुःप्रणिधानमेवेति तस्य ग्रहणमनर्थकमिति ? तन्न किं कारणं ? तत्रान्यचिंतनात् तत्र हि अन्यत् किंचित् अचिंतयंश्चिंतयत एव वा विषये क्रोधाद्यावेशः औदासीन्येन वाऽवस्थानं मनसः । इह पुनः परिस्पंदनात् चिंताया एकाग्र्येणानवस्थानमिति विशेषोऽयमन्यस्य । रात्रिंदिवं यस्य वा प्रमादाधिकस्य साचरयानुपस्थानं । त एते पंच सामायिकस्यातिक्रमाः ।

अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणाना-दरस्मृत्यनुपस्थानानि ॥ ३४ ॥

प्रत्यवेक्षणं चाक्षुषो व्यापारः ॥ १ ॥ जंतवः संति न संति चेति प्रत्यवेक्षणं चाक्षुषो व्या-पारः प्रतीयते ।

प्रमार्जनमुपकरणोपकारः ॥ २ ॥ मृदुनोपकरणेन यत् क्रियते प्रयोजनं तत् प्रमार्जनं प्रत्येतव्यं ।

तस्य प्रतिषेधविशिष्टस्योत्सर्गादिभिः संबंधः ॥ ३ ॥ तस्योभयस्य प्रतिषेधविशिष्टस्य उत्स-

र्गादिभिस्त्रिभिः प्रत्येकमभिसंबंधो भवति अप्रत्यवेक्षिताप्रमार्जितोत्सर्ग इत्यादि । तत्राऽप्रत्यवेक्षितायां भुवि मूत्रपुरीषोत्सर्गः अप्रत्यवेक्षिताप्रमार्जितस्य अर्हदाचार्यपूजोपकरणस्य, गंधमाल्यधूपादेरात्मपरिधानाद्यर्थस्य वस्त्रपात्रादेश्चाऽऽदानमप्रत्यवेक्षिताप्रमार्जितस्य प्रावरणादेः संस्तरस्योपक्रमण ।

आवश्यकेष्वनादरः ॥४॥ अनुत्साहो भवति। कुतः ? क्षुदभ्यर्दितत्वात्। स्मृत्यनुपस्थानं व्याख्यातं। त एते पंच प्रोषधोपवासस्यातिचाराः ।

सचित्तसंबंधसंमिश्राभिषवदुःपक्काहाराः ॥ ३५ ॥

सह चित्तेन वर्तत इति सचित्तः ॥ १ ॥ चित्तं विज्ञानं तेन सह वर्तत इति सचित्तः, चेतनावद्द्रव्यमित्यर्थः ।

तदुपश्लिष्टः संबंधः ॥ २ ॥ तेन चित्तवता द्रव्येणोपश्लिष्टः संबंध इत्याख्यायते । संबध्यत इति संबंधः ।

तद्व्यतिकीर्णः संमिश्रः ॥ ३ ॥ तेन सचित्तेन द्रव्येण व्यतिकीर्णः संमिश्र इति कथ्यते । संमिश्र्यत इति संमिश्रः ।

पूर्वेणाविशिष्ट इति चेन्न तत्र संसर्गमात्रत्वात् ॥ ४ ॥ स्यान्मतं संबंधेनाविशिष्टः संमिश्र इति ? तन्न । किं कारणं ? तत्र संसर्गमात्रत्वात् । सचित्तसंबंधे हि संसर्गमात्रं विवक्षितं इह तु सूक्ष्मजंतुव्याकुलस्य विभागीकरणस्याशक्यत्वात् नानाजातीयद्रव्यसमाहारः सूक्ष्मजंतुप्राय आहारः संमिश्र इष्टः । कथं पुनरस्य सचित्तादिषु वृत्तिः ? प्रमादसंमोहाभ्यां सचित्तादिषु वृत्तिः । क्षुत्पिपासातुरत्वात् त्वरमाणस्य सचित्तादिषु अशनाय पानायानुलेपनाय परिधानाय वा वृत्तिर्भवति ।

द्रवो वृष्यं वाऽभिषवः ॥ ५ ॥ द्रवः सौवीरादिकः वृष्यं वा द्रव्यमभिषवः इत्यभिधीयते ।

असम्यक् पक्वो दुष्पक्वः ॥ ६ ॥ अस्विन्नतंदुलभावेनातिविक्लेदनेन वा दुष्टु पक्व आहारः दुष्पक्व इत्युच्यते । ननु दुष्पच इति प्राप्नोतीति तन्न । किं कारणं ? कृच्छ्रार्थविवक्षाभावात् न भवति । तस्याभ्यवहारे को दोषः ? इंद्रियमदवृद्धिः स्यात् । सचित्तप्रयोगो वा वातादिप्रकोपो वा । तत्प्रतीकारविधाने स्यात् पापलेपः । अतिथयश्चैनं परिहरेयुरिति । त एते पंच उपभोगपरिभोगसंख्यानमर्यादाभेदाः ।

सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्रमाः ॥ ३६ ॥

सचित्ते निक्षेपः सचित्तनिक्षेपः ॥ १ ॥ सचित्तो व्याख्यातः । सचित्ते पद्मपत्रादौ निधानं निक्षेप इत्युच्यते । साधनं कृतेति वा मयूरव्यंसकादित्वाद्वा वृत्तिः ।

प्रकरणात् सचित्तेनाऽपिधानं ॥ २ ॥ अपिधानमावरणमित्यर्थः । प्रकरणवशात् सचित्तेनापिधानमिति विशेष्यते, इतरथा हि प्रागधिकरणत्वेन निर्दिष्टं सचित्तग्रहणं नाभिसंबध्येत ।

अन्यदातृदेयार्पणं परव्यपदेशः ॥ ३ ॥ अन्यत्र दातारः संति दीयमानोऽप्ययमन्यस्येति वा अर्पणं परव्यपदेश इति प्रतिपद्यते ।

प्रयच्छतोऽप्यादराभावो मात्सर्यं ॥ ४ ॥ प्रयच्छतोऽपि सतः आदरमंतरेण दानं मात्सर्यमिति प्रतीयते ।

अकाले भोजनं कालातिक्रमः ॥ ५ ॥ अनगाराणां अयोग्यकाले भोजनं कालातिक्रम इति कथ्यते । पंचातिथिसंविभागशीलभेदाः प्रणीताः—सप्तानामपि शीलानामतीचारा उक्ताः, उच्चावचाः । अथ सल्लेखनाया मरणविशेषापादानसमर्थाया अनुपदिष्टचित्तेनारभ्यायाः कतीचाराः भवंतीत्यत आह—

१ ख. पुस्तके पाठोऽयमधिकः । २ अतीचारा इत्यर्थः ।

जीवितमरणाशंसामित्रानुरागसुखानुबंधनिदानानि ॥ ३७ ॥

आकांक्षणमाशंसा ॥ १ ॥ आकांक्षणमभिलाषः आशंसेत्युच्यते। जीवितं च मरणं च जीवितमरणे तयोराशंसा जीवितमरणाशंसा।

अवश्यहेयत्वशरीरस्यावस्थानादरो जीविताशंसा ॥ २ ॥ शरीरमिदमवश्यं हेयं जलबुद्बुदनित्यं अस्यावस्थानं कथं स्यादित्यादरो जीविताशंसा प्रत्येतव्या।

जीवितसंक्लेशान्मरणं प्रति चित्तानुरोधो मरणाशंसा ॥३॥ रोगोपद्रवाकुलतया प्राप्तजीवितसंक्लेशस्य मरणं प्रति चित्तस्य प्रणिधानं मरणाशंसा इति व्यपदेशमर्हति।

पूर्वकृतसहपांशुक्रीडनाद्यनुस्मरणान्मित्रानुरागः ॥ ४ ॥ व्यसने सहायत्वमुत्सवे संभ्रम इत्येवमादिषु कृत बाल्ये युगपत् क्रीडनमित्येवमादीनामनुस्मरणात् मित्रेनुरागो भवति।

अनुभूतप्रीतिविशेषस्मृतिसमन्वाहारः सुखानुबंधः ॥ ५ ॥ एवं मया भुक्तं शयितं क्रीडितमित्येवमादि प्रीतिविशेषं प्रति प्रीतिविशेषस्मृतिसमन्वाहारः सुखानुबंध इत्यभिधीयते।

भोगाकांक्षया नियतं दीयते चित्तं तस्मिंस्तेनेति वा निदानं ॥ ६ ॥ विषयसुखोत्कर्षाभिलाषो भोगाकांक्षा तया नियतं चित्तं दीयते तस्मिंस्तेनेति वा निदानमिति व्यपादिश्यते। त एते पंच सल्लेखनायाः क्रमव्यतिक्रमाः।

अत्राह उक्तं भवता तीर्थकरत्वकारणकर्मास्रवनिर्देशे शक्तितस्त्यागतपसी इति, पुनश्चोक्तं शीलव्रतविधानेऽतिथिसंविभाग इति तस्य दानस्य लक्षणमनिर्ज्ञातं तदुच्यतामित्यत आह—

अनुग्रहार्थं स्वस्यातिसर्गो दानं ॥ ३८ ॥

स्वपरोपकारोनुग्रहः ॥ १ ॥ स्वस्य परस्य चोपकार अनुग्रह इत्याख्यायते। स्वोपकारः पुण्यसंचयः परोपकारः सम्यग्ज्ञानादिवृद्धिः॥

स्वशब्दो धनपर्यायवचनः ॥ २ ॥ आत्मात्मीयज्ञातिधनपर्यायवाचित्वे स्वशब्दस्य धनपर्यायवाचिनो ग्रहणमिह दृष्टव्यं। अनुग्रहार्थं स्वस्यातिसर्गस्त्यागो दानं वेदितव्यं।

अत्राहोक्तं दानं तत्किमविशिष्टफलमाहोस्वित् अस्ति कश्चित् प्रतिविशेष इत्यत्रोच्यते—

विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः ॥ ३९ ॥

प्रतिग्रहादिक्रमो विधिः ॥ १ ॥ प्रतिग्रह उच्चदेशस्थापनं पादप्रक्षालनं अर्चनं प्रणमनमित्येवमादिक्रियाविशेषाणां क्रमो विधिरित्याख्यायते।

विशेषो गुणकृतस्तस्य प्रत्येकमभिसंबंधः ॥ २ ॥ परस्परतो विशिष्यते विशिष्टिर्वा विशेषः स गुणकृतस्तस्य प्रत्येकमभिसंबंधो भवति विधिविशेषः, द्रव्यविशेषः दातृविशेषः, पात्रविशेष इति। तत्र विधिविशेषः प्रतिग्रहादिषु आदरानादरकृतो भेदः।

तपःस्वाध्यायपरिवृद्धिहेतुत्वादिर्द्रव्यविशेषः ॥ ३ ॥ दीयमानेन्नादौ प्रतिगृहीतुस्तपःस्वाध्यायपरिणामविवृद्धिकारणत्वादिर्द्रव्यविशेष इति भाष्यते।

अनुसूयाविषादादिर्दातृविशेषः ॥ ४ ॥ प्रतिग्रहीतरि अनुसूया त्यागेऽविषादः दित्सतो ददतो दत्तवतश्च प्रीतियोगः कुशलाभिसंधिता दृष्टफलानपेक्षिता निरुपरोधत्वमनिदानत्वमित्येवमादिः दातृविशेषोवसेयः

मोक्षकारणगुणसंयोगः पात्रविशेषः ॥ ५ ॥ मोक्षकारणैः सम्यग्दर्शनादिभिः गुणैः योगः पात्रविशेष इति प्रतीयते ।

ततश्च फलविशेषः क्षित्यादिविशेषाद्बीजफलविशेषवत् ॥ ६ ॥ ततश्च विधादिविशेषाद्दान-फलविशेषो भवति यथा क्षित्यादिकारणविशेषसन्निपाते सति नानाविधबीजफलविशेष इति ।

निरात्मकत्वे सर्वभावानां विध्यादिस्वरूपाभावः ॥७॥ निरात्मकाः सर्वे भावा इत्यस्मिन् दर्शने विध्यादिस्वरूपाभावः स्यात्। अस्ति चेद्विध्यादिस्वरूपं ? निरात्मकाः सर्वे भावा इत्यमुष्य सगरस्य व्याघातः ।

क्षणिकत्वाच्च विज्ञानस्य तदभिसंधानाभावः ॥ ८ ॥ क्षणमात्रावलंबिनि विज्ञाने पात्रभूतो यमुष्मिंस्तपःस्वाध्यायपरायणो मामनुगृहीष्यति । अस्मै च देयमिदं व्रतशीलभावनापरिबृंहणकरं । अयं चात्र विधिरित्यभिसंधिर्न स्यात् ।

पूर्वोत्तरक्षणविषयसंस्कारावग्रहसमर्थैकज्ञानाभावात् नित्यत्वाज्ञत्वनिष्क्रियत्वाच्च ॥ ९ ॥ यस्यापि दर्शनं सत आत्मनोऽकारणत्वान्नित्यत्वं ज्ञानगुणादर्थांतरभूतत्वादज्ञत्वं सर्वगतत्वान्निष्क्रियत्वं तस्य तत एव विध्याद्यनुपपत्तिः ।

क्रियागुणसमवायादुपपत्तिरिति चेन्न तत्परिणामाभावात् ॥ १० ॥ स्यादेतत् अर्थांतरत्वेपि इहेदं बुद्धिलक्षणात् समवायादेकत्वापत्ताविव तद्व्यपदेशोपपत्तेः विध्याद्युपपत्तिरिति ? तन्न । किं कारणं ? तत्प-रिणामाभावात् । यथा देवदत्तस्य दंडयोगाद्दंडिव्यपदेशेऽपि न दंडस्वभावापत्तिः तथात्मनोपि क्रियागुणव्यप-देशेपि तत्स्वभावसंक्रमाभावः ततश्चाधिकृतविध्याद्यभाव एव ।

क्षेत्रस्य वाचेतनत्वात् ॥ ११ ॥ यस्यापि दर्शनं चतुर्विंशतिविधं क्षेत्रं अचेतनं, क्षेत्रज्ञश्चेतनः पुरुष इति तस्यापि क्षेत्रस्याचेतनत्वाद्विध्याद्यभिसंधानाभावो घटादिवत् । अथास्ति विध्याद्यभिसंधिर्न तर्हि अचेतनं क्षेत्रं, क्षेत्रज्ञस्य च नित्यत्वात् शुद्धत्वात् निष्क्रियत्वादेव विध्याद्यनुपपत्तिः ।

स्याद्वादिनस्तदुपपत्तिरनेकांताश्रयणात् ॥ १२ ॥ स्याद्वादिनस्तु तेषां विध्यादीनां उपपत्तिः कुतः ? अनेकांताश्रयणात् । स्यान्नित्य आत्मा स्यादनित्य इत्येवमाद्यनेकांताश्रयणादेकांतदृष्टदोषाभावः ।

इति तत्त्वार्थवार्तिकव्याख्यानालंकारे सप्तमोध्यायः ॥ ७ ॥

ॐ नमः सिद्धेभ्यः ।

अथाष्टमोध्यायः ।

आस्रवपदार्थ उक्तः । अवसरप्राप्तं बंधं व्याचक्ष्महे । स पुनश्चेतनेतरद्रव्यपरिणामः नामादिचतुष्टय-धर्मभागपि द्रव्यभावसंबंधविशेषाद्द्वैमिवस्थां बिभर्ति । तत्र जतुकाष्ठरज्जुनिगलादिलक्षणं द्रव्यबंधं बहु-प्रकारं हित्वा प्रकरणसामर्थ्याद्भावबंधं ब्रूमः । स द्वेधा कर्मनोकर्मबंधभेदात् । मातापितृपुत्रस्नेहसंबंधः नोकर्मबंधः । यः पुनः अयमितरः कर्मबंधः । तं पौनर्भविककर्मबंधसंततिसद्भावादादिमंतमनादिमंतं च प्रतिजानीमहे बीजांकुरप्रादुर्भावसंतानवत् । आस्तामेतावद्व्याख्यानं इदमेव तावदमे वक्तव्य—इमे बंधहेतवो यैरयं बंधः प्रवर्तत इति । इतरथा हि बंधपदार्थप्रक्लृप्तये पुनस्तद्धेतवः प्रणेतव्याः स्युः । स्यादेतत् कार-णाभावाद् बंधप्रसिद्धिसामर्थ्यमित्येतच्च वार्तमनिर्मोक्षप्रसंगात् ।

अकस्माच्च तदभावात् ॥ १ ॥ यद्यकस्माद्बंधः मोक्षः कस्मान्नाकस्मात्, न चाकस्माद्बंधमोक्षौ तदर्थप्रक्रियाया विरोधप्रसंगात्। अतो बंधमुक्त्वा मापुनर्वाच्यं इति आदौ एव बंधकारणनिर्देशोऽनुष्ठेयः। कार्यकारणयोश्च पूर्वापरभावात् पूर्वं कारणं वाच्यं पश्चात् कार्यमुच्यते। न वक्तव्याः पुनरिह यस्मात् षष्ठसप्तमयोः विविधफलानुग्रहतंत्रास्रवप्रकरणवशात् सप्रपंचाः, आत्मनः कर्मबंधहेतवो व्याख्याताः। के पुनस्ते ?

मिथ्यादर्शनाविरतिप्रमादकषाययोगा बंधहेतवः ॥१॥

क पुनरेते ? उक्ताः

मिथ्यादर्शनं क्रियास्वंतर्भूतं ॥ १ ॥ पंचविंशतिः क्रिया उक्ताः तास्वंतर्भूतं मिथ्यादर्शनं द्रष्टव्यं।

विरतिप्रतिपक्षभूताप्यविरतिः ॥ २ ॥ विरतिर्व्याख्याता तत्प्रतिपक्षभूता अविरतिरपि तत्रैव वर्णिता–इंद्रियकषायाव्रतक्रिया इत्यत्र।

आज्ञाव्यापादनानाकांक्षक्रिययोरंतर्भावः प्रमादस्य ॥ ३ ॥ आज्ञाव्यापादनक्रियानाकांक्षक्रियेत्यनयोः प्रमादस्यांतर्भावो वेदितव्यः। सच्च प्रमादः कुशलेष्वनादरः मनसोऽप्रणिधानं।

कषायाः क्रोधादयः प्रोक्ताः ॥ ४ ॥ क्रोधादयोऽनंतानुबंध्यप्रत्याख्यानसंज्वलनाविकल्पाः कषायाः प्रोक्ताः। क्व ? इंद्रियकषायाव्रतक्रिया इत्यत्रैव।

योगः कायादिविकल्पः प्रक्लृप्तः ॥ ५ ॥ योगश्च कायादिविकल्पः प्रक्लृप्तः। क ? कायवाङ्मनस्कर्मयोग इत्यत्र।

मिथ्यादर्शनं द्वेधा नैसर्गिकपरोपदेशनिमित्तभेदात् ॥ ६ ॥ मिथ्यादर्शनं द्वेधा व्यवतिष्ठते कुतः ? नैसर्गिकपरोपदेशनिमित्तभेदात्।

तत्रोपदेशनिरपेक्षं नैसर्गिकं ॥ ७ ॥ तत्र परोपदेशमंतरेण मिथ्याकर्मोदयवशात् यदाविर्भवति तत्त्वार्थाश्रद्धानलक्षण तन्नैसर्गिकमिति व्यवसीयते।

परोपदेशनिमित्तं चतुर्विधं क्रियाक्रियावाद्याज्ञानिकवैनेयिकमतविकल्पात् ॥ ८ ॥ परोपदेशनिमित्तं मिथ्यादर्शन चतुर्विधं अवगतव्यं। कुतः ? क्रियाक्रियावाद्याज्ञानिकवैनेयिकमतविकल्पात्।

चतुरशीतिक्रियावादाः इति कौकलकांडे विद्धिप्रभृतिमतविकल्पात् ॥ ९ ॥ कौक्वलकांडेविद्धिकौशिकहरिश्मश्रुमान्धपिकरोमशहारिताश्वमुडाश्वालयनादिमतविकल्पात् क्रियावादाश्चतुरशीतिविधा द्रष्टव्याः।

अशीतिशतमक्रियावादानां ॥ १० ॥ मरीचिकुमारोलूककपिलगार्ग्यव्याघ्रभूतिवाद्वलिकमाठरमौद्गलायनप्रभृतिदर्शनभेदात् अक्रियावादा अशीतिशतसंख्याः प्रत्येतव्याः।

आज्ञानिकवादाः सप्तषष्टिसंख्याः साकल्यवाष्कलप्रभृतिदृष्टिभेदात् ॥ ११ ॥ साकल्यवाष्कलकुथुमिसात्यमुग्रिचारायणकठमाध्यंदिनीमौदपिप्पलादबादरायणस्विष्टिकृदैतिकायनवसुजैमिनिप्रभृतिदृष्टिभेदात् सप्तषष्टिसंख्या आज्ञानिकवादा ज्ञेयाः।

वैनयिकानां द्वात्रिंशद्वशिष्ठपाराशरादिमार्गभेदात् ॥ १२ ॥ वशिष्ठपाराशरजतुकर्णवाल्मीकिरोमहर्षिणसत्यदत्तव्यासैलापुत्रौपमन्यवेंद्रदत्तायस्थूलादिमार्गभेदात् वैनयिकाः द्वात्रिंशद्गणना भवंति। त एते मिथ्योपदेशभेदाः त्रीणि शतानि त्रिषष्ठ्युत्तराणि। अत्र चोद्यते—बादरायणवसुजैमिनिप्रभृतीनां श्रुतिविहितक्रियानुष्ठायिनां कथमाज्ञानिकत्वमित्युच्यते प्राणिवधधर्मसाधनाभिप्रायात्। न हि प्राणिवधः पापहेतुर्धर्मसाधनत्वमापत्तुमर्हति।

आगमप्रामाण्यात् प्राणिवधो धर्महेतुरितिचेन्न तस्यागमत्वासिद्धेः ॥ १३ ॥ स्यादेतत्

अपौरुषेयो वेदागमोस्ति तस्य कर्तृदोषानुषंगाशंकाभावात् प्रामाण्यमतस्तत्र प्रणीतः प्राणिवधो धर्महेतुरिति ! तन्न । किं कारणं ? तस्यागमकत्वासिद्धेः । सर्वप्राणिहितानुशासने हि प्रवृत्त आगमः, न हिंसाविधायि वचः आगमो भवितुमर्हति दस्युजनवचनवत् । किंच—

अनवस्थानात् ॥ १४ ॥ यथाद्य पुष्य अद्य पुनर्वसू इति विसंवादिवचोनवस्थानात् अप्रमाणं तथा वेद एव क्वचित् प्रदेशे धर्महेतुः पशुवध उक्तः । पशुवधेन सर्वान् कामान् न वाप्नोति " यज्ञो हि भूत्यै सर्वस्य तस्माद्यज्ञे वधो वधः " इति च । क्वचित् पुनरजैः त्रिवर्षपरमोषितैर्व्रीहिरज पिष्टमयं कृत्वा यष्टव्यमिति, हिंसा परिहृता । अतोनवस्थानाच्च वेदागमस्याप्रामाण्य । किंच—

परमागमे प्रतिषिद्धत्वात् ॥ १५ ॥ अर्हता भगवता प्रोक्ते परमागमे प्रतिषिद्धः प्राणिवधः सर्वत्र हिंसाविरतिः श्रेयसीति । अतः परमागमे प्रतिषिद्धत्वात् न धर्महेतुः प्राणिवधः ।

तदसिद्धिरिति चेन्नातिशयज्ञानाकरत्वात् ॥ १६ ॥ स्यान्मतं आर्हतस्य प्रवचनस्य परमागमत्वमसिद्धं तस्य पुरुषकर्तृकत्वे सति अयुक्तेरिति तन्न । किं कारणं ? अतिशयज्ञानाकरत्वात् । यदिदं जीवादिपदार्थस्वरूपनिरूपण नयप्रमाणाद्यधिगमोपायप्रापितयुक्तिबन्धमोक्षादिप्रतिपादनसमर्थमित्येवमादीनामातिशयज्ञानानामाकर आर्हत आगमः, रत्नानामिवोदधिः, अतोस्य परमागमत्वं ।

अन्यत्राप्यतिशयज्ञानदर्शनादिति चेन्नात एव तेषां संभवात् ॥ १७ ॥ स्यान्मतमन्यत्रापि अतिशयज्ञानानि दृश्यते । कल्पव्याकरणछंदोज्योतिषादीनि ततोनैकान्तिकत्वात् नायं हेतुरिति ! तन्न । किं कारण ! अत एव तेषां संभवात् । आर्हतमेव प्रवचनं तेषां प्रभवः । उक्तंच—

सुनिश्चितं नः परतन्त्रयुक्तिषु स्फुरंति याः काश्चनसूक्तसंपदः ।
तवैव ताः पूर्व महार्णवोत्थिता जगत्प्रमाणं जिनवाक्यविप्रुषः ॥ इति ।

श्रद्धामात्रमिति चेन्न भूयसामुपलब्धेरत्नाकरवत् ॥ १८ ॥ स्यादेतत् आर्हतमेव प्रवचनं सर्वेषा अतिशयज्ञानाना प्रभव इति श्रद्धामात्रमतत् न युक्तिक्षममिति ? तन्न । किं कारणं ? भूयसामुपलब्धेरत्नाकरवत ! यथा ग्रामनगरपत्तनादिषु दृश्यमानानामपि रत्नानां तत्प्रभवत्वमध्यवस्यति लोकः, भूयसामुपलब्धेरत्नाकरत्वत्तेषां प्रभव इति अध्यवसीयते । तथा सर्वातिशयज्ञानविधानत्वात् जैनमेव प्रवचनं आकर इत्यवगम्यते ।

तदुद्भवत्वात्तेषामपि प्रामाण्यमिति चेन्न निःसारत्वात् काचादिवत् ॥ १९ ॥ अथ मतमेतत् यदि वेदव्याकरणादीनां अर्हत्प्रवचनोद्भवत्वमभ्युपगम्यते तेषा प्रामाण्यात् तद्विहितहिंसाद्यनुष्ठानं दानादिवन्न दोषकारण ? इति तन्न । किं कारण ? निःसारत्वात् यथा काचमणिक्षारसवृक्षादीना रत्नाकरसमुद्भवत्वेपि निःसारत्वं । तथा वेदादीना जिनशासनसमुद्रसमुद्भवत्वेपि न प्रमाण्यमित्यवसेय । किंच—

सर्वेषामविशेषप्रसंगात् ॥ २० ॥ यदि हिंसा धर्मसाधनं मत्स्यबंधशाकुनिकसौकरिकादीनां सर्वेषामविशिष्टा धर्मावाप्तिः स्यात् । ततश्चाऽहिंसालक्षणोधर्म इत्येवमादिवचनमयुक्तं स्यात् ।

यज्ञात्कर्मणोन्यत्र वधः पापायेति चेन्नोभयत्र तुल्यत्वात् ॥ २१ ॥ स्यादेतत् यज्ञे पशुवधः प्रत्यवायहेतुर्न भवति अन्यत्र पापहेतुरिति न अहिंसालक्षणधर्मविरोध इति ! तन्न किं कारणं ? उभयत्र तुल्यत्वात् । उभयत्र हि असौ दुःखहेतुत्वेन तुल्यः, अतः फलेनापि समेन भवितव्य । अतर्वेदिगतः पशुवधः प्रत्यवायहेतुः प्राणवियोगहेतुत्वात् । बहिर्वेदिपशुवधवत् ।

विपर्ययो वा तादर्थ्यात् सर्गस्येति चेन्न साध्यत्वात् ॥ २२ ॥ स्यादेतत् "यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा । इत्यंगिसर्गस्य यज्ञार्थत्वात् न तस्य विनियोक्तुः पापमिति ! तन्न किं कारणं ? साध्यत्वात् । साध्यमेतत् स्वयंभुवा यज्ञार्थं पशवः सृष्टा इति" किंच —

अन्यथोपयोगे दोषप्रसंगात् ॥ २३ ॥ यद्धि यदर्थं तस्यान्यथोपयोगे दोषो दृष्टः यथा श्लेष्मप्रशमनार्थं औषधं, अन्यथा प्रयुज्यमानं दोषकरं तथा यज्ञार्थः पशुसर्ग इति कृत्वा क्रयविक्रयादिषु क्रियमाणेषु कर्तुरनिष्टफलावाप्तिः प्रसज्येत ।

मंत्रप्राधान्याददोष इति चेन्न प्रत्यक्षविरोधात् ॥ २४ ॥ स्यान्मतं यथा विषं मंत्रप्राधान्यादुपयुज्यमानं न मरणकारणं । तथा पशुवधोपि मंत्रसंस्कारपूर्वकः क्रियमाणो न पापहेतुरिति ? तन्न किं कारणं प्रत्यक्षविरोधात् । यथा मंत्रेणाऽसंस्क्रियमाण गौरवहीनं प्रत्यक्षत उपलभ्यते । यथा वा विना रज्जुनिगलादिबंधेभ्यो जलमनुष्यादिस्तंभयंतः प्रत्यक्षतः प्रतीताः मंत्रबलादेव केवलात् । तथा यदि मंत्रेभ्यः एव केवलेभ्यो याज्ञे कर्मणि पशून्निपातयतः दृश्येरन् मंत्रबलं श्रद्धीयेत । दृश्यते तु रज्ज्वादिभिर्मारण तस्मात् प्रत्यक्षविरोधात् मन्यामहे न मंत्रसामर्थ्यमिति ।

हिंसादोषाविनिवृत्तेः ॥ २५ ॥ अभ्युपगम्योच्यते—यथा शस्त्रादिभिः प्राणिनो व्यापादयन्नशुभाभिसंधिः पापेन बध्यते तथा मंत्रैरपि पशून् मारयन् दुष्कर्मबंधो भवदेवेति हिंसादोषो न निवर्तते ।

नियतपरिणामनिमित्तस्यान्यथाविधिनिषेधासंभवात् ॥ २६ ॥ नियतं शुभाशुभलक्षणं परिणामं प्रतीत्य पुण्यपापकर्मबंधो भवति । नासावन्यथा विधातु निषेद्धुं वा शक्यते । यदि स्यादसंचेतितकर्मबंधाभ्युपगमे बंधमोक्षप्रक्रियाविरोधः स्यात् ।

कर्तुरसंभवाच्च ॥ २७ ॥ 'अग्निहोत्रं जुहुयात् स्वर्गकाम इति' अग्निहवनादिक्रियायाः कर्ता पिंडो वा स्यात् भौतिकः पुरुषो वा ? । यदि भौतिकः पिंडः तस्याचेतनत्वात् घटादिवत् पुण्यापुण्यलक्षणक्रियासचेतनाभावात् कर्तृत्वाभावः । अथः पुरुषः स नित्यो वा स्यात् क्षणिको वा ? यदि क्षणिकः मंत्रार्थानुस्मरणतत्प्रयोगानुविधानचिंतनाद्यभावात् न कर्तृत्वमुपपन्नं । अथ हि नित्यः स्यात् पूर्वापरकालतुल्यत्वात विक्रियाविरहे दूरादेव कर्तृत्वं व्यावृत्तं ततः कर्तुरभावात् क्रियाफलानभिसंबंधः, पुरुष एवेदं, सर्वं यच्च भूतं यच्च भाव्यमित्येवमाद्युपनिषद्वाक्यप्रामाण्याच्च, एकपुरुषैकांतकल्पनायां वध्यघातकादिविवेकाभावः । चेतनाशक्तिपरिणाममात्राभ्युपगमे च दृश्यस्य विरूपस्याभावात् प्रत्यक्षविरोधः । प्रमाणतदाभासाविशेषप्रसगस्तु, निर्विकल्पपुरुषतत्त्वकल्पनायां च निर्विकल्पकत्वादितिकल्पभावाभावयोः संगरवचनविरोधप्रसंगश्चेति विषय तृष्णातुरविकल्पित वैदिकवचनं न प्रामाणिकं कर्तव्यं । एवं परोपदेशनिमित्तमिथ्यादर्शनविकल्पा अन्ये च संख्येया योज्याः, ऊह्याः । परिणामविकल्पात् असंख्येयाश्च भवंति । अनंताः, अनुभागभेदाद्यनैसर्गिकं मिथ्यादर्शनं तदप्येकद्वित्रिचतुरिंद्रियासंज्ञिपंचेंद्रियसंज्ञितिर्यङ्म्लेच्छशबरपुलिंदादिपरिग्रहादनेकविध ।

पंचविधं वा ॥ २८ ॥ अथवा पंचविधं मिथ्यादर्शनमवगंतव्य—एकांतमिथ्यादर्शनं विपरीतमिथ्यादर्शन संशयमिथ्यादर्शनं वैनयिकमिथ्यादर्शनं आज्ञानिकमिथ्यादर्शनं चेति । तत्रेदमेवेत्थमेवेति धर्मिधर्मयोरभिनिवेश एकांतः, पुरुष एवेदं सर्वं इति वा । नित्य एव वा अनित्य एवेति सग्रन्थो निर्ग्रंथः, केवली कवलाहारी स्त्री सिद्ध्यतीत्येवमादिर्विपर्ययः । सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः किं स्याद्वा नवेति मतिद्वैतं संशयः । सर्वदेवतानां सर्वसमयानां च समदर्शनं वैनयिकत्वं । हिताहितपरीक्षाविरह आज्ञानिकत्वं ।

अविरतिकषाययोगा द्वादशपंचविंशतित्रयोदशभेदाः ॥ २९ ॥ अविरतिः कषायः योगः इत्येते द्वादश -पंचविंशति- त्रयोदश-भेदाः दृष्टव्याः । तत्र पृथिव्यप्तेजोवायुवनस्पतित्रसकायचक्षुःश्रोत्रघ्राणरसनस्पर्शननोइंद्रियेषु हननासंयमनाविरतिभेदात् द्वादशविधा अविरतिः । षोडश कषायाः नव नोकषायाः ईषद्भेदो नोभेद इति पंचविंशतिः कषायाः । चत्वारो मनोयोगाः चत्वारो वाग्योगाः, पंच काययोगाः इति त्रयोदशविकल्पो योगः । आहारककाययोगाऽऽहारकमिश्रयोगयोः प्रमत्तसंयते संभवात् पंचदशापि भवति ।

प्रमादोनेकविधिः ॥३०॥ भावकायविनयेर्यापथभैक्ष्यशयनासनप्रतिष्ठापनवाक्यशुद्धिलक्षणाष्टविधसंयमोत्तमक्षमामार्दवार्जवशौचसत्यतपस्त्यागाऽऽकिंचन्यब्रह्मचर्यादिविषयानुत्साहभेदादनेकविधः प्रमादोवसेयः ।

समुदायावयवयोर्बंधहेतुत्वं वाक्यपरिसमाप्तेर्वैचित्र्यात् ॥ ३१ ॥ मिथ्यादर्शनादीनां बंधहेतुत्वं समुदायेऽवयवे च वेदितव्यं । कुतः ? वाक्यपरिसमाप्तेर्वैचित्र्यात् । तत्र मिथ्यादृष्टेः पंचापि समुदिताः बंधहेतवः। सासादनसम्यग्दृष्टि–सम्यङ्मिथ्यादृष्टि–असंयतसम्यग्दृष्टीनामविरत्यादयश्चत्वारः। संयतासंयतस्याविरतिमिश्राः प्रमादकषाययोगाश्च । प्रमत्तसंयतस्य प्रमादकषाययोगाः। अप्रमत्तादीनां चतुर्णां कषाययोगौ। शांतक्षीणकषायसयोगकेवलिनां एक एव योगः। अयोगकेवली, अबंधहेतु। तत्र च मिथ्यादर्शनादिविकल्पानां प्रत्येकं बंधहेतुत्वमवगंतव्यं। न हि सर्वाणि मिथ्यादर्शनानि एकस्मिन्नात्मनि युगपत् संभवंति । नापि हिंसादयः सर्वे परिणामाः ।

अविरतेः प्रमादस्य चाविशेष इति चेन्न विरतस्यापि प्रमाददर्शनात् । ३२ ॥ स्यादेतत् प्रमादोपि, अविरतिरेवेति पृथग्ग्रहणमनर्थकमिति तन्न। किं कारणं ? विरतस्यापि प्रमाददर्शनात् विरतस्यापि पंचदशप्रमादाः संभवंति–विकथाकषायेंद्रियनिद्राप्रणयलक्षणाः ।

कषायाविरत्योरभेद इति चेन्न कार्यकारणभेदोपपत्तेः ।। ३३ ॥ स्यादेतत् कषायाविरत्योर्नास्ति भेदः उभयोरपि हिंसादिपरिणामरूपत्वादिति ? तन्न। किं कारणं? कार्यकारणभेदोपपत्तेः। कारणभूता हि कषायाः कार्यात्मिकाया हिंसाद्यविरतेरर्थांतरभूता इति ।

आह --प्रपंचेनोपपादितान् बंधहेतून्निरजेष्म इदं तु संदिह्मः, अमूर्तेरात्मनो हस्ताद्यसंभवे सत्यादानशक्तिविरहात् कथं संबंधो भवतीति ? इमे ब्रूमहे

आत्मकर्मसंबंधसंततेः पूर्वापरीभावानवधारणात् ॥ ३४ ॥ नैवमवधार्यते–पूर्वमात्मा पश्चात् कर्माणि प्राक् वा कर्माण्यवर आत्मेति ऐकांतिकाऽमूर्तत्वनिवृत्तिः ततः कार्मणशरीरसबंधात्तप्तायःपिंडाम इव–

सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्ते स बंधः ॥ २ ॥

पुनः कषायग्रहणमनुवाद इति चेन्न कर्मविशेषाशयत्वाचित्वात् जठराग्निवत् ॥ १ ॥ *यथा जठराग्न्याशयानुरूपमभ्यवहरणं तथा कषायेषु सत्सु तीव्रमंदमध्यमकषायाशयानुरूपे स्थित्यनुभवने भवत* इति एतस्य विशेषस्य प्रतिपत्त्यर्थं बंधहेतुविधाने कषायग्रहणं निर्दिष्टं पुनरनूद्यते ।

जीवाभिधानं प्रचोदितत्वात् ।। २ ॥ यच्चोदितममूर्तिरहस्तो जीवः कथं कर्मादत्त इति तस्य प्रतिवचनार्थं जीव इत्यभिधीयते।

जीवनाविनिर्मुक्तत्वाद्वा ।। ३ ।। जीवनमायुस्तदविनिर्मुक्तोयं कर्मादत्ते न विनिर्मुक्त इति, अतश्च जीववचनं ।

कर्मणो योग्यानिति पृथग्विभक्त्युच्चारणं वाक्यांतरज्ञापनार्थं ।। ४ ।। कर्मयोग्यानिति लघुनिर्देशात् सिद्धे कर्मणो योग्यानिति पृथग्विभक्त्युच्चारणं वाक्यान्तरज्ञापनार्थं क्रियते किं पुनस्तद्वाक्यांतरं ? कर्मणो जीवः सकषायो भवतीत्येकं वाक्यं । एतदुक्तं भवति कर्मण इति हेतुनिर्देशः, कर्मणो हेतोर्जीवः सकषायो भवति, नाकर्मकस्य कषायलेशोस्ति ततः जीवकर्मणोरनादिसंबंध इति । द्वितीयं वाक्यं–योग्यान् पुद्गलानादत्त इति एतदुक्तं भवति अर्थवशाद्विभक्तिपरिणाम इति प्राक्कर्मण इति हेतुनिर्देश इह संबंधनिर्देशः संपद्यते, सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलानादत्त इति ।

पुद्गलवचनं कर्मणस्तादात्म्यख्यापनार्थं ॥ ५ ॥ पुद्गलात्मकं कर्मेत्येतस्य विशेषस्य ख्यापनार्थं पुद्गलग्रहणं क्रियते ।

तदसिद्धमिति चेन्नामूर्तेरनुग्रहोपघाताभावात् ।। ६ ॥ स्यादेतत् पौद्गलिकं कर्मेत्येतदसिद्धं आत्मगुणत्वात् तस्येति ? तन्न । किं कारणं ? अमूर्तेरनुग्रहोपघाताभावात् । यथाऽऽकाशममूर्ति दिगादीनाममूर्तानां नानुग्राहकं उपघातकं च तथैवामूर्ति कर्मामूर्तेरात्मनोनुग्राहकोपघातयोर्हेतुर्न स्यात् ।

आदत्त इति प्रतिज्ञातोपसंहारार्थं ॥ ७ ॥ यत्प्रतिज्ञातं सकषायत्वाज् जीवो बंधमनुभवति इति तस्योपसंहारार्थं इदमुच्यते आदत्त इति ।

अतस्तदुपश्लेषो बंधः ॥ ८ ॥ अतो मिथ्यादर्शनाद्यावेशादार्द्रीकृतस्यात्मनः सर्वतो योगविशेषात् तेषां सूक्ष्मैकक्षेत्रावगाहिनां अनंतप्रदेशानां पुद्गलानां कर्मभावयोग्यानामविभागेनोपश्लेषो बंध इत्याख्यायते ।

तद्भावो मदिरापरिणामवत् ॥ ९ ॥ यथा भाजनविशेषे प्रक्षिप्तानां विविधरसबीजपुष्पफलानां मदिराभावेन परिणामः तथा पुद्गलानामपि आत्मनि स्थितानां योगकषायवशात् कर्मभावेन परिणामो वेदितव्यः ।

सवचनमन्यनिवृत्त्यर्थं ॥ १० ॥ स एष बंधो नान्योऽस्तीत्यन्यनिवृत्त्यर्थं सवचनं क्रियते तेन गुणिगुणबंधो निवर्तितो भवति । यदि हि गुणिगुणबंधः स्यात् मुक्त्यभावः प्रसज्येत, गुणस्वभावापरित्यागाद् गुणिनः, स्वभावपरित्यागे च गुणिनोऽप्यभाव इति मुक्त्यभावः ।

करणादिसाधनेष्वयं बंधशब्दो द्रष्टव्यः ॥ ११ ॥ तत्र करणसाधनस्तावत् बध्यतेऽनेनात्मेति बंधः । "हल" इति करणे घञ् । कः पुनरसौ मिथ्यादर्शनादिः । ननु स बंधहेतुरुक्तः कथं बंधो भवितुमर्हति सत्यमेवमेतत् अभिनवद्रव्यकर्मादाननिमित्तत्वाद् बंधहेतुरपि सन् पूर्वोपात्तकर्महेतुकत्वात् कार्यतामास्कंदन् तदनुविधानात् आत्मनोऽस्वतंत्रीकरणत्वात् करणव्यपदेशमर्हतीति तदनेनात्मनात्मसात्क्रियते इति कर्मसाधनत्वमपि च युक्तिमत् ज्ञानदर्शनाव्याबाधानामगोत्रानंतरायस्वलक्षणं पुरुषसामर्थ्यं प्रतिबध्नाति बंधः इति कर्तृसाधनत्वमपि चोपपत्तिमत् एवं बंध इति भावसाधनो वास्वतंत्रीक्रियामात्रविवक्षायां । ननु भावसाधने सामानाधिकरण्यं नोपपद्यते ज्ञानावरणं बंध इति नैष दोषः तदव्यतिरेकात् भावस्य तद्गता सामानाधिकरण्यं भवति । यथ ज्ञानमेवात्मेति । एवमितरसाधनयोजना च कर्तव्या ।

तस्योपचयापचयसद्भावः कर्माऽऽपव्ययदर्शनाद्व्रीहिकोष्ठागारवत् ॥ १२ ॥ यथा कोष्ठागारे व्रीहिणामन्येषां निर्गमादपरेषां च प्रवेशनात् उपचयापचयौ दृष्टौ तथानादिकार्मणकोष्ठागारस्यान्येषां कर्मणां भोगादानदानाच्चेतरेषामुपचयापचयौ स्तः ।

आह किमयं बंध एकरूप एव आहोस्वित् प्रकारा अपि अस्य संतीत्यत इदमाह—

प्रकृतिस्थित्यनुभव (भाग) प्रदेशास्तद्विधयः ॥ ३ ॥

अकर्तरीत्यनुवृत्तेरपादानसाधना प्रकृतिः ॥ १ ॥ स्त्रियां क्तिरित्यत्र अकर्तरीत्यनुवर्तते तस्मादपादाने प्रकृतिशब्दो व्युत्पाद्यते प्रक्रियते अस्या ज्ञानावरणादेरर्थानवगमादिति प्रकृतिः ।

भावसाधनौ स्थित्यनुभवौ ॥ २ ॥ स्थानं स्थितिः अनुभवनमनुभव इति भावसाधनत्वमनयोरवगंतव्य ।

कर्मसाधनः प्रदेशशब्दः ॥ ३ ॥ प्रदिश्यतेऽसाविति प्रदेशः कर्मणि घञ् ।

प्रकृतिः स्वभाव इत्यनर्थांतरं ॥ ४ ॥ यथा निंबस्य का प्रकृतिः तिक्ततास्वभावः । गुडस्य का प्रकृतिः मधुरतास्वभावः । तथा ज्ञानावरणीयस्य का प्रकृतिः अर्थानवगमः । प्रकृतिः स्वभाव इत्यनर्थांतरं । एवं दर्शनावरणस्य अर्थानालोचनं, वेद्यस्य सदसल्लक्षणस्य सुखदुःखसंवेदन, दर्शनमोहस्य तत्त्वार्थाश्रद्धानं, चारित्रमोहस्याऽसंयमः परिणामः, आयुषो भवधारणं, नाम्नो नारकादिनामकरणं, गोत्रस्य उच्चैर्नीचैः स्थानसंशब्दनं, अंतरायस्य दानादिविघ्नकरण तदेवं लक्षणं कार्यं प्रक्रियते प्रभवत्यस्या इति प्रकृतिः ।

तत्स्वभावाप्रच्युतिः स्थितिः ॥ ५ ॥ तस्य स्वभावस्य अप्रच्युतिः स्थितिरित्युच्यते । यथा अजागोमहिष्यादिक्षीराणां माधुर्यस्वभावादच्युतिः स्थितिः । तथा ज्ञानावरणादीनामर्थानवगमादिस्वभावादच्युतिः स्थितिः ।

तद्रसविशेषोनुभवः ॥ ६ ॥ यथा–अजागोमहिष्यादिक्षीराणां तीव्रमंदादिभावेन रसविशेषः तथा कर्मपुद्गलानां स्वगतसामर्थ्यविशेषोनुभव इति कथ्यते ।

इयत्तावधारणं प्रदेशः ॥ ७ ॥ कर्मभावपरिणतपुद्गलस्कंधानां परमाणुपरिच्छेदेनावधारणं प्रदेश इति व्यपदिश्यते ।

विधिशब्दः प्रकारवचनः ॥ ८ ॥ अयं विधिशब्दः प्रकारवचनो द्रष्टव्यः विधयः प्रकारा इति । यावत् तस्य विधयस्तद्विधय बंधप्रकारा इत्यर्थः । त एते प्रकृत्यादयश्चत्वारो बंधप्रकाराः ।

तत्र योगनिमित्तौ प्रकृतिप्रदेशौ ॥ ९ ॥ तेषु बंधविकल्पेषु प्रकृतिबंधः प्रदेशबंध इत्येतौ द्वौ योगनिमित्तौ वेदितव्यौ ।

स्थित्यनुभवौ कषायहेतुकौ ॥ १० ॥ स्थितिबंधोनुभवबंध इत्येतौ द्वावपि कषायहेतुकौ प्रत्येतव्यौ तत्प्रकर्षाप्रकर्षभेदात् तद्बंधविचित्रभावः । कारणानुरूपं हि कार्यमिति ।

आद्यो द्वेधा मूलोत्तरप्रकृतिभेदात् ॥ ११ ॥ आद्यः प्रकृतिबंधः द्वेधा विभज्यते । कुतः ? मूलोत्तरप्रकृतिभेदात् । यद्येवं कास्ता मूलप्रकृतय इत्यत्रोच्यते—

आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रांतरायाः ॥४॥

सामानाधिकरण्ये सति पूर्वोत्तरवचनविरोध इति चेन्नोभयनयधर्मविवक्षासद्भावात् ॥१॥ स्यादेतत् ज्ञानावरणादयोंतरायांता प्रकृतिबंधो नान्य इति ज्ञानावरणादिभिः सामानाधिकरण्यात् आद्यशब्दस्य बहुवचनप्रसंग इति ? तन्न किं कारणं ? उभयनयधर्मविवक्षासद्भावात् । द्रव्यार्थिकनयविषयस्य सामान्यस्य विवक्षातः प्रकृतिबंध एक इत्याद्यशब्दादेकवचनप्रयोगः कृतः, तस्य विशेषा ज्ञानावरणादयः पर्यायार्थिकनयविषयभूताः प्राधान्येन विवक्षिताः इति तेभ्य. बहुवचनप्रयोगः कृतः । दृश्यते हि लोके सत्यपि सामानाधिकरण्ये वचनभेदः । यथा प्रमाणं श्रोतारः, गावो धनमिति ।

यथासंभवं कर्त्रादिसाधनत्वं ज्ञानावरणादिशब्दानां ॥ २ ॥ ज्ञानावरणादयः शब्दाः कर्त्रादिषु यथासंभवं साधयितव्याः । तद्यथा—आवृणोति आव्रियतेऽनेन वा इत्यावरणं, आवरणशब्दः प्रत्येकं परिसमाप्यते ज्ञानावरणं दर्शनावरणमिति । ननु करणाधिकरणयोरनट् , कथं कर्तरि ? बहुलापेक्षया । वेद्यत इति वेदनीयं "कर्मण्यनीयः" मोहयति मुह्यतेऽनेनेति वा मोह., कथं ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमिति ! बहुलापेक्षया कर्त्तर्यनीयः । एत्यनेन गच्छति नारकादिभवमित्यायुः । जनेरुसिनि प्रकृते, एतेर्णिच्चेत्युसिः । नमयत्यात्मानं नारकादिभावेन नम्यतेनेनेति नाम, उणादिषु निपातितः शब्दः । उच्चैर्नीचैश्च गूयते शब्द्यतेनेनेति गोत्रं । अंतरं मध्यं दातृदेयादीनामंतरं मध्यमेति ईयते वानेनेत्यंतरायः ।

बहिर्योगे वा ॥ ३ ॥ यस्मिन् मध्येऽवस्थिते दात्रादीनां दानादिक्रियाभावः, दानादीच्छाया बहिर्भावो वा सोंतरायः ।

प्रयोगपरिणामादागच्छदेवाऽविशिष्टं कर्माऽऽवरणादिविशेषैर्विभज्यते अन्नादेर्वाता॒दिविकारवत् ॥ ४ ॥ यथाऽन्नादेरभ्यवह्रियमाणस्यानेकविकारसमर्थवातपित्तश्लेष्मखलरसभावेन परिणामविभागः तथा प्रयोगापेक्षानंतरमेव कर्माण्यावरणानुभवनमोहापादानभवधारणनानाजातिनामगोत्रव्यवच्छेदकरणसामर्थ्यवैश्वरूप्येणाऽऽत्मनि सन्निदानं प्रतिपद्यंते ।

ज्ञानावरणमेव मोह इति चेन्नार्थांतरभावात् ॥ ५ ॥ स्यादेतत् सति मोहे हिताहितपरीक्षणाभावात् ज्ञानावरणादविशेषो मोहस्येति तन्न । किं कारणं ? अर्थांतरभावात् । याथात्म्यमर्थस्यावगम्यापि इदमेवेति सद्भूतार्थाश्रद्धानं, यतः स मोहः । ज्ञानावरणेन ज्ञानं तथान्यथा वा न गृह्णाति ।

कार्यभेदे च कारणान्यत्वात् ॥ ६ ॥ यथा भिन्नलक्षणांकुरदर्शनात् बीजकारणान्यत्वं तथैवा-ज्ञानचारित्रमोहकार्यांतरदर्शनात् ज्ञानावरणमोहनीयकारणभेदोऽध्यवसीयते ।

ज्ञानदर्शनयोरन्यत्वं प्रयुक्तं ॥ ७ ॥ ज्ञानदर्शनयोरन्यत्वं पुरस्ताद्विहितं अतः किं ? ज्ञानदर्शन कार्यान्यत्वात् यत् क्षयक्षयोपशमकरणे ज्ञानदर्शने तयोरपि ज्ञानदर्शनावरणयोरन्यत्वं सिद्धं ।

ज्ञानावरणस्याविशेषेपि प्रत्यास्रवं मत्यादीनामविशेषो जलवत् ॥ ८ ॥ यथांभो नभसः पत-देकरसं भाजनविशेषात् विष्वग् रसत्वेन विपरिणमते । तथा ज्ञानशक्त्युपरोधस्वभावविशेषात् उपनिपतत् कर्म प्रत्यास्रवं सामर्थ्यभेदात् मत्याद्यावरणभेदेन व्यवतिष्ठते ।

एतेनेतराणि व्याख्यातानि ॥ ९ ॥ इतराणि दर्शनावरणादीनि मूलोत्तरप्रकृतिविकल्पवंति उक्ते-नैव क्रमेण व्याख्यातानि भवंति । अत्र चोद्यते—

पुद्गलद्रव्यस्यैकस्यावरणसुखदुःखादिनिमित्तत्वानुपपत्तिर्विरोधात् ॥ १० ॥ एकस्य पुद्गल द्रव्यस्यावरणसुखदुःखादिनिमित्तत्वं नोपपद्यते कुतः ? विरोधात् ।

न वा तत्स्वाभाव्यादग्नेर्दाहपाकप्रतापप्रकाशसामर्थ्यवत् ॥ ११ ॥ न वैष दोषः । किं कारणं ? तत्स्वाभाव्यात् । यथाग्नेरेकस्यापि दाहपाकप्रतापप्रकाशसामर्थ्यं न विरुध्यते, तथैकस्यापि पुद्गलद्रव्यस्यावर-णसुखदुःखादिनिमित्तत्वं न विरुध्यते । किंच—

अनेकांतिकत्वात् ॥ १२ ॥ एकानेकलक्षणत्वात् द्रव्यस्य स्यादेकत्वं स्यादनेकत्वं । द्रव्यार्थादेशात् स्यादेकं पुद्गलद्रव्यं । अनेकपरमाणुस्निग्धरूक्षबंधापादितानेकात्मकस्कंधपर्यायार्थादेशात् स्यादनेकं ततश्च नास्ति विरोधः ।

पराभिप्रायेणेंद्रियाणां भिन्नजातीयानां क्षीराद्युपयोगे वृद्धिवत् ॥ १३ ॥ पराभिप्रायेणे दमुच्यते यथा पृथिव्यप्तेजोवायुभिरारब्धानामिंद्रियाणां भिन्नजातीयानां क्षीरघृतादिष्वेकमप्युपयुज्यमानं अनुग्राहकं दृष्टं तथेदमपि इति ।

वृद्धिरेकैवेति चेन्न प्रतींद्रियवृद्धिभेदात् ॥१४॥ स्यादेतत् वृद्धिरेकैव, तस्या घृताद्यनुग्राहकमिति न विरोध इति ? तन्न किं कारण ? प्रतींद्रियवृद्धिभेदात् । यथैवेंद्रियाणि भिन्नानि तथैवेंद्रियवृद्धयोपि भिन्नाः ।

तथैवातुल्यजातीये नानुग्रहसिद्धिः ॥ १५ ॥ तथा भिन्नजातीयेन क्षीरेण तेजोजातीयस्य चक्षुषोनुग्राहः । तथैवात्मकर्मणोश्चेतनाचेतनत्वात् अतुल्यजातीयं कर्मात्मनोनुग्राहकमिति सिद्धं । किमेता वानेव सङ्ख्याविकल्पः ? नेत्युच्यते—

एकादिसंख्येयविकल्पश्च शब्दतः ॥ १६ ॥ एकादयः संख्येयविकल्पा भवंति शब्दतः तत्रैक स्तावत् समादानकर्मबंधः विशेषाणामविवक्षितत्वात्—

सेनावनवत् ॥१७॥ यथा सैनिकानां तुरगादीनां भेदानां अविवक्षायां समुदायादेशात् एका सेना। यथा वा अशोकतिलकबकुलादीनां भेदेनाविवक्षायां सामान्यादेशात् एकं वनं । स एव पुण्यपापभेदाद्विविधः । यथा स्वामिभृत्यादेशात् द्विविधा सेना । त्रिविधो बंधः अनादिः सांतः । अनादिरनंतः । सादिः सांतश्चेति । भुजाकाराल्पतरावस्थितभेदाद्वा प्रकृतिस्थित्यनुभवप्रदेशाच्चतुर्विधः, द्रव्यक्षेत्रकालभवभावनिमित्तभेदात् पंच-विधः । षड्जीवनिकायविकल्पात् षोढा व्यपादिश्यते । रागद्वेषमोहक्रोधमानमायालोभहेतुभेदात् सप्ततयीं वृत्तिमनुभवति । ज्ञानावरणादिविकल्पादष्टधा, एवं संख्येया विकल्पाः शब्दतो योज्याः । चशब्देनाध्यवसाय स्थानविकल्पात् असंख्येयाः । अनंतानंतप्रदेशस्कंधपरिणामाविधिरनंतः । ज्ञानावरणाद्यनुभवाविभागपरिच्छे-दापेक्षया वा अनंतः ।

क्रमप्रयोजनं ज्ञानेनात्मनोधिगमात् ॥ १८ ॥ क्रमप्रयोजनमिदानीं वक्तव्यं तदुच्यते ज्ञानावरणं सर्वेषामादावुक्तं कुतः ज्ञानेनात्मनोधिगमात्। ज्ञानं हि स्वाधिगमनिमित्तत्वात् प्रधानं।

ततो दर्शनावरणमनाकारोपलब्धेः ॥१९॥ ततः पश्चात् दर्शनावरणमुच्यते कुतः अनाकारोपलब्धेः साकारोपयोगाद्धि अनाकारोपयोगो निकृष्टोऽनभिव्यक्तग्रहणात्। उत्तरेभ्यस्तु प्रकृष्यते अर्थोपलब्धितंत्रत्वात्

तदनंतरं वेदनावचनं तदव्यभिचारात् ॥ २० ॥ तदनंतरं वेदना उच्यते कुतस्तदव्यभिचारात् ज्ञानदर्शनाऽव्यभिचारिणी हि वेदना घटादिष्वप्रवृत्तेः।

ततो मोहाभिधानं तद्विरोधात् ॥ २१ ॥ ततः पश्चात् मोहोभिधीयते कुतस्तद्विरोधात्। तेषां ज्ञानदर्शनसुखदुःखानां विरोधात्। मूढो हि न जानाति न पश्यति न च सुखदुःखं वेदयते। ननु च मूढानामपि सुखदुःखज्ञानदर्शनानि उपलभ्यंते। यदि हि विरोधः स्यात् सुखदुःखज्ञानदर्शनानि मिथ्यादृष्ट्यसंयतानां न स्युः। नैष दोषः क्वचिद्विरोधात् इत्युच्यते—न सर्वत्र मोहाभिभूतस्य हि कस्यचित् हिताहितविवेकादिर्नास्ति।

आयुर्वचनं तत्समीपे तन्निबंधनत्वात् ॥ २२ ॥ तत्समीपे आयुर्वचनं क्रियते कुतस्तन्निबंधनत्वात्। आयुर्निबंधनानि हि प्राणिनां सुखादीनि।

तदनंतरं नामवचनं तदुदयापेक्षत्वात् प्रायोनामोदयस्य ॥ २३ ॥ तदनंतरं नाम वचनं क्रियते कुतः? तदुदयापेक्षत्वात् प्रायो नामोदयस्य। आयुरुदयापेक्षोहि प्रायेण गत्याद्युदयो लक्ष्यते।

ततो गोत्रवचनं प्राप्तशरीरादिलाभस्य संशब्दनाभिव्यक्तेः ॥ २४ ॥ परिप्राप्तशरीरादिलाभस्य हि पुंसः गोत्रोदयनिमित्तं शुभाशुभं संशब्दनं अभिव्यज्यते ततो नाम्नोनंतरं गोत्राभिधानं क्रियते।

परिशेषादंतेंतरायवचनं ॥ २५ ॥ अन्यस्याभावात् परिशेषात् अंते अंतरायवचनं क्रियते। आह उक्तो मूलप्रकृतिबंधोऽष्टविधः। अथ द्वितीयः पुनरुत्तरप्रकृतिबंधः कतिविध इत्यत्रोच्यते—

पंचनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपंचभेदोयथाक्रमं ॥ ५ ॥

पंचादीनां पंचांतानां द्वंद्वपूर्वोन्यपदार्थनिर्देशः ॥ १ ॥ पंच नव च द्वौ च अष्टाविंशतिश्च चत्वारश्च द्विचत्वारिंशच्च द्वौ च पंच च पंचनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपंच, ते भेदा यस्य स भवति पंचनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपंचभेदः, इति द्वंद्वगर्भोऽन्यपदार्थनिर्देशो वेदितव्यः।

द्वितीयग्रहणमिति चेन्न परिशेषात्सिद्धेः ॥ २ ॥ स्यादेतत् द्वितीयग्रहणं कर्तव्यं द्वितीय उत्तरप्रकृतिबंधः एवंभेद इति संप्रत्ययः कथं स्यात् इति ? तन्न किं कारणं ? परिशेषात् सिद्धेः। आद्यो मूलप्रकृतिबंधो व्याख्यातः, ततः परिशेषात् उत्तरप्रकृतिबंधसंप्रत्ययः सिद्ध्यति।

भेदशब्दः प्रत्येकं परिसमाप्यते ॥ ३ ॥ अयं भेदशब्दः प्रत्येकं परिसमाप्यते पंचभेदो नवभेदः इत्यादि।

यथाक्रमं यथानुपूर्वं ॥ ४ ॥ योयः क्रमः यथाक्रमं यथानुपूर्वमित्यर्थः पंचविधं ज्ञानावरणं नवविधं दर्शननावरणमित्यादि। यद्येवमाद्यमावरणं केषां पंचानामित्यत्रोच्यते—

मतिश्रुतावधिमनःपर्ययकेवलानां ॥ ६ ॥

मत्यादीन्युक्तलक्षणानि ॥ १ ॥ मत्यादीनि ज्ञानानि उक्तलक्षणानि वेदितव्यानि। क्व? आद्येऽध्याये।

मत्यादीनामिति पाठो लघुत्वादिति चेन्न प्रत्येकमभिसंबंधार्थत्वात् ॥ २ ॥ स्यान्मतं मत्यादीनि ज्ञानानि उक्तानि तेषामिहादिशब्दोपलक्षितानां पाठोप्युक्तो लघुत्वादिति ? तन्न किं कारणं ? प्रत्येक-

मभिसंबंधार्थ इह प्रतिपदं पाठः क्रियते। मतेरावरणं श्रुतस्यावरणमित्यादि। इतरथा हि मत्यादीनामित्युच्यमाने तेषामेकमावरणमिति संप्रत्ययः स्यात्।

वचनात् पंचसंख्याप्रतीतिरिति चेन्न प्रत्येकं पंचत्वप्रसंगात्॥ ३॥ स्यादेतत् पंच ज्ञानावरणस्योत्तरप्रकृतयः इत्युक्तं, मत्यादीनि च ज्ञानानि पंचोक्तानि ततो वचनात् पंचसंख्यासंप्रत्ययः इति? तन्न किं कारणं? प्रत्येकं पचत्वप्रसंगात्। वचनात् मत्यादीनां प्रत्येकं पंचावरणानीत्यनिष्टं प्रसज्येत। प्रतिपदग्रहणे पुनः सति सामर्थ्योदिष्टार्थसंप्रत्ययः शक्यते कर्तुं। अत्र कश्चिदाह—

मत्यादीनां सत्त्वासत्त्वयोरावृत्त्यभावः॥ ४॥ इदमिह संप्रधार्यं सतां मत्यादीनां कर्मावरणं भवेत् असतां चेति। किंचातः? यदि सतां प्राप्तात्मलाभत्वात् सत्त्वादेव आवृत्तिर्नोपपद्यते। अथासतां नन्वावरणाभावः। नहि खरविषाणवदसदाव्रियते।

न वादेशवचनात्॥ ५॥ न वैष दोषः। किं कारणं? आदेशवचनात्। कथंचित् सतामावरणं कथंचिदसतां। द्रव्यार्थादेशेन सतां मत्यादीनामावरणं। पर्यायार्थादेशेनासतां। यदैकांतेन सतामावरणं क्षायोपशमिकत्वमेषां न स्यात्। अथैकांतेनासतामेवमपि क्षायोपशमिकत्वं नोपपद्यते असत्त्वात्। सतश्चावरणदर्शनात्। सतो हि नभसः मेघपटलादिना आवरणं दृश्यते तथा सतां मत्यादीनां आवरणमिति को विरोधः।

अर्थांतरभावाच्च प्रत्याख्यानावरणवत्॥ ६॥ यथा न कुटीभूतं प्रत्याख्यानं नाम कश्चित् पर्यायोऽस्ति, यस्यावरणात् प्रत्याख्यानावरणत्वं भवेत् किंतु प्रत्याख्यानावरणसान्निध्यात् आत्माप्रत्याख्यानपर्यायेण नोत्पद्यत इति, अतः प्रत्याख्यानावरणस्य आवरणत्वं। तथा न कुटीभूतानि मत्यादीनि कानिचित् संति येषामावरणात् मत्याद्यावरणानां आवरणत्वं भवेत् किंतु मत्याद्यावरणसन्निधाने आत्मा मत्यादिज्ञानपर्यायैर्नोत्पद्यते इत्यतो मत्याद्यावरणानां आवरणत्वं। अपर आह—

अभव्यस्योत्तरावरणद्वयानुपपत्तिस्तदभावात्॥ ७॥ इदमिह संप्रधार्यं मनःपर्ययज्ञानगमनशक्तिः केवलप्राप्तिसामर्थ्यं चाभव्यस्य स्याद्वा न वेति? यदि स्यात्तस्याभव्यत्वानुपपत्तिः। अथ नास्ति तदुभयसामर्थ्याभावात् तदावरणकल्पना व्यर्थेति उत्तरस्यावरणद्वयस्य नोपपत्तिः?

नवोक्तत्वात्॥ ८॥ नैवेष दोषः किं कारणमुक्तत्वात्। उक्तमेतत्। आदेशवचनादिति। द्रव्यार्थादेशेन सतोर्मनःपर्ययकेवलज्ञानयोरावरणं। पर्यायार्थादेशेनासतोरपि चोक्तं–'अर्थांतराभावाच्च प्रत्याख्यानावरणवदिति'। यदि द्रव्यार्थादेशेन मनःपर्ययज्ञानं केवलज्ञानं चास्त्यभव्यस्य भव्यत्वमस्य, प्राप्नोति। न सम्यग्ज्ञानदर्शनचारित्रशक्तिभावाभावाभ्यां भव्याभव्यत्वं कल्प्यते। कथं तर्हि—

सम्यक्त्वादिव्यक्तिभावाभावाभ्यां भव्याभव्यत्वमिति विकल्पः कनकेतरपाषाणवत्॥९॥ यथा कनकभावव्यक्तियोगमवाप्स्यति इति कनकपाषाण इत्युच्यते तदभावादंधपाषाण इति। तथा सम्यक्त्वादिपर्यायव्यक्तियोगार्हो यः स भव्यः तद्विपरीतोऽभव्यः इति चोच्यते–

ज्ञानावरणादज्ञातिदुःखितः॥ १०॥ ज्ञानावरणोदयेनोपरतज्ञानसामर्थ्यः लुप्तस्मृतिधर्मश्रवणनिरुत्सुकः ज्ञानावमानकृतं च बहुदुःखमनुभवति। आह उक्तो ज्ञानावरणोत्तरप्रकृतिविकल्पः। इदानीं दर्शनावरणस्य वक्तव्य इत्यत आह—

चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानगृद्धयश्च॥ ७॥

चक्षुरादीनां दर्शनावरणसंबंधात् भेदनिर्देशः॥ १॥ चक्षुश्चाचक्षुश्चावधिश्च केवलं च चक्षुरचक्षुरवधिकेवलानि तेषां चक्षुरचक्षुरवधिकेवलानां दर्शनावरणानीति भेदनिर्देशः दर्शनावरणसंबंधाद्वेदितव्यः।

मदखेदक्लमविनोदार्थः स्वापो निद्रा ॥ २ ॥ मदखेदक्लमानां विनोदाय यः स्वापः स निद्रा इत्युच्यते कथं निपूर्वस्य द्रातेः कुत्साक्रियस्याङि निद्राशब्दनिष्पत्तिः । यत्सन्निधानादात्मा निद्रायते कुत्स्यते सा निद्रा । यतेर्वा स्वप्नक्रियस्य निद्रा ।

उपर्युपरि तद्वृत्तिर्निद्रानिद्रा ॥ ३ ॥ तस्या निद्राया उपर्युपरि पुनः पुनः वृत्तिः निद्रानिद्रा इत्युच्यते ।

प्रचलयत्यात्मानमिति प्रचला ॥ ४ ॥ या क्रिया आत्मानं प्रचलयति सा प्रचलेत्युच्यते । पचादिलक्षणे अचि । सा पुनः शोकश्रममदादिप्रभवा । विनिवृत्तेंद्रियव्यापारस्यांतः प्रीतिलवमात्रहेतुः आसीनस्यापि नेत्रगात्रक्रिया सूचिता ।

पौनःपुन्येन सैवाहिता वृत्तिः प्रचलाप्रचला ॥ ५ ॥ सैव प्रचला पुनः पुनरावर्तमाना प्रचलाप्रचलेत्युच्यते ।

स्वप्ने यया वीर्यविशेषाविर्भावः सा स्त्यानगृद्धिः ॥ ६ ॥ यत्सन्निधानाद्रौद्रकर्मकरणं बहुकर्मकरण च भवति सा स्त्यानगृद्धिः कथं स्त्यायतेरनेकार्थत्वात् स्वप्नार्थ इह गृह्यते । गृद्धेरपि दीप्तिः । स्त्याने स्वप्ने गृध्यति दीप्यते यदुदयादात्मा रौद्रं बहुकर्म करोति सा स्त्यानगृद्धिः ।

नानाधिकरणाभावात् वीप्सानुपपत्तिरिति चेन्न कालादिभेदतस्तद्भेदासिद्धेः ॥ ७ ॥ स्यान्मतं नानाधिकरणविषया वीप्सा न चेह नानाधिकरणत्वमस्ति एकात्मगोचरत्वात् ततो वीप्साभावात् असति द्वित्वे निद्रानिद्राप्रचलाप्रचलेति निर्देशो नोपपद्यत इति ? तन्न । किं कारणं ? कालादिभेदात् तद्भेदसिद्धेः । इह एकस्यापि वस्तुनः कालकृताद्गुणभेदाद् भेदो दृश्यते पटुर्भवान् पटुरासीत् पटुतर एव स इति । तथा देशकृतादपि–मथुरायां दृष्टः, पुनः पाटलीपुत्रे दृश्यमान उच्यते, अन्यत्र त्वमासि संपन्न इति । एवमिहापि कालादिभेदात् भेदोपपत्तेः वीप्सा युज्यते ।

आभीक्ष्ण्ये वा द्वित्वप्रसिद्धिः ॥ ८ ॥ अथवा मुहुर्मुहुर्वृत्तिराभीक्ष्ण्यं तस्य विवक्षायां द्वित्वं भवति यथा गेहमनुप्रवेशमास्त इति ।

निद्रादिकर्मसद्वेद्योदयात् निद्रादिपरिणामसिद्धिः ॥ ९ ॥ निद्रादिकर्मणः सद्वेद्यस्य चोदयात् निद्रादिपरिणामसिद्धिर्भवति तत्र हि शोकक्लमादिविगमदर्शनात् सद्वेद्योदयः स्फुटोवगंतव्यः । असद्वेद्यस्य च मंदोदयः ।

निद्रादीनामभेदेनाभिसंबंधः ॥ १० ॥ निद्रा च निद्रानिद्रा च प्रचला च प्रचलाप्रचला च स्त्यानगृद्धिश्च निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानगृद्धयः । अनुवर्तमानेन दर्शनावरणेनाभेदेनाभिसंबंधः क्रियते ।

निद्रादीनामभेदेनाभिसंबंधो विरोध इति चेन्न विवक्षातः संबंधात् ॥ ११ ॥ स्यादेतत् चक्षुरादीनां भेदानिर्देशः निद्रादीनामभेदानिर्देशः एकमेव दर्शनावरणमपेक्ष्य क्रियमाणो विरुद्ध इति ? तन्न । किं कारणं ? विवक्षातः संबंधात् विवक्षावशाद्धि भेदेनाभेदेन च संबंधो न विरुध्यते ।

अथ चक्षुरादिदर्शनावरणोदयात् आत्मा किमवस्थो भवति । अत्रोच्यते—

चक्षुरचक्षुर्दर्शनावरणोदयात् चक्षुरादींद्रियालोचनविकलः ॥ १२ ॥ चक्षुर्दर्शनावरणस्याचक्षुर्दर्शनावरणस्य चोदयात् आत्मा चक्षुरादींद्रियालोचनविकलो भवति एकेंद्रियभावेन विकलेंद्रियभावेन च पंचेंद्रियत्वेप्युपहतेंद्रियलोचनसामर्थ्यश्च भवति ।

अवधिदर्शनावरणोदयादवधिदर्शनविप्रमुक्तः ॥ १३ ॥ अवधिदर्शनावरणोदयादपेतावधिदर्शनः संपद्यते ।

केवलदर्शनावरणोदयादनाविर्भूतकेवलदर्शनः ॥ १४ ॥ केवलदर्शनावरणस्य कर्मण उदयात् अनाविर्भूतकेवलदर्शनः, अप्रत्यवसितसंसारोवतिष्ठते ।

निद्रानिद्रानिद्रोदयात्तमोमहातमोवस्था ॥ १५ ॥ निद्राया उदयात् तमोवस्था निद्रानिद्राया उदयात् महातमोवस्था संजायते ।

प्रचलाप्रचलाप्रचलोदयाच्चलनातिचलनभावः ॥ १६ ॥ प्रचलोदयादासीनो घूर्णमानश्चलनयनगात्रः पश्यन्नपि न पश्यति । प्रचलाप्रचलोदयादासीनोऽतिघूर्णमानः स्वन्यमानमपि शरनाराचादिभिः शिरोंगप्रत्यंगादि यत्किंचिन्न पश्यति । आह यत्तत्कर्म तृतीयगणनामवाप्तं तस्योत्तरप्रकृतिविकल्पो न निर्ज्ञात इत्यत्रोच्यते—

सदसद्वेद्ये ॥ ८ ॥

यस्योदयाद्देवादिगतिषु शारीरमानससुखप्राप्तिस्तत्सद्वेद्यं ॥ १ ॥ देवादिषु गतिषु बहुप्रकारजातिविशिष्टासु यस्योदयात् अनुगृहीतद्रव्यसंबंधापेक्षात् प्राणिनां शारीरमानसानेकविधसुखपरिणामस्तत्सद्वेद्यं । प्रशस्तं वेद्य सद्वेद्यं ।

यत्फलं दुःखमनेकविधं तदसद्वेद्यं ॥ २ । नारकादिषु गतिषु नानाप्रकारजातिविशेषावकीर्णासु कायिकं बहुविधं मानसं वातिदुःसह जन्मजरामरणप्रियविप्रयोगाप्रियसंयोगव्याधिवधबंधादिजनितं दुःखं यस्य फलं प्राणिनां तदसद्वेद्यं । अप्रशस्तं वेद्यं असद्वेद्यं । आह व्याख्याता वेदनीयस्य प्रकृतिबंधः । अथ खलु मोहनीयस्याष्टाविंशतिप्रभेदस्य किमाख्याः प्रकारा इत्यत्र ब्रूमः—

दर्शनचारित्रमोहनीयाकषायाकषायवेदनीयाख्यास्त्रिद्विनवषोडशभेदाः सम्यक्त्वमिथ्यात्वतदुभयान्यकषायकषायौ हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुंनपुंसकवेदाः अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाश्चैकशः क्रोधमानमायालोभाः ॥ ९ ॥

दर्शनादिभिस्त्रिद्विनवषोडशभेदानां यथासंख्येन संबंध- ॥ १ ॥ दर्शनादयश्चत्वारः त्र्यादयोऽपि तेषां यथासंख्येन संबंधो भवति—दर्शनमोहनीयं त्रिविधं चारित्रमोहनीयं द्विभेदं अकषायवेदनीयं नवविधं कषायवेदनीयं षोडशविधमिति ।

तत्र दर्शनमोहनीयं त्रिभेदं सम्यक्त्वमिथ्यात्वतदुभयानीति ॥ २ ॥ तत्र दर्शनमोहनीयं त्रिभेदमवगंतव्यं । कुतः सम्यक्त्वमिथ्यात्वतदुभयानि इति । तद्बंधं प्रत्येकं भूत्वा सत्कर्मापेक्षया त्रैविध्यमास्कंदति । तत्र यस्योदयात् सर्वज्ञप्रणीतमार्गपराङ्मुखः तत्त्वार्थश्रद्धाननिरुत्सुको हिताहितविभागासमर्थो मिथ्यादृष्टिर्भवति तन्मिथ्यात्वं । तदेव सम्यक्त्वं शुभपरिणामनिरुद्धस्वरसं यदौदासीन्येनावस्थितमात्मानं श्रद्धानं न निरुणद्धि । तद्वेदयमानः पुरुषः सम्यग्दृष्टिरित्यभिधीयते । तदेव मिथ्यात्वं प्रक्षालनविशेषात् क्षीणाक्षीणमदशक्तिकोद्रववत् सामिशुद्धस्वरसं तदुभयमित्याख्यायते सम्यङ्मिथ्यात्वमिति यावत्, यस्योदयादात्मनः अर्धशुद्धमदकोद्रवौदनोपयोगापादितमिश्रपरिणामवदुभयात्मको भवति परिणामः ।

चारित्रमोहनीयं द्वेधा कषायाकषायभेदात् ॥ ३ ॥ चारित्रमोहनीयं द्वेधा विभज्यते अकषायकषायभेदात् कषायप्रतिषेधप्रसंग इतिचेन्नेषदर्थत्वात् नञः । यथा अलोमिकांडका इति । नास्याः कच्छपवल्लोमाभावः किंतु छेदयोग्यलोमाभावेपि ईषत्प्रतिषेधादलोमिकेत्युच्यते तथा नोकषाया अकषायाः हास्यादय इति । नैषां सर्वथैवाकषायत्वं किंतु परोपष्टंभात् स्वतःप्रवृत्तेरीषत्प्रतिषेधः । यथा श्वा स्वाम्युपष्टंभात् प्रवृद्धबलः परजिघांसां प्रति वर्तते स्वामिनिवर्तनाच्च निवर्तते । तथा क्रोधादिकषायावष्टंभात् ईषत्प्रतिषेधे सति हास्या-

दीनां प्रवृत्तेः । क्रोधाद्यप्रवृत्तौ च निवृत्तेरकषायत्वं । कथमीषत्प्रतिषेधगतिरिति चेद्व्याख्यानतः ।

अकषायवेदनीयं नवविधं हास्यादिभेदात् ॥ ४ ॥ अकषायवेदनीयं नवविधं, कुतः ? हास्यादिभेदात् । तत्र यस्योदयात् हास्याविर्भावस्तद्धास्य । यदुदयाद्देशादिष्वौत्सुक्यं सा रतिः । अरतिस्तद्विपरीता । यद्विपाकः शोचनं स शोकः । यदुदयादुद्वेगः तद्भयं सप्तविधं । कुत्साप्रकारो जुगुप्सा । यद्येवं कुत्साग्रहणमेवास्तु लघुत्वात् ? न अर्थविशेषोपपत्तेः। आत्मीयदोषसंवरणं जुगुप्सा। परकीयकुलशीलादिदोषाविष्करणावक्षेपभर्त्सनप्रवणा कुत्सा । यस्योदयात् स्त्रैणान् भावान् मार्दवास्फुटत्वक्लैब्यमदनावेशनेत्रविभ्रमास्फालनसुखपुंस्कामादीन् प्रतिपद्यते स स्त्रीवेदः । तस्योद्भूतवृत्तित्वमितरयोः पुंनपुंसकयोः सत्कर्मद्रव्यावस्थानान्यभावः । ननु लोके प्रतीत योनिमृदुस्तनादि स्त्रीवेदलिंग ? न तस्य नामकर्मोदयनिमित्तत्वात्, अतः पुंसोपि स्त्रीवेदोदयः । कदाचिद्योषितोपि पुंवेदोदयोप्याभ्यंतरविशेषात् । शरीराकारस्तु नामकर्मनिर्वर्तितः । एतेनेतरौ व्याख्यातौ । यस्योदयात् पौंस्नान् भावानास्कंदति स पुंवेदः । यत्कर्मोदयात् नपुंसकान् भावान् प्रव्रजति स नपुंसकवेदः ।

कषायवेदनीयं षोडशविधं अनंतानुबंध्यादिविकल्पात् ॥ ५ ॥ कषायवेदनीयं षोडशविधं द्रष्टव्यं, कुतः ? अनंतानुबंध्यादिविकल्पात् । तद्यथा कषायाः क्रोधमानमायालोभाः । स्वपरोपघातनिरनुग्रहाहितक्रौर्यपरिणामोऽमर्षः क्रोधः, स चतुःप्रकारः पर्वतपृथ्वीवालुकोदकराजितुल्यः । जात्याद्युत्सेकावष्टंभात् पराप्रणतिर्मानः शैलस्तंभास्थिदारुलतासमानश्चतुर्विधः । परातिसंधानतयोपहितकौटिल्यप्रायः प्रणिधिर्माया प्रत्यासन्नवंशपर्वोपचितमूलमेषशृंगगोमूत्रिकावलेखनीसदृशी चतुर्विधा । अनुग्रहप्रवणद्रव्याद्यभिकांक्षावेशो लोभः कृमिरागकज्जलकर्दमहरिद्रारागसदृशश्चतुर्विधः । तेषां क्रोधमानमायालोभानां चतस्रोवस्थाः— अनंतानुबंधिनः अप्रत्याख्यानावरणाः प्रत्याख्यानावरणाः संज्वलनाश्चेति । अनंतसंसारकारणत्वान्मिथ्यादर्शनमनंतं तदनुबंधिनोऽनंतानुबंधिक्रोधमानमायालोभाः । यदुदयाद्देशविरतिसंयमासंयमाख्यामल्पामपि कर्तुं न शक्नोति ते देशप्रत्याख्यानमावृण्वंतः अप्रत्याख्यानावरणाः क्रोधमानमायालोभाः । यदुदयाद्विरतिं कृत्स्नां संयमाख्यां न शक्नोति कर्तुं ते कृत्स्नं प्रत्याख्यानमावृण्वंतः प्रत्याख्यानावरणाः क्रोधमानमायालोभाः । समेकीभावे वर्तते संयमेन सहावस्थानादेकीभूताः ज्वलंति संयमो वा ज्वलति एतेषु सत्स्वपीति संज्वलनाः क्रोधमानमायालोभाः । त एते समुदिताः षोडश कषाया भवंति । आह व्याख्यातमष्टाविंशत्युत्तरप्रकृतिभेदं मोहनीयमथायुषश्चतुर्विधस्य को नामनिर्देश इत्यत्रोच्यते —

नारकतैर्यग्योनमानुषदैवानि ॥ १० ॥

नारकादिषु भवसंबंधेनायुर्व्यपदेशः ॥ १ ॥ नारकादिषु भवसंबंधेनायुषो व्यपदेशो भवति । नरकेषु भवं नारकं तिर्यग्योनौ भवं तैर्यग्योनं मनुष्येषु भवं मानुषं देवेषु भवं दैवमिति ।

यद्भावाभावयोर्जीवितमरणं तदायुः ॥ २ ॥ यस्य भावात् आत्मनः जीवितं भवति यस्य चाभावात् मृत इत्युच्यते तद्भवधारणमायुरित्युच्यते ।

अन्नादि तन्निमित्तं इति चेन्न तस्योपग्राहकत्वात् ॥ ३ ॥ स्यादेतदन्नादि तन्निमित्तं तल्लाभालाभयोर्जीवितमरणदर्शनादिति ? तन्न किं कारणं ? तस्यानुग्राहकत्वात् । यथा घटभवने मृत्पिंडो मूलकारणं तस्योपग्राहकं दंडादि तथाभ्यंतरं भवधारणस्य कारणमायुः, अन्नादि तस्योपग्राहकं, अतश्चैतदेवं यत्क्षीणायुषोऽन्नादिसन्निधानेपि मरणं दृश्यते ।

देवनारकेषु चान्नाद्यभावात् ॥ ४ ॥ देवेषु नारकेषु चान्नाद्यभावात् भवधारणमायुरधीनमेवेत्यवसेयं । तेषां हि कादाचित्क आहारोऽनाभोगो व्याख्यातः ।

---

१ अनुग्रहप्रवणद्रवणद्रव्याकांक्षावेशः पाठोयं ख. पुस्तके ।

नरकेषु तीव्रशीतोष्णवेदनेषु यन्निमित्तं दीर्घजीवनं त[illegible] नारकायुः ॥ ५ ॥ नरकेषु तीव्र-शीतोष्णवेदनाकरेषु यन्निमित्तं दीर्घजीवनं भवधारणं भवति तन्नारकायुः ।

क्षुत्पिपासाशीतोष्णादिकृतोपद्रवप्रचुरेषु तिर्यक्षु यस्यो[illegible]दयाद्वसनं तत्तैर्यग्योनं ॥ ६ ॥ क्षुत्पिपासाशीतोष्णदंशमशकादिविविधव्यसनविधेयीकृतेषु तिर्यक्षु [illegible] यस्योदयाद्वसनं भवति तत्तैर्यग्योनमायुरवगंतव्यं ।

शारीरमानुषसुखदुःखभूयिष्ठेषु मनुष्येषु जन्मोदया[illegible]त् मनुष्यायुषः ॥ ७ ॥ शारीरेण मानसेन च सुखदुःखेन समाकुलेषु मनुष्येषु यस्योदयाज्जन्म भव[illegible]ति तन्मानुषमायुरवसेयं ।

शारीरमानससुखप्रायेषु देवेषु जन्मोदयात् देवायुषः ॥ ८ ॥ शारीरेण मानसेन च सुखेन प्रायः समाविष्टेषु देवेषु यस्योदयाज्जन्म भवति तद्दैवमायुरवगंतव्यं । क[illegible]चित् प्रियाविप्रयोगात् महर्द्धिदेवनिरीक्षणात् च्यवनलिंगाज्ञाहानिमालाभूषाम्लानदर्शनाच्च मानसं दुःखमा[illegible]र्भवतीति ज्ञापनार्थं प्रायग्रहणं । आह व्याख्यातमायुश्चतुर्विधं तदनंतरमुद्दिष्टं यन्नामकर्म तदुत्तरप्रकृतिसमाख्याः क[illegible] इत्यत्रोच्यते ।

गतिजातिशरीरांगोपांगनिर्माणबंधनसंघातसंस्थानसंहननस्पर्शरस[illegible]गंध-वर्णानुपूर्व्यागुरुलघूपघातपरघातातपोद्योतोच्छ्वासविहायोगतयः प्रत्ये-कशरीरत्रससुभगसुस्वरशुभसूक्ष्मपर्याप्तिस्थिरादेययशस्कीर्तिसेतराणि तीर्थकरत्वं च ॥ ११ ॥

यदुदयादात्मा भवांतरं गच्छति सा गतिः ॥ १ ॥ यस्य कर्मण उदयवशात् आत्मा भवांतरं प्रत्यभिमुखो व्रज्यामास्कंदति सा गतिः, गम्यत इति गतिरित्युच्यमानेपि रूढिवशात् कस्मिंश्चिद्गतिविशेषे वर्तते गोशब्दप्रवृत्तिवत् । इतरथा हि यदात्मा न गच्छति न तदा गतिर्भवेत् सत्कर्मावस्थायां च गति-व्यपदेशो न स्यात् । सा चतुर्विधा नरकगतिस्तिर्यग्गतिर्मनुष्यगतिर्देवगतिश्चेति । यन्निमित्त आत्मनो नारकभावः तन्नरकगतिनाम एवं शेषेष्वपि योज्यं ।

तत्राव्यभिचारिसादृश्यैकीकृतोऽर्थात्मा जातिः ॥ २ ॥ तासु नारकादिगतिषु अव्यभिचारिणा सादृश्येन एकीकृतोर्थात्मा जातिरिति व्यपदेशमर्हति । तन्निमित्तं जातिनाम तत्पंचविधं—एकेंद्रियजाति-नाम द्वींद्रियजातिनाम त्रींद्रियजातिनाम चतुरिंद्रियजातिनाम पंचेंद्रियजातिनाम चेति । यदुदयादात्मा एकेंद्रिय इति शब्द्यते तदेकेंद्रियजातिनाम एव शेषेष्वपि योज्यं ।

यदुदयादात्मनः शरीरनिर्वृत्तिस्तच्छरीरनाम ॥ ३ ॥ यस्योदयादात्मनः शरीरनिर्वृत्तिर्भवति तच्छरीरनाम । तत्पंचविधं—औदारिकशरीरनाम वैक्रियिकशरीरनाम आहारकशरीरनाम तैजसशरीरनाम कार्मणशरीरनाम चेति । तेषां विशेषो व्याख्यातः ।

यदुदयादंगोपांगविवेकस्तदंगोपांगनाम ॥ ४ ॥ यस्योदयाच्छिरःपृष्ठोरुबाहूदरनालकपाणिपा-दानामष्टानामंगानां तद्भेदानां च ललाटनासिकादीनां उपांगानां विवेको भवति तदंगोपांगनाम । तत्त्रिविधं औदारिकशरीरांगोपांगनाम वैक्रियिकशरीरांगोपांगनाम आहारकशरीरांगोपांगनाम चेति ।

यन्निमित्ता परिनिष्पत्तिस्तन्निर्माणं ॥ ५ ॥ अंगोपांगानां यन्निमित्ता परिनिष्पत्तिस्तन्नि-र्माणमिति ज्ञायते तद्विविधं स्थाननिर्माणं प्रमाणनिर्माणं चेति । तज्जातिनामकर्मोदयापेक्षं चक्षुरादीनां स्थानं प्रमाणं च निर्वर्तयति । निर्मीयतेऽनेन इति हि निर्माणं ।

---

१ बाहूदरनलकेति पाठांतरं ग. पुस्तके ।

शरीरनामकर्मोदयोपात्तानां यतोऽन्योन्यसंश्लेषणं तद्बंधनं ॥ ६ ॥ शरीरनामकर्मोदयवशादुपात्तानां पुद्गलानामन्योन्यप्रदेशसंश्लेषणं यतो भवति तद्बंधनमित्याख्यायते । तस्याभावे शरीरप्रदेशानां दारुनिचयवत् असंपर्कः स्यात् ।

अविवरभावेनैकत्वकरणं संघातनामकर्म ॥ ७ ॥ यदुदयादौदारिकादिशरीराणां विवरविरहितान्योन्यप्रदेशानुप्रवेशेनैकत्वापादनं भवति तत्संघातनाम ।

यद्धेतुका शरीराकृतिनिर्वृत्तिस्तत्संस्थाननाम ॥ ८ ॥ यदुदयादौदारिकादिशरीराकृतिनिर्वृत्तिर्भवति तत्संस्थाननाम प्रत्येतव्यं । तत् षोढा प्रविभज्यते समचतुरस्रसंस्थाननाम, न्यग्रोधपरिमंडलसंस्थाननाम, स्वातिसंस्थाननाम, कुब्जकसंस्थाननाम, वामनसंस्थाननाम, हुंडकसंस्थाननाम चेति तत्रोर्ध्वाधोमध्येषु समप्रविभागेन शरीरावयवसंनिवेशव्यवस्थापनं कुशलशिल्पिनिर्वर्तितसमस्थितिचक्रवत् अवस्थानकरं समचतुरस्रसंस्थाननाम । नाभेरुपरिष्टाद्भूयसो देहसंनिवेशस्याधस्ताच्चाल्पीयसो जनकं न्यग्रोधपरिमंडल संस्थाननाम, न्यग्रोधाकारसमताप्राप्तित्वादन्वर्थं । तद्विपरीतसंनिवेशकरं स्वातिसंस्थाननाम वल्मीकतुल्याकारं । पृष्ठप्रदेशभाविबहुपुद्गलप्रचयविशेषलक्षणस्य निर्वर्तकं कुब्जकसंस्थाननाम । सर्वांगोपांगह्रस्वव्यवस्थाविशेषकारणं वामनसंस्थाननाम । सर्वांगोपांगानां हुंडसंस्थितत्वात् हुंडसंस्थाननाम ।

यदुदयादस्थिबंधनविशेषस्तत्संहननं ॥ ९ ॥ यस्योदयादस्थिबंधनविशेषोभवति तत्संहननं तत्षड्विधं—वज्रर्षभनाराचसंहनननाम, वज्रनाराचसंहनननाम नाराचसंहनननाम, अर्धनाराचसंहनननाम, कीलिकासंहनननाम, असंप्राप्तसृपाटिकासंहनननाम चेति । तत्र वज्राकारोभयास्थिसंधि प्रत्येकं मध्ये वलयबंधनं सनाराचं सुसंहतं वज्रर्षभनाराचसंहननं । तदेव वलयबंधनविरहितं वज्रनाराचसंहननं । तदेवोभयं वज्राकारबंधनव्यपेतमवलयबंधनं सनाराचं नाराचसंहननं । तदेवैकपार्श्वे सनाराचं इतरत्रानाराचं अर्धनाराचसंहननं । तदुभयमते सकीलकं कीलिकासंहननं । अंतरसंप्राप्तपरस्परास्थिसंधि बहिःसिरास्नायुमांसघटितं असंप्राप्तसृपाटिकासंहननं ।

यदुदयात्स्पर्शरसगंधवर्णविकल्पा अष्टपंचद्विपंचसंख्यास्तानि स्पर्शनामादीनि ॥ १० ॥ यस्योदयात्स्पर्शप्रादुर्भावः तत्स्पर्शनाम तदष्टविधं—कर्कशनाम, मृदुनाम, गुरुनाम, लघुनाम, स्निग्धनाम, रूक्षनाम, शीतनाम, उष्णनाम चेति । यन्निमित्तो रसविकल्पः तद्रसनाम तत्पंचविधं—तिक्तनाम, कटुकनाम, कषायनाम, आम्लनाम, मधुरनाम चेति । यदुदयभवो गंधस्तद्गंधनाम तद्द्विविधं सुरभिगंधनाम, असुरभिगंधनाम चेति । यद्धेतुको वर्णविभागस्तद्वर्णनाम तत्पंचविधं—कृष्णवर्णनाम, नीलवर्णनाम, रक्तवर्णनाम, हारिद्रवर्णनाम, शुक्लवर्णनाम चेति । अचेतनेषु स्पर्शादयः कथमितिचेत् न कर्मोदयकृतास्ते पुद्गलस्वभावपरिणामाः ।

यदुदयात्पूर्वशरीराकारविनाशस्तदानुपूर्व्यनाम ॥११॥ यत्पूर्वशरीराकाराऽविनाशः यस्योदयाद्भवति तदानुपूर्व्यं नाम । तच्चतुर्विधं नरकगतिप्रायोग्यानुपूर्व्यनाम तिर्यग्गतिप्रायोग्यानुपूर्व्यनाम मनुष्यगतिप्रायोग्यानुपूर्व्यनाम देवगतिप्रायोग्यानुपूर्व्यनाम चेति । यदा छिन्नायुर्मनुष्यस्तिर्यग्वा पूर्वेण शरीरेण वियुज्यते तदेव नरकभवं प्रत्यभिमुखस्य तस्य पूर्वशरीरसंस्थानानिवृत्तिकारणं विग्रहगतावुदेति तन्नरकगतिप्रायोग्यानुपूर्व्यनाम, एवं शेषेष्वपि योज्यं । ननु च तन्निर्माणनामकर्मसाध्यं फलं नानुपूर्व्यनामोदयकृतं ? नैष दोषः पूर्वायुरुच्छेदसमकाल एव पूर्वशरीरनिवृत्तौ निर्माणनामोदयो निवर्तते तस्मिन्निवृत्तेऽष्टविधकर्म तैजसकार्मणशरीरसंबंधिन आत्मनः पूर्वशरीरसंस्थानाविनाशकारणमानुपूर्व्यनामोदयमुपैति । तस्य कालो विग्रहगतौ जघन्येनैकः समयः, उत्कर्षेण त्रयः समयाः । ऋजुगतौ तु पूर्वशरीराकारविनाशे सति उत्तरशरीरयोग्यपुद्गलग्रहणान्निर्माणनामकर्मोदयव्यापारः ।

यन्निमित्तमगुरुलघुत्वं तदगुरुलघुनाम ॥ १२ ॥ यस्योदयादयःपिंडवत् गुरुत्वान्नाधः पतति

न वार्कतूलवल्लघुत्वादूर्ध्वं गच्छति तदगुरुलघुनाम। धर्मादीनामजीवानां कथमगुरुलघुत्वमिति चेत् अनादि-पारिणामिकागुरुलघुत्वगुणयोगात्। मुक्तजीवानां कथमिति चेत् अनादिकर्मनोकर्मसंबंधानां कर्मोदयकृत-मगुरुलघुत्वं, तदत्यंतविनिवृत्तौ तु स्वाभाविकमाविर्भवति।

यदुदयात्स्वयंकृतोद्बंधनाद्युपघातस्तदुपघातनाम ॥ १३ ॥ यस्योदयात् स्वयंकृतोद्बंधनमरु-त्प्रपतनादिनिमित्त उपघातो भवति तदुपघातनाम।

यन्निमित्तः परशस्त्राद्याघातस्तत्परघातनाम ॥१४॥ परशब्दोन्यपर्यायवाची फलकाद्यावरण-सन्निधानेपि यस्योदयात् परप्रयुक्तशस्त्राद्याघातो भवति तत्परघातनाम।

यदुदयान्निर्वृत्तमातपनं तदातपननाम ॥ १५ ॥ आतपति येन आतपनमातपतीति वातपः। तस्य निर्वर्तकं कर्म आतपननाम। तदादित्ये वर्तते।

यन्निमित्तमुद्योतनं तदुद्योतनाम ॥ १६ ॥ उद्योत्यते येन उद्योतनं वोद्योतः तन्निमित्तं कर्म उद्योतनाम। तच्चंद्रखद्योतादिषु वर्तते।

यद्धेतुरुच्छ्वासस्तदुच्छ्वासनाम ॥ १७ ॥ उच्छ्वसनमुच्छ्वासः प्राणापानकर्म तद्यद्धेतुकं-तदुच्छ्वासनाम।

विहाय आकाशं तत्र गतिनिर्वर्तकं विहायोगतिनाम ॥ १८ ॥ विहायाकाशं तत्र गति-निर्वर्तकं विहायोगतिनाम तद्द्विविधं प्रशस्ताप्रशस्तविकल्पात्। वरवृषभद्विरदादिप्रशस्तगतिकारणं प्रशस्तविहायोगतिनाम। उष्ट्रखराद्यप्रशस्तगतिनिमित्तमप्रशस्तविहायोगतिनाम चेति। सिध्यज्जीवपुद्गलानां विहायोगतिः कुत इति चेत् सा स्वाभाविकी। ननु च विहायोगतिनामकर्मोदयः पक्ष्यादिष्वेव प्राप्नोति न मनुष्यादिषु? कुतः? विहायसि गत्यभावात्। नैष दोषः सर्वेषां विहायस्येव गतिरवगाहनशक्तियोगात्।

एकात्मोपभोगशरीरकारणता यतस्तत्प्रत्येकशरीरनाम ॥ १९ ॥ शरीरकर्मोदयात् निर्व-र्त्यमानं शरीरमेकात्मोपभोगकारणं यतो भवति तत्प्रत्येकशरीरनामकर्म। एकमेकमात्मानं प्रति प्रत्येकं शरीरं।

यतो बह्वात्मसाधारणोपभोगशरीरं तत्साधारणशरीरनाम ॥ २० ॥ बहूनामात्मनामुपभो-गहेतुत्वेन साधरणं शरीरं यतो भवति तत्साधारणशरीरनाम तदुदयवर्तिनो जीवाः कीदृशा इति चेदुच्यते— साधारणाहारादिपर्याप्तिचतुष्टयजन्ममरणप्राणापानानुग्रहोपघाताः साधारणजीवाः। यदैकस्याहारशरीरें-द्रियप्राणापानपर्याप्तिनिर्वृत्तिस्तदैवानंतानामाहारादिपर्याप्तिनिर्वृत्तिः। यदेको जायते तदैवानंतानां जन्म। यदैवैको म्रियते तदैवानंतानां मरणं। यदैकस्य प्राणापानग्रहणविसर्गौ तदैवानंताः प्राणापानग्रहणविसर्गौ कुर्वंति। यदैक आहारादिनानुगृह्यते तदैवानंताः तेनाहारेणानुगृह्यंते। यदैकोऽग्निविषादिनोपहन्यते तदैवानंतानां उपघातः।

यदुदयाद्द्वींद्रियादिषु जन्म तत्त्रसनाम ॥ २१ ॥ यस्योदयाद् द्वींद्रियादिषु प्राणिषु जंगमेषु जन्म लभते तत्त्रसनाम।

यन्निमित्त एकेंद्रियेषु प्रादुर्भावः तत्स्थावरनाम ॥ २२ ॥ एकेंद्रियेषु पृथिव्यप्तेजोवायुवन-स्पतिकायेषु प्रादुर्भावो यन्निमित्तो भवति तत्स्थावरनाम।

यदुदयादन्यप्रीतिप्रभवस्तत्सुभगनाम ॥ २३ ॥ विरूपाकृतिरपि सन् यदुदयात्परेषां प्रीतिहे-तुर्भवति तत्सुभगनाम।

यदुदयात् रूपादिगुणोपेतोपि अप्रीतिकरस्तद्दुर्भगनाम ॥ २४ ॥ रूपादिगुणोपेतोपि सन् यस्योदयात् परेषामप्रीतिहेतुर्भवति तद्दुर्भगनाम।

यन्निमित्तं मनोज्ञस्वरनिर्वर्तनं तत्सुस्वरनाम ॥ २५ ॥ मनोज्ञस्वरनिर्वर्तनं यन्निमित्तमुपजायते प्राणिनस्तत्सुस्वरनाम ।

तद्विपरीतं दुःस्वरनाम ॥ २६ ॥ तद्विपरीतफलत्वात् तद्विपरीतं अमनोज्ञस्वरनिर्वर्तनकरं दुःस्वरनाम।

यदुदयाद्रमणीयत्वं तच्छुभनाम ॥ २७ ॥ यदुदयाद्दृष्टः श्रुतो वा रमणीयो भवत्यात्मा तच्छुभनाम।

तद्विपरीतमशुभनाम ॥ २८ ॥ तद्विपरीतफलं दृष्टुः श्रोतुश्चारमणीयकरं अशुभनाम ।

सूक्ष्मशरीरनिर्वर्तकं सूक्ष्मनाम ॥ २९ ॥ यदुदयादन्यजीवानुपग्रहोपघातायोग्यसूक्ष्मशरीरनिर्वृत्ति र्भवति तत्सूक्ष्मनाम ।

अन्यबाधाकरशरीरकारणं बादरनाम ॥ ३० ॥ अन्यबाधानिमित्तं स्थूलं शरीरं यतो भवति तद्बादरनाम ।

यदुदयादाहारादिपर्याप्तिनिर्वृत्तिस्तत्पर्याप्तिनाम ॥ ३१ ॥ यस्योदयात् आहारादिपर्याप्तिभिरात्मांतर्मुहूर्तं पर्याप्तिं प्राप्नोति तत्पर्याप्तिनाम । तत्षड्विधं–आहारपर्याप्तिनाम, शरीरपर्याप्ति नाम, इंद्रियपर्याप्तिनाम, भाषापर्याप्तिनाम, मनःपर्याप्तिनाम चेति । अत्राह प्राणापानकर्मोदये वाय्वनिष्क्रमणप्रवेशनात्मकं फलमुच्छ्वासकर्मोदयेपि तदेवेति नास्त्यनयोर्विशेष इत्युच्यते—

ऐंद्रियकानिंद्रियभेदात्तद्विशेषः ॥ ३२ ॥ शीतोष्णसंबंधजनितदुःखस्य पचेंद्रियस्य यावुच्छ्वासनिःश्वासौ दीर्घनादौ श्रोत्रस्पर्शनेंद्रियप्रत्यक्षौ तावुच्छ्वासनामोदयजौ, यौ तु प्राणापानपर्याप्तिनामोदयकृतौ सर्वसंसारिणां श्रोत्रस्पर्शानुपलभ्यत्वादतींद्रियौ ।

षड्विधपर्याप्त्यभावहेतुरपर्याप्तिनाम ॥ ३३ ॥ यस्योदयात् षडपि पर्याप्तीः पर्याप्तयितुं आत्मा असमर्थो भवति तदपर्याप्तिनाम ।

स्थिरभावस्य निर्वर्तकं स्थिरनाम ॥ ३४ ॥ यदुदयात् दुष्करोपवासादितपस्करणेपि अंगोपांगानां स्थिरत्वं जायते तत्स्थिरनाम ।

तद्विपरीतमस्थिरनाम ॥ ३५ ॥ यदुदयादीषदुपवासादिकरणात् स्वल्पशीतोष्णादिसंबंधाच्च अंगोपांगानि कृशीभवंति तदस्थिरनाम ।

प्रभोपेतशरीरताकरणं, आदेयनाम ॥ ३६ ॥ यस्योदयात् प्रभोपेतशरीरं दृष्टमुपजायते तदादेयनाम ।

निष्प्रभशरीरकरणमनादेयनाम ॥ ३७ ॥ निष्प्रभं शरीरं यस्योदयादापद्यते तदनादेयनाम । अत्राह तैजसं नाम सूक्ष्मशरीरमस्ति तन्निमित्ता शरीरप्रभा नादेयकर्मनिमित्तेत्युच्यते—सर्वसंसारिजीवशरीर प्रभाविशेषप्रसंगः स्यात् तैजसस्य सर्वेषां साधारणत्वात् , तत आदेयकर्मोदयनिमित्ता प्रभेति युक्तं ।

पुण्यगुणख्यापनकारणं यशस्कीर्तिनाम ॥ ३८ ॥ पुण्यगुणानां ख्यापनं यदुदयाद्भवति तद्यशस्कीर्तिनाम प्रत्येतव्यं । ननु यशःकीर्तिरित्यनयोर्नास्त्यर्थविशेष इति पुनरुक्तत्वप्रसंगः ? नैष दोषः यशोनाम गुणः कीर्तनं संशब्दनं कीर्तिः, यशसः कीर्तिः यशः कीर्तिरित्यस्त्यर्थभेदः ।

तत्प्रत्यनीकफलमयशस्कीर्तिनाम ॥ ३९ ॥ पापगुणख्यापनकारणं अयशस्कीर्तिनाम वेदितव्यं ।

आर्हंत्यकारणं तीर्थकरत्वं नाम ॥ ४० ॥ यस्योदयादार्हंत्यमचिंत्यविभूतिविशेषयुक्तमुपजायते तत्तीर्थकरत्वनाम कर्म प्रतिपत्तव्यं ।

गणधरत्वादीनामुपसंख्यानमिति चेन्नाऽन्यनिमित्तत्वात् ॥ ४१ ॥ यथा तीर्थकरत्वनाम

कर्मोच्यते तथा गणधरत्वादीनां उपसंख्यानं कर्तव्यं, गणधरचक्रधरवासुदेवबलदेवा अपि विशिष्टर्द्धियुक्ता इति चेत् तन्न। किं कारणं ? अन्यनिमित्तत्वात्। गणधरत्वं श्रुतज्ञानावरणक्षयोपशमनिमित्तं चक्रधरत्वादीनि उच्चैर्गोत्रविशेषहेतुकानि।

तदेव तीर्थकरत्वस्यापीति चेन्न तीर्थप्रवर्तनफलत्वात् ॥ ४१ ॥ स्यान्मतं तदेव उच्चैर्गोत्रं तीर्थकरत्वस्यापीति निमित्तं भवतु किं तीर्थकरत्वनाम्नेति ? तन्न। किं कारणं ? तीर्थप्रवर्तनफलत्वात् तीर्थप्रवर्तनफलं हि तीर्थकरनामेष्यते न चोच्चैर्गोत्रोदयात् तदवाप्यते चक्रधरादीनां तदभावात्। किमर्थं विहायोगत्यंतानां प्रत्येकशरीरादिभिरेकवाक्यत्वं न कृतं ?

पूर्वेषां प्रतिपक्षविरहात् एकवाक्यत्वाभावः ॥ ४३ ॥ पूर्वे गत्यादयो विहायोगत्यंताः प्रतिपक्षविरहिताः प्रत्येकशरीरादयः सेतरग्रहणेन विशेषयितुमिष्टास्ततस्तेषां एकवाक्यभावो न कृतः। अथ किमर्थं तीर्थकरत्वस्य पृथग्ग्रहणं ?

प्रधानत्वात्तीर्थकरत्वस्य ॥ ४४ ॥ तीर्थकरत्वं हि प्रधानभूतं सर्वेषु शुभकर्मसु ततस्तस्य पृथग्ग्रहणं क्रियते।

अंत्यत्वाच्च ॥ ४५ ॥ प्रत्यासन्ननिष्ठस्य तस्योदयो जायते ततश्चास्य पृथग्ग्रहणं क्रियते। आह उक्ताः सोत्तरप्रकृतिबंधभेदा विविधभावनामनिर्वर्तनाहितान्वर्थसंज्ञा षष्ठी कर्मप्रकृतिः। अथ सप्तमी कियत्प्रकारेत्यत्रोच्यते—

उच्चैर्नीचैश्च ॥ १२ ॥

गोत्रं द्विविधमुच्चैर्नीचैरिति विशेषणात् ॥ १ ॥ गोत्रं द्विविधं द्रष्टव्यं उच्चैर्नीचैरिति विशेषणात् उच्चैर्गोत्रं नीचैर्गोत्रमिति। तत्र कीदृशमुच्चैर्गोत्रं कीदृग्वा नीचैर्गोत्रं ?

यस्योदयात् लोकपूजितेषु कुलेषु जन्म तदुच्चैर्गोत्रं ॥ २ ॥ लोकपूजितेषु कुलेषु प्रथितमाहात्म्येषु इक्ष्वाकुयदुकुरुहरिजातिप्रभृतिषु जन्म यस्योदयाद्भवति तदुच्चैर्गोत्रमवसेयं।

गर्हितेषु यत्कृतं तन्नीचैर्गोत्रं ॥ ३ ॥ गर्हितेषु दारिद्र्याप्रतिज्ञातदुःखाकुलेषु यत्कृतं प्राणिनां जन्म तन्नीचैर्गोत्रं प्रत्येतव्यं। आह व्याख्यातौ गोत्रभेदौ तदनंतरमुद्दिष्टस्यांतरायस्य किमाख्याः प्रकारा इत्यत्रोच्यते-

दानलाभभोगोपभोगवीर्याणां ॥ १३ ॥

दानादीनामंतरायापेक्षयाऽर्थव्यतिरेकनिर्देशः ॥ १ ॥ अंतराय इति वर्तते तदपेक्षया दानादीनामर्थव्यतिरेकः क्रियते दानस्यांतरायो लाभस्यांतराय इत्यादि।

दानादिपरिणामव्याघातहेतुत्वात् तद्व्यपदेशः ॥ २ ॥ यदुदयाद्दातुकामो न प्रयच्छति लब्धुकामोपि न लभ्यते भोक्तुमिच्छन्नपि न भुंक्ते उपभोक्तुमिच्छन्नपि नोपभुंक्ते उत्सहितुकामोपि नोत्सहते। त एते पंचांतरायव्यपदेशा वेदितव्याः।

भोगोपभोगयोरविशेष इति चेन्न गंधादिशयनादिभेदतस्तद्भेदसिद्धेः ॥ ३ ॥ स्यान्मतं भोगोपभोगयोरविशेषः कुतः ? सुखानुभवननिमित्तत्वाभेदादिति ? तन्न किं कारणं ? गंधादिशयनादिभेदतस्तद्भेदसिद्धेः गंधमाल्यशिरःस्नानवस्त्रान्नपानादिषु भोगव्यवहारः। शयनासनांगनाहस्त्यश्वरथ्यादिषूपभोगव्यपदेशः। ता एता ज्ञानावरणादीनां उत्तरप्रकृतयः संख्येया उक्ताः। ज्ञानावरणस्य नाम्नश्चाऽसंख्येया अपि भवंतीत्याप्तोपदेशः। व्याख्यातः प्रकृतिबंधविकल्पः, अतः परं स्थितिबंधविकल्पं व्याख्यास्यामः।

आह व्याख्यास्यति भवान् स्थितिबंधं इदं तु संशेमहे किमसावभिहितलक्षणात् पूर्वस्मात् प्रकृतिबंधात् विशिष्टात् अर्थांतरभूतकर्मविषय आहोस्वित् तस्यैव प्रथमकल्पिककर्मणः प्राकृतिबंधव्यपदेशवत् पर्यायांतरनिर्देश इति । अत्र ब्रूमहे—अस्थानेऽयं संशयः कुतः? यस्मादेतासामेव प्रकृतीनां अनेकभेदानां यथास्वमनिर्जीर्णानां यावंत कालमवस्थानं आश्रयविनाशाभावात् तस्मिन् स्थितिबंधविवक्षा सा पुनः स्थितिरुभयथा—परापरा च । प्रकृष्टात् प्रणिधानात् परा निकृष्टात् प्रणिधानात् अपरा । यद्येवं उच्यतां कियत्कालेयं कर्मप्रकृतिरित्यत्रोच्यते सति वक्तव्ये—

आदितस्तिसृणामंतरायस्य च त्रिंशत्सागरोपमकोटीकोट्यः परा स्थितिः ॥ ४ ॥

आदित इति वचनं मध्यांतनिवृत्त्यर्थं ॥ १ ॥ मध्ये अंते वा तिसृणां ग्रहणं माभूदित्येवमर्थमादित इत्युच्यते आदौ आदितः तसा प्रकरणे—'आद्यादिभ्य उपसंख्यानमिति' तस् ।

तिसृणामिति वचनं अवधारणार्थं ॥ २ ॥ आदित इत्युच्यमाने इयतीनां प्रकृतीनां ग्रहणमित्यवधारणं न स्यात् अतोवधारणार्थं तिसृणामित्युच्यते ।

अंतरायस्य चेति क्रमभेदवचनं समानस्थितिप्रतिपत्त्यर्थं ॥ ३ ॥ मूलप्रकृतिक्रममुल्लंघ्यांतरायस्य चेत्युच्यते समानस्थितिप्रतिपत्त्यर्थं । का पुनरसौ समानस्थितिः? त्रिंशत्सागरोपमकोटीकोट्यः । उक्तपरिमाणं सागरोपमं ।

कोटीकोट्य इति द्वित्वे बहुत्वानुपपत्तिः इति चेन्न राजपुरुषवत्तत्सिद्धेः ॥ ४ ॥ स्यान्मतं यथा ग्रामो ग्रामो रमणीय इति वीप्सायां द्वित्वेनैव गतत्वात् बहुवचनं न प्रयुज्यते तथा कोटीकोट्य इत्यत्रापि वीप्सायां द्वित्वेन गतत्वात् बह्वर्थस्य बहुवचनं न प्राप्नोति? तन्न । किं कारणं? राजपुरुषवत्तत्सिद्धेः । यथा राज्ञः पुरुषः राजपुरुष इति । एवं कोटीनां कोट्यः कोटीकोट्यः इति वृत्तिर्द्रष्टव्या ।

पराभिधानं जघन्यस्थितिनिवृत्त्यर्थं ॥ ५ ॥ परेत्युच्यते किमर्थं? जघन्यस्थितिनिवृत्त्यर्थं परा उत्कृष्टा इत्यर्थः । सा कस्येति चेदुच्यते—

संज्ञिपंचेंद्रियपर्याप्तकस्य परा स्थितिः ॥ ६ ॥ संज्ञिनः पंचेंद्रियस्य पर्याप्तकस्य ज्ञानदर्शनावरणवेदनीयांतरायाणां त्रिंशत् सागरोपमकोटीकोट्यः परा स्थितिर्भवति ।

अन्येषामागमात् संप्रत्ययः ॥ ७ ॥ अन्येषामेकेंद्रियादीनामागमात् संप्रत्ययो भवति । तद्यथा एकेंद्रियपर्याप्तकस्य एकसागरोपमसप्तभागास्त्रयः । द्वींद्रियपर्याप्तकस्य पंचविंशतिसागरोपमसप्तभागाः त्रयः । त्रींद्रियपर्याप्तकस्य पंचाशत्सागरोपमसप्तभागास्त्रयः । चतुरिंद्रियपर्याप्तकस्य सागरोपमशतसप्तभागास्त्रयः । असंज्ञिपंचेंद्रियपर्याप्तकस्य सागरोपमसहस्रसप्तभागास्त्रयः । संज्ञिपंचेंद्रियपर्याप्तकस्यांतःसागरोपमकोटीकोट्यः । एकेंद्रियापर्याप्तकस्य त एव भागाः पल्योपमस्यासंख्येयभागोनाः । द्वित्रिचतुःपंचेंद्रियाऽपर्याप्तसंज्ञिनां त एव भागाः पल्योपमासंख्येयभागोनाः । यस्य कर्मणः स्थितिमतिलंघ्यान्यकर्मस्थितिरभिहिता तस्य खलु वेदनीयानंतरोद्देशभाजः—

सप्ततिर्मोहनीयस्य ॥ १५ ॥

सागरोपमकोटीकोट्यः परा स्थितिरित्यनुवर्तते । इयमपि परा स्थितिः संज्ञिपंचेंद्रियपर्याप्तकस्यावसेया । इतरेषामेकेंद्रियादीनां यथागमं । तद्यथा–पर्याप्तकैकद्वित्रिचतुरिंद्रियाणामेकपंचविंशतिपंचाशच्छतसागरोपमाणि यथासंख्यमपर्याप्तकैकेंद्रियस्य पल्योपमासंख्येयभागोना सैव स्थितिः । द्वींद्रियादीनामपि सैव पल्योपमासंख्येयभागोना पर्याप्तकासंज्ञिपंचेंद्रियस्य सागरोपमसहस्रं तस्यैवापर्याप्तकस्य सागरोपमसहस्रं पल्योपमसंख्येयभागोनं, अपर्याप्तसंज्ञिनः अंतःसागरोपमकोटीकोट्यः ।

आह निर्दिष्टा पंचानां कर्मप्रकृतीनां स्थितिः अथोपरिष्टयोः का परा स्थितिरित्यत्रोच्यते—

विंशतिर्नामगोत्रयोः ॥ १६ ॥

सागरोपमकोटीकोट्यः परा स्थितिरित्यनुवर्तते इयमप्युत्कृष्टा संज्ञिपंचेंद्रियपर्याप्तकस्य, एकेंद्रियादीनां यथागमं तद्यथा-एकेंद्रियपर्याप्तकस्यैकसागरोपमसप्तभागौ द्वौ। द्वींद्रियपर्याप्तकस्य पंचविंशतिसागरोपमं-सप्तभागौ द्वौ। त्रींद्रियपर्याप्तकस्य पंचाशत्सागरोपमसप्तभागौ द्वौ। चतुरिंद्रियपर्याप्तकस्य सागरोपमश-तसप्तभागौ द्वौ। असंज्ञिपंचेंद्रियापर्याप्तकस्य अंतःसागरोपमकोटीकोट्यः। एकेंद्रियापर्याप्तकस्य तावेव भागौ पल्योपमासंख्येयभागोनौ। द्वित्रिचतुःपंचेंद्रियापर्याप्तकासंज्ञिनां सैव स्थितिः पल्योपमासंख्येयभागोना।

आह आयुषः कोत्कृष्टा स्थितिरित्यत्रोच्यते—

त्रयस्त्रिंशत् सागरोपमाण्यायुषः ॥ १७ ॥

पुनः सागरोपमग्रहणं कोटीकोटीनिवृत्त्यर्थं, परा स्थितिरित्यनुवर्तते एवं अस्याप्युत्कृष्टा स्थितिः संज्ञि-पर्याप्तकस्यैव। इतरेषां यथागमं तद्यथा-असंज्ञिपंचेंद्रियपर्याप्तकस्य पल्योपमस्यासंख्येयभागः, शेषाणां उत्कृष्टा पूर्वकोटी।

आह अष्टानामपि कर्मप्रकृतीनां व्याख्याता परा स्थितिः। अथ तासामेव का जघन्या स्थितिरि-त्युपदिश्यते-अन्यकर्मस्थितिविशेषाधिकत्वात्। आनुपूर्व्योल्लंघनेन अमुष्यैव तावत् स्वसंवेद्यफलस्य वेद्यस्य वेदितव्या स्थितिः—

अपरा द्वादश मुहूर्ता वेदनीयस्य ॥ १८ ॥

सूक्ष्मसांपराय इति वाक्यशेषः।

अथानुपूर्व्यविशेषात्यये सति मोहायुर्व्यवहितयोरन्ययोः का जघन्या स्थितिरित्युच्यते—

नामगोत्रयोरष्टौ ॥ १९ ॥

अत्रापि सूक्ष्मसांपराय इति वाक्यशेषः। मुहूर्ता इत्यनुवर्तते। अपरा स्थितिरिति च।

अथान्यासां कर्मप्रकृतीनां का जघन्या स्थितिरित्युच्यते—

शेषाणामंतर्मुहूर्ता ॥ २० ॥

अपरा स्थितिरित्यनुवर्तते। तत्र ज्ञानदर्शनावरणांतरायाणां सूक्ष्मसांपराये मोहनीयस्यानिवृत्तिबादर-सांपराये आयुषः संख्येयवर्षायुष्षु तिर्यक्षु मनुष्येषु च।

आह उभयी ज्ञानावरणादीनामभिहिता स्थितिः, अथानुभवः किंलक्षणः ? इत्यत्रोच्यते—

विपाकोनुभवः ॥ २१ ॥

विशिष्टः पाको नानाविधो वा विपाकः ॥१॥ ज्ञानावरणादीनां कर्मप्रकृतीनां अनुग्रहोपघातात्मि-कानां पूर्वास्रवतीव्रमंदभावनिमित्तो विशिष्टः पाको विपाकः। द्रव्यक्षेत्रकालभवभावलक्षणनिमित्तभेद-जनितवैश्वरूप्यो नानाविधो वा पाको विपाकः असावनुभव इत्याख्यायते। शुभपरिणामानां प्रकर्षभावात् शुभप्रकृतीनां प्रकृष्टोनुभवः अशुभप्रकृतीनां निकृष्टः। अशुभपरिणामानां प्रकर्षभावात् अशुभप्रकृतीनां प्रकृष्टोनुभवः शुभप्रकृतीनां निकृष्टः। स एवं प्रत्ययवशादुपात्तोनुभवो द्विधा प्रवर्तते स्वमुखेन परमुखेन च। सर्वासां मूलप्रकृतीनां स्वमुखेनैवानुभवः। उत्तरप्रकृतीनां तु तुल्यजातीयानां परमुखेनापि भवति-आयुर्दर्शन चारित्रमोहवर्जानां। न हि नारकायुर्मुखेन तिर्यगायुर्मनुष्यायुर्वा विपच्यते। नापि दर्शनमोहः चारित्रमोहमु-मुखेन चारित्रमोहो वा दर्शनमोहमुखेन। आह अभ्युपेमः प्रागुपचितनानाप्रकारकर्मविपाकोनुभव इति इदं तु न विजानीमः किमयं संख्यातोऽप्रसंख्यातः ? इत्यत्रोच्यते प्रसंख्यातोऽनुभूयत इति ब्रूमहे कुतः ? यतः—

स यथानाम ॥ २२ ॥

ज्ञानावरणादीनां सविकल्पानां प्रत्येकमन्वर्थसंज्ञानिर्देशादनुभवसंप्रत्ययः ॥ १ ॥ ज्ञानावरणस्य फलं ज्ञानाभावः, दर्शनावरणस्य फलं दर्शनशक्त्युपरोध इत्येवमाद्यन्वर्थसंज्ञानिर्देशात् सर्वासां कर्मप्रकृतीनां सविकल्पानां अनुभवसंप्रत्ययो जायते ।

आह यदि विपाकोनुभवः प्रतिज्ञायते तत्कर्मानुभूतं सत् किमावरणवदवतिष्ठते ? आहोस्विन्निष्पीडितसारं प्रच्यवते इत्यत्रोच्यते—

ततश्च निर्जरा ॥ २३ ॥

पूर्वार्जितकर्मपरित्यागो निर्जरा ॥ १ ॥ पीडानुग्रहावात्मानं प्रदायाभ्यवहृतौदनादिविकारवत्पूर्वस्थितिक्षयादवस्थानाभावात् ।

सा द्विप्रकारा विपाकजेतरा च ॥ २ ॥ सा द्विप्रकारा वेदितव्या । कुतः ? विपाकजेतरा चेति । तत्र चतुर्गतावनेकजातिविशेषावघूर्णिते संसारमहार्णवे चिरं परिभ्रमतः शुभाशुभस्य कर्मण औदयिकभावोदीरितस्य क्रमेण विपाककालप्राप्तस्य यथासदसद्वेद्यनान्यतरविकल्पबद्धस्य तस्य तेन प्रकारेण वेद्यमानस्य *यथानुभवोदयावल्लीस्रोतानुप्रविष्टस्यारब्धकर्मस्वस्थितिक्षयादुदयागतपरिभुक्तस्य या निवृत्तिः सा विपाकजा* निर्जरा । यत्कर्माप्राप्तविपाककालमौपक्रमिकक्रियाविशेषसामर्थ्यादनुदीर्णं बलादुदीर्य उदयावलिं प्रवेश्य वेद्यते आम्रपनसादिपाकवत् सा अविपाकनिर्जरा ।

निमित्तांतरसमुच्चयार्थश्चशब्दः ॥ ३ ॥ तपसा निर्जरेति वक्ष्यते तस्य समुच्चयार्थश्चशब्दः क्रियते । ततश्च भवति अन्यतश्चेति ।

संवरात्परत्र पाठ इतिचेन्नानुभवानुवादपरिहारार्थत्वात् ॥ ४ ॥ स्यान्मतं संवरान्निर्जरा परत्र पठितव्या यथोद्देशः तथा निर्देश इति ? तन्न । किं कारणं ? अनुभवानुवादपरिहारार्थत्वात् तत्र हि पाठे क्रियमाणे विपाकोनुभव इति पुनरनुवादः कर्तव्यः स्यात् ।

पृथङ् निर्जरावचनमनर्थकं बंधेंतर्भावादिति चेन्नाऽर्थापरिज्ञानात् ॥ ५ ॥ स्यान्मतं यथा पुण्यपापयोः पृथग्ग्रहणं न कृतं बंधेऽन्तर्भावात् तथा निर्जरा अपि उक्तेन क्रमेण अनुभवबंधेंतर्भवति इति पृथगस्या ग्रहणमनर्थकमिति ? तन्न । किं कारणं ? अर्थापरिज्ञानात् । फलदानसमर्थमनुभव इत्युच्यते । ततोनुभूतानामात्मवीर्यार्णां पुद्गलानां निवृत्तिर्निर्जरेत्ययमर्थभेदः । एवं च कृत्वा ततश्चेति अपादाननिर्देश उपपन्नो भवति इतरथा हि भेदाभावान्नोपपद्यते ।

लघ्वर्थमिहैव तपसेति वक्तव्यमितिचेन्न संवरानुग्रहतंत्रत्वात् ॥ ६ ॥ स्यादेतत् लघ्वर्थमिहैव 'ततो निर्जरा तपसा चेति' वक्तव्यं पुनर्निर्जराग्रहणमाकर्षमिति[2] ? तन्न । किं कारणं ? संवरानुग्रहतंत्रत्वात् । तपसा निर्जरा च भवति संवरश्चेति ।

धर्मेंतर्भावात् संवरहेतुत्वमिति चेन्न पृथग्ग्रहणस्य प्राधान्यख्यापनार्थत्वात् ॥७॥ स्यान्मतं उत्तमक्षमामार्दवार्जवादियोगे उत्तमं तपः संवरहेतुरिति वक्ष्यते ततस्तत्रांतर्भावात् संवरहेतुत्वसिद्धेः इह वचनाच्च निर्जराहेतुत्वनिर्ज्ञानात् पृथक् तत्र तपोग्रहणमनर्थकमिति ? तन्न । किं कारणं ? पृथग्ग्रहणस्य प्राधान्यख्यापनार्थत्वात् । सर्वेषु संवरनिर्जराहेतुषु तपः प्रधानभूतमित्येतस्य ज्ञापनार्थं पुनस्तपोग्रहणं क्रियते । उक्तं च—

> कायमणोवचिगुत्तो चोंतवसाचेदुदे अणेयविहं ।
> सो कम्मणिज्जराए विपुलाए वट्ठदि मणसोत्ति ॥

---

१ ब. पुस्तके आरब्धकर्मणःस्थितीत्यादि पाठः । २ निर्जराग्रहणं माकर्षादिति प्रतिभाति ।

तत इह तपोवचनं गौरवं जनयति इति न कृतं। ताः पुनः कर्मप्रकृतयो द्विविधाः-घातिका अघातिकाश्चेति। तत्र ज्ञानदर्शनावरणमोहांतरायाख्या घातिकाः। इतरा अघातिकाः। घातिकाश्चापि द्विविधा सर्वघातिका देशघातिकाश्चेति। तत्र केवलज्ञानावरणनिद्रानिद्राप्रचलाप्रचलास्त्यानगृद्धिनिद्राप्रचलाकेवलदर्शनावरणद्वादशकषायदर्शनमोहाख्याः विंशतिप्रकृतयः सर्वघातिकाः। ज्ञानावरणचतुष्कदर्शनावरणत्रयांतरायपंचकसंज्वलननोकषायसंज्ञिकाः देशघातिकाः। अवशिष्टाः प्रकृतयः, अघातिकाः। तथेदमपरमवसेयं— शरीरनामादयः स्पर्शांताः अगुरुलघूपघातपरघातातपोद्योतप्रत्येकशरीरसाधारणशरीरस्थिरास्थिरशुभाशुभनिर्माणनामाख्याश्च पुद्गलविपाकप्रदाः। अनुपूर्व्यनाम क्षेत्रविपाककरं, आयुर्भवधारणफलं। अवशिष्टाः प्रकृतयोजीवविपाकहेतव इत्येवमनुभवबंधो व्याख्यातः। इदानीं प्रदेशबंधो वक्तव्यस्तस्मिंश्च वक्तव्ये सति इमे निर्देष्टव्याः किंहेतवः कदा? कुतः? किंस्वभावाः? कस्मिन्? किंपरिमाणाश्चेति? तदर्थमिदं यथासंख्यप्रश्नपरिगृहीततत्प्रश्नापेक्षा भेदं सूत्रं प्रणीयते।

नामप्रत्ययाः सर्वतोयोगविशेषात् सूक्ष्मैकक्षेत्रावगाहस्थिताः सर्वात्मप्रदेशेष्वनंतानंतप्रदेशाः ॥ २४ ॥

नाम्नः प्रत्यया नामप्रत्ययाः। नामेति सर्वाः कर्मप्रकृतयः, अभिधीयंते स यथानामेति वचनात्।

नामासां प्रत्यय इतिचेन्न समयविरोधात् ॥ १ ॥ अथमतमेतत् नामप्रत्ययो यासां ताः नामप्रत्यया इति? तन्न। किं कारणं? समयविरोधात्। एवं हि विग्रहे क्रियमाणे नामकर्म एव सर्वासां प्रकृतीनां प्रत्यय इति प्राप्तं तच्च समयविरुद्धं। अनेन हेतुभाव उक्तः।

सर्वेषु भवेषु सर्वतः ॥ २ ॥ 'दृश्यतेऽन्यतोपीति' तसि कृते सर्वेषु भवेषु सर्वत इति भवति। अनेन कालोपादानं कृतं। एकैकस्य जीवस्य अतिक्रांता अनंता भवा आगामिनः संख्येया असंख्येयाः अनंता वा भवा भवंति तेषु सर्वेष्वेवेति।

योगविशेषादिति वचनं निमित्तनिर्देशार्थं ॥ ३ ॥ योगो व्याख्यातः कायवाङ्मनस्कर्मलक्षणः। परस्परतो विशिष्यते इति विशेषः। ततो योगविशेषान्निमित्तात्कर्मभावेन पुद्गला आधीयंत इति योगविशेषादित्यनेन निमित्तनिर्देशः कृतो भवति।

सूक्ष्मग्रहणं ग्रहणयोग्यस्वभावप्रतिपादनार्थं ॥ ४ ॥ ग्रहणयोग्याः पुद्गलाः सूक्ष्मा न स्थूला इति प्रतिपादनार्थं सूक्ष्मग्रहणं क्रियते।

एकक्षेत्रावगाहवचनं क्षेत्रांतरनिवृत्त्यर्थं ॥ ५ ॥ आत्मप्रदेशकर्मपुद्गलैकाधिकरणव्यतिरिक्तक्षेत्रांतरनिवृत्त्यर्थमेकक्षेत्रावगाह इति वचनं क्रियते।

स्थिता इति वचनं क्रियांतरनिवृत्त्यर्थं ॥ ६ ॥ स्थिताः कर्मभावमापद्यंते न गच्छत इति क्रियांतरनिवृत्त्यर्थं स्थिता इत्युच्यते। एवं सूक्ष्मादिग्रहणेन कर्मयोग्यस्वभावानुवर्णनं कृतं भवति।

सर्वात्मप्रदेशेष्विति वचनमेकप्रदेशाद्यपोहार्थं ॥ ७ ॥ एकद्वित्रिचतुरादिप्रदेशेष्वात्मनः कर्मप्रदेशाः न प्रवर्तंते, किं तर्हि? ऊर्ध्वमधस्तिर्यक्षु सर्वेष्वात्मप्रदेशेषु व्याप्य स्थिता इति प्रदर्शनार्थं ऊर्ध्वमधस्तिर्यक्सर्वात्मप्रदेशेष्वित्युच्यते।

अनंतानंतप्रदेशवचनं प्रमाणांतरव्यपोहार्थं ॥ ८ ॥ न संख्येयाः नचासंख्येयाः नाप्यनंताः इति प्रतिपादनार्थं अनंतानंतप्रदेशा इत्युच्यंते। ते खलु पुद्गलस्कंधा अभव्यानंतगुणाः सिद्धानंतभागप्रमितप्रदेशाः घनांगुलासंख्येयभागक्षेत्रावगाहिनः एकद्वित्रिचतुःसंख्येयानंतसमयस्थितिकाः पंचवर्णरसद्विगंधचतुःस्पर्शभावाः अष्टविधकर्मप्रकृतियोग्याः, योगवशात् आत्मना आत्मसात्क्रियंत इति प्रदेशबंधः समासतो

वेदितव्यः । आह बंधपदार्थानंतरं पुण्यपापोपसंख्यानं चोदितं तद्बंधेंतर्भूतमिति प्रत्याख्यातं । तत्रेदं वक्तव्यं कोत्र पुण्यबंधः कः पापबंध इति तत्र पुण्यप्रकृतिपरिगणनार्थमिदमुच्यते—

सद्वेद्यशुभायुर्नामगोत्राणि पुण्यं ॥ २५ ॥

शुभग्रहणमायुरादीनां विशेषणं ॥ १ ॥ शुभं प्रशस्तमित्यर्थः तद्ग्रहणमायुरादीनां विशेषणं दृष्टव्यं । शुभायुः, शुभनाम शुभगोत्रमिति ।

शुभायुस्त्रिविधं ॥ २ ॥ तिर्यगायुर्मनुष्यायुर्देवायुरिति एतत्त्रितयं शुभायुरित्युच्यते ।

शुभनाम सप्तत्रिंशद्विकल्पं ॥ ३ ॥ शुभनाम सप्तत्रिंशद्विकल्पं, अवगंतव्यं । तद्यथा—मनुष्यगतिः, देवगतिः, पंचेंद्रियजातिः, पंचशरीराणि, त्रीण्यंगोपांगानि, समचतुरस्रसंस्थानं, वज्रर्षभनाराचसहननं, प्रशस्तवर्ण-गंध—रस स्पर्शाः, मनुष्यगति-देवगत्यानुपूर्व्यद्वयं अगुरुलघुपरघातोच्छ्वासातपोद्योतप्रशस्तविहायोगतयः त्रस—बादर—पर्याप्ति—प्रत्येकशरीर-स्थिर—शुभ—सुभग-सुस्वर-आदेय-यशस्कीर्तयः निर्माणं तीर्थकरनाम चेति शुभमकमुच्चैर्गोत्रं सद्वेद्यमित्येता द्वाचत्वारिंशत्प्रकृतयः पुण्यसंज्ञाः ।

अतोन्यत् पापं ॥ २६ ॥

अस्मात् पुण्यसंज्ञककर्मप्रकृतिसमूहादन्यत् कर्म पापमित्युच्यते । तद्द्व्यशीतिविधं । तद्यथा ज्ञानावरणप्रकृतयः पंच, दर्शनावरणस्य नव, मोहनीयस्य षड्विंशतिः, पंचांतरायस्य, नरकगतिः, तिर्यग्गतिः, चतस्रो जातयः, पंच संस्थानानि, पंच संहननानि, अप्रशस्तवर्ण-गंध-रस-स्पर्शाः नरकगतितिर्यग्गत्यानुपूर्व्यद्वयं उपघाताप्रशस्तविहायोगतिस्थावरसूक्ष्मापर्याप्तिसाधारणशरीराशुभदुर्भगास्थिरदुःस्वरानादेयायशस्कीर्तयश्चेति नामप्रकृतयः चतुस्त्रिंशत् असद्वेद्यं नरकायुः, नीचैर्गोत्रमिति । एवं व्याख्यातः सप्रपंचो बंधपदार्थः अवधिमनःपर्ययकेवलज्ञानप्रत्यक्षप्रमाणगम्यः तदुपदिष्टागमानुमेयः ।

इति तत्त्वार्थवार्तिके व्याख्यानालंकारेऽष्टमोध्यायः समाप्त ॥ ८ ॥

ॐ नमः सिद्धेभ्यः ।

अथ नवमोध्यायः ।

अत्राह योऽयं अनादिसंततिपौनर्भविकसुखदुःखहेतुः, अष्टविधविशेषोपचितमूर्तिः नानाजातिविमहोत्पादनप्रवणः पौरुषेण यः सर्वात्मप्रदेशाविच्छेदनसमर्थः कर्मबंधः स केनचिदुपायेनापि नाम कस्यचित् अनात्यंतिकः स्यादिति ? अत्रोच्यते-भवति हि केषांचिदात्यंतिकस्तद्विनाशः यस्मात्तदर्थमेव भगवद्भिरुपदिष्टः ।

आस्रवनिरोधः संवरः ॥ १ ॥

अथवा आह कथं पुनरेतदाहितवैचित्र्यं नानास्रवापादितं ज्ञानावरणादिकर्मसंबंधं नोपगादिति । अत्रोच्यते संवरात् । कोसौ संवर इति ? अत एवाह आस्रवनिरोधः संवर इति । अथवा बंधपदार्थो निर्दिष्टः । इदानीं तदनंतरोद्देशभाजः संवरस्य निर्देशः प्राप्तकाल इत्यत इदमाह । आस्रवनिरोधः संवर-इति । कोयमास्रवनिरोधः ?

कर्मागमनिमित्ताऽप्रादुर्भूतिरास्रवनिरोधः ॥ १ ॥ कर्मागमनिमित्तं बहुविकल्पं व्याख्यातं तस्य कायवाङ्मनःप्रयोगस्य स्वात्मलाभहेतुत्वसन्निधानात् अप्रादुर्भूतिरास्रवनिरोध इत्युच्यते। अह यदि अयमास्रवनिरोधः व्याख्यायतामित्यत्र, इदानीं संवर इत्यत्राभिधीयते स न व्याख्यातव्यः। किं कारणं यस्मात्तन्निरोधे सति-

तत्पूर्वककर्मादानाभावः संवरः कारणाभावात् कार्याभाव इति ॥ २ ॥ तस्मिन्नास्रवे निरुद्धे तत्पूर्वकस्यानेकदुःखबीजजनकस्य कर्मणः उपनिपाताभावो यः स संवरोऽभिमतः, इति वाक्यशेषः।

तथानिर्देशः कर्तव्य इति चेन्न कार्ये कारणोपचारात् ॥ ३ ॥ स्यादेतत् यद्ययमर्थ इष्टस्तथा निर्देशः कर्तव्यः, यथा गमको भवति आस्रवनिरोधे सति संवरः आस्रवनिरोधादिति वा? तन्न। किं कारणं? कार्ये कारणोपचारात्। यथान्नं वैप्राणा इति अन्नकार्येषु प्राणेषु अन्नोपचारः। तथाऽऽस्रवनिरोधकार्ये संवरे आस्रवनिरोधोपचारः कृतः।

निरुध्यतेऽनेन निरोध इति वा ॥ ४ ॥ अथवा नायं भावसाधनः निरुद्धिर्निरोध इति। किं तर्हि? करणसाधनः निरुध्यते येन स निरोध इति। तथा संवरशब्दोऽपि करणसाधनः संव्रियतेऽनेनेति। कः पुनरसौ? गुप्त्यादिः वक्ष्यमाणः तेन ह्युभयं क्रियते इति सामानाधिकरण्य, सपपद्यते।

योगविभागो वा ॥ ५ ॥ अथवा योगविभागोऽत्र द्रष्टव्यः, आस्रवनिरोधो हितार्थिना कर्तव्यः इति वाक्यशेषः। तस्य किं प्रयोजनमिति चेत् अत आह संवर इति। संवरः प्रयोजनमस्येत्यर्थः। कः पुनरसौ?

मिथ्यादर्शनादिप्रत्ययकर्मसंवरणं संवरः ॥ ६ ॥ मिथ्यादर्शनादयः प्रत्यया व्याख्याताः तदुपादानस्य कर्मणः संवरणं संवर इति निर्धियते।

स द्वेधा द्रव्यभावभेदात् ॥ ७ ॥ संवरो द्वेधा व्यवतिष्ठते कुतः? द्रव्यभावभेदात्।

संसारनिमित्तक्रियानिवृत्तिर्भावसंवरः इति ॥ ८ ॥ आत्मनो द्रव्यादिहेतुकभवांतरावाप्तिः संसारः तन्निमित्तक्रियापरिणामस्य निवृत्तिर्भावसंवर इति व्यपदिश्यते।

तन्निरोधे तत्पूर्वककर्मपुद्गलादानविच्छेदो द्रव्यसंवरः ॥ ९ ॥ तस्य संसारकारणस्य भावसंवरस्य निरोधे तत्पूर्वकस्य कर्मपुद्गलस्य निरासो द्रव्यसंवरः इति निर्श्चीयते।

तद्विभावनार्थं गुणस्थानविभागवचनं ॥ १० ॥ तस्य संवरस्य विभावनार्थं गुणस्थानविभागवचनं क्रियते तद्यथा—

मिथ्यादृष्टिसासादनसम्यग्दृष्टिसम्यङ्मिथ्यादृष्ट्यसंयतसम्यग्दृष्टिसंयतासंयतप्रमत्तसंयताऽप्रमत्तसंयतापूर्वकरणानिवृत्तिबादरसांपरायसूक्ष्मसांपरायोपशमकक्षपकोपशांतक्षीणकषायवीतरागछद्मस्थसयोग्ययोगकेवलिभेदात् चतुर्दशगुणस्थानविकल्पः ॥ ११ ॥ मिथ्यादृष्टिः सासादनसम्यग्दृष्टिः सम्यङ्मिथ्यादृष्टिः असंयतसम्यग्दृष्टिः संयतासंयतः प्रमत्तसंयतः अप्रमत्तसंयतः अपूर्वकरणोपशमकक्षपकौ अनिवृत्तिबादरसांपरायोपशमकक्षपकौ सूक्ष्मसांपरायोपशमकक्षपकौ उपशांतकषायवीतरागछद्मस्थः क्षीणकषायवीतरागछद्मस्थः सयोगकेवल्ययोगकेवली चेत्र भेदात् चतुर्दशगुणस्थानविकल्पो वेदितव्यः।

तत्र मिथ्यादर्शनोदयवशीकृतो मिथ्यादृष्टिः ॥ १२ ॥ तेषु मिथ्यादर्शनकर्मोदयेन वशीकृतो जीवो मिथ्यादृष्टिरभिधीयते। यत्कृत तत्त्वार्थानामश्रद्धानभाजि भवति तस्य विकल्पाः, प्राग्व्याख्याताः। ते सर्वे समासेन द्विधा व्यवतिष्ठंते—हिताहितपरीक्षाविरहिताः परीक्षकाश्चेति। तत्रैकेंद्रियादयः सर्वे संज्ञिपर्याप्तकवर्जिताः हिताहितपरीक्षाविरहिताः, पर्याप्तका उभयेऽपि भवंति।

तदुदयाभावेऽनंतानुबंधिकषायोदयविधेयीकृतः सासादनसम्यग्दृष्टिः ॥ १३ ॥ तस्य मिथ्यादर्शनस्योदय।भावे अनंतानुबंधिकषायोदयकलुषीकृतांतरात्मा जीवः सासादनसम्यग्दृष्टिरित्याख्यायते।

मिथ्यादर्शनोदयनिवृत्तिः कथमिति चेदुच्यते—अनादिमिथ्यादृष्टिर्भव्यः षड्विंशतिमोहप्रकृतिसत्कर्मकः सादिमिथ्यादृष्टिर्वा षड्विंशतिमोहप्रकृतिसत्कर्मकः सप्तविंशतिमोहप्रकृतिसत्कर्मको वा अष्टाविंशतिमोहप्रकृतिसत्कर्मको वा प्रथमसम्यक्त्वं गृहीतुमारभमाणः शुभपरिणामाभिमुखः अंतर्मुहूर्तमनंतगुणवृद्ध्या वर्धमानविशुद्धिः, चतुर्षु मनोयोगेषु अन्यतमेन मनोयोगेन, चतुर्षु वाग्योगेषु अन्यतमेन वाग्योगेन, औदारिकवैक्रियिककाययोगयोरन्यतरेण काययोगेन वा समाविष्टः हीयमाननूतनकषायः साकारोपयोगः त्रिषु वेदेष्वन्यतमेन वेदेन संक्लेशविरहितः वर्धमानशुभपरिणामप्रतापेन सर्वकर्मप्रकृतीनां स्थितिं ह्रासयन्, अशुभप्रकृतीनामनुभागबंधमपसारयन् शुभप्रकृतीनां रसमुद्वर्तयन् त्रीणि करणानि कर्तुं उपक्रमते । अथाप्रवृत्तकरणं[1] अपूर्वकरणं अनिवृत्तिकरणं चेति । तानि त्रीण्यपि करणानि प्रत्येकमंतर्मुहूर्तकालानि । तत्र अंतःकोटीकोटीस्थितिकानि कर्माणि कृत्वा अथाप्रवृत्तकरणस्य आदिसमये कालादिलब्ध्युपेतः प्रविशति, इदं तु करणं प्राक् न कदाचिदपि प्रवृत्तं अत एवास्यान्वर्थसंज्ञा । अथेदं करणं न तथा प्राक् प्रवृत्तमित्यथाप्रवृत्तमिति । तत्राद्ये समये जघन्या विशुद्धिरल्पा, द्वितीये समये जघन्याऽनंतगुणा, तृतीये समये जघन्या अनंतानंतगुणा एवमादि अंतर्मुहूर्तपरिसमाप्तेः, ततः प्रथमसमये उत्कृष्टा अनंतगुणा द्वितीये उत्कृष्टा अनंतगुणा एवमादि । अथाप्रवृत्तकरणचरमसमयांते भव्या एवमेते नानाजीवानामसंख्येयलोकप्रमाणाः परिणामविकल्पाः समा विषमाश्च भवंति । एषां समुदायरूपमथाप्रवृत्तकरणं । अपूर्वकरणस्य प्रथमसमये जघन्या विशुद्धिरल्पा तस्यैवोत्कृष्टा अनंतगुणा । द्वितीये समये जघन्या अनंतगुणा, एवमादि, अंतर्मुहूर्तपरिसमाप्तेः[2] एते प्रथमसमये उत्कृष्टानंतगुणा द्वितीये उत्कृष्टानंतगुणा एवमांतर्मुहूर्तपरिसमाप्तेः त एते नानाजीवानामसंख्येयलोकप्रमाणाः परिणामविकल्पा नियमेन विषमा एव परस्परतः तेषां समुदायरूपमपूर्वकरणमत एवास्यात्यंतापूर्वत्वादन्वर्थसंज्ञा । अनिवृत्तिकरणकाले नानाजीवानां प्रथमसमये परिणामा एकरूपा एव द्वितीयसमये ततोनंतगुणा एकरूपा एवमांऽतर्मुहूर्तपरिसमाप्तेः, तेषां समुदायरूपमनिवृत्तिकरणमत एवास्यान्वर्थनाम परस्परतो निवृत्त्यभावादनिवृत्तिकरणमिति । अत्राथाप्रवृत्तकरणेपि स्थितिखंडनमनुभागखंडनं गुणश्रेणी गुणसंक्रमो वा नास्ति केवलमनंतगुणवृद्ध्या विशुद्ध्यत्र प्रशस्तप्रकृतीरनंतगुणानुभागहीना बध्नाति प्रशस्तप्रकृतीश्चानंतगुणरसवृद्ध्या । स्थितिमपि पल्योपमसंख्येयभागहीनां । अपूर्वकरणानिवृत्तिकरणयोः स्थितिखंडादीनि सभवंति स्थितिबंधश्च क्रमेण हीयते । अशुभप्रकृतीनामनुभवबंधोऽनंतगुणहान्या शुभप्रकृतीनां चानंतगुणवृद्ध्या वर्तते । तत्रानिवृत्तिकरणकारणसंख्येयेषु भागेषु गतेष्वंतरकरणमारभते येन मिथ्यादर्शनकर्मणः उदयघातः क्रियते ततश्चरमसमये मिथ्यादर्शनं त्रेधा विभक्तं करोति । सम्यक्त्वं मिथ्यात्वं सम्यङ्मिथ्यात्वं चेति । एतासां तिसृणां प्रकृतीनां अनंतानुबंधिक्रोधमानमायालोभानां चोदयाभावेऽतर्मुहूर्तकाले प्रथमसम्यक्त्वं भवति । तदंते जघन्येन एकसमये उत्कर्षेणावलिकाषट्कविशिष्टे यदानंतानुबंधिक्रोधमानमायालोभानामन्यतमस्योदयो भवति तदा सासादनसम्यग्दृष्टिरित्युच्यते अत एवास्यान्वर्थसंज्ञा । आसादनं विराधनं सहासादनेन वर्तत इति सासादना सासादना सम्यग्दृष्टिर्यस्य सोयं सासादनसम्यग्दृष्टिरिति, तस्य मिथ्यादर्शनोदयाभावेपि अनंतानुबंध्युदयात् त्रीणि ज्ञानानि अज्ञानान्येव भवंति अत एवास्यान्वर्थसंज्ञा । अनंतं मिथ्यादर्शनं तदनुबंधनादनंतानुबंधीति । स हि मिथ्यादर्शनोदयफलमापादयन् मिथ्यादर्शनमेव प्रवेशयति ।

सम्यङ्मिथ्यात्वोदयात् सम्यङ्मिथ्यादृष्टिः ॥ १४ ॥ सम्यङ्मिथ्यात्वसंज्ञिकायाः प्रकृतेरुदयात् आत्मा क्षीणाक्षीणमदशक्तिकोद्रवोपयोगापादितेषत्कलुषपरिणामवत् तत्त्वार्थश्रद्धानाश्रद्धानरूपः सम्यङ्मिथ्यादृष्टिरित्युच्यते । अत एवास्य त्रीणि ज्ञानानि अज्ञानमिश्राणि इत्युच्यते ।

सम्यक्त्वोपेतश्चारित्रमोहोदयादिपादिताऽविरतिरसंयतसम्यग्दृष्टिः ॥१५॥[3] औपशमिकेन क्षायोपशमिकेन क्षायिकेण वा सम्यक्त्वेन समन्वितः चारित्रमोहोदयात् अत्यंतमविरतिपरिणामप्रवणोऽसंयत-

---

१ अथ; प्रवृत्तकरणमित्यर्थः प्रसिद्धः । २ इतः समारभ्य । ३ एतदवसानो द्विरावृत्तः पाठः ग. पुस्तके समुपलब्धः; स च न सम्यगितिनिर्धाय न प्राकाशि ।

सम्यग्दृष्टिरिति व्यपदिश्यते। तस्य त्रीण्यपि ज्ञानानि सम्यग्ज्ञानव्यपदेशमर्हंति । तत्त्वार्थश्रद्धानसमावेशात् इत ऊर्ध्वं गुणस्थानेषु नियमेन सम्यक्त्वं ।

द्विविषयविरत्यविरतिपरिणतः संयतासंयतः ॥ १६ ॥ एतदादीनि गुणस्थानानि चारित्रमोहस्य क्षयोपशमादुपशमात् क्षयाच्च भवंति । तत्रानंतानुबंधिकषायाः क्षीणाः स्युरक्षीणा वा तथा अप्रत्याख्यानावरणकषाया वा प्रत्याख्यानावरणकषाया सर्वघातिन एव तेषामुदये सति संज्वलनकषायाः नव नोकषायाश्च देशघातिन एव तेषामुदये सति संयमासंयमलब्धिर्भवति । तद्योग्यया प्राणींद्रियविषयया विरताविरतवृत्त्या परिणतः संयतासंयत इत्याख्यायते ।

परिप्राप्तसंयमः प्रमादवान् प्रमत्तसंयतः ॥ १७ ॥ अनंतानुबंधिकषायेषु क्षीणेष्वक्षीणेषु वा प्राप्तोदयक्षयेषु अष्टानां कषायाणां उदयक्षयात् तेषामेव सदुपशमात् संज्वलननोकषायाणां उदये संयमलब्धिर्भवति । तन्मूलसाधनोपपादितोपजनं बाह्यसाधनसान्निधानाविर्भावमापद्यमानं प्राणेंद्रियविषयभेदात् द्वितयीं वृत्तिमास्कंदंतं संयमोपयोगमात्मसात् कुर्वन् पंचदशविधप्रमादवशात् किंचित्प्रस्खलितचारित्रपरिणामः प्रमत्तसंयत इत्याख्यायते ।

प्रमादविरहितोऽप्रमत्तसंयतः ॥ १८ ॥ पूर्ववत्संयममास्कंदन् पूर्वोक्तप्रमादविरहात् अविचलितसंयमवृत्तिः, अप्रमत्तसंयतः समाख्यायते। इत ऊर्ध्वं गुणस्थानानां चतुर्णां द्विश्रेण्यौ भवतः । उपसमश्रेणी क्षपकश्रेणी चेति। यत्र मोहनीयं कर्मोपशमयन्नात्मा आरोहति सोपशमकश्रेणी । यत्र तत्क्षयमुपगमयन्नुद्गच्छति सा क्षपकश्रेणी ।

अपूर्वकरणपरिणाम उपशमकः क्षपकश्चोपचारात् ॥ १९ ॥ अपूर्वकरणपरिणामस्तद्विशुद्धिवशेन श्रेणीमारोहयन्नपूर्वकरण इति व्यपदेशमश्नुते तत्र कर्मप्रकृतीनां नोपशमो नापि क्षयः किंतु पूर्वत्रोत्तरत्र च उपशम क्षयं वाऽपेक्ष्य उपशमकः क्षपक इति च घृतघटवदुपचर्यते ।

अनिवृत्तिपरिणामवशात् स्थूलभावेनोपशमकः क्षपकश्चानिवृत्तिवादरसांपरायौ ॥२०॥ पूर्वोक्तानिवृत्तिपरिणामस्तद्वशात् कर्मप्रकृतीनां स्थूलभावेनोपशमकः क्षपकश्चानिवृत्तिवादरसांपरायाविति भाष्यते। तत्र उपशमनीयाः क्षपणीयाश्च प्रकृतय उत्तरत्र वक्ष्यंते ।

सूक्ष्मभावेनोपशमात् क्षपणाच्च सूक्ष्मसांपरायौ ॥ २१ ॥ सांपरायः कषायः स यत्र सूक्ष्मभावेनोपशांतिं क्षयं च आपद्यते तौ सूक्ष्मसांपरायौ वेदितव्यौ ।

सर्वस्योपशमात् क्षपणाच्च उपशांतकषायः क्षीणकषायश्च ॥ २२ ॥ सर्वस्य मोहस्योपशमात् क्षपणाच्च उपशांतकषायः क्षीणकषाय इति च व्यपदेशमर्हतः ।

घातिकर्मक्षयादाविर्भूतज्ञानाद्यतिशयः केवली ॥ २३ ॥ घातिकर्मणां अत्यंतक्षयात् आविर्भूतस्वभावाचिंत्यकेवलज्ञानाद्यतिशयविभूतिर्भगवान् केवलीत्यभिलप्यते ।

स द्विविधो योगभावाभावभेदात् ॥ २४ ॥ स केवली द्विधा भिद्यते कुतः योगभावाभावभेदात् योगवान् सयोगीति गीयते तदभावादयोगीति च ।

तत्र मिथ्यात्वप्रत्ययस्य कर्मणः तदभावे संवरः शेषे ॥ २५ ॥ तत्र मिथ्यात्वप्राधान्येन यत्कर्मास्रवति तन्निरोधात शेषे सासादनसम्यग्दृष्ट्यादौ तत्संवरो भवति । किं पुनस्तन्मिथ्यात्वं —नपुंसकवेदनरकायुर्नरकगत्येकद्वित्रिचतुरिंद्रियजातिहुंडकसंस्थानाऽसंप्राप्तासृपाटिकासंहनननरकगतिप्रायोग्यानुपूर्व्याऽऽतपस्थावरसूक्ष्माऽपर्याप्तकसाधारणशरीरसंज्ञकषोडशप्रकृतिलक्षणं ।

असंयमस्त्रिविधोऽनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानोदयविकल्पात् ॥ २६ ॥ असंयमस्त्रिविधो वेदितव्यः कुतः ? अनंतानुबंध्यप्रत्याख्यानप्रत्याख्यानविकल्पात् ।

तत्प्रत्ययस्य तदभावे संवरः ॥ १७ ॥ तत्प्रत्ययस्य कर्मणः तदभावे संवरोऽवसेयः । तद्यथा निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्ध्यनंतानुबंधिक्रोधमानमायालोभस्त्रीवेदातिर्यगायुस्तिर्यग्गतिचतुःसंस्थानचतुःसंहननतिर्यग्गतिप्रायोग्यानुपूर्व्योद्योताऽप्रशस्तविहायोगतिदुर्भगदुःस्वरानादेयनीचैर्गोत्रसंज्ञकानां पंचविंशतिप्रकृतीनां अनंतानुबंधिकषायोदयकृतासंयमप्रधानास्रवाणां एकेंद्रियादयः सासादनसम्यग्दृष्ट्यंताः बंधकाः तदभावे तासामुत्तरत्र संवरः । अप्रत्याख्यानावरणक्रोधमानमायालोभमनुष्यायुर्मनुष्यगत्यौदारिकशरीरतदंगोपांगवज्रर्षभनाराचसंहननमनुष्यगतिप्रायोग्यानुपूर्व्यनामकानां दशानां प्रकृतीनां अप्रत्याख्यानकषायोदयकृतासंयमहेतूनां एकेंद्रियादयः असंयतसम्यग्दृष्ट्यंता बंधकाः तदभावादूर्ध्वं तासां संवरः । सम्यङ्मिथ्यात्वगुणेनायुर्न बध्यते प्रत्याख्यानावरणक्रोधमानमायालोभानां चतसृणां प्रकृतीनां प्रत्याख्यानकषायोदयकारणासंयमास्रवाणां एकेंद्रियप्रभृतयः संयतासंयतावसानाः बंधकाः । तदभावात् उपरिष्टात् तासां संवरः ।

प्रमादोपनीतस्य तदभावे निरोधः ॥ १८ ॥ प्रमादोपनीतस्य कर्मणः प्रमत्तसंयतादूर्ध्वं तदभावान्निरोधः प्रत्येतव्यः । किं पुनस्तत् ? असद्वेद्यारतिशोकास्थिराशुभायशस्कीर्तिविकल्पं । देवायुर्बंधारंभकस्य प्रमाद एव हेतुः, अप्रमादोपि तत्प्रत्यासन्नः । ततः ऊर्ध्वं तस्य संवरः ।

कषायास्रवस्य तन्निरोधे निरासः ॥ १९ ॥ कषाय एवास्रवो यस्य कर्मणः न प्रमादादिस्तस्य तन्निरोधे तन्निरासोऽवसेयः स एव कषायकः प्रमादादिविरहितः तीव्रमध्यमजघन्यभावेन त्रिषु गुणस्थानेषु व्यवस्थितः । तत्रापूर्वकरणस्यादौ संख्येयभागे द्वे कर्मप्रकृती निद्राप्रचले बध्येते । तत ऊर्ध्वं संख्येयभागे त्रिंशत्प्रकृतयो—देवगतिपंचेंद्रियजातिवैक्रियिकाहारकतैजसकार्मणशरीरसमचतुरस्रसंस्थानवैक्रियिकाहारकशरीरांगोपांगवर्णगंधरसस्पर्शदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातपरघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तकप्रत्येकशरीरस्थिरशुभसुभगसुस्वरादेयनिर्माणतीर्थकरनामाख्याः बध्यते । तस्यैव चरमसमये बंधकराः चतस्रः प्रकृतयः हास्यरतिभयजुगुप्सासंज्ञा बंधमुपयाति । ता एताः तीव्रकषायास्रवाः तदभावान्निर्दिष्टाद्भागादूर्ध्वं संव्रियंते । अनिवृत्तिबादरसांपरायस्यादिसमयादारभ्य संख्येयेषु भागेषु पुंवेदक्रोधसंज्वलनौ बंधमुपगच्छतः । तस्यैव चरमसमये लोभसंज्वलनो बंधमेति ता एताः प्रकृतयः मध्यमकषायास्रवाः, तदभावे निर्दिष्टस्य भागस्योपरिष्टात् संवरमाप्नुवंति । पंचानां ज्ञानावरणानां चतुर्दर्शनावरणानां यशस्कीर्तेरुच्चैर्गोत्रस्य पंचानामंतरायाणां च मंदकषायास्रवाणां सूक्ष्मसांपरायो बंधकः तदभावादुत्तरत्र तेषां संवरः ।

केवलयोगनिमित्तं सद्वेद्यं तदभावात्तस्य निरोधः ॥ २० ॥ केवलेनैव योगेन सद्वेद्यस्योपशांतकषायक्षीणकषायसयोगिनां बंधो भवति तदभावादयोगकेवलिनस्तस्य संवरो भवति ।

अत्राह आस्रवनिरोधः संवर इति व्याख्यातं तत्रेदमनिर्ज्ञानमात्मन्यात्महेतुसन्निधाने सत्यास्रवतां कर्मणां केन निरोधो भवतीति तत्र वक्तव्यमनेनास्रवनिरोधः ? इत्यत्रोच्यते—

सगुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैः ॥ २ ॥

संसारकारणगोपनाद्गुप्तिः ॥ १ ॥ यतः संसारकारणात् आत्मनो गोपनं भवति सा गुप्तिः । भावे क्तिः । अपादानसाधनो वा यतो गोपनं सा गुप्तिरिति, कर्तृसाधनो वा क्तिच् गोपयतीति गुप्तिरिति ।

सम्यगयनं समितिः ॥ २ ॥ परप्राणिपीडापरिहारेच्छया सम्यगयनं समितिः । संपूर्वादिणो भावे क्तिः । कर्तरि वा क्तिच् ।

इष्टे स्थाने धत्त इति धर्मः ॥ ३ ॥ आत्मानमिष्टे नरेंद्रसुरेंद्रमुनींद्रादिस्थाने धत्त इति धर्मः । उणादिषु निष्पादितः ।

स्वभावानुचिंतनमनुप्रेक्षा ॥ ४ ॥ शरीरादीनां स्वभावानुचिंतनमनुप्रेक्षा वेदितव्याः । अनुपूर्वादीक्षेः भावादिसाधनः, अकारः ।

परिषह्यत इति परीषहः ॥ ५ ॥ परिपूर्वात्सहेः कर्मण्यकारः परिषह्यत इति परीषहः। कथमकारः? पचादिलक्षणोच्। ननु स कर्तरि विहितः यस्तर्हि स करणाधिकरणयोर्विहितो घञ्? तर्हि कर्मण्येव। परीषाह इति प्राप्नोति अनुबंधकृतमनित्यं यथा ज्योतिषमिति। अथवा बहुलवचनात् कर्मण्यकारः 'अन्यस्यापीति' दीर्घः परीषहस्य जयः परीषहजयः।

चारित्रशब्दो व्याख्यातः ॥ ६ ॥ सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इत्यत्र चारित्रशब्दो व्याख्यातः। चर्यते तच्चारित्रमिति।

संवृण्वतो गुप्त्यादयः करणं ॥ ७ ॥ संवरणक्रियायाः साधकतमत्वविवक्षायां गुप्त्यादीनां करणभावः प्रत्येतव्यः। गुप्तिश्च समितिश्च धर्मश्चानुप्रेक्षा च परीषहजयश्च चारित्रं च गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्राणि तैर्गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रैरिति।

संवर एव गुप्त्यादय इति चेन्नास्रवनिमित्तकर्मसंवरणात् ॥ ८ ॥ स्यान्मतं संव्रियतेनेनेति संवरः गुप्त्यादिभिश्च कर्म संव्रियते गुप्त्यादय एव संवर इति भेदनिर्देशो नोपपद्यते इति? तन्न। किं कारणं? आस्रवनिमित्तकर्मसंवरणात्। संवरणमिह संवर इति संवर इति भावसाधनः। तस्य गुप्त्यादयः करणत्वेन निर्दिश्यंते। संव्रियते संवर इति कर्मसाधनो वा। गुप्त्यादिभिर्हि कर्म संव्रियत इति।

स इति वचनं गुप्त्यादिभिः साक्षात् संबंधनार्थं ॥ ९ ॥ संवरोधिकृतोपि पुन इति परामृश्यते। किमर्थं? गुप्त्यादिभिः साक्षात् संबंधनार्थं। तेन किं लब्धं? नियमः कृतो भवति स एव संवरो गुप्त्यादिभिरेव नान्येनोपायेनेति तेन तीर्थाभिषेकदीक्षाशीर्षोपहारदेवताराधनादयो निवर्तिता भवंति रागद्वेषमोहोपात्तस्य कर्मणः अन्यथा निवृत्त्यसंभवात्। यदि हि स्यात् मत्स्यादीनामपि सुलभो मोक्षः स्यात् रक्तद्विष्टमूढानां च। एषां तत्त्वभेदकथनं उत्तरत्र करिष्यते।

आह किमेतैरेव गुप्त्यादिभिः अयं संवरो निष्पाद्यते? न। किं तर्हि? अन्येन च। यद्येवमुच्यतां केन?

तपसा निर्जरा च ॥ ३ ॥

धर्मेंतर्भावात् पृथग्ग्रहणमनर्थकमिति चेन्न निर्जराकारणत्वख्यापनार्थत्वात् ॥ १ ॥ स्यान्मतं धर्मविकल्पेषु उत्तमक्षमादिषु तपो वक्ष्यते। ततः संवरहेतुत्वासिद्धेः पृथगस्य ग्रहणमनर्थकमिति? तन्न किं कारणं? निर्जराकारणत्वख्यापनार्थत्वात्।

तपो निर्जराकारणमपि भवतीति प्राधान्यप्रतिपत्त्यर्थं च ॥ २ ॥ सर्वेषु संवरहेतुषु प्रधानं तप इत्यस्य प्रतिपत्त्यर्थं च पृथग्ग्रहणं क्रियते।

संवरनिमित्तसमुच्चयार्थश्चशब्दः ॥ ३ ॥ संवरहेतुरपि तपो भवतीति एतस्य समुच्चयार्थश्चशब्दः क्रियते तपसा हि अभिनवकर्मसंबधाभावः पूर्वोपचितकर्मक्षयश्चाऽविपाकनिर्जराप्रतिज्ञानात् तस्मात्तपोजातीयत्वात् ध्यानानां निर्जराकारणप्रसिद्धिः।

तपसोभ्युदयहेतुत्वान्निर्जराभाव इति चेन्नैकस्यानेककार्यारंभदर्शनात् ॥४॥ स्यादेतत् तपोभ्युदयकारणमिष्टं देवेंद्रादिस्थानप्राप्तिहेतुत्वाभ्युपगमात्ततोस्य निर्जरांगत्वमनुपपन्नं? तन्न किं कारणं? एकस्यानेककार्यारंभदर्शनात्। यथाग्निरेको विक्लेदनभस्मसाद्भावनादिप्रयोजन उपलभ्यते। तथा तपोभ्युदयकर्मक्षयहेतुरित्यत्र को विरोधः?

गुणप्रधानफलोपपत्तेर्वा कृषीवलवत् ॥ ५ ॥ अथवा यथा कृषीवलस्य कृषिक्रियायां पलालस्य फलगुणप्रधानफलाभिसंबंधः तथा मुनेरपि तपःक्रियायां प्रधानोपसर्जनाभ्युदयनिःश्रेयसफलाभिसंबंधित्वा-

द्वितव्यः । आह गुप्त्यादय उद्दिष्टाः संवरहेतवः ते किंविषयाः कियत्प्रकाराः प्रत्येकं च किंसामर्थ्याः ? इत्यत्रोच्यते—

सति वह्वक्तव्ये आदावुद्देशभाजो गुप्तेरेव तावन्निर्धारणं क्रियते ।

सम्यग्योगनिग्रहो गुप्तिः ॥ ४ ॥

योगशब्दो व्याख्यातार्थः ॥ १ ॥ अयं योगशब्दो व्याख्यातार्थो द्रष्टव्यः । क ? कायवाङ्मनः-स्कर्म योग इत्यत्र ।

प्राकाम्याऽभावो निग्रहः ॥२॥ प्राकाम्यं यथेष्टं चारित्रं तस्याभावो निग्रह इत्याख्यायते, योगस्य निग्रहो योगनिग्रहः ।

सम्यगिति विशेषणं सत्कारलोकपंक्त्याद्याकांक्षानिवृत्त्यर्थं ॥ ३ ॥ पूजापुरस्सरा क्रिया सत्कारः संयतो महानिति, लोके प्रकाशः लोकपंक्तिः एवमादैहलौकिकमनुद्दिश्य पारलौकिकं च विषयसुखं अनपेक्ष्य क्रियमाणो निग्रहो गुप्तिरिह परिगृहीतेति प्रतिपत्त्यर्थं सम्यगिति विशेषणमुपादीयते ।

तस्मात्कायादिनिरोधात्तन्निमित्तकर्मानास्रवणे संवरप्रसिद्धिः ॥५॥ तस्मात् सम्यग्विशेषण विशिष्टात् संक्लेशाप्रादुर्भावपरात् कायादियोगनिरोधे सति तन्निमित्तं कर्म नास्रवतीति कृत्वा संवरप्रसिद्धिरव गंतव्या । तद्यथा तिस्रो गुप्तयः—कायगुप्तिः वाग्गुप्तिः मनोगुप्तिरिति । तत्र यत्कायकमनिभृतस्याप्रत्यवेक्षिताप्रमार्जितधरणिप्रदेशचंक्रमणद्रव्यांतराधाननिक्षेपशयनासनादिनिमित्तं कर्म संमूर्छति न तन्निगृहीतकायप्रचारस्याप्रमत्तस्यास्रोतुमर्हति । यच्च वाचिकमसंवृतस्यासत्प्रलापिनोऽप्रियवचनादिहेतुकं कर्म निपतति न तद्विनिवृत्तवाक्प्रयोगस्यास्रवति । यदपि मानसैः प्रदोषैः रागद्वेषाभिभूतस्यातीतानागतविषयाभिलाषिण आस्रवति न तदात्मीकृतमनसः कदाचिदप्युपनिपतति । आह यदि मूर्तिपरित्यागं कार्त्स्न्येन कर्तुमशक्नुवतः संक्लेश-निवृत्तये योगनिरोधः प्रतिज्ञायते स यावन्न भवति तावदनेनावश्यं प्राणयात्रानिमित्तं तत्प्रत्यनीकभावात् परिस्पंदः कर्तव्यः, वाक्प्रयोगो वा प्रश्नापेक्षः शरीरमलनिर्हरणार्थश्च तस्मिन् सति कथमस्य संवरः स्यादित्यत्रोच्यते—

ईर्याभाषैषणादाननिक्षेपोत्सर्गाः समितयः ॥ ५ ॥

सम्यग्ग्रहणेनाधिकृतेन प्रत्येकमभिसंबंधः ॥ १ ॥ सम्यगित्यनुवर्तते तेन प्रत्येकमिहाभिसंबंधः क्रियते । सम्यगीर्या सम्यग्भाषा सम्यगेषणा सम्यगादाननिक्षेपौ सम्यगुत्सर्ग इति ।

समितिरित्यन्वर्थसंज्ञा वा तांत्रिकी पंचानां ॥ २ ॥ समितिरितीयं अन्वर्थसंज्ञा सम्यगितिः समितिरिति । क प्रसिद्धा ? तांत्रिकी । केषां ? पंचानामीर्यादीनां ।

तत्र व्रज्यायां जीववधपरिहार ईर्यासमितिः ॥ ३ ॥ विदितजीवस्थानादिविधेर्मुनेः, धर्मार्थं प्रयतमानस्य सवितर्युदिते चक्षुषो विषयग्रहणसामर्थ्ये उपजाते मनुष्यादिचरणपातोपहतावश्यायप्रायमार्गे अनन्यमनसः शनैर्न्यस्तपादस्य संकुचितावयवस्य युगमात्रपूर्वनिरीक्षणावहितदृष्टेः पृथिव्यारंभाभावात् ईर्यासमितिरित्याख्यायते ।

अत्राह विदितजीवस्थानादिविधेरित्युक्तं तत्र न ज्ञायते कति जीवस्थानादीनि इत्यत्रोच्यते—

सूक्ष्मबादरैकद्वित्रिचतुरिंद्रियसंज्ञ्यसंज्ञिपंचेंद्रियपर्याप्तकापर्याप्तकभेदाच्चतुर्दश जीवस्थानानि ॥ ४ ॥ एकेंद्रियादयः प्राक् व्याख्यातलक्षणाः । तत्रैकेंद्रिया द्विविधाः सूक्ष्मा बादराः । तत्र सूक्ष्मा द्विविधाः पर्याप्तका अपर्याप्तकाः । बादरा द्विविधाः पर्याप्तका अपर्याप्तका इति । द्वींद्रिया द्विविधाः पर्याप्तका अपर्याप्तकाः त्रींद्रिया द्विविधाः पर्याप्तका अपर्याप्तकाः । चतुरिंद्रिया द्विविधाः पर्याप्तका अपर्याप्तकाः

पंचेंद्रिया द्विविधाः संज्ञिनोऽसंज्ञिनः। संज्ञिनो द्विविधाः पर्याप्तका अपर्याप्तकाः। असंज्ञिनो द्विविधाः पर्याप्तका अपर्याप्तकाश्च एवं जीवस्थानानि वेदितव्यानि। तानि नामोदयापादितविशेषाणि एकेंद्रियजातिसूक्ष्मवादरपर्याप्तकाऽपर्याप्तकनामोदयजनितानि चत्वारि जीवस्थानानि एकेंद्रियेषु। द्वींद्रियादिषु वादरनामोदय एव। विकलेंद्रियेषु द्वित्रिचतुरिंद्रियजातिपर्याप्तकापर्याप्तकनामोदयनिर्वर्तितानि षड्जीवस्थानानि। पंचेंद्रियेषु संज्ञ्यसंज्ञिपर्याप्तकापर्याप्तकनामोदयलब्धभेदानि चत्वारि जीवस्थानानि।

हितमितासंदिग्धाभिधानं भाषासमितिः ॥ ५ ॥ मोक्षपदप्रापणप्रधानं फलं हितं, तद्द्विविधं स्वहितं परहितं चेति। मितमनर्थकबहुप्रलपनरहितं स्फुटार्थं व्यक्ताक्षरं वाऽसंदिग्धं, एवंविधमभिधानं भाषासमितिः। तत्प्रपंचः—मिथ्याभिधानासूयाप्रियसंभेदाल्पसारशंकितसंभ्रांतकषायपरिहासाऽयुक्ताऽसभ्यनिष्ठुराधर्मविध्यदेशकालालक्षणातिसंस्तवादिवाग्दोषाविरताभिधानं।

अन्नादावुद्गमादिदोषवर्जनमेषणासमितिः ॥ ६ ॥ अनगारस्य गुणरत्नसंचयसंवाहिशरीरशकटिं समाधिपत्तनं निनीषतोऽक्षम्रक्षणमिव शरीरधारणमौषधमिव जाठराग्निदाहोपशमननिमित्तमन्नाद्यनास्वाद यतो देशकालसामर्थ्यादिविशिष्टमगर्हितमभ्यवहरतः उद्गमोत्पादनैषणासंयोजनप्रमाणकारणांगारधूमप्रत्ययनवकोटिपरिवर्जनमेषणासमितिरिति समाख्यायते।

धर्मोपकरणानां ग्रहणविसर्जनं प्रति यतनमादाननिक्षेपणा समितिः ॥७॥ धर्माविरोधिनां परानुपरोधिनां द्रव्याणां ज्ञानादिसाधनानां ग्रहणे विसर्जने च निरीक्ष्य प्रमृज्य प्रवर्तनमादाननिक्षेपणा समितिः।

जीवाविरोधेनांगमलनिर्हरणमुत्सर्गसमितिः ॥ ८ ॥ स्थावराणां जंगमानां च जीवादीनां अविरोधेनांगमलनिर्हरणं शरीरस्य च स्थापनं उत्सर्गसमितिः, अवगंतव्या।

वाक्कायगुप्तिरियमपीति चेन्न तत्र कालविशेषे सर्वनिग्रहोपपत्तेः ॥ ९ ॥ स्यान्मतं इर्यासमित्यादिलक्षणा वृत्तः वाक्कायगुप्तिः, रक्षणं प्राणिपीडापरिहार इत्यनर्थांतरमिति ? तन्न किं कारणं ? तत्र कालविशेषे सर्वनिग्रहोपपत्तेः। परिमितकालविषयो हि सर्वयोगनिग्रहो गुप्तिः। तत्रासमर्थस्य कुशलेषु वृत्तिः समितिरतो गमनभाषणाभ्यवहरणग्रहणनिक्षेपोत्सर्गलक्षणसमितिविधावप्रमत्तानां तत्प्रणालिकाप्रसृतकर्माभावान्निभृतानां प्रासीदत्संवरः।

पात्राभावात् पाणिपुटाहाराणां संवराभाव इति चेन्न परिग्रहदोषात् ॥ १० ॥ स्यादेतत् असति पात्रे पाणिपुटेन भुंजानस्य भिक्षोः पतिताहारनिमित्तप्राणातिपातदर्शनादेषणासमि[illegible]त्वात् संवराभाव इति ? तन्न। किं कारणं ? परिग्रहदोषात् नैस्संगीचर्यामातिष्ठमानस्य पात्रग्रहणे सति तत्संरक्षणाधिकृतो दोषः प्रसज्यते। तस्मात् स्वायत्तेन पाणिपुटेन निराबाधदेशे स्थित्वा परीक्ष्य भुंजानस्य निभृतस्य तद्गतदोषाभावः। किंच—

दैन्यप्रसंगात् ॥ ११ ॥ कपालमन्यद्वा भाजनमादाय पर्यटतो भिक्षोर्दैन्यमासज्यते। गृहिजनानीतमपि भाजनं सर्वत्र सुलभं तत्प्रक्षालनादिविधौ च दुःपरिहारः पापलेपः, स्वभाजनेन देशांतरं नीत्वा भोजने च आशानुबंधनं स्यात्। स्वपूर्वविशिष्टभाजनादिकगुणासंभवाच्च येन केनचित् भुंजानस्य दैन्यं स्यात्। ततः स्वकरपुटभाजनान्नान्यद्विशिष्टमस्ति भिक्षोः।

अन्नवत्तत्प्रसंग इति चेन्न तेन विनाऽभावात् ॥ १२ ॥ स्यादेतद्यथा प्रासव्यमन्नं संस्कृतं परमं परित्यज्य परगृहे यत्किंचित् असंस्कृतमन्नं अरसमनुभूयते भिक्षुणा तथा कपालाद्यादानमपि स्यादिति ? तन्न। किं कारणं ! तेन विनाऽभावात् चिरकालं तपः संचिकीर्षतः संयतस्य शरीरयात्रा आहारमंतरेण न संभवतीति यत्किंचित्प्रासुकं कादाचित्कमभ्युपगम्यते न तथा भाजनमिति असमंजसो दृष्टांतः।

आह उक्तं गुप्तिसमित्योः संवरहेतुत्वमिदानीं तदनंतरमुद्दिष्टस्य धर्मस्य संवरहेतुत्व संवर्णयितव्यमित्यत्रेदमुच्यते—

उत्तमक्षमामार्दवार्जवशौचसत्यसंयमतपस्त्यागाकिंचन्यब्रह्मचर्याणि धर्मः ॥ ६ ॥

किमर्थमिदमुच्यते—

प्रवर्तमानस्य प्रमादपरिहारार्थं धर्मवचनं ॥ १ ॥ आद्यं गुप्त्यादिप्रवृत्तिनिग्रहार्थं । तत्रासमर्थानां प्रवृत्त्युपायप्रदर्शनार्थं द्वितीयमेषणादि । इदं पुनर्दशविधधर्माख्यानं, प्रवर्तमानस्य प्रमादपरिहारार्थं वेदितव्यं ।

क्रोधोत्पत्तिनिमित्ताविषह्याक्रोशादिसंभवे कालुष्योपरमः क्षमा ॥ २ ॥ शरीरस्थितिहेतुमार्गणार्थं परकुलान्युपगच्छतो भिक्षोर्दुष्टजनाक्रोशोपसहनावज्ञानताडनशरीरव्यापादनादीनां क्रोधोत्पत्तिनिमित्तानां सन्निधाने कालुष्याभावः क्षमेत्युच्यते ।

जात्यादिमदावेशादभिमानाभावो मार्दवं ॥ ३ ॥ उत्तमजातिकुलरूपविज्ञानैश्वर्यश्रुतलाभवीर्यस्यापि सतस्तत्कृतमदावेशाभावात् परप्रयुक्तपरिभवनिमित्ताभिमानाभावो मार्दवं माननिर्हरणमवगंतव्यं ।

योगस्यावक्रतार्जवं ॥ ४ ॥ योगस्य कायवाङ्मनोलक्षणस्यावक्रता आर्जवमित्युच्यते ।

प्रकर्षप्राप्ता, लोभनिवृत्तिः शौचं ॥ ५ ॥ लोभस्य निवृत्तिः प्रकर्षप्राप्ता, शुचेर्भावः कर्म च शौचमिति निश्चीयते ।

गुप्तावंतर्भाव इति चेन्न तत्र मानसपरिस्पंदप्रतिषेधात् ॥ ६ ॥ स्यादेतत् मनोगुप्तौ शौचमंतर्भवतीति पृथग्ग्रहणमनर्थकमिति ? तन्न । किं कारणं ? तत्र मानसपरिस्पंदप्रतिषेधात् । मनोगुप्तौ हि मानसः परिस्पंदः सकलः प्रतिषिध्यते तत्रासमर्थेषु परकीयेषु वस्तुषु अनिष्टप्रणिधानोपरमार्थमिदमुच्यते ।

आकिंचन्येऽवरोध इति चेन्न तस्य नैर्मम्यप्रधानत्वात् ॥ ७ ॥ स्यादेतत् आकिंचन्यं वक्ष्यते तत्रास्यावरोधात् शौचग्रहणं पुनरुक्तमिति ? तन्न । किं कारणं ? तस्य नैर्मम्यप्रधानत्वात् । स्वशरीरादिषु संस्काराद्यपोहार्थमाकिंचन्यमिष्यते ।

तच्चतुर्विधं जीवितारोग्येंद्रियोपभोगभेदात् ॥ ८ ॥ लोभश्चतुःप्रकारः—जीवनलोभ आरोग्यलोभ इंद्रियलोभ उपभोगलोभश्चेति स प्रत्येकं द्विधा भिद्यते स्वपरविषयत्वात् अतस्तन्निवृत्तिलक्षणं शौचं चतुर्विधमवसेयं ।

सत्सु साधुवचनं सत्यं ॥ ९ ॥ सत्सु प्रशस्तेषु जनेषु साधुवचनं सत्यमित्युच्यते । तद्दशप्रकारं व्याख्यातं ।

भाषासमितावंतर्भाव इति चेन्न तत्र साध्वसाधुभाषाव्यवहारे हितमितार्थत्वात् ॥ १० ॥ स्यादेतत् सत्यग्रहणमनर्थकं ? कुतः भाषासमितावंतर्भावात् इति ? तन्न किं कारणं ? तत्र साध्वसाधुभाषाव्यवहारे हितमितार्थत्वात् । संयतो हि साधुषु असाधुषु च भाषाव्यवहारं कुर्वन् हितं मितं च ब्रूयात् । अन्यथा रागानर्थदंडादिदोषानुषंगः स्यादिति समितिलक्षणमुक्तं । इह पुनः संतः प्रव्रजितास्तद्भक्ता वा तेषु साधु सत्यं ज्ञानचारित्रशिक्षणादिषु बह्वपि वक्तव्यमित्यनुज्ञायते धर्मोपबृंहणार्थं । अथ कः संयमः ? कश्चिदाह—भाषादिनिवृत्तिरिति ।

न भाषादिनिवृत्तिः संयमो गुप्त्यंतर्भावात् ॥ ११ ॥ गुप्तिर्हि निवृत्तिप्रवणा अतोत्रांतर्भावात् संयमाभावः स्यात् । अपर आह कायादिप्रवृत्तिर्विशिष्टा, संयम इति ।

नापि कायादिप्रवृत्तिर्विशिष्टा समितिप्रसंगात् ॥ १२ ॥ समितयो हि कायादिप्रवृत्तिदोषनिवृत्तयः अतस्तत्रांतर्भावः प्रसज्यते ।

त्रसस्थावरवधप्रतिषेध आत्यंतिकः संयम इति चेन्न परिहारविशुद्धिचारित्रांतर्भावात्॥१३॥ अथ मतं द्वींद्रियादीनां त्रसानां पृथिवीकायिकादीनां स्थावराणां च प्राणिनां वधप्रतिषेध आत्यंतिकः संयम इति तदपि नोपपद्यते । कुतः ? परिहारविशुद्धिचारित्रांतर्भावात् । वक्ष्यते हि चारित्रभेदेषु परिहारविशुद्धिलक्षणं चारित्रमिति तत्रांतर्भावात् पृथक् संयमग्रहणं अनर्थकं स्यात् । कस्तर्हि संयमः ।

समितिषु प्रवर्तमानस्य प्राणींद्रियपरिहारः संयमः ॥ १४ ॥ ईर्यासमित्यादिषु वर्तमानस्य मुनेस्तत्परिपालनार्थः प्राणींद्रियपरिहारः संयम इत्युच्यते । एकेंद्रियादिप्राणिपीडापरिहारः प्राणिसंयमः । शब्दादिष्विंद्रियार्थेषु रागानभिष्वंग इंद्रियसंयमः ।

अतोपहृतसंयमभेदसिद्धिः ॥ १५ ॥ एव च कृत्वाऽपहृतसंयमभेदसिद्धिर्भवति । संयमो हि द्विविधः–उपेक्षासंयमोऽपहृतसंयमश्चेति देशकालविधानज्ञस्य परोपरोधेन उत्कृष्टकायस्य त्रिधागुप्तस्य रागद्वेषानभिष्वंगलक्षण उपेक्षासंयमः । अपहृतसंयमस्त्रिविधः उत्कृष्टो मध्यमो जघन्यश्चेति । तत्र प्रासुकवसत्याहारमात्रबाह्यसाधनस्य स्वाधीनेतरज्ञानचरणकरणस्य बाह्यजंतूपनिपाते आत्मानं ततोपहृत्य जीवान् परिपालयत उत्कृष्टः, मृदुना प्रमृज्य जीवान् परिहरतो मध्यमः, उपकरणांतरेच्छया जघन्यः ।

तत्प्रतिपादनार्थः शुद्ध्यष्टकोपदेशः ॥ १६ ॥ तस्यापहृतसंयमस्य प्रतिपादनार्थः शुद्ध्यष्टकोपदेशो द्रष्टव्यः । तद्यथा—अष्टौ शुद्धयः—भावशुद्धिः कायशुद्धिः विनयशुद्धिः ईर्यापथशुद्धिः भिक्षाशुद्धिः प्रतिष्ठापनशुद्धिः शयनासनशुद्धिः वाक्यशुद्धिश्चेति । तत्र भावशुद्धिः कर्मक्षयोपशमजनिता मोक्षमार्गरुच्याहितप्रसादा रागाद्युपप्लवरहिता तस्यां सत्यां आचारः प्रकाशते परिशुद्धभित्तिगतचित्रकर्मवत् । कायशुद्धिर्निरावरणाभरणा निरस्तसंस्कारा यथाजातमलधारिणी निराकृतांगविकारा सर्वत्र प्रयतवृत्तिः प्रशमसुखं मूर्तिमिव प्रदर्शयंतीति तस्यां सत्यां न स्वतोस्य भयमुपजायते नाप्यन्यतः तस्य । विनयशुद्धिः अर्हदादिषु परमगुरुषु यथार्ह पूजाप्रवणा ज्ञानादिषु च यथाविधिभक्तियुक्ता गुरोः सर्वत्रानुकूलवृत्तिः प्रश्नस्वाध्यायवाचनाकथाविज्ञप्त्यादिषु प्रतिपत्तिः कुशला देशकालभावावबोधनिपुणा आचार्यानुमतचारिणी, तन्मूलाः सर्वसंपदः । सैषा भूषा पुरुषस्य सैव नौः संसारसमुद्रतरणे । ईर्यापथशुद्धिः नानाविधजीवस्थानयोन्याश्रयावबोधजनितप्रयत्नपरिहृतजंतुपीडाज्ञानादित्यस्वेंद्रियप्रकाशनिरीक्षितदेशगामिनी द्रुतविलंबितसंभ्रांतविस्मितलीलाविकारदिगंतरावलोकनादिदोषरहितगमना तस्यां सत्यां संयमः प्रतिष्ठितो भवति विभव इव सुनीतौ । भिक्षाशुद्धिः परीक्षितोभयप्रचारा, प्रमृष्टपूर्वापरस्वांगप्रदेशविधाना आचारसूत्रोक्तकालदेशप्रवृत्तिप्रतिपत्तिकुशला लाभालाभमानापमानसमानमनोवृत्तिः लोकगर्हितकुलपरिवर्जनपरा चंद्रगतिरिव हीनाधिकगृहा, विशिष्टोपस्थाना दीनानाथदानशाला विवाहयजनगेहादिपरिवर्जनोपलक्षिता दीनवृत्तिविगमा प्रासुकाहारगवेषणप्रणिधाना आगमविहितनिरवद्याशनपरिप्राप्तप्राणयात्राफला, तत्प्रतिबद्धा हि चरणसंपत् गुणसंपदिव साधुजनसेवानिबंधना सा लाभालाभयोः सुरसविरसयोश्च समसंतोषाद्भिक्षेति भाष्यते यथा सलीलसालंकारवरयुवतिभिरुपनीयमानघासो गौर्न तदंगगतसौंदर्यनिरीक्षणपरः तृणमेवात्ति । यथा वा तृणोल्लूपं नानादेशस्थं यथालाभमभ्यवहरति न योजनासंपदमवेक्षते तथा भिक्षुरपि भिक्षापरिवेषकजनमृदुललितरूपवेषविलासावलोकननिरुत्सुकः शुष्कद्रवाहारयोजनाविशेषं चानवेक्षमाणः यथागतमश्नाति इति गौरिव चारो गोचार इति व्यपदिश्यते । तथा गवेषिणेति च यथा शकटं रत्नभारपरिपूर्णं येन केनचित् स्नेहेन अक्षलेपं च कृत्वा अभिलषितदेशांतरं वणिगुपनयति तथा मुनिरपि गुणरत्नभरितांततनुशकटीमनवद्यभिक्षायुरक्षम्रक्षणेन अभिप्रेतसमाधिपत्तनं प्रापयतीत्यक्षम्रक्षणमिति च नामरूढं । यथा भांडागारे समुत्थितमनलं अशुचिना शुचिना वा वारिणा शमयति गृही तथा यतिरपि उदराग्निप्रशमनमिति च निरुच्यते । दातृजनबाधया विना कुशलो मुनिर्भ्रमरवदाहरतीति भ्रमराहार इत्यपि परिभाष्यते । येन केनचित्प्रकारेण स्वभ्रपूरणवदुदरगर्तमनगारः पूरयति स्वादुनेतरेण वेति स्वभ्रपूरणमिति च निरुच्यते । प्रतिष्ठापनशुद्धिपरः संयतः नखरोमसिंघाणकनिष्ठीवनशुक्रोच्चारप्रस्रवणशोधने देहपरित्यागे च विदितदेशकालो जंतूपरोधमंतरेण प्रयतते । संयतेन शयनासनशुद्धिपरेण स्त्री-

क्षुद्रचौरपानाक्षशौण्डशाकुनिकादिपापजनवासा वर्ज्याः शृंगारविकारभूषणोज्ज्वलवेषवेश्याक्रीडाभिरामगीतनृत्यवादित्राकुलशालादयश्च परिहर्तव्याः अकृत्रिमगिरिगुहातरुकोटरादयः कृत्रिमाश्च शून्यागारादयो मुक्तमोचितावासाः अनात्मोद्देशनिवर्तिताः निरारंभाः सेव्याः । वाक्यशुद्धिः पृथिवीकायिकारंभादिप्रेरणरहिताः परुषनिष्ठुरादिपरपीडाकरप्रयोगनिरुत्सुका व्रतशीलदेशनादिप्रधानफला हितमितमधुरमनोहरा संयतस्य योग्या तदधिष्ठाना हि सर्वसंपदः ॥

तपो वक्ष्यमाणभेदं ॥ १७ ॥ कर्मक्षयार्थं तप्यत इति तपः, तदुत्तरत्र वक्ष्यमाणं द्वादशविकल्पं अवसेयं ।

परिग्रहनिवृत्तिस्त्यागः ॥ १८ ॥ परिग्रहस्य चेतनाचेतनलक्षणस्य निवृत्तिस्त्याग इति निश्चीयते ।

अभ्यंतरतपोविशेषोत्सर्गग्रहणात्सिद्धिरितिचेन्न तस्यान्वर्थत्वात् ॥ १९ ॥ स्यान्मतं वक्ष्यते तपोऽभ्यंतरं षड्विधं तत्रोत्सर्गलक्षणेन तपसा ग्रहणमस्य सिद्धमित्यनर्थकं त्यागग्रहणमिति तन्न । किं कारणं ? तस्यान्वर्थत्वात् । तद्धि नियतकालं सर्वोत्सर्गलक्षणं । अयं पुनस्त्यागः, यथाशक्ति अनियतकालः क्रियते इत्यस्ति भेदः ।

शौचवचनात्सिद्धिरिति चेन्न तत्रासत्यपि गर्द्धोत्पत्तेः ॥ २० ॥ अथ मतं व्याख्यातं शौचं तत्रास्यांतर्भावात् त्यागग्रहणमनर्थकमिति ? तन्न किं कारणं ? तत्रासत्यपि गर्द्धोत्पत्तेः असन्निहिते परिग्रहे कर्मोदयवशात् गर्द्ध उत्पद्यते तन्निवृत्त्यर्थं शौचमुक्तं । त्यागः पुनः सन्निहितस्यापायः दान वा स्वयोग्यं, अथवा संयतस्य योग्यं ज्ञानादिदानं त्याग इत्युच्यते ।

ममेदमित्यभिसंधिनिवृत्तिराकिंचन्यं ॥ २१ ॥ उपात्तेषु अपि शरीरादिषु संस्कारापोहाय ममेदमित्याभिसंधिनिवृत्तिराकिंचन्यमित्याख्यायते । नास्य किंचनास्ति इत्यकिंचनः तस्य भावः कर्म चाकिंचन्यं ।

अनुभूतांगनास्मरणतत्कथाश्रवणस्त्रीसंशक्तशयनासनादिवर्जनाद्ब्रह्मचर्यं ॥ २२ ॥ मयानुभूतांगना कलागुणविशारदा इति स्मरणं तत्कथाश्रवणं रतिपरिमलादिवासितस्त्रीसंशक्तशयनासनमित्येवमादिवर्जनात् परिपूर्णब्रह्मचर्यमवतिष्ठते ।

स्वातंत्र्यार्थं गुरौ ब्रह्मणि चर्यमिति वा ॥ २३ ॥ अथवा ब्रह्म गुरुस्तस्मिंश्चरणं तदनुविधानधर्मस्वातंत्र्यप्रतिपत्त्यर्थं ब्रह्मचर्यमित्याचर्यते ।

अन्वर्थसंज्ञाप्रतिपादनार्थत्वाद्वा पौनरुक्त्यं ॥ २४ ॥ अथवा सर्वेषामेव परिहारः । यद्यपि गुप्तिसमित्यादिष्वंतर्भूताः केचन इहोपदिश्यंते तथापि तेषां संवरणधारणसामर्थ्याद्धर्म इत्येषा संज्ञा अन्वर्थेति प्रतिपादनार्थं पुनर्वचनमिति नास्ति पौनरुक्त्यं ।

तद्भावनाप्रवणत्वाद्वा सप्तप्रकारप्रतिक्रमणवत् ॥ २५ ॥ अथवा ऐर्यापथिकरात्रिंदिवीयपाक्षिकचातुर्मासिकसांवत्सरिकोत्तमस्थानीकलक्षणं सप्तप्रकारप्रतिक्रमणं गुप्त्यादिप्रतिष्ठानार्थं भाव्यते । तथोत्तमक्षमादिदशविधधर्मभावना गुप्त्यादिपरिपालनार्थैवेति तत्रांतर्भूतानामपि पृथगुपदेशो युक्तः ।

उत्तमविशेषणं दृष्टप्रयोजनपरिवर्जनार्थं ॥ २६ ॥ यत्किंचिद्दृष्टं प्रयोजनमनुद्दिश्य क्रियमाणानि क्षमादीनि संवरणकारणानि भवंतीत्यस्य विशेषस्य प्रतिपत्त्यर्थमुत्तमविशेषणमुपादीयते । उत्तमक्षमा उत्तममार्दवमित्यादि । कथं पुनरेषां संवरहेतुत्वमिति चेदत्रोच्यते ।

सर्वेषां स्वगुणप्रतिपक्षदोषभावनात् संवरहेतुत्वं ॥ २७ ॥ सर्वेषामेवैषां उत्तमक्षमादीनां स्वगुणस्य प्रतिपक्षदोषस्य भावनात् संवरहेतुत्वमवसेयं । तद्यथा—उत्तमक्षमायास्तावत्—व्रतशीलपारिरक्षणमिहामुत्र च दुःखानभिष्वंगः सर्वस्य जगतः सम्मानसत्कारभावपरिपद्भृत्यादिगुणः तत्प्रतिपक्षस्य क्रोधस्य धर्मार्थकाममोक्षप्राणनाशनं दोष इति विचिंत्य क्षमितव्यं । किंच—

क्रोधनिमित्तस्य स्वात्मभावानुचिंतनात् ॥ २८ ॥ परैः प्रयुक्तस्य क्रोधनिमित्तस्य आत्मनि भावचिंतनं तावद्विद्यंते मय्येते दोषाः । किमत्रासौ मिथ्या ब्रवीतीति क्षमितव्यमभावचिंतनादपि नैते मयि विद्यंते दोषाः अज्ञानादसौ ब्रवीति इति क्षमा कार्या । अपि च बालस्वभावचिंतनं परोक्षप्रत्यक्षाक्रोशताडनमारणधर्मभ्रंशनानामुत्तरोत्तररक्षार्थं । तद्यथा—परोक्षमाक्रोशति बाले क्षमितव्यं एवं स्वभावा हि बाला भवंति दिष्ट्या च मां परोक्षमाक्रोशति न प्रत्यक्षमेतदपि विद्यते बालेष्विति लाभ एव मंतव्यः । प्रत्यक्षमाक्रोशति षोढव्यं विद्यत एतत् बालेषु दिष्ट्या च मां प्रत्यक्षमाक्रोशति न ताडयति, एतदपि विद्यते बालेष्विति लाभ एव मंतव्यः । ताडयत्यपिं च मर्षितव्यं दिष्ट्या च मां ताडयति न प्राणैर्वियोजयति इत्येतदपि विद्यते बालेष्विति लाभ एव मंतव्यः । प्राणैर्वियोजयत्यपि तितिक्षा कर्तव्या दिष्ट्या च मां प्राणैर्वियोजयति न धर्माद्भ्रंशयति इति । किंचान्यत् ममैवापराधे यत्पुराचरितं तन्महदुष्कर्मः तत्फलमिदमाक्रोशवचनादि निमित्तमात्रं परोत्रेति सहितव्यं । मार्दवोपेतं गुरवोऽनुगृण्हंति साधवः साधु-मन्यंते ततश्च सम्यग्ज्ञानादीनां पात्रीभवति । ततः स्वर्गापवर्गफलावाप्तिः । मतिमलिने मनसि व्रतशीलानि नावतिष्ठंते । साधवश्चैनं परित्यजंति च । तन्मूलाः सर्वा विपदः । ऋजुहृदयमधिवसंति गुणाः मायाचारं नाश्रयंतेऽगर्हिता च गतिर्भवति । शुच्याचारमिहापि सन्मानयंति, सर्वे विश्रंभादयश्च गुणाः तमधितिष्ठंति, लोभभावनाक्रांता हृदये नावकाशं लभंते गुणाः, इह चामुत्र चाऽचिंत्यं व्यसनमसावश्नुते, सत्यवाचि प्रतिष्ठिताः सर्वाः गुणसंपदः । अनृतभाषिणं बंधवोपि अवमन्यते, मित्राणि च परित्यजंति, जिह्वाछेदनसर्वस्वहरणादि व्यसनभागपि भवति, संयमो ह्यात्महितः तमनुतिष्ठन्निहैव पूज्यते परत्र किमस्ति वाच्यं असंयतः प्राणवधविषयपरागेषु नित्यप्रवृत्तकर्माशुभं संचिनुते तपः सर्वार्थसाधनं तत एव ऋद्धयः संजायंते । तपस्विभिरध्युषितान्येव क्षेत्राणि लोके तीर्थमुपगतानि तद्यस्य न विद्यते स तृणाल्लघुर्लक्ष्यते मुंचंति तं सर्वे गुणाः, नासौ मुंचति संसारं, उपधित्यागः पुरुषहितः यतो यतः परिग्रहादपेतः ततस्ततोस्य खेदो व्यपगतो भवति निरवद्ये मनःप्रणिधानं पुण्यविधानं परिग्रहाशा बलवती सर्वदोषप्रसवयोनिः न तस्या उपधिभिः तृप्तिरस्ति सलिलैरिव सलिलनिधेरिह वडवाया अपि च कः पूरयति दुःपूरमाशागर्तं दिनेदिने यत्रास्तमस्तमाधेयमाधारत्वाय कल्पते । शरीरादिषु निर्ममत्वः परमनिर्वृत्तिमवाप्नोति । शरीरादिषु कृताभिष्वंगस्य सर्वकालमभिष्वंग एव संसारे, ब्रह्मचर्यमनुपालयंतं हिंसादयो दोषा न स्पृशंति । नित्याभिरतगुरुकुलावासमधिविसंति गुणसंपदः । वरांगनाविलासविभ्रमविषयीकृतः पापैरपि विषयीक्रियते । अजितेंद्रियता हि लोके प्राणिनाशधात्रीत्येवमुत्तमक्षमादिषु तत्प्रतिपक्षेषु च गुणदोषविचारपूर्विकायां क्रोधादिनिवृत्तौ सत्यां तन्निबंधनकर्मास्रवाभावात् महान् संवरो भवति ।

व्यक्तिवचनभेदात् निर्देशवैलक्षण्यमिति चेन्न सर्वेषां धर्मभावाव्यतिरेकस्यैकत्वादाविष्टलिंगत्वाच्च ॥ २९ ॥ स्यान्मतं यथा शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रं शुक्लौ कंबलौ शुक्लाः कंबला इति सामानाधिकरण्ये व्यक्तिवचनयोरभेदो दृश्यते नच तथेहाभेदः ततो निर्देशो विलक्षणः इति ? तन्न किं कारणं ? सर्वेषां धर्मभावाव्यतिरेकस्यैकत्वात् सर्वेषूत्तमक्षमादिषु संवरणलक्षणो धर्मभावः अस्ति सच एकः तस्य विवक्षितत्वात् एकवचननिर्देशः । आविष्टलिंगश्च धर्मशब्दः नान्यसंबंधे स्वलिंगं जहाति । आह क्रोधाद्यनुत्पत्तिः क्षमादिविशेषप्रत्यनीकालंबनादित्युक्तं तत्र कस्मात् क्षमादीनयमवलंबते नान्यथा वर्तते इत्युच्यते यस्मात्तप्तायस्पिंडवत् क्षमादिपरिणतेनात्महितैषिणा कर्तव्या ।

अनित्याशरणसंसारैकत्वान्यत्वाशुच्यास्रवसंवरनिर्जरा लोकबोधिदुर्लभधर्मस्वाख्यातत्त्वानुचिंतनमनुप्रेक्षाः ॥ ७ ॥

उपात्तानुपात्तद्रव्यसंयोगव्यभिचारस्वभावोऽनित्यत्वं ॥ १ ॥ आत्मना रागादिपरिणामात्मना कर्मनोकर्मभावेन गृहीतानि उपात्तानि पुद्गलद्रव्याणि अनुपात्तानि परमाण्वादीनि तेषां द्रव्यात्मना नित्यत्वं पर्यायात्मना सततं अनुपरतभेदसंसर्गवृत्तित्वादनित्यत्वं । इमानि शरीरेंद्रियविषयोपभोगद्रव्याणि

समुदयरूपाणि जलबुद्बुदवदनवस्थितिस्वभावानि गर्भादिषु अवस्थाविशेषेषु सहोपलभ्यमानसंयोगविपर्ययाणि मोहादत्राज्ञो नित्यतां मन्यते न किंचित्संसारे समुदितं ध्रुवमस्ति आत्मनो ज्ञानदर्शनोपयोगस्वभावादन्यदिति चिंतनमनित्यत्वानुप्रेक्षा एवं ह्यस्य चिंतयतस्तेषु अभिष्वंगाभावात् भुक्तोज्झितगंधमाल्यादिषु इव वियोगकालेपि विनिपातो नोत्पद्यते ।

क्षुधितव्याघ्राभिद्रुतमृगशावकवज्जंतोर्जरामृत्युरुजांतके परित्राणाभावो शरणं ॥ २ ॥ शरणं द्विविधं लौकिकं लोकोत्तरं च । तत्प्रत्येकं त्रिधा जीवाजीवमिश्रकभेदात् तत्र राजा देवता लौकिकं जीवशरणं, दुर्गादिकं लौकिकमजीवशरणं । ग्रामनगरादि मिश्रकं । पंच गुरवो लोकोत्तरं जीवशरणं, तत्प्रतिबिंबाद्यजीवशरणं, सधर्मोपकरणसाधुवर्गो मिश्रकशरणं । तत्र यथा मृगशावस्य एकांते बलवता क्षुधितेन आमिषैषिणा व्याघ्रेणाभिद्रुतस्य न किंचित् शरणमस्ति तथा जन्मजरामृत्युव्याधिप्रियविप्रयोगाप्रियसंयोगेप्सितालाभदारिद्र्यदौर्मनस्यादिसमुत्थितेन दुःखेनाभिभूतस्य जंतोः शरणं न विद्यते, परिपुष्टमपि शरीरं भोजनं प्रति सहायि भवति न व्यसनोपनिपाते । यत्नेन संचिता अपि न भवांतरमनुगच्छाति संविभक्तसुखदुःखाः सुहृदोपि न मरणकाले परित्रायते । बंधवः समुदिताश्च रुजा परीतं न परियांति अस्ति चेत् सुचरितो धर्मो व्यसनमहार्णवे तरणोपायो भवति । मृत्युना नीयमानस्य सहस्रनयनादयोपि न शरणं तस्माद्भवव्यसनसंकटे धर्म एव शरणं । सुहृदर्थोपि अनपायी नान्यत्किंचिच्छरणमिति भावनमशरणानुप्रेक्षा । एवं ह्यस्याध्यवस्यतः नित्यमशरणोस्मीति भृशमुद्विग्नस्य सांसारिकेषु भावेषु ममत्वविगमो भवति । भगवदर्हत्सर्वज्ञप्रतीते एव वचसि प्रतिपन्नो भवेत ॥

द्रव्यादिनिमित्ता आत्मनो भवांतरावाप्तिः संसारः ॥ ३ ॥ चतुर्विधात्मावस्था संसारः असंसारः नोसंसारः तत्त्रितयव्यपायश्चेति । तत्र संसारश्चतसृषु गतिषु नानायोनिविकल्पासु परिभ्रमणं, अनागतिरसंसारः शिवपदपरमामृतसुखप्रतिष्ठा, नोसंसारः सयोगकेवलिनः चतुर्गतिभ्रमणाभावात् असंसारः प्राप्त्यभावाच्च ईषत्संसारः नोसंसार इति । अयोगकेवलिनः तत्त्रितयव्यपायः, तत्र भ्रमणाभावात् सयोगकेवलिवत् । प्रदेशपरिस्पंदविगमात् असंसाराप्राप्त्यभावाच्च । देहपरिस्पंदाभावेपि देहिनः सततं प्रदेशचलनमस्ति ततः सदा संसार एव । सिद्धानामयोगकेवलिनां च नास्ति प्रदेशचलनं इतरेषां त्रिधावसीयते । स पुनः संसारः कश्चिदनादिनिधनः अभव्यापेक्षया, भव्यसामान्यार्पणया च कश्चित् अनादिरुच्छेदवान्, भव्यविशेषापेक्षया सादिः सनिधनः । नोसंसार अनिधनः सादिरसंसारः तत्त्रितयव्यपायोऽन्तर्मुहूर्तकालः । तत्र द्रव्यनिमित्तः संसारश्चतुर्विधः कर्मनोकर्मवस्तुविषयाश्रयभेदात् । तत्र क्षेत्रहेतुको द्विविधः स्वक्षेत्रपरक्षेत्रविकल्पात् । लोकाकाशतुल्यप्रदेशस्यात्मनः कर्मोदयवशात् संहरणविसर्पणधर्मणः हीनाधिकप्रदेशपरिणामावगाहित्वं स्वक्षेत्रसंसारः संमूर्छनगर्भोपपादजन्मनवयोनिविकल्पाद्यालंबनः परक्षेत्रसंसारः । कालो द्विविधः परमार्थरूपो व्यवहाररूपश्चेति तयोर्लक्षणं प्राग्व्याख्यातं । तत्र परमार्थकालवर्तितपरिस्पंदेतरपरिणामविकल्पः तत्पूर्वककालव्यपदेशौपचारिककालत्रयवृत्तिः कालसंसारः । भवनिमित्तः संसारः द्वात्रिंशद्विः : पृथिव्यप्तेजोवायुकायिकाः प्रत्येकं चतुर्विधाः सूक्ष्मबादरपर्याप्तकापर्याप्तकभेदात् । वनस्पतिकायिकाः द्वेधा प्रत्येकशरीराः साधारणाश्चेति । प्रत्येकशरीराः द्वेधा पर्याप्तकापर्याप्तकभेदात् । साधारणशरीराश्चतुर्धा सूक्ष्मबादरपर्याप्तकापर्याप्तकविकल्पात् विकलेंद्रियाः प्रत्येकं द्विधा पर्याप्तकापर्याप्तकविकल्पात् पंचेंद्रियाश्चतुर्धा संज्ञ्यसंज्ञिपर्याप्तकापर्याप्तकापेक्षयेति । भावनिमित्तः संसारो द्वेधा स्वभावपरभावात् स्वभावो मिथ्यादर्शनादिः परभावो ज्ञानावरणादिः कर्मरसादिः एवमेतस्मिन्ननेकानेककुयोनिकुलकोटिबहुशतसहस्रसंकटे संसारे परिभ्रमन् जीवः कर्मयंत्रप्रेरितः पिता पितामहो भूत्वा भ्राता पुत्रः पौत्रश्च भवति माता भूत्वा भगिनी भार्या दुहिता च भवति किं बहुना स्वयमात्मनः पुत्रो भवतीत्येवमादि संसारस्वभावचिंतनं संसारानुप्रेक्षा । एवं ह्यस्य भावयतः संसारदुःखभयादुद्विग्नस्य ततो निर्वेदो भवति निर्विण्णश्च संसारप्रहरणाय प्रतियतते ।

जन्मजरामरणावृत्तिमहादुःखानुभवनं प्रति सहायानपेक्षत्वमेकत्वं ॥ ४ ॥ एकत्वमनेकत्वमित्येतदुभयं द्रव्यक्षेत्रकालभावविकल्पं। तत्र द्रव्यैकत्वं जीवादिष्वन्यतमद्रव्यविषयत्वेनाऽभेदकल्पनं। क्षेत्रैकत्वं परमाण्ववगाहप्रदेशः। कालैकत्वमभेदः समयः। भावैकत्वं मोक्षमार्गः। तथानेकत्वमपि भेदविषयं नहि किंचिदेकमेव निश्चितमस्ति अनेकमेव वा। एकमपि सामान्यार्पणया विशेषार्पणया। अनेकमपि तत्र परिप्रासवाह्याभ्यंतरोपधित्यागस्य सम्यग्ज्ञानादेकत्वनिश्चयमास्कंदतः यथाख्यातचरित्रैकवृत्तिः मोक्षमार्गो भावैकत्वं तत्प्राप्तये एक एवाहं न कश्चिन्मे स्वजनः परजनो वा व्याधिजरामरणादीनि दुःखानि परिहरति। बंधुमित्राणि स्मशानं नातिवर्तंते। धर्म एव मे सहायः सदानपायीति चिंतनमेकत्वानुप्रेक्षा। एव ह्यस्य भावयतः स्वजनेषु प्रीत्यनुबंधो न भवति परजनेषु च द्वेषानुबंधो नैव जायते ततो निस्संगतामभ्युपगतो मोक्षाय एव घटते।

शरीराद्व्यतिरेको लक्षणभेदादन्यत्वं ॥ ५ ॥ अन्यत्वं चतुर्धा व्यवतिष्ठते नामस्थापनाद्रव्यभावालंबनेन आत्मा जीव इति नामभेदः, काष्ठप्रतिमेति स्थापनाभेदः, जीवद्रव्यमजीवद्रव्यमिति द्रव्यभेदः, एकस्मिन्नपि द्रव्ये वालो युवा मनुष्यो देव इति भावभेदः। तत्र वंधं प्रत्येकत्वे सत्यपि लक्षणभेदादन्यत्वं ततः कुशलपुरुषप्रयोगसन्निधौ शरीरादन्यत्वं। तद्व्यतिरेकेण आत्मनो ज्ञानादिभिरनंतैरहेयैरवस्थानं मुक्तरन्यत्वं शिवपदमिति चोच्यते। तदवाप्तये वैंद्रियिकं शरीरमतींद्रियोह, अज्ञं शरीरं ज्ञोहं, अनित्यं शरीरं नित्योहं, आद्यंतवच्छरीरमनाद्यंतोहं, वहूनि मे शरीरशतसहस्राणि अतीतानि संसारे परिभ्रमतः स एवाहं अन्यस्तेभ्यः इत्येवं शरीरादन्यत्वं मे किमंग पुनर्वाह्येभ्यः परिग्रहेभ्य इति चिंतनं अन्यत्वानुप्रेक्षा। एवं ह्यस्य मनस्समादधानस्य शरीरादिषु स्पृहा नोपपद्यते ततश्च श्रेयसि वर्तते।

शरीरस्याद्युत्तराशुभकारणत्वादिभिरशुचित्वं ॥६॥ शुचित्वं द्विविधं लौकिकं लोकोत्तरं चेति। तत्रात्मनः प्रक्षालितकर्ममलकलंकस्य स्वात्मन्यवस्थानं लोकोत्तरं शुचित्वं तत्साधनं सम्यग्दर्शनादि तद्वंतश्च साधवः तदधिष्ठानानि निर्माणभूम्यादीनि यत्प्राप्त्युपायत्वाच्छुचिव्यपदेशमर्हंति। लौकिकं शुचित्वं अष्टविधं-कालाग्निभस्ममृत्तिकागोमयसलिलज्ञाननिर्विचिकित्सत्वभेदात्। तदिदं शरीरं शुचीकर्तुं नालं कुतः? अत्यंताशुचित्वात्। शरीरमिदमाद्युत्तराशुभकारणादिभिरशुचि लक्ष्यते। तद्यथा-आद्यं तावत्कारणं शरीरस्य शुक्रं शोणितं च तदुभयमत्यंताशुचि। उत्तरकारणमाहारपरिणामादिकवलाहारो हि ग्रस्तमात्रः श्लेष्माशयं प्राप्य श्लेष्मणा द्रवीकृत अधिकमशुचि भवति, ततः पित्ताशयं प्राप्य पच्यमान आम्लीकृतः अशुचिरेव भवति, पक्को वाताशयमवाप्य वायुना विभज्यमानः खलरसभावेन भिद्यते खलभागो मूत्रपुरीषादिमलविकारेण विविच्यते। रसभागः शोणितमांसमेदमज्जाशुक्रभावेन परिणमते। सर्वेषां चैषां अशुचीनां भाजनं शरीरमवस्करवत् अशक्यप्रतीकारं खल्विदं शरीरं स्नानानुलेपनधूपप्रघर्षवासमाल्यादिभिरप्यशक्यमशुचित्वमपहर्तुं अगारवदाश्रितमपि द्रव्यमाश्वेवात्मभावमापादयतीति जलादीनामशुचिहेतुत्वं। सम्यग्दर्शनादि पुनर्भाव्यमानं जीवस्यात्यंतिकीं शुद्धिमाविर्भावयतीति तत्त्वतो भावनमशुचित्वानुप्रेक्षा। एवं ह्यस्य संस्मरतः शरीरनिर्वेदो भवति निर्विण्णश्च जन्मोदधितरणाय चित्तं समाधत्ते।

आस्रवसंवरनिर्जराग्रहणमनर्थकमुक्तत्वादिति चेन्न तद्गुणदोषान्वेषणपरत्वात् ॥ ७ ॥ स्यान्मतमास्रवसंवरनिर्जरा वर्णिताः अतस्तासामिह पुनर्ग्रहणमनर्थकमिति तन्न। किं कारणं? तद्गुणदोषान्वेषणपरत्वात्। आस्रवदोषानुचिंतनमुद्वेगार्थमास्रवोपाक्षेपः। आस्रवा हि इहामुत्र चापायप्रसक्ताः। महानदीस्रोतोवेगतीक्ष्णाः इंद्रियादयः। तद्यथा-प्रभूतयवकोशोदकप्रमादावगाहनादिगुणसंपन्नसहचारिणः मदांधाः बलवंतो वारणाः हस्तिबंधकीषु स्पर्शनेंद्रियप्रसक्तचित्ताः मनुष्यविधेयतामुपगत्य वधवंधनवाहनांकुशताडनपार्ष्णिघातादिजनितं तीव्रदुःखमनुभवंति नित्यमेव च स्वयूथस्य स्वच्छंदप्रविचारसुखस्य च वनवासस्यानुस्मरंतो महांतं खेदमवाप्नुवंते। तथैव च जिह्वेंद्रियविषयलोलाः मृतहस्तिशरीरस्थस्रोतोवेगावगाहिवायसवत् व्यसन-

मुपनिपतंति । घ्राणेंद्रियवशंगताश्च औषधगंधलुब्धपन्नगवद्विनिपातमिच्छंति । चक्षुरिंद्रियविषयीकृताश्च दीपालोकनलोलपतंगवद् व्यसनप्रतापामिमुखा भवंति । श्रोत्रेंद्रियविषयसंगाकृष्टमनसोपि गीतध्वनिविषंग-विस्मृततृणग्रसनहरिणवत् अनर्थोन्मुखा भवंति । परत्र च नानाजातिषु बहुविधदुःखप्रज्वालितासु पर्यटंति । इत्येवमाद्यास्रवदोषदर्शनमास्रवानुप्रेक्षा । एवं ह्यस्य चिंतयतः क्षमादिधर्मश्रेयस्त्वबुद्धिर्न प्रच्यवते । सर्व एते आस्रवदोषाः कूर्मवत्संवृतात्मनो न भवंति यथा महार्णवे नावो विवरपिधानेऽसति क्रमाश्रितजल-विप्लवे सति तदाश्रयाणां विनाशोवश्यंभावी, छिद्रपिधाने च निरुपद्रवमभिलषितदेशांतरप्रापणं । तथा—

कर्मागमद्वारसंवरणे सति नास्ति श्रेयःप्रतिबंध इति संवरणगुणानुचिंतनं संव-रानुप्रेक्षा ॥ ८ ॥ एवं ह्यस्य चिंतयतः संवरे नित्योद्युक्तता भवति ।

निर्जरा वेदनाविपाक इत्युक्तं ॥ ९ ॥ सा द्वेधा अबुद्धिपूर्वा कुशलमूला चेति । तत्र नरकादिषु कर्मफलविपाकजा अबुद्धिपूर्वा साऽकुशलानुबंधा । परीषहजये कृते कुशलमूला सा शुभानुबंधा च । इत्येवं निर्जराया गुणदोषभावना निर्जरानुप्रेक्षा । एवं ह्यस्यानुस्मरतः कर्मनिर्जरायै वृत्तिर्भवति ।

लोकसंस्थानादिविधिर्व्याख्यातः ॥ १० ॥ समंतादनंतस्यालोकाकाशस्य बहुमध्यदेशभाविनो-लोकस्य संस्थानादिविधिर्व्याख्यातः तत्स्वभावानुचिंतनं लोकानुप्रेक्षा । एवं ह्यस्याध्यवस्यतः तत्त्वज्ञानादि-विशुद्धिर्भवति ।

रत्नत्रयस्वभावादिलाभस्य कृच्छ्रात्प्रतिपत्तिः बोधिदुर्लभत्वं ॥ ११ ॥ उक्तं च—

एगणिगोदसरीरे जीवा दव्वप्पमाणदो दिट्ठा ।
सिद्धे हि अणंतगुणा सव्वेण वितीदकालेण ॥ १ ॥

इत्यागमप्रामाण्यादेकस्मिन्निगोतशरीरे जीवाः सिद्धानामनंतगुणाः । एवं सर्वलोको निरंतरं निचितः स्थावरैरतस्तत्र त्रसता बालिका समुद्रे पतिता वज्रसिकताकणिकेव दुर्लभा । तत्र च विकलेंद्रियाणां भूयिष्ठत्वात् पंचेंद्रियता गुणेषु कृतज्ञतेव कृच्छ्रलभ्या । तत्र च तिर्यक्षु पशुमृगपक्षिसरीसृपादिषु बहुषु सत्सु मनुष्यभावश्च-तुष्पथे रत्नराशिरिव दुरासदः, तत्प्रच्यवे पुनस्तदुपपत्तिर्दग्धतरुपुद्गलतद्भावापत्तिवत् दुर्लभा, तल्लाभे च कुदेशा-नां हिताहितविचारणाविरहितपशुसमानमानवाकीर्णानां बहुत्वात् सुदेशः पाषाणेषु मणिरिवासुलभः । लब्धेपि सुदेशे सुकुले जन्म कृच्छ्राल्लभ्यते, पापकर्मजीवकुलाकुलत्वात् लोकस्य । कुले हि जातिः प्रायेण शीलविनया-चारसंपत्तिकरी भवति । सत्यामपि कुलसंपदि दीर्घायुरिंद्रियबलरूपनीरोगत्वादीनि दुर्लभानि । सर्वेष्वपि तेषु लब्धेषु सद्धर्मप्रतिलम्भो यदि न स्यात् व्यर्थं जन्म वदनमिव दृष्टिविकलं, तमेवं कृच्छ्रलभ्यं धर्ममवाप्य विषय-सुखे रंजनं भस्मार्थं चंदनदहनमिव विफलं । विरक्तविषयसुखस्य तपोभावनाधर्मप्रभावनासुखमरणादिलक्षणः समाधिर्दुरवापः तस्मिन् सति बोधिलाभः फलवान् भवतीति चिंतनं बोधिदुर्लभत्वानुप्रेक्षा । एवं ह्यस्य भावयतः बोधिं प्राप्य प्रमादो न कदाचिदपि भवति ।

जीवस्थानगुणस्थानानां गत्यादिषु मार्गणालक्षणो धर्मःस्वाख्यातः ॥१२॥ उक्तानि जीव-स्थानानि गुणस्थानानि च तेषां गत्यादिषु मार्गणास्थानेषु स्वतत्त्वविचारणालक्षणो धर्मः जिनशासने स्वाख्यातः अत्राह—गत्यादय इत्युच्यते के पुनर्गत्यादय इत्यत्रोच्यते गतींद्रियकाययोगवेदकषायज्ञानसंयमदर्शनलेश्या-भव्यसम्यक्त्वसंज्ञाहारकेषु मार्गणाः । गम्यत इति गतिः सा द्वेधा कर्मोदयकृता क्षायिकी चेति । कर्मोदय-कृता चतुर्विधा व्याख्याता—नरकगतिः तिर्यग्गतिः मनुष्यगतिः देवगतिश्चेति । क्षायिकी मोक्षगतिः । इंद्रस्य लिंगमिंद्रेण सृष्टमिति वा इंद्रियं तद्द्रव्यभावभेदेन द्विविधं सत् पंचधा वर्णितं एकेंद्रियद्वींद्रियत्रींद्रिय चतुरिंद्रियपंचेंद्रियभेदेन तत्कर्मकृतं, अतींद्रियत्वादात्मनः क्षायिकं । आत्मप्रवृत्त्युपचरितपुद्गलपिंडः कायः तत्संबंधिजीवः षड्विधः पृथिवीकायिकः अप्कायिकः तेजस्कायिकः वायुकायिकः वनस्पतिकायिकः त्रस-कायिकश्चेति । त्रसस्थावरनामकर्मविशेषोदयापादिता एते भावाः । नामकर्मात्यंतोच्छेदादकायाः सिद्धाः ।

वीर्यांतरायक्षयोपशमलब्धवृत्तिर्वीर्यलब्धिर्योगः । तद्वत आत्मनो मनोवाक्कायवर्गणालंबनः प्रदेशपरिस्पंदः उपयोगो योगः । स पंचदशप्रकारः चत्वारो मनोयोगाः चत्वारो वाग्योगाः सप्त काययोगाश्चेति । योगसंबंधाभावः आत्मनः क्षायिकः । तत्र सत्यमनोयोगः मृषामनोयोगः सत्यमृषामनोयोगः असत्यमृषामनोयोगश्चेति चतुर्विधो मनोयोगः । सत्यवाग्योगः मृषावाग्योगः सत्यमृषावाग्योगः असत्यमृषावाग्योगश्चेति चतुर्विधो वाग्योगः । औदारिककाययोगः औदारिकमिश्रकाययोगः वैक्रियिककाययोगः वैक्रियिकमिश्रकाययोगः आहारककाययोगः आहारकमिश्रकाययोगः कार्मणकाययोगश्चेति सप्तविधः काययोगः । आत्मप्रवृत्तिसंमोहोत्पादो वेदः स नोकषायविशेषोदयनिमित्तः त्रिविधः स्त्रीवेदः पुंवेदो नपुंसकवेदश्चेति । आत्मनि औपशमिकं क्षायिकं चापि गतवेदत्वं[1] । चारित्रपरिणामकषणात् कषायः स चतुर्विधः क्रोधमानमायालोभलक्षणो व्याख्यातः । अकषायत्वमात्मनश्चौपशमिकं क्षायिकं वा । तत्त्वार्थावबोधो ज्ञानं तत्पंचविधमुद्दिष्टं । मिथ्यादर्शनोदयापादितकालुष्यमज्ञानं त्रिविधं । व्रतसमितिकषायदंडेंद्रियधारणानुवर्तननिग्रहत्यागजयलक्षणः संयमः पंचविधो वक्ष्यते । संयमः संयमासंयमश्चोक्तौ स च सर्वश्चारित्रमोहस्योदयोपशमात् क्षयोपशमात् क्षयाच्च भवति, तत्परिणामत्रयविरहितं सिद्धत्वं क्षायिकं । दर्शनावरणक्षयक्षयोपशमाविर्भूतवृत्तिरालोचनं दर्शनं तच्चतुर्विधमुपदिष्टं चक्षुरचक्षुरवधिकेवलदर्शनभेदात् । कषायश्लेषप्रकर्षाप्रकर्षयुक्ता योगवृत्तिर्लेश्या सा षड्विधा कृष्णनीलकपोततेजःपद्मशुक्लविकल्पात् । शरीरनामोदयापादिता द्रव्यलेश्या । अलेश्यत्वं क्षायिकं । निर्वाणपुरस्कृतो भव्यः तद्विपरीतोऽभव्यः तदुभयं पारिणामिकं । विरहितभव्यत्वाभव्यत्वविकल्पो मुक्तः । तत्त्वार्थश्रद्धानलक्षणं सम्यक्त्वमुक्तं दर्शनमोहस्योपशमात् क्षयोपशमात् क्षयाच्च भवति । सासादनसम्यक्त्वं अनंतानुबंधिकषायोदयाद्भवतीत्यौदयिकं, सम्यक्त्वमिथ्यात्वं क्षायोपशमिकं, मिथ्यात्वमौदयिकं । शिक्षाक्रियालापग्राही संज्ञी तद्विपरीतोऽसंज्ञी । तत्र संज्ञित्वं क्षायोपशमिकं, असंज्ञित्वमौदयिकं । तदुभयाभावः क्षायिकः । उपभोगशरीरप्रायोग्यपुद्गलग्रहणमाहारकं । तत्राहारः शरीरनामोदयात् विग्रहगतिनामोदयाभावाच्च भवति । अनाहारः शरीरनामत्रयोदयाभावात् विग्रहगतिनामोदयाच्च भवति । तान्येतानि चतुर्दशमार्गणास्थानानि तेषु जीवस्थानानां सत्ता विचिंत्यते । तिर्यग्गतौ चतुर्दशापि जीवस्थानानि संति । इतरासु तिसृषु द्वे द्वे पर्याप्तकापर्याप्तकभेदात् । एकेंद्रियेषु चत्वारि जीवस्थानानि । विकलेंद्रियेषु द्वे द्वे, पंचेंद्रियेषु चत्वारः, पृथिव्यप्तेजोवायुकायिकेषु प्रत्येकं चत्वारि, वनस्पतिकायिकेषु षट्, त्रसकायिकेषु दश, मनोयोगे एकं, जीवस्थानं संज्ञिपर्याप्तकः, वाग्योगे पंच जीवस्थानानि द्वित्रिचतुरिंद्रियपर्याप्तकसंज्ञ्यसंज्ञिपर्याप्तकनामानि, काययोगे चतुर्दश संति । स्त्रीवेदपुंवेदयोः प्रत्येकं चत्वारि जीवस्थानानि असंज्ञिसंज्ञिपर्याप्तकापर्याप्तकाख्यानि । नपुंसकवेदे चतुर्दशापि संति । अवेदे एकं जीवस्थानं संज्ञिपर्याप्तकसंज्ञं । चतुर्ष्वपि कषायेषु चतुर्दशापि जीवस्थानानि संति । अकषाये एकमेव संज्ञिपर्याप्तकाख्यं । मत्यज्ञानश्रुताज्ञानयोश्चतुर्दशापि संति । विभंगमनःपर्ययज्ञानयोरेकमेव जीवस्थानं संज्ञिपर्याप्तकाख्यं । मतिश्रुतावधिज्ञानेषु द्वे जीवस्थाने संज्ञिपर्याप्तकापर्याप्तकाख्ये, केवलज्ञाने एकमेव जीवस्थानं संज्ञिपर्याप्तकाख्यं । सामायिकच्छेदोपस्थापनपरिहारविशुद्धिसूक्ष्मसांपराययथाख्यातसंयमासंयमेषु एकमेव जीवस्थानं संज्ञिपर्याप्तकनामकं । असंयमे चतुर्दशापि संति । अचक्षुर्दर्शने चतुर्दशापि जीवस्थानानि संति । चक्षुर्दर्शने त्रीणि जीवस्थानानि चतुरिंद्रियसंज्ञ्यसंज्ञिपर्याप्तकाख्यानि । तेषामेवाऽपर्याप्तका लब्धौ संति न निवृत्तौ । अवधिदर्शने द्वे जीवस्थाने संज्ञिपर्याप्तकापर्याप्तकसंज्ञे । केवलदर्शने संज्ञिपर्याप्तकाख्यं । आद्यासु तिसृषु लेश्यासु चतुर्दशापि जीवस्थानानि संति । तेजःपद्मशुक्ललेश्यासु द्वे जीवस्थाने संज्ञिपर्याप्तकापर्याप्तकनामनी । अलेश्यत्वे एकं जीवस्थानं संज्ञिपर्याप्तकाख्यं । भव्येषु अभव्येषु चतुर्दशापि जीवस्थानानि संति । औपशमिकक्षायिकक्षायोपशमिकसम्यक्त्वसासादनसम्यक्त्वेषु जीवस्थाने संज्ञिपर्याप्तकापर्याप्तकसंज्ञे । सम्यङ्मिथ्यात्वे एकमेव संज्ञिपर्याप्तकाख्यं । मिथ्यात्वे चतुर्दशापि संति । संज्ञिषु द्वे जीवस्थाने पर्याप्तकापर्याप्तकनामनी । असंज्ञिषु द्वादशावशिष्टानि । संज्ञ्यसंज्ञित्वाऽभावे एकं जीवस्थानमपर्याप्तकाख्यं । कर्मोदयापेक्षयाहारे चतुर्दशापि संति । अनाहारे सप्ताऽपर्याप्तकस्था-

---

[1] अपगतवेदत्वमिति भावः ।

नानि । पर्याप्तकं च केवलिसमुद्घाते अयोगकेवलिनि च कर्मोदयापेक्षणात् । सिद्धाः सर्वत्रातीतजविस्थानाः ।

गुणस्थानानामपि तेष्वेव सत्ता विचार्यते—नरकगतौ नारकेषु पर्याप्तकेषु चत्वारि गुणस्थानानि आद्यानि । सप्तसु पृथिवीसु प्रथमायां पृथिव्यां अपर्याप्तकेषु द्वे गुणस्थाने मिथ्यादृष्ट्यसंयतसम्यग्दृष्टी । इतरासु पृथिवीषु अपर्याप्तके एकमेव मिथ्यात्वं । तिर्यग्गतौ तिर्यक्षु पर्याप्तकेषु पंच गुणस्थानानि आद्यानि । तेषामपर्याप्तकेषु त्रीणि गुणस्थानानि मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टिसंज्ञानि । तिरश्चीषु पर्याप्तिकासु पंच गुणस्थानानि आद्यानि । अपर्याप्तिकासु द्वे आद्ये स्त्रीत्वेन प्रवेशाभावात् असंयतसम्यग्दृष्ट्यभावः । मनुष्यगतौ मनुष्येषु पर्याप्तकेषु चतुर्दशापि गुणस्थानानि भवंति । अपर्याप्तकेषु त्रीणि गुणस्थानानि मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्ट्याख्यानि । मानुषीपर्याप्तिकासु चतुर्दशापि गुणस्थानानि संति भावलिंगापेक्षया, द्रव्यलिंगापेक्षेण तु पंचाद्यानि । अपर्याप्तिकासु द्वे आद्ये सम्यक्त्वेन सह स्त्रीजननाभावात् । तिर्यङ्मनुष्येषु भवापर्याप्तकेषु एकमेव गुणस्थानं आद्यं । देवगतौ भवनवासिव्यंतरज्योतिष्कदेवेषु पर्याप्तकेषु चत्वारि गुणस्थानानि आद्यानि । अपर्याप्तकेषु द्वे आद्ये तद्देवीषु सौधर्मैशानकल्पवासिदेवीषु च एषः क्रमः । सौधर्मैशानादिषु उपरिमग्रैवेयकांतेषु चत्वारि गुणस्थानानि आद्यानि । अपर्याप्तकेषु त्रीणि मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टिनामानि । अनुदिशानुत्तरविमानवासिषु पर्याप्तापर्याप्तकेषु च एकमेव गुणस्थानं, असंयतसम्यग्दृष्टिसंज्ञं । एकद्वित्रिचतुरिंद्रियाऽसंज्ञिपंचेंद्रियेषु एकमेवगुणस्थानमाद्यं । पचेंद्रियेषु संज्ञिषु चतुर्दशापि संति । पृथिवीकायादिषु वनस्पत्यंतेषु एकमेव प्रथमं । त्रसकायिकेषु चतुर्दशापि संति । सत्यमनोयोगेऽसत्यमृषामनोयोगे च संज्ञिमिथ्यादृष्ट्यादयः क्षीणकषायवीतरागछद्मस्थांताः । असत्यमृषावाग्योगे द्वींद्रियादयः सयोगकेवल्यंताः । सत्यवाग्योगे संज्ञिमिथ्यादृष्ट्यादयः सयोगिकेवल्यंताः । मृषावाग्योगेसत्यमृषावाग्योगे च संज्ञिमिथ्यादृष्टिप्रभृतयः क्षीणकषायवीतरागछद्मस्थांताः । औदारिककाययोगे त्रयोदश गुणस्थानानि सयोगिकेवल्यंतानि । औदारिकमिश्रकाययोगे चत्वारि गुणस्थानानि मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टिसयोगिकेवलिसंज्ञानि । वैक्रियिककाययोगे चत्वारि गुणस्थानानि आद्यानि । वैक्रियिकमिश्रकाययोगे त्रीणि तान्येव सम्यङ्मिथ्यात्ववर्जितानि । आहारककाययोगाहारकमिश्रकाययोगयोरेकमेव गुणस्थानं प्रमत्तसंयताख्यं । कार्मणकाययोगे चत्वारि गुणस्थानानि मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टिसयोगिकेवल्याख्यानि । अयोगे गुणस्थानमेकं । स्त्रीवेदपुंवेदयोरसंज्ञिपचेंद्रियादयः अनिवृत्तिबादरसांपरायिकांताः । नपुंसकवेदे एकेंद्रियप्रभृतयः अनिवृत्तिबादरसांपरायिकांताः । नारकाश्चतुर्षु स्थानेषु नपुंसकवेदे । तिर्यंच एकेंद्रियादयः चतुरिंद्रियांताः शुद्धे । नपुंसकवेदे असंज्ञिपचेंद्रियादयः संयतासंयतांताः । तिर्यंचस्त्रिषु वेदेषु, मनुष्याः त्रिषु वेदेषु, मिथ्यात्वादयः अनिवृत्तिबादरसांपरायिकावसानाः । ततः परे मनुष्या अवेदाः । देवाश्चतुर्षु स्थानेषु स्त्रीपुंवेदयोः ज्ञेयाः । क्रोधमानमायासु एकेंद्रियादयः अनिवृत्तिबादरसांपरायिकावसानाः । लोभकषाये त एव सूक्ष्मसांपरायिकांताः ततः परे अकषायाः । मत्यज्ञानश्रुताज्ञानयोरेकेंद्रियादयः सासादनसम्यग्दृष्ट्यंताः, विभंगज्ञाने संज्ञिमिथ्यादृष्टयो वा सासादनसम्यग्दृष्टयो वा पर्याप्तका भवति नाऽपर्याप्तकाः । सम्यङ्मिथ्यादृष्टयः त्रिषु ज्ञानेषु अज्ञानमिश्रेषु वर्तंते कारणसदृशत्वात् कार्यस्य । मतिश्रुतावधिज्ञानेषु असंयतसम्यग्दृष्टिप्रभृतयः क्षीणकषायवीतरागछद्मस्थांताः । मनःपर्ययज्ञाने प्रमत्तसंयतादयः क्षीणकषायवीतरागछद्मस्थांताः । केवलज्ञाने द्वे गुणस्थाने सयोगायोगिसंज्ञे । सामायिकछेदोपस्थापनशुद्धिसंयमयोः प्रमत्तसंयतादयः अनिवृत्तिबादरसांपरायिकान्ताः । परिहारविशुद्धिसंयमे द्वे गुणस्थाने प्रमत्ताप्रमत्तलक्षणे । सूक्ष्मसांपरायसंयमे एकमेव गुणस्थानं सूक्ष्मसांपरायशुद्धिसंयमाख्यं । यथाख्यातविहारशुद्धिसंयमे चत्वारि गुणस्थानानि उपशांतकषायक्षीणकषायसयोग्ययोगसंज्ञानि । संयमासंयमे एकमेव गुणस्थानं संयतासंयताख्यं । असंयमे चत्वारि गुणस्थानान्याद्यानि । चक्षुर्दर्शने चतुरिंद्रियादयः क्षीणकषायवीतरागछद्मस्थांताः । अचक्षुर्दर्शने एकेंद्रियादयः क्षीणकषायवीतरागछद्मस्थांताः । अवधिदर्शने असंयतसम्यग्दृष्ट्यादयः क्षीणकषायांताः । केवलदर्शने द्वे गुणस्थाने अंते । आद्यासु तिसृषु लेश्यासु एकेंद्रियादयः असंयत-

सम्यग्दृष्टयंताः । तेजःपद्मलेश्ययोः संज्ञिमिथ्यादृष्टिप्रभृतयः अप्रमत्तावसानाः । शुक्लेश्यायां संज्ञिमिथ्यादृष्टिप्रभृतयः संयोगिकेवल्यंताः । अलेश्या अयोगकेवलिनः । भव्यत्वे चतुर्दशापि गुणस्थानानि संति । अभव्यत्वे प्रथममेव । क्षायिकसम्यक्त्वे असंयतसम्यग्दृष्टयादयः अयोगकेवल्यंताः । वेदकसम्यक्त्वे असंयतसम्यग्दृष्टयादयः अप्रमत्तांताः । औपशमिकसम्यक्त्वे असंयतसम्यग्दृष्टयादयः उपशांतकषायांताः । सासादनसम्यङ्मिथ्यात्वेषु एकमेव प्रत्येकं । नारकेषु प्रथमायां पृथिव्यां क्षायिकवेदकौपशमिकसम्यक्त्वाः असंयतसम्यग्दृष्टयः । इतरासु, भूमिकेषु वेदकौपशमिकसम्यक्त्वाः तिर्यक्षु असंयतसम्यग्दृष्टिस्थाने क्षायिकवेदकौपशमिकसम्यक्त्वानि संति । संयतासंयतस्थाने क्षायिकसम्यक्त्वं नास्ति इतरद्वयमस्ति भोगभूमावेवोत्पादात् । तिरश्चीषु उभयोरपि स्थानयोः क्षायिकसम्यक्त्वं नास्ति । मनुष्यस्य क्षपणामारब्धवतः पुरुषलिंगेनैव वृत्तेः इतरद्वितयमस्ति । मनुष्येषु असंयतसम्यग्दृष्टिसंयतासंयतसंयतस्थानेषु क्षायिकवेदकौपशमिकसम्यक्त्वानि संति । भवनवासिव्यंतरज्योतिष्कदेवेषु तद्देवीषु सौधर्मैशानकल्पवासिनीषु देवीषु चाऽसंयतसम्यग्दृष्टिस्थाने क्षायिकसम्यक्त्वं नास्ति इतरद्वितयमस्ति । सौधर्मादिषु उपरिमग्रैवेयकांतेषु क्षायिकवेदकौपशमिकसम्यक्त्वानि संति । अनुदिशानुत्तरविमानवासिदेवेषु क्षायिकवेदकसम्यक्त्वे स्तः । औपशमिकं चास्ति उपशमश्रेण्यां मृतानां तत्संभवात् । संज्ञित्वे संज्ञिमिथ्यादृष्टयादयः क्षीणकषायांताः । असंज्ञित्वे एकेंद्रियादयः असंज्ञिपंचेंद्रियांताः तदुभयाभावे द्वे गुणस्थाने अंत्ये । आहारे एकेंद्रियादयः सयोगिकेवलिपर्यंताः अनाहारे पंचगुणस्थानानि । विग्रहगतौ मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टयः । प्रतरलोकपूरणयोः सयोगकेवलिनोऽयोगकेवलिनश्च । सिद्धा व्यतीतगुणस्थाना इत्येवमादिलक्षणो धर्मो निःश्रेयसप्राप्तिहेतुरहो भगवद्भिरर्हद्भिः स्वाख्यात इति चिंतनं धर्मस्वाख्यातत्वानुप्रेक्षा । एवं ह्यस्य चिंतयतः धर्मानुरागात् सदा प्रतियत्नो भवति । एवं नित्यत्वाद्यनुप्रेक्षासन्निधाने उत्तमक्षमादिधारणान्महान्संवरो भवति ।

स्वाख्यात इति युचप्रसंग इति चेन्न प्रादिवृत्तेः ॥ १३ ॥ स्यान्मतं सुना योगे अकृच्छ्रार्थे युचा भवितव्यमिति तन्न किं कारणं-प्रादिवृत्तेः । शोभन आख्यातः स्वाख्यातः इति प्रादिलक्षणा वृत्तिर्भवति ।

अनुप्रेक्षा इति भावसाधनत्वे बहुवचनविरोधः ॥ १४ ॥ अयमनुप्रेक्षाशब्दो यदि भावसाधनः, बहुवचनं नोपपद्यते तस्यैकत्वात् ।

कर्मसाधनत्वे सामानाधिकरण्याभावः ॥ १५ ॥ स्यान्न कर्मसाधनत्वं एवमपि युज्यते बहुवचनं सामानाधिकरण्यं तु नोपपद्यते अन्या ह्यनुप्रेक्षा अन्यदनुचिंतनमिति । अथानुचिंतनमेवानुप्रेक्षा एवमपि लिंगवचनभेदविरोधः ।

न वा कृदभिहितस्य द्रव्यवद्भावात् ॥ १६ ॥ नैष दोषः । किं कारणं ? कृदभिहितस्य द्रव्यवद्भावात् । कृदभि[illegible] भावो हि द्रव्यवद्भवति यथा पाकः पाकौ पाका इति तथाऽनुप्रेक्षितव्यार्थभेदात् भावस्य भेदे विवक्षिते बहुवचनं न्यायप्राप्तं ।

सामानाधिकरण्यसिद्धेश्चोभयोः कर्मसाधनत्वात् ॥ १७ ॥ सामानाधिकरण्यं च सिध्यति कुतः उभयोः कर्मसाधनत्वात् । अनुप्रेक्ष्यंते इत्यनुप्रेक्षाः । अनुचिंत्यते इत्यनुचिंतनं । अनित्यादिस्वतत्त्वं ह्यनुचिंत्यमानमनुप्रेक्षाव्यपदेशभाग्भवति । कथं कर्मण्यनः "युड्भ्यो बहुलमिति" यथा निरदनमवसेचनमिति । एवमपि लिंगसंख्याभेदो नोपपद्यते ? उपात्तलिंगसंख्यानां परस्पराभिसंबंधो युज्यते यथा गावो धनमिति । अथ धर्मोपदेशात् प्रागनुप्रेक्षाः किमर्थं नोक्ताः ?

मध्येनुप्रेक्षावचनं उभयनिमित्तत्वात् ॥ १८ ॥ अनुप्रेक्षावचनं मध्ये क्रियते कुतः ? उभयनिमित्तत्वात् अनुप्रेक्षा हि भावयन् उत्तमक्षमादींश्च परिपालयति परीषहांश्च जेतुमुत्सहते ।

व्याख्याता अनुप्रेक्षाः संवरहेतुः परीषहजय इत्युक्तमतस्तान्व्याचक्ष्महे । आह व्याख्यास्यति भवा-

१ प्रतिपक्षः पाठांतरमिदं ख. पुस्तके । २ शुभायोगे पाठः ख. पुस्तके । ३ अकृत्रार्थे-पाठांतरमपि ख. पुस्तके ।

निदमेव तावद्वक्तव्यं किमर्थमेते सह्यंते ? किमेषां पारिभाषिकी संज्ञा उतान्वर्था ? इत्यत्रोच्यते—

मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः ॥ ८ ॥

परीषहाऽमहत्त्वादन्वर्थसंज्ञा ॥१॥ संज्ञा च नाम यतो न लघीयसी । कुत एतत् ? लघ्वर्थं संज्ञाकरणमिति तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनमन्वर्थसंज्ञाः परीषहा इति यावत् । यथा विज्ञायते तद्विभाव्यते ।

प्रकरणात् संवरणमार्गप्रतिपत्तिः ॥ २ ॥ संवरो हि प्रकृतः अतस्तदभिसंबंधान्मोक्षपदप्रापक-संवरमार्गप्रतिपत्तिरिह वेदितव्याः ।

तदच्यवनार्थो निर्जरार्थश्च परीषहजयः ॥ ३ ॥ कर्मागमद्वाराणि संवृण्वंतो जैनेंद्रान्मार्गान्मा-च्योष्महीति पूर्वमेव परीषहान् विजयंते जितपरीषहाः संतः परैरनभिभूयमानाः प्रधानसंवरमाश्रित्याऽप्रति-बंधनक्षपकश्रेण्यारोहणसामर्थ्यं प्रतिपद्याभिन्नोत्साहाः सकलसांपरायिकप्रध्वंसनशक्तयो ज्ञानध्यानपरशुभिः छिन्नमूलानि कर्माणि विधूय प्रस्फोटितपक्षरेणवइव पतत्त्रिणः ऊर्ध्वं व्रजंति इत्येवमर्थं परिषोढव्याः परी-षहाः । "सोढ" इति षत्वाप्रतिषेधः । यद्येवमुच्यतां के परीषहाः ? कियंतो वेत्यत इदमाह—

क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्यानिषद्याशय्याक्रोशवध-याचनालाभरोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाज्ञानादर्शनानि ॥ ९ ॥

क्षुधादयो द्वाविंशतिः परीषहाः ॥ १ ॥ त एते बाह्याभ्यंतरद्रव्यपरिणामाः शारीरमानसप्रकृष्ट-पीडाहेतवः क्षुधादयो द्वाविंशतिः परीषहा प्रत्येतव्याः । तद्विजये विदुषा संयतेन मोक्षार्थिना प्रतियत्नः कार्यः । तद्यथा—

प्रकृष्टक्षुदग्निप्रज्वलने धृत्यंभसोपशमः क्षुज्जयः॥२॥ निवृत्तसर्वसंस्कारविशेषस्य शरीरमात्रोपकरणसं-तुष्टस्य तपःसंयमविलोपं परिहरतः कृतकारितानुमतसंकल्पितोद्दिष्टक्लिष्टक्रयागतप्रत्याख्यातपूर्वकर्मपश्चात्कर्मदश-विधदोषप्रमुक्तैषणस्य देशकालजनपदव्यवस्थापेक्षस्यानशनाध्वरोगतपःस्वाध्यायश्रमवेलातिक्रमावमौदर्या-सद्वेद्योदयादिभ्यः नानाहारेधनोपरमे जठराग्निदाहिनी मारुताडोलितार्चिशिखेव समंतान्छरीरेंद्रियहृदयसंक्षोभ-करी क्षुधोत्पद्यते तस्याः प्रतीकारं अकाले संयमविरोधिभिर्वा द्रव्यैः स्वयमकुर्वतोऽन्येन क्रियमाणमसेव-मानस्य मनसा वानभिसंदधतः, दुस्तरेयं वेदना महांश्च कालो दीर्घो हि तिविषादं अनापद्यमानस्य त्वग-स्थिसिरावतानमात्रकलेवरस्यापि सतः आवश्यकक्रियादिषु नित्योद्यतस्य क्षुद्वशप्रामानर्थकारकबंधनस्थम-नुष्यपंजरगततिर्यक्प्राणिनः क्षुदभ्यर्दितान् परतंत्रानपेक्षमाणस्य ज्ञानिनो धृत्यंभसा संयमकुंभधारितेन क्षुदग्निं शमयतः तत्कृतपीडां प्रत्यवगणयन् क्षुज्जय इत्युच्यते ।

उदन्योदीर्णहेतूपनिपाते तद्वशाप्राप्तिः पिपासासहनं ॥ ३ ॥ स्नानावगाहनपरिषेकत्यागि-नः पतत्त्रिवदध्रुवासनावस्थस्यातिलवणस्निग्धरूक्षविरुद्धाहारग्रैष्मातपपित्तज्वरानशनादिभिरुदीर्णां शरीरें-द्रियोन्माथिनीं पिपासां प्रत्यनाद्रियमाणप्रतीकारमनसः निदाघे पटुतपनकिरणसंतापिते अटव्यामासन्ने-ष्वपि ह्रदेषु अप्कायिकजीवपरिहारेच्छया जलमनादधानस्य सलिलसेकविवेकम्लाना लतेव ग्लानिमुपगतां गात्रयष्टिमवगणय्य तपःपरिपालनपरस्य भिक्षाकालेपि इंगिताकारादिभिः योग्यमपि पानमचोदयतः धैर्य-कुंभावधारितशैलसुगंधिप्रज्ञातोयेन विध्यापयतः तृष्णाग्निशिखां संयमपरत्वं पिपासासहनमित्यवसीयते ।

पृथग्वचनमेकार्थ्यादिति चेन्न सामर्थ्यभेदात् ॥ ४ ॥ स्यादेतत् क्षुत्पिपासयोः पृथग्वचन-मनर्थकं कुतः एकार्थ्यादिति ? तन्न किं कारणं ? सामर्थ्यभेदात् । अन्यद्धि क्षुधः सामर्थ्यमन्यत्पिपासायाः ।

अभ्यवहारसामान्यादिति चेन्नाधिकरणभेदात् ॥ ५ ॥ स्यान्मतं अभ्यवहारसामान्यात् एका

र्थमिति ? तदयुक्तं कुतः अधिकरणभेदात्। अन्यद्धि क्षुधः प्रतीकाराधिकरणं अन्यत्पिपासायाः।

शैत्यहेतुसन्निधाने तत्प्रतीकारानभिलाषात् संयमपरिपालनं शीतक्षमा ॥६॥ परित्यक्तवाससः पक्षिवदनवधारितालयस्य शरीरमात्राधिकरणस्य शिशिरवसंतजलदागमादिवनवृक्षमूलपथिगुहादिषु पतितप्रालेयलेशतुषारलवव्यतिकरशिशिरपवनाभ्यासहतमूर्तेः तत्प्रतिक्रियासमर्थद्रव्यांतराण्याघनाभिसंघानात् नारकदुःसहशीतवेदनानुस्मरणात् तत्प्रतीकारचिकीर्षायां परमार्थविलोपभयात् विद्यामंत्रौषधपर्णवल्कलत्वक्तृणाजिनादिसंबंधाव्यावृत्तमनसः परकीयमेव देहं मन्यमानस्य धृतिविशेषप्रावरणस्य गर्भागारेषु धूपप्रवेकप्रकरप्ररूपितप्रदीपप्रभवेषु वरांगनानवयौवनौष्णघनस्तननितंबभुजांतरतर्जितशीतेषु निवासं सुरतसुखरसाकरमनुभूतमसारत्वावबोधादस्मरतः विषादविरहितस्य संयमपरिपालनं शीतक्षमेति भाष्यते।

दाहप्रतीकारकांक्षाभावाच्चारित्ररक्षणमुष्णसहनं ॥ ७ ॥ ग्रैष्मेण पटीयसा भास्करकिरणसमूहेन संतापितशरीरस्य तृष्णानशनपित्तरोगघर्मश्रमप्रादुर्भूतोष्णस्य स्वेदशोषदाहाभ्यर्दितस्य जलभवनजलावगाहनालेपनपरिषेकार्द्रविनीतलनीलोत्पलकदलीपत्रोत्क्षेपमारुतजलतूलिकाचंदनचंद्रपादकमलकल्हारादिपूर्वानुभूतशीतलद्रव्यप्रार्थनापेतचेतसः उष्णवेदना अतितीव्रा बहुकृत्वः परवशादवाप्ता इदं पुनस्तपो कर्मक्षयकारणमिति तद्विरोधिनीं क्रियां प्रत्यनादराच्चारित्ररक्षणमुष्णसहनमिति समाम्नायते।

दंशमशकादिबाधासहनमप्रतीकारं ॥ ८ ॥ प्रत्याख्यातशरीराच्छादनस्य क्वचिदपि अप्रतिबद्धावसतः परकृतायतनगुहागह्वरादिषु रात्रौ दिवा वा दंशमशकमक्षिकापिक्शुकपुत्तिकायूकमत्कुणकीटपिपीलिकावृश्चिकादिभिः तीक्ष्णपातैर्भक्ष्यमाणस्यातितीव्रवेदनोत्पादकैः अव्यथितमनसः स्वकर्मविपाकमनुचिंतयतो विद्यामत्रौषधादिभिः तन्निवृत्तिं प्रति निरुत्सुकस्य आशरीरपतनादपि निश्चितात्मनः परबलप्रमर्दनं प्रति प्रवर्तमानस्य मदांधगंधसिंधुरस्य रिपुजनप्रेरितविविधशस्त्रप्रतिघातादपराङ्मुखस्य निःप्रत्यूहविजयोपलंभनमिव कर्मागतपृतनापराभवं प्रत्यप्रयतनं दंशमशकादिबाधासहनमप्रतीकारमित्याख्यायते।

दंशमशकमात्रप्रसंग इतिचेन्नोपलक्षणार्थत्वात् ॥ ९ ॥ स्यान्मतं दंशमशकस्यैव बाधाकारणस्य ग्रहणं प्राप्नोतीति ? तन्न किं कारणं उपलक्षणार्थत्वात्। दशनपरितापकारस्य सर्वस्यैवेदं उपलक्षणं। यथा काकेभ्यो रक्ष्यतां सर्पिरित्युपघातकोपलक्षणं।

यद्येवमन्यतरग्रहणं ॥ १० ॥ यद्येवमन्यतरग्रहणमेव कर्तव्यं ?

अन्यतरोपादाने स्वरूपग्रहणप्रसंगात् ॥ ११ ॥ द्वितीयवचनमुपलक्षणं संपद्यते।

जातरूपधारणं नाग्न्यं ॥ १२ ॥ गुप्तिसमित्यविरोधिपरिग्रहनिवृत्तिपरिपूर्णब्रह्मचर्यमप्रार्थितमोक्षसाधनचारित्रानुष्ठानं यथाजातरूपं असंस्कृतमविकारं मिथ्यादर्शनाविष्टविद्विष्ट परममांगल्यं नाग्न्यमभ्युपगतस्य स्त्रीरूपाणि नित्याशुचिबीभत्सकुणपभावेन पश्यतो वैराग्यभावनावरुणमनोविक्रियस्यासंभावितमनुष्यत्वस्य नाग्न्यदोषासंस्पर्शनात्परीषहजयसिद्धिरिति जातरूपधारणं उत्तम श्रेयःप्राप्तिकारणमित्युच्यते। इतरे पुनर्मनोविक्रियां निरोद्धुमसमर्थास्तत्पूर्विकां संगविकृतिं निगूहितकामाः कौपीनफलकचीवराद्यावर्णमातिष्ठंत अंतेऽगसवरणार्थमेव तन्न कर्मसंवरणकारणं।

संयमे रतिभावादरतिपरीषहजयः ॥ १३ ॥ संयतस्य क्षुधाद्याबाधासंयमपरिरक्षणेंद्रियदुर्जयत्वव्रतपरिपालनभारगौरवसर्वदाप्रमत्तत्वदेशभाषांतरानभिज्ञत्वविषमचपलसत्वप्रचुरभीमदुर्गनियतैकविहारत्वादिभिररतिं प्रादुष्यंतीं धृतिविशेषान्निवारयतः संयमरतिभावनाद्विषयसुखरतिर्विषाहारसेवेव विपाककटुकेति चिंतयतः रतिपरिबाधाभावादरतिपरीषहजय इति निश्चीयते।

सर्वेषामरतिकारणत्वात् पृथगरतिग्रहणानर्थक्यमिति चेन्न क्षुधाद्यभावेपि मोहोदयात्त-

---

१ पतिपात इत्यपि पाठांतरं।

त्पत्तेः ॥ १४ ॥ स्यादेतत् क्षुधादीनां सर्वेषां अरतिहेतुत्वात् पृथगरतिग्रहणं अनर्थकमिति ? तन्न किं कारणं। क्षुधाद्यभावेपि मोहोदयात्तत्प्रवृत्तेः। मोहोदयाकुलितचेतसो हि क्षुधादिवेदनाभावेपि संयमेऽरतिरुपजायते।

वरांगनारूपदर्शनस्पर्शनादिविनिवृत्तिः स्त्रीपरीषहजयः ॥ १५ ॥ एकांते आरामभवनादिप्रदेशे रागद्वेषयौवनदर्परूपमदविभ्रमोन्मादमद्यपानावेशादिभिः प्रमदासु बाधमानासु तदक्षिवक्त्रभ्रूविकारशृंगारकोरविहारविलासलीलाविजृंभकटाक्षविक्षेपसुकुमारस्निग्धमृदुपीनोन्नतस्तनकलशानितांतताम्रोदरपृथुजघनरूपगुणाभरणगंधवस्त्रमाल्यादिप्रतिनिगृहीतमनोप्लुतेर्दर्शनस्पर्शनाभिलाषनिरुत्सुकस्य स्निग्धमृदुविशदकुमाराभिधानतंत्रीवंशमिश्रातिमधुरगीतश्रवणनिमित्तादरश्रोत्रस्य संसारार्णवव्यसनपातालावगाढदुःखरौद्रार्तकुटिलध्यायिनः स्त्रैणानर्थविनिवृत्तिः स्त्रीपरीषहजय इति कथ्यते। अन्यवादिपरिकल्पिता देवताविशेषाः ब्रह्मादयः तिलोत्तमादेवगणिकारूपसंदर्शनलोललोचनविकाराः स्त्रीपरीषहपंकान्नोद्धर्तुमात्मानं समर्थाः।

गम्यादोषनिग्रहश्चर्याविजयः ॥ १६ ॥ दीर्घकालाभ्यस्तगुरुकुलब्रह्मचर्यस्याधिगतबंधमोक्षपदार्थतत्त्वस्य कषायनिग्रहपरस्य भावनार्पितमतेः संयमायतनभक्तिहेतोर्देशांतरातिथेः गुरुणाभ्यनुज्ञातस्य नानाजनपदव्याहाराव्यहाराभिज्ञस्य ग्रामे एकरात्रं नगरे पंचरात्रं प्रकर्षेणावस्थातव्यमित्येवं सयतस्य वायोरिव निःसंगतामुपगतस्य देशकालप्रमाणोपेतमध्वगमनमनुभवतः क्लेशक्षमस्य भीमाटवीप्रदेशेषु निर्भयत्वात् सिंहस्येव सहायकृत्यमनपेक्षमाणस्य पुरुषकर्कशकटकादिव्यधनजातपादखेदस्यापि सतः पूर्वोचितयानवाहनादिगमनमस्मरतः सम्यग्गम्यादोषं परिहरतः चर्यापरीषहजयो वेदितव्यः।

सकल्पितासनादविचलनं निषद्यातितिक्षा ॥ १७ ॥ स्मशानोद्यानशून्यायतनगिरिगुहागह्वरादिषु अनभ्यस्तपूर्वेषु विदितसंयमक्रियस्य धैर्यसहायस्योत्साहवतो निषद्यामधिरूढस्य प्रादुर्भूतोपसर्गरोगविकारस्यापि सतः तत्प्रदेशादविचलतः मंत्रविद्यालक्षणप्रतीकारानपेक्षमाणस्य क्षुद्रजंतुप्रायविषयदेशाश्रयात्काष्ठोपलवन्निश्चलस्यानुभूतमृदुकुथास्तरणादिस्पर्शसुखमर्मविगणयतः प्राणिपीडापरिहाराद्यतस्य ज्ञानध्यानसाधनाधीनधियः संकल्पितवीरासनोत्कुटिकासनादेरेतरास्तदोषजयान्निषद्यातितिक्षेत्याख्यायते।

आगमोदितशयनात् अप्रच्यवः शय्यासहनं ॥ १८ ॥ स्वाध्यायध्यानाध्वश्रमपरिखेदितस्य मौहूर्तिकीं खरविषमप्रचुरशर्कराकपालशकटातिशीतोष्णेषु भूमिप्रदेशेषु निद्रामनुभवतः यथाकृतैकपार्श्वदंडायतादिशायिनः संजातबाधाविशेषस्य संयमार्थमस्पंदमानस्यानुतिष्ठतः व्यंतरादिभिर्वा वित्रस्यमानस्य पलायनं प्रति निरुत्सुकस्य मरणभयनिर्विशंकस्य निपतितदारुवद्व्यपगतासुवच्चापरिवर्तमानस्य द्वीपशार्दूलमहोरगादिदुष्टसत्वप्रचरितोऽयं प्रदेशोऽचिरादतो निर्गमनं श्रेयः, कदा नु रात्रीर्विवसतीति विषादमनादधानस्य सुखप्राप्तावप्यपरितुष्यतः पूर्वानुभूतनवनीतमृदुशयनरतिमनुस्मरतःसम्यगागमोदितशयनादप्रच्यवः शय्यासहनमिति प्रत्येतव्यम्।

अनिष्टवचनसहनमाक्रोशपरीषहजयः ॥ १९ ॥ तीव्रमोहाविष्टमिथ्यादृष्ट्यार्यम्लेच्छखलपापाचारमत्तोद्दृप्तशंकितप्रयुक्तमाशब्दधिक्कारपरुषावज्ञानाक्रोशादीन्, कर्णविवरं चरणात्, हृदयशूलोद्भावकान्, क्रोधज्वलनशिखाप्रवर्द्धनकरानप्रियान्, शृण्वतोऽपि दृढमनसः, भस्मसात्कर्तुमपि समर्थस्य परमार्थावगाहितचेतसः, शब्दमात्रश्राविणस्तदर्थविक्षणाविनिवृत्तव्यापारस्य, स्वकृताशुभकर्मोदयो ममैष यतोऽमीषां मां प्रति द्वेष इत्येवमादिभिरुपायैरनिष्टवचनसहनमाक्रोशपरीषहजय इति निर्णीयते।

मारकेष्वमर्षापोहभावनं वधमर्षणं ॥ २० ॥ ग्रामोद्यानाटवीनगरेषु नक्तं दिवा चैकाकिनो निरावरणमूर्तेः समतात्पर्यटद्भिश्चौरराक्षसम्लेच्छशबरपरुषबधिरपूर्वापकारिद्विषत्परलिंगिभिराहितक्रोधैस्ताडनाकर्षणबंधनशस्त्राभिघातादिभिर्मार्यमाणस्याप्यनुपन्नवैरस्यावश्यप्रपातुकमेवेदं शरीरं कुशलद्वारेणानेनापनीयते न मम व्रतशीलभावनाभ्रंसनमिति भावशुद्धस्य दह्यमानस्यापि सुगंधमुत्सृजतश्चंदनस्येव शुभपरि-

णामस्य स्वकर्मनिर्जरामभिसंदधानस्य दृढमतेः क्षमौषधिबलस्य मारकेषु सुहृत्त्विवामर्षापोहभावनं वधमर्षणमित्याम्नायते ।

प्राणात्ययेप्याहारादिषु दीनाभिधाननिवृत्तिर्याचनाविजयः ॥ २१ ॥ क्षुधाध्वपरिश्रमतपोरोगादिभिः प्रच्यावितवीर्यस्य, शुष्कपादपस्येव निरार्द्रमूर्तेरुन्नतास्थिस्नायुजालस्य निम्नाक्षिपुटपरिशुष्काधरोष्ठक्षामपांडुकपोलस्य, चर्मवत्संकुचितांगोपांगत्वचः, शिथिलजानुगुल्फकटिबाहुयंत्रस्य, देशकालक्रमोपपन्नकल्पादायिनः, वाचंयमस्य मौनिसमस्य वा शरीरसंदर्शनमात्रव्यापारस्य, उज्झितमदस्य प्रज्ञाख्यापनमनसः प्राणात्ययेप्याहारवसतिभेषजानि दीनाभिधानमुखवैवर्ण्यांगसंज्ञादिभिरयाचमानस्य रत्नवणिजो मणिसंदर्शनमिव स्वशरीरप्रकाशनमकृपणं मन्यमानस्य वंदमानं प्रति स्वकरविकशनमिव पाणिपुटधारणमदीनमिति, गणयतः याचनसहनमवसीयते । अद्यत्वे पुनः कालदोषाद्दीनानाथपाखंडिबहुले जगत्यमार्गज्ञैरनात्मविद्भिर्याचनमनुष्ठीयते ।

अलाभेऽपि लाभवत्संतुष्टस्यालाभविजयः ॥ २२ ॥ वायुवदनेकदेशचारिणः अप्रकाशितवीर्यस्याभ्युपगतैककालभोजनस्य सकृन्मूर्तिसंदर्शनव्रतकालस्य देहीति असभ्यवाक्प्रयोगादुपरतस्यानुपात्तविग्रहप्रतिक्रियस्याद्येदं श्वश्चेदमिति व्यपेतसंकल्पस्य एकस्मिन् ग्रामे अलब्ध्वा ग्रामांतरान्वेषणनिरुत्सुकस्य पाणिपुटमात्रपात्रस्य, बहुषु दिवसेषु बहुषु च गृहेषु भिक्षामनवाप्याप्यसंक्लिष्टचेतसः नायं दाता तत्रान्योस्तीति व्यपगतपरीक्षस्य लाभादप्यलाभो मे परमं तपः इति संतुष्टस्यालाभविजयोवसेयः ।

नानाव्याधिप्रतीकारानपेक्षत्वं रोगसहनं ॥ २३ ॥ दुःखादिकरणमशुचिभाजनं जीर्णवस्त्रवत्परिहेयं । पित्तमारुतकफसन्निपातनिमित्तानेकामयवेदनाभ्यर्दितमन्यदीयमिव विग्रहं मन्यमानस्य उपेक्षिकत्वाप्रच्युतेश्चिकित्साव्यावृत्तचेष्टस्य शरीरयात्राप्रसिद्धये व्रणालेपनवद्यथोक्तमाहारमाचरतः । जल्लौषधिप्राप्त्याद्यनेकतपोविशेषर्द्धियोगे सत्यपि शरीरनिःस्पृहत्वात्प्रतीकारानपेक्षिणः पूर्वकृतपापकर्मणः फलमिदमनेनोपायेनानृणीभवामीति चिन्तयतो रोगसहनं संपद्यते ।

तृणादिनिमित्तवेदनायां मनसोऽप्रणिधानं तृणस्पर्शजयः ॥ २४ ॥ यथाभिनिर्वृत्ताधिकरणशायिनः शुष्कतृणपत्रभूमिकंटकफलकशिलातलादिषु प्रासुकेष्वसस्कृतेषु व्याधिमार्गगमनशीतोष्णजनितश्रमविनोदार्थं शय्यां निषद्यां वा भजमानस्य तृणादिबाधितमूर्तेरुत्पन्नकंडूविकारस्य दुःखमनभिचिन्तयतः तृणादिस्पर्शबाधावशीकृतत्वात्तृणस्पर्शसहनमवगंतव्यम् ॥

स्वपरमलापचयोपचयसंकल्पाभावोधारणम् ॥ २५ ॥ जन्तुपीडापरिहारायाऽस्नानप्रतिज्ञस्य, स्वेदपंकदिग्धसर्वांगस्य, सिध्मकच्छूदद्रूदीर्णकायस्य, (?) नखरोमश्मश्रुकेशविकृतसहजबाह्यमलसंपर्ककारणानेकत्वे निराकारस्य स्वगतमलापचये परमलापचये वा प्रणिहितमनसः कर्ममलपंकापनोदायैवोद्यतस्य पूर्वानुभूतस्नानानुलेपनादिस्मरणपराङ्मुखचित्तवृत्तेर्मलधारणमाख्यायते ।

केशलुंचने तत्संस्काराकरणे वा महत्खेदसहनोपसंख्यानमिति चेन्न मलपरीषहावरोधात् ॥ २६ ॥ स्यादेतत्केशलुंचने तत्संस्काराकरणे वा महान् खेदः संजायते । तत्सहनमपरमुपसंख्यातव्यमिति तन्न किं कारणं ? मलपरीषहावरोधात् । मलसामान्यसंग्रहे हि तदंतर्भवति ।

मानापमानयोस्तुल्यमनसः सत्कारपुरस्कारानभिलाषः ॥ २७ ॥ चिरोषितब्रह्मचर्यस्य, महातपस्विनः, स्वपरसमयनिश्चयज्ञस्य, हितोपदेशपरस्य, तथामार्गकुशलस्य, बहुकृत्वः परवादिविजयिनः, प्रणामभक्तिसंभ्रमासनप्रदानादीनि मे न कश्चित्करोतीत्येवमविचिन्तयतः, मानापमानयोस्तुल्यमनसः सत्कारपुरस्कारानिराकांक्षस्य श्रेयोध्यायिनः, सत्कारपुरस्कारपरीषहजयो वेदितव्यः । सत्कारः पूजाप्रशंसात्मकः । पुरस्करो नाम क्रियारंभादिष्वग्रतः करणमामंत्रणं वा ।

प्रज्ञोपकार्यावक्षेपनिरासः प्रज्ञाविजयः ॥ २८ ॥ अंगपूर्वप्रकीर्णकविशारदस्य, कृत्स्नग्रंथार्थावधारिणः, अनुत्तरवादिनस्त्रिकालविषयार्थविदः, शब्दन्यायाद्यागमनिपुणस्य मम पुरस्तादितरे भास्करप्रभाभिभूतोद्योतखद्योतवत् नितरामवभासंते इति विज्ञानमदनिरासः प्रज्ञापरीषहजयः प्रत्येतव्यः ।

अज्ञानावमानज्ञानाभिलाषसहनमज्ञानपरीषहजयः ॥ २९ ॥ अज्ञोऽयं न किंचिदपि वेत्ति पशुसम इत्येवमाद्यधिक्षेपवचनं सहमानस्याध्ययनार्थग्रहणपराभिभवादिष्वसक्तबुद्धेश्चिरप्रव्रजितस्य विविधतपोविशेषभराक्रांतमूर्तेः सकलसामर्थ्याप्रमत्तस्य, विनिवृत्तानिष्टमनोवाक्कायचेष्टस्याद्यापि मे ज्ञानातिशयो नोत्पद्यत इत्यनभिसंदधतः अज्ञानपरीषहजयोऽवगंतव्यः ।

प्रव्रज्याद्यनर्थकत्वासमाधानमदर्शनसहनं ॥३०॥ संयमप्रधानस्य दुःखकरतपोनुष्ठायिनः परमवैराग्यभावनाशुद्धहृदयस्य विदितसकलपदार्थतत्त्वस्याऽर्हदायतनसाधुधर्मपूजकस्य चिरंतनस्य अद्यापि मे ज्ञानातिशयो नोत्पद्यते महोपवासाद्यनुष्ठायिनां प्रातिहार्यविशेषाः प्रादुरभूवन्निति प्रलापमात्रमिदमनर्थकेयं प्रव्रज्या, विफलं व्रतपालनमित्येवमसमादधानस्य, दर्शनशुद्धियोगाददर्शनपरीषहसहनमवसातव्यम् । एवं परीषहान्, असंकल्पोपस्थितान्सहमानस्यासंक्लिष्टचेतसः रागादिपरिणामास्रवाभावान्महान्संवरो भवति ।

श्रद्धानालोचनग्रहणमविशेषादिति चेन्नाव्यभिचारदर्शनार्थत्वात् ॥ ३१ ॥ स्यादेतच्छ्रद्धानमालोचनमिति द्विविधं दर्शनं तस्याविशेषेण ग्रहणमिह प्राप्नोति, कुतः ? अविशेषात् । न हि किंचिद्विशेषलिंगमिहाश्रितमस्तीति तन्न । किं कारणं ? अव्यभिचारदर्शनार्थत्वात् । मत्यादिज्ञानपंचकाव्यभिचारिश्रद्धानं दर्शनं । आलोचनस्य श्रुतमनःपर्यययोरप्रवृत्तेरतोऽस्याव्यभिचारिणः श्रद्धानस्य ग्रहणमिहोपपद्यते ।

मनोरथकल्पनामात्रमिति चेन्न वक्ष्यमाणकारणसामर्थ्यात् ॥ ३२ ॥ स्यादेतच्छ्रद्धानदर्शनग्रहणमिदमिति, स्वमनोरथपरिकल्पनामात्रमिति तन्न किं कारणं ? वक्ष्यमाणकारणसामर्थ्यात् । वक्ष्यते हि कारणं "दर्शनमोहांतराययोरदर्शनालाभाविति" ।

अवध्यादिदर्शनपरीषहोपसंख्यानमिति चेन्नावधिज्ञानाद्यभावे सहचरितदर्शनाभावादज्ञानपरीषहावरोधात् ॥ ३३ ॥ स्यान्मतमवध्यादिदर्शनोपेताः सुष्ठु पश्यंति नास्य किंचिदतिशयवदस्ति दर्शनं, गुणप्रत्ययं च तदित्युक्तं आगमे नूनमस्मिंस्तद्योग्या गुणा न संतीत्येवमादिवचनसहनमवध्यादिदर्शनपरीषहजयः तस्योपसंख्यानं कर्तव्यमिति ? तन्न किं कारणं ? अज्ञानपरीषहावरोधात् । तत्कथमितिचेदुच्यते अवध्यादिज्ञानाभावे तत्सहचरितदर्शनाभावः । आदित्यस्य प्रकाशाभावे प्रतापाभाववत्तस्मादज्ञानपरीषहेऽवरोधात् । यद्येवं श्रद्धानमपि दर्शनमपि ज्ञानाविनाभावीति प्रज्ञापरीषहे तस्यांतर्भावः प्राप्नोतीति ? नैष दोषः प्रज्ञायां सत्यामपि क्वचित्तत्त्वार्थश्रद्धानाभावाद् व्यभिचारोपलब्धेः ।

आह उपपादितं परीषहजयात्संवरो भवतीति । इदमुच्यतां किमेते सर्वे संसारमहार्णवादुत्तितीर्षंतममुं प्रव्रज्यामभ्युपगतमभिद्रवंति उत कश्चित्प्रतिविशेष इत्यत्रोच्यते । अमी व्याख्यातलक्षणा क्षुधादयश्चारित्रांतराणि प्रतिभाज्याः नियमेन पुनरनयोः प्रत्येतव्याः—

सूक्ष्मसांपरायछद्मस्थवीतरागयोश्चतुर्दश ॥१०॥

चतुर्दशवचनादन्याभावः ॥ १ ॥ चतुर्दशेति वचनादन्येषां परीषहाणामभावो वेदितव्यः । कुतः संख्याविशेषपरिग्रहस्य नियमार्थत्वात् । चतुर्दशैव नान्ये इति ।

सूक्ष्मसांपरायेति नियमानुपपत्तिर्मोहोदयादिति चेन्न तन्मात्रत्वात् ॥ २ ॥ स्यान्मतं युज्यते वीतरागछद्मस्थे निरवशेषमोहनीयस्योपशमात्क्षयाच्च तत्कृतवक्ष्यमाणपरीषहाष्टकाभावाच्चतुर्दशसंख्यानियमः सूक्ष्मसांपराये तु मोहोदयसद्भावाच्चतुर्दशेति नियमो नोपपद्यते इति । तन्न ? किं कारणं ? तन्मात्रत्वात् । तत्र हि केवलो लोभसंज्वलनकषायोदयः स चात्यंतसूक्ष्मस्ततो वीतरागछद्मस्थकल्पत्वाच्चतुर्दशेति नियमस्तत्रापि युज्यते ।

तत एव परीषहाभाव इति चेन्न बाधाविशेषोपरमेऽपि तद्भावस्याविरध्यासितत्वात्सर्वार्थसिद्धस्य सप्तमीगमनसामर्थ्यवत् ॥ ३ ॥ अथ मतं तत एव तयोः परीषहाभावः । कुत एव ? मोहोदयाभावान्मंदोदयाभावात् मंदोदयाच्च । यस्य हि क्षुधादिवेदनाप्रकर्षोदयस्तस्य तत्सहनात्परीषहजयो भवति न च मोहोदयबलाधानाभावे वेदनाप्रभवोस्ति तदभावात्सहनवचनं भक्तिमात्रकृतमिति । तन्न । किं कारणं ? तद्भावस्याविरध्यासितत्वात् । यथा सर्वार्थसिद्धिदेवस्यानुपरतसद्वेद्योदयप्रकर्षस्यापि सप्तमपृथिवीगमनसामर्थ्यं न हीयते तथा वीतरागछद्मस्थस्य कर्मोदयसद्भावकृतपरीषहव्यपदेशो युक्तिमवतरति ।

आह यदि शरीरवत्यात्मनि परीषहसन्निधानं प्रतिज्ञायते । अथ भगवत्युत्पन्नकेवलज्ञाने कर्मचतुष्टयफलानुभवनवशवर्तिनि कियंत उपनिपतंतीत्यत्रोच्यते, तस्मिन्पुनः—

एकादश जिने ॥ ११ ॥

कैश्चित्कल्प्यंत इति वाक्यशेषः ।

वेदनीयोदयभावात् क्षुधादिप्रसंग इति चेन्न घातिकर्मोदयसहायाभावात्तत्सामर्थ्यविरहात् ॥ १ ॥ स्यान्मतं घातिकर्मप्रक्षयान्निमत्तोपरमे सति नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनालाभसत्कारपुरस्कारप्रज्ञाज्ञानदर्शनानि माभूवन् । अमी पुनर्वेदनीयाश्रयाः खलु परीषहाः प्राप्नुवंति भगवति जिने इति ? तन्न । किं कारणं ? घातिकर्मोदयसहायाभावात् तत्सामर्थ्यविरहात् । यथा विषद्रव्यं मंत्रौषधिबलादुपक्षीणमारणशक्तिकमुपयुज्यमानं न मारणाय कल्प्यते तथा ध्यानानलनिर्दग्धघातिकर्मेंधनस्यानंताप्रतिहतज्ञानादिचतुष्टयस्यांतरायाभावान्निरंतरमुपचीयमानशुभपुद्गलसंततेर्वेदनीयाख्यं कर्म कदापि प्रक्षीणसहायबलं स्वयोग्यप्रयोजनोत्पादनं प्रत्यसमर्थमिति क्षुधाद्यभावः । तत्सद्भावोपचाराद्ध्यानकल्पनवत् । अथवा नायं वाक्यशेषः एकादश जिने कैश्चित्कल्प्यंते इति, किं तर्हि ? एकादश संतीति । कथं उपचाराद्यथा-निरवशेषनिरस्तज्ञानावरणे परिपूर्णज्ञाने एकाग्रचिंतानिरोधाभावेऽपि कर्मरजोविधूननफलसंभवात् ध्यानोपचारः । तथा क्षुधादिवेदनाभावपरीषहाभावेपि वेदनीयकर्मोदयद्रव्यपरीषहसद्भावात् एकादश जिने संतीति उपचारो युक्तः ।

आह यदि सूक्ष्मसांपरायादिषु व्यस्ताः परीषहा अथ समस्ताः क्वेति ?—

वादरसांपराये सर्वे ॥ १२ ॥

वादरसांपरायग्रहणात्प्रमत्तादिनिर्देशः ॥ १ ॥ वादरसांपराय इति नायं गुणस्थानविशेषपरिग्रहः किं तर्हि ? अर्थनिर्देशस्ततः प्रमत्तादीनां संयतानां सामान्यग्रहणं । वादरः सांपरायो यस्य सोऽयं वादरसांपराय इति ।

तत्र हि निमित्तविशेषस्यानुपक्षीणत्वात्सर्वे ॥ २ ॥ ज्ञानावरणादिनिमित्तविशेषो वक्ष्यते । तस्यानुपक्षीणत्वात्सर्वे संभवंति । कस्मिन्पुनश्चारित्रे सर्वेषां संभवः ?—

सामायिकछेदोपस्थापनापरिहारविशुद्धिसंयमेषु सर्वसंभवः ॥ ३ ॥ एतेषां त्रयाणां चारित्राणामन्यतमे सर्वे क्षुत्परीषहादयो द्रष्टव्याः ।

आह गृहीतमेतत्परीषहाणां स्थानविशेषावधारणं, इदं तु न विद्मः, कस्याः प्रकृतेः कः कार्य ? इत्यत्रोच्यते—

ज्ञानावरणे प्रज्ञाज्ञाने ॥ १३ ॥

ज्ञानावरणे अज्ञानं न प्रज्ञेति चेन्नान्यज्ञानावरणसद्भावे तद्भावात् ॥ १ ॥ स्यादेतत् ज्ञानावरणे सति अज्ञानमवोधो भवति न प्रज्ञा ज्ञानस्वभावत्वादात्मन इति ? तन्न । किं कारणं ? अन्यज्ञानावरणसद्भावे तद्भावात् । प्रज्ञा हि क्षायोपशमिकी अन्यस्मिन् ज्ञानावरणे सति मदं जनयति न सकलावरणक्षय इति

प्रज्ञाज्ञाने ज्ञानावरणे सति प्रादुःस्त इत्यभिसंबध्यते ।

मोहोदयादिति चेन्न तद्भेदानां परिगणितत्वात् ॥ २ ॥ स्यान्मतं मोहोदयादहं महाप्राज्ञो नाम्य इति मन्यते न ज्ञानावरणादिति । तन्न ? किं कारणं । तद्भेदानां परिगणितत्वात् । मोहभेदा हि परिगणिता दर्शनचारित्रव्याघातहेतुभावेन तत्र नायमंतर्भवति । चारित्रवतोऽपि प्रज्ञापरीषहसद्भावात्ततो ज्ञानावरण एवेति निश्चयः कर्तव्यः ।

आह यद्यनयोरेककर्महेतुत्वमात्मलाभेऽवसीयते । अदर्शनालाभयोः को हेतुरिति चेत्—

दर्शनमोहांतराययोरदर्शनालाभौ ॥ १४ ॥

विशिष्टकारणनिर्देशादवध्यादिदर्शनसंदेहाभावः ॥ १ ॥ दर्शनमोह इति विशिष्टमिह कारणं निर्दिश्यते ततोऽवध्यादिदर्शनविषयः संदेहो न भवति ।

अंतराय इति सामान्यनिर्देशेऽपि सामर्थ्याद्विशेषसंप्रत्ययः ॥ २ ॥ यद्यप्ययमंतराय इति सामान्यनिर्देशः तथापि सामर्थ्याल्लाभांतरायविशेषणप्रत्ययो भवति ।

आह यद्याद्ये मोहनीयभेदे सत्यदर्शनपरीषहो भवति । अथ द्वितीयस्मिन् केषां जन्मेत्यत्रोच्यते—

चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाचनासत्कारपुरस्काराः ॥१५॥

मोहोदयहेतुत्वं नाग्न्यादीनां प्रतिपद्यामहे पुंवेदोदयादिनिमित्तत्वात् ।

निषद्यापरीषहस्य मोहोदयहेतुत्वं प्राणिपीडार्थत्वात् ॥ १ ॥ मोहोदये सति प्राणिपीडापरिणामः संजायते तत्परिपालनार्थत्वात् निषद्यापरीषहोदयहेतुरित्यवसीयते ।

आहाभ्युपेमः कर्मप्रकृतिविशेषत्रय अमी परीषहा उक्ता इति । अथानेकस्मिन् सति निमित्ते भवंतीत्यत्राभिधीयते—

वेदनीये शेषाः ॥ १६ ॥

उक्तादन्यनिर्देशः शेषा इति ॥ १ ॥ उक्ताः प्रज्ञापरीषहादयः तेभ्योऽन्ये शेषा इति निर्दिश्यंते । के पुनस्ते ? क्षुत्पीपासाशीतोष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्शमलपरीषहाः ।

निमित्तात्कर्मसंयोग इति चेन्न तद्योगाभावात् ॥ २ ॥ स्यान्मतं यथा चर्मणि द्वीपिनं हंति निमित्तात्कर्मयोग इति विभक्तिविशेषविधानं यथा वेदनीये इत्येवमादिनिर्देशो भवतीति । तन्न । किं कारणं ? तद्योगाभावात् । कर्मसंयोगे हि तद्विभक्तिविधानं । न चात्र कर्मसंयोगोस्तीति तदभावः । कथं तर्हि निर्देशः ?

सन्निर्देशस्तदुपलक्षणत्वात् ॥ ३ ॥ यथा गोषु दुह्यमानासु गतः । तद्दुग्धास्वागत इतिनिर्देशः । तथा वेदनीये सतीत्येवमादिः सन्निर्देशोवसेयः, कुतस्तदुपलक्षणत्वात् ।

आह व्याख्यातनिमित्तलक्षणविकल्पाः, प्रत्यात्मं प्रादुर्भवतः, कति युगपदवतिष्ठंत इत्यत्रोच्यते—

एकादयो भाज्या युगपदेकस्मिन्नैकोनविंशतेः ॥ १७ ॥

आङभिविध्यर्थः ॥ १ ॥ आङयमभिविध्यर्थो द्रष्टव्यः । तेन एकान्नविंशतिरपि क्वचिद्युगपद्भवंतीत्यवगम्यते । तत्कथमिति चेदुच्यते ।

शीतोष्णशय्यानिषद्याचर्याणामसहभावादेकान्नविंशतिसंभवः ॥ २ ॥ शीतोष्णपरीषहयोरेकः, शय्यानिषद्याचर्याणां चान्यतम एव भवति एकस्मिन्नात्मनि, कुतः ? सहानवस्थानात् । ततस्त्रयाणामपगमे युगपदेकात्मनीतरेषां संभवादेकान्नविंशतिविकल्पो बोद्धव्यः ।

प्रज्ञाज्ञानयोर्विरोधादन्यतराभावेऽष्टादशप्रसंग इति चेन्नापेक्षातो विरोधाभावात् ॥ ३ ॥

स्यान्मतं प्रज्ञाज्ञाने अपि विरुद्धे तयोरन्यतराभावेऽष्टादशसंख्याप्रसंग इति। तन्न किं कारणं ? अपेक्षातो-विरोधाभावात्। श्रुतज्ञानापेक्षया प्रज्ञाप्रकर्षे सति अवध्याद्यभावापेक्षया अज्ञानोपपत्तेः।

दंशमशकस्य युगपत्प्रवृत्तेरेकान्नविंशतिविकल्प इति चेन्न प्रकारार्थत्वान्मशकशब्दस्य॥४॥ स्यादेतत्प्रज्ञाज्ञानयोर्विरोधाद्युगपदसंभवे दंशमशकस्य युगपत्प्रवृत्तेरेकान्नविंशतिविकल्प इति ? तन्न। किं कारणं ? प्रकारार्थत्वान्मशकशब्दस्य एक एव ह्ययं परीषहः।

दंशग्रहणात्तुल्यजातीयसंप्रत्यय इति चेन्न श्रुतिविरोधात्॥ ५॥ अथ मतमेतद्दंशग्रहणा-त्तुल्यजातीयसंप्रत्ययस्ततो मशकशब्दस्य न प्रकारार्थत्वमिति ? तन्न। किं कारणं ? श्रुतिविरोधात्। यच्छब्द आह तन्न प्रमाणं न च दंशशब्दः प्रकारमभिधत्ते ततोऽस्य विरोधः स्यात्।

तुल्यमिति चेन्नान्यतरेण परीषहस्य निरूपितत्वात्॥६॥ यदि श्रुतिविरोधादन्यार्थकल्पनमयुक्त-मित्युच्यते। ननु मशकशब्देपि तत्तुल्यमिति प्रकारार्थत्वमस्य नोपपद्यते इति तन्न। किं कारणं ? अन्यतरेण परीषहस्य निरूपितत्वात्। दंशग्रहणेनैव परीषहे निरूपिते मशकग्रहणसामर्थ्यात्प्रकारार्थो विज्ञायते।

चर्याद्यविशेषादेकान्नविंशतिवचनमिति चेन्नारतौ परीषहजयाभावात्॥ ७॥ स्यान्मतं चर्यादीनां परीषहाणामविशेषादेकत्र नियमाभावादेकत्वमित्येकान्नविंशतिवचनं क्रियते इति ? तन्न। किं कारणं ? अरतौ परीषहजयाभावात्। यद्यत्र रतिर्नास्ति परीषहजय एवास्य व्युच्छिद्यते। तस्माद्यथोक्तप्रति द्वंद्विसान्निध्यात्परीषहस्वभावाश्रयपरिणामात्मलाभनिमित्तविचक्षणस्य तत्परित्यागायापरप्रवृत्त्यर्थमैपोद्घातिकं प्रकरणमुक्तं।

निर्दिष्टाः परीषहाः यैरनाविष्टा विपश्चितोऽभिनवानि कर्माणि नोपचिन्वंति पूर्वप्रचितानि च निर्जरयंति। तदनंतरं खलु कर्मनिर्हरणार्थमाहितसामर्थ्यं पुरुषसाध्यं यदवोचाम चारित्र तच्चारित्रमोहो-पशमक्षयक्षयोपशमलक्षणात्मविशुद्धिलब्धिसामान्यापेक्षयैकं। प्राणिपीडापरिहारेंद्रियदर्पनिग्रहशक्तिभेदाद्द्विवि-धं। उत्कृष्टमध्यमजघन्यविशुद्धिप्रकर्षापकर्षयोगात्तृतीयमवस्थानमनुभवति। विकलज्ञानविषयसरागवीतराग-सकलावबोधगोचरसयोगायोगविकल्पाच्चातुर्विध्यमप्यश्नुते। पंचतयीं च वृत्तिमास्कंदति। तद्यथा—

सामायिकछेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसांपरा-यथाख्यातमिति चारित्रं॥ १८॥

सामायिकशब्दोतीतार्थः॥ १॥ अयं सामायिकशब्दोतीतार्थो द्रष्टव्यः। क्व ? दिग्देशानर्थदंड-विरतिसामायिक इत्यत्र। सामायिकमिति वा समासविषयत्वात्। अथवा अयंतीत्यायाः अनर्थाः, सत्त्वव्यपरो-पणहेतवः, संगताः आयाः समायाः, सम्यग्वा आयाः समायास्तेषु भवं, ते वा प्रयोजनमस्येति सामायिक-मवस्थानं।

सर्वसावद्ययोगप्रत्याख्यानपरं॥ २॥ सर्वस्य सावद्ययोगस्याऽभेदेन प्रत्याख्यानमवलंब्य प्रवृत्त-मवधृतकालं वा सामायिकं प्रत्याख्यायते।

गुप्तिप्रसंग इति चेन्नेह मानसप्रवृत्तिभावात्॥ ३॥ स्यादेतन्निवृत्तिपरत्वात्सामायिकस्य गुप्ति प्रसंग इति ? तन्न। किं कारणं ? मानसप्रवृत्तिभावात्। अत्र मानसीप्रवृत्तिरस्ति निवृत्तिलक्षणाद् गुप्तेरि-त्यस्ति भेदः।

समितिप्रसङ्ग इति चेन्न तत्र तस्य प्रवृत्त्युपदेशात्॥ ४॥ स्यान्मतं यदिप्रवृत्तिरूपं सामा-यिकं समितिलक्षणं प्राप्तमिति तन्न। किं कारणं ? तत्र यतस्य प्रवृत्त्युपदेशात्। सामायिके हि चारित्रे यतस्य समितिषु प्रवृत्तिरुपदिश्यते। अतः कार्यकारणभेदादस्ति विशेषः।

धर्मप्रसंग इति चेन्नांते वचनस्य कृत्स्नकर्मक्षयहेतुत्वज्ञापनार्थत्वात् ॥ ५ ॥ स्यादेतद्दशविधो धर्मो व्याख्यातः तत्र संयमेंतर्भावोऽस्य प्राप्नोतीति तन्न । किं कारणं ? अंते वचनस्य कृत्स्नकर्मक्षयहेतुत्वज्ञापनार्थत्वात् । धर्मेंतर्भूतमपि चारित्रमंते गृह्यते मोक्षप्राप्तेः साक्षात्कारणमिति ज्ञापनाय ।

प्रमादकृतानर्थप्रबन्धविलोपे सम्यक् प्रतिक्रिया छेदोपस्थापना ॥ ६ ॥ त्रसस्थावरजंतुदेशकालप्रादुर्भावे विरोधात्प्रत्यक्षत्वात्प्रमादवशादभ्युगतनिरवद्यक्रियाप्रबंधविलोपे साति तदुपात्तस्य कर्मणः सम्यक् प्रतिक्रिया छेदोपस्थापना विज्ञेया ।

विकल्पनिवृत्तिर्वा ॥ ७ ॥ अथवा सावद्यं कर्म हिंसादिभेदेन विकल्पनिवृत्तिः छेदोपस्थापना ।

परिहारेण विशिष्टा शुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्रं ॥ ८ ॥ परिहरणं परिहारः प्राणिवधान्निवृत्तिस्तेन विशिष्टा शुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्र प्रत्येतव्यं । तत्पुनस्त्रिंशद्वर्षजातस्य संवत्सरपृथक्त्वं तीर्थकरपादमूलसेविनः, प्रत्याख्याननामधेयपूर्वपरगतस्य, जंतुनिरोधप्रादुर्भावकालपरिणामजन्मयोनिदेशद्रव्यस्वभावविधानज्ञानस्य, प्रमादरहितस्य, महावीर्यस्य, परनिर्जरस्य, अतिदुष्करचर्यानिष्ठायिनः, तिस्रः संध्या वर्जयित्वा द्विगव्यूतगामिनः संपद्यते । नान्यस्य ।

अतिसूक्ष्मकषायत्वात्सूक्ष्मसांपरायत्वं ॥ ९ ॥ सूक्ष्मस्थूलसत्त्ववधपरिहाराप्रमत्तत्वात् अनुपहतोत्साहस्य अखंडितक्रियाविशेषस्य, सम्यग्दर्शनज्ञानमहामारुतसंधुक्षितप्रशस्ताध्यवसायाग्निशिखोपश्लुष्टकर्मेंधनस्य ध्यानविशेषविवसीकृतकषायविपांकुरस्य, अपचयाभिमुखानितस्तोकमोहबीजस्य, ततएव परिप्राप्तार्थसूक्ष्मसांपरायशुद्धिसंयतस्य, सूक्ष्मसांपरायचारित्रमाख्यायते ।

गुप्तिसमित्योरन्यतरत्रांतर्भाव इति चेन्न तद्भावेऽपि गुणविशेषनिमित्ताश्रयणात् ॥ १० ॥ स्यान्मतं गुप्तिसमित्योरन्यतरत्रांतर्भवतीदं चारित्रं प्रवृत्तिनिरोधात्, सम्यगयनाच्चेति ? तन्न । किं कारणं ? तद्भावेऽपि गुणविशेषनिमित्ताश्रयणात् । लोभसंज्वलनाख्यः सांपरायः सूक्ष्मो भवतीत्ययं विशेष आश्रितः ।

निरवशेषशान्तक्षीणमोहत्वादथाख्यातचारित्रं ॥ ११ ॥ चारित्रमोहस्य निरवशेषस्योपशमात्, क्षयाच्चात्मस्वभावावास्थापेक्षालक्षणमथाख्यातचारित्रमित्याख्यायते । पूर्वचारित्रानुष्ठायिभिराख्यातं न तु परिप्राप्तं प्राङ्मोहक्षयोपशमाभ्यामित्यथाख्यातं । अथशब्दस्यानंतर्यार्थवृत्तित्वान्निरवशेषमोहस्याथोपशमानंतरमाविर्भवतीत्यर्थः ।

यथाख्यातमिति वा ॥ १२ ॥ अथवा यथात्मस्वभावोवस्थितः । तथैवाख्यातत्वाद्यथाख्यातमित्याख्यायते ।

इतेरुपादानं ततः कर्मसमाप्तिज्ञापनार्थत्वात् ॥ १३ ॥ हेतित्वेवं प्रकारव्यवस्थाविपर्यासादिषु दृष्टप्रयोगे इतिरिह विवक्षातः समाप्तियोतनो दृष्टव्यः । ततो यथाख्यातचारित्रात् सकलकर्मक्षयसमाप्तिर्भवतीति ज्ञाप्यते ।

उत्तरोत्तरगुणप्रकर्षख्यापनार्थमानुपूर्व्यवचनं ॥ १४ ॥ सामायिकादीनामानुपूर्व्यवचनमुत्तरोत्तरगुणप्रकर्षख्यापनार्थं क्रियते । तद्यथा—सामायिकछेदोपस्थापनासंयमजघन्यविशुद्धिलब्धिरल्पा । ततः परिहारविशुद्धिचारित्रस्य जघन्या लब्धिरनंतगुणाः, तस्यैवोत्कृष्टा विशुद्धिरनंतगुणाः । ततः सामायिकछेदोपस्थापनासंयमोत्कृष्टा विशुद्धिरनंतगुणाः । ततः सूक्ष्मसांपरायचारित्रस्य जघन्यविशुद्धिरंतगुणाः । तस्यैवोत्कृष्टा विशुद्धिरनंतगुणाः । ततो यथाख्यातचारित्रस्य विशुद्धिः संपूर्णा प्रकर्षाप्रकर्षविरहिता अनंतगुणा एव । पंच एते चारित्रोपयोगाः शब्दविषयत्वेन संख्येयभेदाः । बुद्ध्यध्यवसानभेदादसंख्येयाः । अर्थतोऽनंतभेदाश्च भवंति । तदेतच्चारित्रं पूर्वास्रवनिरोधकारणत्वात्परमसंवरहेतुरवसेयः ।

आहोक्तं चारित्रं तदनंतरमुद्दिष्टं यत्तपसा निर्जरा चेति तस्येदानीं तपसो विधानं कर्त्तव्यमित्यत्रोच्यते । तद्द्विविधं बाह्यमभ्यंतरं च तत्प्रत्येकं षड्विधं तत्र बाह्यस्य भेदप्रतिपत्त्यर्थमाह—

अनशनावमोदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशा बाह्यं तपः ॥ १९ ॥

दृष्टफलानपेक्षं संयमप्रसिद्धिरागोच्छेदकर्मविनाशध्यानागमावाप्त्यर्थमनशनवचनं ॥ १ ॥ यत्किंचिद्दृष्टफलं मंत्रसाधनाद्यनुद्दिश्य क्रियमाणमुपवसनमनशनमित्युच्यते । तत्किमर्थं ? संयमप्रसिद्धिरागोच्छेदकर्मविनाशध्यानागमावाप्त्यर्थमवसेयम् ।

तद्द्विविधमवधृतानवधृतकालभेदात् ॥ २ ॥ तदनशनं द्वेधा व्यवतिष्ठते, कुतोऽवधृतानवधृतकालभेदात् । तत्रावधृतकाल सकृद्भोजनं चतुर्थभक्तादि, अनवधृतकालमादेहोपरमात् ।

संयमप्रजागरदोषप्रशमसंतोषस्वाध्यायसुखसिद्ध्याद्यर्थमावमोदर्यं ॥ ३ ॥ आसितं भवो य औदनः तस्य चतुर्भागेनार्द्धग्रासेन वा अवममूनं उदरमस्यासावमोदरः, अवमोदरस्य भावः, कर्म वा आवमोदर्यं, तत्किमर्थं ? संयमप्रजागरदोषप्रशमसंतोषस्वाध्यायसुखसिद्ध्यर्थं ।

एकागारसप्तवेश्मैकरथ्यार्द्धग्रामादिविषयः संकल्पो वृत्तिपरिसंख्यानं ॥ ४ ॥ भिक्षार्थिनो मुनेरेकागारादिविषयः संकल्पश्चितावरोधः वृत्तिपरिसंख्यानमाशानिवृत्त्यर्थमवगंतव्यं ।

दांतेंद्रियत्वतेजोहानिसंयमोपरोधव्यावृत्त्याद्यर्थं घृतादिरसत्यजनं रसपरित्यागः ॥ ५ ॥ दांतेंद्रियत्वं तेजोहानिः संयमोपरोधनिवृत्तिरित्येवमाद्यर्थं, घृतदधिगुडतैलादिरसत्यजनं रसत्यागः ।

रसपरित्याग इति चेन्न मतोर्लुप्तनिर्दिष्टत्वात् ॥ ६ ॥ स्यान्मतं रसशब्दोऽयं गुणवाची तद्व-तश्चात्र परित्याग इष्ट इति तस्माद्रसवत्परित्याग इति निर्देशःकर्त्तव्य इति ? तन्न । किं कारणं ? मतो लुप्तनि-र्दिष्टत्वात् । निर्दिष्टोऽत्र मतुः यथा शुक्लः पट इति ।

व्यतिरेकाद्वा तत्संप्रत्ययः ॥७॥ अथवा न गुणं व्यतिरिच्य गुणी वर्तते ततः सामार्थ्याच्च-द्वन्निर्देशः प्रतिपत्तव्यः । द्रव्यत्यागमुखेन रसपरित्यागो नान्यथेति ।

सर्वत्यागप्रसंग इति चेन्न प्रकर्षगतेः ॥ ८ ॥ स्यादेतत्सर्वमुपभोगार्हं पुद्गलद्रव्यं रसवत् । अतः सर्वत्यागः प्राप्नोतीति तन्न । किं कारणं प्रकर्षगतेः । यथाभिरूपाय कन्या देयेति । अभिरूपतमे संप्रत्ययो भवति तथा सर्वस्य पुद्गलद्रव्यस्य रसवत्त्वात् प्रकृष्टरसत्यागसंप्रत्ययो भवति । कश्चिदाह—

अनशनावमोदर्यरसपरित्यागानां वृत्तिपरिसंख्यानावरोधात् पृथङ्निर्देशः ॥ ९ ॥ वृत्तिपरिसंख्यानमिदं सामान्यं भिक्षाचरणे नियमकारित्वात् । अतो अनशनावमोदर्यरसपरित्यागानां तत्रैवावरुद्धत्वात् पृथङ्निर्देशोऽनर्थकः ।

तद्विकल्पनिर्देश इति चेन्नानवस्थानात् ॥ १० ॥ अथ मतं तस्य वृत्तिपरिसंख्यानस्य विकल्पा निर्देष्टव्याः, इति पृथगुपदेशः कर्तव्य इति चेन्न किं कारणं ? अनवस्थानात् ।

न वा कायचेष्टाविषयगणनार्थत्वाद्वृत्तिपरिसंख्यानस्य ॥११॥ न वा एष दोषः किं कारणं ? भिक्षाचरणे प्रवर्तमानः साधुः एतावत्क्षेत्रविषयां कायचेष्टां कुर्वीत, कदाचिद्यथाशक्तिरिति विषयगण-नार्थं वृत्तिपरिसंख्यानं क्रियते अनशनमभ्यवहर्त्तव्यनिवृत्तिः । आवमोदर्यरसपरित्यागावभ्यवहर्तव्यैकदेश-निवृत्तिपराविति महान्भेदः ।

आबाधात्ययब्रह्मचर्यस्वाध्यायध्यानादिप्रसिद्ध्यर्थं विविक्तशय्यासनं ॥ १२ ॥ शून्यागारादिषु विविक्तेषु जंतुपीडाविरहितेषु संयतस्य शय्यासनं वेदितव्यं । तत्किमर्थं ? आबाधात्ययब्रह्म-चर्यस्वाध्यायध्यानादिप्रसिद्ध्यर्थं ।

कायक्लेशः स्थानमौनातपनादिरनेकधा ॥ १३ ॥ प्रतिमास्थानं वाचंयमत्वं, आतपनं, वृक्षमूल इत्येवमादिना शरीरखेदः कायक्लेश इत्युच्यते । स किमर्थं—

देहदुःखतितिक्षासुखानभिष्वंगप्रवचनप्रभावनाद्यर्थं ॥ १४ ॥ दुःखापनिपाते सति तितिक्षार्थं विषयसुखे वानभिष्वंगार्थं प्रवचनप्रभावनाद्यर्थं च कायक्लेशानुष्ठानं क्रियते । इतरथा हि ध्यानप्रवेशकाले सुचोदितस्य द्वंद्वोपनिपाते सति समाधानं न स्यात् ।

परीषहजातीयत्वात्पौनरुक्त्यमिति चेन्न स्वकृतक्लेशापेक्षत्वात् ॥ १५ ॥ स्यान्मतमयं कायक्लेशः स्थानमौनादिः परीषहजातीयस्ततः पुनरुपदेशः पौनरुक्त्यं जनयतीति ? तन्न । किं कारण ? स्वकृतकायक्लेशापेक्षत्वात् । बुद्धिपूर्वो हि कायक्लेश इत्युच्यते । यतोयदृच्छयोपनिपाते परीषहः । दृष्टफलानपेक्षमित्येतत्सर्वत्रानुवर्त्तते । तत्तर्हि कर्तव्यं—

सम्यगित्यनुवृत्तेर्दृष्टफलनिवृत्तिः ॥ १६ ॥ सम्यग्योगनिग्रहोगुप्तिरित्यतः सम्यग्ग्रहणमनुवर्त्तते तेन दृष्टफलनिवृत्तिः कृता भवति सर्वत्र बाह्यत्वमस्य कुतः ।

बाह्यद्रव्यापेक्षत्वाद्बाह्यत्वम् ॥ १७ ॥ बाह्यमनशनादिद्रव्यमपेक्ष्य क्रियत इति बाह्यत्वमस्य ग्राह्यं ।

परप्रत्यक्षत्वात् ॥ १८ ॥ परेषां खल्वप्यनशनादिप्रत्यक्षं भवति ततश्चास्य बाह्यत्वम् ।

तीर्थ्यगृहस्थकार्यत्वाच्च ॥ १९ ॥ अनशनादि हि तीर्थ्यैर्गृहस्थैश्च क्रियते ततोऽप्यस्य बाह्यत्वं । कथं तर्ह्येतदनशनादितप इत्युच्यते—

कर्मनिर्दहनात्तपः ॥२०॥ यथाग्निः संचितं तृणादि दहति तथा कर्म मिथ्यादर्शनाद्यार्जितं निर्दहतीति तप इति निरुच्यते ।

देहेन्द्रियतापाद्वा ॥ २१ ॥ अथवा देहस्येन्द्रियाणां च तापं करोतीत्यनशनादि तप इत्युच्यते । तत्तापादिन्द्रियनिग्रहः सुकरो भवति ।

उक्तं बाह्यं तपः, अथाभ्यन्तरस्य के भेदा इत्यत्रोच्यते ।

प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम् ॥२०॥

कुतः पुनरुत्तरत्वं ?

यतोन्यतीर्थानभ्यस्तत्वादुत्तरत्वं ॥ १ ॥ यतोऽन्यैस्तीर्थ्यैरनभ्यस्तमनालीढं ततोऽस्योत्तरत्वम् अभ्यन्तरमिति यावत् । अतःकरणव्यापारालंबनं ततोऽस्याभ्यन्तरत्वम् ।

बाह्यद्रव्यानपेक्षत्वाच्च ॥ २ ॥ न हि बाह्यद्रव्यमपेक्ष्य वर्तमानं प्रायश्चित्तादि, ततश्चास्याभ्यंतरत्वमवसेयं ।

तद्भेदप्रतिपत्त्यर्थमाह ।

नवचतुर्दशपंचाद्विभेदं यथाक्रमं प्राग्ध्यानात् ॥ २१ ॥

नवादीनां भेदशब्दोपसंहितानामन्यपदार्थे वृत्तिः ॥ १ ॥ नवादीनां भेदशब्दोपसंहितानामन्यपदार्थे वृत्तिर्भवति नव च चत्वारश्च दश च पंच च द्वौ च भेदा अस्य नवचतुर्दशपंचद्विभेदमिति ।

द्विशब्दस्य पूर्वनिपातप्रसंग इति चेन्न पूर्वसूत्रापेक्षत्वात् ॥ २ ॥ स्यादेतत् द्विशब्दस्य पूर्वनिपातः प्राप्नोति । द्वन्द्वे—अल्पाच्तरमिति सूत्रप्रामाण्यात्संख्यायाः अल्पीयस्या इत्युपसंख्यानाच्चेति तन्न । किं कारणं ? पूर्वसूत्रापेक्षत्वात् । पूर्वसूत्रे विहितानां च नवादिभिर्यथाक्रममभिसंबन्धः कथं स्यादिति नैतद्युक्तं न लक्षणेन हि पदकारा अनुवर्त्याः, पदकारैर्नामलक्षणमनुवर्त्यं नच प्रयोजनेन लक्षणमुल्लङ्घनीयं नैष दोषः । राजदन्तादिषु पाठः करिष्यते । लक्ष्यानुविधानाल्लक्षणस्य ।

प्राग्ध्यानादिति वचनं यथासंख्यप्रतिपत्त्यर्थम् ॥ १ ॥ प्राग्ध्यानादित्युच्यते यथासंख्यप्रतिपत्तिः कथं स्यादिति । इतरथा हि वैषम्याद्यथासंख्यं न स्यात् ।

तत्राभ्यन्तरतपोभेदस्याद्यस्य निर्दिष्टविकल्पसंख्या भेदाख्या, विशेषप्रक्लृप्त्यर्थमिद मुच्यते ।

आलोचनप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोपस्थापनाः ॥ २२ ॥

किमर्थमिदमुच्यते ।

प्रमाददोषव्युदासभावप्रसादनैःशल्यानवस्थाव्यावृत्तिमर्यादात्यागसंयमदार्ढ्याराधनादिसिद्ध्यर्थं प्रायश्चित्तम् ॥ १ ॥ प्रमाददोषव्युदासः । भावप्रसादो नैःशल्यानवस्थावृत्तिः । मर्यादात्यागः । संयमदार्ढ्यमाराधनमित्येवमादीनां सिद्ध्यर्थं प्रायश्चित्तं नवविधं विधीयते । प्रायः साधुलोकः । प्रायस्य यस्मिन्कर्मणि चित्तं तत्प्रायश्चित्तम् । प्रायाच्चितिचित्तयोरिति सुट् अपराधो वा प्रायः, चित्तं शुद्धिः । प्रायस्य चित्त प्रायश्चितं—अपराधविशुद्धिरित्यर्थः ।

तत्र गुरवे प्रमादविनिवेदनं दशदोषवर्जितमालोचनं ॥ २ ॥ तेषु नवसु प्रायश्चित्तविकल्पेषु गुरवे एकान्ते निषण्णाय प्रसन्नमनसे विदितदेशकालस्य शिष्यस्य सविनयेनात्मप्रमादविनिवेदनं, दशभिर्दोषैर्विवर्जितमालोचनमित्याख्यायते । के पुनस्ते दशदोषा इति चेदुच्यते—

उपकरणेषु दत्तेषु प्रायश्चित्तं मे लघु कुर्वन्तीति चिन्त्य दानं प्रथममालोचनदोषः ॥ १ ॥ प्रकृत्या दुर्बलो ग्लानोहं उपवासादि न कर्तुमलं यदि लघु दीयेत ततोदोषनिवेदनं करिष्ये इति वचनं द्वितीयोदोषः॥२॥ अन्यादृष्टदोषगूहनं कृत्वा प्रकाशदोषनिवेदनं मायाचारस्तृतीयो दोषः ॥ ३ ॥ आलस्यात्प्रमादाद्वाल्पापराधावबोधनिरुत्सुकस्य स्थूलदोषप्रतिपादनं चतुर्थः ॥ ४ ॥ महादुश्चरप्रायश्चित्तभयान्महादोषसंवरणं कृत्वा तदनु प्रमादाचारनिवेदनं पंचमः ॥ ५ ॥ ईदृशे व्रतातिचारे सति किं नः स्यात्प्रायश्चित्तमित्युपायेन गुरूपासना षष्ठः ॥ ६ ॥ पाक्षिकचातुर्मासिकसांवत्सरिकेषु कर्मसु महति यतिसमवाये आलोचनशब्दाकुले पूर्वदोषकथनं सप्तमः ॥ ७ ॥ गुरूपपादितं प्रायश्चित्त किमिदं युक्त आगमे स्यान्नवेति शंकमानस्यान्यसाधुपरिप्रश्नोऽष्टमः ॥ ८ ॥ यत्किञ्चित्प्रयोजनमुद्दिश्यात्मना समानायैव प्रमादाचरितमावेद्य महदपि गृहीतं प्रायश्चित्तं न फलकरमिति नवमः ॥ ९ ॥ अस्यापराधेन ममातिचारः समानः तमयमेव वेत्ति अस्मै यद्दत्तं तदेव मे युक्तं लघ्वकर्तव्यमिति स्वदुश्चरितसंवरणं दशमो दोषः ॥ १० ॥ आत्मन्यपराधं चिरमनवस्थाप्य कृतिभावमन्तरेण बालवदृजुबुद्ध्या दोषं निवेदयतः न ते दोषा भवन्त्यऽन्ये च । संयतालोचनं द्विविधमिष्टमेकान्ते संयतिकालोचनं, आश्रय प्रकाशते लज्जापरपरिभवादिगणनया निवेद्यातिचारं यदि न शोधयेदपरीक्षितायव्ययाधमर्णमवसीदति । महदपि तपस्कर्म अनालोचनपूर्वकं नाभिप्रेतफलप्रदं, अतिक्तकायगतौषधवत्कृतालोचनस्यापि गुरुदत्तप्रायश्चित्तमकुर्वतोऽपरिकर्म सस्यवन्महाफलं न स्यात् । कृतालोचनचित्तगतं प्रायश्चित्तं परिस्पष्टदर्पणतलरूपवत्परिभ्राजते ।

मिथ्यादुष्कृताभिधानाद्यभिव्यक्तप्रतिक्रिया प्रतिक्रमणं ॥ ३ ॥ कर्मवशप्रमादोदयजनितं मिथ्या मे दुःकृतमित्येवमाद्यभिव्यक्तः प्रतीकारः प्रतिक्रमणमित्युच्यते ।

तदुभयसंसर्गे सति शोधनात्तदुभयं ॥ ४ ॥ किञ्चित्कर्मालोचनमात्रादेव शुध्यति । अपरं प्रतिक्रमेण, इतरत्पुनस्तदुभयसंसर्गे सति शुद्धिमुपयातीति तदुभयमित्युपदिश्यते ।

इदमयुक्तं वर्तते किमत्रायुक्तमनालोचयतः न किञ्चिदपि प्रायश्चित्तमित्युक्तं पुनरुपदिष्टं प्रतिक्रमणमात्रादेव शुद्धिकरमिति एतदयुक्तं अथ तत्राप्यालोचनपूर्वकत्वमभ्युपगम्यते तदुभयोपदेशो व्यर्थः ? नैष दोषः सर्वं प्रतिक्रमणमालोचनपूर्वकमेव । किन्तु पूर्वं गुरुणाभ्यनुज्ञातं शिष्येणैव कर्तव्यम् । इदं पुनर्गुरुणैवानुष्ठेयं ।

संसक्तान्नपानोपकरणादिविभजनं विवेकः ॥ ५ ॥ संसक्तानामन्नपानोपकरणादीनां विभजनं विवेक इत्युच्यते ।

व्युत्सर्गः कायोत्सर्गादिकरणं ॥ ६ ॥ कालनियमेन कायोत्सर्गादिकरणं व्युत्सर्ग इत्युच्यते ।

तपोऽनशनादि ॥ ७ ॥ अनशनावमौदर्यवृत्तिपरिसंख्यानादि तपोऽवगंतव्यं ।

दिवसपक्षमासादिना प्रव्रज्याहापनं छेदः ॥ ८ ॥ चिरप्रव्रजितस्य दिवसमासादिविभागेन प्रव्रज्याहापनं छेद इति प्रत्येतव्यं ।

पक्षमासादिविभागेन संसर्गमंतरेण दूरतः परिवर्जनं परिहार इत्यवध्रियते ॥ ९ ॥

पुनर्दीक्षाप्रापणमुपस्थापना ॥ १० ॥ महाव्रतानां मूलच्छेदं कृत्वा पुनर्दीक्षाप्रापणमुपस्थापनेत्याख्यायते । विद्यायोगोपकरणग्रहणादिषु प्रश्नविनयमंतरेण प्रवृत्तिरेव दोष इति तस्य प्रायश्चित्तमालोचनमात्रं । देशकालनियमेनावश्यं कर्तव्यमित्यास्थितानां धर्मकथादिव्याक्षेपहेतुसन्निधानेन विस्मरणे सति पुनरनुष्ठाने प्रतिक्रमणं तस्य प्रायश्चित्तं । भयत्वरणविस्मरणेऽनवबोधाशक्तिव्यसनादिभिर्महाव्रतातिचारे सति प्राक्छेदात्षड्विधं प्रायश्चित्तं विधेयं । शक्त्यनिगूहनेन प्रयत्नेन परिहरतः कुतश्चित्कारणादप्रासुकग्रहणग्राहणयोः प्रासुकस्यापि प्रत्याख्यातस्य विस्मरणात् प्रतिगृहे च स्मृत्वा पुनस्तदुज्झनं प्रायश्चित्तं । दुःस्वप्नदुश्चिंतनमलोत्सर्जनमूत्रातिचारमहानदीमहाटवीतरणादिषु व्युत्सर्गः प्रायश्चित्तं । बहुकृत्वः प्रमादबहुदृष्टापराधप्रत्यनीकवृत्तिविरुद्धदृष्टीनां यथाक्रमं छेदः मूलभूम्यनुपस्थापनं पारंचिकं[1] विधानं क्रियते । अपरकृष्ट्याचार्यमूले प्रायश्चित्तग्रहणमनुपस्थापनं । आचार्यादाचार्यांतरप्रापणमातृतीयं पारंचिकं तदेतन्नवविधं प्रायश्चित्तं, देशकालशक्तिसंयमाद्यविरोधेनापराधानुरूपं दोषप्रशमनं चिकित्सितवद्विधेयं । जीवस्यासंख्येयलोकपरिमाणाः—परिणामविकल्पाः, अपराधाश्च तावंत एव, न तेषां तावद्विकल्पं प्रायश्चित्तमस्ति । व्यवहारनयापेक्षया पिंडीकृत्य प्रायश्चित्तविधानमुक्तं ।

आह व्याख्यातं प्रायश्चित्तमिदानीं तदनंतरमुद्दिष्टस्य विनयस्य विकल्पा वक्तव्याः ? अत्रोच्यते,—

ज्ञानदर्शनचारित्रोपचाराः ॥ २३ ॥

विनय इत्यनुवृत्तेः प्रत्येकमभिसंबंधः ॥ १ ॥ विनय इत्यनुवर्तते तेन प्रत्येकमभिसंबंधो भवति ज्ञानविनयो दर्शनविनयश्चारित्रविनय उपचारविनयश्चेति ।

तत्र सबहुमानज्ञानग्रहणाभ्यासस्मरणादिर्ज्ञानविनयः ॥ २ ॥ अनलसेन शुद्धमनसा देशकालादिविशुद्धिविधानविचक्षणेन सबहुमानो यथाशक्तिनिषेव्यमाणो मोक्षार्थं ज्ञानग्रहणाभ्यासस्मरणादिर्ज्ञानविनयो वेदितव्यः ।

पदार्थश्रद्धाने निःशंकितत्वादिलक्षणोपेतता दर्शनविनयः ॥ ३ ॥ सामायिकादौ लोकबिंदुसारपर्यंते श्रुतसमुद्रे यथा भगवद्भिरुपदिष्टाः पदार्थाः यथालक्षणा वर्तंते 'नान्यथा वादिनो जिना' इति निःसंशयोपेतता दर्शनविनय इत्याख्यायते ।

तद्वतश्चारित्रे समाहितचित्तता चारित्रविनयः ॥ ४ ॥ तद्वतो ज्ञानदर्शनवतः पंचविधदुश्चरचरणश्रवणानंतरसमुद्भिन्नरोमांचाभिव्यज्यमानांतर्भक्तेः परप्रसादो मस्तकांजलिकरणादिभिर्भावतश्चानुष्ठातृत्वं चारित्रविनयः प्रत्येतव्यः ।

प्रत्यक्षेष्वाचार्यादिषु पूजनीयेष्वभ्युत्थानाभिगमनांजलिकरणादिरुपचारविनयः ॥ ५ ॥ प्रत्यक्षेष्वाचार्यादिषु पूजनीयेषु अभ्युत्थानाभिगमनांजलिकरणवंदनानुगमनादिरात्मानुरूप उपचारविनयोऽवगंतव्यः ।

---

१ पारंचिक इत्यपि पाठांतरं ।

परोक्षेष्वपि कायवाङ्मनोभिरंजलिक्रियागुणसंकीर्तनानुस्मरणादिः॥६॥ परोक्षेष्वाचार्यादिष्वंजलिक्रियागुणसंकीर्तनानुस्मरणज्ञानानुष्ठायित्वादिः कायवाङ्मनोभिरवगंतव्यः ।

किमर्थमिदं विनयभावनं ।

ज्ञानलाभाचारविशुद्धिसम्यगाराधनाद्यर्थं विनयभावनं ॥७॥ ज्ञानलाभः, आचारविशुद्धिः, सम्यगाराधनमित्येवमादीनां सिद्धिर्भवति विनयभावनेन । ततश्च निवृत्तिसुखमिति विनयभावनं क्रियते।

आह विनयोवर्णितः, तदनंतरोद्देशभाजो वैयावृत्त्यस्येदानीं विवरण कर्तव्यमित्यत इदानीमुच्यते—

आचार्योपाध्यायतपस्विशैक्ष्यग्लानगणकुलसंघसाधुमनोज्ञानां ॥ २४ ॥

वैयावृत्त्यमित्यनुवृत्तेः प्रत्येकमभिसंबंधः ॥ १ ॥ वैयावृत्यमित्यनुवर्त्तते तेन प्रत्येकमभिसंबंधो भवति । आचार्यवैयावृत्यमुपाध्यायवैयावृत्यमित्यादि ।

व्यावृत्तस्य भावः कर्म च वैयावृत्त्यं ॥ २ ॥ कामचेष्टया द्रव्यांतरेण वा व्यावृत्तस्य भावः कर्म वा वैयावृत्यमित्युच्यते ।

आचरंति यस्माद्व्रतानीत्याचार्यः ॥ ३ ॥ यस्मात्सम्यग्ज्ञानादिगुणाधारादाहृत्य व्रतानि स्वर्गापवर्गसुखामृतबीजानि भव्या हितार्थमाचरंति स आचार्यः ।

उपेत्य यस्मादधीयते इत्युपाध्यायः ॥ ४ ॥ विनेयेनोपेत्य यस्माद्व्रतशीलभावनाधिष्ठानादागमं श्रुताख्यमधीयते स उपाध्यायः ।

महोपवासाद्यनुष्ठायी तपस्वी ॥ ५ ॥ महोपवासादिलक्षणं तपोनुतिष्ठति यः स तपस्वीत्युच्यते। कुत एतत् ? अतिशयार्थे मत्वर्थीयप्रयोगात् ।

शिक्षाशीलः शैक्ष्यः ॥ ६ ॥ श्रुतज्ञानशिक्षणपरः अनुपरतव्रतभावनानिपुणः शैक्षक इति लक्ष्यते ।

रुजादिक्लिष्टशरीरो ग्लानः ॥ ७ ॥ रुजादिभिः क्लिष्टशरीरो ग्लान इत्युच्यते ।

गणः स्थविरसंततिः ॥ ८ ॥ स्थविराणां संततिर्गण इत्युच्यते ।

दीक्षकाचार्यशिष्यसंस्त्यायः कुलं ॥९॥ दीक्षकस्याचार्यस्य शिष्यसंस्त्यायः कुलव्यपदेशमर्हति ।

चतुर्वर्णश्रमणनिवहः संघः ॥ १० ॥ चतुर्वर्णानां श्रमणानां निवहः संघ इति समाख्यायते।

चिरप्रव्रजितः साधुः ॥ ११ ॥ चिरकालभावितप्रव्रज्यागुणः साधुरित्याम्नायते ।

मनोज्ञोऽभिरूपः ॥ १२ ॥ अभिरूपो मनोज्ञ इत्यभिधीयते ।

संमतो वा लोकस्य विद्वत्तावक्तृत्वमहाकुलत्वादिभिः ॥ १३ ॥ अथ वा विद्वान्, वाग्मी, महाकुलीन इति यो लोकस्य संमतः स मनोज्ञः, तस्य ग्रहणं प्रवचनस्य लोके गौरवोत्पादनहेतुत्वात् ।

असंयतसम्यग्दृष्टिर्वा ॥ १४ ॥ अथवा असंयतसम्यग्दृष्टिर्मनोज्ञ इति गृह्यते संसारोपेतरूपत्वात् । तेषां व्याधिपरीषहमिथ्यात्वाद्युपनिपाते प्रासुकौषधिभक्तपानप्रतिश्रयपीठफलकसंस्तरणादिभिर्धर्मोपकरणैस्तत्प्रतीकारः सम्यक्त्वप्रत्यवस्थापनमित्येवमादि वैयावृत्यं ।

बाह्यद्रव्यासंभवे स्वकायेन तदानुकूल्यानुष्ठानं च ॥ १५ ॥ बाह्यस्यौषधभक्तपानादेरसंभवेऽपि स्वकायेन श्लेष्मसिंघाणकाद्यंतर्मलापकर्षणादितदानुकूल्यानुष्ठानं च वैयावृत्यमिति कथ्यते ।

तत्पुनः किमर्थमिति चेदुच्यते,

समाध्याधानविचिकित्साभावप्रवचनवात्सल्याद्यभिव्यक्त्यर्थं ॥ १६ ॥ समाध्याधानं

विचिकित्साभावः प्रवचनवात्सल्यं, सनाथता चेत्येवमाद्यभिव्यक्त्यर्थं वैयावृत्यमिष्यते । किमर्थं बहूनामुपक्षेपः क्रियते । ननु संघवैयावृत्यं गणवैयावृत्यमिति वा वक्तव्यं ।

बहूपदेशात्क्वचिन्नियमेन प्रवृत्तिज्ञापनाय भूयसामुपन्यासः ॥ १७ ॥ बहुषु वैयावृत्याहेंषूपदिष्टेषु क्वचित्कस्यचित्प्रवृत्तिर्यथास्यादित्येवमाद्यर्थं भूयसामुपन्यासः क्रियते ।

आह व्याख्यातं वैयावृत्य तत्समीपदेशभाजः स्वाध्यायस्येदानीं निर्देशः करणीय इत्यत्राभिधीयते,—

वाचनापृच्छनानुप्रेक्षाम्नायधर्मोपदेशः ॥ २५ ॥

निरवद्यग्रंथार्थोभयप्रदानं वाचना ॥ १ ॥ निरवद्यग्रंथस्यार्थस्य तदुभयस्य वा पात्रे प्रतिपादनं वाचनेत्युच्यते ।

संशयच्छेदाय निश्चितबलाधानाय वा परानुयोगः पृच्छनं ॥ २ ॥ आत्मोन्नतिपरातिसंधानोपहाससंघोषप्रहसनादिविवर्जितः संशयच्छेदाय निश्चितबलाधानाय वा ग्रंथस्यार्थस्य वा परं प्रत्यनुयोगः पृच्छनमिति भाष्यते ।

अधिगतार्थस्य मनसाभ्यासोऽनुप्रेक्षा ॥ ३ ॥ अधिगतपदार्थप्रक्रियस्य तप्तायस्पिंडवदर्पितचेतसो मनसाभ्यासोऽनुप्रेक्षा वेदितव्याः ।

घोषविशुद्धपरिवर्तनमाम्नायः ॥ ४ ॥ व्रतिनो वेदितसमाहारस्यैहलौकिकफलनिरपेक्षस्य द्रुतविलंबितादिघोषदोषविशुद्धं परिवर्तनमाम्नाय इत्युपदिश्यते ।

धर्मकथाद्यनुष्ठानं धर्मोपदेशः ॥ ५ ॥ दृष्टप्रयोजनपरित्यागादुन्मार्गनिवर्तनार्थं संदेहव्यावर्तनापूर्वपदार्थप्रकाशनार्थं धर्मकथाद्यनुष्ठानं धर्मोपदेश इत्याख्यायते । किमर्थोऽयं स्वाध्यायः ?

प्रज्ञातिशयप्रशस्ताध्यवसायाद्यर्थः स्वाध्यायः ॥ ६ ॥ प्रज्ञातिशयः, प्रशस्ताध्यवसायः प्रवचनस्थितिः संशयोच्छेदः परवादिशंकाभावः । परमसंवेगः तपोवृद्धिरतिचारविशुद्धिरित्येवमाद्यर्थः स्वाध्यायोऽनुष्ठेयः ।

आह वर्णितः पंचविधः स्वाध्यायः तदनंतरमुद्दिष्टो यो व्युत्सर्गस्तस्य भेद इदानीं वक्तव्य इत्यत्राभिधीयते,—

बाह्याभ्यंतरोपध्योः ॥ २६ ॥

व्युत्सर्ग इत्यनुवृत्तेर्व्यतिरेकनिर्देशः ॥ १ ॥ व्युत्सर्जनं व्युत्सर्ग इति भावसाधनः शब्दोनुवर्तते । तदपेक्षोऽयं व्यतिरेकनिर्देशः ।

उपधीयते बलाधानार्थमित्युपधिः ॥२॥ योर्थोऽन्यस्य बलाधानार्थमुपधीयते स उपधिरित्युच्यते ।

अनुपात्तवस्तुत्यागो बाह्योपधिव्युत्सर्गः ॥ ३ ॥ आत्मनानुपात्तस्य एकत्वमनापन्नस्य वस्तुनस्त्यागो बाह्योपधिव्युत्सर्गो वेदितव्यः ।

क्रोधादि भावनिवृत्तिरभ्यन्तरोपधिव्युत्सर्गः ॥ ४ ॥ क्रोधमानमायालोभमिथ्यात्वहास्यरत्यरतिशोकभयादिदोषनिवृत्तिरभ्यंतरोपधिव्युत्सर्ग इति निश्चीयते ।

कायत्यागश्च नियतकालो यावज्जीवं वा ॥ ५ ॥ कायत्यागश्चाभ्यंतरोपधिव्युत्सर्ग इत्युच्यते । स पुनर्द्विविधः । नियतकालो यावज्जीवं चेति ।

परिग्रहनिवृत्तेरवचनमिति चेन्न तस्य धनहिरण्यवसनादिविषयत्वात् ॥ ६ ॥
स्यादेतन्महाव्रतोपदेशकाले परिग्रहनिवृत्तिरुक्ता ततः पुनरिदं वचनमनर्थकमिति तन्न । किं कारणं ? तस्य धनहिरण्यवसनादिविषयत्वात् ।

धर्माभ्यंतरे भावादिति चेन्न प्रासुकनिरवद्याहारादिनिवृत्तितंत्रत्वात् ॥ ७ ॥ स्यादेतद्दश विधधर्मेऽतरीभूतस्त्याग इति पुनरिदं वचनमनर्थकमिति तन्न किं कारणं ? तस्य प्रासुकनिरवद्याहारादिनिवृत्तितंत्रत्वात् ।

तस्य प्रायश्चित्ताभ्यंतरत्वादिति चेन्न प्रतिद्वंद्विभावात् ॥ ८ ॥ अथमतमेतत्प्रायश्चित्ताभ्यंतरो व्युत्सर्गस्ततः पुनस्तस्य वचनमनर्थकमिति तन्न किं कारणं ? तस्य प्रतिद्वंद्विभावात्तस्य हि व्युत्सर्गस्यातिचारः प्रतिद्वंद्वी विद्यते । अयं पुनरनपेक्षः क्रियते इत्यस्ति विशेषः ।

अनेकत्रावचनमनेनैव गतत्वादिति चेन्न शक्त्यपेक्षत्वात् ॥ ९ ॥ अनेकत्र वचनमनर्थकमेवास्तु पर्याप्तमिति तन्न किं कारणं? शक्त्यपेक्षत्वात् । कचित्सावद्यं प्रत्याख्यायते क्वचिन्निरवद्यमपि नियतकालं क्वचिदनियतकालं पुरुषशक्त्यपेक्षत्वान्निवृत्तिधर्मस्योत्तरोत्तरगुणप्रकर्षादुत्साहोत्पादनार्थत्वाच्च न पौनरुक्त्यं । किमर्थं पुनर्व्युत्सर्गः,—

निःसंगनिर्भयत्वजीविताशाव्युदासाद्यर्थो व्युत्सर्गः ॥ १० ॥ निःसंगत्वं निर्भयत्वं जीविताशाव्युदासः दोषोच्छेदो मोक्षमार्गभावनापरत्वमित्येवमाद्यर्थो व्युत्सर्गोऽभिधीयते । स द्विविधः ।

आह अभ्यंतरतपः षोढा प्रतिज्ञाय प्राग्ध्यानादिति यत्संन्यस्तं तपोध्यानाभिधानं तदनाविष्कृतार्थं प्राप्तविचारकालमित्यत्रोच्यते,—

उत्तमसंहननस्यैकाग्रचिंतानिरोधो ध्यानमांतर्मुहूर्त्तात् ॥२७॥

आद्यं संहननत्रयमुत्तमं ॥ १ ॥ वज्रवृषभनाराचसंहननं, वज्रनाराचसंहननं, नाराचसंहननमित्येतत्त्रितयं संहननमुत्तमं । कुतो ध्यानादिवृत्तिविशेषहेतुत्वात् । तत्र मोक्षस्य कारणमाद्यमेकमेव । ध्यानस्य त्रितयमपि उत्तमसंहननं ।

तस्य उत्तमसंहननस्यैकशब्दः संख्यापदं ॥ २ ॥ अन्या सहायाद्यनेकार्थसंभवे एक शब्दोऽत्र संख्यावाची गृह्यते ।

अंग्यते तदंगमिति तस्मिन्निति वाग्रमुखं ॥ ३ ॥ अगेर्गत्यर्थस्य कर्मण्यधिकरणे वा उणादौ रग्निपातितः । 'वज्रेंद्रभद्राग्र इत्यत्र, अग्रं मुखमित्यर्थः ।

चिंता अंतःकरणवृत्तिः ॥ ४ ॥ अंतःकरणवृत्तिरर्थेषु चिंतेत्युच्यते ।

अनियतक्रियार्थस्य नियतक्रियाकर्तृत्वेनावस्थानं निरोधः ॥ ५ ॥ गमनभोजनशयनाध्ययनादिषु क्रियाविशेषेषु अनियमेन वर्तमानस्य एकस्य, एकस्याः क्रियायाः कर्तृत्वेनावस्थानं निरोध इत्यवगम्यते । एकमग्रं मुखं यस्य सोयमेकाग्रः । चिंताया निरोधः चिंतानिरोधः । एकाग्रः चिंतानिरोधः । एकाग्रचिंतानिरोधः । कुतः पुनरसौ एकाग्रत्वेन चिंतानिरोधः ?

वीर्यविशेषात्प्रदीपशिखावत् ॥ ६ ॥ यथा प्रदीपशिखानिराबाधे प्रज्वलिता न परिस्पंदते तथा निराकुले देशे वीर्यविशेषादवरुध्यमाना चिंता विना व्याक्षेपण एकाग्रेणावतिष्ठते ।

अर्थपर्यायवाची वाग्रशब्दः ॥ ७ ॥ अथवा अंग्यते इत्यग्रमर्थ इत्यर्थः । एकमग्रं एकाग्रं । एकाग्रे चिंताया निरोधः एकाग्रचिंतानिरोधः । योगविभागान्मयूरव्यंसकादित्वाद्वा वृत्तिः एकस्मिन्द्रव्यपरमाणौ भावपरमाणौ वाऽर्थे चिंतानियम इत्यर्थः ॥

ध्यानशब्दो भावकर्तृकरणसाधनो विवक्षावशात् ॥ ८ ॥ अयं ध्यानशब्दः, भावकर्तृकरणसाधनो विवक्षावशाद्वेदितव्यः । तत्र ध्येयं प्रति अव्यावृत्तस्य भावमात्रेणाभिधाने ध्यातिर्ध्यानमिति भाव साधनो ध्यानशब्दः । ध्यायतीति ध्यानमिति बहुलापेक्षया कर्तृसाधनश्च युज्यते । करणप्रशंसापरायाम-

भिधानप्रवृत्तौ समीक्षितायां यथा साध्वसिश्छिनत्तीति प्रयोक्तृनिर्वर्त्ययोः सतोरप्युद्यमननिपातनयोरविशेष-तंत्रत्वाच्छेदनस्य कर्तृधर्माध्यारोपः क्रियते तथा दिध्यासोरप्यात्मनः ज्ञानावरणवीर्यांतरायक्षयोपशमाविशेष-तंत्रत्वात् ध्यानपरिणामस्य युज्यते कर्तृत्वं। करणत्वमपि चास्य पर्यायपर्यायिणोर्भेदपरिकल्पनासद्भावात्। युज्यते। अग्नेर्दाहपाकस्वेदादिक्रियाप्रवृत्तस्यात्मभूतौष्ण्यकरणपरिकल्पनवत्।

एकांतपरिकल्पनायां दोषविधानमुक्तं ॥ ९ ॥ अर्थांतरभावोऽनर्थांतरभाव एवेत्येकांत-कल्पनायां दोषविधानमुक्त आदिसूत्रे।

प्रणीतपरिमाणो मुहूर्त्तः ॥ १० ॥ मुहूर्त्त इति काल विशेषवाचिशब्दः। तस्य परिमाणं प्राग्विहितं।

उत्तमसंहननाभिधानमन्यस्येयत्कालाध्यवसायधारणसामर्थ्यात् ॥ ११ ॥ अन्यत्संहन-नमेतावंतं कालं चिंतानिरोधधारणे साधनभावं प्रत्यसमर्थमिति उत्तमसंहननग्रहणं क्रियते।

एकाग्रवचनं वैयग्र्यनिवृत्त्यर्थं ॥ १२ ॥ एकाग्रवचनं क्रियते वैयग्र्यनिवृत्त्यर्थं। व्यग्रं हि ज्ञानमेव न ध्यानमिति।

चिंतानिरोधग्रहणं तत्स्वाभाव्यप्रदर्शनार्थं ॥ १३ ॥ यथा पृथिव्याः कस्मिंश्चित्परिणाम-विशेषे घटशब्दो वर्तते। एवं चिंतायाः ज्ञानात्मिकायाः वृत्तिविशेषे ध्यानशब्दो वर्त्तते इति प्रदर्शनार्थं चितानिरोध इति विशेष्यते।

ध्यानमित्यविकृतस्वरूपनिर्देशार्थं ॥ १४ ॥ यत्तदाधिकृतमुत्तमं तपः, तत्स्वरूपनिर्देशार्थं ध्यान वचनं क्रियते।

मुहूर्त्तवचनादाहरादिविनिवृत्तिः ॥ १५ ॥ आहारादिकालांतरव्यावृत्त्यर्थं मुहूर्त्तवचनं क्रियते। अतः परं दुर्द्धरत्वात्।

अभावो निरोध इति चेन्न केनचित्पर्यायेणेष्टत्वात् ॥१६॥ स्यान्मतमभावो निरोध इत्यनर्थां-तरं स चेत्, ध्यानशब्दार्थः खरविषाणवत् ध्यानमसत्प्रसजतीति ? तन्न। किं कारणं ? केनचित्पर्यायेणेष्टत्वात्। अन्यचिंताभावविवक्षायामसदेव ध्यानं। विवक्षितार्थविषयावगमस्वभावसामर्थ्यापेक्षया सदेवेति चोच्यते।

अभावस्य च वस्तुत्वाद्धेत्वंगत्वादिति ॥ १७ ॥ अभावोऽप्ययं वस्तुधर्मः कुतः हेत्वंगत्वादिति ततश्चोभालंभाभावः।

एकार्थवचनं विस्पष्टत्वादिति चेन्नानिष्टप्रसंगात् ॥ १८ ॥ स्यान्मतमेकार्थचिंतानिरोध इत्यस्तु विस्पष्टत्वादिति तन्न किं कारणमनिष्टप्रसंगात्। किमनिष्टं 'वीचारोऽर्थव्यंजनयोगसंक्रांतिरिति' वक्ष्यते तेनार्थसंक्रम इष्यते द्रव्यात्पर्याये पर्यायाच्च द्रव्ये। यद्येकार्थे निरोध इह गृह्यते तद्विरोधः स्यात्।

एकाग्रवचने तुल्यमिति चेन्नाभिमुख्ये सति पौनःपुन्येनापि प्रवृत्तिज्ञापनार्थत्वात् ॥१९॥ अथ मतमेतदेकाग्रवचनेऽपि तस्यानिष्टस्य प्रसंगः तुल्य इति चेन्न किं कारणमाभिमुख्ये सति पौनःपुन्येना ऽपि वृत्तिविज्ञानार्थत्वात्। अग्रं मुखमिति ह्युच्यमानेऽनेकमुखत्वं निवर्तितं एकमुखं तु संक्रमोऽभ्युपगत एवेति नानिष्टप्राप्तिः।

प्राधान्यवाचिनो वैकशब्दस्य ग्रहणं ॥ २० ॥ अथवा प्राधान्यवचनमेकशब्द इह गृह्यते प्रधानस्य पुंस आभिमुख्येन चिंतानिरोध इत्यर्थः। अस्मिन्पक्षेऽर्थो गृहीतः।

अंगतीत्यग्रमात्मेति वा ॥ २१ ॥ अथ वा अंगतीत्यग्रमात्मेत्यर्थः। द्रव्यार्थनयैकस्मिन्नात्मन्यग्रे चिंतानिरोधो ध्यानं ततः स्ववृत्तित्वाद् बाह्यध्येयप्राधान्यापेक्षा निवर्तिता भवति।

दिवसमासाद्यवस्थानमुपयुक्तस्येति चेन्नेंद्रियोपघातप्रसंगात् ॥२२॥ स्यादेतद्ध्यानोपयोगेन दिवसमासाद्यवस्थानं नांतमुहूर्तादिति तन्न किं कारणमिंद्रियोपघातप्रसंगात् ।

प्राणापानविनिग्रहो ध्यानमिति चेन्न शरीरपातप्रसंगात् ॥ २३ ॥ स्यादेतत्प्राणापानकर्मणो निग्रहो ध्यानमिति तन्न किं कारणं ? शरीरपातप्रसंगात् । प्राणापाननिग्रहे सति तदुद्भूतवेदना प्रकर्षात् । आश्वेव शरीरस्य पातः प्रसज्येत । तस्मान्मंदमंदप्राणापानप्रचारस्य ध्यानं युज्यते ।

मात्राकालपरिगणनमिति चेन्न ध्यानातिक्रमात् ॥ २४ ॥ स्यान्मतं मात्राकालपरिगणनं ध्यानमिति तन्न किं कारणं ? ध्यानस्यातिक्रमात् । मात्राभिर्यदि कालगणनं क्रियते ध्यानमेव न स्याद्वैयग्र्यात् ।

विध्युपायनिर्देशः कर्तव्य इति चेन्न गुप्त्यादिप्रकरणस्य तादर्थ्यात् ॥ २५ ॥ स्यान्मतमेकाग्रचिंतानिरोधोध्यानमित्येतद्युक्तं किंतु तदुत्पत्तये विध्युपायनिर्देशः कर्तव्य अनेन विधिना अनेनोपायेन ध्यानं भवतीति तन्न किं कारणं ? गुप्त्यादिप्रकरणस्य तादर्थ्यात् । ध्यानविधानभावनार्थमेव हि गुप्त्यादिप्रकरणं प्रक्रांतं ।

संवरार्थं तदिति चेन्न प्रागुपदेशस्योभयार्थत्वात् ॥ २६ ॥ स्यान्मतं संवरप्रतिपत्त्यर्थं तद्गुप्त्यादि प्रकरणमुक्तं न ध्यानोपायप्रतिपत्त्यर्थं नवाऽन्यार्थं प्रकृतमन्यार्थं भवतीति तन्न । किं कारणं ? प्रागुपदेशस्योभयार्थत्वात् । अन्यार्थमपि प्रकृतमन्यार्थं भवति च । तद्यथा—शाल्यर्थं कुल्याः प्रणीयते । ताभ्यश्च पानीयं पियते । उपस्पृश्यते च शालयश्च भाव्यंते ।

सकलध्यानधर्मासंग्रह इति चेन्न ध्यानप्राभृते प्रणीतत्वात् ॥ २७ ॥ स्यान्मतं सकलोध्यानधर्मो नास्मिन्सूत्रे संग्रहीत इत्यपरिपूर्णं लक्षणमिति तन्न किं कारणं ? ध्यानप्राभृते प्रणीतत्वात् । तत्र हि ध्यानलक्षण सकल प्राधान्येनोक्तं इह त्वानुषंगिकमिति । तस्य ध्यानस्य सामान्येनोक्तस्य विकल्पप्रतिपत्त्यर्थमिदमुच्यते,

आर्त्तरौद्रधर्म्यशुक्लानि ॥ २८ ॥

ऋतमर्दनमार्त्तिर्वा तत्र भवमार्त्तं ॥ १ ॥ ऋतं दुःखं, अथवार्दनमार्त्तिर्वा तत्र भवमार्त्तं ।

रुद्रः क्रूरस्तत्कर्म रौद्रं ॥ २ ॥ रोदयतीति रुद्रः क्रूर इत्यर्थः । तस्येदं कर्म, तत्र भवं वा रौद्रमित्युच्यते ।

धर्मादनपेतं धर्म्यं ॥ ३ ॥ धर्मो वर्णितः, ततोऽनपेतं ध्यानं धर्म्यमित्याख्यायते ।

शुचिगुणयोगाच्छुक्लं ॥ ४ ॥ यथा मलद्रव्यापायतः शुचिगुणयोगाच्छुक्लं वस्त्रं तथा तद्गुण साधर्म्यादात्मपरिणामस्वरूपमपि शुक्लमिति निरुच्यते । तदेतच्चतुर्विधं ध्यानं द्वैविध्यमश्नुते । कुतः प्रशस्ताप्रशस्तभेदात् । अप्रशस्तं अपुण्यास्रवकारणत्वात्, कर्मनिर्दहनसामर्थ्यात्प्रशस्त । किं पुनस्तदिति चेदुच्यते,—

परे मोक्षहेतू ॥ २९

एकस्यैव परत्वमिति चेन्न व्यवहितेऽपि परशब्दप्रयोगात् ॥ १ ॥ स्यान्मतमेकस्यैव परत्वमुपपद्यते न द्वयोरिति तन्न । किं कारणं ? व्यवहितेऽपि परशब्दप्रयोगात् । तद्यथा परा मथुरा पाटलीपुत्रादिति ।

द्विवचननिर्देशाद्वा गौणस्यापि संप्रत्ययः ॥ २ ॥ अथवा परमत्यंतं तत्समीपवर्त्यपि परमित्युपचर्यते द्विवचननिर्देशात्तस्यापि ग्रहणं भवति ।

परयोर्मोक्षहेतुत्वात्, पूर्वयोः संसारहेतुत्वप्रसिद्धिः ॥ ३ ॥ परे मोक्षहेतू इति वचनात्परिशेषात्पूर्वे संसारहेतू इति विज्ञायते । तृतीयस्य साध्यस्याभावात् ।

आह किमेषां लक्षणमिति । तत्रानेकस्य वक्तव्यसंभवे वाचः क्रमवृत्तेराद्यस्य लक्षणप्रतिपादनार्थमिदमुच्यते ।

आर्तममनोज्ञस्य संप्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः ॥३०॥

अप्रियममनोज्ञं बाधाकारणत्वात् ॥ १ ॥ यदप्रियं वस्तु विषकंटकशत्रुशस्त्रादि तद्बाधाकारणत्वादमनोज्ञमित्युच्यते ।

भृशमर्थांतरचिंतनादाहरणं समन्वाहारः ॥ २ ॥ अर्थांतरचिंतनादाधिक्येनाहरणमेकत्रावरोधः समन्वाहारः । स्मृतेः समन्वाहारः स्मृतिसमन्वाहारः । अमनोज्ञस्योपनिपाते स कथं नाम मे न स्यादिति संकल्पश्चिंताप्रबंधः आर्तमित्याख्यायते ।

आह किमिदमनभिमते चेतनद्रव्यपर्यायसंप्रयोगहेतुकमेवार्थं निर्धियते न किं तर्ह्यन्यथाप्येतत्प्रत्येतव्यमित्युच्यते,

विपरीतं मनोज्ञस्य ॥ ३१ ॥

प्रागुक्तनिमित्तविपर्ययाद्विपरीतं ॥ १ ॥ प्रागुक्तं यन्निमित्तं ततो पर्ययाद्विपरीतमित्यभिधीयते । तद्यथा मनोज्ञस्य विषयस्य विप्रयोगे संप्रयुयुक्षां प्रति यः परिध्यास्मृतिसमन्वाहार शब्दचोदिता असावप्यार्तं ध्यानमिति निश्चीयते । यथा च प्रियसमवाये तदभावादाहितकालुष्यस्यार्तं प्रतिज्ञायते । तथा ज्वरादिसंतापाभ्याहतमूर्तेः ।

वेदनायाश्च ॥ ३२ ॥

प्रकरणाद् दुःखवेदनासंप्रत्ययः ॥ १ ॥ यद्यपि वेदनाशब्दः सुखदुःखानुभवनविषयसामान्यस्तथापि आर्तस्य प्रकृतत्वाद्दुःखवेदनासंप्रत्ययो भवति । तत्प्रतिचिकीर्षा प्रत्याघूर्णस्यानवस्थितमनसो धैर्योपरमात्स्मृतिसमन्वाहार आर्तध्यानमवगंतव्यं ।

अंगविक्षेपशोकाक्रंदनाश्रुपाताभिव्यक्तं तृतीयं ॥ २ ॥ यथानिष्टसंप्रयोगेष्टविप्रयोगाशुभवेदनासमवायानबंधनमार्तं । तथा चेदमपि प्रीतिविशेषाभिष्वंगमंथरकामातुरमतेः पौनर्भविकार्थविषयसुखरसगृद्धस्य तत्संस्कारपरायणस्य कायादिखेदहेतुकं ।

निदानं च ॥ ३३ ॥

"विपरीतं मनोज्ञस्य" इत्यत्र सिद्धमिति चेन्नाप्राप्तपूर्वविषयत्वान्निदानस्य ॥१॥ स्यादेतद्विपरीतं मनोज्ञस्येत्यनेनैव निदानं सुगृहीतमिति तन्न किं कारणमप्राप्तपूर्वविषयत्वान्निदानस्य सुखमात्रया प्रलंबितस्याप्राप्तपूर्वप्रार्थनाभिमुखादनागतार्थप्रातिनिबंधननिदानमित्यस्ति विशेषः ।

तदेतच्चतुर्विधमार्तं कृष्णनीलकापोतलेश्याबलाधानं, अज्ञानप्रभवं पौरुषेयपरिणाममसुमुर्थं पापप्रयोगाधिष्ठानं, परिभोगप्रसंगं, नानासंकल्पासंगं धर्माश्रयपरित्यागिकषायाश्रयोपस्थानं अनुपशमप्रवर्द्धनं प्रमादमूलमकुशलकर्मादानं कटुकविपाकासद्वेद्यं[1] तिर्यग्भवगमनपर्यवसानं तदेतत्किं स्वामिकमिति चेदुच्यते,

तदविरतदेशविरतप्रमत्तसंयतानां ॥ ३४ ॥

अविरताः असंयतसम्यग्दृष्ट्यंताः । देशविरताः संयतासंयताः संयताः, प्रमत्तसंयताः पंचदशप्रमादोपेताः । क्रियानुष्ठायिनः ।

कदाचित्प्राच्यमार्तध्यानत्रयं प्रमत्तानां ॥ १ ॥ निदानं वर्जयित्वा अन्यदार्तत्रयं प्रमादोदयोद्रेकात्कदाचित्प्रमत्तसंयतानां भवति ।

आह व्याख्यातमाद्यमप्रशस्तं संज्ञादिभिः, अथ द्वितीयं किं स्वभावसंज्ञाप्रभवस्वामिकमित्यत उच्यते,

---

१ विपाकाकामदुघमिति पाठांतरं ग. पुस्तके ।

हिंसानृतस्तेयविषयसंरक्षणेभ्यो रौद्रमविरतदेशविरतयोः ॥ ३५ ॥

ध्यानोत्पत्तेर्हिंसादीनां निमित्तभावाद्धेतुनिर्देशः ॥१॥ हिंसादीन्युक्तलक्षणानि तानि रौद्रध्यानोत्पत्तेर्निमित्तीभवंतीति हेतुनिर्देशो विज्ञायते ।

तेन स्मृतिसमन्वाहाराभिसंबंधः ॥ २ ॥ तेन—हेतुनिर्देशेनानुवर्तमानः स्मृतिसमन्वाहारोऽभिसंबध्यते । हिंसायाः स्मृतिसमन्वाहार इत्याद्यविरतस्य भवतु रौद्रध्यानं देशविरतस्य कथं—

देशविरतस्यापि हिंसाद्यावेशाद्वित्तादिसंरक्षणतंत्रत्वाच्च ॥ ३ ॥ देशविरतस्यापि रौद्रध्यानं, कुतः हिंसाद्यावेशाद्वित्तादिसंरक्षणतंत्रत्वाच्च कदाचिद्भवितुमर्हति । तत्पुनर्नारकादीनामकारणं सम्यग्दर्शनसामर्थ्यात् । अथ कथमिदं रौद्रध्यानं सयतस्य न भवति ?

तदयुक्तं संयते तदावेशे संयमप्रच्युतेः ॥ ४ ॥ संयतेरौद्रध्यानं न युज्यते कुतस्तदावेशे संयमप्रच्युतेः । यदा रौद्रध्यानाविशिष्टो भवत्यात्मा न तदा संयमोऽत्रावतिष्ठते । तदेतच्चतुर्विधं रौद्रध्यानं अतिकृष्णनीलकापोतलेश्याबलाधानं प्रमादाधिष्ठानं नरकगतिफलावसानं, एवमुक्ताप्रशस्तध्यानपारिगत आत्मा तप्तायःपिंड इवोदकं कर्मादत्ते ।

आह परे मोक्षहेतू इति ये उपदिष्टेऽनिर्दिष्टसंज्ञाभेदस्वभावे तयोस्तावदाद्यं किमभिधानप्रकारस्वभावविषयमित्यत्रोच्यते । तत्खलु सम्यग्ज्ञानबीजमुपशमार्थमप्रमादसचितं मोहप्रक्षनं धर्मानुबंधि सुखफलं त्रिविष्टपावसानं ।

आज्ञापायविपाकसंस्थानविचयाय धर्म्यं ॥ ३६ ॥

प्रमत्ताप्रमत्तसंयतस्य विचितिर्विवेको विचारणं विचयः ॥ १ ॥ विचितिर्विचयो-विवेको विचारणेत्यनर्थांतरं ।

तदपेक्षया आज्ञादीनां कर्मनिर्देशः ॥ २ ॥ तं विचयभावमपेक्ष्याज्ञादीनां कर्मनिर्देशः क्रियते । आज्ञा चापायश्च विपाकश्च संस्थानं च आज्ञापायविपाकसंस्थानानि तेषां विचय आज्ञापायविपाकसंस्थानविचयः तदर्थमाज्ञापायविपाकसंस्थानविचयाय ।

अधिकारात्स्मृतिसमन्वाहारसंबंधः ॥ ३ ॥ स्मृतिसमन्वाहार इत्यनुवर्तते, तेन प्रत्येकमभिसबंधो भवति । आज्ञाविचयाय स्मृतिसमन्वाहार इत्यादि ।

तत्रागमप्रामाण्यादर्थावधारणमाज्ञाविचयः ॥ ४ ॥ उपदेष्टुरभावान्मंदबुद्धित्वात्कर्मोदयात्सूक्ष्मत्वाच्च पदार्थानां हेतुदृष्टांतोपरमे सर्वज्ञप्रणीतमार्गं प्रमाणीकृत्य इत्थमेवेदं नान्यथा वादिनो जिना इति गहनपदार्थश्रद्धानादर्थावधारणमाज्ञाविचयः ।

आज्ञाप्रकाशनार्थो वा ॥ ५ ॥ अथवा सम्यग्दर्शनविशुद्धपरिणामस्य विदितस्वपरसमयपदार्थनिर्णयस्य सर्वज्ञप्रणीतानाहितसौक्ष्म्यानस्तिकायादीनर्थानवधार्य एवमेते इत्यन्यं प्रति पिपादयिषतः कथामार्गे श्रुतज्ञानसामर्थ्यात्स्वसिद्धांताविरोधेन हेतुनयप्रमाणविमर्दकर्मणा ग्रहणसहिष्णून्कृत्वा प्रभाषतः, तत्समर्थनार्थस्तर्कनयप्रमाणयोजनपरः स्मृतिसमन्वाहारः सर्वज्ञाज्ञाप्रकाशनार्थत्वादाज्ञाविचय इत्युच्यते ।

सन्मार्गापायचिंतनमपायविचयः ॥ ६ ॥ मिथ्यादर्शनपिहितचक्षुषां आचारविनयाप्रमादविषयाः संसारविवृद्धये भवंत्यविद्याबाहुल्यात् ।

अंधवत् ॥ ७ ॥ तद्यथा जात्यंधा बलवंतोऽपि सत्पथात्प्रच्युताः कुशलमार्गादेशकेनाननुष्ठिताः नैचान्नतैशलविषमोपलकठिनस्थाणुनिहितकंटकाकुलाटवीदुर्गपतिताः परिस्पन्दवंतोऽपि न च मार्गमनुसर्तुमर्हंति देशकाभावात्तथा सर्वज्ञप्रणीतमार्गाद्विमुखाः मोक्षार्थिनः सम्यङ्मार्गापरिज्ञानात्सुदूरमेवापयंतीति सन्मार्गापायचिंतनमपायविचयः ।

असन्मार्गापायचिंतनमपायविचयः असन्मार्गापायसमाधानं वा ॥ ८ ॥ अथवा मिथ्या दर्शनाकुलितचेतोभिर्वादिभिः प्रणीतादुन्मार्गात्कथं नाम इमे प्राणिनोऽपेयुः । अनायतनसेवापायो वा कथं स्यात् पापकरणवचनभावनाविनिर्वृत्तिर्वा कथमुपजायते इत्यपायार्पितचिंतनमपायविचयः ।

कर्मफलानुभवनविवेकं प्रति प्रणिधानं विपाकविचयः ॥ ९ ॥ कर्मणां ज्ञानावरणादीनां द्रव्यक्षेत्रकालभवभावप्रत्ययफलानुभवनं प्रति प्रणिधानं विपाकविचयः । तद्यथा मिथ्यादर्शनैकद्वित्रिचतुरिंद्रियजात्यातपस्थावरसूक्ष्मापर्याप्तकसाधारणाख्यानां कर्मप्रकृतीनां प्रथमगुणस्थाने उदयो नोर्द्ध्वं । अनंतानुबंधिक्रोधमानमायालोभानां प्रथमद्वितीयगुणस्थानयोरुदयो नोर्द्ध्वं । सम्यग्मिथ्यात्वस्य सम्यग्मिथ्यादृष्टौ उदयो नोर्द्ध्वं नाधः । अप्रत्याख्यानक्रोधमानमायालोभनरकदेवायुर्नरकदेवगतिवैक्रियिकशरीरांगोपांगानुपूर्व्यचतुष्कदुर्भगानादेयायशस्कीर्तिसंज्ञानां सप्तदशानां कर्मप्रकृतीनामुदयोऽसंयतसम्यग्दृष्ट्यंतेषु नोपरि । चतुर्णामानुपूर्व्याणां सम्यग्मिथ्यादृष्टावुदयो नास्ति शेषाणामस्ति । प्रत्याख्यानक्रोधमानमायालोभतिर्यगायुस्तिर्यग्गत्युद्योतनीचैर्गोत्रमज्ञानामष्टानां कर्मप्रकृतीनां विपाकः संयतासंयतांतेषु नोपरि । निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्धिनामिकानां तिसृणां कर्मप्रकृतीनां फलानुभवनमनुत्तरशरीरप्रमत्तसंयतेषु नोपरि । आहारशरीराहारशरीरांगोपांगनाम्नोऽप्रमत्तसंयते उदयः नोर्ध्वं नाधः । वेदकसम्यक्त्वप्रकृतेरुदयोऽसंयतसम्यग्दृष्ट्यादिष्वप्रमत्तसंयतांतेषु नोर्ध्वं नाप्यधः । अर्धनाराचसंहननकीलिकासंहननासंप्राप्तासृपाटिकासंहननाख्यानां तिसृणां प्रकृतीनामुदयोऽप्रमत्तसंयतांतेषु नोपरि । हास्यरत्यरतिशोकभयजुगुप्साख्यानां षण्णां कर्मप्रकृतीनामपूर्वकरणचरमसमयांतेषु फलानुभवनं नोर्ध्वं । त्रयाणां वेदानां त्रयाणां सज्वलनानां चोदयः अनिवृत्तिबादरसांपरायकालस्य शेषे सख्येयान्भागान्गत्वोदयच्छेदः । लोभसंज्वलनस्य विपाकः सूक्ष्मसांपरायचरमसमयांतेषु नोपरि । वज्रनाराचसंहनननाराचसंहननयोरुदयः उपशांतकषायांतेषु नोर्ध्वं । निद्राप्रचलयोरुदयः क्षीणकषायोपांतसमयांतेषु नोपरि । पंचानां ज्ञानावरणानां चतुर्णां दर्शनावरणानां पंचानामंतरायाणां चोदयः क्षीणकषायचरमसमयांतेषु नोपरि । अन्यतरवेदनीयौदारिकतैजसकार्मणशरीरसंस्थानषट्कौदारिकशरीरांगोपांगवज्रवृषभनाराचसंहननवर्णगंधरसस्पर्शागुरुलघूपघातपरघातोच्छ्वासप्रशस्ताप्रशस्तविहायोगतिप्रत्येकशरीरस्थिरास्थिरशुभाशुभसुस्वरदुःस्वरनिर्माणनामिकानां त्रिंशत्प्रकृतीनामुदयः सयोगकेवलिनश्चरमसमये नोर्ध्वं । अन्यतरवेदनीयमनुष्यायुर्मनुष्यगतिपंचेंद्रियजातित्रसबादरपर्याप्तकशुभगादेययशस्कीर्त्युच्चैर्गोत्रसंज्ञकानामेकादशानां प्रकृतीनामुदयः अयोगकेवलिनश्चरमसमये नोर्ध्वं । तीर्थंकरनामकर्मोदयः द्वयोः केवलिनोर्नोपरि नाप्यधः ।

अयथाकालविपाकः उदीरणोदयः ॥ १० ॥ तत्र मिथ्यादर्शनस्य उदीरणोदयः मिथ्यादृष्टौ उपशमसम्यक्त्वाभिमुखस्य, चरमावलीमुत्सृज्येतरत्र भवति । एक-द्वित्रिचतुरिंद्रियजात्यातपस्थावरसूक्ष्मापर्याप्तकसाधारणसंज्ञिकानां नवानां प्रकृतीनामुदीरणोदयः मिथ्यादृष्टौ भवति नोर्ध्वं । अनंतानुबंधिक्रोधमानमायालोभानामुदीरणोदयो मिथ्यादृष्टिसासादनसम्यग्दृष्ट्योर्नोपरि । सम्यग्मिथ्यात्वस्योदीरणोदयः सम्यग्मिथ्यादृष्टौ नोपरि नाप्यधः । अप्रत्याख्यानावरणक्रोधमानमायालोभनरकगतिदेवगतिवैक्रियिकशरीरांगोपांगदुर्भगानादेयायशस्कीर्तिसंज्ञका एकादशप्रकृतय असंयतसम्यग्दृष्ट्यंतेषूदीर्यंते नोर्ध्वं । नरकायुषो देवायुषश्च मरणकाले चरमावलिं मुक्त्वा असंयतसम्यग्दृष्टावुदीरणोदयो भवत्यधश्च नोर्ध्वं । चतुर्णामानुपूर्व्याणां विग्रहगतौ मिथ्यादृष्टिसासादनसम्यग्दृष्ट्यसंयतसम्यग्दृष्टिषूदीरणोदयो नेतरत्र । प्रत्याख्यानक्रोधमानमायालोभतिर्यग्गत्युद्योतनीचैर्गोत्राणां सप्तानां प्रकृतीनामुदीरणोदयः संयतासंयतांतेषु नोपरि । तिर्यगायुषो मरणकाले चरमावलिं मुक्त्वा संयतासंयतांतेषूदीरणोदयो नोर्ध्वं । निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्धिसदसद्वेद्यानां पंचानां प्रकृतीनां प्रमत्तसंयतांतेषूदीरणोदयो नोपरिष्टात् । उत्तरशरीरवर्तिपूर्वचरमावल्या सह उदीरणोदयो नास्ति । आहारकशरीरांगोपांगनाम्नोः प्रमत्तसंयते उदीरणोदयो नोर्ध्वं नाप्यधः । मनुष्यायुष उदीरणोदयः-मरणकाले चरमावलिं मुक्त्वा प्रमत्तसंयतांतेषु सम्यग्मिथ्यादृष्टिवर्जितेषूदीरणो-

दयो भवति नोपरि । वेदकसम्यक्त्वस्योदीरणोदयः असंयतसम्यग्दृष्ट्यादिष्वप्रमत्तसंयतांतेषु भवति नोर्ध्वं नाप्यधः । अर्धनाराचकीलिकासंप्राप्तासृपाटिकासंहननानामुदीरणोदयः अप्रमत्तसंयतांतेषु भवति नोर्ध्वं । हास्यरत्यरतिशोकभयजुगुप्सानां षण्णां प्रकृतीनामपूर्वकरणचरमसमयांतेषूदीरणोदयो भवति नोर्ध्वं । त्रयाणां वेदानां त्रयाणां संज्वलनानां चोदीरणोदयो निवृत्तिबादरसांपरायेषूरांतेषु भवति नोर्ध्वं । तस्मिन्ननिवृत्तिकाले शेषे ऊर्ध्वं संख्येयभागान् गत्वा उदीरणोदयोच्छेदः । लोभसंज्वलनस्योदीरणोदयः सूक्ष्मसांपरायचरमावलीवर्जितेषु पूर्वेषु नोपरि । वज्रनाराचनाराचसंहननयोरुपशांतकषायांतेषूदीरणोदयो नोपरिष्टात् । समयोत्तरचरमावलीवर्जितक्षीणकषायांतेषु निद्राप्रचलयोरुदीरणोदयो नोपरि । पंचानां ज्ञानावरणानां चतुर्णां दर्शनावरणानां पंचानामंतरायाणां च चरमावलीवर्जितक्षीणकषायांतेषूदीरणोदयो नोर्ध्वं । मनुष्यगतिपंचेंद्रियजात्यौदारिकतैजसकार्माणशरीषट्संस्थानौदारिकशरीरांगोपांगवज्रवृषभनाराचसंहननवर्णगंधरसस्पर्शागुरुलघूपघातोच्छ्वासप्रशस्ताप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकशरीरस्थिरास्थिरशुभाशुभसुभगसुस्वरदुःस्वरादेययशस्कीर्तिनिर्माणोच्चैर्गोत्रसंज्ञिकानामष्टात्रिंशतः प्रकृतीनां सयोगकेवलिचरमसमयांतेषूदीरणोदयो नोपरि । तीर्थकरनाम्न उदीरणोदयः सयोगिकेवलिन्येव नोपरि नाप्यधः ।

लोकसंस्थानस्वभावावधानं संस्थानविचयः ॥ ११ ॥ लोकसंस्थानं प्राग्वर्णितं तदवयवानां च द्वीपादीनां तत्स्वभावावधानं संस्थानविचयः ।

धर्मादनपेतं धर्म्यम् ॥ १२ ॥ धर्म उत्तमक्षमादिदशविकल्पः, ततोनपेतं धर्म्यं ध्यानं । उत्तमक्षमादिभावनावतः प्रवृत्तेः ।

अनुप्रेक्षाणां धर्म्यध्यानजातीयत्वात्पृथगनुपदेश इति चेन्न ज्ञानप्रवृत्तिविकल्पत्वात् ॥ १३ ॥ स्यादेतदनुप्रेक्षा अपि धर्म्यध्यानेऽतर्भवंतीति पृथगासामुपदेशोऽनर्थक इति तन्न किं कारणं ? ज्ञानप्रवृत्तिविकल्पत्वात् । अनित्यादिविषयचिंतनं यदा ज्ञानं तदानुप्रेक्षाव्यपदेशो भवति । यदा तत्रैकाग्रचिंतानिरोधस्तदा धर्म्यध्यानं ।

धर्म्यमप्रमत्तस्येति चेन्न पूर्वेषां विनिवृत्तिप्रसंगात् ॥ १४ ॥ कश्चिदाह धर्म्यमप्रमत्तसंयतस्यैवेति तन्न किं कारणं ? पूर्वेषां विनिवृत्तिप्रसंगात् । असंयतसम्यग्दृष्टिसंयतासंयतप्रमत्तसंयतानामपि धर्म्यध्यानमिष्यते सम्यक्त्वप्रभवत्वात् । यदि धर्म्यमप्रमत्तस्यैवेत्युच्येत तर्हि तेषां निवृत्तिः प्रसज्येत ।

उपशांतक्षीणकषाययोश्चेति तन्न शुक्लाभावप्रसंगात् ॥ १५ ॥ कश्चिदाह "उपशांतक्षीणकषाययोश्च धर्म्यं ध्यानं भवति न पूर्वेषामेवेति तन्न । किं कारणं ? शुक्लाभावप्रसंगात् उपशांतक्षीणकषाययोर्हि शुक्लध्यानमिष्यते तस्याभावः प्रसज्येत ।

तदुभयं तत्रेति चेन्न पूर्वस्यानिष्टत्वात् ॥ १६ ॥ स्यादेतदुभयं धर्म्यं शुक्लं चोपशांतक्षीणकषाययोरस्तीति ? तन्न । किं कारणं ? पूर्वस्यानिष्टत्वात्पूर्वं हि धर्म्यं ध्यानं श्रेण्योर्नेष्यते, आर्षे पूर्वेषु चेष्यते ।

आह यदि धर्म्यध्यानमविरतदेशविरतप्रमत्ताप्रमत्तसंयतानां भवति, अथ शुक्लध्यानं कस्य ? इत्यत्रोच्यते तद्वक्ष्यमाणं चतुर्विकल्पं तत्र प्रथमयोर्विकल्पयोः स्वामिनो निर्देशः क्रियते,

शुक्ले चाद्ये पूर्वविदः ॥ ३७ ॥

पूर्वविद्विशेषणं श्रुतकेवलिनस्तदुभयप्रणिधानसामर्थ्यात् ॥ १ ॥ सकलश्रुतधरस्याद्यशुक्लध्यानद्वयप्रणिधानसामर्थ्यं नेतरस्येति प्रतिपत्त्यर्थं पूर्वविद्विशेषणमुपादीयते ।

चशब्दः पूर्वध्यानसमुच्चयार्थः ॥ २ ॥ चशब्दः क्रियते पूर्वस्य धर्म्यध्यानस्य समुच्चयार्थः । शुक्ले चाद्ये पूर्वविदो भवतः धर्म्यं चेति ।

विषयविवेकापरिज्ञानमिति चेन्न व्याख्यानतोविशेषप्रतिपत्तेः ॥ ३ ॥ स्यादेतच्च-शब्देन पूर्वस्य ध्यानस्य समुच्चये क्रियमाणे विषयविवेको न ज्ञायते इति ? तन्न। किं कारणं ? व्याख्यानतो विशेषप्रतिपत्तेः। श्रेण्यारोहणात् प्राग्धर्म्यध्यानं, श्रेण्योः शुक्लध्यानमिति व्याख्यास्यामः,

आह—यद्याद्ये शुक्ले उपशांतनिर्दग्धमोहयोर्नियमेन प्रतिज्ञायेते अविशिष्टे कस्य भवत इत्यत्रोच्यते,

परे केवलिनः ॥ ३८ ॥

केवलिशब्दसामान्यनिर्देशात्तद्वतोरुभयोर्ग्रहणं ॥ १ ॥ केवलीत्ययं शब्दः सामान्यविषयस्ततोऽचिंत्यविभूतिविशेषकेवलज्ञानसाम्राज्यमनुभवतोरुभयोः सयोग्ययोगिकेवलिनोर्ग्रहणं। परे शुक्लध्याने तयोर्भवतो न छद्मस्थस्य।

आह अंधकारमुष्टयभिघातमादृश्यादतस्तां शुक्लध्यानाधिष्ठानृप्रक्रियां प्रति न व्याप्रियामहे—कुतः ? तल्लक्षणविशेषनिर्देशानुपलंभात्। उच्यते स्यादेतदेवं यद्यमूनि तस्य विशिष्टानि पर्यायांतराणि न स्युः,—

पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्तीनि ॥ ३९ ॥

वक्ष्यमाणलक्षणापेक्षया सर्वेषामन्वर्थत्वं ॥ १ ॥ वक्ष्यमाणलक्षणमपेक्ष्य सर्वेषामन्वर्थत्वमवसेयं। यदिदमुपात्तचातुर्विध्यं शुक्लध्यानं तत्किमालंबनमिति चेदुच्यते,—

त्र्येकयोगकाययोगायोगानां ॥ ४० ॥

योगशब्दो व्याख्यातार्थः ॥ १ ॥ अयं योगशब्दो व्याख्यातार्थः कायवाङ्मनस्कर्म योग इत्यत्र।

यथासंख्यं चतुर्णामभिसंबंधः ॥ २ ॥ चतुर्णां त्रियोगादीनामुक्तैश्चतुर्भिः शुक्लध्यानविकल्पैः सह यथासंख्यमभिसंबंधो भवति। त्रियोगस्य पृथक्त्ववितर्कं, त्रिषु योगेष्वेकयोगस्यैकत्ववितर्कं, काययोगस्य सूक्ष्मक्रियाप्रतिपत्तिः, अयोगस्य व्युपरतक्रियानिवर्तीति।

तत्राद्यस्य विशेषप्रतिपत्त्यर्थमिदमुच्यते।

एकाश्रये सवितर्कवीचारे पूर्वे ॥ ४१ ॥

पूर्वविदारभ्यत्वादेकाश्रयसिद्धिः ॥ १ ॥ उभेऽपि परिप्राप्तश्रुतज्ञाननिष्ठेनारभ्यते इत्येकाश्रये इत्युच्यते,—

सवितर्कवीचार इति द्वन्द्वपूर्वोन्यपदार्थनिर्देशः ॥ २ ॥ वितर्कश्च वीचारश्च वितर्कवीचारौ सह वितर्कवीचाराभ्यां वर्तते सवितर्कवीचारः।

पूर्वत्वमेकस्यैवेति चेन्नोक्तत्वात् ॥ ३ ॥ किमुक्तं तत्समीपवर्तिनस्तद्व्यपदेश इति द्विवचनसामर्थ्याद्भुभयोर्ग्रहणं।

तत्र यथासंख्यप्रसंगनिवृत्यर्थमिदमुच्यते।

अवीचारं द्वितीयं ॥ ४२ ॥

पूर्वयोर्द्वितीयं तदवीचारं प्रत्येतव्यं। अर्थात्—आद्यं सवितर्कं सवीचारं च भवति। द्वितीयं सवितर्कमवीचारमिति।

अथ वितर्कवीचारयोः कः प्रतिविशेष इत्युच्यते,—

वितर्कः श्रुतं ॥ ४३ ॥

विशेषेण तर्कणमूहनं वितर्कः श्रुतज्ञानमित्यर्थः यदि श्रुतज्ञाने वितर्कशब्दो वर्तते तर्हि पुनरपि

पृष्ठव्य अथ वीचारः किं लक्षणः ? इत्यत्रोच्यते ।

वीचारोऽर्थव्यंजनयोगसंक्रांतिः ॥ ४४ ॥

अर्थो ध्येयः द्रव्यं पर्यायो वा, व्यंजनं वचनं, योगः कायवाङ्मनस्कर्मलक्षणः, संक्रांतिः परिवर्त्तनं । द्रव्यं विहाय पर्यायमुपैति पर्यायं त्यक्त्वा द्रव्यमित्यर्थसंक्रांतिः । एकं श्रुतवचनमुपादाय वचनांतरमालंबते तदपि विहायान्यदिति व्यंजनसंक्रांतिः । काययोगं त्यक्त्वा योगांतरं गृह्णाति योगांतरं च त्यक्त्वाऽन्ययोगमिति योगसंक्रांतिः ।

एवं परिवर्तनं वीचार इत्युच्यते । तदेतत्सामान्यविशेषनिर्दिष्टचतुर्विधं शुक्लं धर्म्यं च पूर्वोदितगुप्त्यादिबहुप्रकारोपायं संसारविनिवृत्तये मुनिर्ध्यातुमर्हति तदारंभे च परिकर्म भवति । यदोत्तमशरीरसंहननतया परीषहबाधासहनशक्तिमंतमात्मानमवगच्छति तदा ध्यानयोगपरिचयायोपक्रमते । कथमिति चेदुच्यते—पर्वतगुहाकंदरदरीद्रुमकोटरनदीपुलिनपितृवनजीर्णोद्यानशून्यागारादीनामन्यतमेऽस्मिन्नवकाशे व्यालमृगपशुपक्षिमनुष्याणामगोचरे तत्रत्यैरागंतुभिश्च जंतुभिः परिवर्जिते नात्युष्णे नातिशीते नातिवातेवर्षातपवर्जिते बाह्यांतःकरणविक्षेपकारणवर्जिते (विरहिते) भूमितले शुचावनुकूलस्पर्शे यथासुखमुपविष्टो बद्धपल्यंकासनः समृजुं प्रणिधाय शरीरयष्टिमस्तब्धां स्वांके वामपाणितलस्योपरि दक्षिणपाणितलमुत्तानं समुपादाय नात्युन्मीलन्नातिनिमीलन्दंतैर्दंताग्राणि संदधानः ईषदुन्नतिमुखः प्रगुणमध्योऽस्तब्धमूर्त्तिः प्रणिधानगंभीरशिरोधरः प्रसन्नवक्त्रवर्णः, अनिमिषस्थिरसौम्यदृष्टिः । विनिहितनिद्रालस्यकामरागरत्यरतिशोकहास्यभयद्वेषविचिकित्सः । मंदं मंदं प्राणापानप्रचार इत्येवमादिकृतपरिकर्मा साधुः, नाभेरूर्ध्वे हृदये मस्तकेऽन्यत्र वा मनोवृत्तिं यथापरिचयं प्रणिधाय मुमुक्षुः प्रशस्तध्यानं ध्यायेत् । तत्रैकाग्रमनाः उपशांतरागद्वेषमोहो नैपुण्यान्निगृहीतशरीरक्रियो मंदोच्छ्वासनिःश्वासः सुनिश्चिताभिनिवेशः क्षमावान् बाह्याभ्यंतरान्द्रव्यपर्यायान्ध्यायन्नाहितवितर्कसामर्थ्यः अर्थव्यंजने कायवचसी च पृथक्त्वेन संक्रामता मनसाऽपर्याप्तबलोत्साहवदव्यवस्थितेनानिशितेनापि शस्त्रेण चिरात्तरुं छिंदन्निव मोहप्रकृतीरुपशमयन्क्षपयंश्च पृथक्त्ववितर्कवीचारध्यानभाग्भवति । पुनर्वीर्यविशेषहानेर्योगाद्योगांतरं व्यंजनाद्व्यंजनांतरमर्थादर्थांतरमाश्रयन्ध्यानविधूनितमोहरजाः ध्यानयोगान्निवर्तते । इत्युक्तं पृथक्त्ववितर्कवीचारं । अनेनैव विधिना सतूलमूलं मोहनीयं निर्दिधिक्षन्ननंतगुणविशुद्धं योगविशेषमाश्रित्य बहुतराणां ज्ञानावरणसहायीभूतानां प्रकृतीनां बंधं निरुंधन् स्थितेः ह्रासक्षयौ च कुर्वन्श्रुतज्ञानोपयोगवान्निवृत्तार्थव्यंजनयोगसंक्रांतिः । अविचलितमनाः क्षीणकषायो वैडूर्यमणिरिव निरुपलेपो ध्यात्वा पुनर्न निवर्तते इत्युक्तमेकत्ववितर्कं । एवमेकत्ववितर्कशुक्लध्यानवैश्वानरनिर्दग्धघातिकर्मेंधनः प्रज्वलितकेवलज्ञानगभस्तिमंडलः मेघपंजरनिरोधनिर्गत इव घर्मरश्मिर्भासमानो भगवांस्तीर्थंकर इतरो वा केवली लोकेश्वराणामभिगमनीयोऽर्चनीयश्चोत्कर्षेणायुःपूर्वकोटिं देशोनां विहरति स यदांतर्मुहूर्त्तशेषायुष्कः, तत्तुल्यस्थितिवेद्यनामगोत्रश्च भवति तदा सर्वं वाङ्मनसयोगं बादरकाययोगं च परिहाप्य सूक्ष्मकाययोगालंबनः सूक्ष्मक्रियाप्रतिपातिध्यानमास्कंदितुमर्हति । यदा पुनरंतर्मुहूर्त्तशेषायुष्कस्ततोऽधिकस्थितिविशेषकर्मत्रयो भवति योगी, तदात्मोपयोगातिशयस्य सामायिकसहायस्य विशिष्टकरणस्य महासंवरस्य लघुकर्मपरिपाचनस्य शेषकर्मरेणुपरिशातनशक्तिस्वाभाव्याद्दंडकपाटप्रतरलोकपूरणानि स्वात्मप्रदेशविसर्पणतश्चतुर्भिः समयैः कृत्वा पुनरपि तावद्भिरेव समयैः समुपहृतप्रदेशविसरणः समीकृतस्थितिविशेषकर्मचतुष्टयः पूर्वशरीरपरिमाणो भूत्वा सूक्ष्मकाययोगेन सूक्ष्मक्रियाप्रतिपाति ध्यानं ध्यायति । ततस्तदनंतरं समुच्छिन्नक्रियानिवर्तिध्यानमारभते । समुच्छिन्नप्राणापानप्रचारसर्वकायवाङ्मनोयोगसर्वप्रदेशपरिस्पंदक्रियाव्यापारत्वात् समुच्छिन्नक्रियानिवर्तीत्युच्यते । तस्मिन्समुच्छिन्नक्रियानिवर्तिनि ध्याने सर्वबंधास्रवनिरोधसर्वशेषकर्मशातनसामर्थ्योपपत्तेरयोगिनः केवलिनः संपूर्णयथाख्यातचारित्रज्ञानदर्शनं सर्वसंसारदुःखजालपरिष्वंगोच्छेदजननं साक्षान्मो-

क्षकारणमुपजायते । स पुनरयोगिकेवली भगवांस्तदा ध्यानानलनिर्दग्धसर्वमलकलंकबंधो निरस्तकिट्टधातुपाषाणजात्यकनकवल्लब्धात्मा परिनिर्वाति । तदेतद्द्विविधं तपः अभिनवकर्मानिरोधहेतुत्वात्संवरणकारणं । प्राक्तनकर्मरजोमलविधूननहेतुत्वान्निर्जराहेतुरपि ।

अत्राह उक्तं परीषहजयात्तपसश्च कर्मनिर्जरा भवतीति तत्रेदं न ज्ञायते सर्वे सम्यग्दृष्टयः समनिर्जराः आहोस्विदस्ति कश्चित्प्रतिविशेष इत्यस्तीत्याह,

सम्यग्दृष्टिश्रावकविरतानंतवियोजकदर्शनमोहक्षपकोपशमकोपशांतमोहक्षपकक्षीणमोहजिनाः क्रमशोऽसंख्येयगुणनिर्जराः ॥४५॥

प्रथमसम्यक्त्वादिप्रतिलंभे अध्यवसायविशुद्धिप्रकर्षादसंख्येयगुणनिर्जरात्वं दशानां मद्यपानाविष्टस्य मदैकदेशविगमादव्यक्तावगमशक्तिवत् । प्रकृष्टनिद्रस्य वा तदेकदेशक्षयादल्पस्मृतिजन्मवत् विषमोहितमूर्तेर्वा एकदेशविषप्रच्युतेश्चेतनाप्रतिलंभवत् । पित्तादिविकारोपजातमूर्च्छस्य वा मोहैकदेशनिवृत्तेरव्यक्तचैतन्यवत्, एकेंद्रियेष्वनंतकायादिषु अनंतकालमुत्पद्योत्पद्यपरिभ्रमतः विशेषलब्ध्या द्वींद्रियादि जन्म यावत्पंचेंद्रिय इति कदाचित्पुनः प्रतिनिवर्तते । तदेवं बहुकृत्वो निवर्तनारोहणलक्षशतसहस्रेषु कदाचित्पंचेंद्रियत्वं नरकादिषु दीर्घकालमनुभूय घुणोत्कीर्णाक्षरसमानजातीयमानवेषु जन्मावाप्नुयात् । भूयो पुनरपि ततो दुर्लभानि देशकुलादीन्यवाप्य संक्लेशस्य मंदिम्ना विशुद्धव्यवसायः प्रतिभाशक्तियुक्तः भव्यः परिणामशुद्ध्या प्रक्षालितांतरात्माप्युपदेशासंभवात्सन्मार्गमलभमानः कुतीर्थप्रतिपादितमिथ्यादर्शनो भूत्वा पुनरपि संसारमहाजनपदातिथिर्भवति । अभिहितक्रमेणैव भूयो ज्ञानावरणकर्मैकदेशप्रशमोपजातविशुद्धिरुपदेशलब्धिसंपन्नः । अथवा मौनींद्रं दर्शनं कदाचिच्छृणुयात् प्रतिबंधिनश्च कर्मणः न्यग्भावात् अश्रद्धयात् कतकसंपर्कोपजनितकलुषतोयप्रसादवत् असद्भूतार्थोपदेशमलीमसः मिथ्यात्वोपशमात्प्राप्तप्रसादः श्रद्धानाभिमुखोऽभिलाषाभिमुख्यादसंख्येयगुणनिर्जरः अभूतपूर्वकरणात्प्रथमसम्यक्त्वाभिमुखो रुचितजिनवचन उपशमसम्यग्दृष्टितामनुभवति । ततः सम्यक्त्वभावनामृतरसविवर्द्धितविशुद्धिः मिथ्यात्वविषातितीव्रविभावं क्षुयमानव्रीहितुषकणतन्दुलविवेकवत्, मिथ्यादर्शनकर्ममिथ्यात्वसम्यक्त्वसम्यग्मिथ्यात्वविभागेन त्रिधा विभज्य सम्यक्त्वं वेदयमानः सद्भूतपदार्थश्रद्धानफलं, वेदकसम्यग्दृष्टिर्भवति । ततः प्रशमसंवेगादिमान् जिनेंद्रभक्तिप्रवर्द्धितविपुलभावनाविशेषसंचारो यत्र केवलिनः संति भगवंतस्तत्र मोहं क्षपयितुमारभंते निष्ठापकः पुनश्चतिसृषु गतिषु भवति स निराकृतमिथ्यात्वः क्षायिकसम्यग्दृष्टिरित्याख्यायते । अथवा पूर्वोदित एव शंकादिदोषविनिर्मुक्तः कुसमयैरक्षोभितमतिः उपलब्धसद्भावो मोहतिमिरपटलविप्रयुक्तदृष्टिः, जैनेंद्रपूजाप्रवचनवात्सल्यसंयमादिप्रशंसादिपरतया क्षपितोपशमितदेशघातिकर्मा संयमप्राप्त्या श्रावकोऽपि स्यात् पूर्वनिर्दिष्टस्ततो विशुद्धिप्रकर्षात्पुनरपि सर्वगृहस्थसंगविप्रमुक्तो निर्ग्रंथतामनुभवन् विरत इत्यभिलप्यते । एवमुत्तरोत्तरक्रमो वेदितव्योऽन्वर्थः । त एते दशाप्युपर्युपरि असंख्येयगुणनिर्जरा वेदितव्याः ।

क्षपक इत्यसाधुरन्वाख्यानाभावादिति चेन्न चशब्देन मित्संज्ञोपलब्धेः ॥ १ ॥

स्यान्मतं क्षपक इत्ययमसाधुः कुतोऽन्वाख्यानाभावादिति तन्न किं कारणं ? चशब्देन मित्संज्ञोपलब्धेः क्षै वै पै क्षय इत्यस्य कृतात्वस्य 'णिविप्युकिजविजृष्टुमुरजोमंताश्चेति' चशब्देन मित्संज्ञायां सत्यां ह्रस्वत्वात्साधुर्भवति । प्रयुक्तानामन्वाख्यानात् प्रयोगदर्शनाच्च ।

आह सम्यग्दर्शनसन्निधानेऽपि यद्यसंख्येयगुणनिर्जरात्वात्परस्परतो न साम्यमेषां हंत तर्हि श्रावकवदमी पूर्वसूत्रचोदिता न सर्वे विरतादयो गुणभेदात् निर्ग्रंथतामर्हंतीत्युच्यते । नैतदेवं कुतो यस्माद् गुणभेदादन्योन्यविशेषेऽपि नैगमादिनयव्यापारात्सर्वेऽपि भवंति ।

पुलाकवकुशकुशीलनिर्ग्रंथस्नातका निर्ग्रंथाः ॥४६॥

अपरिपूर्णव्रता उत्तरगुणहीनाः पुलाकाः ॥ १ ॥ उत्तरगुणेष्वनापेतमनसो व्रतेष्वपि कदाचित्कचित्परिपूर्णतामपरिप्राप्नुवंतः अविशुद्धपुलाकसादृश्यात्पुलाकव्यपदेशमर्हंति ।

अखंडितव्रताः शरीरसंस्कारर्द्धिसुखयशोविभूतिप्रणवा वकुशाः ॥ २ ॥ नैर्ग्रंथ्यं प्रस्थिताः, अखंडितव्रताः शरीरोपकरणविभूषानुवर्तिनः । ऋद्धियशस्कामाः, शातगौरवाश्रिताः, अविविक्तपरिवाराः छेदशवलयुक्ताः, वकुशाः । शवलपर्यायवाची वकुशशब्दः ।

कुशीला द्विविधाः प्रतिसेवनाकषायोदयभेदात् ॥ ३ ॥ कुशीला द्विविधा भवंति कुतः ? प्रतिसेवनाकषायोदयभेदात् । अविविक्तपरिग्रहाः परिपूर्णोभयाः कथंचिदुत्तरगुणविराधिनः प्रतिसेवनाकुशीलाः । ग्रीष्मे जंघाप्रक्षालनादिसेवनाद्वशीकृतान्यकषायोदयाः संज्वलनमात्रतंत्रत्वात् कषायकुशीलाः ।

उदके दंडराजिवत्संनिरस्तकर्माणोंतर्मुहूर्तकेवलज्ञानदर्शनप्रापिणो निर्ग्रंथाः ॥ ४ ॥ उदके दण्डराजिर्यथा आश्वेव विलयमुपयाति तथाऽनभिव्यक्तोदयकर्माणः ऊर्ध्वं मुहूर्त्तादुद्भिद्यमानदर्शनकेवलज्ञानभाजो निर्ग्रन्थाः

प्रक्षीणघातिकर्माणः केवलिनः स्नातकाः ॥ ५ ॥ ज्ञानावरणादिघातिकर्मक्षयादाविर्भूतकेवलज्ञानाद्यतिशयविभूतयः सयोगिशैलेशिनो लब्धास्पदाः केवलिनः स्नातकाः । "स्नातवेदसमाप्ताविति" स्वार्थिके के निष्पन्नः शब्दः त एते पंचनिर्ग्रंथाः । कश्चिदाह—

प्रकृष्टाप्रकृष्टमध्यानां निर्ग्रंथाभावश्चारित्रभेदाद्गृहस्थवत् ॥ ६ ॥ यथा गृहस्थश्चारित्रभेदान्निर्ग्रंथव्यपदेशभाग् न भवति तथा पुलाकादीनामपि प्रकृष्टमध्यमचारित्रभेदान्निर्ग्रंथत्वं नोपपद्यते ।

न वा दृष्टत्वाद्ब्राह्मणशब्दवत् ॥७॥ न वैष दोषः कुतो दृष्टत्वात् ब्राह्मणशब्दवत् । यथा जात्या चारित्राध्ययनादिभेदेन भिन्नेषु ब्राह्मणशब्दो वर्त्तते तथा निर्ग्रंथशब्दोऽपि । किं च—

संग्रहव्यवहारापेक्षत्वात् ॥ ८ ॥ यद्यपि निश्चयनयापेक्षया गुणहीनेषु न प्रवर्त्तते । तथापि संग्रहव्यवहारनयविवक्षावशात्सकलविशेषसंग्रहो भवति । किं च—

दृष्टिरूपसामान्यात् ॥ ९ ॥ सम्यग्दर्शनं निर्ग्रंथरूपं च भूषावेशायुधविरहितं तत्सामान्ययोगात् सर्वेषु हि पुलाकादिषु निर्ग्रंथशब्दो युक्तः ।

भग्नव्रते वृत्तावतिप्रसंग इति चेन्न रूपाभावात् ॥ १० ॥ यदि भग्नव्रतेऽपि निर्ग्रंथशब्दो वर्त्तते श्रावकेऽपि स्यादिति—अतिप्रसंगो नैष दोषः कुतो रूपाभावात् निर्ग्रंथरूपमत्र नः प्रमाणं न च श्रावके तदस्तीति नातिप्रसंगः ।

अन्यस्मिन्स्वरूपेऽतिप्रसंग इति चेन्न दृष्ट्यभावात् ॥ ११ ॥ स्यादेतद्यदि रूपं प्रमाणमन्यस्मिन्नपि सरूपे निर्ग्रंथव्यपदेशः प्राप्नोतीति तन्न । किं कारणं ? दृष्ट्यभावात् दृष्ट्या सह यत्र रूपं तत्र निर्ग्रंथव्यपदेशः । न रूपमात्र इति । अथ किमर्थः पुलाकादिव्यपदेशः चारित्रगुणस्योत्तरप्रकर्षवृत्तिविशेषख्यापनार्थः पुलाकाद्युपदेशः क्रियते ।

तेषां पुलाकादीनां भूयो विशेषप्रतिपत्त्यर्थमिदमुच्यते,—

संयमश्रुतप्रतिसेवनातीर्थलिंगलेश्योपपादस्थानविकल्पतःसाध्या ॥४७॥

ततो लक्षणत्वादनिर्देश इति चेन्नान्यतोऽपीति वचनात्सिद्धेः ॥ १ ॥ स्यादेतत्ततो नोत्पत्ते लक्षणमस्ति ततो निर्देशो न युक्त इति । तन्न किं कारणं 'अन्यतोऽपीति' वचनात्सिद्धेः ।

भवदादियोग इति चेन्नान्यत्रापि दर्शनात् ॥ २ ॥ स्यान्मतं भवदादियोगे अन्यतोऽपि लक्षणं व्याक्रियते, नान्यत्रेति तसोनोत्पत्तिरिति तन्न। किं कारणमन्यत्रापि दर्शनात्। अन्यत्र तसःप्रयोगो दृश्यते नार्थतो न शब्दतोनाभिधानतः स मध्यम इति।

प्रतिसेवनेति षत्वाभावः क्रियांतराभिसंबंधात् ॥ ३ ॥ यथा विगताः सेवकाः, अस्माद्ग्रामा-द्विसेवको ग्राम इति षत्वं न भवति तथा प्रतिगता सेवना प्रतिसेवनेति क्रियांतराभिसंबंधात् षत्वं न भवति।

पुलाकादयः संयमादिभिः साध्याः ॥ ४ ॥ एते पुलाकादयः पंच निर्ग्रंथविशेषाः संयमादि भिरष्टाभिरनुयोगैः साध्या व्याख्येया इत्यर्थः। तद्यथा कः कस्मिन्संयमे भवति? पुलाकवकुशप्रतिसेवनाकुशीलाः द्वयोः संयमयोः सामायिकच्छेदोपस्थापनयोर्भवति। कषायकुशीला द्वयोः परिहारविशुद्धिसूक्ष्मसांपराययोः पूर्वयोश्च। निर्ग्रंथ स्नातकाः एकस्मिन्नेव यथाख्यातसंयमे। श्रुतं-पुलाकवकुशप्रतिसेवनाकुशीलाः उत्कर्षेणाभिन्नाक्षरदशपूर्वधराः। कषायकुशीला निर्ग्रंथाश्चतुर्दशपूर्वधराः। जघन्येन पुलाकस्य श्रुतमाचारवस्तु। वकुशकुशीलनिर्ग्रंथानां श्रुतमष्टौ प्रवचनमातरः। स्नातका अपगतश्रुताः केवलिनः। प्रतिसेवना—पंचानां मूलगुणानां रात्रिभोजनवर्जनस्य च पराभियोगात् बलादन्यतमं प्रतिसेवमानः पुलाको भवति। वकुशो द्विविधः उपकरणवकुशः शरीरवकुशश्चेति। तत्र उपकरणाभिष्वक्तचित्तो विविध विचित्रपरिग्रहयुक्तः, बहुविशेषयुक्तोपकरणकांक्षी तत्संस्कारप्रतीकारसेवी भिक्षुरुपकरणवकुशो भवति। शरीरसंस्कारसेवी शरीरवकुशः। प्रतिसेवनाकुशीलो मूलगुणानविराधयन् उत्तरगुणेषु कांचिद्विराधनां प्रतिसेवते। कषायकुशीलनिर्ग्रंथस्नातकानां प्रतिसेवना नास्ति तीर्थमिति सर्वेषां तीर्थकराणांतीर्थेषु भवंति। लिंगं द्विविधं द्रव्यलिंगं भावलिंगं च भावलिंगं प्रतीत्य सर्वे पंच निर्ग्रंथा लिंगिनो भवतीति। द्रव्यलिंगं प्रतीत्य भाज्याः। लेश्याः-पुलाकस्योत्तरास्तिस्रो लेश्या भवंति। वकुशप्रतिसेवनाकुशीलयोः षडपि। कषायकुशीलस्य परिहारविशुद्धेश्चतस्र उत्तराः। सूक्ष्मसांपरायस्य निर्ग्रंथस्नातकयोश्च शुक्लैव केवला भवति। अयोगशैले प्रतिपन्नाः अलेश्याः। उपपादः-पुलाकस्य उत्कृष्ट उपपादः, उत्कृष्टस्थितिषु देवेषु सहस्रारे, वकुशप्रतिसेवनाकुशीलयोर्द्वाविंशतिसागरोपमस्थितिष्वारणच्युतकल्पयोः, कषायकुशीलनिर्ग्रंथयोस्त्रायत्रिंशत्सागरोपमस्थितिषु। सर्वार्थसिद्धौ सर्वेषामपि जघन्यः। सौधर्मकल्पे द्वि सागरोपमस्थितिषु स्नातकस्य निर्वाणमिति। स्थानं-असंख्येयानि संयमस्थानानि कषायनिमित्तानि भवति। तत्र सर्वजघन्यानि लब्धिस्थानानि पुलाककषायकुशीलयोः, तौ युगपदसंख्येयानि स्थानानि गच्छतः, ततः पुलाको व्युच्छिद्यते। कषायकुशीलप्रतिसेवनाकुशीलवकुशाः युगपदसंख्येयानि स्थानानि गच्छंति, ततो वकुशो व्युच्छिद्यते। ततोऽप्यसंख्येयानि स्थानानि गत्वा प्रतिसेवनाकुशीलो व्युच्छिद्यते। ततोऽप्यसंख्येयानि गत्वा कषायकुशीलो व्युच्छिद्यते। अत ऊर्ध्वं अकषायस्थानानि निर्ग्रंथः प्रतिपद्यते। सोऽप्यसंख्येयानि स्थानानि गत्वा व्युच्छिद्यते। अतो ऊर्ध्वमेकं स्थानं गत्वा स्नातको निर्वाणं प्राप्नोतीत्येतेषां संयमलब्धिरनंतगुणा भवतीति।

इति तत्त्वार्थवार्तिके व्याख्यानालंकारे नवमोध्यायः ॥ ९ ॥

अथ दशमोध्यायः।

आह—आस्रवदोषानवलिप्तस्य परिस्पंदवतोऽपि कुशलस्य कर्मागमद्वारसंवरणादित्युपपादितः संवरपदार्थः, तदनंतरनिर्देशभाविनी निर्जराभिधीयतामित्यत्र ब्रूमः-नासाविह पुनर्वक्तव्या कुतस्तपोनुभवसंबंधेन यस्मात्पूर्वैव व्याख्याता। यथानामोपभुक्तविचित्रफलकर्मनिवृत्तिनिर्जरा। तत्रानुभवः संप्राप्त इति

चेन्नार्थवशाच्छास्त्रगरीयस्त्वपरिहारार्थत्वाच्च । संवरानंतरनिर्देशार्हेति चेत्तथैवाभिहिता "तपसा निर्जरा चेति" । अत एव गुप्त्याद्यध्यवसानं । इतरथा हि उभयहेतुत्वविपर्ययेण यत्र क्वचनाभिधानं स्यात् ।

आह प्रक्लृप्ता निर्जरा मोक्षोऽभिधातव्यः । स चानुपमप्राप्तकेवलज्ञानावस्थस्य नोपपद्यते । इत्यतः केवलज्ञानमेव तावद्यथा भवति तथोपदेष्टव्यमित्युच्यते । नैतदपि भूयो निर्देशार्हं वेदितव्यं कुतो यस्माद्ध्यानप्रकरणे व्याख्यातं,—

मोहक्षयाज्ज्ञानदर्शनावरणांतरायक्षयाच्च केवलं ॥ १ ॥

अथवा सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इत्युपक्षिप्य लक्षणोत्पत्तिविषयनिबंधनादिभिर्विशेषैर्दर्शनचारित्रे समर्थिते ज्ञानं च प्रमाणस्वभावं पंचविधमभ्युपेत्य तत्र चतुष्टयस्य लक्षणोत्पत्तिहेतुविषयनिबंधाः प्रक्रांताः अतः परमिदं वक्तव्यमेवमुत्पद्यते केवलमिति अत्र ब्रूमः—न वक्तव्यं पुनर्यस्मात्पुरस्तादेव व्याख्यातं संवरनिरुपादानीकृतसंततिचारित्रध्यानाग्निप्रज्वलितेधनमोहक्षयात् ज्ञानदर्शनावरणांतरायक्षयाच्च केवलं किमुत्पद्यत इत्युपदिष्टमिति वाक्यशेषः ।

वृत्तिप्रसंगो लघ्वर्थमिति चेन्न क्रमेण क्षयज्ञापनार्थत्वात् ॥ १ ॥ स्यान्मतमिह वृत्त्या-निर्देशः कर्तव्यः । मोहज्ञानदर्शनावरणांतरायक्षयात्केवलमिति किमर्थो लघ्वर्थमिति तन्न किं कारणं ? क्रमेण क्षयज्ञापनार्थत्वात् । प्रागेव मोहक्षयमुपनीयांतर्मुहूर्तं क्षीणकषायव्यपदेशमवाप्य ततो युगपद् ज्ञानदर्शनावरणांतरायाणां क्षयं कृत्वा केवलमवाप्नोति ।

तत्क्षयहेतुः केवलोत्पत्तिरिति हेतुलक्षणविभक्तिनिर्देशः ॥ २ ॥ तत्क्षयः केवलज्ञानोत्पत्तेर्हेतुरिति कृत्वा तदभिसंबंधावद्योतिकया हेतुलक्षणया विभक्त्या निर्देशः क्रियते ।

तत्क्षयः प्रणिधानविशेषात् ॥ ३ ॥ तेषां मोहादीनां क्षयो भवति कुतः ? प्रणिधानविशेषात् । परिणामविशेषादिति यावत् । तद्यथा—पूर्वाहितेन विधिना परमतपोविशेषैः प्रशस्ताध्यवसायप्रकर्षात् विशुद्ध्यतः शुभाभिमताः प्रकृतयः स्फीतीभवंति । अप्रशस्ताश्च तत्र भूयो विलीयते । तत्र कश्चिद्वेदकसम्यग्दृष्टिरप्रमत्तगुणस्थाने सप्तप्रकृत्युपशमात् श्रेण्यारोहणाभिमुखश्चारित्रमोहमुपशमयितुमारभते । अपरः—असंयतसंयतासंयतप्रमत्तसंयताप्रमत्तसंयतगुणस्थानेषु कस्मिंश्चित्सप्तप्रकृतीः क्षयमुपनीय क्षायिकसम्यग्दृष्टिर्भूत्वा चारित्रमोहमुपशमयितुमुपक्रमते । ततोऽधाप्रवृत्तकरणमपूर्वकरणमनिवृत्तिकरणं च कृत्वा उपशमश्रेणिमारुह्यापूर्वकरणोपशमकगुणस्थानव्यपदेशमनुभूय तत्राभिनवशुभाभिसंधितनूकृतपापकर्मप्रकृतिस्थित्यनुभागः विवर्द्धितशुभकर्मानुभवः, अनिवृत्तिवादरसांपरायोपशमकगुणस्थानमधिरुह्य नपुंसकवेदस्त्रीवेदनोकषायषट्कपुंवेदाप्रत्याख्यानप्रत्याख्यानक्रोधद्वयमायाद्वयलोभद्वयक्रोधमानसंज्वलनसंज्ञिकाः प्रकृतीः क्रमेणोपशमय्य ततः सूक्ष्मसांपरायप्रथमसमये मायासंज्वलने चोपशमं गते सर्वमोहप्रकृत्युपशमात् उपशान्तकषायव्यपदेशभाग्भवति । आयुषः क्षयात् म्रियते । अथवा पुनरपि कषायानुदीरयन् प्रतिनिवर्त्तते । स एव चान्यो वा विशुद्ध्याध्यवसायानुपरतोत्साहः पूर्ववत् क्षायिकसम्यग्दृष्टिर्भूत्वा कर्मविशुद्ध्या महत्या विशुध्यन् क्षपकश्रेणीमनुप्रपद्य तैरेव करणैस्त्रिभिः पूर्ववदपूर्वकरणक्षपकतामाश्लिष्य तत ऊर्ध्वं कषायाष्टकं क्षयं कृत्वा नपुंसकवेदं नाशमापाद्य स्त्रीवेदमुन्मील्य नोकषायषट्कं पुंवेदे प्रक्षिप्य क्षपयित्वा पुंवेदं क्रोधसंज्वलने, क्रोधसंज्वलनं मानसंज्वलने मानसंज्वलनं मायासंज्वलने, मायासंज्वलनं च लोभसंज्वलने, संक्रमक्रमेण वादरकृष्टिविभागेन विलयमुपनीय, अनिवृत्तिवादरसांपरायक्षपकभावमवाप्य, लोभसंज्वलनं तनूकृत्य सूक्ष्मसांपरायक्षपकभावमनुभूय, निरवशेषं मोहनीयं निर्मूलकाषं कषयित्वा क्षीणकषायतामधिरुह्य, अवतारितमोहनीयभारः उपान्त्यमे समये निद्राप्रचले प्रलयमुपनीय, पंचानां ज्ञानावरणानां चतुर्णां दर्शनावरणानां पंचानामंतरायाणां चान्तसमये समुपगम्य तदनंतरं ज्ञानदर्शनस्वभावं केवलपर्यायमतर्क्यविभूतिविशेषं निःसपत्नमवाप्य निरुपलेपः कमलमिवामलः साक्षात्त्रि-

कालसर्वद्रव्यपर्यायस्वभावज्ञः सर्वत्राप्रतिहतदर्शनः अवाप्तानिरवशेषपुरुषार्थः, जलधरनिरोधकालातीतस्वकिरणकलापसौम्यदर्शनस्तारकाधिपतिरिव ज्वलितमूर्तिः केवली भवति ।

आह व्याख्यातं प्रतिबंधविनिर्मुक्तसम्यक्त्वदर्शनानंतवीर्यसमन्वितं केवलं, तदात्मलाभश्च सकलकर्मोच्छेदहेतुरभ्युपगतः । अथ किंलक्षणः कस्माच्च हेतोर्मोक्षो भवतीत्युभयमभिधीयतामित्यत्रोच्यते । तस्य खलु भगवतः केवलपर्यायलब्धात्मलाभस्य विग्रहवतः स्वप्रभावार्जितानंतवीर्यभाजः पूर्वदग्धकर्मचतुष्टयस्याऽप्रच्युतवेद्यगोत्रायुष्कस्य ।

बंधहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः ॥१॥

मिथ्यादर्शनादिहेत्वभावादभिनवकर्मादानाभावः ॥ १ ॥ मिथ्यादर्शनादीनां पूर्वोक्तानामेव कर्मास्रवहेतूनां निरोधिकारणाभावात् कार्याभाव इत्यभिनवकर्मादानाभावः ।

पूर्वोदितनिर्जराहेतुसन्निधाने चार्जितकर्मनिरासः ॥ २ ॥ पूर्वोदितानां निर्जराहेतूनां सन्निधानेऽर्जितस्य च कर्मणो निरासो भवति । ताभ्यां बंधहेत्वभावनिर्जराभ्यामिति हेतुलक्षणविभक्तिनिर्देशस्ततो भवस्थितिहेतुसमीकृतशेषकर्मावस्थस्य युगपदात्यंतिकः प्रत्येतव्यः कृत्स्नकर्मविप्रमोक्षो मोक्षः ।

आद्यभावादंताभाव इति चेन्न दृष्टत्वादंत्यबीजवत् ॥ ३ ॥ स्यान्मतं कर्मबंधसंतानस्याद्यभावादंतेनाप्यस्य न भवितव्यं, दृष्टविपरीतकल्पनायां प्रमाणाभावादिति तन्न किं कारणं ? दृष्टत्वादंत्यबीजवत् । यथा बीजांकुरसंतानेऽनादौ प्रवर्त्तमानेऽत्यबीजमग्निनोपहतांकुरशक्तिकमित्यंतोऽस्य दृष्टस्तथा मिथ्यादर्शनादिप्रत्ययसांपरायिकसंततावनादौ ध्यानानलनिर्दग्धे कर्मबीजे भवांकुरोत्पादाभावान्मोक्ष इति दृष्टमिदमपह्नोतुमशक्यं । उक्तं च,—

> दग्धे बीजे यथात्यंतं प्रादुर्भवति नांकुरः ।
> कर्मबीजे तथा दग्धे न रोहति भवांकुरः ॥ इति ॥

कृत्स्नस्य कर्मत्वेन क्षयः कर्मक्षयः, सतो द्रव्यस्य द्रव्यत्वेन विनाशो नास्ति कथं तर्हि ? पर्यायेण, तस्योत्पत्तिमत्त्वाद्विनाशेन भवितव्यं, तन्मुखेन द्रव्यमपि व्ययं यातीति व्यपदिश्यते । ततः पुद्गलद्रव्यस्य कारणवशात्कर्मत्वपर्यायमापन्नस्य तत्प्रत्यनीकहेतुसन्निधाने तत्पर्यायनिवृत्तौ तस्य क्षयः इत्युपदेशो भवतीति युक्तमेतत् कृत्स्नकर्मक्षय इति ।

भावसाधनो मोक्षशब्दो द्विविषयो विप्रयोगक्रियामात्रगतेः ॥ ४ ॥ मोक्ष असने इत्यस्य मोक्षणं मोक्ष इति भावसाधनः शब्दो द्विविषयः मोक्तव्यमोचकापेक्षत्वात् । कुतः ? विप्रयोगक्रियामात्रगतेः । कृत्स्नशब्देन कर्माष्टविधं सद्बंधोदयोदीरणचतुर्विधव्यवस्थं परिगृहीतं तत्र बंधोदयोदीरणानां क्षयविभागा गुणस्थानभेदेन निर्दिष्टः, सत्कर्मोच्छेदस्तु न प्रतिपादितः स विव्रियते,—

कर्माभावो द्विविधः यत्नसाध्योऽयत्नसाध्यश्चेति ॥ ५ ॥ तत्र चरमदेहस्य नरकतिर्यग्देवायुषामभावोऽयत्नसाध्यः--असत्त्वात् । यत्नसाध्य इत उर्ध्वमुच्यते असंयतसम्यग्दृष्ट्यादिषु चतुर्षु गुणस्थानेषु कस्मिंश्चिदनंतानुबंधिक्रोधमानमायालोभमिथ्यात्वसम्यग्मिथ्यात्वसम्यक्त्वाख्यप्रकृतिसप्तकक्षितरुवनं शुभाध्यवसायनिशितपरशुपातेन निर्मूलं निच्छिद्यते । निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्धिनरकगतितिर्यग्गत्येकद्वित्रिचतुरिंद्रियजातिनरकगतितिर्यग्गतिप्रायोग्यानुपूर्व्यातपोद्योतस्थावरसूक्ष्मसाधारणसंज्ञकानां षोडशानां प्रकृतीनां पृतनाया युगपदनिवृत्तिबादरसांपरायस्तेन समाधिचक्रेण विजयमवाप्नोति । ततः परं कषायाष्टकं नष्टं करोति स एव युगपन्नपुंसकवेदः स्त्रीवेदश्च क्रमेण तत्रैव क्षयमुपयाति, नोकषायषट्कं चैकेनैव प्रहारेण निपातयति । ततः पुंवेदसंज्वलनक्रोधमानमायाः क्रमेण तत्रैवात्यंतिकं ध्वंसनमास्कंदंति । लोभसंज्वलनः सूक्ष्मसांपरायांते यात्यंतं । निद्राप्रचले क्षीणकषायवीतरागछद्मस्थस्योपान्तमे समये

१ कृतप्रशंसोयं श्लोकस्तत्त्वार्थसारीयः । २ सेनायाः ।

प्रलयमुपव्रजतः । पंचानां ज्ञानावरणानां चतुर्णां दर्शनावरणानां पंचानामंतरायाणां च तस्यैवांत समये प्रक्षयो भवति । अन्यतरवेदनीयदेवगत्यौदारिकवैक्रियिकाहारकतैजसकार्मणशरीरबंधनपंचसंघात संस्थानषट्कौदारिकवैक्रियिकाहारकशरीरांगोपांगषट्संहननपंचप्रशस्तवर्णपंचाप्रशस्तवर्णगंधद्वयपंचप्रशस्तरस- पंचाप्रशस्तरसस्पर्शाष्टकदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातपरघातोच्छ्वासप्रशस्ताविहायोगत्यपर्याप्तकप्रत्येक- शरीरस्थिरास्थिरशुभाशुभदुर्भगसुस्वरदुःस्वरानादेयायशस्कीर्तिनिर्माणनामनीचैर्गोत्राख्या द्वासप्ततिप्रकृतयः अयोगकेवलिन उपांत्यसमये विनाशमुपयांति । अन्यतरवेदनीयमनुष्यायुर्मनुष्यगतिपंचेंद्रियजाति- मनुष्यगतिप्रायोग्यानुपूर्व्यत्रसबादरपर्याप्तकशुभगादेययशस्ककीर्त्तितीर्थकरनामोच्चैर्गोत्रसंज्ञिकानां त्रयोदशानां प्रकृतीनामयोगकेवलिनश्चरमसमये व्युच्छेदो भवति ।

आह किमासां पौद्गलिकीनामेव द्रव्यकर्मप्रकृतीनां निरासान्मोक्षोऽवसीयत उत भावकर्मणोऽपीत्यत्रोच्यते-

औपशमिकादिभव्यत्वानां च ॥ ३ ॥

किं ! मोक्ष इत्यनुवर्तते ।

भव्यत्वग्रहणमन्यपारिणामिकानिवृत्त्यर्थं ॥ १ ॥ अन्येषां जीवत्वादीनां पारिणामिकानां मोक्षावस्थायामनिवृत्तिज्ञापनार्थं भव्यत्वग्रहणं क्रियते । तेन पारिणामिकेषु भव्यत्वस्य औपशमिकादीनां च भावानामभावान्मोक्षो भवतीत्यवगम्यते । ननु च द्रव्यनिरासेऽभिहिते तन्निमित्तानां निवृत्तिरर्थादव गम्यत इति नार्थोऽनेन योगेन ? नैष दोषः । नायमेकांतः-निमित्तापाये नैमित्तिकानां निवृत्तिः[1] अपि चार्थाव- गमेऽपि सिद्धे साक्षात्प्रतिपत्त्यर्थमिदमुच्यते-विस्पष्टार्थं वक्ष्यमाणलक्षणनिर्देशार्थं,

आह यद्यपवर्गो भावोपरतेः प्रतिज्ञायते ननु चौपशमिकादिभावनिवृत्तिवत् सर्वक्षायिकनिवृत्तौ भव्यपदेशो मुक्तस्य प्राप्नोतीति ? स्यादेतदेवं यदि विशेषो नोच्येत अस्ति तु विशेष इति अपवाद- विधानार्थमिदमुच्यते,—

अन्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः ॥ ४ ॥

अन्यत्रशब्दोय वर्जनार्थो दृष्टव्यः, तन्निमित्तः सिद्धत्वेभ्य इति विभक्तिनिर्देशः । यथा-"अन्यत्र द्रोण भीष्माभ्यां सर्वे योद्धाः परांमुखा" इति ।

अन्यशब्दप्रयोगे तद्विज्ञानमिति चेन्न स्वार्थिकत्वात् ॥ १ ॥ स्यान्मतमन्यशब्दप्रयोगे को विभक्तिर्विज्ञायते यथाऽन्यो देवदत्तादिति अन्यत्र शब्दोऽयं तस्मान्निर्देशो नोपपद्यते इति तन्न । किं कारणं ? स्वार्थिकत्वात् । स्वार्थिकोऽयं त्रः, केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्योऽन्यस्मिन्नय विधिरिति ।

अनंतवीर्यादिनिवृत्तिप्रसंग इति चेन्नात्रैवांतर्भावात् ॥ २ ॥ स्यादेतत्सम्यक्त्वादीनां चतु- र्णां क्षायिकाणां संग्रहादितरेषां निवृत्तेरनंतवीर्यादीनां प्राप्नोतीति ? तन्न । किं कारणं ? अत्रैवांतर्भावात् ज्ञानदर्शनाविनाभाविनो ह्यनंतवीर्यादयः अत्रैवांतर्भवंति । अनंतसामर्थ्यहीनस्यानंतावबोधवृत्त्यभावात् । ज्ञानमयत्वाच्च सुखस्येति ।

बंधस्याव्यवस्थाऽश्वादिवदिति चेन्न मिथ्यादर्शनाद्युच्छेदे कार्यकारणनिवृत्तेः ॥ ३ ॥ स्यादेतद्यथाऽश्वादीनामेकस्मिन् बंध उच्छिन्नेऽपि पुनर्बंधांतरसंभवादव्यवस्था तथा जीवस्यापि कस्मि- श्चिद्बंधेऽपगतेऽपि बंधांतरप्रसंग इति तन्न । किं कारणं ? मिथ्यादर्शनाद्युच्छेदे कार्यकारणनिवृत्तेः । पुन- र्बंधहेत्वभावाद्बंधाभावः ।

पुनर्बंधप्रसंगो जानतः पश्यतश्च कारुण्यादिति चेन्न सर्वास्रवपरिक्षयात् ॥ ४ ॥ स्यादेतद्व्यसनार्णवे निमग्नं जगदशेषं जानतः पश्यतश्च कारुण्यमुत्पद्यते ततश्च बंध इति तन्न । किं कारणं

---

१ वक्ष्यमाणमात्रनिर्देशार्थमित्यपि पाठांतरं । २ पंचमी ।

सर्वास्रवपरिक्षयात्। भक्तिस्नेहकृपास्पृहादीनां रागविकल्पत्वाद्वीतरागे न ते संतीति।

अकस्मादिति चेदनिर्मोक्षप्रसङ्गः ॥ ५ ॥ यदि कारणमंतरेणैव मुक्तस्य बंधः कल्प्यते ननु अनिर्मोक्षः स्यात्। मुक्तिप्राप्त्यनंतरमेव बंधोपपत्तेः।

स्थानवत्त्वात्पात इति चेन्नानास्रवत्वात् ॥ ६ ॥ स्यादेतत्स्थानवत्त्वान्मुक्तस्य पातः प्राप्नोतीति ? तन्न। किं कारणं ? अनास्रवत्वात्। आस्रववतो हि यानपात्रस्याधःपतनं दृश्यते नचास्रवो मुक्तस्यास्ति।

गौरवाभावाच्च ॥ ७ ॥ गौरववतो हि तालफलस्य तत्प्रतिबद्धवृंतसंयोगाभावे पतनं दृष्टं नागौरवस्याकाशस्य न च गौरवमस्ति मुक्तस्येति पाताभावः। यस्य हि स्थानवत्त्वं पातकारणं तस्य सर्वेषां पदार्थानां पातः स्यात् स्थानवत्त्वाविशेषात्।

परस्परोपरोध इति चेन्नावगाहनशक्तियोगात् ॥ ८ ॥ स्यान्मतं अल्पः सिद्धावगाह्यः आकाशप्रदेशः आधारः, आधेयाः सिद्धा अनंताः ततः परस्परोपरोध इति ? तन्न। किं कारणं—अवगाहनशक्तियोगात्। मूर्तिमत्स्वपि नामानेकमणिप्रदीपप्रकाशेषु अल्पेऽप्यवकाशे न विरोधः किमग ! पुनरमूर्तिषु अवगाहनशक्तियुक्तेषु ?

तत एव जन्ममरणद्वंद्वोपनिपातव्याबाधाविरहात् परमसुखिनः ॥ ९ ॥ तत एवा मूर्तत्वादेवेत्यर्थः यस्य हि मूर्तिरस्ति तस्य तत्पूर्वकः प्रीतिपरितापसंबंधः स्यात्, नचामूर्तानां मुक्तानां जन्ममरणद्वंद्वोपनिपातव्याबाधाऽस्ति, अतो निर्व्याबाधत्वात्परमसुखिनस्ते।

न तस्यास्त्युपमानमाकाशपरिमाणवत् ॥ १० ॥ यथा परमाण्ववगाहक्षेत्रमारभ्य एकैकप्रदेशवृद्ध्या कल्प्यमानं सातिशयं क्षेत्रमाकाशपरिमाणं पुनरिदमेवेत्युपमार्थकल्पनाभावात् अनुपमानं तथा सुखशब्दार्थोऽपि प्रकर्षाप्रकर्षयोगात् संसारगतः सांतः। मुक्तानां पुनः परमानंतपरिमाणयोगान्निरतिशय इत्यनुपमानः।

अनाकारत्वादभाव इति चेन्नातीतानंतरशरीरानुविधायित्वात् ॥ ११ ॥ स्यादेतन्मुक्तानां परित्यक्तमूर्तीनामाकाराभावादभावः प्राप्नोतीति तन्न। किं कारणं-अतीतानंतरशरीरानुविधायित्वात्।

शरीरानुविधायित्वे तदभावाद्विसर्पणप्रसंग इति चेन्न कारणाभावात् ॥ १२ ॥ स्यान्मतं यदि शरीरानुविधायी जीवस्तदभावात्स्वाभाविकलोकाकाशप्रदेशपरिमाणत्वात्तावद्विसर्पणं प्राप्नोतीति ? तन्न। कुतः कारणाभावात्। पुनर्विसर्पणकारणाभावान्न विसर्पति।

नामकर्मसंबंधात् संहरणविसर्पणधर्मत्वं प्रदीपप्रकाशवत् ॥ १३ ॥ यथा प्रदीपप्रकाशोऽवधृतपरिमाणः शरावमानिकापवरकादिद्रव्योपष्टंभान्महानल्पश्च भवति तथा नामकर्मसंबंधात्परिच्छिन्नपरिमाणोऽपि जीवः संहरति विसर्पति च। तदभावान्न संहारो विसर्पणं वा मुक्तस्य जीवस्य।

मूर्तिमद्वैधर्म्यादिति चेन्नोभयलक्षणप्राप्तत्वात् ॥ १४ ॥ स्यान्मतं मूर्तः प्रदीपप्रकाशः अमूर्तस्यात्मनः संहरणविसर्पणधर्मत्वे साध्ये दृष्टांतो नोपपद्यते इति ? तन्न। किं कारणं ? उभयलक्षणप्राप्तत्वादुपयोगस्वलक्षणापेक्षयाऽमूर्तः। बंधपरिणामापेक्षया मूर्तः। उक्तं च—

> बंध पडिएयत्तं लक्खणदो हवदि तस्स णाणत्तं
>
> तह्मा अमूत्तिमुत्तो णेयंतो होदि जीवस्स। इति।

तस्मात्कथंचिन्मूर्तत्वोपपत्तेः साम्यमेव दृष्टांतेन।

अनित्यत्वप्रसंग इति चेन्न तावन्मात्रस्य निर्दिदिक्षितत्वाचंद्रमुखीवत् ॥ १५ ॥ स्यादेतत्संहरणविसर्पणधर्मत्वादेव प्रदीपप्रकाशवदनित्यत्वं प्राप्नोत्यात्मन इति ? तन्न। किं कारणं ? तावन्मात्रस्य निर्दिदिक्षितत्वाद्यथा चंद्रमुखी कन्येति बहवश्चंद्रे गुणा या च्यासौ प्रियदर्शनता सा गम्यते तथा

प्रदीपप्रकाशेऽनित्यत्वादिषु बहुषु धर्मेषु सत्स्वपि संकोचविकाससाधर्म्यमात्रं विवक्षितं । सर्वसाधर्म्याच्च दृष्टांताभावप्रसंगः ।

सर्वथाभावो मोक्षः प्रदीपवदिति चेन्न साध्यत्वात् ॥ १६ ॥ स्यादेतद्यथा वर्तिस्नेहानलसन्निपाते प्रदीपोऽनुपरतवृत्त्या प्रवर्त्तमानस्तत्क्षयेण कांचिद्दिशं विदिशं वा गच्छति तत्रैवात्यंतं विनाशमुपयाति तथा कारणवशात्स्कंधप्रतिसंतानरूपेण प्रवर्तमानः स्कंधसमूहो जीवव्यपदेशभाक् क्लेशक्षयाच्च कांचिद्दिशं विदिशं वा गच्छति तत्रैवात्यन्तं प्रलयमेतीति ? प्रदीपा एव हि पुद्गलाः पुद्गलजातिमजहतः परिणामवशान्मषीभावमापन्ना इति नात्यंतविनाशः ।

दृष्टत्वाच्च निगलादिवियोगे देवदत्ताद्यवस्थानवत् ॥ १७ ॥ यथा निगलादिद्रव्यवियोगे देवदत्तादीनामवस्थानं दृष्टं तथा बंधविप्रमोक्षे आत्मनावस्थेयमिति दृष्टमिदमपह्नोतुमशक्यमिति नाभावः ।

यत्रैव कर्मविप्रमोक्षस्तत्रैवावस्थानमिति चेन्न साध्यत्वात् ॥ १८ ॥ स्यादेतद्यस्मिन्नेव देशे कर्मविप्रमोक्षस्तस्मिन्नेवावस्थानं प्राप्नोति पुनर्गतिकारणाभावादिति ? तन्न । किं कारण ? साध्यत्वात् साध्यमेतत्तत्रैवावस्थातव्यमिति । बंधनाभावादनाश्रितत्वाच्च स्याद्गमनमिति ।

आह न तावदस्य बंधाभावेऽधोगतिर्गौरवाभावात् । नापि तिर्यग्गतिर्योगाभावात् तस्मात्प्राप्तमेतत्तत्रैवावस्थानं ततो लोकस्योपरि तदवस्थानकल्पनाव्यावृत्तिरित्युच्यते भवेदेवं यद्यनभिमतदेशगतिनिमित्ताभाववत्तस्योर्ध्वगतिनिमित्तं न स्यात् । अस्ति च तत्तस्मादेकसमयेन हि निरस्तकर्मभारः पुरुषः—

तदनंतरमूर्ध्वं गच्छत्यालोकांतात् ॥ ५ ॥

तदित्यनेन प्रकृतोऽर्थो निर्दिश्यते । कश्च प्रकृतः कृत्स्नकर्मविप्रमोक्षः । तस्यानंतरमूर्ध्वं गच्छति ।

आङभिविध्यर्थः ॥ १ ॥ ईषदर्थादिषु दृष्टप्रयोगः आङिह विवक्षावशादभिविधौ वेदितव्यः । लोकस्यांतो लोकांत आलोकांतादिति ।

आह—अनुपदिष्टहेतुकमिदमूर्ध्वगमनं कथमध्यवसातुं शक्यमित्यत्रोच्यते,—

पूर्वप्रयोगादसंगत्वाद्बंधच्छेदात्तथागतिपरिणामाच्च ॥ ६ ॥

आह हेत्वर्थः पुष्कलोऽपि दृष्टांतसमर्थनमंतरेणाभिप्रेतार्थसाधनाय नालमित्यत्रोच्यते,—

आविद्धकुलालचक्रवद्व्यपगतलेपालाबूवदेरंडबीजवदग्निशिखावच्च ॥ ७ ॥

हेतुदृष्टांतानां यथासंख्यमभिसंबंधः ॥ १ ॥ पूर्वसूत्रे विहितानां हेतूनामत्रोक्तानां दृष्टांतानां च यथासंख्यमभिसंबंधो भवति । तद्यथा,—

अपवर्गप्राप्तये बहुशः प्रणिधानादाविद्धकुलालचक्रवत् ॥ २ ॥ यथा कुलालप्रयोगापादितहस्तदंडचक्रसंयोगपूर्वकं भ्रमणमुपरतेऽपि तस्मिन्पूर्वप्रयोगादासंस्कारक्षयाद्भवति । एवं भवस्थेनात्मनापवर्गप्राप्तये बहुशः प्रणिधानात्तदभावेऽपि तदावेशपूर्वकं मुक्तस्य गमनमवसीयते । किं च,—

असंगत्वान्मुक्तलेपालाबूद्रव्यवत् ॥३॥ यथा मृत्तिकालेपजनितगौरवमलाबूद्रव्यं जलेऽधः पतति तदेव छेदविश्लिष्टमृत्तिकाबंधनं लघु सदूर्ध्वमेव गच्छति तथा कर्मभाराक्रांतवशीकृत आत्मा तदावेशवशात्संसारे नियमेन गच्छति तत्संगविमुक्तौ तूपर्येव याति ।

अनियमप्रसंगो दंडवदिति चेन्नोर्ध्वगौरवात् ॥ ४ ॥ स्यादेतद्यथा द्रव्यांतरसंसक्तो दंडोऽवस्थितस्तदभावेऽनियमेन पतति तथा कर्मसंगाभावेऽनियमेनात्मनोऽपि गमनं प्राप्नोतीति तन्न । किं कारणं ? ऊर्ध्वगौरवात् । ऊर्ध्वगौरवपरिणामो हि जीव उत्पतत्येव । किं च,—

बंधच्छेदादेरंडबीजवत् ॥ ५ ॥ यथा बीजबंधकोशादिच्छेदादेरंडबीजस्य गतिर्दृष्टा तथा मनुष्यादिभवप्रापकगतिजातिनामादिसकलकर्मबंधच्छेदान्मुक्तस्य गतिरवसीयते । किं च,—

तथागतिपरिणामाच्चाग्निशिखावत् ॥ ६ ॥ यथा तिर्यक्प्लवनस्वभावसमीरणसंबंधनिरुत्सुका प्रदीपशिखा स्वभावादुत्पतति तथा मुक्तात्माऽपि नानागतिविकारणकर्मनिवारणे सति ऊर्ध्वगतिस्वभावत्वादूर्ध्वमेवारोहति ।

असंगत्वबंधच्छेदयोरर्थादविशेषादनुवादप्रसंग इति चेन्नाऽर्थान्यत्वात् ॥ ७ ॥ स्यादेतदसंगत्वबंधच्छेदयोर्नास्त्यर्थविशेष इति पौनरुक्त्यं प्राप्नोति—बध्नातिरपि व्यतिषंगे वर्तत इति ? तन्न । किं कारणं ? अर्थान्यत्वात् । अन्योन्यानुप्रवेशे सत्यविभागेनावस्थानं बंधः । परस्परप्राप्तिमात्रं संग इत्यस्त्यर्थविशेषः । तस्मात्क्रियाकारणधर्माधर्माभावेऽपि हेत्वंतरान्मुक्तस्य गतिरभ्यनुज्ञायते ।

नोदाहरणमलाबूर्मारुतावेशादिति चेन्न तिर्यग्गमनप्रसंगात् ॥ ८ ॥ स्यादेतदलाबूद्रव्यं मुक्तगमनसिद्धावुदाहरणं न भवति कुतः मारुतावेशादिति तन्न । किं कारणं ? तिर्यग्गमनप्रसंगात् । यदि मारुतावेशात्तस्य गमनं स्यात्तिर्यक्प्लवनधर्मत्वान्मरुतस्तिर्यग्गमनमेव स्यान्नोर्ध्वं ।

ऊर्ध्वगत्यभावे तदभावप्रसंगोऽग्नेरौष्ण्याभावेऽभाववदिति चेन्न गत्यंतरनिवृत्त्यर्थत्वात् ॥ ९ ॥ स्यान्मतं यथोष्णस्वभावस्याग्नेरौष्ण्याभावेऽभावस्तथा मुक्तस्योर्ध्वगमनं स्वभावस्तदभावेऽभावः प्राप्नोतीति-चेन्न । किं कारणं ? गत्यंतरनिवृत्त्यर्थत्वात् । तथा च मुक्तस्योर्ध्वमेव गमनं न दिगंतरगमनमित्ययं स्वभावो नोर्ध्वं गमनमेवेति ।

ऊर्ध्वज्वलनवद्वा ॥ १० ॥ यथोर्ध्वज्वलनस्वभावत्वेऽप्यग्नेर्वेगवद्द्रव्याभिघातात्तिर्यग्ज्वलनेऽपि नाऽग्नेर्विनाशो दृष्टस्तथा मुक्तस्योर्ध्वगतिस्वभावत्वेऽपि तदभावेभाव इति ।

अत्राह—ऊर्ध्वज्वलनस्वभावस्याग्नेर्वेगवदभिघातात्तिर्यग्ज्वलने सति विरोधादूर्ध्वज्वलनाभावो युक्तः । मुक्तस्य तु पुनः स्वभावगतिलोपहेत्वभावादूर्ध्वगत्युपरमोनुपपन्न इत्युच्यते लोकांतान्नोर्ध्वगतिर्मुक्तस्य कुतः ?

धर्मास्तिकायाभावात् ॥ ९ ॥

गत्युपग्रहकारणभूतो धर्मास्तिकायो नोपर्यस्तीत्यलोके गमनाभावः । तदभावे च लोकालोकविभागाभावः प्रसज्यते ।

किं पुनरेते परिनिर्वृत्ताः कार्मणशरीरोपशमकादिभावनिरूपाख्याः पर्यायान्तरेण शक्याः व्यपदेष्टुं, उतातीतव्यवहारा एव निर्धारयितव्या इत्युच्यते—शक्याः । कथं ? यस्मात्खलु ।

क्षेत्रकालगतिलिंगतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञाना-वगाहनांतरसंख्याल्पबहुत्वतः साध्याः ॥ १० ॥

प्रत्युत्पन्नभूतानुग्रहतंत्रनयद्वयापेक्षया क्षेत्रादिभिः साध्याः सिद्धाः ॥ १ ॥ एतैः क्षेत्रादिभिरल्पबहुत्वांतैर्द्वादशभिरनुयोगद्वारैः प्रत्युत्पन्नभूतानुग्रहतंत्रनयद्वयापेक्षया साध्याः चिंत्याः विकल्प्याः । के पुनस्ते ? सिद्धाः । तथा क्षेत्रेण तावत्—कस्मिन् क्षेत्रे सिध्यति ?

सिद्धिक्षेत्रे कर्मभूमिषु वा ॥ २ ॥ सिद्धिक्षेत्रे कर्मभूमिषु वा प्रत्युत्पन्नविषयग्राहिनयार्पणेन सिद्धिक्षेत्रे स्वप्रदेशे, आकाशप्रदेशे वा सिद्धिर्भवति । भूतानुग्रहतंत्रनयविवक्षायां जन्म प्रति पंचदशसु कर्मभूमिषु संहरणं प्रति मानुषक्षेत्रे सिद्धिः । ऋजुसूत्रनयः शब्दभेदाश्च त्रयः प्रत्युत्पन्नविषयग्राहिणः शेषा नया उभयभावविषयाः ।

कालेन—कस्मिन्काले सिद्धिः—एकसमये उत्सर्पिण्यवसर्पिण्योर्वा विशेषेण प्रत्युत्पन्ननयापेक्षया एकसमये सिध्यन् सिद्धो भवति । भूतभावप्रज्ञापननयार्पणया द्वेधा जन्मनः संहरणतश्च । तत्र जन्मनः अविशेषेण उत्सर्पिण्यवसर्पिण्योर्जातः सिद्ध्यति । विशेषेणावसर्पिण्यां सुखमदुःखमाया अंते भागे दुःखमसुखमायां च जातः सिद्ध्यति । दुःखमसुखमायां जातः दुःखमायां सिद्ध्यति न तु दुःखमायां जातः । अन्यदा नैव

सिद्ध्यति । संहरणतः सर्वस्मिन्काले अवसर्पिण्यामुत्सर्पिण्यां च सिद्ध्यति ।

गत्यां—कस्यां गतौ सिद्धिः ? सिद्धिगतौ मनुष्यगतौ वा विशेषः। प्रत्युत्पन्ननयाश्रयेण न सिद्धिगतौ सिद्ध्यति। भूतविषयनयापेक्षया द्विधा कल्पना अनंतरगतौ एकांतरगतौ च। तत्रांनंतरगतौ मनुष्यगतौ सिद्ध्यति। एकांतरगतौ चतसृषु गतिषु जातः सिद्ध्यति।

लिंगेन—केन चित्सिद्धः। लिंगं त्रिविधो वेदः। अवेदत्वेन त्रिभ्यो वा वेदेभ्यः सिद्धिः। वर्तमानविषयविवक्षायामवेदत्वेन सिद्धिर्भवति। अतीतगोचरनयापेक्षया अविशेषेण त्रिभ्यो वेदेभ्यः सिद्धिर्भवति। भावं प्रति, न तु द्रव्यं प्रति। द्रव्यापेक्षया तु पुल्लिंगेनैव सिद्धिः। अपरः प्रकारः-लिंगं द्विविधं निर्ग्रंथलिंगं सग्रंथलिंगं चेति। तत्र प्रत्युत्पन्ननयाश्रयेण निर्ग्रंथलिंगेन सिद्ध्यति। भूतविषयनयादेशेन तु भजनीयं। तीर्थेन—

तीर्थसिद्धिर्द्वेधा तीर्थकरेतरविकल्पात्॥३॥ तीर्थसिद्धिर्द्वेधा भवति-तीर्थकरत्वेनेतरत्वेन च। सति केचित्तीर्थकरे सिद्धाः अपरेऽन्यथा सिद्धा असति चेति। चारित्रेण केन सिद्ध्यति। अव्यपदेशेनैकचतुःपंचविकल्पचारित्रेण वा सिद्धिः। प्रत्युत्पन्नाच्च ते हि नयवशान्न चारित्रेण व्यपदेशविरहितेन भावेन सिद्धिः। भूतपूर्वगतिर्द्विधा अनंतरव्यवहितभेदात्। आनंतर्येण यथाख्यातचारित्रेण सिद्ध्यति व्यवधानेन चतुर्भिः पंचभिर्वा। चतुर्भिस्तावत्—सामायिकच्छेदोपस्थापनासूक्ष्मसांपराययथाख्यातचारित्रैः। पंचभिस्तैरेव परिहारविशुद्धिचारित्राधिकैः।

स्वशक्तिपरोपदेशनिमित्तज्ञानभेदात् प्रत्येकबुद्धबोधितविकल्पः। केचित्प्रत्येकबुद्धसिद्धाः। परोपदेशमनपेक्ष्य स्वशक्त्यैवाविर्भूतज्ञानातिशयाः। अपरे बोधितबुद्धसिद्धाः, परोपदेशपूर्वकज्ञानप्रकर्षास्कंदिनः। ज्ञानेन-एकेन द्वित्रिचतुर्भिश्च ज्ञानविशेषैः सिद्धिः। प्रत्युत्पन्नग्राहिनयनिरूपणया केवलज्ञानेनैकेन सिद्धिर्भवति। भूतपूर्वगत्या तु द्वाभ्यां त्रिभिश्चतुर्भिश्च ज्ञानविशेषैर्भवति। द्वाभ्यां—मतिश्रुतज्ञानाभ्याम्—त्रिभिर्मतिश्रुतावधिभिः मतिश्रुतमनःपर्ययैर्वा। चतुर्भिर्मतिश्रुतावधिमनःपर्ययैः।

अवगाहनं द्विविधं-उत्कृष्टजघन्यभेदात्॥ ४॥ आत्मप्रदेशव्यापित्वमवगाहनं द्विविधं। उत्कृष्टं जघन्यं चेति। तत्रोत्कृष्टं पंचधनुः शतानि पंचविंशत्युत्तराणि। जघन्यमर्द्धचतुर्थारत्नयः देशोनाः। मध्ये विकल्पाः एतस्मिन्नवगाहे सिद्ध्यंति पूर्वभावप्रज्ञापननयापेक्षया। प्रत्युत्पन्नभावप्रज्ञापनेन तु एतस्मिन्नेव देशोने। किमंतरं सिद्ध्यतां। अनंतरं च सिद्ध्यंति सांतरं च।

अनंतरं जघन्येन द्वौ समयौ उत्कर्षेणाष्टौ॥ ५॥ आनंतर्येण जघन्येन द्वौ समयौ सिद्ध्यंति उत्कर्षेणाष्टौ।

सांतरं जघन्येनैकः समयः उत्कर्षेण षण्मासाः॥ ६॥ सिद्ध्यतां सिद्धिविरहकालोऽतरं जघन्येनैकःसमयः। उत्कर्षेण षण्मासाः प्रत्येतव्याः।

जघन्येन एकउत्कर्षेण अष्टशतमिति संख्या॥ ७॥ एकसमये कति सिद्ध्यन्ति। जघन्येनैकः उत्कर्षेणाष्टशतमिति संख्यावगंतव्याः।

क्षेत्रादिभिर्भिन्नानां परस्परतः संख्याविशेषः अल्पबहुत्वं॥ ८॥ क्षेत्रादिभिरेकादशभिरभिन्नानां परस्परतः संख्याविशेषोऽल्पबहुत्वमित्युच्यते। तद्यथा--प्रत्युत्पन्ननयापेक्षया सिद्धिक्षेत्रे सिद्ध्यंतीतिनास्त्यल्पबहुत्वं। भूतपूर्वनयापेक्षया तु चिंत्यते—क्षेत्रसिद्धाः द्वेधा जन्मतः संहरणतश्च तत्राल्पे संहरणसिद्धाः। जन्मसिद्धाः संख्येयगुणाः। सर्वस्तोका ऊर्ध्वलोकसिद्धाः। अधोलोकसिद्धाः संख्येयगुणाः। तिर्यग्लोकसिद्धाः संख्येयगुणाः, सर्वस्तोकाः समुद्रसिद्धाः द्वीपसिद्धाः संख्येयगुणाः। एवं तावदविशेषेण विशेषेण च सर्वस्तोकाः लवणोदसिद्धाः, कालोदसिद्धाः संख्येयगुणाः। जंबूद्वीपसिद्धाः संख्येयगुणाः। धातकीखंडसिद्धाः संख्येयगुणाः। पुष्करद्वीपार्द्धसिद्धाः संख्येयगुणा इति। कालविभागस्त्रिविधः— उत्सर्पिणी—अवसर्पिणी अनुत्सर्पिण्यनवसर्पिणी चेति। सर्वस्तोका उत्सर्पिणीसिद्धाः। अवसर्पिणीसिद्धाः विशेषाधिकाः,

अनुत्सर्पिण्यवसर्पिणीसिद्धाः संख्येयगुणाः । प्रत्युत्पन्ननयापेक्षया एकसमये सिद्ध्यंतीति नास्त्यल्पबहुत्वं ।

गतिं प्रति–प्रत्युत्पन्नभावप्रज्ञापननयस्य सिद्धिगतौ सिद्ध्यंतीति नास्त्यल्पबहुत्वं । भूतविषयनयापेक्षया अनंतरगतौ मनुष्यगतौ सिद्ध्यंतीति नास्त्यल्पबहुत्वं । एकांतरगतौ तु अल्पबहुत्वमस्ति । सर्वतः स्तोकास्तिर्यग्योन्यनंतरगतिसिद्धाः । मनुष्ययोन्यनंतरगतिसिद्धाः संख्येयगुणाः । नरकयोन्यनंतरगतिसिद्धाः संख्येयगुणाः । देवयोन्यनंतरगतिसिद्धाः संख्येयगुणा इति ।

वेदानुयोगे –प्रत्युत्पन्ननयाश्रयणे अवेदाः सिद्ध्यतीति नास्त्यल्पबहुत्वं । भूतविषयनयाश्रयणे तु सर्वतः स्तोकाः नपुंसकवेदसिद्धाः । स्त्रीवेदसिद्धाः संख्येयगुणाः । पुंवेदसिद्धाः संख्येयगुणाः ।

तीर्थानुयोगे—तीर्थकरसिद्धाः संख्येयगुणाः ।

चारित्रानुयोगे प्रत्युत्पन्ननयापेक्षया अव्यपदेशेन सिद्ध्यंतीति नास्त्यल्पबहुत्वं । भूतविषयनयाश्रयणे अनंतरचारित्रपरिग्रहे यथाख्यातचारित्राः सर्वे सिद्ध्यंतीति नास्त्यल्पबहुत्वं । व्यवधाने पंचचारित्रसिद्धाः । अल्पे चतुश्चारित्रसिद्धाः संख्येयगुणाः ।

प्रत्येकबुद्धबोधितबुद्धानुयोगे—अल्पे प्रत्येकबुद्धाः बोधितबुद्धाः संख्येयगुणाः ।

ज्ञानानुयोगे—प्रत्युत्पन्नभावप्रज्ञापनस्य केवलेन सिद्ध्यतीति नास्त्यल्पबहुत्वं । पूर्वभावप्रज्ञापनस्य सर्वस्तोका द्विज्ञानसिद्धाः चतुर्ज्ञानसिद्धाः संख्येयगुणाः । त्रिज्ञानसिद्धाः संख्येयगुणाः । एवं तावदविशेषेण विशेषेण च सर्वस्तोकाः । मतिश्रुतमनःपर्ययज्ञानसिद्धाः मतिश्रुतज्ञानसिद्धाः संख्येयगुणाः । मतिश्रुतावधिमनःपर्ययज्ञानसिद्धाः संख्येयगुणाः । मतिश्रुतावधिज्ञानसिद्धाः संख्येयगुणा इति ।

अवगाहनानुयोगे—सर्वस्तोकाः जघन्यावगाहनसिद्धाः । उत्कृष्टावगाहनसिद्धाः संख्येयगुणाः । एवं मध्यसिद्धाः संख्येयगुणाः ।

अधाधस्ताद्यवमध्यांतरसिद्धाः संख्येयगुणाः । उपरि यवमध्यांतरसिद्धा विशेषाधिकाः ।

संख्यानुयोगे–सर्वस्तोकाः अष्टोत्तरशतसिद्धाः । अष्टोत्तरशतसिद्धादयः आपचाशत्सिद्धेभ्यः अनंतगुणाः एकान्नपंचाशत्सिद्धादयः आपंचविंशतिसिद्धेभ्यः असंख्येयगुणाः । चतुर्विंशतिसिद्धादयः आ एकसिद्धेभ्यः संख्येयगुणाः । एवं निसर्गाधिगमयोरन्यतरजतत्त्वार्थश्रद्धानात्मकं शंकाद्यतिचारविमुक्तं, प्रशमसंवेगानुकंपास्तिक्याभिव्यक्तिलक्षणं विशुद्धं सम्यग्दर्शनं । सम्यग्दर्शनोपलब्धिविशुद्धं च ज्ञानमधिगम्य, निक्षेपप्रमाणनिर्देशसंख्यादिभिरभ्युपायैर्जीवानां पारिणामिकौदयिकौपशमिकक्षायोपशमिकक्षायिकाणां भावानां स्वतत्त्वं विदित्वा चेतनानां भोगसाधनानामुत्पत्तिप्रलयस्वभावावगमात् विरक्तो वितृष्णस्त्रिगुप्तः पंचसमितो दशलक्षणधर्मानुष्ठानात्तत्फलदर्शनाच्च । निर्वाणप्राप्तियतनायामिवर्द्धितश्रद्धासंवेगभावनाविभावितात्मा अनुप्रेक्षाभिः स्थिरीकृतानभिष्वंगः संवृतात्मा निरास्रवत्वाद्व्यपगताभिनवकर्मोपचयः परीषहजयाद्बाह्याभ्यंतरतपोनुष्ठानादनुभवनाच्च । सम्यग्दृष्टिविरताविरतानां च जिनपर्यंतानां परिणामाध्यवसानविशुद्धिस्थानानामसंख्येयगुणोत्कर्षमाप्त्या पूर्वोपचितं कर्म निर्जरयन्सामायिकादीनां च सूक्ष्मसांपरायांतानां संयमविशुद्धिस्थानानामुत्तरोत्तरोपलंभात्पुलाकादीनां च निर्ग्रंथानां संयमानुपालनविशुद्धिस्थानविशेषाणामुत्तरोत्तरप्रतिपत्त्या घटमानोऽत्यंतप्रहीणार्त्तरौद्रध्यानो, धर्म्यध्यानविजयादवाप्तसमाधिबलः, शुक्लध्यानविकल्पयोश्च पृथक्त्वैकत्ववितर्कयोरन्यतरस्मिन् वर्तमानो नानाविधपूर्वोदितर्द्धिविशेषयुक्तः, तत्रानभिष्वक्तचित्तः, पूर्वोदितेन क्रमेण मोहादीक्षयं नीत्वा सर्वज्ञज्ञानलक्ष्मीमनुभूय, ततः शेषकर्मक्षयाद्भावबंधनिर्मुक्तः निर्दग्धपूर्वोपादानेंधनो निरुपादान इवाग्निः, पूर्वोपात्तभववियोगात् हेत्वभावाच्चोत्तरस्याप्रादुर्भावात्सांतसंसारदुःखमतीत्य आत्यंतिकमैकांतिकमनुपमं निरतिशयं **निर्वाणसुखमवाप्नोतीति तत्त्वार्थभावनाफलमेतत्** । उक्तं च—

१ पद्यसमष्टिरियं श्रीमदमृतचंद्रसूरिविरचिततत्त्वार्थसारीयमोक्षतत्त्वप्रकरणस्था प्रकृतानुसारित्वात्प्रक्षिप्तेयं केन न तु ग्रंथकर्तृभिरुद्धृता सांप्रतिकोपलब्धनिर्णीतेतिवृत्तेन तत्त्वार्थराजवार्तिककर्तुस्तत्त्वार्थसारकर्तुः प्राक्कालीनत्वाद्विभाव्यते ।

सम्यक्त्वज्ञानचारित्रसंयुक्तस्यात्मनो भृशं । निरास्रवत्वाच्छिन्नायां नवायां कर्मसंततौ ॥ १ ॥
पूर्वार्जितं क्षपयतो यथोक्तैः क्षयहेतुभिः । संसारबीजं कात्स्न्र्येन मोहनीयं प्रहीयते ॥ २ ॥ युग्मं ।
ततोंतरायज्ञानघ्नदर्शनघ्नान्यनंतरं । प्रहीयंतेऽस्य युगपत्त्रीणि कर्माण्यशेषतः ॥ ३ ॥
गर्भसूच्यां विनष्टायां यथा तालो विनश्यति । तथा कर्मक्षयं याति मोहनीये क्षयं गते ॥ ४ ॥
ततः क्षीणचतुःकर्मा प्राप्तोऽथाख्यातसंयमं । बीजबंधननिर्मुक्तः स्नातकः परमेश्वरः ॥ ५ ॥
शेषकर्मफलापेक्षः शुद्धो बुद्धो निरामयः । सर्वज्ञः सर्वदर्शी च जिनो भवति केवली ॥ ६ ॥
कृत्स्नकर्मक्षयादूर्ध्वं निर्वाणमधिगच्छति । यथा दग्धेंधनो वह्निर्निरुपादानसंततिः ॥ ७ ॥
दग्धे बीजे यथात्यंतं प्रादुर्भवति नांकुरः । कर्मबीजे तथा दग्धे न रोहति भवांकुरः ॥ ८ ॥
तदनंतरमेवोर्ध्वमालोकांतात्स गच्छति । पूर्वप्रयोगासंगत्वबंधच्छेदोर्ध्वगौरवैः ॥ ९ ॥
कुलालचक्रडोलायामिषौ चापि यथेष्यते । पूर्वः प्रयोगात्कर्मेह तथा सिद्धगतिः स्मृता ॥ १० ॥
मृल्लेपसंगनिर्मोक्षाद्यथा दृष्टाप्स्वलाबुनः । कर्मसंगविनिर्मोक्षात्तथा सिद्धगतिः स्मृता ॥ ११ ॥
एरंडस्फुटदेलासु बंधच्छेदाद्यथा गतिः । कर्मबंधनविच्छेदाज्जीवस्यापि तथेष्यते ॥ १२ ॥
ऊर्ध्वगौरवधर्माणो जीवा इति जिनोत्तमैः । अधोगौरवधर्माणः पुद्गला इति चोदितं ॥ १३ ॥
यथाधस्तिर्यगूर्ध्वं च लोष्टवाय्वग्निवीचयः । स्वभावतः प्रवर्तंते तथोर्ध्वगतिरात्मनां ॥ १४ ॥
अतस्तु गतिवैकृत्यं तेषां यदुपलभ्यते । कर्मणः प्रतिघाताच्च प्रयोगाच्च तदिष्यते ॥ १५ ॥
अधस्तिर्यक्तथोर्ध्वं च जीवानां कर्मजा गतिः । ऊर्ध्वमेव स्वभावेन भवति क्षीणकर्मणां ॥ १६ ॥
द्रव्यस्य कर्मणो यद्वदुत्पत्त्यारंभवीचयः । समं तथैव सिद्धस्य गतिर्मोक्षे भवक्षयात् ॥ १७ ॥
उत्पत्तिश्च विनाशश्च प्रकाशतमसोरिह । युगपद्भवतो यद्वत्तद्वन्निर्वाणकर्मणोः ॥ १८ ॥
तन्वी मनोज्ञा सुरभिः पुण्या परमभासुरा । प्राग्भारानामवसुधा लोकमूर्ध्नि व्यवस्थिता ॥ १९ ॥
त्रिलोकतुल्यविष्कंभा सितच्छत्रनिभा शुभा । ऊर्ध्वं तस्याः क्षितेः सिद्धाः लोकांते समवस्थिताः ॥२०
तादात्म्यादुपयुक्तास्ते केवलज्ञानदर्शने । सम्यक्त्वसिद्धतावस्थाः हेत्वभावाच्च निष्क्रियाः ॥ २१ ॥
ततोऽप्यूर्ध्वगतिस्तेषां कस्मान्नास्तीति चेन्मतिः । धर्मास्तिकायस्याभावात्स हि हेतुर्गतेः परः ॥ २२ ॥
संसारविषयातीतं सिद्धानामव्ययं सुखं । अव्याबाधमिति प्रोक्तं परमं परमर्षिभिः ॥ २३ ॥
स्यादेतदशरीरस्य जंतोर्नष्टाष्टकर्मणः । कथं भवति मुक्तस्य सुखमित्युत्तरं शृणु ॥ २४ ॥
लोके चतुर्ष्विहार्थेषु सुखशब्दः प्रयुज्यते । विषये वेदनाभावे विपाके मोक्ष एव च ॥ २५ ॥
सुखो वह्निः सुखो वायुर्विषयेष्विह कथ्यते । दुःखाभावे च पुरुषः सुखितोऽस्मीति भाषते ॥ २६ ॥
पुण्यकर्मविपाकाच्च सुखमिष्टेंद्रियार्थजं । कर्मक्लेशविमोक्षाच्च मोक्षे सुखमनुत्तमं ॥ २७ ॥
सुषुप्तावस्थया तुल्यां केचिदिच्छंति निर्वृतिं । तदयुक्तं क्रियावत्त्वात्सुखातिशयतस्तथा ॥ २८ ॥
श्रमक्लममदव्याधिमदनेभ्यश्च संभवात् । मोहोत्पत्तिविपाकाच्च दर्शनघ्नस्य कर्मणः ॥ २९ ॥
लोके तत्सदृशो ह्यर्थः कृत्स्नेऽप्यन्यो न विद्यते । उपमीयेत तद्येन तस्मान्निरुपमं स्मृतं ॥ ३० ॥
लिंगप्रसिद्धेः प्रामाण्यमनुमानोपमानयोः । अत्यंतं वा प्रसिद्धं च तत्तेनानुपमं स्मृतं ॥ ३१ ॥
प्रत्यक्षं तद्भगवतामर्हतां तैः प्रभाषितं । गृह्यतेऽस्तीत्यतः प्राज्ञैर्न छद्मस्थपरीक्षया ॥ ३२ ॥

इति तत्त्वार्थराजवार्तिकव्याख्यानालंकारे दशमोऽध्यायः समाप्तः ॥ १० ॥

इति श्रीतत्त्वार्थराजवार्तिकं समाप्तं ।

१ एवं तत्त्वपरिज्ञानाद्विरक्तस्यात्मनो भृशमिति क्वचित्पाठांतरं ।

राजवार्तिकस्य शुद्ध्यशुद्धिपत्रं ।

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
उष्णत्वं कुतः	उष्णत्वमिति चेत् उष्णत्वस्योष्णत्वं कुतः ?	४	२४
माभूदिति	अथानवस्था माभूदिति	,,	२५
संबंधेनोष्णत्वं	संबंधे नोष्णत्वं	,,	३२
तत्त्वंभवेन	तत्त्वं भावेन	५	८
तथा समवाय	तथा समवायः	,,	१६
इंद्रियादिव्यपदेशवत्	इंद्रादिव्यपदेशवत्	६	३०
लक्षणभावः	लक्षणाभावः	७	३
छात्रस्य	दात्रस्य	,,	८
पुण्पः	पुण्यः	,,	१४
दृश्यते	दृश्यंते	,,	,,
मोक्षापायः	मोक्षोपायः	८	६
अनुपपपत्तिः	अनुपपत्तिः	,,	२२
भवति	भवत्यधर्मेण	,,	२८
यतः	यतेः	९	५
अनुत्पत्तिन्	अनुत्पत्तिः	,,	१३
विद्या	अविद्या	,,	२२
चत्वारः	चत्वारःस्कंधाः	,,	२६
अभिनंदयाति	अभिनंदयति	,,	३३
दुःखदर्शनं	दुःखेष्वनित्यानात्मकाशुचिदुःखदर्शनं	,,	३८
शरीरेंद्रियनिवृत्तेः	शरीरेंद्रियवृत्त्यादिनिवृत्तेः	१०	२८
उभयादोषोपपत्तेः	उभयथा दोषोपपत्तेः	,,	३३
प्रागननुभूतविशेषात्	प्रागननुभूताविशेषात्	११	१६
तक्षणभेदात्	लक्षणभेदात्	१२	२०
त्रयः।	त्रयः। किंच-	,,	२४
प्रतिवादिनो	न प्रतिवादिनो	,,	२५
अतत्त्वात्	असत्त्वात्	१५	१८
सम्यग्दर्शनादिव	सम्यग्दर्शनादेरिव	१७	९
इति	इति अतोविवक्षितापरिज्ञानान्न सम्यगुक्तं अधिगमाभाव इति	,,	१४
वचनविकल्पापेक्षया	वचनविकल्पापेक्षया संख्येयासंख्येया ज्ञानज्ञेयविकल्पापेक्षया	,,	३३
पर्यायार्थिकप्रधान्यात्	पर्यायार्थिकप्राधान्यात्	१८	१९
अजीवात्	अजीवत्	,,	२५
निर्जीयते	निर्जीयंते	,,	३५
अभावा	अभावो०	१९	५
प्रत्ययोऽपनीतानां	प्रत्ययोपनीतानां	,,	१७
पूर्वोक्तनांऽ	पूर्वोक्तानां	,,	२१
विरोधाऽसत्त्वात्	विरोधोऽसत्त्वात्	२२	२६
शब्दादिना	शब्दाद्विना	२३	२९
निश्शेषातीति	विशेषातीति	,,	३३
योजयित्व्या	योजयितव्या	२५	२८
युक्तागमाभ्यां	युक्त्यागमाभ्यां	२६	२
पितृपुत्रादिसंबंधवत	पितापुत्रादिसंबंधवत्	,,	२५
देवदत्तस्यैकत्वे न	देवदत्तस्यैकत्वेन	,,	२९
धर्मविकल्पप्रतिपतिः	स्वामित्वादिका धर्मविकल्पप्रतिपत्तिः	२७	२१
तैरैव भावाधिकैः	तैरेव भवाधिकैः-	२९	४

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
निर्जरात्मैव वा	निर्जरात्मैव वा स्थिति- जंघन्येनैकसमयः,उ- त्कर्षेण मुहूर्तः,सादिः सपर्यवसाना वा	,,	१२
संख्येयानंतविकल्पं	संख्येयासंख्येयानंतविकल्पं	,,	२०
पृथग्गृहणं	पृथगगृहणं	३१	८
घटक्षेत्रे	घटक्षेत्रं	,,	१३
श्रुते	श्रुतं	३२	३
विशेषात्	विशेषान्	,,	१७
कार्याश्रयान्	कायाश्रयान्	,,	१८
मतेमेतत्	मतमेतत्	३३	२
कारण	करणं	,,	१०
निमित्तत्वा०	निमित्तत्वादंतःकरण निमित्तत्वा०	३५	३
तर्हि !	किं तर्हि !	,,	१०
श्रुत्वावधावणात्	श्रुत्वावधारणात्	,,	१४
अधिगमोपर्यय- थात्वेन	अधिगमोपाययथा त्वेन	,,	१७
प्रमाणव्यस्था कल्पना	प्रमाणव्यवस्थाकल्पना	,,	२८
ज्ञास्वभा०	ज्ञादन्यः	३६	१०
अन्यत्स्यात् ।	अन्यत्स्यात्, अन वस्था स्यात्	,,	१७
अनवस्थास्यात्प्र- काशवदिति	प्रकाशवदिति	,,	१८
संभवति	संभवति चक्षुर्मनसोः प्राप्यकारित्वाभावात्	३७	६
वितर्कः	अर्पणा वितर्कः	,,	३१
सिक्तसेनमिति	सिद्धसेनमिति	४१	७
अग्न्युत्ष्णाव	अग्न्युष्णवत्	,,	३६
निमित्तत्वादिति	निमित्तत्वात्	४२	६

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
करणस्य वाभिधे- यार्थत्वादथवा	इतिकरणस्य वाभिधेयार्थत्वात्	,,	,,
इति	अथवा—इति	,,	,,
द्रव्यता	द्रवता	४३	१४
नत्ववग्रहः ।	नत्ववग्रहः, निर्णयदर्शनात्	,,	२४
निर्णयदर्शनादी- हायां	ईहायां	,,	२५
कस्मात् विशेषात्	कस्मादविशेषात्	४४	२२
नत्वनेकेति	नन्वनेकेति	,,	३१
यस्मैकेति	यस्यैकेति	,,	३४
संशयोने	त्संशयो न	,,	३८
प्रतिज्ञानिः	प्रतिज्ञाहानिः	४५	१०
सतेरग्रहणात्	सेतरग्रहणात्	,,	१७
शब्दमगृह्णाति	शब्दमवगृह्णाति	,,	२८
शाखाचंद्रमसाम	शाखाचंद्रमसाव		
भिन्नेति	भिन्नोति	४८	१८
व्यंजनावगृह	व्यंजनावगृहे	४९	२४
शातिभद्रेति	शालिभद्रेति	५१	२७
प्रपिपत्तिः	प्रतिपत्तिः	५४	१२
शब्दमपि	शाब्दमपि	,,	१३
प्रकृतिपुरुष	प्रकृतपुरुष	,,	१४
अमयेषु	समयेषु	५५	२८
तावदसंख्यात- भेदेपु	तावदसंख्यातभेदेषु	,,	,,
देशावधिकः	प्रदेशावधिकः	५७	२९
विपुलमतेर्द्रव्येति	विपुलमतेर्द्रव्यं	५९	२१
द्रव्यपर्यायेति	द्रव्येति	६०	१५
कवलज्ञानं	केवलज्ञानं क्षायिकं	६३	५
क्षीयिकत्वात्	क्षायिकत्वात्	,,	२०
विभंगज्ञामिति	विभंगज्ञानमिति	६४	१
यथा	तथा	,,	२

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
अविशेषाषात्	अविशेषात्		
ननु	न तु	६५	१३
नयप्रकाशितोऽर्थेति	नयप्रकाशितार्थेति	,,	२१
। कार्यं	कार्यं ।	,,	२८
कंचित्	कश्चित्	,,	३६
द्रव्यत्वाविरोधात्	तदव्यतिरेकात्ते नैकत्वेन संग्रहः जीवमिति चोक्ते जीवाजीवतद्भेदप्रभेदानां द्रव्यत्वाविरोधात्	६६	१५
तत्वादिकार्यं	तत्वादिषु पटादि कार्यं	६८	३१
निबंधाः । दीनि	निबंधादीनि	६९	२
स्ते	ते	,,	७
स्तथा	तथा	,,	१३
स्मात्	तस्मात्	७०	९
दिनकरोतेजो०	दिनकरतेजो०	७५	३१
क्षगात्	क्षयात्, उपशमात्	७६	३४
पर्यायवावमपि	पर्यायवत्त्वमपि	७८	१६
पारिणामिकश्च	पारिणामिकत्वमिति औदयिक एकविंशतिभेदः पारिणामिकश्च	,,	३५
सान्निपातिको	सान्निपातिको भाव उक्तः, कस्य वा मिश्र शब्देनाक्षेपः ?सान्निपातिकोभावो	७९	२२
लक्ष्यलक्षणयोर्व्य तिरेकादित	लक्ष्यलक्षणयोर व्यतिरेकादिति	८३	७
भवति	भवति अत्राह	८७	२७
अत्राह तदभिसंबंधे	तदभिसंबंधे	,,	२८

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
अत्र सत्वप्रसंगात	अत्रसत्वप्रसंगात्	८८	१३
बाह्यभयेति	बाह्योभयेति	,,	१५
निर्वृर्त्यते ।	निर्वृत्यते	९०	२६
उपदिश्यते सा०	उपदिश्यते	,,	,,
द्वेधा	सा द्वेधा	,,	२७
प्रथमत्वं	पृथक्त्वं	९३	२१
संज्ञानां	संज्ञानाम	९५	८
निवृत्ति	निर्वृत्ति	,,	२२
तादार्थ्ये	तादर्थ्ये	,,	२३
पुद्गलाधानेति	पुद्गलादानेति	,,	२६
श्रेणिरानुपूर्व्यणानु श्रेणिरिति	श्रेणिरानुपूर्व्ये णानुश्रेणि, इति	९६	४
क्रियांतरे	क्रियांतर	,,	८
विग्रहोऽस्याऽविग्रहेति	विग्रहोऽस्या अविग्रहेति	,,	१६
मिश्राः	मिश्राः	९९	१
प्रकृतापेक्षार्थं	प्रकृतापेक्षार्थं	९९	२१
ष सहास्राणि	षट् सहस्राणि	१००	३७
गर्भ एवेति	गर्भ इति, अथ नियमार्थे आरंभे सति जरायुजाण्डजपोतानां गर्भ एवेति	१०१	२३
शरीरंनामकर्मेति	शरीरनामकर्मेति	१०२	११
अह्रियते	आह्रियते	,,	२३
मूल्यतरेण	मूल्यांतरेण	१०५	६
भाज्यानि	स्यान्मतं भाज्यानि	१०६	९
सप्तविध	सप्तविधकाययोगस्वामिप्ररूपणायामौदारिककाययोगः औदारिकमिश्र०	१०८	२०
अष्टपदेति	अष्टापदेति	,,	२७
तपोवलानां	प्रकृष्टतपोवलानां	,,	,,
प्रकर्ष	प्रकर्षापकर्ष	,,	३०

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
बद्धः	बद्धाः	१०९	२१
त्वशरीर	स्वशरीर	,,	३८
इंद्रियसंबंधप्रति	इंद्रिसंबंध प्रति	११०	४
उत्पन्नवेदनयोः	उत्पन्नानुत्पन्न-वेदनयोः	१११	२९
कृते	अधिकृते	११२	३
ज्योती-रसांजन-मूलकांक	ज्योतीरस-अंजन-मूलिका-अंक	,,	१७
यक्षराक्षस	यक्ष	११३	६
यदेकं	तदेकं	११४	२
उभ्रांत	विभ्रांत	,,	११
संस्तन	ततकसंस्तनक	,,	१२
एकांत	एकान्त	,,	१९
त्र्यशीतिर्नरकशत-सहस्राणि	त्र्यशीतिर्नरकशत सहस्राणि नवतिसहस्राधिकानि त्रीणि च शतानि चत्वारिंशानि एताबुभावपि राशी सपिंडितौ चतुरशीति नरकशतसहस्राणि	,,	३५
तेप हि जघान्य	तेऽपि हि जघन्य	११७	५
नरके सहचरिता	नरकसहचरिता	,,	२९
अजघन्योत्कृष्टा	जघन्योत्कृष्टा	११८	१८
सम्यग्दृष्ट्यः	सम्यग्दृष्टयः	,,	३३
सपरिवारस्या धारण	सपरिवारस्यासाधारण	११९	१५
वीप्साभ्यां वृत्ति	वीप्साभ्यावृत्ति	,,	३२
द्विदश	द्विर्दश	,,	३४
परिक्षेत्री	परिक्षेप्त्री	१२०	१३
द्विपंचाशत्	षट्पंचाशत्	,,	१८
आख्याते	आख्यायते	,,	२७
कासो	कासौ ?	,,	३१

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
षट्क्रोश	सक्रोश	१२१	९
विषध	निषध	१२२	८
अत्र	तत्र	,,	१४
सिता	सीता	,,	३०
उदक्प्राग्	उदगवाग्	,,	३३
पंच	पंचविंशति	१२४	११
मध्यभागे	मध्यभागे विजयार्धनामा रजतगिरिर्भरत	,,	२६
महापुरी	महापुरी विजयापुरी	१२५	१६
नवति	नव	,,	२६
त्रिखंड त्रिश्रेणिः	त्रिकांडः	,,	२९
भूमिजलात्	भूमितलात्	१२६	२२
उदगवाग् विस्तीर्णा	उदगवागायता प्राक्प्रत्यग्विस्तीर्णाः	१२७	११
अरिरिक्तकंबला	अतिरक्तकंबला	,,	,,
हिमन	हिमवन्	१२८	२२
रक्तावली	रक्तावती	१३०	१०
पंचाशत्	पंचदश	१३१	११
मागधातीर्थेन	मागधतीर्थेन	१३३	६
सिंधूग्रहणं	गंगासिंधूग्रहणं	१३५	५
नीलांत भरता-दिभिः	नीलांता भरतादिभिः	,,	१८
व्यवस्थितौ आधिके	व्यवस्थितावाधिके	,,	३१
तात्स्थ्यात्तच्छब्द्यं	तात्स्थ्यात्ताच्छब्द्यं	,,	३२
हैमवतभवः	हैमवते भवाः	१३६	२३
षाड्विंशत्	षट्त्रिंशत्	१३८	१५
चत्वारिंशानि	द्वाचत्वारिंशानि	१३९	२
चत्वारि शतानि	चत्वारि शतानि द्वाचत्वारिंशानि	,,	३५
प्रतीच्यां नंदा	प्रतीच्यामानंदा	१४१	९

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
पाणिपुटविक्षिप्तं	पाणिपुटनिक्षिप्तं	१४५	४
।विदिक्षु	विदिक्षु।	,,	२०
अंतरेषु	अंतरेषु।	,,	,,
शिखिरिण- उभयारंतयोः	शिखिरिण- उभयोरंतयोः	,,	२१
प्रतिशलाकाकुशले परिपूर्णे परिपूर्ण पूर्णइति	शलाकाकुशूले परिपूर्णे पूर्णे इति प्रति- शलाकाकुशले	१४७	६
शलाकाकुशले	महाशलाकाकुशले	,,	,,
मध्यमजघन्यो	मध्यममजघन्यो	,,	८
मध्यमजघन्यो	मध्यममजघन्यो	,,	१८
मध्यमजघन्यो	मध्यममजघन्यो	,,	२४
मध्यमजघन्यो	मध्यममजघन्यो	,,	२६
मध्यमजघन्यो	मध्यममजघन्यो	,,	२९
पूर्णयुद्धारपल्यं	पूर्णमन्द्धारपल्यं	१४८	२३
ग्रहणयोगादिंद्राः	ग्रहणयोगादिंद- तातिद्राः	१५१	५
स्पर्श	स्पर्श	१५२	३०
एवं	अत एवं	१५३	१४
सात्पुरुषातिशय-	सत्पुरुषातिकाय-	१५५	१३
स्वरूप	प्रतिरूप	,,	,,
पूर्वदक्षिणोत्तरान्	पूर्वदक्षिणोत्तरा- परान्	१५६	१६
देवी	देवीरूप	,,	१८
चतुर्देवीरूप	चतुर्देवीरूपसहस्र	,,	२२
साहचर्यादिंद्राभि- धानं	साहचर्याद्विंद्राभि- धानं	१६०	७
मारुतज्ञ-द्वीश	मारुत-ऋद्धीश	१६१	११
मध्यप्रकार	मध्यप्राकार	,,	१७
अष्टसागरोप मायूंषि	अष्टसागरोपमायूंषि. चंद्रा मध्यपरिषत् षट्देवसहस्राणि देशो नाष्टसागरोपमायूंषि जतुन्याद्या अष्टौ देवस- हस्राणि अष्ट सागरोपमायूंषि	१६४-८	
ऽसंख्येययगुणाः	तेतजोलेश्या असंख्येयगुणाः	१७२	३१
इति	इति तत्र	१७३	४
चत्वार दशविधा	द्वादशविधाः	,,	१४
नवोत्तराणि	नवोत्तराणि सप्ता- धिकानि अरुणाश्च तावंत एव गर्द तोया नवसहस्राणि	१७४	१०
मारक	नारक	,,	२६
सागरोपमेऽ धिके	सागरोपमे अधिके	१७६	१६
निमानेषु	विमानेषु	१७७	१४
नाशसंभवान्	नाशासंभवात्	१८०	२४
सर्वप्रकारेण नित्यत्वेन	सर्वप्रकारेणानित्य- त्वेन	१८२	२
इत्येव चेत् द्रव्य	इत्येवं चेतरद्रव्य	,,	१३
अम्मत्प्रत्यक्षत्वं	अस्मत्प्रत्यक्षत्वं, तथा अतीताना गतकालान्यदेशसं बंधित्वेनाप्यस्मत्प्रत्यक्षत्वं	,,	२१
सामानाधिकरण-	समानाधिकरण	१८६	२८
सिद्धं ।	सिद्धं नाथः काय- ग्रहणेन	१८८	३६
नाथःकायग्रणेन	प्रदेशसंख्या		
प्रदेशसंख्या		१८९	१
मासं	भासं	१९०	७
तत्परिच्छेदत्वात्	तत्परिच्छेद्यत्वात्	,,	३४
स्वपरप्रत्योत्पाद	स्वपरप्रत्ययोत्पाद	१९१	३१
द्रव्यत्वस०	द्रव्यत्वसम	१९२	१७
वायात्	वायात्		
द्रव्यत्वस्यासम	द्रव्यत्वस्य सम	,,	३१
वायिकारणं	वायिकारणं		

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
नतु	ननु	,,	३२
सिद्धे	सिद्ध	,,	३५
त्वत्तोत्पत्ते:	त्वोत्पते:	१९३	१८
तद्व्यंजकस्य	तद्व्यंजकस्य	,,	३२
क्रियते ॥	क्रियते, धर्मादीन्येव द्रव्याणि नान्यानि	१९४	१४
धर्मादीन्येव द्रव्याणि नान्यानीति	पुल्लिंगप्रसंग: पुल्लिंग०	,,	१५
इत्येवं	इत्येवं च सति	१९६	२२
लब्धिरिति	लब्धिवति	,,	,,
वेविध्य	वैविध्य	,,	२५
इयत्वान्ना तिवर्तते	इयत्वं नातिवर्तते	१९७	४
आकाशादेक-मिति	आकाशादेकैक-मिति	१९८	२८
दृष्टांतोऽसिद्धः।	दृष्टांतोऽसिद्धः, द्रव्यमेव तथाऽपरिणतं क्रियाहेतुरिति	२००	१६
द्रव्यमेव तथाऽपरिणतं क्रियाहेतु: धर्मास्तिकायवदिति	धर्मास्तिकायवदिति	,,	१७
धर्मास्तिकायाख्ये	धर्मास्तिकायाख्यं	,,	२१
च सत्त्व	त्वसत्त्वं	,,	२२
अभ्युपगम्येरन्	नाभ्युपगम्येरन्	,,	३१
तामतिक्रांता	तमतिक्रांता	२०१	३४
इहोत्पन्नकर्मसु आश्रयं	इहोत्पन्नं कर्म स्वाश्रयं	२०३	२९
इत्यनंतवत्त्वाभाव	इत्यंतवत्त्वाभाव:	२०४	२५
एकप्रदेश	एकस्य प्रदेश०	२०५	१३
तस्य लोकत्वं	तस्यालोकत्वं	२०६	३६
प्रदेश अनंता	प्रदेशे, अनंता	२०८	२
असंख्येदभागादय:	असंख्येयभागादय:	,,	१६
लक्षभेद:	लक्षणभेद:	२१०	२१
वृत्तिभाव:	वृत्त्यभाव:	२११	३
समानाधिकरणक्षणा	समानाधिकरणलक्षणा	,,	८
तत:श्रुते	तप:श्रुते	,,	२२
गतिस्थिती	यथाकाशोपग्रहाद्गतिस्थिती	२१२	२२
अन्योन्यप्रदेश	अन्योन्यप्रवेश	२१६	१५
अज्ञातत्वात्	अजातत्वात्	,,	२५
शब्दस्य	चशब्दस्य	२१७	१९
वाग्गृहण	वागग्रहण	,,	३२
उत्पतद्भि:	उत्तरद्भि:	२१८	१
प्रत्यक्षत्वात्	अप्रत्यक्षत्वात्	,,	१३
मूर्तिग्रहण	मूर्तिमदग्रहण	,,	३२
अभ्युपयम्यते इति	अभ्युपगम्यते इति न	२२०	२०
आत्मैव नान्योस्य	नान्योऽस्य	,,	२८
इंद्रियपरिणामात्	इंद्रियपरिणामादात्मैव	,,	२९
नानूभूतस्य	नान्यानुभूतस्य	२२१	४
चेत्	न चेत्	,,	७
प्रधानत्वात्	प्रधानात्	,,	१४
स्यादवस्थित	स्यादनवस्थित	२२५	२७
वननामायु:	वनस्पतिनामायु:	,,	२८
बीजो	जीवो	२२६	१३
स्थित्यग्रहणं	स्थितिग्रहणं	२२७	२२
स्थितेरग्रहणं	स्थितेर्ग्रहणं	,,	२३
शोडशा	षोडशा	,,	३२
क्रियाकृत०	सत्यं क्रियाकृत:	२२८	३१
दृष्ट:। नच, ध्वनेर्मूर्ति:	दृष्टा:। नच ध्वनिमूर्ति:	२३१	३५

अशुद्धय:	शुद्धय:	पृ. सं.	पं. सं.
कालांतरस्थायि--कालांतरस्थायी ।			
प्रतिस०	प्रतिस०	२३२	७
लिङ:	लिप:	,,	२९
चतु:	चतुश्चतु:	,,	३०
योगाभावलक्षणेन	योगभावलक्षणेन	२३३	६
एवकारणं	एवकारकरणं	२३५	३५
का एव वस्थस्य	काण्ववस्थस्य	२३६	६
अनंतनंत	अनंतानंत	,,	१०
स्पर्शादिगुणस्य	आहारस्य स्पर्शादिगुणस्य	२३७	९
किं कारणं ?	तत्र किं कारणं ?	,,	१९
ज्ञात्यर्थ:	जात्यर्थ:	,,	२१
च	न	,,	३०
सद्द्रव्यलक्षणं	सद्द्रव्यलक्षणं	२३८	४
पक्षस्यापि	परपक्षस्यापि	२३९	१३
ननु	नतु	,,	३६
अव्यभिचारिणि	अव्यभिचारिणी	२४०	२
तद्दिपरीतं	तद्विपरीत	,,	७
जघन्यमिव	जघनमिव	२४१	२
उवेदि	हवेदि	२४२	८
जहण्णवज्जो	जहण्णबज्जो	,,	,,
बंधेऽधिको	बंधेऽधिकौ	,,	१५
तुल्या: संख्येया:	तुल्याऽसंख्येया:	२४४	
ण्य:	घ:	,,	९
विशेषेण	विशेषणं	,,	१२
तद्व्यतिरेकात्	तदव्यतिरेकात्	,,	२६
मन:कर्म	मनस्कर्म	२४५	८
वाङ्मनस: प्रसंग:	वाङ्मनस-प्रसंग:	,,	११
तत्र	तत्र	,,	,,
युजे	युजे:	२४६	२२
आहितत्रैविध्या:	आहित्रैविध्या	,,	२९

अशुद्धय:	शुद्धय:	पृ. सं.	पं. सं.
सलिलवाह्यद्वारे	सलिलवाहिद्वारं	२४७	१२
योग्यप्रणा	योगप्रणालिकया	२४७	१५
निकया		,,	१३
समांतात्	समंतात्	,,	१४
पुरुष	परुष	,,	२१
कारणाद्वा	कारणाद्वानंत	,,	२६
कनकमयस्यास्य	कनकमयस्यायसस्य चा	,,	३६
मोदु	ओदु	२४८	१०
विपरीदे दु	विपरीदेण	,,	११
विसोधिए	विसोही	,,	१७
पगदीणं	पगडीणं	,,	१८
समांतानु	समंतानु	२५०	४
विषये	विशेष	,,	२९
तत्स्पृशत्यादय	सत्यं स्पृशत्यादय	,,	७
प्रभावा:	प्रभवा:	,,	३०
प्रायिकी	प्रात्ययिकी	,,	३३
सेवमानो वा	सेवमानोऽसेवमानोवा	२५१	५
कुर्वन्नकुर्वन्न वा	कुर्वन्नकुर्वन्वा	,,	७
स्थान	स्थाने	,,	१३
पृथग्ग्रहणं	पृथगग्रहणं	२५२	१२
हिंसाधर्म इति न सिध्यंति ?	हिंसाऽधर्म इति न सिध्यति न ?	२५५	१४
असति मेघे च वृष्टिरित्युक्ते सतिमेघेवृष्टिरित्युक्ते	असति मेघे न वृष्टिरित्युक्ते सति मेघे वृष्टि:		
सति मेघे वृष्टि:		,,	,,
नानुष्ठानं	नाननुष्ठानं	२५६	१२
वस्तु	वस्तु	,,	२६
तदसादन	तत्साधन	,,	२७
भोगनिरोध:	भोगोपभोगनिरोध:	,,	२९

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
कुतः विशेषात्	कुतः॥अविशेषात्	२६३	८
अहित	आहित	,,	१४
दीन	हीनं	,,	१५
द्वो पाको	द्वौ पाकौ	२७०	१
अंतर्भावः।	अंतर्भावः सत्यादिषु च	,,	१२
सत्यादिषु तत्मपंचा	तत्प्रपंचा	,,	१३
अभिधात	अभिघात	२७१	१२
सद्धर्म	**सधर्म**	**२७२**	**२**
नाशो०	नासो	,,	२४
माध्यस्थानि च	माध्यस्थ्यानि च	२७३	२२
विनयेषु	विनेयेषु	,,	,,
सामान्येन	सामान्येन न	२७४	३७
दुःखो०	तद्दुःखो	२७५	१३
असदविधानं	**असदभिधानं**	**२७६**	**१९**
अनेन	अनेन,अभिधीयते	,,	२६
दाराद्य	द्वाराद्य	२७७	२३
संगः	ममेति संकल्पः	२७८	२२
वाच्यं।	वाच्यं-न ब्रवीति	२८०	८
नब्रवीति विकल्पः	विकल्पः	,,	९
वृतिकारणसाकल्यात्	वृतिकारणासाकल्यात्	,,	३१
नार्थदंड	**नर्थदंड**	**२८१**	**१५**
ज्ञानादीनां	ग्रामादीनां	,,	२१
शयनाशन	शयनासन	२८२	६
विक्रयकृते	विक्रये कृते	२८३	८
परिपालनादसंयतभावनस्यापि	परिपालनदेशसंयतभावस्यापि	,,	२६
नाभिसंहित०	नानभिसंहित०	२८५	१
सम्यग्दर्शन	सम्यग्दर्शन	२८६	३
सम्यग्दर्शस्य	सम्यग्दर्शनस्य	,,	९

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
इत्यवष्टा	इत्यष्टा	,,	१०
कालादिषु	कीलादिषु	,,	३२
तेन	न	,,	३५
परपुरुषमगमन	परपुरुषगमन	२८८	७
आगारं	अगारं	,,	२३
मनष्कर्म	मनस्कर्म	२९०	१८
विद्यादि	विध्यादि	२९३	३
विद्यादि	विध्यादि	,,	५
विद्यादि	विध्यादि	,,	१२
विद्यादि	विध्यादि	,,	१३
विद्यादि	विध्यादि	,,	१८
विद्यादि	विध्यादि	,,	२०
संज्वलन	प्रत्याख्यानसंज्वलन	२९४	१२
तस्यागमकत्वासिद्धेः	तस्यागमत्वासिद्धे	२९५	२
यथाद्यपुण्य अद्य	यथाद्यःपुण्यःआद्यः	,,	४
कामान्नवाप्नोति	कामानवाप्नोति	,,	५
बधो वध	वधोऽवध	,,	६
पशुवधवत्	पशुवधवद्विपर्ययोवा	,,	३३
विपर्ययोवा ताद र्थ्यात्	तादर्थ्यात्	,,	१४
निपातयतः	निपातयंतः	२९६	८
यनैसर्गिकं	यन्नैसर्गिकं	,,	३४
विधि	विधः	,,	३३
निरजेष्म	निरजैष्म	२९७	१४
इमे	इमं	,,	१५
स्थिवि	स्थिति	२९९	९
भेदा	भेदः	,,	१९
मत्यादीनाम विशेष	मत्यादीनां विशेष	३००	५
स्वभावविशेषात्	स्वभावाविशेषात्	,,	६
पंच	पंच च	३०१	२१

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
अर्थांतराभावाच्च	अर्थांतरभावाच्च	३०२	२४
गृद्धयश्च	गृद्धयश्च	,,	३४
सा,निद्रा। यतेर्वा	सा निद्रायतेर्वा	३०३	३
स्वन्यमानमपि	स्वन्यमानमपि	३०४	६
बिरति	विरतिं	३०५	९
अवृण्वंत:	आवृण्वंत:,	,,	२०
शरीराकार विनाश:	शरीराकाराविनाश	३०७	२८
विहायात्काशं	विहाय आकाशं	३०८	१४
तच्छुभगनाम	तत्सुभगनाम	,,	३३
निर्वर्वनं	निर्वर्तनं	३०९	१
भाषापर्याप्तिनाम	प्राणापानपर्याप्ति-नाम भाषापर्याप्ति नाम	,,	१२
उक्ता:	उक्ता	३१०	१४
पंचेंद्रियपर्याप्तक	पंचेंद्रियापर्याप्तक	३११	२७
पर्याप्तसंज्ञिनां	पर्याप्तकासंज्ञिनां	,,	२९
असंज्ञिपचेंद्रिया पर्याप्तकस्य	असंज्ञिपचेंद्रियपर्या-प्तिकस्य सागरोपम सहस्रभागौ द्वौ अप र्याप्तसंज्ञिन:	३१२	६
त्रयस्त्रिंशत् सा गोपमा०	त्रयस्त्रिंशत्साग रोपमा०	,,	९
औदयिकभावा दीरितस्य	औदयिकभावो दीरितस्य	३१३	१०
तंत्रत्वत्	तंत्रत्वात्	,,	२५
सतत्रिंशत्	सप्तत्रिंशत्	३१५	७
प्रत्येत्यशरीर	प्रत्येकशरीर	,,	१०
नोपयात्	नोपेयात्	,,	२६
यस्मात्तन्निरोधेसति तत्पूर्वककर्मादा नाभाव: संवर: कारणाभावात् कार्याभाव:	यस्मात् तन्निरोधे सति त-त्पूर्वककर्मादाना ऽभाव:संवर:॥२॥का रणाभावात्कार्याभाव:	३१६ ,,	३ ४

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
तस्त	स्तत	३१७	१५
विद्धयत्र प्रकृती	प्रशस्तविशुद्धयत्रप्रशस्त प्रकृती:	,,	२१
तथा	तस्त	३१८	४
द्विश्रण्णौ	द्विश्रेण्यौ	,,	१७
मिथ्यात्वं नपुंसक	मिथ्यात्वनपुंसक	,,	३२
शोकस्थिर	शोकास्थिर	३१९	११
अनुपूर्वादिक्षे:	अनुप्रपूर्वादिक्षे:	,,	३३
संवर इति संवर इति	संवर इति	३२०	१२
ख्यापनार्थन्वात्	ख्यापनार्थत्वात्, तपोनिर्जराकारण मपि भवतीति	,,	२६
तपो निर्जरा कारणमपि भव तीतिप्राधान्य०	प्राधान्य०	,,	२७
पलालस्य	पलालसस्य	,,	३३
कोषादि	कोशादि	३२३	७
लाभालयाभो	लाभालाभयो:	३२४	२८
शुक्रो	शुक्रो	,,	३७
षोढ़व्यं	सोढ़व्यं	३२६	६
दुष्कर्म:	दुष्कर्म	,,	९
अन्यत्या	अन्यत्वा	,,	३४
पर्यात्मना	पर्यायात्मना	,,	३८
संचिता	संचितार्था	३२७	११
असंसार:प्राप्त्य भावाच्च	असंसारप्राप्त्य-भावाच्च	,,	२०
नो संसार	नो संसार:,	,,	२४
वालिका	वालुका	३२९	१९
तिर्यग्गता	तिर्यग्गतौ	३३१	४
भावलिंगापक्षेया	भावलिंगपेक्षया न द्रव्यलिंगापेक्षया	३३१	९

अशुद्धय:	शुद्धय:	पृ. सं.	पं. सं.
सत्यमनोयोगेऽ सत्यमृषामनोयो च संज्ञिमिथ्या दृष्टय: क्षीणक षायवीतरागछ द्मस्थांता:	सत्यमनोयोगेऽसत्य मृषामनोयोगे च संज्ञि मिथ्यादृष्टय: सयोग केवल्यंता: । मृषा मनोयोगे सत्यमृषा मनोयोगे च संज्ञि मिथ्यादृष्टय: क्षीण कषायवीतरागछद्म स्थांता: ।	,,	१६
सयाग	सयोग	,,	१७
नित्यत्वाद्यनु प्रेक्षा	अनित्यत्वाद्यनुप्रेक्षा	३३२	१८
परिषोढव्या:	परिसोढव्या:	३३३	२
परीषहाऽमहत्वा दन्वर्थसंज्ञा	परीषहा इति महत्वा दन्वर्थसंज्ञा	,,	३
मार्गप्रतिपत्ति	मार्गसंप्रतिप्राप्ति	,,	७
परिषोढव्या:	परिसोढव्या:	,,	११
सोढ इति षत्वा प्रतिषेध:	सोढ इति षत्व प्रतिषेध:	,,	१२
दीर्घा हे ति विषादं	दीर्घाहतिविषादं	,,	२३
वचनमेका	वचनमैका	,,	३३
परकीयमेत्र	परकीयमिव	३३४	६
प्रादुष्यंती	प्रादुष्यर्ती	,,	३३
निमित्तादर श्रोत्रस्य	निवृत्तादरश्रोत्रस्य	३३५	८
संसारर्णय	संसारार्णव	,,	८
मित्येव	मित्येवं	,,	१३
पुरुष	परुष	,,	१५
मनुस्मरत:	मननुस्मरत:	,,	२७
संकल्पाभावो धारणम्	संकल्पाभावो मल धारणम्	३३६	२५
सिध्मकलूदद्रूदी र्णक्मयस्य	सिध्मकच्छूदद्रूदी र्णकायस्य	,,	२६
निराकारस्य	निकारस्य	,,	२७
पुरस्कार	पुरस्कार	,,	३६
तन्मात्रत्वात्	सन्मात्रत्वात्	३३७	३६
वादरसंपरया	वादरसांपराय	३३८	२४
यथा	तथा	३३९	२३
तन्न प्रमाणं	तन्न: प्रमाणं	३४०	८
तत्रतस्य	तत्र यतस्य	,,	३३
स्वभावावाम्था	स्वभावावस्था	३४१	२१
हेतित्वेवं प्रकार	हेत्वेवंप्रकार	,,	२६
दृष्टप्रयोगे इति	दृष्टप्रयोग इति	,,	२७
रत्नगुणा:	रनंतगुणा:	,,	३२
औदन:	ओदन:	३४२	९
मौदर्य	मोदर्यं	,,	१०
रसपरित्याग	रसवत्परित्याग	,,	१५
पृथङ् निर्देश:	पृथगनिर्देश:	,,	२३
विविक्तिषु	विविक्तेषु	,,	३३
शरीरखेद:	शरीरपरिखेद:	३४३	१
सकिमर्थं	सकिमर्थ:	,,	२
प्रायश्चित	प्रायश्चित्तं	,,	२१
द्वंद्व-अल्पाच्त रमिति	शाब्दान्न्यासात् द्वंद्वे सुरल्पाचतरमिति	,,	३२
तपश्च्छेद	तपश्छेद	३४४	४
प्रसादनै:शल्या	प्रसादनै:शल्या	,,	७
नै:शल्यानव स्थावृत्ति:	नै:शल्यमनववस्था वृत्ति:	,,	८
भूयसामन्यास:	भूयसामुपन्यास:	३४७	३
धर्मोपदेश:	धर्मोपदेशा:	,,	६
उत्तमसंहननं ।	उत्तमसंहनं तस्य उत्तमसंहननस्य ।	३४८	१८
तस्म उत्तम संहननस्यैक शब्द: संख्या पदं ॥२॥	एकशब्द: संख्या पदं ॥२॥		

अशुद्धयः	शुद्धयः	पृ. सं.	पं. सं.
बाग्रमुखं	वाग्रं मुखं	,,	२१
व्याक्षेपण	व्याक्षेपेण	३४८	२९
काल विशेष	कालविशेष	३४९	७
चितानिरोध	चिंतानिरोध	,,	१४
वृत्तिविज्ञाना र्थत्वात्	वृत्तिविज्ञापनार्थत्वात्	,,	२९
निग्रह सति	निग्रहे सति	३५०	४
एर्यया	विपर्यया	३५१	१२
आर्तध्यान मवगंतव्यँ	आर्तध्यानमवगंतव्य मंगविक्षेपशोकाक्रंद नाश्रुपाताभिव्यक्तं तृतीयं	३५१	१९
संयतासंयता: संयता: प्रमत्त संयता:	संयतासंयता:प्रमत्त संयता:	३५१	३१
न	नीचोन्नतशैल	३५२	३०
नोर्ध्वं	नोर्ध्वं	३५२	६
पर्याप्तिकाशुभगा	पर्याप्तकसुभग	,,	२३
मर्ध	धर्म	३५४	१५
धर्मध्यानं	धर्म्यध्यानं	,,	२०
उभेऽपि	उभे अपि	३५५	२१
रम्यते	रभ्येते	,,	२१
भाभाष्यमानो	बाभास्यमानो	३५६	२७
निष्टापक	निष्ठापक	३५७	२४
विप्रयुक्त	विप्रमुक्त	,,	२६
प्रणवा	प्रवणा	३५८	४
स्वरूपे	सरूपे	,,	२७
तसो लक्षणत्वा०	तसोऽलक्षणत्वा०	३५८	३३
परिस्पंदवतोऽपि	परिस्यंदवतोऽपि	३५९	३२
किमर्थो लब्ध्य र्थमिति	किमर्थं लब्ध्वर्थमिति	३६०	१३
गाहनशक्ति युक्तिपु ?	गाहनशक्तियुक्तेषु मुक्तेपु ।	३६३	१२
तत्क्षयेन	तत्क्षये न	३६४	४
मुक्तलेपा	मृत्तिकालेपा	,,	२९
सिद्धिक्षेत्रे कर्म भूमिषु वा	०	३६५	२९
सुखमदु:खमाया	सुषमदु:षमाया	,,	३५
नयवशान्न	नयवशाचेन	३६६	११

तत्त्वार्थराजवार्तिकस्य लक्षणात्मकशब्दाना मनुक्रमः ।

इति कोषसूची ।

संस्कृत, प्राकृत, तथा संस्कृतटीका सहित प्राचीन जैनग्रंथ।

प्रत्येक जगहके मंदिरजीके भंडारमें पुस्तकालयों और पाठशालाओंमें अवश्यही इन ग्रंथोंकी एक एक प्रति मंगाकर विराजमान करनी चाहिये।

		कीमत
१-२	आप्तपरीक्षा तथा पत्रपरीक्षा सटीक स्याद्वादविद्यापति विद्यानंदस्वामि रचित्र	१)
३	समयप्राभृत—तात्पर्यवृत्ति और आत्मख्याति दो टीकाओं सहित कुंदकुंदाचार्य रचित्र	५)
४	तत्त्वार्थराजवार्तिक—श्रीअकलंकदेव रचित	९)
५	जैनेंद्रप्रक्रिया—गुणनंदि कृत	१॥)
६-७	आप्तमीमांसा—वसुनंदिकृत टीका तथा भाष्यसहित	२)
८	शब्दार्णवचंद्रिका—जैनेंद्र व्याकरण टीकासहित	५)
९	चिंतामणि व्याकरण—शाकटायनव्याकरणकी टीका प्रथमखंड आचार्य यक्षवर्म विरचित	२)
१०	शाकटायनधातुपाठ—शाकटायनरचित	।≈)

ये सब ग्रंथ जुदे २ लेनेसे २६॥।≈) के होते हैं परंतु सबके सब एक साथ लेनेसे १४) में भेज देंगे डांकखर्च जुदा लगेगा और जो कोई दानी महाशय पुस्तकालय पाठशालादिमें दान करनेकेलिये लेंगे तो हम १००) में प्रत्येक ग्रंथकी १० दश प्रति भेज देंगे, राह खर्च जुदा लगेगा।

इनके अतिरिक्त निम्नलिखित भाषा ग्रंथ भी मिलते हैं।

१	धर्मरत्नोद्योत	१)
२	धर्मप्रश्नोत्तर	२)
३	जिनशतक	॥)

पन्नालाल बाकलीवाल
ठि. मैदागिन जैनमंदिर
बनारस सिटी।